



श्रीरस्तु ।

श्रियः कान्ताय नमः ।

श्रीमते हयग्रीवाय नमः ।

श्रीपाञ्चरात्रे—

॥ ईश्वरसंहिता ॥

नम स्सकलकल्याणदायिने चक्रपाणये ।
विषयार्णवमग्नानां समुद्धरणहेतवे ॥ १ ॥
नारायणपदाम्भोजसमाराधनलालसाः ।
वेदवेदाङ्गनिपुणा स्तपोनिष्ठा महर्षयः ॥ २ ॥
इतिहासपुराणज्ञा धर्मशास्त्रविशारदाः ।
भगवद्भक्तिनिरता श्शमादिगुणसागराः ॥ ३ ॥
नारायणं तपस्यन्तं नरनारायणाश्रमे ।
संसेवन्त स्सदा भक्त्या मोक्षोपायविवित्सवः ॥ ४ ॥
संमिलिता मुनय स्सर्वे नारायणपरायणाः ।
कालेन केनचिल्लग्नान् नारायणदिदृक्षया ॥ ५ ॥
तत्राऽऽगत्य देवर्षि र्नारद स्सकुतूहलः ।
दृष्ट्वा नारायणं देवं नमस्कृत्य कृताञ्जलिः ॥ ६ ॥
पुलकाञ्चितसर्वाङ्गः प्रहृष्टवदनो मुनिः ।
स्तुत्वा नानाविधैः स्तोत्रैः प्रणम्य च मुहुर्मुहुः ॥ ७ ॥
पप्रच्छाथ तं देवं नारायणमनामयम् ।
अथ नारायणो देव स्समाह मुनिपुङ्गवम् ॥ ८ ॥

मुनयो यत्र तिष्ठन्ति प्रार्थयाना हरेः पदम् ।
एतेषां सात्वतं शास्त्र मुपदेष्टुं त्वमर्हसि ॥ ९ ॥
इत्युक्त्वाऽन्तर्दधे श्रीमन्नारायणमुनिस्तदा ।
तच्छ्रुत्वा भगवद्वाक्यं मुनि र्हृष्टतनूरुहः ॥ १० ॥
तदाज्ञां कर्तुकामोऽथ निर्जगाम मुनीश्वरः ।
अपश्यदाश्रमवरमृषीणामूर्ध्वरेतसाम् ॥ ११ ॥
नानापक्षिगणाकीर्णं नानामृगनिषेवितम् ।
तरुपुष्पलताढ्यं वापीकूपह्रदान्वितम् ॥ १२ ॥
तत्र गत्वा मुनिवर स्तत्रत्यै र्द्विजसत्तमैः ।
पूजितश्चार्ध्यपाद्याद्यैः विष्टरेऽभिनिवेशितः ॥ १३ ॥
मुनीनां प्रीतिजनकं वाक्यमेवमुवाच सः ।
नारायणोऽत्र सततं भवद्भि स्सेव्यते यतः ॥ १४ ॥
भवत्सु करुणा तस्य परिपूर्णा हि वर्तते ।
भवद्भि स्सह सम्बन्धात् कृतार्थोऽथ भवाम्यहम् ॥१५॥
आदिष्टोऽहं भगवता भवदर्थे मुनीश्वराः ! ।
अधीत्य साम्प्रतं सर्वे रहस्याम्नायमुत्तमम् ॥ १६ ॥
अद्य प्रभृति देवेशमाराधयत योगिनः ! ।

मुनयः ।

मुने ! चिरप्रपन्नानामस्माकं त्वं परा गतिः ॥ १७ ॥
नारायणपदप्राप्ते रुपायं सम्प्रकाशय ।

नारदः ।

शृणुध्वं मुनयस्सर्वे ! वेदमेकायनाभिधम् ॥ १८ ॥
मोक्षायनाय वै पन्था एतदन्यो न विद्यते ।
तस्मादेकायनं नाम प्रवदन्ति मनीषिणः ॥ १९ ॥

मूलभूतस्तु महतो वेदवृक्षस्य यो महान् ।
सद्ब्रह्मवासुदेवाख्यपरतत्त्वैकसंश्रयम् ॥ २० ॥
दिव्यैर्बलादिकैर्मन्त्रैः साक्षात्तत्प्रतिपादकैः ।
अलङ्कृतमसन्दिग्धमविद्यातिमिरापहम् ॥ २१ ॥
इत्युक्त्वाऽध्याप्य योगीन्द्रान् सङ्गगादाऽस्य वैभवम् ।
एष प्रकृतिधर्माख्यो वासुदेवैकगोचरः ॥ २२ ॥
प्रवर्त्यते कृतयुगे ततस्त्रेतायुगादिषु ।
विकारवेदा स्सर्वत्र देवतान्तरगोचराः ॥ २३ ॥
महतो वेदवृक्षस्य मूलभूतो महानयम् ।
स्कन्धभूता ऋगाद्यास्ते शाखाभूताश्च योगिनः ! ॥ २४ ॥
जगन्मूलस्य वेदस्य वासुदेवस्य मुख्यतः ।
प्रतिपादकता सिद्धा मूलवेदाख्यता द्विजाः ! ॥ २५ ॥
आद्यं भागवतं धर्ममादिभूते कृते युगे ।
मानवा योग्यभूतास्ते अनुतिष्ठन्ति नित्यशः ॥ २६ ॥
ततस्त्रेतायुगे सर्वे नानाकामसमन्विताः ।
व्यामिश्रयाजिनो भूत्वा त्यजन्त्याद्यं सनातनम् ॥ २७ ॥
अन्तर्दधाति सर्वोऽयं वासुदेवसमाहृतः ।
ततो योग्याय भगवान् प्रादुर्भावयति स्वयम् ॥ २८ ॥
एवं मया पुराऽधीतश्श्वेतद्वीपे मुनीश्वराः ! ।
सनस्सनत्सुजातश्च सनकश्च सनन्दनः ! ॥ १९ ॥
सनत्कुमारः कपिल स्सप्तमश्च सनातनः ।
एते एकान्तिधर्मस्य आचार्याश्च प्रवर्तकाः ॥ ३० ॥
मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः ।
वसिष्ठश्च महातेजा एते चित्रशिखण्डिनः ॥ ३१ ॥

मनुस्स्वायम्भुवश्चापि समाराध्य जगत्पतिम् ।
महता तपसा चैव देवं नारायणं प्रभुम् ॥ ३२ ॥
दिव्यं वर्षसहस्रन्तु तदन्ते समधीत्य च ।
मूलश्रुतिं यथावच्च ऋषयोऽध्यापितास्तु ते ॥ ३३ ॥
ततस्ते ऋषयस्त्वष्टौ लोकानां हितकाम्यया ।
श्लोकानां शतसाहस्रैः मूलवेदं निरीक्ष्य च ॥ ३४ ॥
तथा दिव्यानि शास्त्राणि सात्वतादीनि चाऽऽदरात् ।
निरीक्ष्याऽन्यत्तु तन्त्राख्यं शास्त्रं विदधिरे द्विजाः ! ॥३५॥
एवं मूलश्रुतेरर्थान् ज्ञात्वा मन्वादयोऽपि च ।
धर्मशास्त्राण्यनेकानि करिष्यन्ति यथातथम् ॥ ३६ ॥
अन्येषामपि शास्त्राणां योनिरेतद्भविष्यति ।
अस्मिन् धर्मश्च कामश्च अर्थश्चोक्तः ससविस्तरम् ॥३७॥
मोक्षश्च सूचितः पश्चात् तस्मात्सारतमो ह्ययम् ।
पुरा * तोदाद्रिशिखरे शाण्डिल्योऽपि महामुनिः ॥३८॥
समाहितमना भूत्वा तपस्तप्त्वा महत्तरम् ।
अनेकानि सहस्राणि वर्षाणां तपसोऽन्ततः ॥ ३९ ॥
द्वापरस्य युगस्याऽन्ते आदौ कलियुगस्य च ।
साक्षात्सङ्कर्षणाल्लब्ध्वा वेदमेकायनाभिधम् ॥ ४० ॥
सुमन्तुं जैमिनिं चैव भृगुं चैवौपगायनम् ।
मौञ्ज्यायनं च तं वेदं सम्यगध्यापयत्पुरा ॥ ४१ ॥
नरनारायणाभ्यां च जगतो हितकाम्यया ।
तथाऽनुष्ठीयते मूलधर्मोऽत्र मुनिपुङ्गवाः ! ॥ ४२ ॥
एष एकायनो वेदः प्रख्यातः स्मर्यते भुवि ।
दुर्विज्ञेयो दुष्करश्च प्रतिबुद्धैः निषेव्यते ॥ ४३ ॥

---

* "तोदनात्सर्वपापानां तोदाद्रिरिति कथ्यते" ।

मुनयः ।

भगवन् ! सर्वशास्त्रज्ञ ! शरणागतवत्सल ! ।
त्वत्प्रसादेन सम्प्राप्तो मूलवेदो महानयम् ॥ ४४ ॥
तत्प्रभावश्च विदित स्सर्वलोकेषु पूजितः ।
प्रतिबुद्धै र्निषेव्योऽयं मूलवेद स्सनातनः ॥ ४५ ॥
कथमप्रतिबुद्धैस्तै र्मग्नै र्भवमहाम्बुधौ ।
प्राप्यते भगवन् ! धर्म एकान्तिभि रनुष्ठितः ॥ ४६ ॥

नारदः ।

श्रूयतामभिधास्यामि सर्वलोकहितैषिण. ! ।
पुरैवं भगवानेव समालोच्य हरि स्स्वयम् ॥ ४७ ॥
परित्यज्य परं धर्मं मिश्रधर्म मुपेयुषाम् ।
भूयस्तत्पदकाङ्क्षाणां श्रद्धाभक्ती उपेयुषाम् ॥ ४८ ॥
अनुग्रहार्थं वर्णानां योग्यताऽऽपादनाय च ।
तथा जनानां सर्वेषा मभीष्टफलसिद्धये ॥ ४९ ॥
मूलवेदानुसारेण छन्दसाऽऽनुष्टुभेन च ।
सात्वतं पौष्करं चैव जयाख्येत्येवमादिकम् ॥ ५० ॥
दिव्यं सच्छास्त्रजालं तदुक्त्वा सङ्कर्षणादिभिः ।
प्रवर्तयामास भुवि सर्वलोकहितैषिभिः ॥ ५१ ॥
एवं दिव्यानि शास्त्राणि शाण्डिल्योऽपि महामुनिः ।
सङ्कर्षणाद्भगवतः श्रुत्वा अध्यापयन् मुनीन् ॥ ५२ ॥
मलयाचलनिष्ठाश्च पुरा रामस्य चाऽऽज्ञया ।
प्रथमं सात्वतं शास्त्रं सम्यगध्यापिता मया ॥ ५३ ॥
वासुदेवेन यत्प्रोक्तं शास्त्रं भगवता स्वयम् ।
अनुष्टुप्छन्दोबन्धेन समासव्यासभेदतः ॥ ५४ ॥

तथैव ब्रह्मरुद्रेन्द्रप्रमुखैश्च प्रवर्तितम् ।
लोकेष्वपि च दिव्येषु तद्दिव्यं मुनिसत्तमाः ! ॥ ५५ ॥
ब्रह्मरुद्रमुखैर्देवैः ऋषिभिश्च तपोधनैः ।
स्वयं प्रणीतं यच्छास्त्रं तत् ज्ञेयं मुनिभाषितम् ॥ ५६ ॥
एतत्तु त्रिविधं विद्धि सात्विकादिविभेदतः ।
विज्ञाय पुण्डरीकाक्षः अर्थजालं यथास्थितम् ॥ ५७ ॥
तद्बोधकं प्रणीतं यत् शास्त्रं तत्सात्विकं स्मृतम् ।
तस्मात् ज्ञातेऽर्थजाते तु किञ्चित्तदवलम्ब्य च ॥ ५८ ॥
स्वबुद्ध्यन्मेपितस्यैव ह्यर्थजातस्य बोधकम् ।
यत्प्रणीतं द्विजश्रेष्ठ ! तथा विज्ञानतत्त्वतः ॥ ५९ ॥
ग्रन्थविस्तरसंयुक्तं शास्त्रं सर्वेश्वरेश्वरात् ।
तत्संक्षेपप्रसादेन स्वविकल्पविजृम्भणैः ॥ ६० ॥
ब्रह्मादिभिः प्रणीतं यत् तथा तदपिभिर्द्विजाः ! ।
ब्रह्मादिभिः परिश्रुत्य तत्संक्षेपात्मना पुनः ॥ ६१ ॥
सविकल्पात्प्रणीतं यत् तत्सर्वं राजसं स्मृतम् ।
तस्माद् द्वेधा पञ्चरात्रवैखानसविभेदतः ॥ ६२ ॥
केवलंस्वविकल्पोक्तैः कृतं यत्तामसं स्मृतम् ।
केवलं मनुजैर्यत्तु कृतं तत्पौरुषं स्मृतम् ॥ ६३ ॥
अतो दिव्यात्परतरं नास्ति शास्त्रं मुनीश्वराः !
सात्वतं पौष्करं चैव जयाख्यं च तथैव च ॥ ६४ ॥
एवमादीनि दिव्यानि शास्त्राणि हरिणा स्वयम् ।
मूलवेदानुसारेण प्रोक्तानि हितकाम्यया ॥ ६५ ॥
सात्वताद्यं त्रिकं चैतत् व्यापकं मुनिसत्तमाः ! ।
यथा चाऽष्टाक्षरादीनां मन्त्राणां त्रितयं बुधाः ! ॥ ६६ ॥

एतत्तन्त्रत्रयोक्तेन विधिना यादवाचले ।
श्रीरङ्गे हस्तिशैले च क्रमात्सम्पूज्यते हरिः ॥ ६७ ॥
एतेषु दिव्यशास्त्रेषु सात्वतन्तूत्तमोत्तमम् ।
वक्ता साक्षादीश्वरोऽस्य श्रोता सङ्कर्षणः प्रभुः ॥ ६८ ॥
किं वर्ण्यतेऽस्य माहात्म्यं सात्वतस्य मुनीश्वराः! ।
अत स्साक्षादीश्वरोक्तशास्त्राणां द्विजपुङ्गवाः! ॥ ६९ ॥
सारभूतं विशेषेण सात्वतार्थोपपादकम् ।
ईश्वराख्यमिदं तन्त्रं साक्षात्सङ्कर्षणाच्छ्रुतम् ॥ ७० ॥
सम्प्रवक्ष्यामि मुनयः! शृणुध्वमवधानतः ।
इत्युक्त्वा नारदो योगी नत्वा नारायणं प्रभुम् ॥७१॥
सङ्कर्षणं नमस्कृत्य वक्तुं समुपचक्रमे ।

इति श्रीपाञ्चरात्रे ईश्वरसंहितायाम्
शास्त्रावतारो नाम प्रथमोऽध्यायः ॥

अथ द्वितीयोऽध्यायः ।

नारदः ।

आराधनविधिं वक्ष्ये शृणुध्वं मुनिपुङ्गवाः! ।
ब्राह्मे मुहूर्ते सम्प्राप्ते मन्त्रज्ञः प्रयत श्शुचिः ॥ १ ॥
नाम्नां सङ्कीर्तनं कुर्यात् उत्थाय शयने स्थितः ।
परिच्युतमल स्स्नात श्शुद्धवासा जितेन्द्रियः ॥ २ ॥
धृतोर्ध्वपुण्ड्रः काल्योक्तकर्माणि विनिवर्त्य च ।
गन्धैः स्रग्भि रलङ्कारैः कटकाद्यैरलङ्कृतः ॥ ३ ॥

सपवित्रकरो मौनी आसाद्य भगवद्गृहम् ।
द्वाराद्बहिर्यथायाम्यं शुद्धेन सलिलेन च ॥ ४ ॥
आजानु पादौ प्रक्षाल्य हस्तौ चाऽऽमणिबन्धनात् ।
आचम्य च प्रविश्याऽन्तः प्रणम्य मनुमुच्चरन् ॥ ५ ॥
धाम प्रदक्षिणीकृत्य बोधयेत्पुरुषोत्तमम् ।
शङ्खध्वनिसमोपेतैः दुन्दुभीपटहस्वनैः ॥ ६ ॥
वन्दिवृन्दोत्थितोच्चाभिः नानावाग्भिर्महामते ! ।
महाजयजयारावैः पुनः पुनरुदीरितैः ॥ ७ ॥
प्रबोधलक्षणैः स्तोत्रैरुत्थाप्य शयनाच्चतः ।
द्वारमासाद्य तत्रस्थो वक्ष्यदिग्बन्धपूर्वकम् ॥ ८ ॥
अस्त्रकुम्भत्राऽथ तत्तोयैः मन्त्रं कवचमुच्चरन् ।
स्थिते वा कल्पिते तत्र पूजयेद्बलिमण्डले ॥ ९ ॥
सर्वं सुरेशपूर्वन्तु परिवारं हि साच्युतम् ।
मनसा प्रणवाद्येन विष्णुमादाय कीर्तयेत् ॥ १० ॥
समस्तपरिवाराय अच्युताय नमो नमः ।
धाम्नुपूरणमन्याश्च समभ्यर्च्य यथाक्रमम् ॥ ११ ॥
मूलमन्त्रेण साङ्गेन निरङ्गेनाऽथ वा पुनः ।
न्यासं कृत्वा विराचार्यो हस्तताले हृदा ततः ॥ १२ ॥
मूलमन्त्रेण चोद्घाट्य कपाटं नेत्रमन्त्रतः ।
नित्यदीपान्वितौ ज्वाल्य हस्तौ प्रक्षाल्य वारिणा ॥१३॥
प्रासादान्तः प्रवेशार्थं ततो द्वारन्तु चेतसा ।
विभागीकृत्य तन्मध्यभागमेवं द्विधा पुनः ॥ १४ ॥
विभज्य वामदेशेन दक्षिणेनाङ्घ्रिणा ततः ।
शनैश्शनैः प्रविश्यान्तस्त्वास्त्रमन्त्रेण तेन वै ॥ १५ ॥

धरणीहनन कृत्वा भगवन्त प्रणम्य च ।
मनसा गुरुनश च तदाज्ञा मानसीमथ ॥ १६ ॥
शिरसा धारयेत्स्वेष्ट फल सङ्कल्प्य चेतसा ।
देवाय त निवेद्याऽथ यागाऽगारस्य मध्यत ॥ १७ ॥
प्रासाद विग्रह कृत्वा वर्ममन्त्र सविग्रहम् ।
सञ्जीव भगवन्त च ध्यात्वा यागगृह तत ॥ १८ ॥
सशलाकै स्ततो दर्भै स्सह देवीविमिश्रितै ।
सम्मार्ज्य बहुतोयेन प्रक्षाल्याऽऽलिप्य गोमयै ॥१९॥
उपलिप्तमथाऽस्त्रेण सविध्य शकल त्यजेत् ।
पञ्चगव्येन सास्त्रेण वारिणा प्रोक्ष्य चन्दनै ॥ २० ॥
कुङ्कुमागरुकर्पूरै स्समालिप्य समन्तत ।
कुशदूर्वाऽक्षताश्चैव विकिरेत् स्थानशुद्धये ॥ २१ ॥
प्रासाद शोधयेद्देव स्वयमेव तु देशिक ।
प्रासादोद्देशमखिल मार्जयेत्प्रोक्षयेत्तत ॥ २२ ॥
परिचारैस्तु कर्तव्य वलिपीठान्तमेव हि ।
यागोपस्कारसम्भूतौ भगवन्त मनुस्मरन् ॥ २३ ॥
विनीतान् शिष्यपुत्रादीन् स्नातानाज्ञापयेत्तत ।
पात्रशुद्धि च तैरेव कारयेत् द्विजसत्तम ॥ २४ ॥
आम्रकल्केन तोयेन हैम ताम्र च शोधयेत् ।
राजत गृहधूमेन शान्ताङ्गारेण वा पुन ॥ २५ ॥
भस्ममिश्रेण तोयेन लोहयुक्त विशोधयेत् ।
शङ्खशुक्तिमयाना च लवणेन विशोधयत् ॥ २६ ॥
फलपत्रमयाना च मृद्भिरद्भिश्च शोधयेत् ।
लेपगन्धापनोदेन शुद्धिर्भवति कारयेत् ॥ २७ ॥

द्रव्यशुद्धिर्भवत्येन यथावद्विधिचोदिता ।
पात्राणि शाधयित्वैन ततो मौनपरो द्विज ॥ २८ ॥
देवेशस्याऽग्रतो वाऽपि दक्षिण भागमाश्रयेत् ।
ईश्वरभाग्यवशादेव ह्युत्तराभिमुखो द्विज ॥ २९ ॥
अथोपविश्य वै दार्भे काष्ठजे वा ऽजिनासने ।
आगमार्थं च देवाना गमनार्थं च रक्षसाम् ॥ ३० ॥
कुर्याद्घण्टारव तत्र देवतास्थानलाञ्छनम् ।
शङ्खादिघोषसयुक्त गेयवाद्यसमन्वितम् ॥ ३१ ॥
करशुद्धि तत कुर्याद्यथावन्मुनिपुङ्गवा ॥ ।
द्वे तले हस्तपृष्ठे द्वे सर्वाश्चाऽङ्गुलयस्तथा ॥ ३२ ॥
अस्त्रमन्त्रेण सशोध्य ध्यानमुद्रान्वितेन तु ।
कृत्वैव करशुद्धि च स्नानशुद्धि समाचरेत् ॥ ३३ ॥
ध्यात्वा देव स्वरूप सहस्रार्कसमप्रभम् ।
ज्वालाकोटिसमाकीर्णं वमन्त ज्वलन मुखात् ॥ ३४ ॥
तेन सम्पूरयेत्सर्वमाब्रह्मभवनान्तिमम् ।
दिगोघ प्रज्वलन्त च भावयेन्मन्त्रतेजसा ॥ ३५ ॥
क्ष्मामण्डलमिद सर्वं सरेसक च वह्निना ।
मन्त्रेनेन द्विजश्रेष्ठा ! मृन्मय भाजन यथा ॥ ३६ ॥
स्नानशुद्धि भवत्येव सुधाकल्लोलसेचनात् ।
सम्मार्ग्यैवं तत कुर्याद्दिग्बन्ध हृदयादिकैः ॥ ३७ ॥
अस्त्रेणैव विदिग्बन्ध मन्त्रेण स्वतऊर्ध्वत ।
आदित्यायुतदीप्तेन ज्वलत्स्त्रुकरूपिणा ॥ ३८ ॥
कवचेन तु तर्जन्या रन्ध्रार्थमवगुण्ठयेत् ।
सायामा मूतमशुद्धि धारणाभ्या समाचरेत् ३९ ॥

केवलेन तु मन्त्रेण भावनासहितेन तु ।
नाभिदेशस्थितं ध्यात्वा देवं सङ्गृह्य कल्मषम् ॥४०॥
निस्सृतं वायुमार्गेण द्वादशान्तावधौ क्षिपेत् ।
निरस्तपापमाकृष्य वातचक्रसमन्वितम् ॥ ४१ ॥
नासाग्रेण तु मन्त्रेऽमुं देहसम्पूरणाय च ।
तं ध्यायेद्धृदयस्थं च गतिरुद्धेन वायुना ॥ ४२ ॥
चित्तोपशमनार्थं तु नूनं वायुजयाय च ।
शनैश्शनैरथ बहिः केवलं मारुतं क्षिपेत् ॥ ४३ ॥
विनाऽन्यरेचकेनैवमन्येषामुत्तरोत्तरम् ।
कालाभ्यासं यथाशक्ति नित्यमेवं समाचरेत् ॥ ४४ ॥
द्वादशान्तेऽथ मन्त्रेशं तप्तहाटकसन्निभम् ।
सहस्ररविसङ्काशवृत्तमण्डलमध्यगम् ॥ ४५ ॥
स्मृत्वाऽथ मुक्तं तन्मन्त्रैर्निर्दहेद्विग्रहं स्वकम् ।
दक्षिणाङ्घ्रेरथाऽङ्गुष्ठप्रान्ते देशे शिखाक्षरम् ॥ ४६ ॥
ध्यात्वा युगान्तहुतभुग्वज्वालासमावृतम् ।
तेन स्वविग्रहं ध्यायेत्प्रज्वलन्तं समन्ततः ॥ ४७ ॥
देहजां भावयेज्ज्वालां मन्त्रनाथे लयं गताम् ।
दिव्यप्रशान्ताऽगारं तु तमधिष्ठाय चेतसा ॥ ४८ ॥
स्वमन्त्रादमृतौघेन सेचयेद्विग्रहं स्वकम् ।
ततस्स्वमन्त्रं तद्विम्बमाकृष्य हृदि विन्यसेत् ॥ ४९ ॥
एवं स शुद्धदेहोऽथ मन्त्रन्यासं समाचरेत् ।
येन विन्यस्तमात्रेण देवदेवसमो भवेत् ॥ ५० ॥
पूजादिसर्वकार्याणामधिकारश्च जायते ।
हस्तद्वयेऽपि विन्यस्येद्दीप्तमष्टाक्षरं परम् ॥ ५१ ॥

मणिबन्धान्तरामान्तमादित्यातपवत्सन ।
सृष्टिसंस्थितिसंहारन्यास कुर्याद्यथाविधि ॥ ५२ ॥
पर्वदक्षिणतर्जन्या प्रारभ्याङ्गुलिपर्वसु ।
पर्वान्त वामतर्जन्या न्यासम्सृष्टिरुदाहृत ॥ ५३ ॥
व्यत्यासेन तु संहार * स्थितौ तु करयोर्द्वयो ।
प्रारभ्य तर्जनीपर्वकनिष्ठापर्वविश्रम ॥ ५४ ॥
अङ्गुष्ठाभ्यामङ्गुलीना मध्यपर्वसु विन्यसेत् ।
मन्त्राक्षराणि त्वाद्यन्तपर्वसु प्राणमन्न्यसेत् ॥ ५५ ॥
अङ्गुष्ठद्वितय यावत्कनिष्ठाद्वितयावधि ।
ज्ञानाद्य वीर्यपर्यन्त विन्यसेदङ्गपञ्चकम् ॥ ५६ ॥
मूलव्यापकत्वेन नेत्रमूर्ध्वाङ्गुलीषु च ।
किरीट दक्षिणे हस्ते श्रीवत्स वाममध्यत ॥ ५७ ॥
कौस्तुभ दक्षिणतले वनमाला तथाऽपरे ।
दक्षिणे मध्यत पद्म प्रस्फुरत्किरणोज्ज्वलम् ॥ ५८ ॥
गदा वामतले न्यस्येत् वलन्ती स्वेन तेजसा ।
दक्षे म(प्र)हाप्रभ चक्र शङ्ख वामतले न्यसेत् ॥ ५९ ॥
श्रिय दक्षिणहस्ते तु पुष्टि वामतले न्यसेत् ।
अङ्गुष्ठादक्षिणाद्यावत् वामा त मूलदेशत ॥ ६० ॥
गारुड विन्यसेन्मन्त्र दशस्वङ्गुलिषु क्रमात् ।
अनेन विधिना पूर्वं हस्तन्यास समाचरेत ॥ ६१ ॥
आरक्तगन्धाधारादीन् मूलमन्त्र तु विग्रहे ।
व्यापकत्वेन विन्यस्य पादाद्यदिदिशोऽन्तिमम् ॥ ६२ ॥
सृष्टिस्थितिसंहारन्यासत्रयं देहे समाचरेत् ।
मूर्धादिपादपर्यन्त सृष्टिन्यास मनीषिणः ॥ ६३ ॥

---

* स्थितौ तु—इति पाठान्तरम् ।

पादादिमूर्धपर्यन्त सहारन्यास इष्यते ।
नाभ्यादिहृदयान्तस्तु स्थितिन्यास उदाहृत ॥ ६४ ॥

मूर्ध्नि मध्यमयाऽङ्गुल्या तर्जन्या च तदा दृशो ।
साङ्गुष्ठयाऽनामिकया मुखमध्ये तु विन्यसेत् ॥ ६५ ॥

साङ्गुष्ठतर्जन्यग्रेण हृदये विन्यसेत्तत ।
तथाऽङ्गुष्ठकनिष्ठाभ्या नाभौ न्यास समाचरेत् ॥ ६६ ॥

व्यङ्गुष्ठाभिश्चतसृभिरपसे जानुनोरपि ।
सर्वाभिरङ्गुलीभिस्तु पादयोर्न्यासमाचरेत् ॥ ६७ ॥

मन्त्राक्षर तु सर्वत्र तारसम्पुटित न्यसेत् ।
एवमष्टाक्षरन्यास कृत्वा ऽङ्गन्यासमाचरेत् ॥ ६८ ॥

ततस्तु हृदये ज्ञान यतो व्यज्येत तत्र तत् ।
ऐश्वर्यं शिरसो देशे यस्मादुपरि तिष्ठति ॥ ६९ ॥

प्राकृत तात्त्विक याऽपि सर्वत्र कमलेक्षणम् ।
हार्दामिन्दूर्ध्वगायान्तु शिखाया शक्तिमन्त्रराट् ॥ ७० ॥

बल चाऽसि[illegible] स्वगत वायुना सह ।
मूर्च्छित सर्वगात्रेषु तद्वीर्यं हस्तयोर्न्यसेत् ॥ ७१ ॥

अन्तर्बोधस्वरूप यत् मारुत [illegible] ।
तेजस्तत्तन्मये स्थाने न्यासकाले समस्यते ॥ ७२ ॥

किरीट मूर्ध्नि विन्यस्येत् [illegible] ।
श्रीवत्स वक्षसो वामे पूर्णेन्दुसदृशद्युति ॥ ७३ ॥

कौस्तुभ हृदये न्यस्य चण्डदीधिति[illegible] ।
नानारत्न[illegible] वनमाला च कण्ठत ॥ ७४ ॥

[illegible] विन्यसेत् ।
[illegible] तथा ॥ ७५ ॥

पुष्टिं गुल्फावसाने च गरुड चोरुमध्यत ।
मन्त्रन्यास तु कृत्वैव तत पाणिद्वयेन तु ॥ ७६ ॥
मुद्रा बध्वा स्मरेद्ध्यान देवोहमिति भावयेत् ।
कृत्वैव तु तत पश्चान्मानस यागमारभेत् ॥ ७७ ॥
पद्मासनादिक बध्वा नाभौ ब्रह्माऽञ्जलिं दृढम् ।
मनस्सुपरत कुर्यादक्षग्राम बहि स्थितम् ॥ ७८ ॥
चित्त बुद्धौ विनिक्षिप्य ता बुद्धिं ज्ञानगोचरे ।
ज्ञानभावनया कर्म कुर्याद्धै पारमार्थिकम् ॥७९ ॥
अथ प्रणवपूर्वेण स्वनाम्ना ऽऽत्मलिना सह ।
शेषपूर्वन्तु वह्न्यन्तमासन परिकल्पयेत् ॥ ८० ॥
तथाऽऽत्मन्याय तस्यैव कार्या सद्धृदि कल्पना ।
चतुश्चक्रे नवद्वारे देहे देवगृहे पुरा ॥ ८१ ॥
कण्ठकूपधरारूढ हृत्पद्म यदधोमुखम् ।
तत्कर्णिकावनेर्मध्ये रूढमूर्ध्वमुख तु यत् ॥ ८२ ॥
शब्दव्यक्तिमदूर्ध्वे तु स्थितार्केन्द्वग्निलक्षणा ।
श्रीदीप्तिभास्वरा नाडी त्वव्यक्तध्वनिविग्रहा ॥ ८३ ॥
व्यक्तचक्रद्वयस्योर्ध्वे वर्तते या महामते ।
निम्नगा ब्रह्मरन्ध्रेण गता सूर्यपथात्परम् ॥ ८४ ॥
वायुद्वारेण पाताल भित्वा याता स्वगोचरम् ।
सङ्कल्पविषयस्सर्वस्तद्वन्व प्रतितिष्ठति ॥ ८५ ॥
सूत्रे मणिगणो यद्वन्मध्यनाडी यत स्मृता ।
लक्ष्यस्थाने तु पूर्वोक्ते तस्यामभ्यन्तरे तु वै ॥ ८६ ॥
सम्पुटे शशिसूर्याख्ये निमेषोन्मेषलक्षणे ।
तत्राऽऽत्म नादसमाख्य परावाग्भ्रमरी स्थिता ॥ ८७ ॥

या सर्वमन्त्रजननी शक्तिस्सर्वात्मनो विभोः ।
नदन्ती वर्णजं नादं शब्दब्रह्मेति यत् स्मृतम् ॥८८॥
अकारपूर्वो हान्तश्च धारासन्तानरूपधृक् ।
नादावसानगगने देवोऽनन्तसमन्वितः ॥ ८९ ॥
वरदाऽभयदेनैव शङ्खचक्राङ्कितेन तु ।
त्रैलोक्योद्धतिदक्षेण युक्तः पाणिद्वयेन तु ॥ ९० ॥
शान्तस्संवित्स्वरूपस्तु भक्तानुग्रहकाम्यया ।
अनौपम्येन वपुषा ह्यमूर्तो मूर्तितां गतः ॥ ९१ ॥
विश्वमाप्याययत्कान्त्या पूर्णेन्दुयुततुल्यया ।
रश्मिभिर्भास्करो यद्वत्समुद्र इव वीचिभिः ॥ ९२ ॥
स्वमूर्तिभिरमूर्ताभिरच्युतादिभिरन्वितः ।
दीप्तिमद्भिरमूर्तैस्तु सुधाकल्लोलसङ्कुलः ॥ ९३ ॥
पूर्ण आभरणे स्सर्वैर्निर्विकाराङ्घ्रिविग्रहः ।
तस्माद्देवं समावाह्य हृदये कल्पितासने ॥९४ ॥
मन्त्रन्यासं ततः कुर्यात् हस्तन्यासं विना विभोः ।
ततः स्वाब्जक्रमध्यात्तु ह्यर्घ्यस्थात्संस्मरेत् च्युताम् ॥ ९५ ॥
गङ्गां भगवतो मूर्ध्नि तेनाऽमृतजलेन तु ।
अर्घ्यादाखिलभोगानां कार्या वै शुभकल्पना ॥ ९६ ॥
यं यं सङ्कल्पयेद्भोगं तं तं भाव्य सुधामयम् ।
पतन्तमम्बराद्वेगादमृतांशुपरिप्लुतम् ॥ ९७ ॥
साक्षादमृतरूपैस्तु तैस्तैरमृतसम्प्लवैः ।
बृंहितं मुदितं मत्वा स पुनर्मन्त्रराट् स्मरेत् ॥ ९८ ॥
ततस्तु देवदेवस्य अर्घ्यं दत्वा यथाविधि ।
सन्निधिं सन्निरोधं च साम्मुख्यं च समाचरेत् ॥ ९९ ॥

हृदयादीनि (१) साङ्गानि किरीटाद्य तु भूषणम् ।
गदाद्य लाञ्छनं यत्तु लक्ष्म्याद्यास्तच्छक्तयस्तथा ॥ १०० ॥
गरुडो मूर्तयो चाऽन्या देहे देवस्य या स्थिता ।
व्यापकस्य तथात्तेन स्वे स्वे स्थाने प्रभात्मना ॥१०१॥
तद्देहसंस्थितास्सर्वे पूजनीया क्रमेण तु ।
परिवार विना मन्त्रैस्स्वै स्वरव्याद्यैर्द्विजा ! ॥ १०२ ॥
लययागो ह्यय विप्रा ! हृदादिष्वनुकीर्तित ।
मन्त्रराट् कर्णिकामध्ये हृदाद्या प्राग्दलादिषु ॥१०३॥
साकारा केवलास्सर्वे पूज्या भोगाभिधो ह्ययम् ।
केवलेन च यागेन पृथग्भूतेन वै द्विजा ! ॥ १०४ ॥
तेषामभ्यर्चनविधिरधिकारात्मिक स्मृत ।
एव कृत्वा लयाख्य तु याग भोगाभिध तथा ॥१०५॥
ध्यात्वाऽथ भावनाजातैर्भोगै परमपावनै ।
अभ्यर्चयेत्स्वहृदये देव विज्ञापयेदिदम् ॥ १०६ ॥
स्वागत देवदेवेश ! सांनिध्यं भज मेऽच्युत ! ।
गृहाण मानसीं पूजा यथार्थपरिभाविताम् ॥ १०७ ॥
ज्ञात्वा तु सुप्रसन्न त प्रसादाभिमुख प्रभुम् ।
विस्तरेण (२) द्विजश्रेष्ठो मानस यागमारभेत् ॥ १०८ ॥
सङ्कल्पनिर्मितैर्दिव्यै पवित्रैरक्षयैश्शुभै ।
सर्वकामप्रद देव मन्त्रमूर्तिधर यजेत् ॥ १०९ ॥
अभ्यङ्गोद्वर्तने पूर्वं स्नान चाऽथ विलेपनम् ।
वस्त्रभूषाणि माल्यानि सुगन्धानि निवेद्य च ॥ ११० ॥

---

(१) चाङ्गानि—इति च पाठ ।
(२) द्विजश्रेष्ठा ! इत्यपि पाठ ।

हारकेयूरकटकैर्मकुटैर्भूषित स्मरेत् ।
चित्रेण कटिसूत्रेण हेमरत्नमयेन च ॥ १११ ॥
माणिक्यरचितैश्शुद्धैर्मुक्ताहारैश्च भूषयेत् ।
सम्पूर्णेन्दुसमान च हेमदण्डसमन्वितम् ॥ ११२ ॥
छत्र निवेदयेद्विष्णोर्मायूरव्यजन शुभम् ।
कर्पूरचूर्णसम्मिश्र सुगन्धि मधुर बहु ॥ ११३ ॥
धूप भगवतो दत्वा दीपमाला घृतेन च ।
मधुसर्पि प्लुत चाऽस्य मधुपर्कं निवेदयेत् ॥ ११४॥
पशु च विविध मूर्तं पावन शकुनिं तथा ।
ओषधीश्शालिदूर्वाश्च सत्फलाढ्य वनस्पतिम् ॥ ११५ ॥
मूर्तं निवेदयेत्पूर्वमिदमन्न चतुर्विधम् ।
निवेद्य विविध शुद्ध भक्ष्यभोज्यान्यनेकश ॥ ११६ ॥
हृद्यानि फलमूलानि षड्रसप्रभवानि च ।
षड्रसानि विचित्राणि पानान्यथ निवेद्य च ॥ ११७॥
सर्वाण्यात्मोपभोग्यानि भक्तिश्रद्धावशात् द्विजा ॥
मदिक्ष्वप्यविरुद्धानि देवाय विनिवेदयेत् ॥ ११८ ॥
तन्त्रीगाद्यान्यनेकानि नृत्तगेयान्वितानि च ।
भेरीपटहघोषादिस्तुतिपठान्वितानि च ॥ ११९ ॥
चिन्तयेद्देवदेवस्य लोकत्रयगतानि च ।
किङ्किणीजालयुक्तेन चामरेणोपवीज्य च ॥ १२० ॥
वितानक पताकाश्च ध्वजानि विविधानि च ।
विनिवेद्य विभोर्भक्त्या प्रसन्नेनाऽन्तरात्मना ॥ १२१ ॥
गजाश्वधेनुयानानि सुवस्त्रालङ्कृतानि च ।
निवेद्य चाऽन्तरा तानि माहयन्त स्मरेत्तत ॥ १२२ ॥

आत्मानं ससुतं दारान् सर्वस्वेन समायुतान् ।
निवेद्य प्रणतो मूर्ध्ना आनन्दाश्रुसमन्वितः ॥ १२३ ॥
कामधेनुमयीं मुद्रां मनसा मन्त्रसंयुताम् ।
बद्ध्वा सञ्चिन्तयेद्विष्णोस्सर्वकामप्रपूरणीम् ॥ १२४ ॥
ततो निशेषयन्नन्नं कल्पयेदच्युतस्य तु ।
सौवर्णपुष्पसम्पूर्णमञ्जलिं सम्प्रमार्य तु ॥ १२५ ॥
मूलमन्त्रं समुच्चार्य प्रयत्नैः पूरकादिभिः ।
दीर्घघण्टारवप्रख्य यावत्तत्सम्भवावधि ॥ १२६ ॥
स्फुरद्रश्मिद्वयाकीर्णं वह्न्यर्केन्दुसमप्रभम् ।
ध्यात्वा नारायणं देवमञ्जसा सन्निरोधयेत् ॥ १२७ ॥
तमञ्जलिं क्षिपेन्मूर्ध्नि तस्मिन् वै मन्त्रविग्रहे ।
अर्घ्यं निवेदयेद्भूय पुनः पुष्पाञ्जलिं शुभम् ॥१२८॥
मुद्रां सन्दर्श्य मूलाख्यां मानसं जपमारभेत् ।
सङ्ख्याहीनं यथाशक्ति घण्टाख्यानक्रमेण च ॥ १२९ ॥
योगस्थानगतानां च हृदादीनां क्रमेण तु ।
मनसा दर्शयेन्मुद्रां जपं कुर्यात्सहस्रकम् ॥ १३० ॥
स्तोत्रमन्त्रैः पवित्रैश्च स्तुत्वा सम्यक् प्रसादयेत् ।
जपान्ते चैवमभ्यर्च्याऽप्यवतार्य बहिर्यजेत् ॥ १३१ ॥

इति श्रीपाञ्चरात्रे ईश्वरसंहितायाम्
मानसयागविधिर्नाम
द्वितीयोऽध्यायः ॥

अथ तृतीयोऽध्यायः ।

पुराऽनेन विधानेन कृत्वा यागं तु मानसम् ।
कर्मणा भक्तियुक्तेन बहिर्बिम्बे यजेत्ततः ॥ १ ॥
बाह्ययागविधिं सम्यक् शृणुध्वं मुनिपुङ्गवाः ! ।
देवं हृत्कमलाकाशे तेजोरूपतया स्थितम् ॥ २ ॥
तस्मात् स्थानात्समानीय तं कुर्यान्नेत्रमध्यगम् ।
वासुदेवाभिधानं तु प्रागुक्तं च समाश्रयेत् ॥ ३ ॥
ततो लोचनयुग्मेन स्तब्धेन मुनिपुङ्गवाः ! ।
जपन् लोचनमन्त्रं तु पश्येद्यागोपयोगिनम् ॥ ४ ॥
सम्भारमखिलं तेन द्रव्यसङ्घो विशुध्यति ।
उपार्जितं पुरा यद्वै यागोपकरणं महत् ॥ ५ ॥
तत्सर्वं तत्क्षणे कृत्वा वामे तु करकं न्यसेत् ।
गालितेनाऽम्भसा पूर्णं मध्ये भद्रासनं न्यसेत् ॥ ६ ॥
यत्किञ्चित्पत्रपुष्पाद्यं परिदृश्येत पिङ्गलम् ।
पाणिना तत्समाहृत्य शुचिस्थाने निधाय वै ॥ ७ ॥
गव्यैर्वा चामरैर्वालैश्शिखिपक्षैः कुशैरथ ।
सम्मार्ज्य भद्रपीठं तु वाससा सुसितेन वा ॥ ८ ॥
बहुना वस्त्रपूतेन वारिणा तदनन्तरम् ।
प्रक्षाल्य द्वादशार्णेन प्रणवाद्य-तकेन तु ॥ ९ ॥
एवमाराधनाधारं क्षालयित्वा च वारिणा ।
तत्तावदस्त्रपुष्पेण कुर्याद्विघ्नगणोज्झितम् ॥ १० ॥
आराध्यायामथाऽऽरोप्य तत्र मन्त्रमयीं शुभाम् ।
सर्वोपकरणोपेतां सर्वलक्षणसंयुताम् ॥ ११ ॥

प्रतिमा धातुपाषाणनिर्मितामात्मसिद्धये ।
दिव्यार्घ्यपाद्याचमनैर्देवमभ्यर्च्य वै ततः ॥ १२ ॥
भुक्तमर्घ्यादिकं तस्मादपनीयाऽभिवाद्य च ।
समर्प्य विष्वक्सेनस्य सगोऽग्र्य मृदुना द्विजा ! ॥१३॥
उशीरवशकूर्चेन क्षालयेदम्भसा ततः ।
उच्चरन् मूलमन्त्रं वा कुर्यान्मार्गत्रयं विभो. ॥ १४ ॥
सुधौते देवदेवस्य वाससी परिधापयेत् ।
चित्रस्थाङ्गवह्निस्थाद्भुक्तपुष्पादिकं हि यत् ॥ १५ ॥
अपनीय तु तत्कुर्याद्वाससा रेणुमार्जनम् ।
यद्वा प्राग्यागभवनप्रवेशानन्तरं द्विजाः ॥ १६ ॥
न्यस्य भद्रासनाद्यन्तमन्यदन्यत्समाचरेत् ।
यद्वा सदातने काले न्यस्य भद्रासनादिकम् ॥ १७ ॥
आद्य मार्गत्रयं कृत्वा यथोक्तविधिना ततः ।
योगपीठार्चनारम्भे निम्नोक्तं सर्वमारभेत् ॥ १८ ॥
अथाऽर्घ्यादीनि पात्राणि प्रक्षाल्याऽस्त्रेण वारिणा
गालितेनाऽम्भसाऽऽपूर्य पात्राणि मुनिसत्तमाः ! ॥ १९ ॥
मुख्यामुख्याऽर्घ्यपात्रादिक्रमाद्द्रव्याणि निक्षिपेत् ।
तस्मिन् चन्दनादीनि दूर्वासिद्धार्थकानि च ॥ २० ॥
साक्षतानि कुशाग्राणि तण्डुलानि तिलांस्तु वै ।
सरलानुत्तमान् धातून् सकल्पान् विनिवेशयेत् ॥ २१ ॥
द्वितीये दधिमध्वाज्यक्षीरनिचुचतुष्टयम् ।
कुशाग्रेण समायुक्तं सपुष्पतिलतण्डुलम् ॥ २२ ॥
दूर्वां च विष्णुक्रान्तां च श्यामाकं भद्रपुष्पकम् ।
पद्मकं कुन्दरेणु च पाद्यपात्रे विनिक्षिपेत् ॥ २३ ॥

त्वगेलाद्यचयं सर्वं सकर्पूरं च चन्दनम् ।
न्यसेदाचमनीयाख्यपात्रे तु मुनिसत्तमाः ! ॥ २४ ॥
कोष्ठं मांसीं हरिद्रे द्वे मुराशैलेयचम्पकान् ।
वचाकच्चोरमुस्ताश्च स्नानीये तु विनिक्षिपेत् ॥ २५ ॥
हृन्मन्त्रेणैव सर्वत्र कुर्याद्वै द्रव्ययोजनम् ।
आधारोपरि पात्राणि स्वपूर्वनियमेन तु ॥ २६ ॥
वायव्यादिषु विन्यस्य तत्तत्कल्पनमन्त्रतः ।
"ओम् अर्घ्यं कल्पयामी" ति उक्त्वा वायुपदे न्यसेत् ॥२७॥
कलशं तद्वदैशान्यां न्यसेदाचमनार्थतः ।
स्नानार्थमग्निकोणे तु पाद्यार्थं नैऋते तथा ॥ २८ ॥
अग्रतो वाऽपि तन्मध्ये न्यसेदर्घ्यं द्वितीयकम् ।
यद्वा प्रागेव पात्राणि न्यस्याधारोपरि द्विजाः ! ॥ २९ ॥
तत्तत्कल्पनमन्त्रैस्तु तानि हस्तेन संस्पृशेत् ।
दक्षिणोत्तरहस्ताभ्यां हृद्बीजेन विचिन्त्य च ॥ ३० ॥
सूर्यसोमौ ततः कुर्याद्द्रव्यदाहसमुद्भवौ ।
बध्वा कामदुघां मुद्रा स्रवन्तीं मन्त्रसंयुताम् ॥ ३१ ॥
गोरूपां हिमशैलाभां निराधारपदे स्थिताम् ।
तया तदमृतीकुर्यात् द्रव्यजालं यथास्थितम् ॥ ३२ ॥
वर्गेऽष्टमे तृतीयार्णं वकारोपरि संस्थितम् ।
ईकारानुस्वारयुक्तं नमःप्रणवमध्यगम् ॥ ३३ ॥
सौरभीयो ह्ययं मन्त्रः स्ववाणीसंयुतो द्विजाः ! ।
एवं वाणीद्वयेनैव अग्नीषोमात्मकेन तु ॥ ३४ ॥
योग्यतां पदवीं नीत्वा भेषयेद्यदाहृतम् ।
तोयमादाय पात्रेऽथ तत्र हृन्मन्त्रितं क्षिपेत् ॥ ३५ ॥

पुष्पगन्धसमोपेतं मुसितं शालितण्डुलम् ।
मन्त्रयेत्प्रणवाद्येन बहुशो हृदयेन तु ॥ ३६ ॥
तदुद्धृतेनाऽम्भसा वै अस्त्रमन्त्रं समुच्चरन् ।
प्रोक्षयेत्स्वासनं स्थानं यागोपकरणं तथा ॥ ३७ ॥
साक्षेण मूलमन्त्रेण अर्घ्यादीनभिमन्त्र्य तु ।
सषडङ्गेन तेनैव कुर्यात्पुष्पादिनाऽर्चनम् ॥ ३८ ॥
धूपपात्रं च घण्टां च समभ्यर्च्य यथाविधि ।
घण्टाचालनपूर्वं तु धूपेनाऽर्घ्यादिकान् यजेत् ॥ ३९ ॥
धूपपात्रस्य घण्टाया पूजनं चोच्यतेऽधुना ।
पद्मचक्राङ्कितं दिव्यमाधारकजरूपिणम् ॥ ४० ॥
एकनालं च कर्तव्यं शेषं सप्तफणं विभुम् ।
बद्धाञ्जलिपुटं नित्यं ध्यायन्तं कारणं परम् ॥ ४१ ॥
चक्रलाङ्गलहस्तं च पद्मासनगतं विभुम् ।
कर्तव्यं धूपधर्तारं किङ्किणीजालशोभितम् ॥ ४२ ॥
चक्रं तच्चक्रहृदयं पद्मं ह्वत्कोटरं विदुः ।
चक्रे या या अरास्त्यास्ता नाड्यो वै द्वादश स्मृता ॥ ४३ ॥
किङ्किण्यो याः स्थिता विप्र ! ज्ञेयास्तास्सूक्ष्मनाडयः ।
यासां वै मध्यमा शक्तिर्भुजङ्गकुटिलोपमा ॥ ४४ ॥
धूम्रधूसरवर्णाभा अण्डं भित्त्वा विनिर्गता ।
पाताभिहृदयोत्था सा सत्यान्ते तु एव गता ॥ ४५ ॥
तया सद्योदितो ह्यात्मा मन्त्रमूर्तीश्वरः प्रभुः ।
सन्निधौ भवति क्षिप्रमभ्युच्छिन्नः दहेत्तथा ॥ ४६ ॥
मन्त्रेणाऽनेन विप्रेन्द्र ! तन्मन्त्रमवधारय ।
ओङ्कारं पूर्वमुद्धृत्य परमात्मा ततः पुनः ॥ ४७ ॥

व्योमानन्देन संयुक्तमनन्ताय पदं ततः ।
कालाग्निरूपाय पदं जगद्भ्रमपदं तथा ॥ ४८ ॥
सुगन्धिने पदं कुर्यात्सर्वगन्धवहाय च ।
'नमस्स्वाहा' समायुक्तमेकत्रिंशाक्षरं पदम् ॥ ४९ ॥
मन्त्रं द्विजसमाख्यातं धूपपात्रस्य नारद ! ।
मुद्राध्यानसमायुक्तं सर्वसिद्धिकरं परम् ॥ ५० ॥
मन्त्रेणाऽनेन सम्पूज्य धूपपात्रमनन्तरम् ।
घण्टासम्पूजनं कुर्यात्तद्विधानमिहोच्यते ॥ ५१ ॥
आदाय प्रणवं पूर्वमनन्तेशमतः परम् ।
तं चाऽनलेन सम्भिन्नमूर्ध्वाधो मुनिसत्तम ! ॥ ५२ ॥
त्रैलोक्यैश्वर्यदेनाऽथ लाञ्छयेत्सञ्चबिन्दुना ।
दद्यादस्याऽवसाने तु ऋगध्वनि पदं ततः ॥ ५३ ॥
मन्त्रमात्रे पदं चाऽन्यत्स्वाहाऽक्षरसमन्वितम् ।
तदन्ते परमात्मानं मज्ञाऽऽधारोपरि स्थितम् ॥ ५४ ॥
भूधरेण युतं मूर्ध्ना भूधरोपरि विन्यसेत् ॥
विश्वाप्यायकरान्तस्थत्रैलोक्यैश्वर्यदं मुने ! ॥ ५५ ॥
त्रयोदशाक्षरो मन्त्रो घण्टाख्यस्सर्वसिद्धिकृत् ।
विन्यासकाले यस्या वै प्लुतमुच्चारयेत्ततः ॥ ५६ ॥
ध्यानयुक्तं द्विजश्रेष्ठ ! तद्ध्यानमवधारय ।
अधोमुखं तु ब्रह्माण्डं ध्यायेज्जनरवाकुलम् ॥ ५७ ॥
सनालं च तदूर्ध्वे तु पद्ममष्टदलं स्मरेत् ।
प्रकीर्णपत्र सुसितं केसरालिसुकर्णिकम् ॥ ५८ ॥
तन्मध्ये चिन्तयेद्देवीं वर्गाष्टकभुजान्विताम् ।
मुरुये हस्तचतुष्के तु लाञ्छनं कमलादिकम् ॥ ५९ ॥

स्फाटिकं चाऽक्षसूत्रं च तथा विज्ञानपुस्तकम् ।
अभयं वरदं चैव हस्तद्वितये परे ॥ ६० ॥
पद्मासनेनोपविष्टां पद्मपत्रायतेक्षणाम् ।
पद्मगर्भप्रतीकाशां पद्मलाञ्छनभूषिताम् ॥ ६१ ॥
सिताभरणसञ्छन्नां पीतवस्त्रविमण्डिताम् ।
मन्त्रौघमुद्गिरन्तीं च मन्त्रज्वालाप्रभान्विताम् ॥ ६२ ॥
देवैस्संस्तूयमानां च ब्रह्माद्यैः ब्रह्मवादिभिः ।
ऋषिभिर्मुनिभिस्सिद्धैर्योगिभिरनुमहकारिभिः ॥ ६३ ॥
नम्यमानां स्मरेत्सम्यक्पूजाकाले सदैव हि ।
योऽनया पूजयेन्मन्त्री तस्य सिद्धिर्न दूरतः ॥ ६४ ॥
एवं ध्यात्वाऽर्चयेत्सम्यगर्घ्याद्यैस्तु ततः स्मरेत् ।
शब्दब्रह्ममहो यद्वद्बुदञ्जाकाशमध्यगम् ॥ ६५ ॥
नित्योदितमनौपम्यमनभ्यासादगोचरम् ।
उपदेष्टुमतोऽध्येयामभक्तानां न युज्यते ॥ ६६ ॥
परस्वरूपं मन्त्राणामेतल्लक्षणमुच्यते ।
दशप्रकारे यच्छब्दे विसर्गान्तेऽक्षरादिके ॥
नानामन्त्रस्वरूपेण वर्तते वर्णविग्रहे ॥ ६७ ॥
भोगमोक्षप्रदो मन्त्रो य आसम्सद्गुरोर्मुखात् ।
पञ्चस्थानगतो ज्ञेयो भक्तादिव्यक्रियापरैः ॥ ६८ ॥
बहिस्स्थप्रतिमादौ तु जिह्वाग्रे हृत्कुशेशये ।
धूपधूमशिखायां च घण्टाशब्दे सुलक्षणे ॥ ६९ ॥
सम्यग्ज्योतिरिवान्तर्भावयन् संस्थितं हृदि ।
मध्यमेन स्वरूपेण अभ्युच्छ्रितं महामते ! ॥ ७० ॥
धूपधूमाश्रितं विद्धि वैखरीविग्रहं पुनः ।
घण्टायां चाल्यमानायामच्छिन्नमनुभूयते ॥ ७१ ॥

एवं स्मृत्वा ततस्तां तु स्वमन्त्रन्यस्तविग्रहाम् ।
अर्चितां ध्यानसंयुक्तामर्घ्याद्यैर्धूपसंयुतैः ॥ ७२ ॥
सञ्चालयेत्ततस्सम्यक् सुशब्दां मन्त्रबोधिनीम् ।
त्रैलोक्यद्राविणीं घण्टां सर्वदुष्टनिबर्हिणीम् ॥ ७३ ॥
एषा द्रुतिर्हि मन्त्राणां सुप्तानां च प्रबोधिनी ।
वारिणी सर्वविघ्नानां सर्वमन्त्रप्रसादिनी ॥ ७४ ॥
प्रणवान्ते ध्वनिर्घोषा शब्दशक्तौ लयं गता ।
वर्णदेहाः स्मृता मन्त्राः मन्त्रदेहाश्च देवताः ॥ ७५ ॥
घण्टास्तनितमूलान्ते प्रबुद्धाः कर्मसिद्धिदाः ।
परशब्दोत्थिता शक्तिर्घण्टा स्तनितरूपिणी ॥ ७६ ॥
वर्णत्वं समनुप्राप्ता तैर्वर्णैर्मुनिसत्तम ! ।
मन्त्राणां कल्पिता देहाः नानाकारास्सहस्रशः ॥ ७७ ॥
स्वेच्छया त्वनया शक्त्या सामर्थ्यात्स्वात्मनस्स्वयम् ।
अनुग्रहार्थमिह हि भक्तानां भावितात्मनाम् ॥ ७८ ॥
मननान्मुनिशार्दूल ! त्राणं कुर्वन्ति वै यतः ।
ददते पदमात्मीयं तस्मान्मन्त्राः प्रकीर्तिताः ॥ ७९ ॥
अनभिव्यक्तशब्दास्ते निराकारास्तथैव च ।
घण्टायां चाल्यमानायां निर्यान्ति च सहस्रशः ॥ ८० ॥
अत एव मुनिश्रेष्ठ ! मन्त्रमाता प्रकीर्तिता ।
एषा घण्टाभिधा शक्तिर्वागीशा च सरस्वती ॥ ८१ ॥
वाचि मन्त्रान् स्थितान् सर्वे वाच्यं मन्त्रे प्रतिष्ठितम् ।
मन्त्ररूपात्मकं विश्वं सबाह्याभ्यन्तरं ततः ॥ ८२ ॥
घण्टाशब्दगतं सर्वं तस्मात्तां चालयेत्पुरा ।
आवाहनार्घ्ये धूपे च दीपे नैवेद्यजोपणे ॥ ८३ ॥

जपन्तुत्यवसानाभ्या प्रवृत्ते चाऽग्नितर्पणे ।
पूर्णाहुतिप्रदाने च मन्त्राणा तु विसर्जने ॥ ८४ ॥
विष्वक्सेनाऽर्चने चैव तत्पूजाप्रतिपादने ।
बलिप्रदानकाले तु देवताना विशेषत ॥ ८५ ॥
नित्यमेव प्रयुञ्जीत सम्यङ्मन्त्राऽर्थसिद्धये ।
पूजाकाल विनाऽन्यत्र हित नाऽस्या प्रचालनम् ॥ ८६ ॥
नाऽनया तु विना कार्यं पूजन सिद्धिमिच्छता ।
धूप दत्त्वाऽथ पात्राणा घण्टाशब्दसमन्वितम् ॥ ८७ ॥
धूप दद्याद्यथाकाले यद्वाऽर्घ्यादौ सकृत्सकृत् ।
अनुकल्पे तु हृन्मन्त्र कुर्यादावर्तन बुध ॥ ८८ ॥
आवाहने सन्निधाने सन्निरोधे तथाऽर्चने ।
विसर्जनेऽर्घ्यदान तु प्रास्पात्रान्नित्यमारभेत् ॥ ८९ ॥
तदम्भसा चाऽर्हण तु तथैव परिषेचनम् ।
कुर्यात् प्रणयनादान प्रीणन प्रीतिकर्मणि ॥ ९० ॥
प्रोक्षण सर्ववस्तूनामत्यस्मादुदकेन तु ।
आरम्भे सर्वकार्याणा तत्समाप्तौ सदैव हि ॥ ९१ ॥
न्यूनाधिकाना शान्त्यै तु ज्ञानव्यत्ययशा तये ।
कार्य तदर्घ्यदान च नित्य मन्त्रात्मनो विभो ॥९२॥
कुम्भोपकुम्भकुण्डाना मन्त्राऽस्त्रकलशाऽर्चने ।
सम्पूजने च भूताना गुर्वादीना महामते ! ॥ ९३ ॥
दक्षशिष्यात्मपूजार्थं द्वार्थ्यानामर्चन प्रति ।
प्रासादासनदेवाना गुरूणा सन्ततेस्तथा ॥ ९४ ॥
लाञ्छनास्त्रपरीवारशक्तिभूषणरूपिणाम् ।
मण्डलावरणस्थाना देवाना चाऽर्चने तथा ॥ ९५ ॥

मुद्राबन्धे करासुर्क्षि तदर्घ्योक्षालन तथा ।
पाद्यदान तृतीयात्तु नित्य पात्रात्समाचरेत् ॥९६॥
चतुर्थात्तु यथाकाल दद्यादाचमन तत ।
हस्तप्रक्षालन चैव गण्डूष मुखधावनम् ॥ ९७ ॥
स्नानीयाच्चाऽऽचरेत्स्नान प्रयोजकविधिस्त्वयम् ।
अर्घ्यपात्राद् द्वितीयात्तु किंचिदुद्धृत्य वै जलम् ॥ ९८ ॥
तेन स्वविग्रहन्यस्तान् मन्त्रानिष्ट्वा यथाक्रमम् ।
गन्धपुष्पप्रधूपैश्च पृथगेव प्रकल्पितै ॥ ९९ ॥
अथाऽर्घ्यादीन् समादाय द्वारस्थान् देवान् समर्चयेत् ।
निर्गत्य द्वारबाह्ये तु स्थितो वाऽऽसीन एव वा ॥१००॥
वास्तुक्षेत्रेशगरुडद्वार्श्रीचण्डप्रचण्डकान् ।
अभ्यर्च्याऽर्घ्यादिभिर्देवान् प्रासादस्थाश्च पूजयेत् ॥ १०१ ॥
अनेकभेदभिन्नेषु प्रासादेषु महामते ! ।
विस्तरेण समस्तेषु वृत्तायतपुरस्सरम् ॥ १०२ ॥
वक्ष्ये लो(का ऽध्व)को वेतत्त्वाना देवताना च सस्थितिम् ।
सनिरुध्य च भूर्लोक पादक्षितितलेऽखिलम् ॥ १०३ ॥
एव प्रासादपीठेषु भुवर्लोक यथास्थितम् ।
स्वरेखाद्यावधिर्यावत् स्वर्लोक तत्तदूर्ध्वगम् ॥ १०४ ॥
आरम्य प्रन्तरोदेशान्महच्छिखरभूमिगम् ।
जनलोक च तद्वेद्या तपस्सज्ञ तदापगम् ॥ १०५ ॥
सत्यसज्ञ च यल्लोक तच्छिखाया तु सस्मरेत् ।
भावयेच्च पुरा व्याप्तिमेव चे सासलौकिकीम् ॥१०६॥
ततश्चोर्ध्वमयीं व्याप्तिं भावयेत्तु यथाक्रमम् ।
कुम्भाधारोपमान्तस्यमध्यपङ्क स्मरन् न्यसेत् ॥ १०७ ॥

बीजभूत तदन्तस्स्थमव्ययासिमनुस्मरेत् ।
बीजतश्चाऽङ्कुरीभूता परस्ताद्यक्तिमेति सा ॥ १०८ ॥
प्रासादपीठपर्यन्त कुम्भाधारोपलान्तु वै ।
भुवनाद्वा यथाऽवस्थो भावनीयस्तु सर्वत ॥ १०९ ॥
गर्भोच्छ्रायावधिर्यावत्पदाऽध्वान विलोकयेत् ।
मन्त्राऽध्वा शुकनासान्त तत्वाऽध्वा वेदिकावधि ॥ ११० ॥
कलाऽध्वा तु गलान्त च वर्णाऽध्वा तु तदूर्ध्वत ।
एव कृत्वाऽऽत्मनो व्याप्तिं ततस्तत्त्वानि वि यसेत् ॥१११॥
सयोज्य पार्थिव तत्व पादक्षितितले द्विजा ॥
तोयतत्व न्यसेत्पीठे जङ्घाया तैजस स्मरेत् ॥ ११२ ॥
ग्रीवोद्देशावधिर्यावद्वायुतत्व तदूर्ध्वत ।
आकाश शिखरस्थ स्यात्तदुद्देशात्क्रमेण तु ॥ ११३ ॥
न्यसेच्छब्दादि त मात्रा यावत्पदतलान्तिमम् ।
पार्श्वतो नासिके श्रोत्रे त्वक्सुधा समुदाहृता ॥ ११४॥
गवाक्षे चक्षुषी स्याता जिह्वा भद्राख्यवेदिका ।
घ्राणन्तु शुकनासा स्यादास्य द्वारमुदाहृतम् ॥ ११५ ॥
विज्ञेया पाणय स्तम्भा पादा पादशिलाघटा ।
वायुश्या जलनिर्याणमुपस्थ तु तदन्तरम् ॥ ११६ ॥
मनाऽन्तर्योम विज्ञेय गर्वो ब्रह्मशिलागत ।
बुद्धिस्तु पिण्डिका ज्ञेया प्रकृतिस्स्यात्तदन्तर ॥ ११७ ॥
पञ्चविंशतमो ज्ञेय प्रतिमापुरुष पर ।
एव न्यस्तेषु तत्वेषु न्यस्तव्या देवता क्रमात् ॥११८॥
धराधारोपरुध्याऽधस्त्वनन्तो नाम नागराट् ।
महसमहस्रानफणामण्डलेन सुमण्डित ॥ ११९ ॥

तदूर्ध्वे सस्थित चक्र सहस्रारोपशोभितम् ।
या शिला कलशाधारसज्ञा ता विद्धि सर्वगाम् ॥१२०॥
सा मध्यशक्तिस्सामान्या निष्कला पारमेश्वरी ।
तदूर्ध्वसस्थिता कुम्भा नवसङ्ख्यास्तु ये द्विजा ! ॥१२१॥
तेषा मध्यमकुम्भे तु साङ्ग सपरिवारकम् ।
मन्त्रनाथ समभ्यर्च्य मूलमन्त्रेण देशिक ॥ १२२ ॥
तत प्रागादिदिक्स्थेषु वासुदेवादिकान् यजेत् ।
विदिक्स्थेष्वनिरुद्धादीन् यजेदप्ययमयोगत ॥ १२३ ॥
तेषा विधाननवके त्वामध्यादीशगोचरम् ।
स्मर्तव्यास्सर्वतो व्याप्ता क्रमेण द्विजपुङ्गवा ! ॥ १२४ ॥
ज्ञानभागा निवसति तथाऽऽनन्दवला प्रभा ।
सर्वगा ब्रह्मवदना द्योतकी सत्यविक्रमा ॥ १२५ ॥
सम्पूर्णा चेति कथिताश्शक्तयो विश्वधारिका ।
शिलाष्टके दिग्विदिक्षु तद्बहिस्स्थापिते न्यसेत् ॥ १२६ ॥
धर्माद्य चाऽग्निकोणात्तु यावदीशपद पुन ।
प्रागाद्यावुत्तरान्त च अधर्माद्य चतुष्टयम् ॥ १२७ ॥
शिलानामन्तरे भूमौ पट्क पट्क क्रमेण तु ।
न्यस्तव्य पूर्ववर्णाच्च वर्णाना सावसानकम् ॥ १२८ ॥
तत प्राङ्गणभित्त्यर्थं विन्यस्ते च शिलाऽष्टके ।
दिग्विदिक्षु न्यसेत्प्राग्वत्प्रागुक्ताश्च दिगीश्वरान् ॥ १२९ ॥
चक्र तदन्तभूमीना भ्रमद्वह्निस्फुलिङ्गवत् ।
क्षार्णेन चिन्तयेद्व्याप्ति भूभाग चाङ्गणीयकम् ॥ १३० ॥
बहि प्राङ्गणभित्तीना सास्त्र सपरिवारकम् ।
प्रागादावीशकोणान्तमिन्द्राद्य चाऽष्टक न्यसेत् ॥ १३१ ॥

सभाविधिपूर्णेषु अन्तर्भूमिगतेषु च ।
सर्वाधारमयं चक्रं शाखामूलं समाश्रितम् ॥ १३२ ॥
ज्ञानक्रियात्मके तत्त्वे शाखयोर्युगले स्थिते ।
पारमेश्वर आद्यस्तु द्वारस्योर्ध्वे उदुम्बरे ॥ १३३ ॥
संस्थितस्सर्वतो व्याप्तस्तत्पृष्ठे मध्यदेशतः ।
चतुष्पात्सर्वलो धर्मः स्थितस्सत्ववतां वर ॥ १३४ ॥
यदा कवाटौ द्वारस्य कल्पितौ द्विजसत्तमाः ।
कालवैश्वानरौ देवौ यथा पतिरुभाविमौ ॥ १३५ ॥
दाक्षिणोत्तरयोगेन कवाटोपरि संस्थितौ ।
तद्द्वारपार्श्वयोर्वा श्रीमण्टपद्वारपार्श्वयोः ॥ १३६ ॥
निधीशौ शङ्खपद्माख्यौ पूजनीयौ क्रमेण तु ।
ततो जङ्घासमूहं तु तथैवान्तरभूमिषु ॥ १३७ ॥
भवोपकरणीयानां देवानामर्चनं क्रमात् ।
कालेऽपि यन्नियन्ता च शास्त्रं नानाङ्गलक्षणम् ॥१३८॥
विद्याधिपतयश्चैव सरुद्रस्सगणश्शिवः ।
प्रजापतिसमूहस्तु इन्द्रस्सपरिवारकः ॥ १३९ ॥
मुनयस्सप्त पूर्वेऽन्ये ग्रहास्तारादिकैर्वृताः ।
जीमूतश्चाखिला नागा अप्सरोगण उत्तम ॥ १४० ॥
ओषध्यश्चैव पशवो यज्ञास्साङ्गाखिलास्तु ये ।
विद्याचैवाऽपरा विद्या पावकश्चैव मारुतः ॥ १४१ ॥
चन्द्रार्कौ वारिवसुधे दृश्यते देवतागणाः ।
चतुर्विंशतिसङ्ख्यानां भवोपकरणाऽमराः ॥ १४२ ॥
मुनय केशवाद्यास्तु जङ्घामोपरि संस्थिताः ।
समस्तु सर्वदेवेभ्यो स्थाप्या क्रमेण तु ॥१४३॥

चक्रशङ्खौ गदापद्मे लाङ्गलं मुसलं शराः ।
शार्ङ्गं च खङ्गखेटौ तु दण्डः परशुरीतिहा ॥ १४४ ॥
पाशाङ्कुशौ मुद्गरं च वज्रं शक्तिसमन्वितम् ।
प्रासादे चतुरश्रे तु चतुरश्रायतेऽपि च ॥ १४५ ॥
गरुडं प्रस्तरस्योर्ध्वे न्यसेत्कोणचतुष्टये ।
तदूर्ध्वं वेदिकायां तु भावनीया मुनीश्वराः ! ॥ १४६ ॥
एते पूर्वादिके योगे नैकशृङ्गतनुस्ततः ।
देवो वामनदेहस्तु सर्वव्यापी, त्रिविक्रमः ॥ १४७ ॥
नरो नारायणश्चैव हरिः कृष्णस्तथैव च ।
ज्वलत्परशुधृग्रामो रामश्चाऽन्यो धनुर्धरः ॥ १४८ ॥
वेदविद्भगवान् कल्की पातालशयनः प्रभुः ।
ततो ग्रीवातले ध्येयः कूर्मः पातालधारकः ॥ १४९ ॥
वराहो नारसिंहश्चाऽप्यमृताहरणस्तु वै ।
श्रीपतिर्दिव्यदेहोऽथ कान्तात्माऽमृतधारकः ॥ १५० ॥
राहुजित्कालनेमिघ्नः पारिजातहरो महान् ।
लोकनाथस्तु शान्तात्मा दत्तात्रेयो महाप्रभुः ॥ १५१ ॥
न्यग्रोधशायी भगवानित्येते द्विजसत्तमाः ! ।
ततस्तु शिखरोद्देशं त्रिधाकृत्य यथासमम् ॥ १५२ ॥
यावत्तु कलशाधारवेदिकात् द्विजसत्तमाः ! ।
अधोभागे क्रमात् ध्येयाः शिष्टा देवास्तु वैभवाः ॥ १५३ ॥
अनन्तो भगवान् देवश्शक्त्यात्मा मधुसूदनः ।
विद्याधिदेवः कपिलो विश्वरूपो विहङ्गमः ॥ १५४ ॥
क्रोडात्मा बडवावक्त्रो धर्मो वागीश्वरस्तथा ।
देव एकार्णवशय इत्येते द्वादश स्मृताः ॥ १५५ ॥

अधस्तु सर्वतोव्यापी तदूर्ध्वपदसंस्थितः ।
पद्मनाभस्तदूर्ध्वे तु व्यापकः परितिष्ठति ॥ १५६ ॥
शुकनासामुखे पूज्यो वासुदेवस्सनातनः ।
यत्र प्रासाददेशे तु शुकनासा न कल्पिता ॥ १५७ ॥
तत्राऽग्रतो नासिकाया वासुदेवं तु संस्मरेत् ।
शिष्टनासात्रये पूज्याः क्रमात्सङ्कर्षणादयः ॥ १५८ ॥
अथ वा पुरुषस्सत्यो ह्यच्युतोऽनन्त एव च ।
चतुर्दिक्षु क्रमेणैव पूज्या यद्वा क्रमेण तु ॥ १५९ ॥
वराहो नारसिंहश्च श्रीधरश्च हयाननः ।
यद्वा नराद्याश्चत्वारो धर्ममूर्त्यादयोऽपि वा ॥ १६० ॥
यद्वा परशुरामाद्याः स्मर्तव्याः क्रमयोगतः ।
एते तु शक्तिभिस्सर्वे युक्ता वा केवलास्तु वा ॥१६१॥
कुम्भे पत्रलतायुक्ते भूषितैर्वेदिकातले ।
विन्यसेत् षडरं चक्रं ततस्सामलसारके ॥ १६२ ॥
भगवान् जगदाधारो वासुदेवः परः पुमान् ।
लोकानध्यगणं नित्यं तत्राद्यमपि देवता ॥ १६३ ॥
प्रासादोपरि विन्यस्तास्समाकम्य च संस्थिताः ।
तदग्रदेशे हेमाद्रौ यजेद्देवं सुदर्शनम् ॥ १६४ ॥
प्रासादाङ्गेषु विप्रेन्द्राः ! क्रमाच्छिखादिकेषु च ।
देवताऽऽधारभूतेषु यद्यदङ्गं न कल्पितम् ॥ १६५ ॥
यत्र वा तत्तदधिकं तत्रापि च समाचरेत् ।
तत्तत्स्थाने तु बुद्ध्या तु देवतान्यासमूह्य तत् ॥ १६६ ॥
यद्वा मनस्स्वस्माद्धि देवतांश्च तु वर्जयेत् ।
लोकाम्मस्तथाऽऽवानम्मत्वगद्यध्य देवता ॥ १६७ ॥

ध्यातव्यास्तु निराकारास्साधकैर्द्विजसत्तमा ।
विमानेपि तथा सैद्धे विबुधेश्च प्रतिष्ठिते ॥१६८॥
किं तु तत्र विमानाङ्गमूर्तीना लान्छनादिकम् ।
तासा स्थानानि विप्रेन्द्रा ! कल्पितानि यथाविधि ॥१६९॥
विमानावयवाश्चापि सन्निरीक्ष्यैव यत्नत ।
पूजयेत्सावधानेन चेतसा ध्यानपूर्वकम् ॥१७०॥
लाञ्छनाद्येषु मूर्तीना प्रासादावयवेष्वपि ।
अनभिव्यक्तिरूपेण लक्षणाद्यपरीक्षणात् ॥१७१॥
स्वप्नादेश्चापि विप्रेन्द्र ! देशिकेन्द्रोपदेशत ।
यथावत्सम्परीक्षेत प्रयत्नेन द्विजोत्तमा ! ॥१७२॥
लक्षणादिषु हीनेषु विपर्यस्तेष्वपि द्विजा ।
न लक्षणादिक कुर्यादन्यथा मुनिपुङ्गवा ॥१७३॥
लक्षण न परीक्षेत ह्यन्यथाकरणेच्छया ।
अन्यथाकरणार्थं तु लक्षणाद्ये परीक्षिते ॥१७४॥
क्षयत्यायु कृते तस्मिन् लक्षणैर्नरक व्रजेत् ।
तस्मात्सर्वप्रयत्नेन स्वयव्यक्तादिकेऽपि च ॥ १७५ ॥
विमाने सस्थिताना तु मूर्तीना लक्षणादिकम् ।
स्थानान्यपि च तासा वै विमानावयवानपि ॥१७६॥
यथास्थित परीक्ष्यैव कृत्वा मूर्तिविनिर्णयम् ।
स्वेन स्वेन विशेषेण लाञ्छनाद्येन वै स्फुटम् ॥१७७॥
स्वेन स्वेन तु मन्त्रेण पूजन च समाचरेत् ।
प्रासादेषु स्वयव्यक्त श्रेष्ठ सर्वेषु च द्विजा ॥१७८॥
तद्रूपी भगवान् देव स्वयमेवाऽवतिष्ठते ।
तत्र सन्निहितस्साक्षाद्भगवान् भक्तवत्सल १७९॥

जाते जीर्णादिदोषे तु न त्यजन्ति कदाचन ।
स्व स्व प्रदेशमेताम्तु मन्त्राणा शक्तय परा ॥१८०॥
प्रासादान्तम्स्थिताश्चापि स्वयव्यक्तपुरस्सरा ।
आसारान्तु विभोस्सम्यक् ज्ञेया पूर्वोक्तयोगत ॥१८१॥
असङ्ख्यैर्लैर्ध्वैर्येषा व्यक्तिर्व्यक्ता जगत्त्रये ।
तेऽपि लाञ्छनवृन्द तु धारयन्त्यक्षिगोचरे ॥१८२॥
ललाटे चासपट्टे तु पृष्ठे पाणितलद्वये ।
तनूरुहचये मूर्ध्नि वर्मिणा प्रतिपत्तये ॥ १८३ ॥
तत्तल्लाञ्छनवृन्द तु परीक्ष्यैव विशेषत ।
तत्तदाकारनियतैरर्चकैस्सम्प्रपूजयेत् ॥ १८४ ॥
येषा लाञ्छनवृन्द तु न व्यक्त चरणादिषु ।
तानर्चयेद्विपत्कार्णपुरोगेण मुनिश्वरा ! ॥ १८५ ॥
व्यापकाना तु मन्त्राणामेकेनाऽभिमतेन तु ।
इति ज्ञात्वा यथावच्च य पूजयति मन्त्रवित् ॥१८६॥
स पूजाफलमाप्नोति ह्यन्यथा विपरीतभाक् ।
एतान्युक्तानि सर्वाणि लेकार्दानि क्रमेण तु ॥ १८७ ॥
समाराधनकालेषु देवस्याऽमिततेजस ।
द्वार्म्यिदेवार्चन कृत्वा पूजयेत्तदनन्तरम् ॥ १८८ ॥
नमस्कारपदान्तेन स्वनाम्ना प्रणवादिना ।
अर्घ्यालभनमाल्यैश्च धूपेन द्विजसत्तमा ॥ १८९ ॥
अग्रतो नैवेद्यस्य द्वारदेशस्य बाह्यत ।
अन्तर्मण्डपदेशे तु गत्वा वा पूजयेत्क्रमात् ॥ १९० ॥
एव प्रामान्भेदे तु यस्मिन् साधकसत्तमे ।
एककाल द्विकाल वा त्रिकाल वाऽर्चन द्विजा ॥१९१॥

(¹) पुरोगाणा मुनीश्वरा'– इति च पाठ ।

नित्यशः क्रियते तत्र सदा सन्निहितो विभुः ।
अत एव (१) द्विजश्रेष्ठास्तदर्चनपुरस्सरम् ॥१९२॥
कुर्यादाराधनं विष्णोस्साधकस्सिद्धिलालसः ।
य एवं कुरुते भक्त्या ह्यनन्यपरया सदा ॥ १९३ ॥
सोऽचिराल्लभते कामानिह लोके परत्र च ।
मोक्षार्थी कुरुते यस्तु स याति परमं पदम् ॥१९४॥

इति श्रीपाञ्चरात्रे ईश्वरसंहितायाम्
विमानदेवतार्चनविधिर्नाम
तृतीयोऽध्यायः ॥

अथ चतुर्थोऽध्यायः ।

नारदः ।

प्रासादे संस्थितान् देवानेवमभ्यर्च्य वै द्विजाः ।
द्वारावरणदेवानां पूजनं च यथाक्रमम् ॥१॥
विष्वक्सेनाऽवसानं च कारयेन्मुनिपुङ्गवाः ।
यदङ्गभावमभ्येति द्वास्थाद्यं देवतागणम् ॥२॥
विष्वक्सेनाऽवसानं च नराणामल्पमेधसाम् ।
जन्तोरेकान्तिनस्तद्वै चित्तखेदकृदर्चनम् ॥३॥
विभक्तप्रकृतस्यापि शिष्याणां तदनर्चनम् ।
अतस्तदनुकम्पार्थं देवभृत्यधियाऽर्चनम् ॥४॥
भक्तिश्रद्धोज्झितं चैव विहितं त्वेवमेव हि ।
ते तत्पाणिच्युतं प्रह्वा दत्तमप्यवहेलया ॥५॥

(१) द्विजश्रेष्ठ ! इत्यपि पाठः ।

गृह्णन्ति मनसा श्रेयः परं ध्यात्वा धिया हृदि ।
यतस्सर्वेऽच्युतमयास्तच्चित्तार्पितमानसाः ॥६॥
एतावदर्चनाशेषा गुरोरेकान्तिनस्तु वै ।
स्याद्विरोधनिरामस्तु यतो भृत्यास्तु ते हरेः ॥७॥
कृत्वैवं द्वारयागं तु ततः पुष्पञ्च सम्मुखम् ।
गृहीत्वाऽङ्गुष्ठपूर्वेण स्वाङ्गुलित्रितयेन तु ॥८॥
अभिमन्त्र्य तदस्त्रेण चक्रं तदुपरि स्मरेत् ।
निशिताऽरं ज्वलद्रूपं वर्षन्तमनलाऽशनिम् ॥९॥
क्षयकृद्विघ्नजालानां क्षिपेद्यागगृहान्तरे ।
दक्षिणां तर्जनीं विप्र कुर्यादूर्ध्वमुखीं ततः ॥१०॥
शिखामन्त्रेण संयुक्तां विद्युद्विलसितप्रभाम् ।
स्मृत्वा (१) भ्रामयमाणां तां संविशेद्यागमन्दिरम् ॥११॥
स्वासनं च ततः प्रोक्ष्य अर्घ्यपाद्योदकेन च ।
उपविश्याऽऽसने यागमारभेत समाहितः ॥१२॥
समयेवात्र कुर्वीत सर्वभोगनिरीक्षणम् ।
न्यस्य भद्रासनं मूलात् प्रोक्षणाऽर्घ्यप्लुतेन तु ॥१३॥
पाणिनाऽप्यथ कूर्चेन तज्जलेन तु मार्जयेत् ।
तत्तावदस्त्रपुष्पेण कुर्याद्विघ्नगणोज्झितम् ॥१४॥
सर्वलोकमयं तत्र सर्वदेवसमाश्रयम् ।
सर्वाधारमयं ध्यायेदन्तर्लीनं तु चक्रराट् ॥१५॥
प्रणवेन स्वनाम्नाऽथ नमोऽन्तेनाऽर्चयेच्च तम् ।
अर्घ्याम्भगन्धपुष्पैस्तु माल्यैर्नानासुगुग्गुलैः ॥१६॥
योगपीठाऽर्चनं कुर्यादनुसन्धानपूर्वकम् ।
स्वनाम्ना प्रणवाद्येन नमोऽन्तेन यथाक्रमम् ॥ १७ ॥

---

(१) भ्रामयमाणन्ताम्— इति च पाठः ।

ततस्तु सर्वमन्त्राणां विन्यासं तत्र चेतसा ।
समाचरेद्यथायोगं पुष्पदानपुरस्सरम् ॥ १८ ॥
बिम्बेन सहितं पीठं योगपीठमुदाहृतम् ।
अनुसन्धानयोगे तु योगपीठं प्रकल्पयेत् ॥ १९ ॥
तन्मन्त्रासनमित्युक्तं मन्त्रन्यासे तु सर्वतः ।
कुर्यात्तत्स्थस्य देवस्य पीठस्याऽधो मुनीश्वराः ! ॥ २० ॥
आधारशक्तिं तस्योर्ध्वे कूर्मं कालाग्निसंज्ञकम् ।
अनन्तेशं सरेन्मध्ये सर्वाधारमयं प्रभुम् ॥ २१ ॥
आग्नेयादौ तु धर्माद्यमैशान्यन्तं चतुष्टयम् ।
प्रागादौ त्वप्यधर्माद्यमुत्तरान्तं न्यसेत्परम् ॥ २२ ॥
तदूर्ध्वे कमलं ध्यायेत्स्वनाम्नाऽथ तथोपरि ।
स्मरत्पत्राश्रितं सूर्यं शशाङ्कं केसराऽवनौ ॥२३॥
कर्णिकास्थं हुतभुजं ततो गन्धादिना यजेत् ।
सुस्थिरे सन्निरोधश्च मन्त्राणां विहितस्सदा ॥ २४ ॥
यत्र यत्राऽनुरूपं तु तत्र तन्न्यासमाचरेत् ।
चलबिम्बस्य पीठेऽपि ह्येवमेवार्चयेत् क्रमात् ॥ २५ ॥
किं तु तात्कालिकं तत्र मन्त्राणां सन्निरोधनम् ।
आहूतोपविशेद्यत्र मन्त्रनाथो हि सम्मुखः ॥ २६ ॥
तत्प्रागपेक्षया कुर्याद्धर्मादीनां निवेशनम् ।
साम्मुख्यं भजते यस्मात्साधकं परमेश्वरः ॥ २७ ॥
तदासने हि चिद्रूपं सिद्धमेतस्य वाहनात् ।
एवं चाऽस्याऽचले पीठे शयानस्य विभोस्त्वधः ॥ २८॥
यद्यन्तं क्रमशोऽभ्यर्च्य ततोऽनन्तं समर्चयेत् ।
यानारूढे त्वनन्तस्य स्थाने तार्क्ष्यं समर्चयेत् ॥२९॥

लक्ष्म्यादीनां तु देवीनां पीठस्याऽथ फणीश्वरम् ।
तत्कोणेषु च धर्मादीन्नदूर्ध्वे व्यक्तपङ्कजम् ॥ ३० ॥
धामत्रय ततस्तस्मिन् विन्यसेत्पूर्ववर्त्मना ।
गणेशाद्यर्चनं कुर्यादथ पीठसमीपतः ॥ ३१ ॥
आत्मनः प्रागशाद्वायुकोणादारभ्य पूजयेत् ।
विन्यस्य विष्टरान् दर्भान् कुसुमस्तवकानिव ॥ ३२ ॥
विष्वक्सेनं गणाधीशं गुरूंश्च तदनन्तरम् ।
गुरून् परमसज्ञांश्च यजेत्सर्वगुरूंस्तथा ॥ ३३ ॥
आदिसिद्धिसमूहं तु भगवद्ध्यानतत्परम् ।
नित्याधिकारिणश्चाऽऽसान् भगवत्तत्त्ववेदिनः ॥३४॥
चत्वारो मनवश्चाऽन्ये ऋषयस्सप्त पूर्वकाः ।
अर्घ्यादिना यजेदेतान् तत्तन्नाम्ना यथाक्रमम् ॥ ३५ ॥
सर्वेषां क्रमशो ध्यानं शृणुध्वं मुनिपुङ्गवाः ! ।
अनन्तशशिसङ्काशमनन्तमथ संस्मरेत् ॥ ३६ ॥
सहस्रफणमालाऽऽढ्यं सहस्रभुजभूषितम् ।
स्वपाणिसम्पुटेनैव शोभयन् स्वाङ्गभूतलम् ॥ ३७ ॥
सितारविन्दशङ्खाक्षसूत्रचक्रकरान्वितम् ।
पतनाशङ्कितुर्द्धर्वे विन्यस्तमनसस्तु च ॥ ३८ ॥
मा भैरित्यभयं यच्छन् आब्रह्मभवनस्य च ।
तुहिनाऽच्छोपलस्वच्छमुक्ताफलशशिप्रभः ॥ ३९ ॥
मृगेन्द्रस्कन्दवदना धर्मज्ञानादयश्चतु ।
पद्मरागप्रवालाऽग्निसिन्दूरदाडिमफलोज्ज्वलाः ॥ ४० ॥
अन्तर्दयोपयुक्ताश्च राजराजेश्वरोपमाः ।
हिरण्यगर्भमन्त्रिध्वि चत्वारो धर्मपूर्वकाः ॥ ४१ ॥
गर्भं सद्वत्समत्पुष्पसदलङ्करणाऽन्विताः ।
शङ्खपद्मधगम्भीरे वराऽभयकरास्तु वै ॥ ४२ ॥

आधेयपद्मविन्यस्तस्साधकास्स्वात्मसिद्धये ।
समर्पितान्तःकरणाः परस्मिन् मन्त्रकारणे ॥ ४३ ॥
चिन्त्यमव्यक्तपद्मं च हिमहेमाग्निभास्वरम् ।
शान्तमष्टभुजं सौम्यं संस्थितं स्वस्तिकेन तु ॥ ४४ ॥
यामत्रयं तदूर्ध्वे तु संस्मरेत्किरणोज्ज्वलम् ।
संस्मरेद्गणनाथं तु वक्ष्यमाणप्रकारतः ॥ ४५ ॥
गणनाथं विना चाऽन्ये सुस्थिताश्शान्तविग्रहाः ।
गणित्राभयहस्ताश्च सर्वाऽनुग्रहकारकाः ॥ ४६ ॥
सर्वे पद्मासना वाऽथ जटामण्डलभूषिताः ।
एवं ध्यात्वा समभ्यर्च्य मुद्रास्संस्पृश्य तत्क्रमात् ॥४७॥
अनुज्ञां प्रार्थयेत्तेभ्यो यथाऽनुक्रममेव च ।
गृहीत्वा शिरसा तां च तत आवाहयेत्प्रभुम् ॥४८॥
ततस्सर्वगतं देवं मन्त्रमूर्तित्वमागतम् ।
समाहूय (१) सुमन्त्रेण त्वागच्छाऽन्तपदेन तु ॥४९॥
यथा सर्वगतो वायुर्व्यजनेन महामते ।
व्यक्तिमभ्येति भगवान् आहूतस्तद्वदेव हि ॥५०॥
भावदर्पणसङ्क्रान्तं कृत्वा हृत्कमलात्तु वै ।
सन्निरुध्य बहिर्वेद्यां मन्त्रोच्चाराऽवसानतः ॥५१॥
मन्त्रमागच्छमानं तु निर्गतं तु स्वकात्पदात् ।
कालं पाद्याऽर्घ्यदानान्तमुत्थितं भावयेत्सदा ॥५२॥
अथोपचर्यमाणं तं भोगैः कालानुकूलतः ।
नानान्नभववस्त्रसग्दानालङ्करणे तथा ॥५३॥
अन्यत्र भोगपूजायां स्मरेत्पद्मासनादिना ।
पुनम्नमेवोपविष्टं मानुरूप्यं च सम्मुखम् ॥५४॥

---

(१) सुमन्त्रेण त्वागच्छा– इति पाठान्तरम् ।

बिम्बं विनाऽन्यस्याऽऽधारे भवत्येव महामते ।
बिम्बाकृत्यात्मना बिम्बे समागत्याऽवतिष्ठते ॥५५॥
करोत्यमूर्तामखिलां भोगशक्तिं तु चाऽऽत्मसात् ।
स्थितमायतने चाऽथ साकारं परमेश्वरम् ॥५६॥
शङ्खचक्रधरं विष्णुं सुरसिद्धावतारितम् ।
ऋषिभिर्मनुभिर्वाऽथ भक्तियुक्तैः प्रतिष्ठितम् ॥५७॥
तन्मूर्तौ च स्वमन्त्रेण यत्नेनाऽऽवाहनं विना ।
तथा प्रतोषयेच्च तु कृत्वा हस्तौ सुगन्धिनौ ॥५८॥
गन्धार्घ्यपुष्पसम्पूर्यं मूलमन्त्रं समुच्चरन् ।
पीठोपरि हरेरग्रे मूर्ध्नि पुष्पाञ्जलिं क्षिपेत् ॥५९॥
सम्पत्यभिमुखं शान्तं सुप्रबुद्धं स्मरेच्च तम् ।
करन्यासं विना तत्र सृष्टिन्यासादिकत्रयम् ॥६०॥
मूलमन्त्रादितार्क्ष्यान्तमन्त्राणां न्यासमेव च ।
कृत्वाऽथ तत्तन्मुद्राश्च तत्तन्मन्त्रैः प्रदर्शयेत् ॥६१॥
दीपयेद्बिम्बतोऽप्यत्र तस्मिन् पुष्पाञ्जलिं हरौ ।
‘आगच्छ’ पदमन्त्रेण मूलमन्त्रेण हृत्कजात् ॥६२॥
प्रत्यहं कर्मबिम्बानां मूलबिम्बहृदम्बुजात् ।
निष्क्रियावाहनं कार्यं तत्र त्वेवं क्रमो द्विजाः ॥६३॥
मूलबेरे तु यत्तेजः षड्भागैस्तु चोत्सवे ।
षट्त्रिंशदेकभागस्तु बलिकर्मार्चनादिषु ॥६४॥
एवं तेजोमयं देवं नाडीदक्षिणमार्गतः ।
तन्नासाग्रेण चाऽऽनाय पीठकुम्भादिषु क्षिपेत् ॥६५॥
तत्पदस्थप्रमूलाख्ये तस्मिन् मन्त्रात्मगोलके ।
स्थानभेदं विना ज्ञानि न्यस्याऽभ्यर्च्येह देहतः ॥६६॥
गर्भगृहस्य तेजश्च ध्यायेदव्यक्ततां गतम् ।
मूलमन्त्रादितार्क्ष्यान्तमन्त्रानत्र च विन्यसेत् ॥६७॥

एवमाहूय देवेशं दत्वाऽर्घ्यं सन्निधित्सया ।
भूयोऽप्यर्घ्यं प्रदायास्मै हृदा मुद्रापुरस्सरम् ॥६८॥
सन्निधाप्याऽर्घ्यदानेन मुद्रापूर्वञ्च वर्मणा ।
सन्निरोध्य तु मूलेन तन्मुद्रासहितेन तम् ॥६९॥
सम्मुखीकृत्य मूलादिमन्त्रांस्तत्र समुच्चरन् ।
प्रदर्शयंस्तथा मुद्रास्त्वष्टाङ्गेनाऽभिवादयेत् ॥७०॥
स्वयागोक्तविधिना पूजयेत्प्रथमं ततः ।
आमूलात्सर्वमन्त्राणां व्यक्तिस्थानां समर्चनम् ॥७१॥
अर्घ्यपुष्पादिना कुर्यात् स्वेन स्वेन स्वके पदे ।
ततो भगवतो विष्णोर्भासा भास्वरविग्रहान् ॥७२॥
हृदादीन् निस्सृतान् ध्यायेत् स्फुलिङ्गनिचयो यथा ।
भोगस्थाने यथायोगमेकैकं विन्यसेत्ततः ॥७३॥
सकलीकृत्य चाऽर्घ्याद्यैरर्चयेत्तत्र तु क्रमं ।
अष्टपत्राम्बुजे पीठे हृदयाद्यं चतुष्टयम् ॥७४॥
न्यसेत्कमलपत्राणामपूर्वादुत्तरान्तिमम् ।
अग्नीशरक्षोवायव्यदलेष्वस्त्रं यथाक्रमम् ॥७५॥
नेत्रं केसरजालस्थं विन्यसेत्तदनन्तरम् ।
पीठोपरि दलाद्बाह्ये देवस्येशानकोणके ॥७६॥
किरीटं श्रीवत्सकं च विन्यस्याऽऽग्नेयकोणके ।
कौस्तुभं वनमालां च न्यसेत्पद्मं च तत्र वै ॥७७॥
ईशकोणे गदां न्यस्य नैर्ऋते चक्रमुज्ज्वलम् ।
वायव्ये पाञ्चजन्यं च विन्यसेच्च यथाक्रमम् ॥७८॥
देवस्य कर्णिकायां तु श्रियं पुष्टिं ततोऽपरे ।
अमतः पीठतो बाह्ये न्यसेद्धारात्पतत्त्रिपम् ॥७९॥
एवं नत्वा ततो ध्यायेन्मन्त्रव्यूहं यथास्थितम् ।
अभ्यन्तरे विमानस्य गर्भभूमौ तु मध्यतः ॥८०॥

सरसीरुहमास्थाय संस्थितं पुरुषोत्तमम् ।
प्रावृड्जलदसन्दोहविलसद्दिव्यविग्रहम् ॥८१॥
सर्वदेवमयं देवं सर्वेषां तेजसां निधिम् ।
सर्वलक्षणसम्पूर्णं सर्वज्ञादिगुणैर्युतम् ॥८२॥
वपुषा सुन्दरेणैव दिव्येनाऽविष्कृतेन च ।
मुष्णन्तमनिशं देहादालोकं ज्ञानलक्षणम् ॥८३॥
प्रयत्नेन विनाऽज्ञाननाशकृद्ध्यायिना महत् ।
घनकुञ्चितनीलालिदलिताञ्जनसन्निभैः ॥८४॥
कर्पूरधूसरैर्दिव्यैः पुष्पसंवलितान्तरैः ।
किरीटमकुटाक्रान्तैश्शोभितं स्वशिरोरुहैः ॥८५॥
बालचन्द्रप्रतीकाशफालोद्यत्तिलकोज्ज्वलम् ।
सुभ्रुवं सुनसं शान्तं सविलासस्मितांधरम् ॥८६॥
किञ्चिदारक्तगोक्षीरशुद्धनीलाब्जलोचनम् ।
शीतलैर्दृष्टिपातैस्तु जगदाप्यायकारिणम् ॥८७॥
विलसद्गण्डफलकं श्रवणोज्ज्वलकुण्डलम् ।
मुखसौन्दर्यनिष्यन्दचुबुकस्थलशोभितम् ॥८८॥
निष्कलङ्कशरच्चन्द्रविलसन्मुखमण्डलम् ।
कम्बुग्रीवं पीवरांसं दीर्घबाहुं महोरसम् ॥८९॥
चतुर्भुजमुदाराङ्गं निर्मलाणिपङ्कजम् ।
पीनश्रीवत्सवक्षसं निम्ननाभिं तनूदरम् ॥९०॥
चारूरुयुगलं चारुजङ्घाद्वितयमुज्ज्वलैः ।
मणिनूपुरसम्पर्कैर्विलसत्पादपङ्कजम् ॥९१॥
दिव्यगन्धानुलिप्ताङ्गं दिव्याम्बरधरं तथा ।
दिव्यसूत्रेष्टनोपेतं दिव्याऽलङ्कारमण्डितम् ॥९२॥
अनेकरत्नखचितकिरीटमकुटोज्ज्वलम् ।
कौस्तुभेनोरसिस्थेन श्रीवत्सेनाऽप्यलङ्कृतम् ॥९३॥

रत्नकाञ्चनसन्मुक्तायुक्तया वनमालया ।
सब्रह्मसूत्रया चैव शोभितं परमेश्वरम् ॥९४॥
मुख्यदक्षिणहस्तेन भीतानामभयप्रदम् ।
श्रोणीतटनिविष्टेन वामहस्तेन लीलया ॥ ९५ ॥
भ्रियमाणं गदां गुर्वीं निषण्णां धरणीतले ।
पश्चाद्दक्षिणहस्तेन चक्रं कालानलद्युति ॥९६॥
प्रणवध्वनिगर्भं तु हिमाऽद्रिशतशोभितम् ।
शङ्खं वामकरेणापि दधानमतुलप्रभम् ॥ ९७ ॥
स्वदेहतेजस्सम्भूतज्वालामण्डलमध्यगम् ।
करुणापूर्णहृदयं जगदुद्धरणोद्यतम् ॥ ९८ ॥
अभिन्नपूर्णषाड्गुण्यविभवेनोपबृंहितम् ।
योगिध्येयमजं नित्यं जगज्जन्मादिकारणम् ॥ ९९ ॥
साक्षाल्लक्ष्मीपतिं देवं ध्यायेन्नारायणं प्रभुम् ।
एवं शयानमासीनं यानारूढमथापि वा ॥ १०० ॥
परं व्यूहं वैभवं वा द्विभुजं वा चतुर्भुजम् ।
अष्टबाह्वादिकं वाऽपि नानाभूषणसंयुतम् ॥ १०१ ॥
नानाऽस्त्रगणसंयुक्तं रूपं भगवतस्तथा ।
लक्ष्म्यादिशक्तिजालं च ध्यायेद्भक्तिसमन्वितः ॥ १०२ ॥
एवमेव हि हृन्मन्त्रं ध्यायेत् कुमुदपाण्डरम् ।
पद्मरागाचलाकारमारक्तं च शिरः स्मरेत् ॥ १०३ ॥
अञ्जनाद्रिप्रतीकाशं शिखामन्त्रं तथाकृतिम् ।
परितस्सूर्यसन्तप्तं यथा कनकपर्वतम् ॥ १०४ ॥
तथा कवचमन्त्रं च ध्यानकाले विचिन्त्य च ।
वृतं ज्वालासहस्रैस्तु अयस्कान्तसमद्युति ॥ १०५ ॥
सर्वास्त्रशक्तिसम्पूर्णमस्त्रमन्त्रं प्रकीर्तितम् ।
निर्धूमाऽङ्गारसदृशं भावयेन्नेत्रमन्त्रराट् ॥ १०६ ॥

ध्येयास्स्वरुचिसंयुक्ता द्विभुजा पुरुषोत्तमा ।
वीक्षमाणान् विभोर्वक्त्रं ध्यायेदेतान् मुनीश्वरा ॥१०७॥
स्थितानामादिमूर्तीनां स्थितान् ध्यायेत्सदैव हि ।
आसीनानामथाऽऽसीनान् वाहनस्थे सवाहनान् ॥१०८॥
शयितानामथाऽऽसीनान् उत्थितान्वा स्मरेद्धिया ।
अथ ध्यानं भूषणाऽस्त्रशक्तीनामुच्यते क्रमात् ॥१०९॥
किरीटसौम्यवदनं काञ्चनाभो महातनु ।
भाभिराहृतियुक्ताभिर्नानारूपाभिरावृत ॥११०॥
स्थितो वैद्यावर्यायेन स्थानयेनाऽन्तरिक्षग ।
स्फटिकाद्रिप्रतीकाशं श्रीवत्समथ भावयेत् ॥१११॥
बद्धपद्मासनासीनं हस्तान्यस्तं स्वपार्श्वयो ।
वहन्तं कूर्ममुद्रां च मुख्यहस्तद्वयेन च ॥११२॥
पद्मरागाऽचलाकारं कौस्तुभं रत्ननायकम् ।
दिशो दश द्योतयन्तं सलग्नाङ्घ्रिस्थितं स्मरेत् ॥११३॥
वहन्तं वक्षसो मध्ये स्वहस्तकृतसम्पुटम् ।
सन्धारयन्तमपरं तथा वै शिरसोपरि ॥११४॥
ध्येया भगवती माला चित्ररूपा मनोहरा ।
सर्वगन्धान्विता सौम्या ईषद्विहसिता नता ॥११५॥
कुन्दावदातं कमलं सौम्यमीषत्स्मितान्ननम् ।
रवं रवन्तं मधुरं श्रोत्रेन्द्रियसुखावहम् ॥११६॥
गदा हेमाद्रिसङ्काशा तन्वीं कुवलयेक्षणाम् ।
द्विरष्टवर्षवत्कान्ता कुमारीं नवयौवनाम् ॥११७॥
स्वोत्थेन रश्मिजालेन भासयन्तीं नभस्स्थलम् ।
स्वरश्मिमण्डलान्तस्थं वल्गन्तं हेतिपं स्मरेत्॥११८॥
त्रिगोराशा प्रतीक्षन्त क्ष्म्वाङ्ग रक्तलोचनम् ।
तुहिनाऽचलसङ्काशं शङ्ख(१) कमलाञ्छनम्॥११९॥

(१) कमललोचनम्– इति क्वचित् ।

सदागमादिसामान्तमुद्गिरन्त स्वकैर्मुखै ।
ध्येया स्वरुचिसयुक्ता द्विभुजा पुरुषोपमा ॥१२०॥
सास्त्रा किरीटपूर्वा ये गदामालाङ्कनाकृती ।
एतेऽस्त्रनायकास्सर्वे विभोराज्ञाप्रतीक्षका ॥१२१॥
प्रोत्थिता विचलन्तश्च सुसमे स्थानकै स्थिता ।
श्रोणीतटार्पितकराश्चामरव्यजनोद्यता ॥१२२॥
सपद्म तु किरीटाद्य वर्जयित्वा चतुष्टयम् ।
तर्जयन्त च दुष्टौघमन्येषा दक्षिण करम् ॥१२३॥
स्मरेद्वै ध्यानकाले च सर्वेपामथ मस्तके ।
ध्येय स्वक स्वक चिह्न सुप्रबुद्ध निराकृति ॥१२४॥
नलिनीतालहस्ता च लक्ष्मी रक्ताम्बुजप्रभा ।
पुष्टा कनकगौरा चाऽमृतकुम्भधरा स्मृता ॥ १२५ ॥
भोक्तृशक्ति स्मृता लक्ष्मी पुष्टिर्वै कर्तृसज्ञिता ।
भोगार्थमवतीर्णस्य लोकानुग्रहकाम्यया ॥ १२६ ॥
उदित सह तेनैव शक्तिद्वितयमव्ययम् ।
रक्ततुण्ड महाप्राण भीमभ्रुकुटिलोचनम् ॥ १२७ ॥
दीव्यच्चामीकराकार पद्ममण्डलमण्डितम् ।
सस्मरेत् गरुड विप्रा गृध्रवक्त्र पृथूदरम् ॥ १२८ ॥
यथोक्तमूर्तियुक्ताश्च तथा ध्यायेद्यथाक्रमम् ।
किरीटो हुतभुग्वेद्य कौस्तुभस्तु प्रभाकर ॥ ॥१२९॥
स्वय शशाङ्क श्रीवत्सो मालाप्पणमाधवादय ।
अपा पतिर्वै कमल गदा देवी सरस्वती ॥ १३० ॥
कालश्चक्राधिपो ज्ञेय ख शङ्ख कथितो द्विजा ।
प्राण पतत्रिराड्विद्धि एव तत्त्वेषु सस्थितान् ॥ १३१॥
अधिष्ठातॄन् क्रमाच्चैतानर्चयेदर्घ्यपुष्पकै ।
यन्त्येवदनु देवेश भोगैरर्घ्यादिभि क्रमात् ॥ १३२ ॥

विनिवेद्यासनवरं समाहृतस्य वै विभो ।
पादपीठं तु सामान्यं मृद्वास्तरणभूषितम् ॥ १३३ ॥
घण्टाशब्दसमोपेतं दत्वाऽर्घ्यं मन्त्रमूर्धनि ।
पाद्यप्रतिग्रहं हैमं विभोर्दद्यात्सुरत्नकम् ॥ १३४ ॥
पाद्यं पादोदकाकर्षं शाटकं चाऽनुलेपनम् ।
सप्रतिग्रहमाचामं साऽनुलेपं च मालिकाम् ॥ १३५ ॥
घृतादिकैर्महादीपैरच्छिन्नैरर्चयेद्धरिम् ।
सुगन्धैर्मधुरैर्धूपैः प्रभूतैरर्चयेद्विभुम् ॥ १३६ ॥
अर्हणं मधुपर्कं च तर्पणं तदनन्तरम् ।
निष्पुमनं सपात्रं च आचामं गन्धमेव च ॥ १३७ ॥
अथ चूर्णितकर्पूरं घृष्टं श्रीगन्धभावितम् ।
सपूगफलमुत्कृष्टं ताम्बूलं विनिवेद्य च ॥ १३८ ॥
सपुत्रदारमात्मानमष्टाङ्गपतनेन च ।
चेतसा भक्तियुक्तेन निवेद्य तदनन्तरम् ॥ १३९ ॥
भगवानथ विज्ञाप्य कृत्वा तत्पादगौ करौ ।
सुदृढीकृतं मया देव त्विदं स्नानवरं त्वयि ॥ १४० ॥
सपादपीठमपरं शुभं स्नानासनं महत् ।
आसादयाऽऽशु स्नानार्थं मदनुग्रहकाम्यया ॥ १४१ ॥
विज्ञाप्यैवं मज्जनार्थं कृत्वा मार्गत्रयं ततः ।
स्नानासनं निवेद्याथ देवस्य द्वितयं तु वै ॥ १४२ ॥
स्नानार्थमवतीर्णस्य पादपीठमनन्तरम् ।
भक्तिनम्रेण शिरसा दद्यादर्घ्यं तु मूर्धनि ॥ १४३ ॥
विनिवेद्य ततो हैमं सुरत्नं च प्रतिग्रहम् ।
दद्याद्वै पाद्यकल्पनात् पाद्यं पादाम्बुजद्वये ॥ १४४ ॥
शुभे च पादुके चाथ तदन्ते स्नानशाटकम् ।
सुगन्धशालिसम्पूर्णं मात्रार्थं पात्रमुत्तमम् ॥ १४५ ॥

दर्पणं पूर्णचन्द्राभं गन्धतोयमनन्तरम् ।
पाणीनां क्षालनार्थं तु पादपीठं ततश्शुभम् ॥१४६॥
दन्तकाष्ठं च तदनु मुखशुद्धिप्रतिग्रहम् ।
जिह्वानिर्लेखनं चैव मुखप्रक्षालनं तु वै ॥ १४७ ॥
पुनराचमनं चैव अभ्यङ्गार्थमनन्तरम् ।
तैलं बहुसुगन्धं च चूर्णं गोधूमशालिजम् ॥१४८॥
रजनीचूर्णसम्मिश्रमीषत्पद्मकभावितम् ।
देयमुद्वर्तनार्थं तु चमर्पी तदनन्तरम् ॥१४९॥
स्नानार्थं स्वपसंयुक्तं तोयमुष्णमनन्तरम् ।
चन्दनं मुखलेपार्थं घृष्टं कर्पूरभावितम् ॥१५०॥
पञ्चविंशातिभिः कुम्भैस्ततस्संस्नापयेद्विभुम् ।
गव्यं प्रभूतं स्नानार्थं क्षीरं दधि घृतं मधु ॥१५१॥
ऐक्षवं तु रसं ह्यमभावे शर्करोदकम् ।
धात्रीफलोदकं चैव लोध्रतोय मनन्तरम् ॥१५२॥
रक्तचन्दनतोयं च रजनीनीरमुत्तमम् ।
ग्रन्थिपल्लववार्येव ततस्तु तगरोदकम् ॥१५३॥
प्रियङ्गुवारि तदनु मांसीजलमतःपरम् ।
सिद्धार्थकोदकं चाऽथ सर्वौषधिजलं ततः ॥१५४॥
पत्रपुष्पोदके चैव फलबीजोदके त्वथ ।
गन्धोदकं च तदनु हेमरत्नजलं ततः ॥१५५॥
पुण्यतीर्थसरित्तोये केवलं तदनन्तरम् ।
स्नानार्थं कल्पितैनैव उदकेन विमिश्रितम् ॥१५६॥
योक्तव्यं क्रमशो ह्येतदर्घ्यपुष्पसमन्वितम् ।
अन्तरान्तरयोगेन स्नानानां च महामते! ॥१५७॥
क्षाळनं चार्घ्यकलशादर्घ्यदानसमन्वितम् ।
यद्वा द्विपट्कक्लशैर्नवभिर्वाऽभिषेचयेत् ॥१५८॥

ततः स्नानीयशेषेण हेमादिद्रव्यनिर्मितम् ।
सम्पूर्णमम्भसा कुम्भं हरिद्राशालितण्डुलैः ॥१५९॥
सुपिष्टैरुपरिष्टाच्च लिप्तं युक्तं स्रगादिना ।
पाणौ कृत्वा तमेकस्मिन् अपरस्मिंस्तु मल्लकम् ॥१६०॥
धूमायमानं सिद्धार्थैर्भ्राम्य मूर्ध्नि बहिःक्षिपेत् ।
सुधौतमहतं चाथ शाटकं विनिवेद्य च॥१६१॥
कचोदकापकर्षार्थमपरं देहवारिधृत् ।
अधरोत्तरवस्त्रे द्वे गन्धधूपादिवासिते ॥१६२॥
स्कन्धप्रोतं निवेद्याथ सुसूक्ष्ममहतं सितम् ।
शिरस्स्थानं ततः कुर्याच्छ्रीधूपसमन्वितम् ॥१६३॥
कर्पूरचूर्णसम्मिश्रं कुर्याद्देवस्य मूर्धजम् ।
एवं हि चित्रपूर्वाणामन्येषां कमलासन । ॥१६४॥
सद्रत्नब्रह्मपाषाणवर्जितानां समाचरेत् ।
स्नानार्थं कर्मबिम्बे तु तत्समीपेऽथ दर्पणे ॥१६५॥
स्नानविज्ञापनं कृत्वा कर्मार्चां तस्य सन्निधौ ।
स्नानासने समारोप्य तस्यां सर्वं समाचरेत् ॥१६६॥
तदभावे दर्पणे तु स्नानभोगान् समर्पयेत् ।
चित्रस्य एव दद्याच्च भोगानन्यान् यथाक्रमम् ॥१६७॥
तदभावे च तान् सर्वान् पाणिनाऽऽदाय चेतसा ।
निवेदयेन्मण्डलादिष्वेवं भोगनिवेदनम् ॥ १६८ ॥
प्रोक्षणं यावता कुर्यादर्घ्याद्यैरवशिष्टकैः ।
प्रणालभागादपरं स्नानं भद्रासनात्तु वै ॥ १६९ ॥
भूरिनीरघटैः स्शुद्धं कृत्वा तत्राऽवतार्य च ।
सपीठं भगवद्बिम्बं तद्विना वाऽर्चितं यदि ॥१७०॥
स्वप्तुन भावयेद्देवं निर्लेपं क्षालयेत्ततः ।
भूयो गन्धोदकेनैव पूर्णं कुम्भचतुष्टयम् ॥१७१॥

स्नानकुम्भ विनाऽन्येषा प्राग्वत्कार्या हि कल्पना ।
हृन्मन्त्रेण चतुर्णां तु कुर्याद्वे दिव्ययोजनम् ॥ १७२ ॥
सास्त्रेण मूलमन्त्रेण सर्वं तच्चाऽभिमन्त्र्य तु ।
मार्गत्रय क्रमात्कृत्वा विनिवेश्याऽऽसन तत ॥ १७३ ॥
तृतीय रत्नरचित तत्रस्थ परमेश्वरम् ।
विभाव्याऽलङ्कृत भक्त्या भोगैस्स्रक्चन्दनादिभि ॥१७४॥
समभ्यर्च्याऽर्घ्यपाद्येन पादुकाभ्यामनन्तरम् ।
देयमाचमन भूय पादपीठ तथैव च ॥१७५॥
समालभ्य सुगन्धेन भक्तितश्चन्दनादिना ।
सवीज्य चन्दनेनैव मायूरेण ततेन च ॥१७६॥
केशप्रसादकृत्कूर्चं पुष्पताम्बूलकर्तनीम् ।
निवेद्य देवदेवाय दुकूलवसने सिते ॥१७७॥
उपवीत सोत्तरीय मकुटाद्यमनन्तरम् ।
पादनूपुरपर्यन्तमलङ्करणमुत्तमम् ॥१७८॥
विचित्र हि शिरोमाल्य वेष्टनेन समन्वितम् ।
स्रग्दामसूत्रसम्बद्धमाकर्णाच्चरणावधि ॥१७९॥
रुचिर कङ्कण चाऽथ दद्यात्प्रतिसर तत ।
धातुभि कुङ्कुमाद्यैर्वा विचित्र सितसूत्रजम् ॥ १८०॥
पूरित मृदुतूलेन ग्रथित चाऽन्तराऽन्तरा ।
अञ्जन सशलाक च ताम्बूल गन्धभावितम् ॥१८१॥
ललाटतिलक हैम मुखवास सरोचनम् ।
कर्णाऽवतसके पुष्पे मण्डन दर्पण महत् ॥१८२॥
प्रसार चित्रकुसुमैर्दीप्तरत्नप्रभोज्ज्वलै ।
प्रभूतैरथ महाज्वालैस्तिलतैलाऽऽज्यपूरितै ॥ १८३ ॥
अमुक्ताऽऽतमुखैतरचितैर्वर्तिवेष्टितै ।
प्रन्थीरतत्वगैलाऽऽद्य पूजयेत्तदनन्तरम् ॥१८४॥

कर्पूरचूर्णसम्मिश्रं सुगन्धि मधुरं बहु ।
घृष्टधूपसमायुक्तं गुग्गुलं धूपयेच्छुभम् ॥१८५॥
सहघण्टारवै रम्यैश्चाल्यमानेन बाहुना ।
उपानहौ सितं छत्रं शिबिका च रथादि यत् ॥१८६
वाहनं गजपर्यन्तं सपताकं सगाध्वजम् ।
सिताऽसितौ चामरौ तु मात्रावित्तमनन्तरम् ॥१८७॥
जानुनी भूगतौ कृत्वा शिरसाऽवनतेन तु ।
आदायोत्तानपाणिभ्यां विनिवेद्य जगत्प्रभो ॥१८८॥
औपचारिकभोगानामेतेषां पूरणाय च ।
भेरीमृदङ्गशङ्खाद्यैर्जयशब्दसमन्वितैः ॥१८९॥
गीतैर्विविधैर्नृत्तैस्तन्त्रीवाद्यसमन्वितैः ।
वचैश्शृङ्गैस्तथा हास्यैरन्यैश्श्राव्यैश्च पूजयेत् ॥१९०॥
स्तोत्रमन्त्रैर्नमस्कारैः प्रणामैश्च प्रदक्षिणैः ।
सङ्कटे सति भूभागे भगवत्प्रमत स्थिते ॥१९१॥
धिया नमस्कृतिं कुर्याद्बद्ध्वा तु करसम्पुटम् ।
हृद्देशे मूर्धकम्पैस्तु स्मरन् सर्वेश्वरं हरिम् ॥१९२॥
अन्तर्गर्भगृहे विष्णोर्गर्भद्वाराऽर्धमण्डपे ।
प्रणिपातगणं कुर्यात्प्रदक्षिणगणं विना ॥१९३॥
सङ्कटे सति तद्देशे बाह्ये तु सुरमण्टपे ।
स्थापयेत्कल्पबिम्बानि तत्राऽपि सति सङ्कटे ॥१९४॥
प्रथमाऽऽवरणे वाऽपि द्वितीयावरणेऽपि वा ।
स्थानं सुनिर्मितं कृत्वा प्रासादाभं च वर्ज्यदिक् ॥१९५॥
दिक्त्रयेऽभिमते कुर्याद्विदिक्ष्वभिमतेषु च ।
स्वप्रतिमादेशे वा सुदेशे सुपरीक्षिते ॥१९६॥
स्थापयेद्विधिना यात्राबिम्बं देवीसमन्वितम् ।
अन्यानि सर्वबिम्बानि न बहिस्स्थापयेत् क्वचित् ॥१९७॥

मूलबिम्बं समभ्यर्च्य पुरा नीराजनान्तिमम् ।
पश्चाद्बहिस्स्थितान् बिम्बान् पूजयेत्तु यथाविधि ॥१९८॥

एवं प्रदक्षिणान्तं च देवमभ्यर्च्य वै ततः ।
नीराजयेद्देवदेवं तद्विधानमिहोच्यते ॥१९९॥

नीराजनं तु त्रिविधं सात्त्विकादिविभेदतः ।
स्नानान्ते भोगयज्ञान्ते द्वितयं सात्त्विकं भवेत् ॥२००॥

सायङ्काले प्रतिदिनं कुर्याद्राजससंज्ञितम् ।
पूजायां दीपदानाग्रे नैवेद्यान्तेऽपि तामसम् ॥२०१॥

कुर्यात् प्रासाद एकस्मिन् तेषामेकं न तु त्रयम् ।
स्वयंव्यक्ते तथाऽन्यैश्च विबुधैश्च प्रतिष्ठिते ॥२०२॥

प्रासादे मुनिमुख्यैश्च सात्त्विकाख्यं समाचरेत् ।
ब्राह्मणैः क्षत्रियैर्वैश्यैः स्थापिते राजसं भवेत् ॥२०३॥

शूद्रैस्तु स्थापिते स्त्रीभिस्तामसाख्यं समाचरेत् ।
सात्त्विकस्य विधानं तु शृणुध्वं मुनिपुङ्गवाः ! ॥२०४॥

कर्तव्यं स्नानभोगान्ते यत्तदुक्तं पुरैव तु ।
अलङ्कारासनान्ते यत्कर्तव्यं तदिहोच्यते ॥२०५॥

कृतं स्वर्णादिभिर्द्रव्यैः कुम्भमापूर्य वारिभिः ।
अर्घ्यपात्रोद्धृतैर्यद्वा केवलैर्गालितैः पुनः ॥२०६॥

अन्तस्सिद्धार्थकान् क्षिप्त्वा कण्ठे कुर्यादलङ्कृतिम् ।
अश्वत्थपल्लवैस्स्रग्भिश्चन्दनेनाऽक्षतैरपि ॥२०७॥

अन्यत्र रजनीपिष्टैर्लेपयेत्सर्वतो द्विजाः! ।
तदास्ये मल्लकं पुष्पं सम्पूर्णं तु नियोजयेत् ॥२०८॥

संस्कृताऽग्निसमुद्भूतान् पुरा दीपान् प्रदीप्य तु ।
विन्यसेच्छ्राऽनुरूपेण चतुर्विंशतिकान् द्विजाः! ॥२०९॥

पाकस्थानात्तु वै दीपादुच्छ्रिताच्चतुरङ्गुलैः ।
प्रदीपं मल्लके कृत्वा सकुम्भ विनिवेशयेत् ॥२१०॥
अग्रतो देवदेवस्य सदाधारोपरि स्थितम् ।
तमर्घ्यगन्धस्रग्धूपैर्हृन्मन्त्रेण तु पूजयेत् ॥२११॥
केवलं साऽर्घ्यपुष्पेण साधकस्तदनन्तरम् ।
दद्यादाचमनान्तेऽर्घ्यं मन्त्रेशस्याऽथ वा द्विजा ! ॥२१२॥
अर्घ्यालभनमाल्यानि धूपं चाप्यर्घ्यमेव च ।
दीपकुम्भं तु पाणिभ्यामुद्धृतं परिचारिणा ॥२१३॥
देवस्य दक्षिणं पादमारभ्येतरपश्चिमम् ।
भ्रामयेत्सर्वतोऽङ्गानि एकधा वा द्विधा त्रिधा ॥२१४॥
जपन् वै नेत्रमन्त्रं तु हृन्मन्त्रं वा यथारुचि ।
एवं कुम्भं परिभ्राम्य द्विजेन परिचारिणा ॥२१५॥
शुद्धया योषिता वाऽपि द्वाराद्बाह्ये विसर्जयेत् ।
ततस्तु देवदेवस्य दद्यादर्घ्यं तु मूर्धनि ॥२१६॥
पाकस्थानात्तदर्थं तु दीप आनीयते यदा ।
तदानीं तद्विधानं तु शृणुध्वं मुनिपुङ्गवा ! ॥२१७॥
दीक्षितास्सुविनीताश्च सुस्नाता परिचारिका ।
वदनं नासिकारन्ध्रे स्थगयित्वाऽम्बरेण तु ॥२१८॥
सितोष्णीषधरास्सर्वे सितचन्दनभूषिता. ।
सौवर्णानि च पात्राणि विततानि यथारुचि ॥२१९॥
राजतान्यथ ताम्राणि आरकूटमयानि च ।
काम्यानि वाऽपि सम्पाद्य यथावित्तानुसारत ॥२२०॥
एकत्रिपञ्चसप्ताऽपि न चैकादश वा तथा ।
द्विपट्षोडश वा यद्वा चतुर्विंशतिसङ्ख्यया ॥२२१॥
पात्राऽऽज्य सभासाद्य तत्राऽग्नेस्संस्कृतात्पुरा ।
तेषां मध्ये गर्निर्दिष्टान् पात्राणां तु महामते ! ॥२२२॥

चतुरङ्गुलिकोत्सेधान् सघृतान् दीपयेत्पुनः ।
उद्धृत्य तानि पात्राणि करैस्तु परिचारकाः ॥२२३॥
वहेयुः पङ्क्तिबन्धेन तदग्रे गणिकाजनाः ।
गच्छेयुर्भगवद्भक्ताः कुर्वन्त्यो नृत्तगीतके ॥२२४॥
तदग्रे शङ्खभेर्यादिसमुद्घोषणतत्पराः ।
तदग्रे वेत्रिणो ऽस्पृश्यजनोत्सारणतत्पराः ॥२२५॥
गच्छेयुः परितस्तेषां दीपिकाधारिणो जनाः ।
एवं क्रमात्समासाद्य तिष्ठेयुर्देवसन्निधौ ॥२२६॥
अथाऽन्यो दीक्षितो विप्रः कुम्भमापाद्य पूर्ववत् ।
समलर्कं तदूर्ध्वे तु तेष्वेकस्मात्प्रदीप्य तु ॥२२७॥
पाकस्थानादाहृतेषु प्रदीपं विनिवेश्य च ।
सदाधारस्थितं कुर्यात्ततस्साधकसत्तमः ॥२२८॥
कुम्भं प्राग्वत्समभ्यर्च्य देवेशं च ततः परम् ।
भ्रामयेत्पूर्ववत्कुम्भं तस्मिन् काले द्विजोत्तमाः ॥२२९॥
ऋगाद्यध्ययनं कुर्युर्द्विजाः प्रागादिदिक्स्थिताः ।
सन्निधौ देवदेवस्य नृत्यं तु गणिकास्तदा ॥२३०॥
मङ्गलानि च गीतानि सर्वे गायन्तु गायकाः ।
स्वरेणोच्चतरेणैव स्तुवन्तु स्तोत्रपाठकाः ॥२३१॥
भेरीमृदङ्गशङ्खादीन् घोषयेयुस्समन्ततः ।
एवं सर्वत्र वै कुर्यादृगाद्यध्ययनादिकम् ॥२३२॥
कुम्भमेवं परिभ्राम्य दत्वा तत्परिचारिणः ।
हस्तेऽथ दीपपात्राणि दर्शयेदितराणि च ॥२३३॥
दृष्ट्वा सम्यक्ततो दद्यादर्घ्यं देवस्य मूर्धनि ।
कुम्भपूर्वाणि पात्राणि वहन्तः परिचारकाः ॥२३४॥

प्रदक्षिणक्रमात्सार्धं पूर्ववद्गणिकादिभि ।
क्षिपेयुर्द्वारमार्गे वा बाह्यद्वारस्य बाह्यत ॥२३५॥
अथ वा विनियुक्तानि तानि संगृह्य योषित ।
सुस्नाता धौतवसना द्विजातीभावितात्मन ॥२३६॥
ललाटतिलकं दत्वा सर्वालङ्कारभूषिता ।
क्षिपेयुरुदितेनैव वर्त्मना द्विजसत्तमा ॥२३७॥
अथ वा विनियोगात्तु पूर्वं पाकाऽऽश्रयादपि ।
योषितो दीपपात्राणि गृहीत्वा प्रोक्तवर्त्मना ॥२३८॥
आनयेयुर्विभोरग्रे कर्तुमिच्छाऽनुरूपत ।
एवं नीराजनं कुर्यादलङ्कारासनं तत ॥२३९॥
अथ वा भ्रामयेत्कुम्भं दीपाष्टकसमन्वितम् ।
यद्वा तत्रापि वै कुम्भं साभिमङ्कसयुतम् ॥२४०॥
धूमायमानं सिद्धार्थैर्भ्रामयेद्दीपवर्जितम् ।
एवं नीराजनं प्रोक्तमेकमूर्तौ द्विजोत्तमा ॥२४१॥
अनेकमूर्तिपूजायां मुख्यमूर्त्यादित क्रमात् ।
सर्वासामपि मूर्तीनां दत्वा ध्यांश्च पृथक् पृथक् ॥२४२॥
एकेनैव तु कुम्भेन प्रत्येकमथ वा द्विजा ।
सर्वासामपि कुम्भेन प्राग्वन्नीराजनं चरेत् ॥२४३॥
एवं नीराजनं प्रोक्तं कृतं भगवतो विभो ।
अनुतिष्ठन्ति साहाय्यं तस्मिन् कर्मणि ये जना ॥२४४॥
सर्वपापविनिर्मुक्ता भवेयुस्ते न संशय ।
एवं नीराजनं प्रोक्तं [illegible] नाम नामत ॥२४५॥

इति श्रीपाञ्चरात्रे ईश्वरसंहितायां नीराजनान्तविधिर्नाम
चतुर्थोऽध्याय ।

अथ पञ्चमोऽध्यायः ।

नारदः ।

ततो भोज्यासने देवो भोगैराभ्यवहारिकैः ।
पूज्यस्सपादपीठं वै दद्याद्भोज्यासनं विभोः ॥१॥
छत्रं दुकूलतूलोत्थमसूरकवरेण तु ।
आरोपयित्वा प्रागास्यं तत्रस्थे भोजनासने ॥२॥
अर्घ्यं पाद्याचमे दद्यात्प्रतिग्रहसमन्विते ।
तर्पणं सम्प्रतिष्ठाप्य वासितञ्चाऽर्घ्यवारिणा ॥३॥
अथर्वणजलं स्वच्छं सुगन्धं पात्रतः कृतम् ।
मधुपर्कं दधिमधुघृतयुक्तमनन्तरम् ॥४॥
समस्तमेवमेकाङ्गं दधि वाऽपि निवेदयेत् ।
शीतलं तर्पणजलमथ चूर्णं पुरोदितम् ॥५॥
देयं निष्पुंसनार्थं तु पुनराचमनं विभोः ।
स्वलङ्कृता सुरूपां च स्रग्युक्तां विनिवेद्य गाम् ॥६॥
ओषधीश्शालिपूर्णाश्च स्रक्फलाढ्यं वनस्पतिम् ।
मूर्तं निवेदयेत्पूर्वं ततस्संस्थाप्य तर्पणम् ॥७॥
प्रच्छादनाऽम्बरं चैव प्रदद्यादर्हणोदकम् ।
पद्मसम्भवैर्दिव्यैर्नैवेद्यैः पावनैः फलैः ॥८॥
गुल(ड)खण्डाश्रितैर्भक्ष्यैर्बहुभिर्घृतपाचितैः ।
गुल(ड)मुद्गपयोमिश्रैर्निशाऽऽज्यतिलमिश्रितैः ॥९॥
दधिमिश्रैस्सर्पिर्मिश्रैर्मधुस्वादुगुणैः फलैः ।
क्रमादन्नैरष्टविधैरपूपान् विनिवेदयेत् ॥१०॥
सम्भाभी रसालाभिः पयसा सुश्रितेन च ।
पवित्रैर्दर्भतन्तैस्स्वादुरसगन्धैश्च पानकैः ॥११॥

मत्स्यैर्भोज्यैस्तथा लेह्यैः पेयैरन्यैरनेकशः ।
श्रद्धापूतेन मनसा यजेत्तमजमव्ययम् ॥१२॥
एवं तस्मिंस्तु भोगेऽपि प्रोक्षयेदर्घ्यवारिणा ।
छोटिका मन्त्रसंयुक्ता कृत्वा पाणिद्वयेन तु ॥१३॥
अथ पाणिद्वयेनैव अग्नीषोमात्मकेन तु ।
योग्यतापदवीं नीत्वा मुद्रां कामदुघां ततः ॥१४॥
बध्वा तदमृतीकुर्याद्भोगजालं यथास्थितम् ।
दत्वाऽर्घ्यं पुष्पमुपरि संस्पृशेद्विष्णुपाणिना ॥१५॥
सव्येन पाणिनाऽऽस्पृश्य प्रकोष्ठं दक्षिणस्य तु ।
तेन दक्षिणहस्तेन अग्रसङ्कुञ्चितेन तु ॥१६॥
निवेदयेत्ततो विप्राः शिरसाऽवनतेन तत् ।
असन्निधिश्च यो भोगो ह्यङ्गभावमनुव्रजेत् ॥१७॥
तत्तत् ध्यात्वा तु मनसा भक्त्या विष्णोर्निवेदयेत् ।
पावनैः पानकैः स्वच्छैश्शीतलैर्मधुरादिकैः ॥१८॥
त्वगेलाद्यन्वितैर्मृष्टधूपकर्पूरवासितैः ।
नालिकेरोदकोपेतैस्तर्पणीयमनन्तरम् ॥१९॥
मसूरमाषचूर्णेन रजनीयालितेन च ।
समुद्वर्ति च संक्षाल्य शीतलैर्बहुवारिभिः ॥२०॥
नैवेद्याऽऽचमनार्थं तु गन्धोदकमनुत्तमम् ।
वाससा निर्मलं कृत्वा चन्दनेन सितेन च ॥२१॥
समालभ्य सुघृष्टेन कर्पूरसहितेन च ।
तिलान्यथ सुरत्नानि सौवर्णे वाऽथ राजते ॥२२॥
पात्रे कृत्वाऽथ मात्रार्थं देवाय विनिवेदयेत् ।
स्नग्धतक्रोलैलान्वकर्पूरपरिभावितम् ॥२३॥
जातीपूगफलोपेतं ससुगन्धच्छदं बहु ॥
कर्पूरचूर्णसम्मिश्रं मुक्ताचूर्णविमिश्रितम् ॥२४॥

मातलङ्गफलोपेतं नालिकेरफलाऽन्वितम् ।
प्रदद्यात्प्रणतश्चाऽन्ते ताम्बूलं जगतः पतेः ॥२५॥
प्रक्षाल्य गन्धतोयेन अर्घ्यपात्रोद्धृतेन वै ।
पाणियुग्मं यथा वै स्यात् स्वच्छमत्यन्तनिर्मलम् ॥२६॥
नैवेद्यधूपपात्राद्यैः पात्रैश्चाऽनिर्मलीकृतम् ।
कृत्वा सद्गन्धदिग्धौ तावर्घ्येणाऽर्च्य परस्परम्॥२७॥
मुद्रां मूलादिमन्त्राणां दर्शयित्वा यथाक्रमम् ।
भूयोऽर्घ्यगन्धपुष्पेण धूपाऽन्तेन समर्च्य च ॥२८॥
जपयज्ञविधानेन देवं सन्तर्पयेत्ततः ।
स्फाटिकेनाऽक्षसूत्रेण स्वकैर्वा करपर्वभिः ॥२९॥
पात्रं संस्थापयेत्पश्चादर्घ्यपात्राच्च वारिणा ।
विलिप्य चन्दनाद्यैस्तु स्नापयेद्भाजने शुभे ॥३०॥
सम्पूज्य पुष्पधूपाद्यैर्मन्त्रं तत्र च विन्यसेत् ।
साधारमासनं चैव शक्तिपूर्वैस्समावृतम् ॥३१॥
चतुर्भुजं तु विरजो नारायणमिवाऽपरम् ।
वरदाऽभयहस्तं च बद्धाञ्जलिधरं स्मरेत् ॥३२॥
ब्रह्मस्थानस्थितं तं च सूत्रे ध्यायेच्छिखोपमम् ।
सन्निधौ भव देवेश ! सन्निरुद्धो भवाऽच्युत ! ॥३३॥
सूत्राऽऽख्यमणिजालेऽस्मिन् यावच्चन्द्रार्कतारकाः ।
एवं मुने ! प्रतिष्ठाप्य सूत्रमन्त्रेऽक्षसंज्ञिके ॥३४॥
प्रतिष्ठितस्य वै पश्चान्मुद्रां स्वां च प्रदर्शयेत् ।
यथाशक्ति जपं कुर्याच्छतमष्टाऽधिकं तु वा ॥३५॥
तन्निवेद्य विभोः पश्चाद्धाकर्म मनसाऽन्वितम् ।
पुण्डरीकाक्ष ! विश्वात्मन् ! मन्त्रमूर्ते ! जनार्दन ! ॥३६॥

गृहाणाऽस्मिन् जप नाथ ! मम दीनस्य शाश्वतम् ।
इत्युक्त्वा सोदक पश्चात्पुष्प दक्षिणपाणिगम् ॥३७॥

अग्रतो निक्षिपेद्विष्णोर्मूलमन्त्रेण नारद ! ।
भावयेच्च ततस्सम्यक् स्फुरन्तीं तारकावलिम् ॥३८॥

प्रविष्टा भगवद्वक्त्रे वक्त्रात्तद्धृद्गता पुन ।
हृदयात् द्विजशार्दूल सहाराऽऽस्यक्रमेण तु ॥३९॥

पूर्ववद्धक्षरन्ध्रेण परेण सह योजयेत् ।
एकैक हृदयादीना सर्वेषा विहित त्वथ ॥४०॥

क्रियाऽङ्गत्वान्न दोषोऽस्ति अन्यथा तज्जप विना ।
धूप दत्वा मणम्याऽथ स्तुत्वा मन्त्रेश्वर तत ॥४१॥

अज्ञानात् ज्ञानतो वाऽपि जातमूनाधिक च यत् ।
दासस्य मम दीनस्य क्षन्तव्य लोकलोचन ! ॥४२॥

इति विज्ञाप्य देवेश भक्तितस्साधकोत्तम ।
सम्पूज्य गन्धधूपैश्च ततस्तु भगवन्मयात् ॥४३॥

यथाक्रम समभ्यर्च्य नैवेद्य प्रतिपाद्य च ।
तेषा मन्त्राऽवसान च अर्हणाद्य निवेदयेत् ॥४४॥

यद्वैभ्यो देवयज्ञान्ते तन्मात्रान्त मदाय तु ।
अस्मिन् कालेऽर्हणाद्य तु ताम्बूलान्त समर्पयेत् ॥४५॥

शय्यासन ततो दद्यादसौ सन्तर्पयेत्तत ।
न्यस्ताऽऽत्मासने यावादनताऽऽलयमर्घ्यभूत ॥४६॥

पूर्ववत् द्वारयाग तु कृत्वा सम्प्रविशेत्तत ।
तत्र पूर्वोक्तविधिना उपस्पृश्य समाहित ॥४७॥

प्रमाणपरिशुद्ध च विभवाऽनुगुण शुभम् ।
चतुरास्रण कुण्ड कृत्वा शोभाविभूषितम् ॥४८॥

त्र्यंशेनार्धेन वांशेन खाताद्यासो विधीयते ।
चक्रशङ्खाऽम्बुजाऽऽकारं वृत्तं वा चतुरश्रकम् ॥४९॥
गदाद्यैश्चक्रपर्यन्तैर्लांछनैर्लांछितं तु वा ।
अग्निकार्योपयोग्यानि यानि यानि महामते ! ॥५०॥


स्रुक्स्रुवादीनि भाण्डानि त्वङ्कितव्यानि तैरपि ।
यद्वा किरीटश्रीवत्समालाकौस्तुभलक्षणम् ॥५१॥
शङ्खचक्रगदापद्मसमस्तव्यस्तलांछितम् ।
भृङ्गारकरकाऽऽकारं कुण्डं कुर्याद्विचक्षणः ॥५२॥

कुण्डं चतुर्मेखलं वा त्रिमेखलमथाऽपि वा ।
द्विमेखलं तथा चैकमेखलं वा प्रकल्पयेत् ॥५३॥
स्थिरं समेखलं कुर्याज्जङ्गमं तु विमेखलम् ।
देशकालवशाच्चैव कुण्डं न घटते यदि ॥५४॥

तं विना हवनच्छेदो न कार्यस्सिद्धिमिच्छता ।
शोधिते ह्युपलिप्ते च स्थलेऽचलमृदाऽन्विते ॥५५॥

होमस्तु विहितस्सम्यक् मन्त्रसाऽमन्त्रितस्य च ।
पिण्डिका चतुरश्रा तु बहिस्सर्वत्र शस्यते ॥५६॥
मध्ये पद्मं प्रकुर्वीत श्रीपदं पद्ममध्यगम् ।
एवं कृते शुचौ कुण्डे अग्निकार्यं समाचरेत् ॥५७॥
चुल्ल्यां वा मल्लके वाऽपि होमं कुर्याद्यथाविधि ।
एतेष्वेकतमं कुण्डं सम्भवाऽनुगुणं शुभम् ॥५८॥
सुधाद्यैर्वर्णकैश्शुद्धैर्धूपयित्वोपलिप्य च ।
सुगन्धैश्चन्दनाद्यैश्च पञ्चगव्यपुरस्सरैः ॥५९॥
कुण्डस्याऽऽरम्भकाले तु संस्कारा न कृता यदि ।
निष्पन्नस्य च ते सर्वे विधेयाश्च क्रमेण तु ॥६०॥

ताडयेदस्त्रमन्त्रेण पुष्पैर्दक्षिणपाणिना ।
खनन तीक्ष्णशस्त्रेण देशिकश्चाऽस्त्रविद्यया ॥६१॥
गृहीत्वा चेतदेशात्तु कुण्डमध्यात्तु मृत्कणम् ।
अङ्गुष्ठाऽनामिकाभ्यां तु हृदयेन समुद्धरेत् ॥६२॥
अस्त्रेणैव समीकृत्य न स्यान्निम्नोन्नत यथा ।
सेचयेत्कवचेनैव कुट्टयेत्तदनन्तरम् ॥६३॥
लेपयेद्गन्धतोयेन अस्त्रेण परिशोधयेत् ।
अस्त्रजप्तैः कुशाकाण्डैस्तीक्ष्णाग्रैर्मूलवर्जितैः ॥६४॥
अस्त्राऽभिमन्त्रितेनैव दर्भकाण्डद्वयेन तु ।
तन्मध्ये च कुशाग्रेण प्राग्भागमवलम्ब्य च ॥६५॥
आरभ्य दक्षिणाऽऽशाया लिखेल्लेखामुदग्गताम् ।
तस्यामुपरि संलिख्य रेखाना त्रितयं स्फुटम् ॥६६॥
प्रागग्र दक्षिणाऽऽशादि ह्युदीच्यन्त च साऽन्तरम् ।
तत्र प्रागग्ररेखासु मध्यैका पिङ्गलाऽभिधा ॥६७॥
दक्षिणोत्तरयोर्द्वे तु सुषुम्नेडादिदैवते ।
चतुर्थी प्रणवेनाऽथ प्रोक्षयेदर्घ्यवारिणा ॥६८॥
तदभ्यर्च्याऽर्घ्यपुष्पाद्यैर्ध्यायेत्तद्भद्रपीठवत् ।
प्रणवैस्तु प्रतिष्ठान प्रागदस्य समाचरेत् ॥६९॥
चतुरश्रस्थले कुण्डे दिग्विदिग(ग्र)ष्टकं बहिः ।
सम्पूर्णपात्रं कुम्भानामष्टकं विनिवेश्य च ॥७०॥
ऊर्ध्वाऽधोमेखलाना च चतुर्णां दिक्चतुष्टये ।
कौशेयविष्टरस्थांश्च वासुदेवादिकान् यजेत् ॥७१॥
विदिक्ष्वप्यथ योगेन ह्यार्घ्यान्तमपरास्तु वै ।
तद्दैवाऽर्घ्यपुष्पाद्यैः पूजनीया क्रमेण तु ॥७२॥



मृदुदर्भसमूहं च नीरसं चाऽश्मकुट्टिमम् ।
शुष्कगोमयचूर्णेन युक्तं गन्धाऽऽत्मना सह ॥७३॥
कुण्डे द्रोणांशमात्रं तु समारोप्य प्रसार्य च ।
अच्छिन्नाग्रैस्ततो दर्भैरस्त्रमन्त्राऽभिमन्त्रितैः ॥७४॥
कुण्डभित्तिगणं सर्वं प्रोत्थितैः परिभूपयेत् ।
वर्मणा चाऽक्षवाटं तु सङ्कल्प्य तदनन्तरम् ॥७५॥
समभ्यर्च्य च पुष्पाद्यैर्मध्यतः प्रणवेन तु ।
तेनैव विधिना नाभिं पूजयेच्चन्द्रसन्निभाम् ॥७६॥
ततः पवित्रकं दार्भं शिखामन्त्राऽभिमन्त्रितम् ।
प्राक्समालेपनोपेतं चतुष्पथपदे न्यसेत् ॥७७॥
हृन्मन्त्रेण ततस्तत्र योगपीठं प्रकल्पयेत् ।
तत्र नारायणाख्यां वै शक्तिं विद्योतलक्षणाम् ॥७८॥
लक्ष्म्याकृतिपदं प्राप्तामभृताऽमृतरूपिणीम् ।
सर्वाऽतिशयरूपां च सर्वशक्तिसमन्विताम् ॥७९॥
सौकुमार्येण रूपेण सर्ववस्त्वन्तरस्थिताम् ।
शाश्वतीं सृष्टिमार्गेण अवतार्य हृदम्बुजे ॥८०॥
पुरा ध्यानक्रमेणैव हृन्मन्त्रेण हृदम्बुजात् ।
स्वनामपदयुक्तेन सनमःप्रणवादिना ॥८१॥
रेचकेन विनिक्षिप्य कुण्डहृत्पद्ममध्यतः ।
सम्पूज्य गन्धपुष्पाद्यैः पद्ममुद्रां प्रदर्श्य च ॥८२॥
ताम्रपात्रेऽथ वाऽन्यस्मिन् समादाय हुताशनम् ।
आरण्यं लौकिकं वाऽथ मणिजं दर्पणोद्भवम् ॥८३॥
निधाय कुण्डस्यैशान्ये संस्कारार्थं च साम्प्रतम् ।
सन्ताड्य चाऽस्त्रमन्त्रेण प्रोक्षयेच्छिखया च तम् ॥८४॥

हृदाऽभ्यर्च्याऽमृतं ध्यानं दत्वाऽऽच्छाद्याऽथ वर्मणा ।
मूलं स्मृत्वा समानीय पूरकेण हृदन्तरे ॥८५॥
मन्त्रानिलकराकृष्टं कृत्वा तस्माद्विनिर्गतम् ।
व्यस्तो गुणगणात् षष्ठस्तेजो नाम गुणो हि यः ॥८६॥
परस्य ब्रह्मणस्सोऽयं सामान्यं सर्वतेजसाम् ।
निरेच्य विन्यसेत्तस्मिन् वह्निपात्रे पुराऽर्चिते ॥८७॥
ततोऽग्निपात्रमादाय निर्धूममतिदीप्तिमत् ।
दक्षिणेन करेणैव पाणिभ्यामथ वा द्विजा ! ॥८८॥
भ्रामयित्वा चतुर्धा वै ततः कुण्डान्तरे क्षिपेत् ।
ध्यायेदेकत्वमापन्नं ततो मन्त्रार्चिषा सह ॥८९॥
याज्ञियैरिन्धनैश्शुष्कैः प्रज्वाल्याऽस्त्राभिमन्त्रिते ।
हृदा दक्षिणहस्तेन कुर्यात्परिसमूहनम् ॥९०॥
प्रदक्षिणक्रमेणैव ह्यार्द्रे पाणितलेन तु ।
तिर्यग्वाऽधोमुखस्थेन नखपृष्ठमदर्शयन् ॥९१॥
अस्त्राऽभिमन्त्रितेनैव प्रोक्षयेदर्घ्यवारिणा ।
ततस्त्वभममूलाग्रैस्समैर्दद्यात्कुशैस्स्तरम् ॥९२॥
दिशि दिश्युत्तराऽऽशान्तं याम्याऽऽशादौ तु सान्तरम् ।
चतुर्गुणैश्चतुर्धा त्वप्यग्रच्छन्नैः परस्परम् ॥९३॥
प्राक्प्रान्ते पूर्वभागाच्च यावदुत्तरगोचरम् ।
होमोपकरणं सर्वं होमभाण्डपुरस्सरम् ॥९४॥
अवतार्य तदूर्ध्वे तु दक्षिणस्या तथाऽऽत्मनः ।
द्वन्द्वद्वन्द्वमयोगेन द्रव्यस्थापनमाचरेत् ॥९५॥
परिधींश्चेध्मनिचयं मुक्तदर्भैः करण्डिकाम् ।
स्रुक्स्रुवौ च चतुष्कं यदेकत्र निनिवेश्य च ॥९६॥

स्राधूपमधुपर्कं च बीजान्येकत्र वै ततः ।
कौशेयं धूतकेशं तु विष्टरं च घृतं चरुम् ॥९७॥
आज्यस्थालीचतुष्कं च निधाय तदनन्तरम् ।
प्रणीतापात्रयुगलं करकं चाऽर्घ्यभाजनम् ॥९८॥
चतुष्कमेतदपरमग्रतो विनिवेश्य च ।
प्रादेशमात्रास्समिधः प्रभूतं शुष्कमिन्धनम् ॥९९॥
पक्ष्मकस्वेदहृद्वस्त्रं वामभागे निधाय वै ।
अर्घ्योदकेन साऽस्त्रेण कृत्स्नं पावनतां नयेत् ॥१००॥
ततस्तु मूलदेशस्थाः ब्रह्मवृक्षादिकोत्थिताः ।
सपर्णास्सत्वचस्स्पष्टा अधो नेमेस्तु चाऽधिकाः ॥१०१॥
प्राक्प्रत्यगुत्तराग्रौ च प्रागग्रौ दक्षिणोत्तरौ ।
चतस्रो वै परिधयश्शिखामन्त्रेण पूजयेत् ॥१०२॥
विष्टराणि ततो दद्यात् हृदा कुम्भाऽष्टके ततः ।
तेषु क्रमात्पूजयेच्च लोकपालान् स्वदिक्स्थितान् ॥१०३॥
आदाय सोदकं चाऽथ प्रणीताऽऽख्यं च भाजनम् ।
पवित्रकं तु तन्मध्ये चतुर्दर्भकृतं न्यसेत् ॥१०४॥
उद्धृत्योद्धृत्य हस्तेन जलं तत्रैव निक्षिपेत् ।
ततस्त्वष्टाक्षरं मन्त्रं जपमानो हि साधकः ॥१०५॥
भूयस्तदम्भसा सर्वं प्रोक्षयेद्विष्टरेण तु ।
शेषस्य स्रावणं कुर्यात्सर्वदिक्षु स्तरोपरि ॥१०६॥
पुनरेवाऽम्भसाऽऽपूर्य तन्मध्ये परमेश्वरम् ।
ध्यात्वाऽर्चयित्वा संस्थाप्य त्वमतन्तदनन्तरम् ॥१०७॥
प्रणीते चाऽपरस्मिन् वै पात्रे चाऽग्रे कृते सति ।
सपवित्रं तु तत्राऽर्घ्यं दत्वा चरुं तु विन्यसेत् ॥१०८॥

मन्त्रनाथं तदूर्ध्वे तु ध्यात्वाऽभ्यर्च्य यथाक्रमम् ।
तत्पात्रमुत्तरस्यां च कृत्वा सम्पूज्य वै पुनः ॥१०९॥

अथाऽऽज्यं दशसंस्कारैस्संस्कुर्यात्साधकोत्तमः ।
अधिश्रयणमत्रादावुपाधिश्रयणं तथा ॥११०॥

प्रसादीकरणं चैव हृन्मन्त्रेण समाचरेत् ।
सम्प्लवोत्प्लवने कुर्यात्प्रणवेन तु साधकः ॥१११॥

हृदा पवित्रीकरणं दृशा नीराजनं तथा ।
ततः कवचमन्त्रेण कुर्यात्तदवकुण्ठनम् ॥११२॥

अवलोकामृतीकारौ क्रमान्नेत्रेण वर्मणा ।
भाण्डस्थस्य यदाज्यस्य दर्भैः प्रज्वलितैः पुरा ॥११३॥

स्पर्शनं विद्धि संस्कारमधिश्रयणसंज्ञकम् ।
उपाधिश्रयणं नाम यत्तद्‌द्रावणमुच्यते ॥११४॥

आज्यस्थालीमथाऽऽदाय स्वाज्यं यत्प्राग्द्रवीकृतम् ।
तत्रात्र निक्षिपेदाज्यभाण्डाद्दोषापनुत्तये ॥११५॥

प्रसादीकरणं ह्येतदुत्तरस्थेन करेण तु ।
पुनरादाय कृत्वाऽग्रे आधारोपरि यत्नतः ॥११६॥

दर्भकाण्डचतुष्कं तु द्वादशाङ्गुलसम्मितम् ।
तिर्यगुत्तानपाणिभ्यामवष्टभ्य च सान्तरम् ॥११७॥

अनामाऽङ्गुष्ठयुग्मेन यथा मध्यं नतं भवेत् ।
तैराज्यं चतुरो वारानानयेच्चतुरो नयेत् ॥११८॥

अन्तराऽन्तरयोगेन ह्यात्मनोऽग्नेस्तु सम्मुखम् ।
प्रणवेनोक्तसङ्ख्येन कुण्डमध्येऽथ निक्षिपेत् ॥ ११९॥

सम्प्लवोत्प्लवने ह्येवं कृत्वा दार्भं पवित्रकम् ।
विनिक्षिपेच्च तन्मध्ये पवित्रीकरणं च तत् ॥१२०॥

कुण्डादुल्मुखमादाय ज्वलन्तं धूमवर्जितम् ।
तेनाऽऽवर्तं सकृद्विप्र ! तद्धि नीराजनं स्मृतम् ॥१२१॥
नीराजीकृत्य तत्पश्चात्कवचोदरगं स्मरेत् ।
अवकुण्ठनमेतद्धि तर्जन्या यत्प्रदक्षिणम् ॥१२२॥
तेजसा हृदयस्थेन दृग्गतेनाऽवलोकनम् ।
निरीक्षणमिदं विप्र ! ततस्तत्रोपरि स्मरेत् ॥१२३॥
चन्द्रमण्डलमध्यस्थं धेनुमुद्रासमन्वितम् ।
मन्त्रं वै सौरभेयं च स्फुरदिन्दुशतप्रभम् ॥१२४॥
तदन्तरस्थं मन्त्रेशं हिमाचलनिभं स्मरेत् ।
तत्त्वैरमृतबीजैश्च शार्ङ्गिजैर्धेनुजैरपि ॥१२५॥
सर्वसंस्कारसंयुक्तं स्मरेदाज्यं च भावितम् ।
अमृतीकरणं नाम इदं ते सम्प्रकाशितम् ॥१२६॥
स्रुवादाय चाऽऽदाय दर्भपुञ्जलिकेन तु ।
रजोऽपनयनं कुर्यात्प्रक्षाल्योष्णेन वारिणा ॥१२७॥
निर्मलीकृत्य कूर्चेन ज्वालाभिस्सम्प्रतप्य च ।
प्रोक्षयित्वाऽर्घ्यतोयेन ताडयेद्गन्धपुष्पकैः ॥१२८॥
तदाऽप्रमेय स्रुचो ज्ञातव्यं कर्मसिद्धये ।
शतपत्रात्मनाऽनन्तो जुह्वस्थोऽनन्तवक्त्रभृत् ॥१२९॥
अन्तर्बीजात्मभावेन स्थित्वा चोर्ध्वमुखः पुनः ।
सप्तस्कन्धं यदव्यात्मं भूतप्राणमन्नहृत् ॥१३०॥
प्रेरितं प्रणवस्थेन तदादिच्छायमानसुनः ।
रसपातान्नागं च भगवद्ध्यानाऽम्बुजाऽऽत्मना ॥१२१॥
यदाश्रयत्यव्ययादेः स्वमूर्त्यात्मा जलं स्मित ।
सप्तकर्मनाशार्थे निम्नोऽजस्रमूर्निभृत् ॥१३२॥

शत्रुनिग्रहधृग्वायुराज्यकोशं च स ततः ।
निर्बीजमजमक्षोभ्यमाद्यं यस्याऽधिदैवतम् ॥१३३॥
अपरस्मिन् ध्रुवे ज्ञेयं यथा जायेत तच्छृणु ।
साक्षादमृतमूर्तिर्वै वरुणः कलशाऽऽत्मना ॥१३४॥
नालाऽऽत्मना तदस्त्रं च संस्थितं विघ्नभीतिहृत् ।
जगदाप्यायकृच्चन्द्रः पञ्चत्वेनाग्रदेशतः ॥१३५॥
आनन्दाख्यं हि सामर्थ्यं ज्ञेयं तत्पारमेश्वरम् ।
सत्यभूतममेयं च प्रमेयमिदमुच्यते ॥१३६॥
संस्कारकाले त्वारोप्य नित्यं सन्मन्त्रतर्पणे ।
स्वसंज्ञाप्रणवोपेता नमस्कारपदान्विता ॥१३७॥
सर्वेषामर्चने विप्रा ! आराध्य हृदयेन वा ।
पूजयित्वाऽर्घ्यगन्धाद्यैर्न्यस्य मन्त्रगणं ततः ॥१३८॥
चतुराङ्गुलैः समग्रैस्समूलैस्सुसमैः कुशैः ।
चतुर्भिर्वामहस्तेन त्वादायाऽथ पवित्रकम् ॥१३९॥
दक्षिणाऽनामिकायां तु चतुष्काण्डविनिर्मितम् ।
अङ्गुलीयकरूपं च कृत्वा वै तदनन्तरम् ॥१४०॥
सम्भृताऽऽज्यस्य निमृद्भिस्संस्पृशेदिन्धनादिकम् ।
निश्शेषदोषशान्त्यर्थमथाऽशेषाहुतस्य च ॥१४१॥
शतं शतार्धं पादं वा त्वाहुतीनां स्वशक्तितः ।
तिलानां घृतसिक्तानां शुद्धेन हविषा सह ॥१४२॥
होतव्यं कर्मसिद्ध्यर्थं यथावदवधारय ।
आहुत्यामुद्धृतायां च मूलमन्त्रावसानतः ॥१४३॥
प्रणवान्तं पदं ब्रूयादमिं शोधय शोधय ।
यथावस्थितरूपेण ततस्तेनैव बुद्धिमान् ॥१४४॥

दद्यात्पूर्णाहुतिं पश्चाद्घृतेन च चतुष्फलीम् ।
अग्नेर्होमोऽथ कर्तव्यस्सर्वसंस्कारसिद्धये ॥१४५॥
हृदाऽनलं पुटीकृत्य कर्मनाम समुच्चरेत् ।
सम्पादयामि स्वाहान्तं सर्वकर्मस्वयं क्रमः ॥१४६॥
आज्येन सिक्तैः कुसुमैस्सर्पिषा वा धिया द्विज ! ।
गर्भाऽऽधानादिसंस्कारान् कुर्याद्दारावसानकान् ॥१४७॥
श्रीकुक्षिकुहरे यद्वै वह्निहृस्य प्रवेशनम् ।
गर्भाऽऽधानं तु तद्विद्धि संस्कारं प्रथमं मुने ॥१४८॥
प्राणयोगाच्च या शक्तिर्वह्निश्रीजठरे स्थिता ।
जडरूपा च या सूक्ष्मा तस्याश्चित्प्रसरो हि यः ॥१४९॥
भगवच्छक्तिचैतन्यासामर्थ्याच्च शनैश्शनैः ।
स्मृत्वैवं जुहुयादाज्यं तन्मन्त्रेणोदितेन च ॥१५०॥
भवेत्पुंसवनं चाऽग्नेश्चिच्छक्तिनयनात्तु वै ।
सीमन्ताख्यं तु संस्कारमग्नौ कुर्यादनन्तरम् ॥१५१॥
अव्यक्ताश्च तदन्तरस्थाश्शिरःपाण्यादयोऽखिलाः ।
स्वां स्वां वै कर्मसीमानं प्रबुद्धास्संश्रयन्ति ये ॥१५२॥
विभागकलनात्तेषां सीमन्तं तदुदाहृतम् ।
अग्नेर्वै जातकर्मार्थं पूर्ववद्धोमयेत्क्रमात् ॥१५३॥
निस्सृतस्य च वै गर्भाज्जातकं तदुदाहृतम् ।
हिरण्यमधुसर्पिभ्यां स्तनसम्प्राशनं द्विज ! ॥१५४॥
कुर्यात्तदनु वै नाम जातस्याऽग्नेः प्रयत्नतः ।
वासुदेवादिनाम्ना वै प्रसिद्धेनाऽऽह्वयेत्तु तम् ॥१५५॥
एवं संस्कारशुद्धस्य वैष्णवाग्नेः प्रयत्नतः ।
मन्त्रासदानं पूर्वं यत्तदन्नप्राशनं भवेत् ॥१५६॥

शिखानन्ध यदग्नेस्तु तच्चौलमिति चोच्यते ।
यदग्नेर्होमयेदाज्य तच्चोपनयन स्मृतम् ॥१५७॥
वेदव्रत च गोदान समावर्तविवाहकौ ।
कृत्वाऽनन्तस्य निह्वाना भावयेल्लक्षन पुन ॥१५८॥
नवखण्डे समिन्धाने कुण्डेऽप्यावर्चिषोद्धते ।
तथा दीप्तिप्रकाशा च मरीचिस्तापिनी तथा ॥१५९॥
कराल लेलिहा चैव कुण्ड व्याप्य व्यवस्थिता ।
ईशपूर्वाग्निदिग्भागे प्रभाद्य नितय स्मृतम् ॥१६०॥
रक्षोवारुणवायव्ये मरीच्याद्य त्रय तु तत् ।
उदग्दिङ्मध्यतो याम्ये स्थितैका लेलिहाऽभिधा ॥१६१॥
रक्त श्वेत तथा नील कृष्ण पीत तथाऽरुणम् ।
सौदामिनीनिभ ध्यायेज्जिह्वाना सप्तक क्रमात् ॥१६२॥
स्वस्वर्णैर्नेम्स्वसंज्ञैर्वा स्वनाजैर्वा स्वनामभि ।
एतैर्मन्त्रैर्द्विजश्रेष्ठ भावयेच्च यथाक्रमम् ॥१६३॥
अष्टागण्यर्चिपश्चैव शक्तिर्या दहनात्मिका ।
त्रिलक्षणोऽप्यमाधार आधेयो हुतभुग्विभु ॥१६४॥
आत्मनोऽस्तु विशेषो वासुदेवस्सनातन ।
एव ज्ञात्वा पुरा सम्यक् सक्ता वैश्वानरी पराम् ॥१६५॥
आधेयोऽसिनितासग ध्यात्वा कुण्डगतानलम् ।
तज्ज्ञनिला तन कुण्डाज्ज्वालामार्गेण चागताम् ॥१६६॥
परानन्दप्रकाशाभा नासिकया द्वादशाऽवधि ।
ततोऽवतारयोगेन प्रविष्टा भावयेद्धृदि ॥१६७॥
तस्य सगुद्धेऽहस्य पुनरेव समाचरेत् ।
सम्बोधनक होम जन्मावमशान्तिदम् ॥१६८॥

उच्चार्य मूलमन्त्र तु प्रणवद्वितयान्वितम् ।
जुहुयादाहुतीना च सहस्र शतमेव वा ॥१६९॥
तद्वदाज्येन सन्तप्य दद्यात्पूर्णाहुर्ति तथा ।
सस्कृतस्याऽथ वै वह्ने पूजा कुर्यात्तु भक्तित ॥१७०॥
पुष्पैर्धूपेन दध्ना च तिलैरक्षतमिश्रितै ।
अन्नैर्भक्ष्यफलोपेतैराज्येन क्रमशो द्विज ॥१७१॥
सम्पूज्यैव विधानेन स्वमन्त्रेणाऽनल तत ।
तर्पयेत यथाशक्ति तिलाऽऽज्याद्यैरनुक्रमात् ॥१७२॥
आज्येन वा केवलेन सहस्रशतसङ्ख्यया ।
अग्रे पूर्णाहुर्ति दत्वा वौषडन्ता घृतेन तु ॥१७३॥
तत पूजा प्रकर्तव्या देवस्याऽग्नेस्तु मध्यत ।
पूर्ववच्च स्मरेद्ब्रह्मि साकार निष्कलप्रभम् ॥१७४॥
स्वयोगबलवीर्येण व्यापक सर्वदिग्गतम् ।
कदम्बकुसुमाकार स्वप्रभाभिर्विराजितम् ॥१७५॥
कुण्डमापूरयन् सर्व सर्वाकृत्या तु सर्वत ।
एव हि विततो व्यापी निराकारस्सुदीप्तिमान् ॥१७६॥
अथ ज्वालाजटाधारे वह्नेर्वै कुण्डमध्यत ।
अनुसन्धीयते बुद्ध्या विष्टर तु यथोदितम् ॥१७७॥
तदर्चनमथ कुर्यात्पुष्पैर्धूपैस्सचन्दनै ।
मुद्राबन्ध तत कुर्यात्पीठामरगणस्य च ॥१७८॥
ततोऽवतार्य तन्मध्ये हृदयात्परमेश्वरम् ।
निरोदकात्स्वमन्त्रेण दद्यात्पुष्पाञ्जलिं विभो ॥१७९॥
साङ्ग सलाञ्छन ध्यायेत्सकल परमेश्वरम् ।
साम्मुख्य सन्निधान च सन्निरोधनमाचरेत् ॥१८०॥

अर्घ्यप्रदानपूर्वं तु सर्वं कुर्यात्तु पूर्ववत् ।
मूलबिम्बे यथा ध्यानमग्निमध्ये तथा भवेत् ॥१८१॥
यानगो यानग ध्यायेदग्नौ स्थाने यथास्थितम् ।
आसीने त्वथ चाऽऽसीन शयाने च तथाविधम् ॥१८२॥

पद्मरागाऽरुणशुचिं सर्तव्यमनलास्पदे ।
मूलादिसर्वमन्त्राणा तत्तन्मुद्रा प्रदर्श्य च ॥१८३॥
अर्घ्यगन्धादिनाऽभ्यर्च्य पूजयेत्सकल प्रभुम् ।
स्वभोगात्मना सम्यक् पूर्वोक्तविधिना तथा ॥१८४॥

समिद्गण तु पात्रस्थ कृत्वाऽभ्यर्च्य हृदा तत ।
शिरसाऽनन्तेनैव विनिवेद्य तत प्रभो ॥१८५॥
आज्येनोभयतस्सिक्त ब्रह्मक्षीरद्रुमोद्भवम् ।
द्व्यष्टक समादाय द्विधा कृत्वा द्विजोत्तम ॥१८६॥
निधाय दक्षिणस्या च मध्य आग्नेयदिग्गतम् ।
विश्रान्त नैर्ऋतपदे उत्तरस्या तथाऽपरम् ॥१८७॥

वाय्वीशपदसरुद्धमाधाराभ्यन्तरत क्षिपेत् ।
इध्ममूलादधाकान्तमिध्मेध्मोपरि सस्थितम् ॥१८८॥
स्रुवमाज्येन सम्पूर्य सूर्यबीजेन चिन्तयेत् ।
सहस्रांशु च तन्मध्ये दद्यात्कुण्डस्य दक्षिणे ॥१८९॥
अपरस्मिन् स्रुचि ध्यात्वा सोमाख्येनाऽक्षरेण तु ।
पूर्णं शशाङ्कबिम्ब च प्रदद्यात्तत उत्तरे ॥१९०॥
सङ्ख्यानुगुणमिध्माना घृत च जुहुयात्तु वै ।
सूर्यसोमात्मक चा मोर्चिद्धि तल्लोचनद्वयम् ॥१९१॥
एतयोरन्तर यद्वै तन्मेवदन स्मृतम् ।
स्रुव वै जुहुयात्पूर्वं समिधा सप्त क्रमात ॥१९२॥

घृतसिक्ता चतुस्सङ्ख्यामेकैका हि सुपुष्कलाम् ।
प्राक्कुङ्कुमादिना लिप्ता काष्ठसज्ञा तु होमयेत् ॥१९३॥
स्रग्धूपमधुपर्कं च बीजान्याज्य यथाक्रमम् ।
तत्राऽन्नसमिधो दाने विशेषोऽय विधीयते ॥१९४॥
सादित सस्कृताग्नौ प्राक् त निधायाऽमतश्चरुम् ।
समुद्घाट्याऽवलोक्यादौ सम्प्रोक्ष्याऽर्घ्याम्भसा तत ॥१९५॥
दर्भकाण्डचतुष्केण सामिना तदनु स्पृशेत् ।
तन्मध्ये स्रुक्चतुष्क तु मन्त्रेणाज्यस्य निक्षिपेत् ॥१९६॥
अथादाय स्रुच तत्र तद्वद्द्द्याच्चतुष्टयम् ।
चतुरङ्गुलमानेनाऽप्यन्नग्रासमथाऽऽचरेत् ॥१९७॥
त निधाय स्रुवागर्भे तदूर्ध्वे पूर्ववद्घृतम् ।
दद्यादग्नौ चतुष्क तु क्षिपेदन्नाहुतिं तत ॥१९८॥
भूयोऽग्नौ स्रुक्चतुष्क त्वप्याज्यस्याऽऽपाद्य यत्नत ।
ततोऽन्नमाज्यससिक्त मापवत्कृत्वाऽऽहुतिं पुन ॥१९९॥
दद्यात्पूर्वप्रयोगेण एवमेव चतुष्टयम् ।
हुत्वाऽप्यन्नाहुतीना च आज्याख्या जुहुयात्तत ॥२००॥
तिलैर्घृतसमायुक्तैरष्टोत्तरसहस्रकम् ।
शत शतार्धं पाद वा यथाशक्ति समाचरेत् ॥२०१॥
आज्याक्तैरक्षतैस्तद्वत्तिलैश्च जुहुयात्तत ।
अर्धमर्धांशसयुक्तमधिक चाऽग्रवर्तिनाम् ॥२०२॥
जपकाले तथा होमे कर्तव्य सिद्धिमिच्छता ।
सिष्टकृद्धवन कुर्यादन्नग्रासेन वै सकृत् ॥२०३॥
काम्यैरवश्यफलदैर्देशकालसमुद्भवै ।
तिलैर्घृतेन पयसा दध्ना वा पायसेन तु ॥२०४॥

सिद्धार्थैस्साधितैर्भक्ष्यैर्यवैर्जीलजैश्च तण्डुलैः ।
मूलैः फलैः पल्लवैश्च सुप्रशस्तैश्च कोमलैः ॥२०५॥

सुगन्धैस्स्थलपद्माद्यैः पुष्पैश्चैव सितादिकैः ।
गुग्गुलेनाऽऽज्यमिश्रेण सम्यक् श्रीवेष्टकेन वा ॥२०६॥

धात्रीफलैश्च सरसैस्तफलैश्च शुभैस्तथा ।
सुसितासितरक्तैश्च पत्रैर्बिल्वैस्सुशोभनैः ॥२०७॥

दूर्वाकाण्डैरभग्नाग्रैर्दन्तिसद्दन्तनिर्मलैः ।
एवोभिर्निक्षरवृक्षाख्यैः क्षीरद्रुममयैस्तथा ॥२०८॥

अमृताक्षीरसंयुक्ता औदुम्बर्यो मधुप्लुता ।
अच्छिन्नाग्रा ह्यभग्नाश्च कण्टकैः परिवर्जिता । ॥२०९॥

सर्वाश्चमधुयुक्ताश्च घृतयुक्तास्तु वा पुनः ।
योक्तव्यान्यग्निमध्ये तु समिद्भिस्सह सर्वदा ॥२१०॥

सर्वाण्यन्नविशेषाणि चन्दनादीनि यान्यपि ।
सदन्तराग्र ताम्बूलमुलकटक्षारवर्जितम् ॥२११॥

दाप्यानि लक्षहोमे तु आसनादीनि यानि च ।
मधुलवणपानासुक्तैतैलोज्झितानि च ॥२१२॥

आज्ययुक्तैस्तिलैश्शान्तिस्सिद्धयस्तत्फलास्तथा ।
घृतेन पयसा दध्ना होमस्तुष्टिं प्रयच्छति ॥२१३॥

पायसेन तु सिद्धार्थैर्भक्ष्यैः पुष्टिस्सदा भवेत् ।
बीजैर्धान्यैस्तण्डुलैश्च तर्पितो मन्त्रराट् द्विजाः ॥२१४॥

प्रयच्छति सदा श्रेयः प्रसन्नः परमेश्वरः ।
पल्लवैः फलमूलैश्च होमस्तुष्टिं प्रयच्छति ॥२१५॥

जहाति चाऽपमृत्युं च रोगाश्चोपशमं नयेत् ।
तर्पितस्स्थलपद्माद्यैः पुष्पैश्चान्यैस्सितादिकैः ॥२१६॥

सौभाग्यमतुलं विप्राः ! अचिरात्सम्प्रयच्छति ।
गुग्गुलाज्यैर्द्विजारोग्यं शुभैर्धात्रीफलैस्तथा ॥२१७॥

शर्करैः बिल्वफलकैः पञ्चगव्यसमुक्षितैः ।
आज्यान्नैः पद्मबीजैश्च लक्ष्मी शीघ्रं प्रयच्छति ॥२१८॥

उत्पलैर्वश्यकामस्तु भोगकामस्तु होमयेत् ।
दूर्वाङ्कुरैश्च होमेन आयुषो वृद्धिमाप्नुयात् ॥२१९॥

पद्मोभिश्च शुभैर्होमो मापैश्शान्तिप्रदः प्रभुः ।
तिलानां शस्यते होमो हरिणाऽऽननमुद्रया ॥२२०॥

घृतस्य कार्षिको होमः क्षीरस्य च विशेषतः ।
शुक्तिमात्राहुतिर्दध्नः प्रसृतिः पायसस्य वा ॥२२१॥

आसार्धमानमन्नानां भक्ष्याणां स्वप्रमाणतः ।
सर्वेषामेव बीजानां मुष्टिना होममाचरेत् ॥२२२॥

अग्राङ्गुलिस्तु लाजानां शालीनां पञ्चकं हुनेत् ।
फलानां स्वप्रमाणं च पल्लवानां तथैव च ॥२२३॥

कर्कन्धुमात्रा गुलिका होतव्या गुग्गुलोस्सदा ।
धात्रीफलप्रमाणं वा सम्भवे सति होमयेत् ॥२२४॥

दूर्वाकाण्डानि विप्रेन्द्र ! चतुरष्टाङ्गुलानि वा ।
समित्प्रादेशमानेन समच्छेदास्त्वगान्विताः ॥२२५॥

अग्नेर्वर्णाश्च गन्धाश्च शब्दाश्चाऽऽकृतयस्तथा ।
विकारा विशिखा चैव संवेद्याः कर्मसिद्धये ॥२२६॥

पद्मरागद्युतिः श्रेष्ठो लाक्षाऽलक्तकसन्निभः ।
बालार्कवर्णो हुतभुक् जयार्थं शस्यते द्विज ! ॥२२७॥

इन्द्रकोपकसङ्काशश्शोणाभो वाऽथ पावकः ।
चक्रचापनिभः श्रेष्ठः कुङ्कुमाभस्तथैव च ॥२२८॥

रक्ताना पुष्पजातीना वर्णेनाऽग्निरिहोच्यते ।
सुगन्धो द्रव्यगन्धोऽग्निर्घृतगन्धश्च शोभन ॥२२९॥
आयुर्दे पद्मगन्धस्याद्दिव्यगन्धश्च सुव्रत ।
अमगन्धोऽभिचारे तु विहितस्सर्वदाऽनल. ॥२३०॥
जीमूतवल्लरीशङ्खमृदङ्गध्वनितुल्यक ।
शब्दोऽग्नेस्सिद्धये हेतुरतोऽन्यस्स्यादसिद्धिद ॥२३१॥
रक्ताभस्तु यदा वह्नि र्क्षीणार्चि परिदृश्यते ।
पद्मरागोपलाभश्च स्फटिकाभस्तथा शुभ ॥२३२॥
यद्रूप कथित पूर्वं यदि तस्य प्रदक्षिणम ।
अन्योन्यतत्र प्रपद्येत तदा सिद्धिकरोऽनल ॥२३३॥
गर्वितेन तु वर्णेन यदि कापोतकादिना ।
परिवर्तं करोत्यग्निस्तथा विप्रा विपर्यय ॥२३४॥
होमान्ते सन्निमित्त वै होम कुर्याच्छताधिकम् ।
विषमा च शिखा वह्नेरदयाश्च शुभावहा ॥२३५॥
ह्रस्वाऽह्रस्वोन्नता दीर्घा ज्वाला सिद्धिप्रदा स्मृता ।
स्निग्धप्रदक्षिणाऽऽवर्त श्रुतिप्रच्छादितध्वनि ॥२३६॥
स नियमेन शुभद्रयदन्यैर्वर्जितो गुणै ।
प्रदीप्ते लेलिहानोऽग्नौ निर्धूमे सगुणे तथा ॥२३७॥
हव्ये गुप्तिप्रदे चैव होतव्य श्रियमिच्छता ।
अल्पतेजोऽल्परूपश्च विष्फुलिङ्गसमन्वित ॥२३८॥
ज्वालाभ्रमविहीनश्च ह्यानुर्नैव सिद्धिद ।
अमनुद्धे सधूमे च जुहुयाद्यो हुताशने ॥२३९॥
कर्महानिर्भवेत्तस्य त्वाभिचारार्थमश्नुते ।
दुर्गन्ध पीतवर्णश्च कर्कशश्च योऽशुभ ॥२४०॥

प्रभामूर्तिगतो मन्त्रस्तर्पितो यदि सत्तम ! ।
श्रियां प्रयच्छत्यचिरादीप्तिस्थो भूप्रदः प्रभुः ॥२४१॥
तापयत्याशु शत्रूणां प्रकाशोपर्यवस्थया ।
शत्रुक्षयं ददात्याशु मरीच्यामूर्ध्वगो विभुः ॥२४२॥
तापिन्यामूर्ध्वगो मन्त्रस्सर्वशापोपशान्तिदः ।
विपक्षोच्चाटनं कुर्यात्करालासंस्थितो हुतः ॥२४३॥
लेलिहाऽवस्थितो मन्त्रो यदि सन्तर्प्यते मुने ! ।
दद्यादभीप्सितं चैव देहान्ते परमं पदम् ॥२४४॥
स्वाहाकारं सदा होमे पूर्णायां वौषडेन च ।
तमेव शान्तिके कुर्याद्वषडाप्यायने तथा ॥२४५॥
स्वधा पितृक्रियायां च फट्कारं क्षयकर्मणि ।
विद्वेषे हुं वशे स्त्रीणां नमो मोक्षप्रसिद्धये ॥२४६॥
कर्महोमाऽवसाने च घृतेनाऽऽपूर्य सस्रुचम् ।
अभावाच्च प्रभूतेन होमद्रव्येण पूरयेत् ॥२४७॥
तत्रोपरि घृतं दद्यात्ततोऽर्घ्यकुसुमादिभिः ।
मूलदेशात्समारभ्य स्रुचं पूज्य स्रुवाऽन्विताम् ॥२४८॥
घृतयुक्तं तु तत् द्रव्यं स्रुचः पुष्करकुक्षिगम् ।
द्रवच्चन्द्रोपमं ध्यायेत्ततः पूर्णं समुद्धरेत् ॥२४९॥
स्रुग्दण्डे देहनाभौ तु मूले संरुध्य संस्मरेत् ।
निष्फलं मन्त्रनाथं तु पूर्णशीतांशुविग्रहम् ॥२५०॥
आमूलाच्च मरुच्छक्त्या प्रोद्धरेच्च स्वविग्रहात् ।
विभाय चेश्वराऽऽधारे तस्माद्धाराऽमृतं महत् ॥२५१॥
नासिकासन्धिमार्गेण स्रुक्पद्मे पतितं स्मरेत् ।
साम्रतामाज्यधारां च वसुधारामिव क्षिपेत् ॥२५२॥

मुखमध्ये तु मन्त्रस्य तद्ब्रह्मविवरेऽथ वा ।
हृत्पद्माभ्यन्तर्गतां सम्यक् प्रविष्टामनुभावयेत् ॥२५३॥

तया वै बृंहितं मन्त्रं दारयेद्ब्रह्मधारया ।
तृप्तं पुष्टं च हृष्टं च तुष्टं वै साधकोपरि ॥२५४॥

मन्त्रोच्चारसमेता वै शरीरकरणान्विता ।
ध्यानोपेता द्विजश्रेष्ठ ! पूर्णेयं परिकीर्तिता ॥२५५॥

सर्वसिद्धिकरी ह्यधर्ममोक्षलक्ष्मीविवर्धनी ।
बहुपुष्पेन्धनैरग्नौ च होतव्य कर्मसिद्धये ॥२५६॥

एवमनेकप्रयोगाणां न तु कर्मणि कर्मणि ।
ततोऽर्घ्यगन्धपुष्पाद्यैर्मन्त्रनाथं समर्चयेत् ॥२५७॥

मुद्राः प्रदर्शयेत्सर्वा मूलमन्त्रादितः क्रमात् ।
चतुर्थांशेन चाज्ञानां कुर्यान्मूलस्य तर्पणात् ॥२५८॥

लाञ्छनाभरणानां च लक्ष्म्यादीनां तदर्धतः ।
अथ वा हृदयादीनां ततो धेनाऽखिलासु च ॥२५९॥

परमेश्वरकान्तासु तदर्धेन द्विजोत्तम ! ।
लाञ्छनाभरणादीनि सर्वाणि जुहुयात्क्रमात् ॥२६०॥

हृदादिसर्वमन्त्राणामेकैकं जुहुयात्तु वा ।
विसर्जनं ततः कुर्याद्दत्वाऽर्घ्यं धूपसंयुतम् ॥२६१॥

भोगस्थानगता मन्त्राः पूजिता ये यथाक्रमम् ।
मुख्यमन्त्रशरीरं च सम्प्रविष्टाश्च संस्मरेत् ॥२६२॥

ज्वाला ज्वालान्तरे यद्वत्समुद्रस्यैव निम्नगा ।
तं मन्त्रविग्रहं स्थूलं सर्वमन्त्रास्पदं द्विज ! ॥२६३॥

प्रविष्टं धारयेत्सूक्ष्मे अव्यये हृत्यासने ।
पुंसं प्राणुनम्य तु तं सूक्ष्ममुभयासनम् ॥२६४॥

तं परं प्रस्फुरद्रूपं निराधारपदाश्रितम् ।
सन्धिमार्गेण हृत्पद्मे सम्प्रविष्टं तु भावयेत् ॥२६५॥
मन्त्रमुद्रासमेतेन पूरकेण तु सत्तमम् ।
भासितं भावयेद्देहं तेनाऽऽपादाच्छिरोऽवधि ॥२६६॥
प्रविष्टेन तु मन्त्रेण प्रयत्नेन विना द्विज ! ।
विग्रहं कम्पते यस्य मन्त्रस्तस्य प्रसीदति ॥२६७॥
एवं विसृज्य मन्त्रेशं मुद्रानन्धेन वै सह ।
साधारासनमन्त्राणां गणेशस्य द्विजोत्तमा ! ॥२६८॥
गुर्वादीनां तु विहितमर्घं लाच्छनदर्पणात् ।
एतेषां च लयं विप्र ! कुर्यात्सृष्टिक्रमेण तु ॥२६९॥
द्वार्स्थाखिलोकपालानां वप्रस्थहरिसेविनाम् ।
गुरुपूर्वक्रमादित्थमर्घमर्घं यथाक्रमम् ॥२७०॥
सकृत्सकृत्स्वशक्त्या वा पूर्णां सर्वेष्वथ क्षिपेत् ।
विष्वक्सेनस्ततो भक्त्या तर्पणीयस्तिलाऽक्षतैः ॥२७१॥
वौषडन्तेन मन्त्रेण दद्यात्पूर्णाहुतिं द्विज ! ।
पूजयित्वा यथान्यायं कुर्यात्तस्य विसर्जनम् ॥२७२॥
अनलं पूजयित्वा तु शक्तितस्तर्पयेत्ततः ।
अच्छिद्रकरणीं पूर्णां पूर्णां मन्त्रेण पातयेत् ॥२७३॥
सन्दर्शयेत्ततो वह्नेर्मुद्रां मन्त्रसमन्विताम् ।
कुण्डे पुष्पाञ्जलिं क्षिप्त्वा वह्निमन्त्रमनुस्मरन् ॥२७४॥
क्षान्त्वा चैव नमस्कृत्य यथाविधि विसृज्य तत् ।
समाघ्राय न्यसेत्कोष्ठे ह्यवतारक्रमेण तु ॥२७५॥
सम्मार्ज्य स्रुक्स्रुवावग्नौ स्रुचं निक्षिप्य चाऽम्भसा ।
अर्घ्यपात्रात्तु चाऽऽपूर्य कुण्डनाभे प्रदक्षिणम् ॥२७६॥

उर्यादीशानकोणाद्वै अच्छिद्रोदकधारया ।
पवित्रेणाऽथ ऊर्ध्वे विनिक्षिप्य करेण वा ॥२७७॥
दद्याच्छिरसि वै शेषं सगधो वदनान्न्यसेत् ।
आत्मनो वामभागे तु निष्टरसवसयुतम् ॥२७८॥
अपनाम्य जलं पात्रद्वितयस्थं तदर्चितम् ।
उपसंहृत्य तु तथा भस्मना तदनन्तरम् ॥२७९॥
जलनिर्मथितेनैव ह्यूर्ध्वपुण्ड्रचतुष्टयम् ।
हृदयमयोर्ललाटे च उर्यादीपशिखाकृतिम् ॥२८०॥
अथाऽर्घ्यपात्रमादाय गत्वा भगवतो गृहम् ।
नमस्कुर्याज्जगन्नाथमष्टाङ्गपतनेन तु ॥२८१॥
आपूर्य पाणियुगलं पुष्पैस्तत्रोपरि स्थितम् ।
सम्मेरोनिष्कं मन्त्रममृतेनोपबृंहितम् ॥२८२॥
प्रसृतदीसिच्छुरितं निक्षिपेन्मन्त्रमूर्धनि ।
तर्पितोऽसि विभो ! भक्त्या होमेनाऽनलमभ्यग ! ॥२८३॥
होमद्रव्येषु यद्वीर्यं तदिदं चाऽऽत्मसात्कुरु ।
निनिवेद्य विभोर्होमं पूजां कृत्वा यथाविधि ॥२८४॥
गृहीत भावयेत्तेन प्रसन्नेनाऽन्तरात्मना ।
एवं समाप्य होमान्तमर्घ्यगन्धादिभिर्विभुम् ॥२८५॥
समभ्यर्च्य पितॄणां च सविभागमथाऽऽचरेत् ॥

इति श्रीपाञ्चरात्रे ईश्वरसंहितायाम्
भोज्यासनाग्निकार्यविधिर्नाम
पञ्चमोऽध्यायः ।

अथ षष्ठोऽध्यायः ।

मुनयः ।

पितॄणां संविभागस्य विधिः कीदृक् फलं च किम् ।
तत्सर्वं मुनिशार्दूल वर्ण्यतां भवताऽधुना ॥१॥

नारदः ।

आराध्यस्याऽग्रतो विप्राः प्रत्यहं क्रियते तु यत् ।
विज्ञेयं संविभागं तमुत्तमं सर्वकर्मणाम् ॥२॥
संविभागात्पितॄणां च भवत्यनृणवान् नरः ।
प्रयान्ति तृप्तिमतुलां तेन कर्मवशादपि ॥३॥
संविभागः पितॄणां च यथा कार्यस्तथोच्यते ।
कुण्डस्य योनिनिकटे दक्षिणामांस्तरे कुशान् ॥४॥
भद्रपीठसमीपे तु क्ष्मातले वा तदूर्ध्वतः ।
स्तरोपरि विकीर्याऽथ तिलान् सरजतोदकान् ॥५॥
क्रमेण भावयेत्तत्र पितॄनथ पितामहान् ।
तृप्तये ह्यथ सर्वेषां देवाय विनिवेद्य च ॥६॥
प्रोक्षितान्यन्नपात्राणि चत्वारि कवलानि वा ।
स्तरोर्ध्वे तु निधायाऽथ सम्पूज्याऽर्घ्यादिना ततः ॥७॥
क्रमेण चातुरात्मीयैर्मन्त्रैरप्यथयोगतः ।
ततस्तु नाम्ना गोत्रेण मन्त्रपूर्वं तिलोदकम् ॥८॥
सर्वेषामर्घ्यकलशान् प्रदद्याच्च यथाक्रमम् ।
तादर्थ्येनाऽथ चतुरो विनिवेश्याऽऽसनेषु च ॥९॥
लब्धलक्षात्परे तत्त्वे ब्राह्मणान् पाञ्चरात्रिकान् ।
प्राङ्मुखं द्वितयं चैव द्वितयञ्चाप्युदङ्मुखम् ॥१०॥

सम्पद्यभावे ऽप्येकं वा विनिवेद्योत्तराननम् ।
अथ तेषां क्रमात्कुर्यादर्चनं चातुरात्म्यवत् ॥११॥
अर्घ्यानुलेपनाद्यैस्तु भोगैर्मात्रावसानकैः ।
तत्तत्कालोचितैस्सर्वैरनुपाद्यवर्जितैः ॥१२॥
तैश्चापि मौननिष्ठैस्तु भवितव्यं सुयन्त्रितैः ।
वाग्यता बद्धलक्षास्त्वप्यन्नमूर्तौ जनार्दने ॥१३॥
येऽश्नन्ति पितरस्तेन तृप्तिमायान्ति शाश्वतीम् ।
अलस्सव्यभिचारं तु मौनं वर्ज्यं क्रियापरैः ॥१४॥
शुभमव्यभिचारं यत्तत्कार्यं सर्ववस्तुषु ।
यदङ्गसङ्केतमयैरव्यक्तैर्नासिकाक्षरैः ॥१५॥
फलमोक्षपुटैर्बद्धैर्मौनं तत्सिद्धिहानिकृत् ।
स्वयमेव स्वबुद्ध्या यत्सर्ववस्तुषु वर्तते ॥१६॥
शब्दैरनुपदिष्टैस्तु तन्मौनं विद्धि सर्वदा ।
तस्माद्वै श्राद्धभोक्तॄणां दिव्ये वा पितृकर्मणि ॥१७॥
दद्यान्निवेद्यचत्सर्वं मर्यादाऽभ्यन्तरेऽप्रत ।
येनाऽऽचमनपर्यन्तं कालं तिष्ठन्ति वाग्यताः ॥१८॥
विधिनाऽनेन वै नित्यमथ यज्ञे तु वैष्णवे ।
सविभागं पितॄणां च कार्यस्तद्द्रविणैर्नरैः ॥१९॥
(१) कृत्वा तिलोदकान्तं वा फलमूलैस्स्वशक्तितः ।
(२)तदर्थं आममात्रं तु दद्याद्वोप्यथभैक्षुके ॥२०॥
यस्माद्दिव्यैर्महामन्त्रैर्दत्तं यत्पूजितेऽच्युते ।
पित्रर्थमल्पं तत्सर्वं तत्तेषामक्षयं भवेत् ॥२१॥

---

(१) "कृत्वा तिलोदकान्तं वा फलमूलैः स्वशक्तितः ।" (पा)
(२) "तदर्थम् ।" (पा)

तमभ्यर्च्योऽर्घ्यगन्धाद्यैर्मूलमूर्तिगतं विभुम् ।
प्राङ्गणेषु च सर्वेषु प्रासादेष्वाश्रमेषु च ॥२२॥
प्रतिष्ठितेषु शोभार्थं विभवव्यूहमूर्तिषु ।
तथैव गोपुरद्वारादिङ्मूर्तिषु च मण्टपे ॥२३॥
सान्निध्यं चैवं यातासु शक्त्या नित्यं समर्चनम् ।
षोडशैरुपचारैर्वा द्वात्रिंशद्भिस्ततोऽधिकैः ॥२४॥
कुर्यात्तन्मूर्तिमन्त्रैश्च तथा नैमित्तिकेष्वपि ।
जपान्तं हवनान्तं वा स्नानाद्यं साधकस्ततः ॥२५॥
तत्तन्मूर्त्यग्रदेशस्थे कुण्डे होमं समाचरेत् ।
न कर्मोऽर्चादिकं तत्र स्नपनं चोत्सवादिकम् ॥२६॥
बलिदानं च सर्वत्र पवित्रारोहणादिषु ।
नाचर्तव्यं विशेषेण परतन्त्रासु मूर्तिषु २७॥
नित्याभिषेकमात्रं तु तासु तत्र समाचरेत् ।
सितादिवर्णयुक्तासु प्रोक्षणं वा निवेदनम् ॥२८॥
मूलालयार्चया सार्धं परतन्त्रासु देशिकैः ।
पवित्रारोहणं कार्यमङ्गत्वेनाऽधिवासितैः ॥२९॥
पूरकेषु च सर्वेषु तथैवाऽऽग्रयणादिके ।
खगेशविष्वक्सेनादिपरिवारगणेष्वपि ॥३०॥
प्रतिष्ठितेषु गेहेषु पूज्यमाश्रयमूर्तिवत् ।
अमूर्तस्य खगेशस्य विष्वक्सेनादिकस्य तु ॥३१॥
कुमुदादिगणेशानां द्वारावरणवासिनाम् ।
अन्येषां परिवाराणां महापीठनिवासिनाम् ॥३२॥
अग्रे नित्योत्सवार्चायाः दद्यात्कालत्रये बलिम् ।
साकारो वा निराकारो विष्वक्सेनो गणैस्सह ॥३३॥

यद्वा समर्चनीयश्च वक्ष्यन्ते शिष्टवस्तुभिः ।
नित्योत्सवं ततः कुर्यात्सर्वालङ्कारसंयुतम् ॥३४॥
प्राकारद्वारदेवानां बलिदानपुरस्सरम् ।
तद्विधानं प्रवक्ष्यामि शृणुध्वं मुनिपुङ्गवाः ॥३५॥
कृतेन येन भक्तानामभीष्टं जायते फलम् ।
नित्योत्सवार्थं बिम्बं तु सौवर्णं राजतं तु वा ॥३६॥
ताम्रजं पैत्तलं वाऽथ नात्युच्चं तच्चतुर्भुजम् ।
मूलेनाऽनुरूपं च यदेव स्थापितं पुरा ॥३७॥
वस्त्राऽऽभरणमालैश्च यथाशोभमलङ्कृतम् ।
मूलबिम्बगतां शक्तिं तस्मिन्नारोप्य मन्त्रतः ॥३८॥
समभ्यर्च्याऽर्घ्यपुष्पाद्यैर्भोगैर्धूपादिभिस्ततः ।
आदौराराधिते देवे सयव्यक्ताऽऽल्यादिषु ॥३९॥
साधकः वरयेदन्यं बलिदानादिकर्मणि ।
पुरा गर्भगृहद्वारि तथा चैवाऽग्रमण्टपे ॥४०॥
घण्टानादसमेतेन दीपेन ज्वलितेन तु ।
द्वारस्थानर्घ्यादिधूपान्तैस्समभ्यर्च्याऽर्घ्यवारिणा ॥४१॥
दत्वाऽर्घ्येण ततश्चाऽन्नं तर्पणाम्भस्ततः परम् ।
ताम्बूलं च क्रमाद्दत्वा तत्तन्मन्त्रैरनुक्रमात् ॥४२॥
स्वर्णादिनिर्मितं यानं पुरस्तात्प्रथमाऽङ्कणे ।
सुगन्धपुष्पप्रमया क्षौम्यैर्माल्यैस्सितादिभिः ॥४३॥
यथाशोभमलङ्कृत्य तस्मिन् चल्यर्थकौतुकम् ।
प्राचीमुखं समारोप्य प्राङ्गणेषु प्रदक्षिणम् ॥४४॥
यानपर्तैस्सितादैश्च मायूरैः वेतुयष्टिभिः ।
पताकाभिश्चामरैश्च तालवृन्तैश्च शोभनैः ॥४५॥

गणिकादेवदासीभिर्गायकैर्वाद्यसञ्चयै ।
भेरीपटहघोषैश्च श्रुतिघोषसमन्विते ॥४६॥
एवमाद्यैरलङ्कारैर्गोमयेनोपलेपिते ।
मण्डले हस्तमात्रे तु बलिदानपुरस्सरम् ॥४७॥
द्वारावरणदेवाना ध्यातृणा वा स्वदिक्षु च ।
वक्ष्यमाणविधानेन नियतोत्सवमाचरेत् ॥४८॥
पीठोर्ध्वे विष्णुभूताना सगणानामथाऽर्चनम् ।
कृत्वा समुत्किरेत् शेष तृप्त्यर्थं सोदक बलिम् ॥४९॥
पीठ प्रदक्षिण नीत्वा चतुर्धा वा द्विधाऽथ वा ।
सन्तोष्य नृत्तगीताद्यैर्देवमन्त प्रवेशयेत् ॥५०॥
प्राङ्गणेषु विशालेषु बहिष्ठेषु च सादरम् ।
मण्डित रथमारोप्य परिभ्रमणमाचरेत् ॥५१॥
यानादेरवरोप्याऽथ पादुके विनिवेद्य च ।
अग्रमण्टपभूमिष्ठे भद्रपीठे निवेश्य च ॥५२॥
पाद्यार्घ्याचमनाऽम्भोभिश्चन्दनाद्यनुलेपनै ।
माल्यैर्नानाविधैश्चापि धूपैस्ताम्बूलपश्चिमै ॥५३॥
अभ्यर्च्य श्रमशान्त्यर्थं स्वस्थाने सन्निवेशयेत् ।
आदौ निवेशिता शक्तिं तन्मूले विनियोज्य च ॥५४॥
तमभ्यर्च्याऽर्घ्यगन्धाद्यै प्रणमेत् स्तुतिपूर्वकम् ।
त्रिकाल यत्र विधिवत्क्रियते नियतोत्सव ॥५५॥
तत्र सर्वसमृद्धिस्स्याद्राज्ञो राष्ट्रस्य चाऽनिशम् ।
अभावे बलिबिम्बस्य हेतुना सन्निधीकृते ॥५६॥
सूर्त्रेन वाऽक्षमूर्त्या वा कुर्यान्नित्योत्सव तत ।
निश्शेषस्योपसहार कृत्वा चाऽर्घ्यादिकस्य च ॥५७॥

नत्वा स्तुत्वा च देवेशं ततः पाद्यप्रतिग्रहात् ।
पादोदकं समादाय विग्रहं सेचयेत्स्वकम् ॥५८॥
भुक्तानि पत्रपुष्पाणि विदध्यान्मूर्धनि स्वके ।
पुष्पार्घ्यगन्धपूर्वाणां देवयज्ञे कृते सति ॥५९॥
विनयादाहृतानां च भक्तानां मन्त्रसेविनाम् ।
मूर्ध्नि सन्धारणाच्छश्वद्दौर्भाग्यं क्षयमेति च ॥६०॥
कीर्तिं कान्तिं श्रियारोग्यसिद्धिं समुपयाति च ।
पश्चाच्छरीरयात्रार्थमभ्यर्च्य परमेश्वरम् ॥६१॥
लब्ध्वानुज्ञस्तु वै कुर्यादनुयागं यथाविधि ।
भोज्यं नैवेद्यपूर्वं तु सर्वमादाय पात्रगम् ॥६२॥
विनिवेद्य च देवाय पवित्रीकृत्य चाऽम्भसा ।
सत्यरूपा ह्यलक्ष्या चाऽप्यन्नदोषक्षयकरी ॥६३॥
चेतसा चातुरात्मीया भावनीया च भावना ।
तथाऽऽत्माऽध्यक्षसंज्ञोऽन्ने साधुभावे व्यवस्थितः ॥६४॥
प्रद्युम्नो भगवान् रूपे एतद्वीर्ये तु लाङ्गली ।
भोक्ता महात्मा भगवान् वासुदेवस्स्वयं स्वजः ॥६५॥
चतुःप्रणवसंजप्तं ततोऽम्भश्चुलुकं पिबेत् ।
वक्त्रकुण्डे तु तेनैवाप्यथाहुतिचतुष्टयम् ॥६६॥
हुत्वा चाऽभिमतैर्ग्रासैस्ततोऽश्नीयाद्यथारुचि ।
समाचम्य पुनर्यायात्प्रयतो भगवद्गृहम् ॥६७॥
मनो बुद्ध्यभिमानेन सह न्यस्य धरातले ।
कूर्मवच्चतुरः पादान् शिरस्तत्रैव पञ्चमम् ॥६८॥
प्रदक्षिणसमेतेन त्वेवरूपेण सर्वदा ।
अष्टाङ्गेन नमस्कुर्यादष्टाक्षरपुरस्सरम् ॥६९॥

एवमष्टाङ्गयजनमनुयागान्तमीरितम् ।
अन्तःकरणयागादि यावदात्मनिवेदनम् ॥७०॥

तदाद्यमङ्गयागस्य नाम्नाऽभिगमनं महत् ।
पूजनं चाऽर्घ्यपुष्पाद्यैर्भोगैर्यदखिलं मुने ॥७१॥

बाह्योपचारैस्तद्विद्धि भोगसंज्ञं तु नारद ।
मध्वाज्याक्तेन दध्ना च पूजा च पशुनाऽर्चया ॥७२॥

तत्तृतीयं हि यागाङ्गं तुर्यमन्त्रेन पूजनम् ।
निवेदितस्य यद्दानं पूर्वोक्तविधिना मुने ! ॥७३॥
सम्प्रदानं तु तन्नाम यागाङ्गं पञ्चमं स्मृतम् ।
वह्निसन्तर्पणं षष्ठं पितृयागस्तु सप्तमम् ॥७४॥

प्राणाग्निहवनं नाम्ना त्वनुयागस्तदष्टमम् ।
एवमष्टाङ्गसहितां पूजां कुर्याद्यथाविधि ॥७५॥
यत्र द्वादशकालेज्या कर्तव्या ऽऽभूतिविस्तरात् ।
तत्र प्राभातिकीं कुर्यात्पूजामष्टाङ्गसंयुताम् ॥७६॥

अङ्गद्वयं तु पाश्चात्यं विना धातां समाप्य च ।
पितृणां संविभागं च अनुयागं यथोदितम् ॥७७॥
देशिकस्त्वेज्यया कुर्यान्नित्यं माध्यन्दिनार्चने ।
त्रिकालेष्वेकमष्टाङ्गं षडङ्गं चापरेद्वयम् ॥७८॥
योगार्थिनां च स्वाध्यायं भोगमध्यात्मसंज्ञितम् ।
तत्तत्कालेषु कुर्वीत स्वाध्यायमधुनोच्यते ॥७९॥
अष्टाङ्गेन नमस्कृत्य ह्युपविश्याऽग्रतो विभोः ।
आगमाध्ययनं कुर्यात्तद्वाक्यार्थविचारणम् ॥८०॥
मासेऽथ सन्ध्यासमये स्नात्वा वा जपनाऽवधि ।
शान्धिन्त्या तत्र कुर्याद्धाम्नां परिवर्तनम् ॥८१॥

सायन्तनार्चनं कुर्यात् षडङ्गं बलिपश्चिमम् ।
तत्तत्कालेषु कुर्वीत यथाशास्त्रोदितेन च ॥८२॥
जपं कृत्वा यथाशक्ति स्वापाय शयनं ततः ।
समाधाय बहिर्देवं निरालम्बपदे स्थितम् ॥८३॥
अप्रयत्नेन वै तावदनुरुद्धेन चेतसा ।
सह तेनैव वै निद्रा यावदभ्येति साम्प्रतम् ॥८४॥
समुत्थायार्धरात्रेऽथ जितनिद्रो जितश्रमः ।
कमण्डलुस्थितेनैव समाचम्य तु वारिणा ॥८५॥
गुरुं देवं नमस्कृत्य उपविश्याऽजिनासने ।
योगाभ्यासं ततः कुर्याद्यथाविधि मुनीश्वराः ॥८६॥
समाधायाऽऽत्मनाऽऽत्मानं एव त्यक्त्वा जपक्रियाम् ।
ध्यातृज्ञेयविभागेन यावत्तन्मयतां व्रजेत् ॥८७॥
सदा सर्वेषनिर्मुक्ते समाधौ लभते स्थितिम् ।
अभ्यासाद्भगवद्योगी ब्रह्म सम्पद्यते तदा ॥८८॥
तत्र श्रमनयं कुर्यात्त्यक्त्वा ध्यानासने क्रमात् ।
शय्यासनं निवेद्याऽथ मूलमूर्तेरनन्तरम् ॥८९॥
लक्ष्म्यादिशक्तियुक्तस्य यागमूर्तिगतस्य च ।
तस्मिन्नारोपयेद्देवं सर्वाङ्गपरिशोभिते ॥९०॥
अर्घ्यं पाद्यं तथाऽऽचामं परिग्रहसमन्वितम् ।
दत्वा समालभेत्पश्चाच्चन्दनाद्यनुलेपनैः ॥९१॥
सुगन्धपुष्पमाल्याद्यैर्दीपधूपे निवेद्य च ।
भक्ष्याण्यपूपपूर्वाणि सक्षीराणि फलानि च ॥९२॥
तर्पणाम्भश्च ताम्बूलं साङ्गं सद्गन्धभावितम् ।
निवेद्य देवदेवाय विभवानुगुणं ततः ॥९३॥

सर्वं च विन्यसेत्पश्चात्तस्मिन् कर्म कृतं च यत् ।
तुष्टं गृहीतं तत्पूर्णं भावयेद्दक्षिणं करम् ॥९४॥
तन्मध्ये निष्कलं मन्त्रं सर्वं यत्किरणाकुलम् ।
योगोत्थां फलसम्पत्तिं लक्ष्मीरूपां विचिन्तयेत् ॥९५॥
मूलमन्त्रं समुच्चार्य पाणिमध्ये तथा स्मरेत् ।
भूयश्च निष्कलं मन्त्रं तस्मादुपरि भावयेत् ॥९६॥
सशीर्षे जानुनी भूमौ कृत्वा विष्णोर्निवेदयेत् ।
प्रसादाऽभिमुखेनाऽथ तेन तच्चाऽऽत्मसात्कृतम् ॥९७॥
भावनीयं द्विजश्रेष्ठाः ! परितुष्टेन चादरात् ।
सन्न्यासं सञ्चयं वाऽथ कृत्वा सम्यक्तु तस्य च ॥९८॥
मन्त्ररूपानुकारिण्या मुद्रणीयं च मुद्रया ।
फलार्थं प्रसवं येन नैति सन्न्यासकारिणाम् ॥९९॥
फलपर्यवसाने च काममागमचोदितम् ।
भर्तुर्नो युज्यते येन सिद्धाद्यैस्तु फलार्थिनाम् ॥१००॥
नित्यं प्रतिष्ठितं बिम्बं विनौ स्थलजलादिकान् ।
विसर्जनं ततः कुर्याद्दत्वाऽर्घ्यं धूपसंयुतम् ॥१०१॥
भोगस्थानगता मन्त्राः पूजिता ये यथाक्रमम् ।
मुख्यमन्त्रशरीरं तु सम्प्रविष्टांश्च संस्मरेत् ॥१०२॥
ज्वाला ज्वालाऽन्तरे यद्वत्समुद्रस्येव निम्नगाः ।
तन्मन्त्रं विग्रहं स्थूलं सर्वमन्त्राम्पदं द्विजाः ! ॥१०३॥
प्रविष्टं भावयेत्सूक्ष्मे ह्यध्यक्षे ह्युभयाऽऽत्मके ।
परे प्रागुक्तरूपे तु तं सूक्ष्ममुभयात्मकम् ॥१०४॥
तस्मात्परं स्फुरद्रूपं निराधारपदाश्रितम् ।
दर्पणं दर्शयित्वा तु निर्मलं तस्य चाऽग्रतः ॥१०५॥

सन्धिमार्गेण हृत्पद्म मन्त्रविद्‌ तु भावयेत् ।
स्मृत्वा परात्मना तं च स्वसंविद्गगने हृदि ॥१०६॥
विश्रान्तं भावयेद्देव स्वगानेन समन्वितम् ।
कर्मार्चादिषु बिम्बेषु पञ्चसु नित्यादिसिद्धये ॥१०७॥
प्रतिष्ठितेषु विधिवन्नित्ययागादिकेऽर्चने ।
तच्छक्त्या योजिता शक्तिं मूलबिम्बाद्यथाविधि ॥१०८॥
समभ्यर्च्याऽर्घ्यपुष्पाद्यै ताम्बूलाद्यै पुरोदितै ।
पुनरारोपयेन्मूले तत्र तत्र नियोजिताम् ॥१०९॥
पूजार्थं कर्मबिम्बादौ नित्यनैमित्तिकादिषु ।
प्राप्ते तु तत्तत्कर्मादौ मूलादावाह्य मन्त्रवित् ॥११०॥
समाप्य तेषु तत्कर्माण्यारब्धानि यथार्थत ।
समाप्य मूलबिम्बे तु तेभ्यस्तत्र निमर्चयेत् ॥१११॥
मन्त्रानर्घ्यादिपात्रस्थान् विसृज्य प्राक्प्रयोगत ।
शेषमर्घ्यादिकं सर्वं मुक्तपूर्वेण वै सह ॥११२॥
पाणिना तोयपूतेन विष्वक्सेनाय चाऽर्घ्यं च ।
न्यासद्रव्य च संगृह्य मनसा च स्वविग्रहात् ॥११३॥
निक्षेपस्योपसंहारं कुर्यादर्घ्यादिकस्य च ।
यागोद्देशात्तथा कुण्डात् स्वराद्यस्याऽखिलस्य च ॥११४॥
सद्गोपलेपनेनैव सर्वमम्भसि निक्षिपेत् ।
कवाटबन्धनं कुर्यान्मन्त्रं कवचमुच्चरन् ॥११५॥
नियोज्य तत्र रक्षार्थं चक्रं च विहगेश्वरम् ।
स्वेच्छया त्वागतो मन्त्री स्नानस्थाय पूर्ववत् ॥११६॥
यथोक्तं सकलं कुर्यात्प्रबोधयजनादिकम् ।
सहस्त्रमह च सप्ताहं पक्षं मासमथापि वा ॥११७॥

यो यजेद्विधिनाऽनेन भक्तिश्रद्धासमन्वितः ।
सोऽपि यायात्परं स्थानं किं पुनर्योऽत्र संस्थितः ॥११८॥
यावज्जीवावधिं कालं बद्धकक्ष्यो महामतिः ॥

इति श्रीपाञ्चरात्रे ईश्वरसंहितायाम्
पितृसंविभागादिशयनोत्सवान्तविधिर्नाम
षष्ठोऽध्याय. ।

अथ सप्तमोऽध्यायः ।

मुनय. ।

भगवन्मुनिशार्दूल ! सर्वशास्त्रविशारद! ।
पुरा प्रधानमूर्तेर्वै पूजनात्समनन्तरम् ॥१॥
प्राङ्गणेषु च सर्वेषु प्रासादेष्वाश्रयेषु च ।
प्रतिष्ठितानां बिम्बानां पूजनं समुदीरितम् ॥२॥
तत्र श्रीभ्वादिदेवीनां पूजनं तु विशेषतः ।
देवर्षे ! श्रोतुमिच्छामो विस्तरेण प्रकाशय ॥३॥

नारदः ।

शृणुध्वं मुनयस्सर्वे श्रीभूदेव्यर्चनं परम् ।
येन विज्ञातमात्रेण वाञ्छितान् लभते नरः॥४॥
भोक्तृशक्तिः स्मृता लक्ष्मीः पुष्टिर्वै कर्तृसंज्ञिता ।
भोगार्थमवतीर्णस्य तस्य लोकानुकम्पया ॥५॥
उदितं सह तेनैव शक्तिद्वितयमव्ययम् ।
नानात्वेन हि वै यस्य परिणाम· प्रकाशितः ॥६॥

तत्र श्रियादिदेवीनां रूपत्रयमुदाहृतम् ।
श्रीवत्सगा योगलक्ष्मीर्भोगलक्ष्मीस्तु पार्श्वगा ॥७॥
वीरलक्ष्मीं पृथक्स्थाने स्वातन्त्र्येण प्रतिष्ठिता ।
एवमन्यासु देवीषु रूपत्रयमुदाहृतम् ॥८॥
योगलक्ष्मीभोगलक्ष्म्योर्देवेन सह पूजनम् ।
वीरलक्ष्मीं पृथग्गेहे पूजयेत यथाविधि ॥९॥
यत्र सा पूज्यते देवी तत्र श्रीर्निश्चला भवेत् ।
तद्विधानं प्रवक्ष्यामि शृणुत्व मुनिपुङ्गवा ! ॥१०॥
प्रथमावरणे वाऽपि द्वितीयावरणेऽपि वा ।
तृतीयावरणादौ वा श्रियः स्थानं प्रकल्पयेत् ॥११॥
तुष्टिं पुष्टिं च सावित्रीं वाग्देवीं च मुनीश्वराः ! ।
तद्विमानचतुर्दिक्षु दिङ्मूर्तीः परिकल्पयेत् ॥१२॥
कोणेषु वैनतेयं वा सिंहं वाऽपि यथारुचि ।
तदन्तर्ब्रह्मभागे तु दिव्ये वा स्थापयेत् श्रियम् ॥१३॥
चतुर्भुजामुदाराङ्गीं सर्वलक्षणसंयुताम् ।
पद्मासनेनोपविष्टां पद्मपत्रायतेक्षणाम् ॥१४॥
मुख्याभ्यां चैव हस्ताभ्यां अभीतिवरदायिनीम् ।
जघन्याभ्यां तु हस्ताभ्यां दिव्यपङ्कजधारिणीम् ॥१५॥
त्रिकालमर्चयेद्देवीं तन्मन्त्रेण द्विजोत्तमाः ।
प्रणवं पूर्वमुद्धृत्य श्रीबीजं तदनन्तरम् ॥१६॥
श्रियै नमस्पदर्णोऽयं मन्त्रस्सर्वार्थसिद्धिदः ।
श्रां श्रीं श्रूं श्रैं श्रौं श्रः इति योजयेद्धृदयादिभिः ॥१७॥
मन्त्रेणाऽनेन वै पूर्वं स्नात्वा देशिकसत्तमः ।
प्रक्षाल्य पाणिपादौ च ह्याचम्य च यथाविधि ॥१८॥

प्रासादं सम्प्रविश्याऽथ कुर्यात्सर्वं यथोचितम् ।
स्वासने सुखमासीनः प्राङ्मुखो वाऽप्युदङ्मुखः ॥१९॥
करशुद्धिं च दिग्बन्धं प्राणायाम समाप्य च ।
धारणाद्वितयेनाऽथ शोधयित्वा निजं वपुः ॥२०॥
श्रीमन्त्रं तु ततस्साङ्गं हस्ते देहे च विन्यसेत् ।
किरीटं वनमालां च कमलद्वयमेव च ॥२१॥
हस्तादौ पूर्ववन्न्यस्य बध्वा वै पद्ममुद्रिकाम् ।
तादात्म्यमवलम्ब्याऽथ हृदयाम्भोरुहोदरे ॥२२॥
स्वानन्दधामनिष्ठस्य देवस्य परमात्मनः ।
श्रीवत्सात्तु श्रियं देवीं सर्वलक्षणसंयुताम् ॥२३॥
अवतार्याऽमृतैर्भोगैर्जपान्तं प्राग्वदर्चयेत् ।
ततो बहिर्यजेद्देवीं प्रागुक्तैर्भोगसञ्चयैः ॥२४॥
तदर्थं कल्पयेत्प्राग्वदर्घ्याद्यं पात्रपञ्चकम् ।
प्राग्वत्स्वदेहविन्यस्तान् मन्त्रानभ्यर्च्य मन्त्रवित् ॥२५॥
अर्घ्याद्यैर्धूपपर्यन्तैर्द्वारयागमथाऽऽचरेत् ।
वास्त्वीशं क्षेत्रनाथं च द्वारलक्ष्मीं तथैव च ॥२६॥
चण्डीं चैव प्रचण्डीं च गर्भद्वारस्य पार्श्वयोः ।
समभ्यर्च्य विमानस्य पूजनं च समाचरेत् ॥२७॥
लोकाध्वतत्त्वविन्यासं प्राग्वदेव समाचरेत् ।
देवतान्यसने त्वेष विशेषः श्रूयतामिह ॥२८॥
यजेन्मसूरकाधारे धर्माद्यं यच्चतुष्टयम् ।
मूर्तयो वासुदेवाद्याः केशवाद्याश्च मूर्तयः ॥२९॥
पद्मनाभादयश्चापि यत्र पूज्या मुनीश्वराः ।
तत्तच्छक्तीस्तत्र तत्र यजेत्तानेव वा क्रमात् ॥३०॥

यद्वा तच्छक्तिभिस्सार्धं पूजयेत्तान् यथाक्रमम् ।
लक्ष्मी कीर्तिर्जया माया व्यूहशक्तय ईरिता. ॥३१॥
श्रीश्च वागीश्वरी कान्तिक्रियाशक्तिविभूतय ।
इच्छा प्रीती रतिश्चैव माया धीर्महिमेति च ॥३२॥
शक्तय केशवादीना क्रमेण परिकीर्तिता ।
धीस्तारा वारुणी शक्ति पद्मा विद्या तथैव च ॥३३॥
साङ्ख्या विश्वा खगा भूर्गौर्लक्ष्मीर्वागीश्वरी तथा ।
अमृता हरिणी छाया नारसिंही तथा सुधा ॥३४॥
श्रीकान्तिवीरा कामा च सत्या शान्तिस्सरोरुहा ।
माया पद्मासना खर्वा विक्रान्तिर्नरसम्भवा ॥३५॥
नारायणी हरिर्प्रीतिर्गान्धारी काश्यपी तथा ।
वैदेही वेदविद्या च पद्मिनी नागशायिनी ॥३६॥
त्रिंशच्चाऽष्टाविमा देव्य पद्मनाभादिशक्तय ।
यत्राऽन्या भगवन्मूर्ति पुण्या तत्र श्रियं यजेत् ॥३७॥
अन्यान् विमानदेवास्तु पूर्वोक्तानेव पूजयेत् ।
विमानस्य चतुर्दिक्षु कल्पिता च विशेषत ॥३८॥
तुष्टिं पुष्टिं च सावित्रीं वाग्देवीं च समर्चयेत् ।
अथाऽग्रमण्डपद्वारे दक्षिणे तु बलाकिनी ॥३९॥
वनमालिन्युदग्भागे पूजनीये क्रमेण तु ।
कृत्वैव द्वारयाग तु कल्पयेदासन ततः ॥४०॥
सर्वाधारमय देव पीठस्याऽध पर्णीश्वरम् ।
तत्कोणेषु च धर्मादींस्तदूर्ध्वे व्यक्तपङ्कजम् ॥४१॥
यामत्रय ततस्तस्मिन् यजेदर्घ्यादिभि क्रमात् ।
गणनाथादिकाश्चाऽथ समभ्यर्च्य यथाविधि ॥४२॥

ततः श्रियं समावाह्य मन्त्रन्यासादिकं चरेत् ।
सन्निधानादिकं कृत्वा पद्ममुद्रां प्रदर्शयेत् ॥४३॥
मन्त्रान् विग्रहविन्यस्तान् लयोक्तविधिनाऽर्चयेत् ।
भोगयागश्च कर्तव्यः पद्मपीठतलोपरि ॥४४॥
प्रागादिपद्मपत्रेषु हृदयादीनि पूर्ववत् ।
विदिग्दळेषु चैवाऽस्त्रं नेत्रं केसरजालकम् ॥४५॥
पीठोपरि दलाद्बाह्ये त्वाग्नेयेशानकोणयोः ।
किरीटं वनमालां च यातुवायव्यकोणयोः ॥४६॥
कमलद्वितयं चाऽपि विन्यसेत्तदनन्तरम् ।
ततो ध्यानं प्रवक्ष्यामि शृणुध्वं द्विजसत्तमाः! ॥४७॥
अभ्यन्तरे विमानस्य दिव्ये सरसिजासने ।
पद्मासनेनोपविष्टां फुल्लपद्मोदरप्रभाम् ॥४८॥
सर्वलक्षणसम्पन्नां सर्वालङ्कारभूषिताम् ।
चलद्द्विरेफपटलसमाक्रान्ताऽलकावलिम् ॥४९॥
विलसद्रत्नखचितकिरीटपरिशोभिताम् ।
अर्धचन्द्रललाटस्थराजमानललाटिकाम् ॥५०॥
प्रबुद्धोत्पलविस्तीर्णलोचनां सुस्मिताननाम् ।
कटाक्षैः करुणापूर्णैर्जगदाप्यायकारिणीम् ॥५१॥
दर्पणोदरसङ्काशविलसद्गण्डमण्डलाम् ।
प्रस्फुरन्नासिकावंशमौक्तिकां भ्रूलतोज्ज्वलाम् ॥५२॥
मुक्ताफलाभरदनां स्निग्धविद्रुमाधराम् ।
रत्नाटङ्कविलसत्कर्णद्वयमनोहराम् ॥५३॥
पूर्णचन्द्रप्रतीकाशवदनां कम्बुकन्धराम् ।
रत्नग्रैवेयकोपेतां माङ्गल्यमणिभूषिताम् ॥५४॥
चतुर्भुजां पीवरांगीं मुक्ताहारैश्च भूषिताम् ।

सुकर्कशदृढोत्तुङ्गपीनवृत्तघनस्तनीम् ॥५५॥
विचित्रकञ्चुकेनाढ्या नानाभूषाविभूषिताम् ।
मुख्यदक्षिणहस्तेन भीतानामभयप्रदाम् ॥५६॥
सव्येन पाणिपद्मेन श्रिताना वरदायिनीम् ।
पश्चाद्दक्षिणहस्तेन पद्मकुड्मलधारिणीम् ॥५७॥
तथाविधेन वामेन दधाना फुल्लपङ्कजम् ।
मणिकङ्कणकेयूरनानारत्नाङ्गुलीयकैः ॥५८॥
मण्डिता दिव्यवसना मेखलाद्यैरलङ्कृताम् ।
गम्भीरनाभिं त्रिवलीविभूषिततनूदराम् ॥५९॥
विचित्रमणिमञ्जीरविलसत्पादपल्लवाम् ।
दिव्यगन्धानुलिप्ताङ्गीं दिव्यमाल्यविभूषिताम् ॥६०॥
पूर्णेन्द्वयुततुल्याभा सौन्दर्यामृतवारिधिम् ।
वीरलक्ष्मीमिमा ध्यायेत्सर्वाभीष्टप्रदायिनीम् ॥६१॥
एव ध्यात्वा श्रिय देवीं हृदयादींश्च पूर्ववत् ।
किरीट वनमाला च तथैव कमलद्वयम् ॥६२॥
ध्यात्वाऽथ पूजन कुर्यादासनाद्यैर्यथोदितैः ।
चतुष्षष्ट्युपचारैर्वा द्वात्रिंशद्भिस्तु वा द्विजा ॥६३॥
हविर्निवेदयेद्देव्यै पृथक् देवार्पित तु वा ।
जपान्त पूजयेद्देवीं होमान्त वा यथाविधि ॥६४॥
पारतन्त्र्याद्बलिं तत्र कदाऽपि न समाचरेत् ।
मूलाल्यार्चया सार्धं तस्या देशिकसत्तमै ॥६५॥
पवित्रारोहण कार्यमङ्गत्वेनाधिवासितैः ।
तज्जन्मर्क्षादिके कुर्यात्स्नपनप्रोत्सवादिकम् ॥६६॥
मासन्त्येऽपि वै लक्ष्म्या नवरात्रिषु चोत्सवम् ।

अङ्कुरार्पणपूर्वं तु रक्षाबन्धपुरस्सरम् ॥६७॥
चतुःस्थानार्चनयुतं कुर्याद्राष्ट्राभिवृद्धये ।
बलिदानं ध्वजारोहं तीर्थं तत्र विवर्जयेत् ॥६८॥
पारतन्त्र्ये विधिरयं स्वातन्त्र्ये तूच्यतेधुना ।
ग्रामे वा नगरे वापि पर्वते वा नदीतटे ॥६९॥
सप्राकारं श्रियः स्थानं सविमानं प्रकल्पयेत् ।
तत्र श्रियं प्रतिष्ठाप्य तन्मन्त्रेण यथाविधि ॥७०॥
श्रीवत्साद्देवदेवस्य श्रियं बिम्बहृदम्बुजे ।
समावाह्य तु मन्त्रेण साङ्गेन सकलीक्रियाम् ॥७१॥
कृत्वा सम्पूजयेद्देवीं भोगैस्तु हविरन्तिमैः ।
अथ श्रियं त्वग्निमध्ये प्रीणयेत्समिदादिभिः ॥७२॥
संस्कृत्य विधिवत्कुण्डं वह्निमुत्पादितं तथा ।
संस्कृताज्यस्य विप्रुड्भिस्संप्रोक्षेदिन्धनादिकम् ॥७३॥
सन्तर्पणे तथाग्नेश्च तस्मिन् मन्त्रासनादिकम् ।
तन्मध्ये हृदयाद्देवीं समावाह्य यथाविधि ॥७४॥
समिद्भिश्चापि नित्याभिः काम्यैश्च जुहुयात्तथा ।
स्विष्टकृद्धवनं चाथ प्रायश्चित्ताहुतिं त्वपि ॥७५॥
पूर्णाहुत्यादिकं कृत्वा ततो लक्ष्मीं हृदम्बुजे ।
विसृज्य परिवाराणां होमं कृत्वा यथाविधि ॥७६॥
प्रविश्य तु ततो देव्या मन्दिरं यजनास्पदम् ।
समर्पणं च होमस्य पितृणां तर्पणं त्वपि ॥७७॥
बलिदानं च भूतानामिष्टाशिष्टजनस्य च ।
प्रदानं यज्ञशीलानां कारूणां भावितात्मनाम् ॥७८॥
अनुयागं च विधिवन्नैवेद्यप्राशनादिकम् ।

पूर्ववत्सकलं कुर्याद्भोगमोक्षप्रसिद्धये ॥७९॥
अत्रैव बलिदानादौ परिवारार्चनक्रमम् ।
प्रथमावरणे पूज्या प्रागादौ कुमुदादिका ॥८०॥
विभीषिका शाङ्करी च यजेत्तद्वारपार्श्वयोः ।
द्वितीयावरणे पश्चादुपेन्द्रादीन् प्रपूजयेत् ॥८१॥
तद्वारपार्श्वयोश्चैव शङ्खपद्मनिधी यजेत् ।
तृतीयावरणे पश्चादिन्द्रादीन् परिपूजयेत् ॥८२॥
तद्वारपार्श्वयोः पूज्यौ नलकूबरजृम्भलौ ।
चतुर्थावरणे चैव वज्रादीन् परिपूजयेत् ॥८३॥
तद्वारदक्षिणे पार्श्वे शिनिकुण्डलमर्चयेत् ।
उत्तरे मणिभद्रं च पञ्चमावरणे ततः ॥८४॥
लोहिताक्षादिकानिष्ट्वा ततस्तद्वारपार्श्वयोः ।
जया च विजया चैव पूजयेत्तु यथाक्रमम् ॥८५॥
महापीठे तु विधिवत्कुमुदादीन् समर्चयेत् ।
सुमुखीं पूजयेद्विष्वक्सेनस्थाने चतुर्भुजाम् ॥८६॥
वेत्रहस्ता दक्षिणेन तर्जनीं चापि बिभ्रतीम् ।
पश्चाद्दक्षिणहस्ताभ्यां दधाना पङ्कजद्वयम् ॥८७॥
एवं सर्वपरीवारान् बलिदानादिभिर्यजेत् ।
पवित्रारोहणादीनि पृथक्कुर्याद्यथाविधि ॥८८॥
गरुडध्वजमारोप्य कुर्याच्चैव महोत्सवम् ।
चतुस्स्थानार्चनादीनि श्रीमन्त्रेण समाचरेत् ॥८९॥
एवमुक्तो मुनिश्रेष्ठाः ! श्रयादिदेव्यर्चनक्रमः ।
एवं पुष्ट्यादिदेवीश्च पूजयेल्लक्ष्म्यमन्त्रतः ॥९०॥

मुनयः ।

भगवन् ! सर्वशास्त्रज्ञ ! शरणागतवत्सल !

श्रुतं श्रियाद्यर्चनं तु त्वत्तोऽस्माभिर्मुनीश्वर ! ॥९१॥
सुदर्शनार्चनं त्वद्य वक्तुमर्हसि नः प्रभो !

नारदः ।

शृणुध्वं मुनयस्सर्वे सावधानेन चेतसा ॥९२॥
सौदर्शनार्चनविधिमैहिकामुष्मिकप्रदम् ।
सौदर्शनीया मन्त्राश्च मूर्तयश्चाप्यनेकधा ॥९३॥
तत्राभिमतमन्त्रेण मूर्तिं चाभिमतां यजेत् ।
दिव्याद्यायतने चित्रे प्राङ्गणादौ तु कुत्रचित् ॥९४॥
ग्रामादौ तु नदीतीरे विपिने पर्वतेपि वा ।
प्रासादं मण्डपं वाथ सचित्रं सर्वतोमुखम् ॥९५॥
प्राङ्मुखं वापि कुर्वीत सगवाक्षकवाटकम् ।
एकादितलसंयुक्तं चक्रलाञ्छनलाञ्छितम् ॥९६॥
मुखभद्रसमोपेतमारोहणसमन्वितम् ।
सप्राकारं समासाद्य प्रासादाभ्यन्तरे तथा ॥९७॥
बिम्बं सौदर्शनं तत्र प्रतिष्ठाप्य यथाविधि ।
यजेत्रिकालं प्रयतो देशिकस्तस्य मन्त्रतः ॥९८॥
तत्राधिव्याधिदुर्भिक्षभूतवेतालदुर्ग्रहाः ।
न बाधन्ते जनान् सर्वान् शुभं भवति नित्यशः ॥९९॥
तत्रार्चनविधानं तु शृणुध्वं मन्त्रपूर्वकम् ।
सुगुप्ते भूतले शुद्धे वर्णचक्रं परिस्तरेत् ॥१००॥
अकारादि क्षकारान्तं सर्वार्णमयरूपिणम् ।
स्वक्षनाभ्यरनेम्यादिभिः पृथ्वीभिश्चाप्यलङ्कृतम् ॥१०१॥
क्षारणं सर्वमन्त्राणां क्षेत्रे प्रणवमालिखेत् ।
अकाराद्या विसर्गान्ताः स्वरा नाभ्यङ्गमाश्रिताः ॥१०२॥
ककारादीनि भान्तानि तदराणां त्रिरष्टके ।

मादिहान्तानि नेमौ तु क्षार्णं प्रधिगणे स्थितम् ॥१०३॥
शब्दब्रह्ममयं चक्रं पुरा वर्णगणं ततः ।
प्रणवाद्यैर्नमोन्तैश्च सञ्ज्ञाभिः क्रमशस्ततः ॥१०४॥
विन्यस्य मातृयन्त्रं स देशिको विधिवद् गुरुः ।
समभ्यर्च्यार्घ्यपुष्पाद्यैर्मातृकामन्त्रविग्रहम् ॥१०५॥
ततस्समुद्धरेन्मन्त्रान् सर्वाभिमतसिद्धिदान् ।
जेतुः शक्त्यात्मना या तु सृष्टिस्थितिलयोन्मुखी ॥१०६॥
क्रियाशक्तिस्समुद्दिष्टा सुकल्पजननी पुरा ।
कालरूपमधिष्ठाय तयैतद्ब्रह्मितं जगत् ॥१०७॥
कालचक्रं जगच्चक्रं तस्मात्सौदर्शनं वपुः ।
तमधिष्ठाय सा शक्तिर्जीवभूता व्यवस्थिता ॥१०८॥
विनाकृतं तया सर्वमसत्कल्पमिव भवेत् ।
तस्मात्समुद्धरेच्छक्तिमभिष्टोमसमप्रभाम् ॥१०९॥
अक्षाधारा तु वै नित्यामनाद्यन्ता च वैष्णवीम् ।
पूर्वं नेम्यन्तिमद्वन्द्वं तदाद्य सानलद्वयम् ॥११०॥
नाभितुर्यातिमद्वाभ्यां पिण्डमेतदलङ्कृतम् ।
सौदर्शनमहाशक्तिः सर्वसिद्धिप्रदायिनी ॥१११॥
जीवभूता षडर्णस्य मकाराद्यन्तरूपिणी ।
हृदयाद्यङ्गसिद्ध्यर्थं पिण्डमेतत्स्वरोज्झितं ॥११२॥
दीर्घैराद्यैस्त्रिभिश्चान्त्यैर्भेदयेन्नेत्रपश्चिमम् ।
प्रणवादीनि चैतानि तुर्यान्तैर्हृदयादिभिः ॥११३॥
नमस्स्वाहावषड्ढुफट्वौषड्भिर्जातिभिस्सह ।
क्रमान्नियोजनीयानि विज्ञानाग्निगुणैस्सह ॥११४॥
प्रस्के प्रकृतिरूपस्य षडणस्योत्पृतिस्तथ ।

पूर्ववत्समुपाहृत्य चान्तिमद्वयमन्तिमम् ॥११५॥
तत्राष्टमंसतृतीयमस्यां यान्त्यन्ततोऽन्तिमम् ।
सपञ्चमस्वरान्तं च कुर्यात्तेम्याद्यभूषितम् ॥११६॥
पश्चादेकादशारार्णयुक्तं तद्द्विगुणारगम् ।
अन्त्यार्णमविमुक्तं तु कुर्याचतपञ्चपष्ठयोः ॥११७॥
अयं सौदर्शनो मन्त्रः षडर्णः समुदीरितः ।
तृतीयः पञ्चमः षष्ठः प्रत्येकं त्र्यक्षरः स्मृतः ॥११८॥
अन्ये वर्णसमोपेता वर्णाः स्युर्द्व्यक्षरास्त्रयः ।
एष कालात्मनो विष्णोर्विश्वरूपस्य वाचकः ॥११९॥
सतारया च शक्त्या च ह्यष्टार्णः परिकीर्तितः ।
क्षेत्रक्षेत्रज्ञयुक्त्या तु यथा प्रकृतिगः पुमान् ॥१२०॥
स्थूलसूक्ष्मात्मको ध्येयस्तथा सौदर्शनो हरिः ।
दर्शनं परतत्त्वस्य स्तात्तदाख्यानदर्शनम् ॥१२१॥
तन्निष्ठानामिदं नित्यमज्ञानतिमिरापहम् ।
छिनत्ति संशयं तेषां सदुपायप्रवृत्तये ॥१२२॥
रूपान्तरमिदं तस्य संशयच्छेदकारणम् ।
नूनं वर्णाश्रमाचारनिष्ठानामाननेषु तु ॥१२३॥
छिनत्ति वृपकान् जन्तून् स्वकवियाप्रभावतः ।
लाञ्छितानामनेनाशु भक्तानां भावितात्मनाम् ॥१२४॥
करस्थो विजयस्तु स्यादिह लोके परत्र च ।
किं पुनर्विषये यत्र स्थापिते पूजिते सति ॥१२५॥
लक्षणं हृदयादीनां मन्त्राणां तूच्यतेऽधुना ।
प्रागेव हृदयादीनां मन्त्रार्णानि यथाक्रमम् ॥१२६॥
विन्यसेद्बीजभूतानि तारान्ते विन्दुना ततः ।
अपियुनां क्रमादन्ते यथा मूर्धाक्षरद्वयात् ॥१२७॥

महासुदर्शनज्वालापदयोरन्तिमेऽपि च ।
चक्रायेति पदं षोढा शिरोन्ते योजयेत्क्रमात् ॥१२८॥
विज्ञानादिगुणोपेतैस्तुर्यान्तैर्हृदयादिभिः ।
नमस्स्वाहादिनेत्रान्तैः प्रागुक्तविधिना लिखेत् ॥१२९॥
ध्येयान्याकारपत्तीनि भोगस्थानेषु मूलवत् ।
वर्णभूषणवस्त्रास्त्रभुजसस्थानचेष्टितैः ॥१३०॥
ज्ञात्वैवं मन्त्रमाहात्म्यं योऽर्चयेद्विधिपूर्वकम् ।
दिग्बन्धवह्निप्राकारगायत्र्यावाहनादिकैः ॥१३१॥
यागोपकरणैर्मन्त्रैर्भोगदानविवर्जितैः ।
क्रमात्सर्वफलावाप्तिर्मन्त्रसिद्धिश्च जायते ॥१३२॥
दशदिग्बन्धमन्त्राणां वक्ष्यते लक्षणं पुरा ।
ओंपूर्वं पुरुषायेति स्वाहान्तं तदनन्तरम् ॥१३३॥
अक्षेण बन्धयामीति स्वाहान्तं च षडक्षरम् ।
इति दिग्बन्धमन्त्रोऽयमीरितो दुष्टदोषहृत् ॥१३४॥
प्रणवं प्राक् समुद्धृत्य मनुना ॠमिजाययो ।
आयान्तं विन्यसेच्चक्रमग्निप्राकारसंज्ञकम् ॥१३५॥
कीर्तितं चक्रगायत्रीं शृणुध्वं मुनिसत्तमाः ।
जातिपूर्वं पुरस्कृत्य चक्रायेति समुद्धरेत् ॥१३६॥
द्वितीयं विष्णुगायत्र्या नृसूक्ताद्यक्षरत्रयम् ।
नेत्राख्यां पदमादाय नेमिपूर्वान्तयोजितम् ॥१३७॥
धीमहीति तदन्ते नो विनिर्दिश्यो निवारितः ।
गायत्र्यन्तं समुद्धार्य तदन्ते चतुरक्षरम् ॥१३८॥
सौदर्शनी समुद्दिष्टा गायत्री तारकाक्षरा ।
सप्तारका पुरा चैव भवेदेकाक्षराधिका ॥१३९॥

अथ मन्त्रत्रयं वक्ष्ये सामान्यं सर्वपूजने ।
तारद्वयं पुरोद्धृत्य परमं पदमुद्धरेत् ॥१४०॥
याम्येत्यवसितं चाऽथ नेम्याद्यं द्विनवारकम् ।
द्विदशारं गतं वर्णं नाभिपञ्चममूर्धनि ॥१४१॥
ततस्तु गृहकाम्यायो इति पञ्चार्णमुद्धरेत् ।
युतं नेमिद्वितीयेन द्विनवारं गतं ततः ॥१४२॥
षोडशारं गतं वर्णं द्वितीयस्वरसंयुतम् ।
नेमिपञ्चमवर्णं च षोडशारं गतं पुनः ॥१४३॥
तृतीयद्वारसंयुक्तं तृतीयं नेमिमण्डलात् ।
नेम्यन्तमास्वरोपेतमरान्तश्च स्वरान्तरम् ॥१४४॥
नेम्याद्यं षोडशारस्थं नेम्यष्टममिकारगम् ।
न्यूनविंशारगोर्ध्वं तु द्विनवाक्षरमूर्धनि ॥१४५॥
स्वरं तृतीयं संयोज्य ततश्च द्विनवारगम् ।
पुनर्मन्त्रशरीरेति प्रणवान्तं ततो नमः ॥१४६॥
पुनश्च नमसा युक्तो मन्त्र आवाहनोचितः ।
प्रदाने सर्वभोगानां मन्त्रोयं सम्प्रकाशते ॥१४७॥
प्रणवं पूर्वमुच्चार्य सर्वभोगैककारणम् ।
नेम्यन्तं बिन्दुसंयुक्तं त्रिधेदं पदमप्यथ ॥१४८॥
गृहाणेति शिरोन्तोयं भोगदानस्य वाचकः ।
आवाहने तथाऽर्चायां विसर्जनविधौ तथा ॥१४९॥
प्रणवं पूर्वमुद्धृत्य सम्बोध्य भगवन्निति ।
मन्त्रमूर्ते पदं दद्यात्पदं च द्वितीयया ॥१५०॥
आमादय क्षमस्वेति प्रणवान्तं समुद्धरेत् ।
सुदर्शनार्चनार्थं तु मन्त्रास्त्वेवं मयोदिताः ॥१५१॥

हृदार्चनविधानं तु प्रवक्ष्यामि मुनीश्वराः ।
प्रागवस्नानादिकं कृत्वा प्रविश्य यजनालयम् ॥१५२॥
प्रक्षाल्य पादावाचम्य सोत्तरीयः स्वलङ्कृतः ।
धृतोर्ध्वपुण्ड्रः कुसुमैर्द्वार्स्थानभ्यर्च्य पूर्ववत् ॥१५३॥
कवाटोद्घाटनं कृत्वा प्रविश्याभ्यन्तरे विभुम् ।
प्रणिपत्य च गायत्र्या पाणिप्रक्षालनादिकम् ॥१५४॥
अर्चाया निष्टरे यन्त्रे कृत्वा मार्गत्रयं ततः ।
प्रासादं शोधयित्वास्य पुरतः फलकादिके ॥१५५॥
प्रोक्षिते चास्त्रमन्त्रेण सम्मुखः रुचिरासने ।
समासीनस्स्वपार्श्वेस्थयागीयं चाधिवासनम् ॥१५६॥
करशुद्धिं स्थानशुद्धिं कृत्वाऽस्त्रेण यथापुरम् ।
पाणिभ्यामुक्तमन्त्रेण सयुक्तेनास्त्रमुद्रया ॥१५७॥
पूजास्थानगतान् विघ्नान् बाह्यतो हृदयविग्रहान् ।
विरेच्य बन्धनं कुर्याद्दिक्षु चैव विदिक्षु च ॥१५८॥
रेचकेनारकुण्ड्यार्थः प्राणानायम्य पूर्ववत् ।
भूतशुद्धिं ततः कृत्वा मन्त्रन्यासमथाचरेत् ॥१५९॥
अकारादिक्षकारान्तं मातृकां मन्त्रमातरम् ।
विन्यसेत्करयोः पूर्वं विग्रहे चक्रमाप्लवन् ॥१६०॥
कृत्वैव व्यापकन्यासममादित्यातपसप्रभम् ।
दक्षेतरक्रमेणैव शाखासु तलयोरपि॥ १६१॥
अङ्गुष्ठादिकनिष्ठान्तमेकैकस्याश्चतुश्चतुः ।
एवं द्वात्रिंशकं न्यस्य तलयोर्दशकं ततः ॥१६२॥
मध्ये च द्विचतुष्के च पञ्चकं पञ्चकं तथा ।
प्रणवद्वयमध्यस्थानेव न्यस्य करद्वये ॥१६३॥

व्यापकन्यासपूर्वं तु स्वशरीरेऽपि विन्यसेत् ।
मूर्ध्नः पादतलं यावत्पाणिभ्यां तपनांशुवत् ॥१६४॥
व्यापयित्वा ततो न्यासं पृथगेव समाचरेत् ।
केशान्ते वक्त्रवृत्ते च नेत्रयोः श्रवणद्वये ॥१६५॥
घ्राणरन्ध्रद्वये गण्डद्वये दक्षेतरक्रमात् ।
उत्तराधरयोगेन दन्तयोस्तच्छदद्वये ॥१६६॥
मूर्ध्नि न्यसेत्स्वरानन्यान् सविसर्गानन्तरम् ।
कवर्गं दक्षिणे बाहौ सन्धिपञ्चगतं क्रमात् ॥१६७॥
वामे तथा चवर्गं च पादयोर्दक्षिणादितः ।
सन्धिग्रौ टतवर्गौ च पूर्ववत्पार्श्वयोः ॥१६८॥
पृष्ठे नाभौ च हृदये पवर्गं धातुसप्तके ।
यादिसान्तानि वर्णानि हकारं हृदयान्तरे ॥१६९॥
क्षकारं हृदयाकाशे न्यस्यैवं मातृकां पुरा ।
ततः शक्त्या षडर्णं तु न्यसेत्करशरीरगम् ॥१७०॥
करन्यासं पुरा कुर्यात्तच्छृणुध्वं मुनीश्वराः ।
पुटीकृतेन ताराभ्यां मन्त्रेणैव सशक्तिना ॥१७१॥
नखान्तं मणिबन्धादि मार्जयत्पाणिद्वयं सृजेत् ।
आद्यन्ते तारशक्त्याद्यैः शक्तिवर्णैस्सबिन्दुकैः ॥१७२॥
अङ्गुष्ठादिकनिष्ठान्तं त्यक्त्वा मध्यमपर्वसु ।
विन्यसेत्करजाग्रेषु चरमं वर्णमेव च ॥१७३॥
एवमर्णानि विन्यस्य हृदयादीनि विन्यसेत् ।
मूलाग्रपर्वन्यस्तानि वर्णन्यासक्रमेण तु ॥१७४॥
पाणिभ्यामालभेद्देहमामूर्ध्नश्चरणावधि ।
इत्येवं व्यापकन्यासमङ्गन्यासं समाचरेत् ॥१७५॥

मूर्ध्नि वक्त्रे च हृदये नाभौ गुह्ये च पादयो ।
पादादिश्च शिरोन्तन्तु संहृतिन्यास उच्यते ॥१७६॥
हृदि मूर्ध्नि शिखायां तु स्कन्धयो करमध्यत ।
नेत्रयोर्न्यसनीयानि निस्स्वैर्मन्त्रैरुते क्रमात् ॥१७७॥
हृदयादीनि विन्यस्य पश्चात्पाणितलद्वये ।
किरीट कौस्तुभ माला श्रीवत्स च यथापुरम् ॥१७८॥
विन्यसेदायुधान्यष्टौ पद्मादीनि यथाक्रमम् ।
दक्षिणोत्तरयोरंसे इच्छाशक्तिं स्वपार्श्वयो ॥१७९॥
ऊरमूले मनस्तत्त्व न्यस्य मन्त्रमय स्वकम् ।
भावयेदहमित्यन्तस्सुदर्शनवपुर्हरिं ॥१८०॥
गायत्र्यावर्तयेद्बाह्ये स्वात्मान चक्रमुद्रया ।
चक्रज्वालावलिं विभ्रा परितो मन्त्रवित्तम ॥१८१॥
भावनाजनित यागमाचरेदादिचोदितम् ।
नियम्य करणग्राम प्राग्वद्ध्रै ज्ञानगोचरे ॥१८२॥
आसन हृदि सङ्कल्प्य त्वनन्ताद्य तु पूर्ववत् ।
परस्माद्भगवत्तत्त्वाच्चित्स्वरूप परात्मकम् ॥१८३॥
मनसा मन्त्रमुच्चार्य विष्टरोर्ध्वेवतार्य च ।
मन्त्रन्यासादिक कृत्वा लयभोगार्चन तथा ॥१८४॥
शिरोर्ध्वे देवदेवस्य भावयेदिन्दुमण्डलम् ।
तत्स्तैरमृतौघैश्च कुर्यादर्घ्यादिकल्पनम् ॥१८५॥
षोडशैरुपचारैर्वा द्वात्रिंशद्भिस्तु वा यजेत् ।
कृत्वैव मानस याग जपान्त तु यथाविधि ॥१८६॥
ततो बहिर्यजेद्देव हेतीश देशिकोत्तम ।
मूर्तैरर्घ्यादिभिर्भोगैर्विधिवत्समुपाहृतै ॥१८७॥

भगवदर्च्यादिपात्राणां स्थापनं पूजनं ततः ।
देहविन्यस्तमन्त्राणां गर्भद्वारस्थपूजनम् ॥१८८॥
चण्डं चैव प्रचण्डं च गर्भद्वारे प्रपूजयेत ।
तथाऽग्रमण्टपद्वारे यजेद्धातृविधातृकौ ॥१८९॥
कृत्वैवं द्वारयागं तु प्रविश्याभ्यन्तरं ततः ।
फणीश्वरं समारभ्य योगपीठं प्रकल्पयेत् ॥१९०॥
गणनाथादिकांश्चैव समभ्यर्च्य यथाविधि ।
ततः सुदर्शनं देवं समावाह्य तु पूर्ववत् ॥१९१॥
मन्त्रन्यासं ततः कुर्यात्सृष्टिन्यासादितस्त्रयम् ।
स्थानेषु हृदयादीनि भूषणानि तथैव च ॥१९२॥
ततश्चास्त्रवराणां तु ह्यष्टकं चापि विन्यसेत् ।
इच्छाशक्तिं मनस्तत्वं विन्यसेच स्वदेहवत् ॥१९३॥
लयभोगौ च कृत्वाथ ध्यायेद्देवं सुदर्शनम् ।
सहस्रारं महाचक्रमयुताग्निचयोत्कटम् ॥१९४॥
षडध्वमयमुद्भ्रान्तं भगवच्छक्तिजृम्भितम् ।
अक्षरं परमात्मानं नारायणमनामयम् ॥१९५॥
चक्ररूपिणमीशानं दिव्यकुङ्कुमसन्निभम् ।
पिङ्गाक्षं पिङ्गकेशाढ्यं रक्ताम्बरधरं विभुम् ॥१९६॥
महौजसं महाकायं भुजैरष्टभिरन्वितम् ।
दंष्ट्रानिष्ठ्यूतघोराग्निज्वालाकोलाहलाकुलम् ॥१९७॥
कुटिलभ्रुकुटीभङ्गभङ्गुरालकपट्पदम् ।
ललाटनयनोद्गीर्णज्वालाज्वलितदिङ्मुखम् ॥१९८॥
ऊर्ध्वज्वालागणालीढकिरीटतटशोभितम् ।
श्रीवत्सकौस्तुभोरस्कं दिव्यमालाविभूषितम् ॥१९९॥

उद्यज्जानुमनेकास्त्र सित परमशोभनम् ।
गदाङ्कुशौ च मुसल चक्रमत्युग्रतेजसम् ॥२००॥
शङ्ख च सशर चाप पाश कौमोदकीं क्रमात् ।
मुख्यदक्षिणहस्तादि मुख्यवामकरावधि ॥२०१॥
दधानमतुल वीर दिव्याभरणभूषितम् ।
निजाट्टहाससन्त्रस्तदैत्यदानवसञ्चयम् ॥२०२॥
अयुतायुतवह्नीनामास्पदे दीप्ततेजसाम् ।
अष्टषट्कमये चक्रे चक्रिण चक्रमुत्तमम् ॥२०३॥
ध्यायेदेवविध देव चिन्तितार्थफलप्रदम् ।
ध्यायेच्च हृदयादीनि किरीटादीनि पूर्ववत् ॥२०४॥
आयुधानामथ ध्यान शृणुध्व द्विजसत्तमा ।
चक्रशङ्खगदा पद्म प्राग्वद्ध्यायेद्गुरूत्तम ॥२०५॥
कृशाङ्ग दीर्घबाहुं च पिङ्गलाक्ष तु चाङ्कुशम् ।
विकरालमुख रौद्र भिन्नाञ्जनगिरिप्रभम् ॥२०६॥
कृशोदर च मुसलमग्निज्वालावलीवृतम् ।
अङ्गारराशिसदृश प्रलम्बमतिनिष्ठुरम् ॥२०७॥
नीलोत्पलदलश्याममिष्वस्त्र बाणविग्रहम् ।
नानारूप च निशित दीर्घदिव्यधविक्रमम् ॥२०८॥
कार्मुक हेमगौर च किङ्किणीजालमण्डितम् ।
आस्फोटयत्तु स्वकरौ महाजल्दनिस्वनम् ॥२०९॥
पाश फणिगणाकीर्ण विद्युज्जिह्व भयानकम् ।
हेमालिपाण्डराभ च घोरास्य रक्तलोचनम् ॥२१०॥
एवमेता सलक्षणमुक्ता द्विमुना. पुरुषोत्तमा ।
षडेक्षनायका सर्वे विमोराज्ञामर्तीक्षका ॥॥ २११

प्रोत्थिता विचलन्तश्च सुसमैः स्थानकैः स्थिताः ।
श्रोणीतटार्पितकराश्चामरव्यजनोद्यताः ॥२१२॥
सपद्मं तु किरीटाद्यं वर्जयित्वा चतुष्टयम् ।
तर्जयन्तश्च दुष्टौघमन्येषां दक्षिणं करम् ॥२१३॥
स्मर्तव्यं ध्यानकाले तु सर्वेषामथ मस्तके ।
ध्येयं स्वकं स्वकं चिह्नं सुप्रसिद्धं निराकृति ॥२१४॥
अधिष्ठातृक्रमस्तेषां कथ्यते मुनिसत्तमाः ! ।
ज्ञातव्यश्चाङ्कुशः कामो मुसलं नागनायकः ॥२१५॥
शब्दादयः सायकास्त्वं धनुर्विद्धि समीरणम् ।
पाशो मायेति विज्ञेय एवं ध्यात्वा समर्चयेत् ॥२१६॥
आसनाद्यैश्च सांस्पर्शैर्हृदयक्रमपश्चिमैः ।
प्रीणयेत्तु विधानेन होमान्तं वा जपान्तिमम् ॥२१७॥
एवमेव स्वयंव्यक्तं दिव्यं सैद्धमथापि वा ।
स्थापितं मनुजैर्वापि शैलमृल्लोहसम्भवम् ॥२१८॥
अष्टबाहुं चतुर्बाहुं तथा षोडशबाहुकम् ।
चलस्थिरविभागेन स्थापितं च यथारुचि ॥२१९॥
त्रिकालमर्चयेद्देवं सर्वानिष्टनिवारकम् ।
नैमित्तिकानि काम्यानि नित्यानि यजनानि च ॥२२०
विशेषेणैव कार्याणि विना स्वापं महोत्सवम् ।
शान्तिके पौष्टिके चैव तथैवाप्ययनादिषु ॥२२१॥
ध्यानेन पूजितेनैव हुतेन जपितेन च ।
समीहितानि पूर्यन्ते भक्तानां भावितात्मनाम् ॥२२२॥
इति सम्यक् समाख्यातं परं सौदर्शनार्चनम् ।

इति श्रीपाञ्चरात्रे ईश्वरसंहितायां
लक्ष्मीसुदर्शनार्चनविधिर्नाम
सप्तमोऽध्यायः ।

अथाऽष्टमोऽध्यायः ।

मुनयः ।

भगवन् मुनिशार्दूल भगवच्छास्त्रकोविद ! ।
गरुडप्रमुखाना च पूजनं प्रागुदीरितम् ॥१॥
तद्विधानं विशेषेण प्रकाशय कृपानिधे ! ।

नारदः ।

शृणुध्वं मुनयः सर्वे गरुडस्यार्चनं पुरा ॥२॥
येन विज्ञातमात्रेण वाञ्छितं साधकोऽश्नुते ।
विष्णोः सङ्कर्षणाख्यस्य विज्ञानबलशालिनः ॥३॥
मूर्तिः ज्ञानबलाख्या या सर्वाधारस्वरूपिणी ।
महिमेति जगद्धातुः विज्ञेयो विहगेश्वरः ॥४॥
सर्वरोगभयघ्नश्च क्षेपकः सर्वविद्विषाम् ।
ततः समर्चयेन्नित्यं प्रासादे स्थाप्य मन्त्रवित् ॥५॥
प्राङ्कणे प्रथमे वाथ द्वितीये मूलमन्दिरात् ।
अग्रदेशे प्रकुर्वीत प्रासादं मण्टपाकृतिम् ॥६॥
चतुर्द्वारसमोपेतं वर्गत्रयसमन्वितम् ।
वर्णपत्र्कान्वितं वाथ सर्वालङ्कारशोभितम् ॥७॥
मूलगेहात् त्रिभागोच्चमधोच्चं वा सविस्तरम् ।
तस्मिन् प्रबोध दिव्ये वा दिव्ययुक्तेथ मानुषे ॥८॥
संस्थाप्य लोहजां वाथ शैलीमर्चां यथोदिताम् ।
त्रिकालमर्चयेन्नित्यं मुख्यमूर्त्यर्चनान्तिमे ॥९॥
तद्विधानं विशेषेण मन्त्रपूर्वमिहोच्यते ।
प्रणवं पूर्वमुद्धृत्य पक्षिशब्दमनन्तरम् ॥१०॥

पञ्चाक्षरो महामन्त्रः स्वाहान्तः सम्प्रकीर्तितः ।
मन्त्राणानि सबिन्दूनि प्रागोङ्कारान्वितानि च ॥११॥
समुच्चार्याथतुर्यान्तैः ज्ञानाद्यैश्च हृदादिभिः ।
अनेनैरस्त्रपर्यन्तैरङ्गान्येतानि वै द्विजाः ॥१२॥

प्राङ्मूलमन्त्रमध्यायव्यत्ययाद्विपञ्चा भवेत् ।
सोयं मन्त्र. समाख्यातस्त्रिदशैरपि दुर्लभः ॥१३॥

पञ्चाक्षर इति ख्यातो गारुडो मुनिसत्तमाः ।
पञ्चाङ्गानि यथापूर्वमक्षरैः स्युः सबिन्दुकैः ॥१४॥
साङ्गेनानेन मन्त्रेण स्थापनीयो विधानतः ।
मूलालयगते विम्बे सुस्थिते वाथ यानगे ॥१५॥
स्थितैव गारुडी मूर्तिर्याने वा गमनोन्मुखी ।
शयने चासने चैव त्वासीना वाथ सुस्थिता ॥१६॥
द्वारावरणदेवानां ध्यानाध्याये विशेषतः ।
ध्वजारोहेपि सुव्यक्तं लक्षणं चास्य वक्ष्यते ॥१७॥
एवं ज्ञात्वा यथा कालं तन्मन्त्रनिरतो द्विजाः ! ।
स्नात्वा तदीयमन्त्रेण कृतपादावनेजनः ॥१८॥
उपस्पृश्य यथान्यायं प्रासादं सम्प्रविश्य च ।
स्वासने सुखमासीनः प्राङ्मुखो वाप्युदङ्मुखः ॥१९॥
करशुद्धिं च दिग्बन्धं प्राणायामं समाप्य च ।
भूतशुद्धिं च विधिवन्मन्त्रविन्यस्तविग्रहः ॥२०॥
पक्षीशमुद्रां बध्वाथ हृदयाम्भोरुहोदरे ।
स्वानन्दधामनिष्ठस्य देवस्य चतुरात्मनः ॥२१॥
सङ्कर्षणांशात्सम्पूर्णविज्ञानबलसङ्कुलात् ।
अवतार्यामृतैर्भोगैः जपान्तं प्रागदर्च्य च ॥२२॥

ततो मूर्तैर्यजेद्द्वाभ्यां प्रागुक्तैर्भोगसञ्चये ।
पात्रशिष्टैश्च देवाग्ने साधिते पृथगेव वा ॥२३॥
तदर्थं कल्पयेत्प्राग्वदर्घ्याद्यं पात्रपञ्चकम् ।
द्वितयं चाथ वैकस्मिन् पाद्यं स्नानीयवारि च ॥२४॥
अर्घ्याचामे तदन्यस्मिन् एकस्मिन् सकलं तु वा ।
प्राग्वत्स्वदेहविन्यस्तान् मन्त्रानभ्यर्च्य मन्त्रवित् ॥२५॥
अर्घ्याद्यैर्धूपपर्यन्तैस्ततो द्वारचतुष्टये ।
वास्त्वीशं क्षेत्रनाथं च द्वारलक्ष्मीं स्वमन्त्रतः ॥२६॥
चण्डाद्यं च गणं प्राग्वदासनं कल्पयेत्ततः ।
शेषपूर्वं च धर्माद्यमष्टकं विन्यसेत्क्रमात् ॥२७॥
तदूर्ध्वे व्यक्तपद्मं च धामत्रयसमन्वितम् ।
समभ्यर्च्य च गन्धाद्यैर्गणनाथादिकानपि ॥२८॥
हृत्पद्मकर्णिकामध्ये मानसैरर्चितं पुरा ।
स्वविद्यया समावाह्य स्वस्थानाद्बिम्बहृत्कजे ॥२९॥
सकलीकृत्य विधिवदङ्गभूषणलाञ्छनैः ।
किरीटं वनमालां च विन्यस्य तदनन्तरम् ॥३०॥
अनन्तादींश्च नागेशान् न्यसेद्वामकरादिषु ।
सत्याख्यया दक्षिणतो बलशक्त्या स्वरूपया ॥३१॥
मणिलकं च मन्दारकुसुमस्तबकं तथा ।
कलशं चामृताधारं फणीन्द्रं दक्षिणादितः ॥३२॥
शक्तिं प्रागुदितां तस्य बलधर्मस्वरूपिणीं ।
पक्षीशमुद्रां सन्दर्श्य लययागं समाचरेत् ॥३३॥
भोगयागश्च कर्तव्यः पद्मपीठतलोपरि ।
प्रागादिपद्मपत्रेषु हृदयादीनि पूर्ववत् ॥३४॥

विदिक्पत्रेषु चैवार्कमेषां वर्णानि पूर्ववत् ।
रूपलावण्यभूषाद्यैर्मूलमन्त्रशरीरवत् ॥३५॥

किरीटं वनमालां च न्यसेद्देशिकसत्तमः ।
पुरस्तात्पृष्ठतश्चास्य दक्षिणोत्तरयोः क्रमात् ॥३६॥

चतुष्टयक्रमेणैव शेषाद्याः पन्नगेश्वराः ।
अग्नीशरक्षोवायव्यकोणेषु विहगेशितुः ॥३७॥

चतुष्टयं गणित्राद्यं विन्यसेत्तु यथाक्रमम् ।
दक्षिणे विहगेशस्य सत्याख्या कर्णिकोपरि ॥३८॥

प्राणापानसमानोदानव्यानप्राणरूपिणः ।
मध्यस्थस्य खगेशस्य बहिः प्रागादितः क्रमात् ॥३९॥

सत्यः सुपर्णो गरुडस्तार्क्ष्यश्च विहगेश्वरः ।
पञ्चात्मकस्य प्राणस्य विकारस्त्वेष पञ्चधा ॥४०॥

सत्याद्या दिक्षु चत्वारः कोणेषु विहगेश्वरः ।
ध्यानमेषां विशेषेण समासात्कथ्यतेऽधुना ॥४१॥

आचाङ्घ्रिगोचराः सर्वे यस्य देहास्तु पौरुषः ।
द्विभुजस्तुहिनाभस्तु स सत्यः प्राणदैवतम् ॥४२॥

सुपर्णः पद्मरागाभो निर्मलस्वर्णलोचनः ।
गरुडः काञ्चनाभस्तु कुटिलभ्रुरुणेक्षणः ॥४३॥

केकराक्षस्तु तार्क्ष्यो वै प्रावृड्जलदसन्निभः ।
द्रवत्कनकनेत्रस्तु शबलाभश्च पञ्चमः ॥४४॥

चतुर्भुजाः सुपर्णाद्याः सौम्यरूपा घनाकुलाः ।
पतत्रिचरणास्सर्वे पक्षमण्डलमण्डिताः ॥४५॥

लम्बोदरास्सुपीनाङ्गाः कुण्डलाद्यैर्विभूषिताः ।
कुटिलभ्रुवृत्ताक्षा वक्रतुण्डाः मितानना: ॥४६॥

अपानादिसमीरणानामाधिपत्येन संस्थितः ।
महाबलो महाकायो रक्ततुण्डोऽत्र पञ्चमः ॥४७॥
सखाङ्कुशद्वयप्रोतमणिवीभयपाणिना ।
पुष्पाञ्जलिधरो मन्त्रमुख्येन विहगोत्तमः ॥४८॥
सुपर्णः पश्चिमाभ्यां तु पाणिभ्यां दक्षिणादितः ।
मन्दारपुष्पस्तबकं दधद्विस्मयमुद्रिकाम् ॥४९॥
तथाविधाभ्यां गरुडस्ते धत्ते व्यत्ययेन तु ।
तार्क्ष्यः पश्चिमयोर्नित्यं धत्ते दक्षिणवामयोः ॥५०॥
कद्रूं तथामृतं कुम्भं पञ्चमो विहगेश्वरः ।
दक्षिणेन सुधाकुम्भं वामेन तु फणीश्वरम् ॥५१॥
नित्योदितस्य व्यूहस्य तथा शान्तोदितस्य च ।
प्राणापानादिवायूनां पञ्चानामपि नामभाक् ॥५२॥
गरुडः परिवारत्वे ध्वजत्वेऽपि विशेषतः ।
योजनीयस्तथान्येषु सुपुष्प्यादिपदेषु च ॥५३॥
वासुदेवादिमूर्तीनां चतुर्णां क्रमशस्त्वमी ।
सत्याद्यास्तार्क्ष्यपर्यन्तास्तत्तन्मूर्त्यन्तरेषु च ॥५४॥
त्रिषु त्रिषु समाद्येयाः सत्याद्याः केशवादिषु ।
पद्मनाभादिमूर्तीनां पञ्चमो विहगेश्वरः ॥५५॥
परात्परस्य सूक्ष्मस्य मूर्त्यन्तरगतेर्विभोः ।
प्रादुर्भावगतेश्चापि जगद्रक्षणकाङ्क्षिणः ॥५६॥
खगानां खगणत्वाच्च प्रागुक्तो वा खगेश्वरः ।
इति ते गरुडव्यूहप्रभावः सम्प्रकाशितः ॥५७॥
कुमुदाद्यास्ततो वक्ष्ये गणाध्यक्षान् हरेः क्रमात् ।
तद्रूपं कुमुदादीनां मूर्तयश्चोत्तरादयः ॥५८॥

गणेश पूजनीयो वा तदग्रे बलिमण्डपे ।
महापीठेऽथ वा पूज्या गरुडस्यानुयायिनः ॥५९॥
पालयन्तश्च सद्भक्तान् दिव्यान्यायतनान्यपि ।
ध्यात्वैवमर्चनं कुर्यादासनाद्यैर्यथोदितैः ॥६०॥
चतुष्पञ्चस्वुपचारैर्वा द्वात्रिंशद्भिस्तु वेतरैः ।
षोडशैरुपचारैर्वा मुख्यमध्याधमक्रमात् ॥६१॥
तन्निवेदितमन्नाद्यं नराणां रोगिणां सदा ।
वन्ध्यानां वनितानां च जयेच्छूनां च भूभुजाम् ॥६२॥
विषोपहतवेषाणां प्रदद्यात्संविभज्य च ।
आर्द्रायां प्रतिमासं तु विशेषेणैवमर्चयेत् ॥६३॥
उत्सवेषु विशेषेण भ्रामयेदुत्सवार्चया ।
इति सम्यक् समाख्यातं गरुडस्यार्चनं परम् ॥६४॥
विष्वक्सेनार्चनं त्वद्य पौष्करोक्तं तु कथ्यते ।
शृणुध्वं मुनयस्सर्वे सावधानेन चेतसा ॥६५॥

पौष्कर उवाच ।

किमर्थमाह भगवान् विघ्नोच्छेदकरं प्रभुम् ।
समस्तविघ्ननाशानां परमं कारणं च यः ॥६६॥
विष्वक्सेनस्तु यष्टव्यो भोगभूमिगतेऽच्युते ।
कैङ्कर्ये केन विधिना किं करोत्यभिपूजितः ॥६७॥

श्रीभगवान् ।

भविनां भाविनो विघ्नाः सद्धर्मविनिवारकाः ।
न यागयज्ञधर्माद्यैर्मन्ये संसारिणां शुभम् ॥६८॥
तत्प्रवृत्तौ तु ये विघ्ना मोत्साहविनिवारकाः ।
व्यपारयन्ति च ते सर्वे चक्रज्वालभयार्दिताः ॥६९॥

प्रागर्जितेन केनापि कर्मणा चैव साम्प्रतम् ।
अनुभुङ्क्ते फलं यागाद्विविधं चाग्रत स्थितम् ॥७०॥
तस्य संरक्षणार्थं तु विष्वक्सेनस्तदैव हि ।
काले यागावसानाख्ये द्वितीये वासरेऽथ वा ॥७१॥
कृत्वा निर्व्याकुलं चित्तं यष्टव्यः फलसिद्धये ।
यागनिर्वर्तनोच्छेषैरम्लानैरर्घ्यपूर्वकैः ॥७२॥
उपचारमयैर्भोगैः सर्वैराभरणादिकैः ।
नैवेद्यैर्मधुपर्काद्यैः मुख्यमूर्तेर्निवेदितैः ॥७३॥
द्विजप्रदानशिष्टैस्तु स्वयम्प्राशनवर्जितैः ।
तथा चान्तरस्थैश्च अपरेभ्यो निवेदितैः ॥७४॥
संस्कृतैरूष्मलोपेतैर्मधुराज्यपरिप्लुतैः ।

पौष्कर ।

क एषोऽतुल्यवीर्यो हि यस्य दूराद्द्रवन्ति च ॥७५॥
निघ्ना निमेषमात्रेण त्रैलोक्यस्योन्मूलनक्षमा ।

भगवान् ।

कान्तैश्वानराख्या या मूर्तिस्तुर्यात्मनो विभो ॥७६॥
स एव द्विजदेवो हि विष्वक्सेन प्रकीर्तितः ।
स्थित आहवनीयादिभेदेन मखयाजिनाम् ॥७७॥
स्रुक्स्रुतं हुतमादाय तर्पयत्यखिलं जगत् ।
एवं मन्त्रमयाद्यागात्सात्त्विकात्क्रमभावितात् ॥७८॥
सम्प्राप्य गुरुमूर्तेर्वै प्रापणं मन्त्रसंस्कृतम् ।
अनाहूतामराणां च सर्वलोकनिवासिनाम् ॥७९॥
स्वयं संविभजत्याशु तदनुग्रहकाम्यया ।
पश्येत तस्य माहात्म्यं शुचिस्म फलसिद्धये ॥८०॥

त्रिसन्ध्यं नित्यपूजाया बल्यन्ते तु समर्चयेत् ।
वत्सरोत्सवपूर्वेषु तथा वैशेषिकेष्वपि ॥८१॥
वृत्त्याद्याधारभूतेषु क्रमात्कृत्वा पुरार्चनम् ।
केवलं वाथ होमान्तं स्वशक्त्या विभवेन वा ॥८२॥
विस्तरेणाथ वा शश्वत्तत कमलसम्भव ! ।
कृत्वा पर्णपुटे तोयं पात्रे वा कलशे ऽव्रणे ॥८३॥
तमात्मनोत्तरे भागे ह्यर्चयित्वा निवेद्य च ।
अथापरस्मिन् भाण्डे तु तदस्त्रपरिमन्त्रिते ॥८४॥
नैवेद्याद्भागमादाय तथा चर्वन्तरस्थितात् ।
ओदनादंशमुद्धृत्य दध्याज्यव्यञ्जनै सह ॥८५॥
समालभनपुष्पार्घ्यकुशाम्बुपरिभावितम् ।
तदद्द्मन्त्रेण बहुशो ह्यभिमन्त्र्याब्जसम्भव ! ॥८६॥
तन्मूलमन्त्रमुच्चार्य ध्यानभावनयान्वितम् ।
प्राक्सन्निवेशिते भाण्डे समुत्कीर्य पिधाय तत् ॥८७॥
प्रणवाष्टकजप्तं वा तन्नाम्ना सह पौष्कर ! ।
एकं वै सोदकं पात्रं सनैवेद्यं जलाप्लुतम् ॥८८॥
सर्वत्र सर्वदा यागे कुर्यात्प्राग्विधिना विना ।
तच्चापि क्ष्मातले कूपे तटाकादौ तु चोत्किरेत् ॥८९॥
ज्ञात्वैव यत्नतो मन्त्री तन्मन्त्रेण समर्चयेत् ।
साङ्गं मन्त्रमथो वक्ष्ये यथावदवधारय ॥९०॥
आक्रान्तमनलेनैव प्राणाख्यं बीजनायकम् ।
त्रैलोक्यैश्वर्यदोपेतमूर्जोपरिगतं तु तत् ॥९१॥
ततो वराहमादाय भूधरव्योमभूषितम् ।
विष्वक्सेनाय तदनु सनमस्कं पदं न्यसेत् ॥९२॥

प्रणवाद्यो ह्ययं मन्त्रो विष्वक्सेनस्य कीर्तितः ।
पूर्वबीजं हि यत्तस्य ऊकारस्वरवर्जितं ॥९३॥
आकाराद्यैश्च षड्दीर्घैर्भिन्नमङ्गगणं नयेत् ।
प्रणवेन स्वनाम्नाथ जातिभिः षड्भिरन्वितम् ॥९४॥
मम स्वाहादिभिश्चाथ विष्वक्सेनस्य वाचकः ।
साङ्गेनानेन मन्त्रेण प्रतिष्ठाप्य विधानतः ॥९५॥
प्रथमावरणे वाऽथ द्वितीयावरणेऽथ वा ।
ईशानसोमदिङ्मध्ये प्रासादे दक्षिणामुखे ॥९६॥
मूलालयोचार्चाचे च कल्पिते गर्भमन्दिरे ।
ब्रह्मस्थानेऽथ वा ह्रियं मूलेशासमानतः ॥९७॥
कल्पितस्य शिलादारुलोहपूर्वैस्तु वस्तुभिः ।
पूजनं मुख्यकल्पः स्यादनुकल्पोऽग्रमण्डपे ॥९८॥
प्रागुक्तकोणभूभागे मेखलात्रयनिर्मिते ।
पीठेऽवतार्य गगनादमूर्तं मूर्तमेव वा ॥९९॥
केवलं बलिदानेन तर्पयेद्दर्शनेन च ।
चतुःस्थानावतीर्णस्य मण्डलादिषु वृत्तिषु ॥१००॥
परव्यूहादिरूपस्य देवस्य यजनावधौ ।
प्रासादान्तर्गतस्यापि स्वस्थानस्थस्य मण्डपे ॥१०१॥
पूजनं विधिवत्कार्यमारम्भदिवसादितः ।
सर्वकर्मावसाने तु मण्डलादिगते विभौ ॥१०२॥
स्वे स्वे धाम्नि निविष्टे तु ध्यात्वा मण्डलमध्यतः ।
पूजयेद्विधिवन्मन्त्री द्वितीये वासरेऽपि च ॥१०३॥
भगवद्यजनार्थं तु प्रासादस्य विशेषतः ।
यथाविधि समभ्यर्च्य नैवेद्यन्तिवेदितैः ॥१०४॥

अर्घ्याद्यैरखिलैरन्यैस्ताम्बूलाद्यैश्च नित्यश ।
जलस्थलादिनिर्यासतद्भूताश्चाथ तर्पयेत् ॥१०५॥

प्रासादस्थस्य तस्याथ देहमानानुसारत ।
कृत्वा हेमादिभिर्दिव्यैर्विशेषार्चां विधानत ॥१०६॥

उमा वा शान्तरूपा वा विघ्नविध्वंसनक्षमाम् ।
चतुर्भुजा वा द्विभुजामासीना वाऽथ सुस्थिताम् ॥१०७॥

द्विभुजस्य चतुर्हस्तामन्यथा वा प्रकल्पिताम् ।
विशेषिकेषु प्राप्तेषु पूजयेदुत्सवार्चया ॥१०८॥

मृगयाद्युत्सवे प्राप्ते यत्र यत्र व्रजेत्प्रभु ।
तत्र तत्र नयेदेना निर्विघ्नफलसिद्धये ॥१०९॥

ध्यानमस्य प्रवक्ष्यामि यथावच्छृणु सत्तम ।
नवदूर्वाङ्कुराभ च स्त्रीपत्त्रीतलकान्तिभाक् ॥११०॥

चतुर्दंष्ट्र चतुर्बाहु चतुष्किष्कु चतुर्गतिम् ।
पूर्णाङ्ग केसरिस्कन्धपृथूरु स्थलराजितम् ॥१११॥

दक्षिणावर्तनिम्नेन नाभीरन्ध्रेण शोभितम् ।
आजानुबाहु श्रीमन्त पिङ्गलार्चिर्जटाधरम् ॥११२॥

द्रवत्कनकपिङ्गाक्ष चिपिट पृथुनासिकम् ।
सितदीर्घनखश्रेणीशोभित कुटिलभ्रुवम् ॥११३॥

विस्तीर्णगण्डवदन बालेन्दुकुटिलोपमे ।
नवकिंवरुणाकारैर्लोमभि पूर्णविग्रहम् ॥११४॥

शोभनेन प्रलम्बेन पृथुना प्रोन्नतेन च ।
माणिक्यकुण्डलाढ्येन युक्त श्रोत्रद्वयेन तु ॥११५॥

मकुटेनोन्नतेनैव हाराद्यैरुपशोभितम् ।
चित्रकौशेयवसन विचित्रस्रग्विमण्डितम् ॥११६॥

प्रलयद्वादशादित्यसहस्रगुणदीधितिम् ।
ईषदूर्ध्वं तथा तिर्यग्विनिपातितलोचनम् ॥११७॥
कुन्देन्दुकान्तिदशनं किञ्चिद्विहसिताननम् ।
स्वभावसौम्यममलं मायाक्रोधोपरञ्जितम् ॥११८॥
सविलासचलत्पादन्यासस्थानकसंस्थितम् ।
स्वेनान्तःकरणेनैव भावयन्तं परं पदम् ॥११९॥
अङ्गुष्ठादिकनिष्ठान्तं वामपाणौ लतात्रयम् ।
नमयित्वोन्नता चैकाग्राणाग्रे विनियोजिता ॥१२०॥
मद्विघ्नभीतिप्रदया त्वनया मुद्रयान्वितम् ।
रथाङ्गशङ्खहस्तं च लम्बमानगदाधरम् ॥१२१॥
श्रोणीतटनिविष्टेन सावहेलनपाणिना ।
इत्थं रूपधरं देवमनेकाद्भुतविग्रहम् ॥१२२॥
उग्ररूपमिमं ध्यायेदाग्नेयमनलप्रभम् ।
दंष्ट्रातर्जननिर्मुक्तं साभयं शान्तलक्षणम् ॥१२३॥
मुख्यदक्षिणहस्तेन भक्तानामभयप्रदम् ।
तथाविधेन वामेन लम्बमानगदाधरम् ॥१२४॥
पृष्ठदक्षिणवामाभ्यां चक्रशङ्खधरं क्रमात् ।
एवं चतुर्भुजस्योक्तं द्विभुजस्यावधारय ॥ १२५॥
उक्ताभ्यामुग्रशान्ताभ्यां चक्रशङ्खधरं विना ।
प्रागुक्तद्वितयं वाऽथ द्वितीयं चित्ततन्तु वा ॥१२६॥
गदाविरहितं वाथ वामकक्ष्यवलम्बितम् ।
स्थानकेनासनेवाममूर्ध्वदेशे निवेशितम् ॥१२७॥
गोपनीमुद्रया वाथ पटमाकारमुद्रया ।
उभाभ्यामपि पाणिभ्यां विश्रान्तं पीठपृष्ठग ॥१२८॥

अवष्टभ्य गदामूर्ध्वे मातङ्गमुसलाकृतिम् ।
प्रकृपद्मदळमाक्रम्य पादाभ्यां कर्णिकासनम् ॥१२९॥

सुस्थितं कर्णिकायां वा प्राग्वदन्यैरलङ्कृतम् ।
एवं ध्यानविशेषेषु त्वेकं स्थाप्य विधानतः ॥१३०॥
समर्चयीत कालेषु प्रागुक्तेषु स्वमन्त्रतः ।
चतुःस्थानार्चनार्थं तु मण्डलानां तु मध्यतः ॥१३१॥
पूजितेष्वथ मन्त्रेषु नियुक्तेषु स्वधामनि ।
ईशानसोमदिङ्मध्ये चतुरश्रे पुरेऽथवा ॥१३२॥

द्वारशोभाग्रनिर्मुक्ते रेखात्रितयभूषिते ।
तदन्तरेऽर्धचन्द्रस्थे कमलेऽष्टदळान्विते ॥१३३॥
साम्राज्येन नियुक्तेऽस्मिन् विघ्नानामच्युतेन तु ।
पूजिते विधिना शश्वदभीष्टं साधकोऽश्नुते ॥१३४॥

तस्मान्मन्त्रैस्तदर्थैस्तु स्नात्वा पूर्वं विधानतः ।
प्रक्षाल्य पाणिपादौ वा त्वाचम्य न्यासमाचरेत् ॥१३५॥

तदधिष्ठातृतत्त्वेन धारणाभिः स्वविग्रहम् ।
शोधयित्वा पुनर्न्यस्य षडङ्गादिं करादितः ॥१३६॥

प्राग्वदानन्दधामाच्च ह्यवतार्य तथा प्रभुम् ।
इष्ट्वा हृत्पुण्डरीके तु स्वापेक्षा निष्कलात्मकम् ॥१३७॥

तमेव सकलत्वेन यातं ध्यात्वा बहिर्यजेत् ।
प्राग्वदर्घ्यादिपात्राणि प्रतिष्ठाप्य स्वविग्रहे ॥१३८॥
विन्यस्य मन्त्रानभ्यर्च्य द्वारदक्षिणसौम्ययोः ।
चण्डप्रचण्डसदृशौ बलप्रबलसंज्ञितौ ॥१३९॥
वायुवेगं महाप्राणं द्वाराग्रे गरुडोपमम् ।
समभ्यर्च्य यथापूर्वं प्रागुक्त्वा कमलासनम् ॥१४०॥

धर्मादिनन्तपर्यन्त पञ्चकं नवकन्तु वा ।
सत्वेनाच्छादितं पश्चात्केवलेनाम्बुजं स्मरेत् ॥१४१॥
तस्मिन्नावाह्य तं देवं हृदये ध्यानचोदितम् ।
सन्निधानादिकं कृत्वा मुद्राबन्धपुरस्सरम् ॥१४२॥
समभ्यर्च्यार्घ्यपुष्पाद्यैः लययागविधानतः ।
कर्णिकामध्यगं तस्य हृदाद्यं मुख्यमन्त्रवित् ॥१४३॥
पद्मच्छदान्तरस्थाश्च तदाकारद्युतिं विना ।
किं त्वङ्गाना च सर्वत्र ध्यानमुक्तं सितादिकम् ॥१४४॥
क्रियाख्यां तेजसीं शक्तिं स्वाहापर्यायरूपिणीम् ।
लक्ष्मीरूपधरां प्रीतां सर्वालङ्कारमण्डिताम् ॥१४५॥
प्रियानुरूपां मनतः स्वासीनां वाथ सुस्थिताम् ।
दक्षिणोत्तरयोगेन चमरोभयधारिणीम् ॥१४६॥
ओं ह्रीं क्रियायै स्वाहान्तो मन्त्रोयं सम्प्रकीर्तितः ।
अनेन स्वामिनो देहात् तेजसाद्विघ्नसूदनात् ॥१४७॥
वामपार्श्ववतार्याम्य भोगयागावसानतः ।
गजाननो जयसेनो हरिवक्त्रो महाबलः ॥१४८॥
कालप्रकृतिसंज्ञश्च चतुर्थः कमलोद्भवः ।
गणराजेश्वराश्चैते चत्वारश्चण्डविग्रहाः ॥१४९॥
आज्ञाप्रतीक्षकाश्चास्य सुश्वेतचमरोद्यताः ।
निलायकादयश्चैव विघ्नेशप्रवरास्तु ये ॥१५०॥
अमीषां गणनाथानां नित्यमाज्ञानुपालिनाम् ।
ईशानादिषु कोणेषु पद्मनाद्यैः स्थितान्न्यसेत् ॥१५१॥
वीक्षमाणाः विभोर्वक्त्रं तत्तुल्यस्थानके स्थिताः ।
तद्वत्तराद्विना सर्वे किं तु मुद्राविवर्जिताः ॥१५२॥

ध्यानमेषां पृथग्भूतं शारीरमवधारय ।
भीमद्विपेन्द्रवदनं चतुर्दंष्ट्रं त्रिलोचनम् ॥१५३॥
कम्बुग्रीवं चतुर्बाहुं पूर्णचन्द्रायुतद्युतिम् ।
हारनूपुरकेयूरमेखलादाममण्डितम् ॥१५४॥
नानास्रग्गन्धवस्त्राढ्यमनौपम्यपराक्रमम् ।
ध्यायेद्गजाननमतो जयत्सेनं च संस्मरेत् ॥१५५॥
महत्पुरङ्गवदनं पद्मरागाचलप्रभम् ।
द्रवच्चामीकराक्षं च त्वनेकाद्भुतविग्रहम् ॥१५६॥
हरिविक्रममतो ध्यायेत्सटाच्छुरितमस्तकम् ।
निष्टप्तकनकाख्यं घोरघर्घरनिस्वनम् ॥१५७॥
मृगराड्वदनं विप्रा! कल्पान्तानलवेगिनम् ।
कालप्रकृतिनामानं भावयेदञ्जनाद्रिवत् ॥१५८॥
दंष्ट्राकरालवदनं पिङ्गळश्मश्रुलोचनम् ।
झषकुण्डलभृद्रौद्रं मीनवन्निम्ननासिकम् ॥१५९॥
गणराजेश्वराद्येते महापुरुषलक्षणैः ।
संयुक्ताश्चाग्निर्विप्राः! आपादात्कन्धरावधि ॥१६०॥
यत्किञ्चिन्मण्डनं वस्तु तत्तथोक्तं स्मरेत्त्विषु ।
एतेषामर्चनं कुर्यात्स्वनाम्ना प्रणवादिना ॥१६१॥
समस्तेनोऽङ्गसम्भूत नानासिद्धिफलाप्तये ।
अथाष्टकेनार्घ्यैर्वा तन्मार्थैर्वा यथारुचि ॥१६२॥
क्षिप्रकर्मप्रसिध्यर्थमथाभिर्वा समर्चयेत् ।
तन्निवेदितमन्नाद्यमर्घ्यस्रक्चन्दनादिकम् ॥१६३॥
न देयं कस्यचिन्मोहाद्विफाग्निसिद्धिकामये ।
स्वाभिन्नानामनुज्ञातं भक्तानामपि तेन तत् ॥१६४॥
निन्द्य तद्दूर्वनमेवानामात्मनिगतचारिणी ।

अत एव हि भोक्तृणामर्थहानिं ददाति तत् ॥१६५॥
नूनमाशागण सर्वं ध्वसयन्ति सदैवहि ।
तस्माद्ददाति योऽन्येषा स्वयमश्नाति वाऽधम ॥१६६॥
मोहादुपेक्षते वाऽपि स याति नरकेऽधम ।
अत श्रेयोऽर्थिना कार्य परिहार सदैव हि ॥१६७॥
तथापि क्ष्मातले कूपे तटाकादौ तु चेत्क्षिपेत ।
नोपभोग यथा याति काकादिष्वब्जसम्भव ॥१६८॥
यस्मात्तन्मन्त्रपूत तत्प्राधान्येनापि वर्धते ।
अतो निषिद्ध पापानामपापाना विशेषत ॥१६९॥
इति सम्यक् समाख्यात विष्वक्सेनार्चन परम् ।
पूजन कुमुदादीना शृणुत्त्वमथ योगिन ! ॥१७०॥
द्वारावरणदेवाना सुस्थिताना स्वमद्मसु ।
चलाना वाऽथ हेमाद्यैर्निर्मिताना यथाविधि ॥१७१॥
त्रिकाल वा द्विकाल वा सकृदे त्वेककालकम् ।
तत्तन्मन्त्रेण कुर्वीत पूजामष्टोपचारत ॥१७२॥
इत्येव वैनतेयादिपरिवारगणस्य च ।
पूजन सर्वमाख्यात सर्वसिद्धिफलप्रदम् ॥१७३॥
इतोऽन्यच्छ्रोतुमिच्छा चेन्दव्यता मुनिसत्तमा ! ।

मुनय ।

भगवन् ! मन्दिरे विष्णो स्थापिता लोकपूजिता ॥१७४॥
विष्णुभक्ता कथ पूज्यास्तद्विधान वदस्व न. ।

नारद ।

एकान्तिनो महाभागा सहस्रोपपुरुषगा ॥१७५॥
धीमन्त शूरवतारा ये लोकोज्जीवनहेतुना ।
शाण्डिल्याद्याश्च ये चान्ये पाञ्चरात्रप्रवर्तका ॥१७६॥

प्रह्लादश्चैव सुग्रीवो वायुसूनुर्विभीषणः ।
ये चान्ये सनकाद्याश्च पञ्चकालपरायणाः ॥१७७॥
भक्तोत्तमास्ते विज्ञेयास्तान् दिव्यायतनादिषु ।
चरस्थिरविभागेन लोहैर्वा शिलयापि वा ॥१७८॥
स्वस्ववर्णाश्रमाचारसदृशाकृतिचेष्टितान् ।
लाञ्छितान् चक्रशङ्खाभ्यां भुजयोर्दक्षिणादितः ॥१७९॥
पद्मविष्टरमध्ये तु स्वासीनान् वाथ सुस्थितान् ।
ऋजु स्थितान्यथाशोभं पैशाचस्थानकेऽथवा ॥१८०॥
निर्माय च विधानेन प्राङ्गणे मण्टपेऽथ वा ।
प्रासादेष्वनुरूपेषु कल्पितेष्वग्रतो विभोः ॥१८१॥
यथावकाशं वामे वा दक्षिणे वाथ पश्चिमे ।
स्वस्वमन्त्रैः प्रतिष्ठाप्य विधिवच्छ्रद्धयार्चयेत् ॥१८२॥
शृणुध्वमथ तन्मन्त्रान् स्थापनादिषु कर्मसु ।
प्रधानपुरुषेशाद्यतारकब्रह्मणाथ वा ॥१८३॥
अहसतारकेणैव सविसर्गेण चान्तिके ।
आद्येन वा द्वितीयेन युक्तया तितयेन वा ॥१८४॥
संज्ञया योजनीयास्ते साङ्गयागस्त्वथोच्यते ।
ताराद्ययोर्द्वयोरेकं षोढा कृत्वा तदन्तिमे ॥१८५॥
ज्ञानादिहृदयादीनि चतुर्थ्यन्तान्युदीरयेत् ।
प्रणवाद्यरयुक्तानि प्रागेवाङ्गान्यमूनि वै ॥१८६॥
मन्त्रेणानेन वै भक्तान् पूजयेत्तु यथाविधि ।
प्रागवत्स्नानादिकं कृत्वा सोर्ध्वपुण्ड्रः सलङ्कृतः ॥१८७॥
पादौ प्रक्षाल्य चाचम्य प्रविश्य यजनालयम् ।
कवाटोद्घाटनं कुर्याद्वार्स्थाभ्यर्चनपूर्वकम् ॥१८८॥
तन्मन्त्रेण प्रणम्याथ बिम्बशुध्यादिकं तथा ।

प्रासादशोधनादीनि कृत्वा वै तस्य दक्षिणे ॥१८९॥
पार्श्वे समुपविश्याथ करशुद्धिं समाचरेत् ।
दिग्बन्धं चैव सायामा भूतशुद्धिं समाप्य च ॥१९०॥
पुटीकृतेन ताराभ्यां भक्तमन्त्रेण मन्त्रवित् ।
नखान्तं मणिबन्धाद्य प्रागुक्तपाणिद्वयं मृजेत् ॥१९१॥
अङ्गानि चैव विन्यस्य पूर्वोक्तविधिना ततः ।
तुलसीनलिनाक्षाणां मालिकाद्वितयं तथा ॥१९२॥
चक्रशङ्खौ पाणितलद्वये न्यस्य यथाक्रमम् ।
कृत्वैव करविन्यासं ततस्तन्मन्त्रमुच्चरन् ॥१९३॥
पाणिभ्यामालभेद्देहमामूर्ध्नश्चरणावधि ।
कृत्वैव व्यापकन्यासं हृदयादीनि विन्यसेत् ॥१९४॥
ततो मालाद्वयं कण्ठे चक्रशङ्खौ भुजद्वये ।
विन्यस्य हार्दधीमुद्रां बध्वा तादात्म्यमाश्रयेत् ॥१९५॥
ततः स्वहृदयाम्भोजे देवस्य परमात्मनः ।
पादाधस्ताच्चेतनन्तु विचिन्त्य तदनन्तरम् ॥१९६॥
तस्माच्चैतन्यमानाद्य यजेद्भोगैस्तु मानसैः ।
ततो बहिर्यजेद्भक्तः प्रागुक्तैर्भोगसञ्चयैः ॥१९७॥
तदर्थं पञ्चपात्राणि चतुस्त्रिद्व्येकमेव वा ।
कल्पयित्वा ततो देहन्यस्तान् मन्त्रान् समर्चयेत् ॥१९८॥
द्वारयागं ततः कुर्याद्दर्घ्याद्यैर्देशिकोत्तमः ।
सावित्रं सवितारं च गर्भद्वारस्य पार्श्वयोः ॥१९९॥
सम्पूज्य तद्विमाने तु चतुर्दिक्षु यथाक्रमम् ।
भक्तमूर्तीस्समभ्यर्च्य अर्घ्याद्यैर्मुनिसत्तमाः ॥२००॥
ततोऽष्टमण्टपद्वारे दुर्गां गणपतिं यजेत् ।
इन्द्रादिदिग्गेऽपाशास्तु प्रथमावरणादिषु ॥२०१॥

सम्पूज्यावरणद्वारे त्विन्द्र चेन्द्रजयं यजेत् ।
यद्वा द्वारेषु सर्वेषु तथैवावरणेषु च ॥२०२॥
तत्तच्छिष्यगणानेव परिवारान् प्रकल्पयेत् ।
महापीठे यजेत्सर्वभूतेभ्यो नम इत्यथ ॥२०३॥
गर्भगेहे सम्प्रविश्य कल्पयेदासनं गुरु ।
धर्मादीन् चतुर. पीठकोणेष्वभ्यर्च्य पूर्ववत् ॥२०४॥
सत्वेनाच्छादितं पश्चात्केवलेनाम्बुजं यजेत् ।
तत्रावतार्य तं भक्तं मन्त्रन्यासं समाचरेत् ॥२०५॥
यथा देहे तथा बिम्बे लयोक्तविधिना तत ।
समभ्यर्च्य ततो भोगयागं कुर्याद्यथाविधि ॥२०६॥
प्रागादिपद्मपत्रेषु हृदयादीनि पूर्ववत् ।
विदिग्दळेषु चैवास्त्रं नेत्रं केसरजालगम् ॥२०७॥
पीठोपरि दळाद्वाह्ये त्वाग्नेयेशानकोणयो ।
मालाद्वयं तु पूर्वोक्तं चक्रशङ्खौ च पूजयेत् ॥२०८॥
ततो ध्यायेद्विष्णुभक्तं सर्वलक्षणसंयुतम् ।
स्वस्ववर्णाश्रमाचारसदृशाकृतिनेष्टितम् ॥२०९॥
बद्धाञ्जलिपुटं वाथ व्याख्यामुद्रासमन्वितम् ।
पद्मविष्टरमध्ये तु स्वासीनं वाथ सुस्थितम् ॥२१०॥
ललाटादिषु चाङ्गेषु ह्यूर्ध्वपुण्ड्रैरलङ्कृतम् ।
लाञ्छितं चक्रशङ्खाभ्यां भुजयोर्दक्षिणादित ॥२११॥
तुळसीनळिनाक्षाणां मालाद्वितयभूषितम् ।
एवं ध्यात्वा विष्णुभक्तं हृदयादींश्च पूर्ववत् ॥२१२॥
ध्यात्वाथ पूजनं कुर्यादासनाद्यैर्यथोदितै ।
द्वात्रिंशदुपचारैर्वा ह्यष्टभिर्वा द्विरष्टभि ॥२१३॥
जपान्तवाऽपि होमान्तं तत्तन्मन्त्रेण पूर्ववत् ।

अस्वातन्त्र्याद्धलिं तत्र न कदापि समाचरेत् ॥२१४॥
तत्तज्जन्मदिने कुर्यात्तेषां वैशेषिकार्चनम् ।
सहैव देवदेवेन सङ्क्रान्त्यामयनादिषु ॥२१५॥
कालेष्वेतेषु कर्तव्यमुत्सवभ्रमणादिकम् ।
पृथग्वाप्युत्सवं कार्यो ध्वजारोहणवर्जितं ॥२१६॥
न होमा न बलिस्तीर्थं पारतन्त्र्ये विधिस्त्वयम् ।
स्वातन्त्र्ये चाग्रहारादौ विपिने वा नदीतटे ॥२१७॥
समकारं समानं तु यथेष्टतलशोभितम् ।
कल्पयित्वा प्रयत्नेन रथ्याभिश्च परिष्कृतम् ॥२१८॥
देशान्तरगतानां वा भगवल्लोकवासिनाम् ।
दृश्यरूपमदृश्यं वा देवसारूप्यतां गतम् ॥२१९॥
स्थापयित्वा विधानेन प्रासादे मानुषे पदे ।
दिव्यमानुषयोर्वाथ दिव्ये वा मानुषाश्रिते ॥२२०॥
विष्णोर्मन्त्रासनाव्यक्तपद्ममध्यस्थचेतनात् ।
भक्तबिम्बहृदम्भोजे चैतन्यमवतार्य च ॥२२१॥
सन्नीकृत्य मन्त्रेण साङ्गेनाभ्यर्चयेत्सदा ।
आवाहने विशेषोऽयं जीवतां वाप्यजीवताम् ॥२२२॥
सर्वत्राव्यक्तपद्मार्थैरष्टभिर्वा द्विरष्टभिः ।
भोगे प्रागुदिते स्नपिते ताम्बूलान्ते समर्चयेत्॥२२३॥
कृत्वा पद्मान्यनारोहं हंसप्रजमथापि वा ।
समारोप्य यथाशास्त्रं कुर्यात्तत्र महोत्सवम् ॥२२४॥
बलिदानादिकं तीर्थं सर्वं तत्र समाचरेत् ।
भक्तप्रणीता गाथाश्च श्रुत्यन्तार्थोपबृंहिताः ॥२२५॥
धारयेद्विधिवद्देवे भक्त्या गीतिपुरस्सरम् ।
सन्निवेदितमन्नाद्यं गायकेभ्यः प्रदापयेत् ॥२२६॥

इति सम्यक् समाख्यातं विष्णुभुक्तार्चनं परम् ।
गोपनीयं प्रयत्नेन नास्तिकानां विशेषतः ॥१२७॥
प्रकाशनीयं भक्तानां नित्यकर्मरतात्मनाम् ॥

इति श्रीपाञ्चरात्रे ईश्वरसंहितायां
गरुडादिपरिवारार्चनविधिर्नाम
अष्टमोऽध्यायः

अथ नवमोऽध्यायः।

मुनयः ।

पुरा नित्योत्सवविधौ द्वारावरणवासिनाम्
देवानां पूजनं प्रोक्तं तेषां ध्यानादिकं क्रमात् ॥१॥
वदस्व मुनिशार्दूल! सर्वशास्त्रविशारद!।

नारदः ।

शृणुध्वं मुनयः सर्वे सावधानेन चेतसा ॥२॥
द्वारावरणदेवानां लक्षणं तु यथाविधि ।
प्रासादद्वारदेवेभ्यः समारभ्य यथाक्रमम् ॥३॥
प्रासादद्वारबाह्ये तु ह्यधस्थौदुम्बरान्तिमे ।
वास्त्वीशक्षेत्रनाथौ द्वौ स्थितौ दक्षेतरक्रमात् ॥४॥
शुक्लवक्त्रः कृष्णदेहो द्विभुजो रत्नपात्रधृक् ।
दक्षिणेन करेणैव सर्वामरसमाश्रयः ॥५॥
पुण्डरीकसमानाभवस्त्रस्रगनुलेपनः ।
गदोद्यतकरो विप्राः! ध्यातव्यो वास्तुपूरुषः ॥६॥
क्षेत्रेशं द्विभुजं ध्यायेद्धेमाभवसनस्रजम् ।
नीलजीमूतसङ्काशं दण्डहस्तं महातनुम् ॥७॥
शुष्टिरुद्दामहस्तेन यागक्षेत्रस्य पालकम् ।

कुण्डलाद्यैरलङ्कारैरेतौ शोभितविग्रहौ ॥८॥
वीक्षमाणौ विभोर्वक्त्रं तेजसातीव निर्भरौ ।
ततस्तप्तकनकवर्णाभां प्रवालसदृशाम्बराम् ॥९॥
हारनूपुरकेयूरकरण्डमकुटादिकैः ।
अलङ्कृतामलङ्कारैः पुण्डरीकनिभेक्षणाम् ॥१०॥
अकलङ्कसुसम्पूर्णशरच्चन्द्रनिभाननाम् ।
पद्मकुम्भकरां लक्ष्मीं पद्मोपरि गतां स्मरेत् ॥११॥
पद्मासनेनोपविष्टां द्वारस्योर्ध्वे उदुम्बरे ।
तरुणादित्यसङ्काशो महोरस्कश्चतुर्भुजः ॥१२॥
उन्नतश्चोन्नतांसश्च पूर्णाङ्गो नातिमांसलः ।
तनूदरो निम्ननाभो रोमराजिविराजितः ॥१३॥
दंष्ट्राकरालवदनः पिङ्गश्मश्रुजटाधरः ।
मधुपिङ्गलनेत्रश्च कुटिलभ्रूलतायुतः ॥१४॥
प्रलम्बलोलश्रवणः पृथुघ्राणः सिताननः ।
कुण्डलालङ्कृतश्चैव हारकेयूरभूषितः ॥१५॥
बद्धोष्णीषललाटश्च तिलकेनाप्यलङ्कृतः ।
शुक्लाम्बरधरः स्रग्वी भुजयुग्मेऽस्य दक्षिणे ॥१६॥
मोचयन् सव्यरेचनं प्रज्वलन्तीं गदां परे ।
श्रोणितटनिषण्णां तु विश्रान्तां वसुधातले ॥१७॥
पूर्वभागकरे शरमन्यसिंश्चाश्मसूत्रकम् ।
एवं गणाधिपश्चण्डो विक्रमेणापराजितः ॥१८॥
क्रुद्धो विघ्नयुतानां तु क्षणात्संहरणक्षमः ।
ध्येयो गर्भगृहद्वारशाखामूले तु दक्षिणे ॥१९॥
तत्रापरभागे तु प्रचण्डं त्वीदृशं यजेत् ।
किं तु सव्यापसव्याभ्यां भुजाभ्यां स्याद्विपर्ययः ॥२०॥

भुजद्वये यचण्डस्य वामे सम्परिकीर्तितम् ।
दक्षिणे तत्प्रचण्डस्य ध्येयं वा परिकल्प्य वा ॥२१॥
ध्यायेद्द्वाराग्रदेशे तु गरुडं काञ्चनप्रभम् ।
कुटिलभ्रुसुवृत्ताक्षं पक्षमण्डलमण्डितम् ॥२२॥
लम्बोदरं सुपीनाङ्गं सर्वभूपणभूपितम् ।
मकुटाद्यैरलङ्कारैर्नूपुराद्यैर्विराजितम् ॥२३॥
नीलं वसानं वसनं नानामाल्योपशोभितम् ।
सम्मुखं देवदेवस्य भूगतं विधृताञ्जलिम् ॥२४॥
द्विभुजं तुहिनाभं तु सत्याख्यं विहगाधिपम् ।
प्राणाधिदैवतं चक्रे बलिमण्डलमध्यगे ॥२५॥
संस्थितं संस्मरेत्सर्वरङ्गैः पूरुपरुपिणम् ।
प्रलम्बमानजठरं पक्षराजिविराजितम् ॥२६॥
दक्षिणेन करेणैव धारयन्तं गणित्रकम् ।
उत्तानितेतरकरं कुण्डलाद्यैर्विभूपितम् ॥२७॥
नीलकौशेयवसनं नीलमाल्यानुलेपनम् ।
अनाकुलाभ्यां नेत्राभ्यां वीक्षमाणं सदा विभुम् ॥२८॥
अथाग्रमण्टपद्वारशालायुगलसंस्थितौ ।
पद्मगर्भमनीकाशावतिभीमपराक्रमौ ॥२९॥
चण्डप्रचण्डसदृशौ भुजगान्छनभूषणैः ।
रक्ताम्बरधरौ चैव रक्तस्रगनुलेपनौ ॥३०॥
गणौ धातृविधातारौ ध्यात्वा सम्पूज्य तत्परः ।
कुमुदादिगणेशानान् प्रथमावरणे यजेत् ॥३१॥
पूर्वे च वह्निदिग्भागे पूज्यौ द्वौ गणनायकौ ।
कुमुदः कुमुदाक्षश्च प्रमत्तवदनेक्षणौ ॥३२॥
तुहिनाभ्रसमप्रख्यौ प्रथमे वयसि स्थितौ ।

नानाभरणदिग्धाङ्गौ नानाकुण्डलभूषितौ ॥३३॥
नानामाल्याञ्चितौ चैव नानामौलिधरौ द्विजा ! ।
नानागन्धविलिप्ताङ्गौ नानावस्त्रविभूषितौ ॥३४॥
कुमुदाख्यगणेशस्य ध्यातव्यो दक्षिण कर ।
चन्द्ररश्मिप्रतीकाशचामरेण विराजित ॥३५॥
अभिगच्छाभय ध्यायेद् द्वितीय दक्षिण करम् ।
भवभङ्गात्प्रपन्नाना परेषा गुणशासनम ॥३६॥
तस्यैवाथ वामकर प्रवुद्धकमलेऽयतम् ।
तूष्णीं भीसूचक ध्यायेद्धहि स्याना पर करम् ॥३७॥
एतद्दै कुमुदाक्षस्य वैपरीत्येन भावयेत् ।
द्वाभ्या द्वाभ्या कराभ्या वै अन्येषामेवमेव हि ॥३८॥
पुण्डरीको वामनश्च द्वानेनौ हुतभुक्प्रभौ ।
गरुडध्वजहस्तौ च शेषमन्यत्पुरोदितम् ॥३९॥
कृत्वा ध्यात्वाथ वा न्यस्य दक्षिणे नैर्ऋतेऽपि च ।
शङ्कुकर्णाभिधानो य सर्वनेत्राभिसक्षित ॥४०॥
द्वावेतौ चम्पकाभौ तु मायूरव्यजनोद्यतौ ।
महाविभूतेर्देवस्य प्रत्यग्वायुदिगास्थितौ ॥४१॥
सुमुख सुप्रतिष्ठश्च विभो सोमेशदिक्स्थितौ ।
चिन्त्यौ मुद्गफलश्यामावातपत्रकरोदितौ ॥४२॥
नोक्तशेषकराणा तु तद्विद्धि कुमुदोदितम् ।
एते भगवतो विभास्त्वन्तरङ्गा मयोदिता ॥४३॥
कर्मणा मनसा वाचा तद्भागगतमानसा ।
ज्ञानादिषड्गुणोपेतैरार्त्तीर्णा कोटिश परै ॥४४॥
भूतै सिद्धैरनन्तैश्च प्रार्थयानै पर पदम् ।
वस्त्रभूषाङ्गरागाद्यै सर्वे ते कुमुदोपमा ॥४५॥

श्वेतमृत्कल्पितेनैव ह्यूर्ध्वपुण्ड्रेण भूषिताः ।
ललाटस्थेन सर्वेऽपि कुमुदादिगणाधिपाः ॥४६॥
एवमन्येपि भूताद्याः सर्वे पारिषदा द्विजाः ! ।
एवमावृतिदेवाश्च द्वारस्थाश्च तथैव हि ॥४७॥
एवं मदीया विप्राश्च क्षत्रविट्छूद्रजातयः ।
मृदैव वा चन्दनेन कल्पितैरूर्ध्वपुण्ड्रकैः ॥४८॥
द्वादशैश्च चतुर्भिर्वा भूषिताः स्युः सदा द्विजाः ! ।
अतसीकुसुमश्यामौ पीतमाल्याम्बरान्वितौ ॥४९॥
पीतोष्णीषधरौ रौद्रौ · प्राग्वद्भुजविभूषितौ ।
गणौ चण्डाकृतिधरौ दुर्दर्शौ दुरतिक्रमौ ॥५०॥
जयं च विजयं नाम्ना यजेत्तद्द्वारपार्श्वयोः ।
तदुद्देशात्समारभ्य बहिर्द्वारावसानकम् ॥५१॥
द्वितीयावरणक्षेत्रं षोढा कृत्वा तु पञ्चमे ।
भागे तु गरुडं विप्राः ! कृत्वा ध्यात्वाऽथ वा न्यसेत् ॥५२॥
दीप्यचामीकराकारं भीमभ्रुकुटिलोचनम् ।
पृथुदंष्ट्रं पृथुघ्राणं पृथुगात्रं पृथूदरम् ॥५३॥
पक्षाङ्कुराश्चितोरस्कं पक्षमण्डलमण्डितम् ।
हारकेयूरताटङ्कमकुटाद्यैस्तु भूषणैः ॥५४॥
भूषितं नीलवसनं नानामाल्यविभूषितम् ।
नानागन्धविलिप्ताङ्गं नागैरष्टभिर्भूषितम् ॥५५॥
पुष्पस्तबकसम्पूर्णमञ्जलिं दधतं द्विजाः ! ।
उन्नम्य दक्षिणं जानुमासनीकृत्य चेतरत् ॥५६॥
सुखासने समासीनं विभोराज्ञाप्रतीक्षकम् ।
तपःकर्मोत्थतन्त्राणां दर्शकं सिद्धतां गतम् ॥५७॥
भगवत्तुल्यमामर्थ्यमार्षश्यादिगुणैर्युतम् ।

वियुक्त प्राकृताद् तु सान्नियुक्त चेश्वरेण तु ॥५८॥
भवसन्तारकत्वेन चेतदावृतिके क्रमात् ।
उपेन्द्र पूर्वदिग्भागे सस्थितो द्विजसत्तमा ! ॥५९॥
वह्नौ तेजोधराख्यन्तु दक्षिणे दुरतिक्रम ।
नैर्ऋते तु महाकर्मा पश्चिमे तु महाह्रद ॥६०॥
अग्राह्यो वायुदिग्भागे वसुरेतास्तथोत्तरे ।
पूर्वोत्तरे वर्धमान साक्षी गगनगोचर ॥६१॥
आधारनिलय नाम्ना सर्वस्याधोगत स्मरेत् ।
एते स्फाटिकवर्णाभा श्वेतमाल्याम्बरान्विता ॥६२॥
गणिनक रथाङ्ग च शङ्ख चैव गदा तथा ।
दधाना मुख्यदशादि मुख्यवामान्तमेव हि ॥६३॥
करैश्चतुर्भि सुसमा मकुटादैविभूषिता ।
तेजसा विघ्नजालानि प्रेरयन्तो महौजस ॥६४॥
स्थानकै सस्थिता सर्व ध्यानोन्मीलितलोचना ।
अथ वा द्विभुजा एते वज्राद्य दशक क्रमात् ॥६५॥
दक्षिणे लोकपालीय धारयन्त करेण तु ।
गणिलक तु वामेन वरदभयदास्तु वा ॥६६॥
तथा चर्णाङ्करागाद्यैरिन्द्रादिसदृशास्तु वा ।
द्वितीयगोपुरद्वारपार्श्वयोरन्तरस्थयो ॥ ६७॥
विन्यसेद्द्वारपालाख्यानेतै वामादितो गणौ ।
निधीशौ शङ्खपद्मौ तु निधिभाण्डोपरि स्थितौ ॥६८॥
स्थूलदन्तौ च दान्तौ च द्विभुजौ भगवन्मयौ ।
ध्रुटिभ्रान्तामुखौ किञ्चिदुन्नतवक्षसौ ॥६९॥
लम्बोदरौ सुपीनाङ्गौ ह्रस्वपाणिपदौ द्विजा ! ।
शरच्चन्द्रसमानाभौ नीलशुक्लाम्बरस्रजौ ॥७०॥

मकुटाद्यैस्तु विविधैरलङ्कारैरलङ्कृतौ ।
दक्षिणेन करेणैव धारयन्तौ सरोरुहम् ॥७१॥
इतरेण करेणैव धृतानेन निधिं स्फुरम् ।
अथ वा वामदक्षाभ्यां प्रवेशाभीतिदान्वितौ ॥७२॥
करद्वयेन शङ्खं वा पद्मं वा दधतौ द्विजाः ! ।
वामेन दधतौ पद्मं दक्षे शङ्खं निधीश्वरौ ॥७३॥
शङ्खपद्मधरौ वापि शिरसा मकुटोपरि ।
शङ्खचक्रधरौवापि साधकेच्छावशेन तु ॥७४॥
तद्द्वारशाखानिष्ठौ तु संस्मरेद्दक्षिणादितः ।
क्षीरकुन्दावदातौ च नीलकौशेयवाससौ ॥७५॥
नीलनीरजवर्णाभैः पुष्पैर्भूषितविग्रहौ ।
पूर्वोक्तगणसादृश्यौ नाम्ना भद्रसुभद्रकौ ॥७६॥
तद्द्वारबाह्यतः पश्चात्पार्श्वयोर्गोपुरस्थितौ ।
एतौ गणेश्वरौ न्यसेद् ध्यात्वा वा परिकल्प्य वा ॥७७॥
अथ वा द्विभुजावेतौ तदा भद्रस्य दक्षिणम् ।
करं तु तर्जनीयुक्तं वाममीषत्तु कुञ्चितम् ॥७८॥
गदाग्रोपरि विश्रान्तं गदामूलोपरि स्थितम् ।
व्यत्यस्तं दक्षिणं पादं वामं तु भुवि संस्थितम् ॥७९॥
भद्रस्य वामयोर्विप्रा यदुक्तं पाणिपादयोः ।
दक्षयोस्तत्सुभद्रस्य दक्षोक्तं वामकं भवेत् ॥८०॥
किं तु तद्वामहस्तं तु युक्तं विस्मयमुद्रया ।
यद्वा भद्रो दक्षकरेऽभीतिमुद्रासमन्वितः ॥८१॥
गदोपरिष्टाद्विश्रान्तवामहस्तो द्विजोत्तमाः ! ।
पश्चात्करद्वयेनापि चक्रशङ्खधरः क्रमात् ॥८२॥
सुभद्रस्तु गदान्यस्तदक्षहस्तस्तथेतरे ।

अभीतिमुद्रासयुक्तश्चक्रशखसमन्वित ॥८३॥
चण्डादिष्वप्येवमेव द्विभुजत्वादिक भवेत् ।
चण्डप्रचण्डौ धाता च विधाता च जयस्तथा ॥८४॥
विजयश्चापि भद्रश्च सुभद्रश्च गणेश्वर ।
एते गणेश्वरा ह्यष्टौ प्रभापुष्पाम्बरैर्विना ॥८५॥
देहवक्त्राकृतैस्तुल्यास्तथैवाभरणायुधै ।
भक्ताना विघ्नजालस्य सर्वदिक्सस्थितस्य च ॥८६॥
ससारफलदातुर्वै छेदनार्थं समुद्यता ।
परस्परमुखा सर्वे स्थानकै सस्थिता समै ॥८७॥
गणेशायुतलक्षैस्तु नानावर्णवपुर्धरै ।
अच्युताराधनपरैरनेकै परिवारिता ॥८८॥
तृतीयावरणे पश्चात्पूर्वादिक्रमयोगत ।
इन्द्रादिलोकपालाना दशक विन्यसेद्द्विजा ! ॥८९॥
शतधामनिभ ध्यायेच्चतुर्बाहु पुरन्दरम् ।
महितद्विपसस्थ तु सुतीक्ष्णकुलिशोद्यतम् ॥९०॥
अजारूढ स्मरेद्रक्त शक्तिपाणि हुताशनम् ।
सहस्रार्चिभिराकीर्णं सहस्रादित्यभासुरम् ॥९१॥
महामहिषसस्थ त त्वञ्जनाद्रिसमप्रभम् ।
सभीमदण्डहस्त च सर्वदेव पितृपतिधरम् ॥९२॥
दष्ट्राकरालवदन कृष्णमेघसमप्रभम् ।
घोर प्रेतासन ध्यायेत् खड्गधृमाक्षसेधरम् ॥९३॥
मुक्ताफलद्युतिसम भीम पाशकरोद्यतम् ।
नागकन्यासहस्राढ्य मकरस्थमपा पतिम् ॥९४॥
नीलतोयदसङ्काश मदाघनपताङ्कितम् ।
ध्यायेत्समीरण देव सस्थित हरिणोपरि ॥९५॥

सोमं तारागणोपेतं शङ्खगोक्षीरपाण्डुरम्।
बृहच्छशकपृष्ठस्थं शिशिरास्त्रकरं स्मरेत् ॥९६॥
सितभूतिविलिप्ताङ्गं त्रिनेत्रं वृषवाहनम्।
त्रिशूलायुधहस्तं च त्वीशानं ज्ञानिनं स्मरेत् ॥९७॥
पाताळदिग्गतं ध्यायेत् कूर्मारूढं हलायुधम्।
सितं सहस्रफणभृद्योनन्तो नाम नागराट् ॥९८॥
गंचक्रं भ्रामयंतं तु दण्डहस्तं प्रजापतिम्।
हंसारूढं खसंस्थं तु ध्यायेद् ध्रुवमजं विभुम् ॥९९॥
एते चतुर्भुजाः सर्वे अक्षसूत्रविभूषिताः।
चिन्तयन्तः परं तत्त्वं वराभयकरोद्यताः ॥१००॥
दिव्याभरणदिग्धाङ्गा दिव्यमाल्याम्बरान्विताः।
दिव्यरूपधराश्चैव दिव्यगन्धवहा द्विजाः ! ॥१०१॥
रक्तशुक्लनिशापीतनीलचम्पकसप्रभैः।
व्योमस्फटिकमार्ताण्डराजोपलनिभैस्तथा ॥१०२॥
माल्याङ्गरागवसनैः महार्धैः समलंकृताः।
भूषिता भूषणैश्चित्रैः करण्डमकुटादिभिः ॥१०३॥
एष्वयश्चतुर्भुजस्त्वत्र विज्ञेयो वृषभध्वजः।
द्विभुजास्त्वथ वा चान्ये वरदाभयदास्तु वा ॥१०४॥
इति लोकेश्वरेषूक्तं ततो वै द्विजसत्तमाः ! ।
तृतीयावरणद्वारे शाखामूले तु दक्षिणे ॥१०५॥
सुदर्शनं चतुर्हस्तं ह्रस्वकायं ज्वलत्प्रभम्।
क्रोधरक्तेक्षण दैत्यदानवास्रग्विलेपनम् १०६॥
नृत्यन्तं मदमत्तं च सहस्रारान्तरान्वितम्।
दंष्ट्राकरालवदनं कुटिलभ्रूलतायुतम् ॥१०७॥
स्वस्वान्तरावस्थाकारं स्वर्गाग्निपरिवेष्टितम्।

दक्षिणे भुजयुग्मे तु पूर्वेण च सुदर्शनम् ॥१०८॥
धारयन्तं ततोऽन्येन विश्रान्ता भूतले गदाम् ।
शङ्खं मुख्येन वामेन ह्यपरेण गणित्रकम् ॥१०९॥
हारकेयूरताटङ्कमकुटादिविभूषणैः ।
विभूषितं विचित्रैस्तु श्वेतमाल्याम्बरादिकैः ॥११०॥
विश्वानुत्पाटयन्तं तु दीप्तेन स्वेन तेजसा ।
संस्मरेत्तु ततोऽन्यस्मिन् शारदामूले ततो द्विजाः ॥१११॥
सुस्थितं गरुडं विप्राः तप्तकाञ्चनसन्निभम् ।
मेघ्यवक्त्रं विवृत्ताक्षं रक्ततुण्डं सुभीषणम् ॥११२॥
पृथूदरं दीर्घपुच्छं पक्षमण्डलमण्डितम् ।
रक्ताम्बरधरं चैव रक्तस्रगनुलेपनम् ॥११३॥
दंष्ट्राकरालवदनं भ्रुकुटीकुटिलेक्षणम् ।
विचित्रकम्बुकन्धरं भुजगेन्द्रैरलङ्कृतम् ॥११४॥
मकुटाद्यैरलङ्कारैर्विविधैस्तु विभूषितम् ।
भुजद्वये यथाक्रम्य वामे सम्परिकीर्तितम् ॥११५॥
दक्षिणे तद्वदेवस्य दक्षोक्तं वामतः भवेत् ।
वज्रं शक्तिस्तथा दण्डं खड्गं पाशो ध्वजस्तथा ॥११६॥
शिशिरास्त्रं त्रिशूलं तु लाङ्गलं मुसलं तथा ।
पूर्वादिक्रमयोगेन चतुर्थावरणे स्थिताः ॥११७॥
एतेषां क्रमशो ध्यानं साम्प्रतं कथ्यते द्विजाः ।
वज्रं वज्रोपलाभं तु सितदीर्घनखाङ्कितम् ॥११८॥
दंष्ट्राकरालवदनं ज्वलत्कनकलोचनम् ।
सौदामिनीप्रभां शक्तिं शान्तामिववदनेक्षणाम् ॥११९॥
घनघर्घरनिर्घोषमुद्गिरन्तीं मुहुर्मुहुः ।
बद्धमुष्टिं स्फुरद्दण्डं रक्ताङ्गं रक्तलोचनम् ॥१२०॥

क्रोधमूर्तिं स्वदशनैर्दशन्तमधरं स्वकम् ।
स्वरश्मिखचितं ध्यायेन्नृत्यमानं तु नन्दकम् ॥१२१॥
शरदाकाशसङ्काशं दशन्तं दशनावळीम् ।
पाशं गुणगणाकीर्णं विद्युज्जिह्वं भयानकम् ॥१२२॥
हेमाळिपाण्डुराभं तु घोरास्यं रक्तलोचनम् ।
शरज्जलदसङ्काशं ध्वजं कुटिललोचनम् ॥१२३॥
स्वतेजसा जगत्सर्वं द्योतयन्तं बलोत्कटम् ।
शिशिरं शीतधामाभं पीनाङ्गं पृथुविग्रहम् ॥१२४॥
जटाकलापधृत्सौम्यं पुण्डरीकनिभेक्षणम् ।
उदयार्कसहस्राभं त्रिशूलं भीषणाकृतिम् ॥१२५॥
कल्पान्तपावकाकारं स्वरश्मिपरिवेष्टितम् ।
सन्ध्याजलदसङ्काशं लाङ्गलं भीमलोचनम् ॥१२६॥
क्षामाङ्गमुन्नतांसं तु वज्रकायं बलोत्कटम् ।
कुन्दावदातं मुसलं सौम्यमीषत्स्मिताननम् ॥१२७॥
रवं रवन्तं मधुरं श्रोत्रेन्द्रियसुखावहम् ।
नीलरक्तसितापीतपावकाञ्चनसन्निभैः ॥१२८॥
हेमचन्द्रहिमाकाशसमानाभैः क्रमेण तु ।
माल्याङ्गरागवसनैरुचिताः समलङ्कृताः ॥१२९॥
दिव्यैराभरणैर्युक्ताः स्वचिह्नाङ्कितमस्तकाः ।
तर्जयन्तश्च दुष्टौघं दक्षिणेन करेण तु ॥१३०॥
वामेन कटिमालम्ब्य सुसमे स्थानके स्थिताः ।
चतुर्थावरणद्वारदक्षिणोत्तरशाखयोः ॥१३१॥
गङ्गा च यमुनां चैव ध्यात्वा सम्पूजयेत्क्रमात् ।
भगवत्पादसम्भूतां गङ्गां कुमुदसन्निभाम् ॥१३२॥
नवयौवनलावण्यसौकुमार्यगुणैर्युताम् ।

नीलाङ्गरागवसना नीलमाल्यैरलङ्कृताम् ॥१३३॥
द्विभुजा सौम्यवदना पुण्डरीकनिभेक्षणाम् ।
हारनूपुरकेयूरकुण्डलाद्युपशोभिताम् ॥१३४॥
संसारतापसन्तप्तानारुरुक्षन् परं पदम् ।
वासनाकर्मपङ्कानि क्षालयन्तीं स्वतेजसा ॥१३५॥
वहन्तीं दक्षिणेनैव कलशं वारिपूरितम् ।
वामेन तर्जयन्तीं तु करेण प्राकृतान् जनान् ॥१३६॥
यमुना नीलरत्नाभा नीलकुञ्चितमूर्धजाम् ।
सिताङ्गरागवसना सितमाल्योपशोभिताम् ॥१३७॥
दक्षिणे तर्जनीमुद्रा वामे तु कलशः स्मृतः ।
अन्यत्सर्वं तु गङ्गोक्तमत्रापि स्यान्मुनीश्वराः ॥१३८॥
लोहिताक्षो महावीर्यस्त्वप्रमेयः सुशोभनः ।
वीरहा विक्रमो भीमः शतावर्तस्तु चाष्टमः ॥१३९॥
ऐश्वरीदिक्क्रमेणैव पञ्चमावरणे स्थिताः ।
ध्यायेच्चन्द्रप्रतीकाशं लोहिताक्षं वलोत्कटम् ॥१४०॥
नीलाम्बरधरं नीलमाल्यं नीलानुलेपनम् ।
महावीर्यं महाकायं पीतवर्णं महाभुजम् ॥१४१॥
प्रवालाभाम्बरधरं रक्तस्रगनुलेपनम् ।
सस्मरेदप्रमेयाख्यमप्रमेयबलोत्कटम् ॥१४२॥
हरिताकृतिमापीनवसनस्रग्विलेपनम् ।
सुशोभनं शोभनाङ्गं मुक्ताफलनिभं स्मरेत् ॥१४३॥
अतसीपुष्पसङ्काशवासोमाल्यानुलेपनम् ।
वीरघ्नं वीरहाख्यं च ध्यायेच्चन्द्रसन्निभम् ॥१४४॥
वार्द्धिकारजितारक्तवसनस्रग्विमाण्डितम् ।
विक्रमं विक्रमावासं चापोदरनिभं स्मरेत् ॥१४५॥

कुन्देन्दुकान्तिवसनं सितमाल्यानुलेपनम् ।
भीमं भीमाकृतिं ध्यायेत्तप्तकाञ्चनसन्निभम् ॥१४६॥
पाण्डरारणकौशेयं तद्वद्गन्धस्रगन्वितम् ।
अतसीकुसुमश्यामं शतावर्तं तु भावयेत् ॥१४७॥
पीताम्बरधरं पीतमाल्यगन्धविभूषितम् ।
भुजद्वयान्विता ह्येते चान्तर्मुदितमानसा ॥१४८॥
दक्षिणैः पाणिभिः सर्वे ज्वलन्तं परशुं तथा ।
वामैः शङ्खवरं दीप्तं दधानाश्चारुकुण्डलाः ॥१४९॥
समाः समविभक्ताङ्गाः प्रशान्ताकृतयस्तथा ।
स्थानकैः संस्थिताः सर्वे स्वप्रभाभिर्विराजिताः ॥१५०॥
प्रसन्नवदनाः सौम्यास्त्रैलोक्योद्धरणक्षमाः ।
हारनूपुरकेयूरपूर्वभूषाविभूषिताः ॥१५१॥
सदाज्ञाप्रेक्षकाश्चैव दुष्टदोषोपशान्तिदाः ।
बलेन महता क्षिप्तदेवासुरमहोरगाः ॥१५२॥
एकवीरासहायाश्च स्वप्रयत्नेन लीलया ।
आब्रह्मभवनं शश्वत्परिवर्तयितुक्षमाः ॥१५३॥
एतदावरणद्वारचतुष्के द्वारदेवताः ।
न्यसेद्युग्मप्रयोगेण पूर्वद्वारादितः क्रमात् ॥१५४॥
वज्रनाभं हरीशं च पूर्वस्यां दक्षिणोत्तरे ।
ध्यायेत्तु वज्रनाभाख्यं शतधामसमप्रभम् ॥१५५॥
मुख्यदक्षिणहस्तेन निषेधाभिनयान्वितम् ।
वेत्रलता द्वितीयेन चक्रराजं तृतीयतः ॥१५६॥
मुख्यवामकरेणैव श्रोणीतटकृतार्पणम् ।
शङ्खराजं द्वितीयेन तथा वज्रं तृतीयतः ॥१५७॥
धारयन्तं तथा रत्नभूषणैर्विविधैरपि ।

रक्तमाल्याम्बरधरं रक्तस्रगनुलेपनम् ॥१५८॥
एवं वामे हरीशं च निषेधाभिनयोज्झितम् ।
प्रवेशाभिनयाख्येन पाणिना किं तु चिह्नितम् ॥१५९॥
एको ह्यत्र निषेधं च स्वभक्तानां करोति वै ।
भक्तानामपरश्चैव प्रवेशं सम्प्रयच्छति ॥१६०॥
द्वारे द्वारे प्रतीहारद्वयस्यैव प्रयोजनम् ।
दक्षोक्तं वज्रनाभस्य तद्धरीशस्य वामगम् ॥१६१॥
आद्यवामगतं सर्वमन्यदक्षिणपाणिगम् ।
धर्माध्यक्षनिन्यलीशो दक्षिणे दक्षिणोत्तरे ॥१६२॥
कुर्यादन्तकसादृश्यो पूर्ववद्भुजभूषितो ।
पीतकौशेयवसनौ पीतमाल्यविलेपनौ ॥१६३॥
किं तु दण्डगदाहस्तौ वज्रचक्रविवर्जितौ ।
शुद्धाक्षममृतानन्दं प्रतीच्यां दक्षिणादितः ॥१६४॥
बाणकार्मुकमेकस्मिन् पाणौ पाशमथापरे ।
आद्यं करचतुष्कं यत्तद्यत्र पूर्ववद्भवेत् ॥१६५॥
आकृतो जलनाथस्य सदृशौ सर्वदैव हि ।
नीलकौशेयवसनौ नीलस्रगनुलेपनौ ॥१६६॥
वसुनाथं सुधानन्दमुदग्दिग्दक्षिणोत्तरे ।
खड्गमुद्गरहस्तौ च प्राग्वच्छेषं चतुष्टयम् ॥१६७॥
कराणामनयोः कार्यं रूपेणोडुपतेः समौ ।
अतसीकुसुमश्यामकौशेयस्रग्विलेपनौ ॥१६८॥
भूषणैर्भूषिता ह्येते विविधैर्वज्रनाभवत् ।
षष्ठावरणदेवानां तद्वार्थानां विशेषतः ॥१६९॥
शृणुध्वं ध्यानमधुना तत्त्वतो मुनिपुङ्गवाः ।
पूर्वादीशानपर्यन्तं षष्ठावरणसंस्थिता ॥१७०॥

एताश्च देवता विप्रास्तेजोरूपसमन्विताः ।
कालोपि यन्नियन्ता च शास्त्रं नानाङ्गलक्षणम् ॥१७१॥
विद्याधिपतयश्चैव सरुद्रः सगणः शिवः ।
प्रजापतिसमूहस्तु इन्द्रः सपरिवारकः ॥१७२॥
मुख्ये द्वारचतुष्के तु पूर्ववत्संस्थिताः क्रमात् ।
चक्रशङ्खौ पद्मगदे लांगलं मुसलं शराः ॥१७३॥
शार्ङ्गं चैते क्रमाद्ध्येया विद्युत्तुहिनकुन्दभाः ।
पीतनीलसितारक्तसितगोक्षीरसन्निभैः ॥१७४॥
हरितालारुणाभैस्तु वस्त्रमाल्यानुलेपनैः ।
सर्वरत्नमयैर्युक्तैर्भूषणैरप्यलङ्कृताः ॥१७५॥
महाबला महावीर्यास्त्वेकवक्त्रा द्विबाहवः ।
एते तु नायकाः सर्वे स्वचिह्नाङ्कितमस्तकाः ॥१७६॥
दुष्टौघं तर्जयन्तश्च दक्षिणेन करेण तु ।
कटिमालम्ब्य वामेन स्वाग्रकैः सुसमैः स्थिताः ॥१७७॥
दृढव्रतो बहुशिरा महाकायो महाबलः ।
जितक्रोधो दुराधर्षो महोत्साहस्त्रिविक्रमः ॥१७८॥
अतुलो दुष्टहार्चिष्मान् सर्वदृग्दुरतिक्रमः ।
विषमो गहनोऽमोघप्पोडशोपप्रवेशदाः ॥१७९॥
शक्राग्निमध्यमारभ्य शक्रेशानान्तरावधि ।
शुक्लशोणसुवर्णालिपिङ्गरक्तसितासिताः ॥१८०॥
रक्तपीतातसीहेमशोणशुभ्रसितासिताः ।
वर्णानुरूपसद्वस्त्रमाल्यालेपनभूषणाः ॥१८१॥
नामानुरूपचारित्राः शंखमुद्गरधारिणः ।
सव्येतरक्रमेणैव प्रवेशकनिषेधकाः ॥१८२॥

क्षणाद्भुवनसंहारसृष्टिस्थितिकृतिक्षमा ।
उक्तानेतान् क्रमेणैव पूर्ववत्सम्प्रपूजयेत् ॥१८३॥
मुनयः सप्त पूर्वेन्ये गृहास्ताराादिकैर्वृता ।
जीमूताश्चाखिला नागास्त्वप्सरोगण उत्तम ॥१८४॥
ओषध्यश्चैव पशवो यज्ञाः साङ्गाखिलास्तु ये ।
सूक्ष्मरूपेण तिष्ठन्ति पूर्ववत्तत्समावृतौ ॥१८५॥
सम्भवः प्रभवश्चैव पूर्णः पुष्कर एव च ।
आनन्दो नन्दनश्चैव वीरसेनः सुषेणकः ॥१८६॥
तन्मुरयद्वारशाखास्थो द्वौ द्वौ दक्षिणवामयो ।
सम्भवः श्वेतवर्णस्तु प्रभवः कुन्दसन्निभः ॥१८७॥
पूर्णस्तु रक्तवर्णाभस्त्वतिरक्तस्तु पुष्करः ।
आनन्दः पीतवर्णस्तु हेमाभो नन्द उच्यते ॥१८८॥
कृष्णाभो वीरसेनस्तु सुषेणोऽञ्जनसन्निभः ।
मकुटाङ्गदचित्राङ्गा गदाहस्ता द्विनाहवः ॥१८९॥
चतुर्भुजा वा विप्रेन्द्रा । शङ्खचक्रगदाधरा ।
पूर्ववत्पाणिनान्येन मनेशार्तनिषेधका ॥१९०॥
दंष्ट्राकरालवदना निग्रहानुग्रहक्षमा ।
क्षेमकृच्छिन्नकृत्भाजो होमकृद्भूतभावनः ॥१९१॥
युगान्ताग्न्यशनश्चैव सवता भीषणस्तथा ।
सङ्क्रन्दनश्चानिमिषः शतपर्वा शतानन ॥१९२॥
औदुम्बरः प्रकृतिसो विरामश्चाशुमाल्यपि ।
औपदौवारिक लेतद्गणगोटकः क्रमात् ॥१९३॥
दडननादिसदृश वर्णनं षड्भुजान्वितम् ।
वामदक्षिणयोगेन पृष्ठतः पूर्वपश्चिमम् ॥१९४॥
नागमुद्गरपद्मा नगभयसमन्वितम् ।

नानावर्णस्नगुष्णीषवस्त्रालेपनभूषणम् ॥१९५॥
प्रागुक्तगुणशौर्याढ्यं सर्वकर्मकृतिक्षमम्।
तच्छोभाष्टकरक्षार्थं शतगन्धुर्विरोचनः ॥१९६॥
अप्रतर्क्यस्त्वनुल्लङ्घ्यस्त्वप्रमेयाभिधानकः।
अमर्षी च महाभूतश्चकोशस्तथाऽष्टमः ॥१९७॥
इन्द्राग्निमध्योपद्वारपार्श्वशोभास्त्वनुक्रमात्।
एकैकशः स्थिताः शूराः प्रवेशकनिषेधकाः ॥१९८॥
नीलपीतजपाश्यामसितहिङ्गुलकेन्दुभाः।
महाबला महावीर्याः सुदुर्लङ्घ्यपराक्रमाः ॥१९९॥
नानाविधाम्बरस्रग्भिर्भूषणैरनुलेपनैः।
अन्यैरनुपदिष्टैश्च यथाशोभमलङ्कृताः ॥२००॥
षाड्गुण्यमहिमायुक्ताश्चतुर्हस्ताः क्रमेण तु।
पृष्ठदक्षिणवामाभ्यां चक्रशङ्खसमन्विताः ॥२०१॥
गदाग्रोपरिविश्रान्तमुख्यहस्तद्वयान्विताः।
द्वारोपद्वारशोभेशानेतान् सम्पूजयेत्क्रमात् ॥२०२॥
विद्या चैवापराऽविद्या पावकश्चैव मारुतः।
चन्द्रार्कौ धारिवसुधे ख्याताः संसारदेवताः ॥२०३॥
सूक्ष्मरूपेण तिष्ठन्ति बाह्यावरणभूतले।
अमरेशो विरूपाक्षः सुधर्मिष्ठो नियामकः ॥२०४॥
सर्वसत्वाश्रयश्चेति गहनस्तदनन्तरम्।
महाराजेश्वरश्चापि धनाध्यक्षेश्वरस्तथा ॥२०५॥
एते गणेश्वरास्त्वष्टौ तन्मुख्यद्वारपालकाः।
ध्येयाश्चतुर्भुजाः सर्वे मुख्यपाणिद्वयेन तु ॥२०६॥
अमरेशादिरूपाद्यौ वज्रवेत्रलताकरौ।
पृष्ठगाभ्यां तु पाणिभ्यां चक्रशङ्खसमन्वितौ ॥२०७॥

कुङ्कुमाञ्जनसङ्काशो दंष्ट्र्या विकृताननौ ।
दक्षिणोत्तरयोगेन लाञ्छनव्यत्ययान्वितौ ॥२०८॥
द्वारदक्षिणवामस्थौ प्रवेशननिषेधकौ ।
सुधर्मिष्ठो नियन्ता च सुमितश्यामळप्रभौ ॥२०९॥
सुभीमदण्डहस्तौ च वज्रायुधविराजिनौ ।
यथाक्रमोदितानन्यान् धारयन्ता यथाविधि ॥२१०॥
सर्वसत्वाश्रयश्चातिगहन श्यामळ सित ।
किं तु पाशाङ्कशवेतौ पूर्ववद्भुजभूषितौ ॥२११॥
महाराजे वरो रक्तो धनाध्यक्षे वरोऽसित ।
शिशिरायुधसंयुक्ता विक्रमन्यद्यथा पुरा ॥२१२॥
महानला महावीर्यो दुष्टदोषक्षयङ्करा ।
दुर्निरीक्षाश्च दुर्धर्षा दैत्यदानवहिंसका ॥२१३॥
नानामहार्घवासोभि भूषणैरलङ्कृता ।
महर्षभ प्रभूत च गम्भीर प्राणगोचरम् ॥२१४॥
योगाङ्ग योगनिलय सनातनमशृङ्खलम् ।
तारकान्तरित तार निराम विपम तथा ॥२१५॥
दुरतिक्रम दुर्गाह च सुधूम्रमनिलाशनम् ।
तत्सालकोपद्वारेषु विन्यसेत्पूर्ववर्त्मना ॥२१६॥
उक्तोपद्वारपालाना वर्णत सममुज्ज्वलम् ।
गणषोडशक श्वेतचतुष्पाणिसमन्वितम् ॥२१७॥
गौणनामकराख्य तु मुख्यनामकरावधि ।
शम्बपट्टमहस्त च निषेधाभिनयाङ्कितम् ॥२१८॥
प्रवेशाभिनयाङ्क च नानावर्णाम्बरच्छदम् ।
नानास्थानकसयुक्त नानाभूषणभूषितम् ॥२१९॥

---

(१)दुरासम । इति—(पा)

अक्षसूत्रधरं वाथ प्रपन्नानां प्रवेशकृत् ।
निषेधकृत्तथान्येषां न्यस्तव्यं मुनिसत्तमाः ! ॥२२०॥
देवव्रत निरातङ्कं भीष्मं च पुरुषं तथा ।
उग्रं वीरेश्वरं रम्यमरिष्टं मुनिसत्तमाः ! ॥२२१॥
निर्विषण्णं युगान्तांशं शतानन्दं शताननम् ।
तेजोधरं विशालाक्षं युगांशं देवनन्दनम् ॥२२२॥
एतं द्विरष्टशोभासु गणमेकैकशो न्यसेत् ।
उपद्वारेशसदृशं वर्णतो लाञ्छनैर्विना ॥२२३॥
चतुर्भिः पाणिभिश्चैव पृष्ठदक्षिणपूर्वकम् ।
मुख्यदक्षिणहस्तान्तं शंखचक्रगदाधरम् ॥२२४॥
निषेधकृच्च पापानामपापानां प्रवेशकृत् ।
नानाखगन्धरोष्णीषभूषालेपाद्यलङ्कृताः ॥२२५॥
अनन्ताचिन्त्यविभवाः सर्वभूतसमाश्रयाः ।
नानाशस्त्रास्त्रकुशलाः नानाज्ञानसमन्विताः ॥२२६॥
निरस्तानेकदैत्येशाः साधूनां पालनोद्यताः ।
द्वारद्वयान्विते साले मुख्यद्वारगतावुभौ ॥२२७॥
तिष्ठतः सूक्ष्मरूपेण तदन्यद्वारपार्श्वयोः ।
प्राकारसर्वकोणेषु वह्निकोणादितो न्यसेत् ॥२२८॥
प्रभवाप्ययरूपाणां मूर्तीनां चतुरात्मनाम् ।
तथा मूर्त्यन्तराणां च तत्कान्तानामनुक्रमात् ॥२२९॥
मन्त्राणामस्त्रसंवादि तेषां रूपमनुस्मरन् ।
चतुर्णामपि कोणानामव्यक्तं भवनाद्बहिः ॥२३०॥
संयजेद्भवनाख्या वै यस्मात्तान्यो भवः स्मृतः ।
तेषां बहिः स्वमन्त्रेण दिक्क्रमेण तु हेतिराट् ॥२३१॥

१—हेतिपम् । इति—(पा)

स्वमरीचिगणेनैव भासयन्तं निवेश्य च ।
न्यस्यैवमर्चनं कुर्यान्मन्त्रमुद्रान्वितेन तु ॥२३२॥
निरीक्षणादिशुद्धेन अर्घ्यस्रक्चन्दनादिना ।
वासुदेवाभिधानस्तु देवः षाड्गुण्यविग्रहः ॥२३३॥
कर्मिणामुपकारार्थं प्रासादे स्थूलविग्रहम् ।
सर्वज्ञानक्रियाढ्यं च सर्वतत्त्वसमाश्रयम् ॥२३४॥
समास्थायानुगृह्णाति सदार्चान्तर्गतः प्रभुः ।
तस्मात्तदङ्गभूतेषु प्राकारेष्वष्टसु क्रमात् ॥२३५॥
पृथ्व्यादिबुद्धिनिष्ठं तु बाह्यतत्त्वाष्टकं न्यसेत् ।
प्रासादश्चाङ्गसंयुक्तः प्रकृतिस्त्रिगुणात्मिका ॥२३६॥
तद्गता प्रतिमा जीवस्तद्गतः परमः पुमान् ।
अतोऽधिदैवतान्यत्र तत्त्वान्येतान्यनुक्रमात् ॥२३७॥
सर्वत्र व्यापकत्वेन ध्यात्वा सम्पूजयेत्ततः ।
सर्वाधारमयेनैव सर्वसत्त्वाश्रयेण च ॥२३८॥
सर्वदोषविपक्षेण कालचक्राम्बुजेन तु ।
सम्पुटीकृत्य भवनं सप्राकारमधोर्ध्वतः ॥२३९॥
सम्पूज्य हार्दयीं मुद्रां चक्रमुद्रासमन्विताम् ।
प्रदर्श्य सर्वतो दिक्षु कवचेनावकुण्ठयेत् ॥२४०॥
एकमूर्तिविधाने च तत्तद्द्वारभूषिते ।
सकलेऽथ विधानस्याद्विव्यूहपरिनिष्ठिते ॥२४१॥
चतुर्द्वारान्विते गेहे दिग्द्वारारम्भमण्डपे ।
सर्वतोभद्रमाले च अथवैवार्चनेऽपि च ॥२४२॥
सप्तदेशधर्मान्ये द्वारद्वितयान्विते ।
द्वारपालगणन्यासे विशेषोऽथ प्रकाश्यते ॥२४३॥
चण्डाद्याश्च सुभद्रान्ता प्रागाद्द्वारचतुष्टये ।

न्यसनीयाः क्रमेणैव पूर्ववद्द्वयोगतः ॥२४४॥
द्वारोर्ध्वोदुम्बरद्वन्द्वद्वितयस्था यथाक्रमम् ।
लक्ष्मीः कीर्तिर्जया माया देव्यः प्रागुक्तलक्षणाः ॥२४५॥
सत्य. सुपर्णो गरुडस्ताक्ष्यन्त्वग्रेषु संस्थिताः ।
अनिवर्ती महावृत्तिर्दर्पहा सर्वजित् स्थिरः ॥२४६॥
जयन्तो भयकृन्मानी त्वष्टमो द्विजसत्तमाः ! ।
दिगग्रमण्टपद्वारशाखापार्श्वे समास्थिताः ॥२४७॥
अनिवर्ती महावृत्तिः कृष्णाभः शुकसन्निभः ।
दर्पहा सर्वजिच्चैव पाण्डुरक्तसुवर्णभौ । ॥२४८॥
स्थिरो जयन्तः सततं श्यामाञ्जनसमद्युती ।
भयकृच्चैव मानी च पिङ्गलः पाण्डुरोज्वलः ॥२४९॥
द्विभुजाः सर्व एवैते दक्षिणेन करेण तु ।
नन्दकं शंखमन्येन दधानाः क्रूरविक्रमाः ॥२५०॥
यदा चतुर्भुजा ध्येयास्तदा चैते गणेश्वराः ।
तुल्यदक्षिणहस्तेन खड्गवेललतान्विताः ॥२५१॥
तथा वामकरे शंखं पृष्ठगे दक्षिणादितः ।
पाणिद्वये चक्रपद्मे बिभ्रतो ज्वलनप्रभाः ॥२५२॥
नानावस्त्रस्रगुष्णीषभूषणालेपनान्विताः ।
व्यत्यस्तहस्तचरणा लाञ्छनव्यत्ययान्विताः ॥२५३॥
ऊर्जितश्चामृताङ्गस्तु सर्वाङ्गः सर्वतोमुखः ।
शुभाङ्गो वरदश्चैव वागीशः शब्दविक्रमः ॥२५४॥
पाञ्चजन्यविशेषा हि द्वौ द्वौ चैव क्रमात् स्थितौ ।
सर्वतोभद्रसालस्थचतुर्द्वारेषु पूर्ववत् ॥२५५॥
द्विबाहवस्तु संस्मर्याः दक्षिणेन करेण तु ।
गृहीतमुसलाः सर्वे शंखमन्येन पाणिना ॥२५६॥

दधानाश्चैव चत्वार पूर्वे बन्धूकसन्निभा ।
अन्ये परभृताभास्तु सर्वभूषणभूषिता ॥२५७॥
बलेन महता क्षिप्तदेवासुरमहोरगा ।
एकवीरासहायाश्च अप्रयत्नेन लीलया ॥२५८॥
आब्रह्मभवन शश्वत्परिवर्तयितु क्षमा ।
विश्वेशो विश्वकृद्विश्वो विश्वात्मा विश्वलोचन ॥२५९॥
विश्वपादो विश्वभुजस्तथा वै विश्वकर्मकृत् ।
एते द्वितीयसालस्य द्वारेषु नियामका ॥२६०॥
द्विशाह्व परिज्ञेया वामदक्षिणयोगत ।
गदाखड्गास्त्रसंयुक्ता करण्डमकुटान्विता ॥२६१॥
शोणपिङ्गसितश्यामा रक्तपीतसितासिता ।
सर्ववर्णाम्बरालेपस्रग्भूषाभिर्विराजिता ॥२६२॥
एकवीरासहायाश्च सर्वदोषनिवारका ।
तद्द्वारान्तरभागेषु वामदक्षिणयोगत ॥२६३॥
प्रासादाभिमुखान्यस्येन्निधिनायेश्वरान् क्रमात् ।
शङ्खपद्मौ महापद्ममतधामाभिधौ तत ॥२६४॥
अखण्डित सन्ततश्चानन्तधार इति श्रुत ।
सर्वद्वार इति ख्यात प्रथमो पूर्वमीरितो ॥२६५॥
अन्येषा वक्ष्यते पञ्चा वर्णरूपादिक क्रमात् ।
रक्त कृष्ण सुवर्णाभ सितारुणतमालभा ॥२६६॥
शङ्खपद्मनिधीशोरुकर्मलक्षणलक्षिता ।
वसुरत्नसुवर्णादिरौप्यधान्यधनाधिपा ॥२६७॥
सर्वार्थनिधिनानान्निधामूर्ते गुह्यात्मना ।
सर्वेन्द्राग्रयुता स्वाश्रिताभिमतप्रदा ॥२६८॥
तत तृतीयावरणद्वारेषु द्वन्द्वयोगत ।
सर्पिणीजगम्या तु नागाख्या विन्यसेत्क्रमात ॥२६९॥

पुरतश्चक्रगरुडौ हलतालौ तु दक्षिणे ।
पश्चिमे शार्ङ्गमकरौ सौम्ये नन्दकऋश्यकौ ॥२७०॥
चक्रपक्षीशसीराणां शङ्खनन्दकयोरपि ।
स्वेषु स्थानेषु पूर्वोक्तं वर्णरूपादिकं द्विजाः ! ॥२७१॥
अन्येषां तालपूर्वाणां त्रयाणामथ वक्ष्यते ।
तालो ध्वजः स्याद्भूतादिबालरूपाभिमानकः ॥२७२॥
झषः सर्वाङ्गनिर्भृतो जगद्बीज उदाहृतः ।
ससर्वोपद्रवो ऋश्यः संसारश्चपलात्मकः ॥२७३॥
एतान् सूक्ष्मस्वरूपेण ध्यात्वा सम्पूजयेत्क्रमात् ।
गङ्गा च यमुना गोदा नदी च महती तथा ॥२७४॥
वितस्ता नर्मदा चैव जम्ब्वाख्या च सरस्वती ।
नद्यश्चतुर्थसालस्य दिग्द्वारेषु क्रमात् स्थिताः ॥२७५॥
गङ्गायमुनयोरुक्तं वर्णरूपादिकं पुरा ।
ताभ्यामन्याः समानास्तु वर्णशोभां विनैव तु ॥२७६॥
सितारुणाः सितस्वर्णसितकुन्दसमप्रभाः ।
प्रमत्तप्रौढवेषाश्च नानाभरणभूषिताः ॥२७७॥
सर्वधातुविचित्राङ्गाः सर्वरत्नविराजिताः ।
सुधाकुम्भधरा द्वाभ्यां कराभ्यां पूर्ववच्च ताः ॥२७८॥
एवं दिग्द्वारभवनद्वार्स्थस्थितिरुदाहृता ।
एकमूर्तेषु दिङ्मूर्तेः प्राकारेषूर्ध्वगेषु च ॥२७९॥
द्वारादयस्तदीयाश्च सामान्याः समुदाहृताः ।
सर्वमाल्प्रतीहारशाखापार्श्वगतावुभौ ॥२८०॥
ध्येयौ वा स्थापनीयौ वा बाह्याहारगतौ यदि ।
यथोक्तलक्षणोपेतौ स्थापनीयौ यथाक्रमम् ॥२८१॥
एवमावरणेशानान् ध्यात्वा संस्थाप्य चार्चयेत् ।

ध्यानोत्था पीठदेशेषु स्वाकारास्मसु सद्मसु ॥२८२॥
तदर्थमङ्कणक्षेत्रं त्रिधा वा पञ्चधा भजेत् ।
त्रिभागमेकभागं वा त्यक्त्वा तन्मध्यतो बहि ॥२८३॥
पीठ वायतन कुर्यात्सर्वदिक्ष्वन्तरेऽथ वा ।
अधरोत्तरनिष्ठाभ्यां प्रागुक्ते पूर्ववत् स्थिते ॥२८४॥
शिलेष्टकादिभि क्लसा पीठिका हस्तविस्तृता ।
तदर्धेनोच्छ्रिता सर्वा सर्वालङ्कारशोभिता ॥२८५॥
चतुरश्रा सुवृत्ता वा सम्पूज्या वाथ केवला ।
ग्रामादिवास्तुदेवाना स्वदिग्भागगतेषु च ॥२८६॥
गोमयादिविलिप्तेषु मण्डलेषु बलिं हरेत् ।
विस्तारोच्छ्रायमानाद्वै पीठा प्रागुक्तलक्षणा ॥२८७॥
अर्धमानेन वा कार्या रथयात्राऽविरोधत ।
एवमावरणेशाना पीठेषु स्वासु दिक्षु च ॥२८८॥
दुष्टदोषनिरासार्थं प्रासादाभिमुख स्थिता ।
चतु स्थानावतीर्णस्य द्वारे च यजनालये ॥२८९॥
स्थापन गणनाथाना शृणुध्व मुनिपुङ्गवा ।
वास्तुक्षेत्रेऽग्रसञ्ज्ञौ द्वौ प्राग्द्वारे पूर्ववत् स्थितौ ॥२९०॥
लक्ष्मी कीर्तिर्जया माया द्वारेषूर्ध्वस्थिता क्रमात् ।
पद्मनाभादयो देवा द्वौ द्वौ दिग्द्वारशाखयो ॥२९१॥
प्रागादिद्वारकुम्भेषु सम्भवप्रभवादय ।
कुमुदाद्यष्टक च भूतानामष्टक परम् ॥२९२॥
द्वारान्तर्युग्मयुक्त्या तु भ्रमणक्रियमाश्रितम् ।
सुपर्णश्चक्रसम्पूर्ण सत्यं यशोदयी द्विजा ॥२९३॥
योनर्नाया क्रमेणैव द्वारणामग्रभूतले ।
हेमदण्डगत मय दि तु पश्चिमदिग्गत ॥२९४॥

चण्डाद्याश्च सुभद्रान्ता द्वौ द्वौ प्रागादिषु द्विजा [1] ।
दक्षिणोत्तरयोगेन तोरणस्तम्भमूलगा ॥२९५॥
चक्रद्वितयमध्यस्थ पक्षीशस्तोरणोपरि ।
तत्पार्श्वयो स्थित चक्र नानावर्णपताकयो ॥२९६॥
सत्यादिक चतुष्क तु मध्यवेद्या ध्वजाष्टके ।
प्रभवाप्यययोगेन पूज्य प्रागादियोगत ॥२९७॥
इन्द्रादिलोकपालास्ते सिद्धसाधपुर सरा ।
वज्रादयस्तदस्त्राश्च स्थापु दिक्षु बहि स्थिता ॥२९८॥
मुख्यकल्पेऽथ वान्येषु निमित्तेष्वेवमाचरेत् ।
अनुकल्पेऽथ चण्डादीन् वास्तुनाथादिपूर्वकम् ॥२९९॥
द्वारेषु केवलान्यस्य गरुडान्त प्रपूजयेत् ।
सर्वद्वारेषु वा पूज्य सहेतीश पतत्रिर ॥३००॥
विविधासु प्रतिष्ठासु जीर्णोद्धारविधावपि ।
महोत्सवेषु सर्वेषु ध्वजारोहणकर्मणि ॥३०१॥
मङ्गळाङ्कुररोपे च पवित्रारोहणादिषु ।
तथा चानन्तरन्नाद्यभिषेकविधावपि ॥३०२॥
प्रायश्चित्तेष्वनित्येषु काम्येष्वपि च नित्यश ।
मुख्यकल्पोक्तविधिना कुर्यादन्यत्र चान्यथा ॥३०३॥
सिद्धसवास्तथेन्द्राद्यास्तदस्त्राश्च यथाक्रमम् ।

१– पक्षीशस्तोरणोपरि ।
सुसितासु पताकासु मध्यस्थो विहगाधिप ॥
सुपर्ण शोणवर्णासु गरुड पिङ्गलासु च ।
गजपाषाणवर्णासु तार्क्ष्यगन प्रतिष्ठित ॥
नानावर्णपताकाया सम्पूज्यो विहगेश्वर ।
इन्द्रादिलोकपालान्ते (पा)

लोकदिक्पालकास्त्वेते स्वसेनाभिः समावृताः ॥३०४॥
प्रसिद्धप्राग्वशेनैव नित्य स्व स्थानमाश्रिता ।
दिक्पालकत्वादासृष्टेर्यतस्तेषा स्थितिः स्थिरा ॥३०५॥
भगवन्मन्त्रमूर्तीनामनन्ताना मुनीश्वरा ! ।
स्वस्थानस्था नमस्यन्ति पूजयन्ति जपन्ति च ॥३०६॥
ध्वजाद्यैरुपचारैश्च सम्यक् परिचरन्ति च ।
कैवल्यसिद्धये शश्वद्दुभि स्वानुगै सह ॥३०७॥
पालयन्ति च भक्ताना बलमोजो ददन्ति च ।
ध्वसयन्ति च विघ्नौघमनिश मन्त्रयाजिनाम् ॥३०८॥
सरक्षन्ति फल मान्त्र वर्धमान त्रिलक्षणम् ।
अधिकारमनादाय शक्तिबीज जगत्प्रभो ॥३०९॥
दिक्सिद्धये दशत्व तद्यत्फर्येऽष्टदिशात्मना ।
बाह्यत्रिसालभूमिष्ठा मालाद्या भवदेवता ॥३१०॥
तस्मान्मत्वात्पूर्वोक्तदिग्भागे नियता सदा ।
वज्रनाभादयो देवा लोकदिग्द्वारपालका ॥३११॥
तथाऽमरेशपूर्वाश्च सम्भवप्रभवादय ।
प्रसिद्धप्राक्क्रमेणैव दिग्द्वारेषु स्थिता क्रमात् ॥३१२॥
कालाद्यमष्टक नित्यमिन्द्राद्य रुद्रपश्चिमम् ।
नियन्ता कालनन्तान्ते तदन्ते सुस्थित वियत् ॥३१३॥
क्रमात्पूर्वोत्तरे कोणे स्थमेद्दक्षिणपश्चिमे ।
विद्याऽविद्याद्वय यद्व स्वपदस्थेऽभिमारते ॥३१४॥
चन्द्रादित्यावुदस्याम्यस्थानयोर्विनिवेद्य च ।
प्रत्याग्भागगत तोय प्राग्भागे विन्यसेद्धराम् ॥३१५॥
कुमुदाद्यान्तनाना लोहिताक्षाद्वयस्तथा ।
वज्रनाभादिक प्रकरस द्वारपाल लिखेदकम् ॥३१६॥

द्वारपालगणास्त्वेते सालकोणगतास्तथा ।
प्रोक्तक्रमेण तिष्ठन्ति भगवत्प्रागपेक्षया ॥३१७॥
कुमुदादिगणेशानाः पुरग्रामादिवास्तुनि ।
पालिकावसथे चैव दिक्पालोक्तवशास्स्थिताः ॥३१८॥
त्रिसन्ध्यमेव देवानां बलिदानं समाचरेत् ।
सङ्कल्पितेषु सालेषु द्वारावरणवासिनाम् ॥३१९॥
असङ्कल्पितसालोक्तदेवानां नाचरेद्बलिम् ।
सचान्निर्माणकाले तान् प्रतिष्ठाप्य यथाविधि ॥३२०॥
देवयात्रासमेतन्तु बलिदानं समाचरेत् ।
एवं सर्वं समापाद्य महापीठोर्ध्वभूतलम् ॥३२१॥
प्रक्षाळितं समारुह्य प्राङ्मुखो वाप्युदङ्मुखः ।
तदूर्ध्वाम्बुजदिक्पत्रे कुमुदादीनथान्तरे ॥३२२॥
सर्वभूतान्पारिषदानाहूय ग्रहसंज्ञितान् ।
सम्पूज्य सोदकं तत्र बलिशेषं समुत्किरेत् ॥३२३॥
पश्चादाचम्य विधिवत्स्नात्वा वा संविशेद् गृहम् ।
सर्वद्वारावृतीशानां कोणस्थानां समर्चने ॥३२४॥
नतिप्रणवसंयुक्तः स्वनाम्ना मन्त्र ईरितः ।
महापीठस्थभूतानां पार्षदानां महात्मनाम् ॥३२५॥
तारान्ते विष्णुशब्दं च नियुञ्ज्यादुदितक्रमात् ।
सर्वकोणगता मन्त्राः फडन्ताः समुदीरिताः ॥३२६॥
सर्वे समुदिता मन्त्राः स्वाहान्ता होमकर्मणि ।
ध्यात्वैवमर्च्य तन्मन्त्रैरर्घ्याद्यैरुपचारकैः ॥३२७॥
दर्शयेदावृतीशानां मुद्रां तर्जनिसंज्ञिताम् ।
द्वारपालगणानां तु चण्डाद्युक्तमनन्तरम् ॥३२८॥
धर्माद्यावरणादूर्ध्वं हेतुना येन केन चित् ।

बलिदानमशक्य चेत्तत्रत्याना यथाक्रमम् ॥३२९॥
सर्वतोभद्रपूर्वेषु द्विगुणीकृत्य चाचरेत् ।
मुख्यकल्पे तथान्यत्र यथाशक्त्यावृतिक्षितौ ॥३३०॥
तद्वाह्यावृतिदेवानामावृत्त्यावृत्त्य तर्पयेत् ।
द्वारोपद्वारपालाना तस्मिन् द्वारे समर्पयेत् ॥३३१॥
महापीठोदिताना च तद्वाराग्रकमण्डले ।
ध्यानोत्थाना त्वसञ्चारे न दोष केन हेतुना ॥३३२॥
तत्तदावरणद्वारदेशेषूक्तक्रमेण तु ।
द्रव्यमूर्तिगताना च सञ्चार स्यादनिष्टक ॥३३३॥
एवमावृतिदेवाना त्रिसन्ध्य बलिमाचरेत् ।
नित्योत्सवार्थं बिम्बस्य सन्निधौ तत्समाचरेत् ॥३३४॥
नृत्तगेयादिसयुक्त वेदघोषसमन्वितम् ।
द्वारावरणदेवाना ध्यानादीत्थ प्रकाशितम् ॥३३५॥
एव हि बलिदानान्त यत्र पूजा समाचरेत् ।
तत्र देवस्य सान्निध्य नैरन्तर्येण सिद्ध्यति ॥३३६॥
एव कालत्रये कुर्यात्पूजन देशिकोत्तम ।
न च कालत्रयान्न्यून पूजन विहित सदा ॥३३७॥
प्रासादेषु स्वयव्यक्तपूर्वेषु द्विजसत्तमा ! ।
कालत्रय प्रधान स्यात्तदूर्ध्वं कर्तुरिच्छया ॥३३८॥
विभवापेक्षया चैव वर्धयेत यथाक्रमम् ।
यावत् द्वादशम कालस्तावद्वै मुनिपुङ्गवा ! ॥३३९॥
श्रेष्ठ प्रभातकाल स्यात् त्रिषु कालेषु वै पुन ।
यथावन्मन्त्रविन्यासमात्मन परदेहयो ॥३४०॥
द्याग स्यानमशुद्धि सायामा भौतिकी सत ।
नित्य प्रभातिके कुर्यादन्यत्रेच्छानुरूपत ॥३४१॥

स्नपनं बलिदानं च कुर्यात्कालत्रये सदा ।
मूर्तेरासनपूजा तु कार्या कालचतुष्टये ॥३४२॥
पञ्चकाले भवेन्न्यासः षट्काले हवनक्रिया ।
अत ऊर्ध्वेषु कालेषु जपान्तं पूजनं भवेत् ॥३४३॥
अलङ्कारासनाद्यं च पूर्ववत्क्रमयोगतः ।
विनोक्तेन प्रकारेण ह्यन्यथा न समाचरेत् ॥३४४॥
मुख्यकल्पे तु होमान्तं नित्यनैमित्तिकात्मिकाम् ।
पूजां क्रमेण वै कुर्यात्तत्तद्धोमावसानिकाम् ॥३४५॥
अनुकल्पे तु जप्यान्तं यागानन्तरितेषु च ।
यागेषु हवनान्तेषु नित्यनैमित्तिकादिषु ॥३४६॥
तत्तद्यागं जपान्तं च क्रमात्कृत्वा ततः परम् ।
तत्तद्धोमं मुनिश्रेष्ठाः ! क्रमात्कुर्याद्यथाविधि ॥३४७॥
अनुकल्पेषु यागेषु ह्युपकालोदितेषु वै ।
आसनार्घ्ये ततः पाद्यमाचामं सप्रतिग्रहम् ॥३४८॥
गन्धं माल्यं तथा दीपं धूपं मात्रां क्रमेण तु ।
दत्वा भोज्यावसानं तु क्रमाद्द्याद्विधानतः ॥३४९॥
इत्येवमर्चनविधिः साङ्गोपाङ्गः प्रदर्शितः ।
इतोऽन्यच्छ्रोतुमिच्छा चेत्कथ्यतां मुनिपुङ्गवाः ! ॥३५०॥

इति श्रीपाञ्चरात्रे ईश्वरसंहितायां
द्वारावरणदेवतालक्षणादिविधिर्नाम
नवमोऽध्यायः

अथ दशमोऽध्यायः ।

मुनयः ।

भगवन्मुनिशार्दूल ! सर्वज्ञ ! वदतां वर ! ।
नित्यार्चनादिकं सर्वं श्रुतं त्वत्तः सविस्तरम् ॥१॥
महोत्सवाद्युत्सवांस्तु सांप्रतं वक्तुमर्हसि ।

नारदः ।

अथातः संप्रवक्ष्यामि महोत्सवविधिक्रमम् ॥२॥
सव इत्युच्यते दुःखं विद्वद्भिर्मुनिपुङ्गवाः ! ।
उद्धृतः स सवो यस्मात्तस्मादुत्सव उच्यते ॥३॥
नित्यो नैमित्तिकः काम्यस्त्रिविधः स महोत्सवः ।
वत्सरे वत्सरे यस्तु क्रियते स तु नित्यकः ॥४॥
भूमिकम्पे दिशां दाहे महोत्पातेषु सत्सु च ।
दुर्भिक्षे व्याधिते राष्ट्रे तथान्ये शत्रुसङ्कटे ॥५॥
अनावृष्टौ च सर्वत्र नक्षत्रपतने च खात् ।
हसने भगवन्मूर्तेरङ्गानां चलने सति ॥६॥
रोदने चासनाद्बिम्बे परिभ्रमति सत्तमाः ! ।
व्यत्यासे शशिसूर्यस्य तथान्येष्वेवमादिषु ॥७॥
शान्त्यर्थं यत्प्रकुर्वीत स नैमित्तिक उच्यते
चतुर्णां पुरुषार्थानामुद्दिश्यान्यतमं फलम्
उत्सवोऽनुष्ठितः काम्यः सङ्कल्पितफल॰
ज्योतिश्शास्त्रेषु दृष्टर्क्षेण सह
पूर्वं कृत्वा यथाशास्त्रं तीर्थम्
तीर्थयात्रानुसारेण ध्वजारोह

मन्त्रमूर्तिप्रतिष्ठानकाल एव मुनीश्वराः ! ।
प्रासादस्य शिखाग्रे तु स्थापितः खगराड्ध्वजः ॥११॥
हेतिराजसमायुक्तो यत्र यत्र सदा द्विजाः ! ।
विना त्वन्यध्वजारोहमुत्सवं परिकल्पयेत् ॥१२॥
तत्राप्यन्यध्वजारोहं कुर्याद्वा विभवे सति ।
कुर्यादुत्सवमन्यत्र ध्वजारोहणपूर्वकम् ॥१३॥
नवाहं दैविकं प्रोक्तं सप्ताहं मध्यमं भवेत् ।
पञ्चाहमधमं विद्यात् त्रिविधं चोत्सवं स्मृतम् ॥१४॥
तत्र तावत्प्रवक्ष्यामि नवाहस्य विधिक्रमम् ।
ध्वजाधिवासपूर्वेद्युः देशिको मन्त्रवित्तम. ॥१५॥
स्नायाद्वपनपूर्वं तु भगवद्यागसिद्धये ।
निशामुखे प्रवृत्ते तु आचार्यो मूर्तिपैः सह ॥१६॥
स्नानादिनित्यनियमान् कृत्वा चैव यथाविधि ।
भूषणैर्विविधैर्वस्त्रैर्नूतनैश्च विभूषितः ॥१७॥
सितोष्णीषोत्तरीयश्च चित्रमाल्यैरलङ्कृतः ।
प्रविश्य देवसदनं यजमानसमन्वितः ॥१८॥
नित्यार्चनावसाने तु वैष्णवान् द्विजसत्तमान् ।
षट्कर्मनिरताश्चैव पञ्चकालपरायणान् ॥१९॥
समभ्यर्च्य ततस्तेभ्यो ह्यनुज्ञां प्रतिगृह्य च ।
विष्वक्सेनं समभ्यर्च्य यागविघ्नप्रशान्तये ॥२०॥
पश्चात्स्वदेहशुद्ध्यर्थं पुण्याहं वाचयेद्गुरुः ।
प्रकल्प्य भूतले शुद्धे धान्यपीठं यथाविधि ॥२१॥
विन्यस्य मङ्गलं कुम्भं सम्पूर्णं गन्धवारिणा ।
रत्नहाटककूर्चस्रग्वस्त्रपल्लवसंयुतम् ॥२२॥
चन्दनाद्युपलिप्तं च परितश्चाप्यर्चितम् ।

तत्कुम्भस्य चतुर्दिक्षु चतुरो मूर्तिपान्न्यसेत् ॥२३॥
अद्भिर्गन्धैस्तथा पुष्पैरक्षतैर्दक्षिणादिभि ।
तोषयित्वा तु तान् सर्वान् तत कुम्भे सुदर्शनम् ॥२४
समावाह्य समभ्यर्च्य ध्यायमानोऽच्युत हृदि ।
दर्भै स्पृशस्तु कलश ब्राह्मणै सह देशिक ॥२५॥
ॐकाराद्य पवित्रान्त मन्त्राणा प्राक्चतुष्टयम् ।
पाठयेच्च सपुण्याह गायत्रीत्रितयान्वितम् ॥२६॥
ततश्चात्मानुवाद च आत्मव्यूह तथैव च ।
ततश्च शुद्धिमन्त्रांस्तु पठेदेव समाहित ॥२७॥
शुद्धयेस्तु परो देवो वासुदेवोस्तु शुद्धये ।
सङ्कर्षण शुद्धयेस्तु प्रद्युम्नश्चास्तु शुद्धये ॥२८॥
शुद्धयेस्त्वनिरुद्धोपि केशवश्चास्तु शुद्धये ।
नारायणोस्तु विश्वेश शुद्धये सर्वकर्मसु ॥२९॥
शुद्धये माधवश्चास्तु सर्वलोकहिते रत ।
गोविन्द शुद्धये चास्तु परमात्मा सनातन ॥३०॥
शुद्धये विष्णुरस्त्वाद्य शुद्धये मधुसूदन ।
सर्वलोकहितो देव शुद्धयेऽस्तु त्रिविक्रम ॥३१॥
वामन शुद्धये चास्तु श्रीधरोऽप्यास्तु शुद्धये ।
शुद्धयेऽस्तु हृषीकेश पद्मनाभोऽस्तु शुद्धये ॥३२॥
सदा दामोदरो देव शुद्धयेऽस्तु जगत्पति ।
शुद्धये पद्मनाभोऽस्तु शुद्धयेऽस्तु सदा ध्रुव ॥३३॥
अनन्त शुद्धये चास्तु शक्त्यात्मा चास्तु शुद्धये ।
सर्वकर्मसु चैवास्तु शुद्धये मधुसूदन ॥३४॥
सदा विद्याधिदेवोऽस्तु शुद्धये कपिलस्तथा ।
शुद्धये विश्वरूपोऽस्तु शुद्धयेऽस्तु विहङ्गम ॥३५॥

क्रोडात्मा शुद्धये चास्तु शुद्धये वडवानन. ।
शुद्धयेऽस्तु सदा धर्मश्चास्तु वागीश्वरस्तथा ॥३६॥
देव एकार्णवशयः शुद्धयेऽस्तु निरन्तरम् ।
शुद्धयेऽस्तु सदा देवः कूर्मः पाताळधारकः ॥३७॥
वराहः शुद्धये चास्तु नारसिंहोऽस्तु शुद्धये ।
अमृताहरणश्चास्तु शुद्धये सर्वकर्मणाम् ॥३८॥
श्रीपतिः शुद्धये चास्तु शान्तात्मा चास्तु शुद्धये ।
शुद्धये राहुजिच्चास्तु कालनेमिघ्न एव च ॥३९॥
पारिजातहरश्चास्तु लोकनाथोऽस्तु शुद्धये ।
सर्वत्र शुद्धये चास्तु दत्तात्रेयो महाप्रभु. ॥४०॥
न्यग्रोधशायी भगवान् शुद्धये चास्तु सर्वदा ।
एकशृङ्गतनुश्चास्तु वामनश्चापि शुद्धये ॥४१॥
त्रिविक्रमः शुद्धयेऽस्तु शुद्धयेऽस्तु नरः सदा ।
नारायणः शुद्धयेऽस्तु हरिः कृष्णश्च शुद्धये ॥४२॥
ज्वलत्परशुधृग्रामः शुद्धयेऽस्तु धनुर्धरः ।
रामश्च शुद्धये चास्तु वेदविद्भगवांस्ततः ॥४३॥
शुद्धयेऽस्तु सदा कल्की सर्वदोषक्षयंकरः ।
शुद्धयेऽस्तु सदा देवः पाताळशयनः प्रभुः ॥४४॥
शुद्धये सन्तु सर्वेषां सर्वे सर्वत्र सर्वदा ।
एते सर्वे सदा देवाः शान्तये सन्तु पूजिताः ॥४५॥
ऋद्धये पुष्टये सन्तु सिद्धये भक्तयेऽपि च ।
शिवाय मुक्तये सन्तु शुद्धये सर्वकर्मणाम् ॥४६॥
मन्त्राणां देशिकानां च स्नानानामपि सर्वदा ।
पुत्रमित्रकलत्राणां दासीदासगवामपि ॥४७॥
वेदनाग्न्यागमादीनां सनातामिष्टमप्रदाम् ।

मनोरथानां सर्वेषां हितानां स तु सर्वदा ॥४८॥
आयुष्यारोग्यमैश्वानां धनधान्यादिसम्पदाम् ।
पुण्यानामणिमादीनां गुणानां श्रेयसामपि ॥४९॥
राज्ञो जनपदस्यापि यजमानस्य मन्त्रिणाम् ।
वैष्णवानां विशेषेण परत्र हितमिच्छताम् ॥५०॥
पञ्चकालविशुद्धानां सत्त्वस्थानां शुभात्मनाम् ।
स्वस्त्यस्तु च शिवं चास्तु शुभं चास्तु पुनः पुनः ॥५१॥
अविघ्नमनिशं चास्तु दीर्घमायुष्यमस्तु वै ।
समाहितं मनश्चास्तु सम्पदश्चोत्तरोत्तरम् ॥५२॥
पुण्याहं शुद्धये चास्तु वासुदेवादिमूर्तयः ।
शङ्खचक्रगदापद्मयुक्तः सर्वेश्वरः ॥५३॥
प्रीयतां भगवान् देवो लाङ्गली प्रियतां सदा ।
प्रद्युम्नः प्रीयतां नित्यमनिरुद्धः सुरेश्वरः ॥५४॥
नारायणः सुरेशोऽपि कर्मणां पूरणाय च ।
न्यूनाधिकानां शान्त्यर्थं प्रीयतां प्रीयतां विभुः ॥५५॥
पुण्याहं स्वस्ति ऋद्धिं च सवाच्य सह मूर्तिपैः ।
तदाद्धि शतवारेण स्वामानीत्यादिकेन च ॥५६॥
आत्मानं प्रोक्षयेत्पश्चाद्देशिकः स्वात्मशुद्धये ।
एवं सर्वेषु योगेषु कुर्यात्पुण्याहवाचनम् ॥५७॥
गोहिरण्यादिदानैश्च शुद्धिं प्राप्याथ देशिकः ।
देवस्य सन्निधिं गत्वा ह्युपविष्टस्तथासने ॥५८॥
सायामौ भूतसंशुद्धिं धारणाभ्यां समाचरेत् ।
देहविन्यस्तमन्त्रोऽथ मानसं यागमाचरेत् ॥५९॥
मन्त्रासने ततो देवं समभ्यर्च्य यथाविधि ।
स्नानासनं ततो नीत्वा स्नापयेन्मन्त्रविग्रहैः ॥६०॥

देवस्य पुरतो भूमिं स्नपनार्थं यथाविधि ।
त्रेधा विभज्य कोष्ठानां नवके द्विजसत्तमाः! ॥६१॥
धान्यपीठादिकं कृत्वा कलशानधिवास्य च ।
पाद्यमर्घ्यं तथाऽऽचामं सर्वौषधिजलं तथा ॥६२॥
प्रागाद्युत्तरपर्यन्तं न्यसेत्कोष्ठचतुष्टये ।
दधि क्षीरं मधु घृतमाग्नेयादिषु विन्यसेत् ॥६३॥
शुद्धाम्भःकलशं मध्ये विन्यस्य तदनन्तरम् ।
हरिद्राचूर्णकुम्भं तु तेषां च पुरतो न्यसेत् ॥६४॥
पुण्याहं वाचयित्वा तु प्रोक्षयेत्तज्जलैस्तु तान् ।
प्रागादिदिक्षु विन्यस्तकुम्भेषु प्रभवक्रमात् ॥६५॥
चतुरो वासुदेवादीन् विदिक्स्थकलशेषु तु ।
ईशादिवह्निपर्यन्तं तानेवाप्यययोगतः ॥६६॥
मध्ये शुद्धोदकलशे यजेन्नारायणं विभुम् ।
अर्घ्यालभनपुष्पैश्च धूपेन मुनिपुङ्गवाः! ॥६७॥
हरिद्राचूर्णकुम्भे तु श्रियं देवीं समर्चयेत् ।
स्नानासनोदितैर्भोगैर्मधुरलेपान्तिमैः क्रमात् ॥६८॥
सम्पूज्य देवदेवेशं कुम्भैः संस्नापयेत्ततः ।
प्रथमं विष्णुगायत्र्या तथेदंविष्णुरित्यृचा ॥६९॥
ततर्म्मीणिपदाद्येन विष्णोः कर्माणि मन्त्रतः ।
प्रागादिदिक्षु विन्यस्तैः पाद्याद्यैः स्नापयेत्क्रमात् ॥७०॥
दधिक्राविण्णमन्त्रेण आप्यायस्वेति मन्त्रतः ।
मधुवातेति मन्त्रेण ततः शुक्रमसीत्यृचा ॥७१॥
विदिक्षु न्यस्तकलशैर्गन्धाद्यैः स्नापयेद्विभुम् ।
श्रीसूक्तेन ततो देवं हारिद्रेण विलेपयेत् ॥७२॥
ततः पुरुषसूक्तं तु पठद्भिर्ब्राह्मणैः सह ।

सहस्रधारया देव शुद्धोदेनाभिषेचयेत् ॥७३॥
प्रतिद्रव्य तु वस्त्रेण ह्यर्घ्यालभनमाल्यकै ।
धूपेन च समभ्यर्च्य ततस्तेनाभिषेचयेत् ॥७४॥
यद्वार्घ्यपाद्यमाचाम गन्धस्रग्धूपदीपकम् ।
नैवेद्य चार्पयेत्सर्वं केवल चार्घ्यमेव च ॥७५॥
ततो नीराजनादींश्च कृत्वा देवस्य पूर्ववत् ।
अलङ्कारासन नीत्वा आसनादिक्रमाद्यजेत् ॥७६॥
भोगै सास्पर्शिकै प्राग्वद्विविधैरौपचारिकै ।
हृदयङ्गमसञ्ज्ञैश्च समभ्यर्च्य यथाविधि ॥७७॥
स्तुत्वा स्तोत्रैर्गीतताद्यै प्रणमेद्देशिको विभुम् ।
अथाङ्कुरार्पण कुर्याद्देशिको मन्त्रवित्तम ॥७८॥
तद्विधान विस्तरेण शृणुध्व मुनिसत्तमा ।
त्रिविधानि च पात्राणि मङ्गलाङ्कुररोपणे ॥७९॥
पालिका घटिकाश्चेति शरावाश्चेति भेदत ।
पालिकानामथोच्छ्राय पञ्चविंशाङ्गुलो भवेत् ॥८०॥
तदाननस्य विस्तारो भवेद्वै षोडशाङ्गुल ।
अष्टाङ्गुलस्तदुच्छ्रायो ह्यङ्गुल चाग्र तत ॥८१॥
भवेत्कण्ठनिल विप्रास्तनोष्टाङ्गुलविस्तृतम् ।
आरभ्य वक्त्रवलयाद्यावत्कण्ठनिल द्विजा ॥८२॥
ह्रासयेदनुपातेन तन्नाळ द्वादशाङ्गुलम् ।
उच्छ्रायादथ विस्तारान्मध्यतस्तु षडङ्गुलम् ॥८३॥
अधस्तादङ्गुलानान्तु चतुष्क विस्तृत भवेत् ।
तत कण्ठबिलाच्चैव ह्रासयेदनुपातत ॥८४॥
पादपीठमपेत्सिद्धाद्विज्ञेय चतुरङ्गुलम् ।
दशाङ्गुलस्तद्विस्तारस्तत्सन्धिश्चाङ्गुलो भवेत् ॥८५॥

तत्सन्धेश्च भवेन्नाह सार्धमेकांगुळं द्विजा !।
उन्मत्तकुसुमाकारं वक्त्रं पद्माकृतिर्भवेत् ॥८६॥
पालिकोत्सेधतुल्यास्तु घटिका समुदाहृता ।
अङ्गुळत्रयहीना वा तदूर्ध्वं कलशाकृतिः ॥८७॥
घटिकाः पञ्चवक्त्राः स्युरेतासां मध्यमं मुखम् ।
षडङ्गुळं च विस्तीर्णं चतुर्दिक्षु चतुष्टयम् ॥८८॥
चतुरङ्गुळविस्तारं कलशोदरविस्तृतिः ।
षोडशांगुळमानोक्तशेषं प्राग्वत्समाचरेत् ॥८९॥
यदांगुळत्रयन्यूनास्तदा सप्तांगुळोच्छ्रितम् ।
सदाननं तु तन्नाळमर्धोत्तरदशांगुळम् ॥९०॥
सार्धत्रयाङ्गुळं पीठं प्राग्वत्सर्वत्र विस्तरः ।
शरावाः पालिकोत्सेधतुल्याः पञ्चभिरङ्गुळैः ॥९१॥
हीना वा वक्त्रविस्तारात्समारभ्य मुनीश्वराः !।
पादपीठस्य विस्तारं यावत्तावत्क्रमेण तु ॥९२॥
पूर्वोक्तात्पादहीना तु भवेत्सर्वत्र विस्तृतिः ।
भवेत् त्रिपादहीना तु पादपीठस्य विस्तृतिः ॥९३॥
यदा शरावा हीना स्युरङ्गुळैः पञ्चभिस्तदा ।
मुखं षडङ्गुळोच्छ्रायं तन्नाळं तु दशाङ्गुळम् ॥९४॥
त्र्यङ्गुळं पादपीठं स्यात्प्राग्वत्सर्वत्र विस्तृतिः ।
एतदुत्तममानं तु पात्राणां कथितं द्विजा ! ॥९५॥
एतदेव मुनिश्रेष्ठा ! पादहीनं तु मध्यमम् ।
अर्धहीनं तु तन्मानमधमं परिकीर्तितम् ॥९६॥
अतो न्यूनं न कर्तव्यं पदानि सिद्धिकाङ्क्षिभिः ।
हेमादिलोहजाः सर्वे मृण्मया वा यथाक्रमम् ॥९७॥
प्रत्येकं पालिकादीनां द्विषट्कं चोत्तमं भवेत् ।

द्विरष्टकं वा षट्त्रिंशद्विभवे सति कल्पयेत् ॥९८॥
प्रत्यष्टकं मध्यमं स्याच्चतुष्कमधमं भवेत् ।
सर्वार्थे पालिकाः प्राग्वत्षोडशाष्टौ यथाबलम् ॥९९॥
चतस्रो वा ततस्तासु मङ्गलाङ्कुरकल्पनम् ।
अयुग्मा मानुषे कार्ये दैवे युग्मास्तु पालिका. ॥१००॥
महोत्सवे प्रतिष्ठायां पवित्रारोपणे तथा ।
जीर्णोद्धारविधौ वापि सहस्रकलशे तथा ॥१०१॥
त्रिवर्गपालिका यद्वा भवेदुत्तमसङ्ख्यया ।
भवेन्मध्यमया वापि नान्यथा द्विजसत्तमाः! ॥१०२॥
कर्मस्वन्येषु सर्वेषु यथाविर्त्त यथारुचि ।
अङ्कुरावापनस्थानमण्टपं परिकल्पयेत् ॥१०३॥
प्रथमावरणे वापि द्वितीयावरणेपि वा ।
तृतीयावरणे वापि चतुर्थावरणेपि वा ॥१०४॥
शुभे विविक्तेऽभिमते देशे वै देशिकोत्तम ।
चतुर्दिक्षु चतुर्द्वारं चतुर्वन्दनमालिकम् ॥१०५॥
दर्भमालापरिक्षिप्तं मुक्तादामविराजितम् ।
वितनक्षौमसञ्छन्नं गोमयालिप्तभूतलम् ॥१०६॥
प्रदीपमालावितनमक्षतैश्चापि सर्वत ।
सुधाचूर्णैश्च धवलैश्चित्रिताभ्यन्तरस्थलम् ॥१०७॥
मण्टपं कल्पयित्वैवं यद्वा स्नपनमण्टपे ।
यागाख्यमण्टपे वापि कुर्यादङ्कुरोपणम् ॥१०८॥
अङ्कुरार्पणवेलायां य इच्छेद्राष्ट्रवर्धनम् ।
बीजानामधिपं सोमं ओषधीशोऽमृतात्मकः ॥१०९॥
न प्रीणाति सदा तत्र अङ्कुरार्पणमादि चेत् ।
तस्मात्सर्वप्रयत्नेन गत्वा सोमाङ्कुरार्पणम् ॥११०॥

कुर्यात्सम्यग्विधानेन भगवद्भक्तिसंयुतः ।
तस्मिन् जगत्प्रिये प्रीते शीतांशौ प्राणिजीवने ॥१११॥
तद्देशे सर्वसस्यानां संपत्तिर्महती भवेत् ।
गवां च लोकमातॄणां नृणामपि च सर्वशः ॥११२॥
अज्ञानादद्दि कुर्याच्चेदङ्कुराणामथर्पणम् ।
अशोभनं भवेद्राष्ट्रमसमृद्धजनान्वितम् ॥११३॥
सद्यःकालीनके विप्राः! कर्मणि स्याद्दिवापि वा ।
यद्यत्तत्रोपयोग्यं स्यात्तत्सर्वं च समार्जयेत् ॥११४॥
सम्भृत्य सर्वसम्भारानाचार्यो मूर्तिपैः सह ।
तदर्थमर्पयित्वा तु यजमानसमन्वितः ॥११५॥
भगवन्तं जगद्योनिं पूजयित्वा विधानतः ।
ततस्त्वभिनवे पात्रे सौवर्णे राजतेऽथ वा ॥११६॥
तिलसर्षपनीवारशालिमाषप्रियङ्गवः ।
कुलुत्थमुद्गनिष्पावयवगोधूमवैणवाः ॥११७॥
बीजानि द्वादशैतानि पृथक् पात्रेषु वा द्विजाः! ।
सम्भृत्य तु मुनिश्रेष्ठाः! स्थापयित्वा तु मूर्धनि ॥११८॥
दीक्षितस्य तु विप्रस्य पुष्पाक्षतकराञ्जलिः ।
आचार्यः प्रविशेत्सार्धं साधकैर्भगवन्मयैः ॥११९॥
प्रासादाभ्यन्तरं विप्रान्मात्राधारोपरि न्यसेत् ।
बीजपात्रं ततोऽर्घ्येण गन्धैः पुष्पैश्च धूपकैः ॥१२०॥
सम्पूज्य मूलबिम्बस्थं तथा चोत्सवबिम्बगम् ।
बीजपात्रं ततोऽभ्यर्च्य देवाय विनिवेदयेत् ॥१२१॥
सह शङ्खनिनादैश्च मङ्गलैर्गीतनिस्वनैः ।
तूर्यनादैश्च विविधैः श्रुतिघोषैः समन्ततः ॥१२२॥
स्थापयित्वा तु तत्पात्रं दीक्षितस्यैव मूर्धनि ।

साधकै साहितो विप्रा ! बहिर्निर्गत्य देशिक ॥१२३॥
धाम प्रदक्षिणीकृत्य न्यसेदङ्कुरमण्टपे ।
विष्वक्सेनन्तु वा तार्क्ष्यं हनुमत्प्रमुखन्तु वा ॥१२४॥
हेतीश वापि वस्त्राद्यैरलङ्कृत्य विशेषत ।
यानादिक समारोप्य प्रक्षाल्याद्भि खनित्रकम् ॥१२५॥
नवेन वाससाऽऽच्छाद्य भूषयित्वा तु माल्यकै ।
देशिको वाहयेद्विप्रै शूद्रैर्वा दीक्षितैर्द्विजा ! ॥१२६॥
चित्रध्वजपताकाभि सार्धमङ्कुरपात्रकै ।
त्रिविधै पालिकाद्यैश्च शङ्खतूर्यादिभि सह ॥१२७॥
आम्नायोद्घोषणपरैर्भक्तैर्भागवतैर्विभो ।
गायकैर्गणिकाभिश्च तथान्यैर्मङ्गलै सह ॥१२८॥
क्रमात्प्रदक्षिणीकृत्य सर्वेष्वावरणेषु च ।
दिश प्राचीमुदीचीं वा अथवा प्रागुदग्दिशम् ॥१२९॥
अदूर समनुप्राप्य तत्रोद्याने मनोहरे ।
केवले वा शुचौ देशे मृद शुद्धा समाहरेत् ॥१३०॥
अस्त्रमन्त्रेण धरणीं सम्प्रोक्ष्य प्रथम गुरु ।
महीसूक्तेन सम्पृश्य ध्यायनेकाग्रचेतसा ॥१३१॥
मूर्तिं देवस्य वाराहीमभ्यर्च्य कुसुमैर्भुवम् ।
अस्त्राम्बुना प्रोक्षितेन पुष्पैरभ्यर्चितेन च ॥१३२॥
खनित्रेण खनेद्भूमिं प्राङ्मुख क्रोडमन्त्रत ।
लोहजे भाजने मृत्स्ना वेत्रजे वा यथारुचि ॥१३३॥
गृहीत्वा मूलमन्त्रेण वेष्टयित्वा च वाससा ।
सप्रेमेण तथा नद्या वालुका गोमय तथा ॥१३४॥
गोकुलात्पूर्ववत्पात्रे गृहीत्वाऽऽत्मन यामगा ।
यानादिके समारोप्य यद्वा दीक्षितमूर्धनि ॥१३५॥

गत्वा प्रदक्षिणं ग्रामं प्रविशेन्मण्टपं ततः ।
मण्टपं शोधयित्वा तु यथोक्तविधिना द्विजा ॥१३६॥
ततो मण्टपमध्ये तु सूत्राण्यास्फालयेत्क्रमात् ।
प्रागायतानि प्रथमं क्रमात्सप्तदश क्षिपेत् ॥१३७॥
उदगायतसूत्राणि चतुर्दश निपातयेत् ।
सूत्रात्सूत्रादन्तरालं षोडशाङ्गुळसंमितम् ॥१३८॥
त्रयाधिकदशैवं स्युः पूर्वपश्चिमपङ्क्तयः ।
एवं षोडशसङ्ख्याता दक्षिणोत्तरपङ्क्तयः ॥१३९॥
बीजपात्रप्रतिष्ठार्थं पूर्वपश्चिमपङ्क्तिषु ।
मध्ये पङ्क्तित्रयं स्थाप्य वीथ्यर्थं द्वितये सृजेत् ॥१४०॥
भूयश्च पङ्क्तित्रितयं स्थापयेत्पार्श्वयोर्द्वयोः ।
दक्षिणोत्तरमध्ये तु स्थाप्य पङ्क्तिचतुष्टयम् ॥१४१॥
द्वितयं द्वितयं पार्श्वे वीथ्यर्थं विसृजेत्पुनः ।
चतुश्चतुश्च पङ्क्तीनां स्थापयेत्क्रमयोगतः ॥१४२॥
आशास्वष्टासु मध्ये च शरावघटपालिकाः ।
द्वादश द्वादश स्थाप्याः शतमष्टोत्तरं भवेत् ॥१४३॥
आग्नेये दक्षिणे भागे नैरृतेऽपि च पालिकाः ।
घटिका वारुणे ब्राह्मे तथा पौरन्दरेऽपि च ॥१४४॥
शरावा मारुते सौम्ये ईशाने च यथाविधि ।
प्रत्येकं पालिकादीनां षोडशत्वेन कल्पने ॥१४५॥
दक्षिणोत्तरगं सूत्रपञ्चकं विनिवेशयेत् ।
प्रागायतानि सूत्राणि पूर्ववद्विनिवेशयेत् ॥१४६॥
आचरेत् पूर्ववद्विप्रा प्राक्प्रत्यक्पङ्क्तिकल्पनम् ।
तत्र दक्षिणतः पङ्क्तिचतुष्के स्थापयेत्क्रमात् ॥१४७॥
पालिकाः षोडश पुरो मध्ये पङ्क्तिचतुष्टये ।

घटिका षोडश न्यस्त्वा उत्तरे विनिवेशयेत् ॥१४८॥
शरावानपि तत्सङ्ख्यानथ द्वादशकल्पने ।
दक्षिणोत्तरसूत्राणि चत्वार्यत्र विनिक्षिपेत् ॥१४९॥
पूर्वापराणि सूत्राणि पूर्ववद्विनिपातयेत् ।
अष्टाधिकानि कोष्ठानि चत्वारिंशद्भवन्ति हि ॥१५०॥
याम्ये द्वादशकोष्ठानि स्थापयित्वा ततो मृजेत् ।
वीथ्यर्थं भागपङ्क्तिं तु मध्यतः स्थापयेत्ततः ॥१५१॥
भागद्वादशकं पश्चाद्भागपङ्क्तिं विलोपयेत् ।
भूयश्चोत्तरदिक्स्थाप्य कोष्ठद्वादशकं क्रमात् ॥१५२॥
न्यसेत्तु पालिकादीनि भागद्वादशकत्रये ।
आग्नेयादीशपर्यन्तं दक्षिणाशादितः क्रमात् ॥१५३॥
प्रत्येकं पालिकादीनामष्टसङ्ख्याप्रकल्पने ।
दक्षिणोत्तरसूत्राणि त्रीण्येव तु नियोजयेत् ॥१५४॥
अन्यत्सर्वं भवेत्प्राग्वदथ प्रतिचतुष्टये ।
दक्षिणोत्तरगं सूत्रत्रितयं विनिपातयेत् ॥१५५॥
पूर्वपश्चिमसूत्राणि एकादश विनिक्षिपेत् ।
सर्वार्थं पालिकानां तु षोडशानां परिग्रहे ॥१५६॥
पञ्च दक्षिणसूत्राणि प्राक्सूत्राणि तथा क्षिपेत् ।
प्राक्सूत्रालयं चाष्टानां दक्षसूत्रत्रयं क्षिपेत् ॥१५७॥
चतुर्विंशतिसङ्ख्यानां पालिकानां परिग्रहे ।
पूर्वदिक्सूत्राणां सप्तकं पञ्चकं क्षिपेत् ॥१५८॥
चतुः परिग्रहे सूत्रत्रितयं त्रितयं क्षिपेत् ।
पूर्वसूत्रपातः स्यादाद्यसङ्ख्यासु पञ्चसु ॥१५९॥
एवमाद्यान्यसूत्राणि विभजेच्छानुसारतः ।
पञ्चसु पालिकादीनां शालिभिनादिभिस्तथा ॥१६०॥

आढकादिमितैः प्राग्वदुत्तमादिव्यपेक्षया ।
वृत्तां वा चतुरश्रां वा कल्पयेत्पीठिकां क्रमात् ॥१६१॥
पालिकादीनि पात्राणि क्षाळयेन्मूलमन्त्रतः ।
सहदेवीं च दूर्वां च सार्धमश्वत्थपल्लवैः ॥१६२॥
शिरीषपल्लवैश्चापि निशापत्रैस्तथैव च ।
कण्ठेषु पालिकादीनां बन्धयेत्तदनन्तरम् ॥१६३॥
कुशकाशतृणैस्तेषां बिलमूलानि पूरयेत् ।
बिलानि प्रथमं मृद्भिर्वालुकाभिरनन्तरम् ॥१६४॥
करीषचूर्णैरुपरि समृद्धं पूरयेद्बिलम् ।
यद्वा मृदादिकं विप्राः ! सर्वं संमिश्रय पूरयेत् ॥१६५॥
कोष्ठेषु विन्यसेत्तानि पालिकादीन्यनुक्रमात् ।
आग्नेयादीशपर्यन्तं प्रतिस्कन्धं द्विजोत्तमाः ! ॥१६६॥
द्वादशानां तु नवकमष्टोत्तरशते न्यसेत् ।
ब्रह्मादीशानपर्यन्तमुदितक्रमयोगतः ॥१६७॥
तेषां तु पश्चिमे स्थाने धान्यराशौ सलक्षणम् ।
विन्यसेत्सोमकुम्भं तु वेष्टितं नववाससा ॥१६८॥
गन्धसर्वौषधीरत्नकूर्चपल्लवसंयुतम् ।
एवं सर्वं समापाद्य दीक्षितैः परिचारकैः ॥१६९॥
तत्तत्सर्वं समापाद्य यद्यत्प्रागनुपार्जितम् ।
समारभेत्ततः कर्म देशिकः प्राङ्मुखः पदे ॥१७०॥
पश्चिमे घटिकास्थानादुपविश्यासने शुभे ।
न्यासमुद्रीप्य विधिना प्रोक्षणार्घ्यं प्रकल्पयेत् ॥१७१॥
देहविन्यस्तमन्त्राणां कुर्यादर्घ्यादिनार्चनम् ।
द्वारपालार्चनं कृत्वा विमर्षेच्छानुरूपतः ॥१७२॥
तोरणानि ध्वजांश्चैव द्वारकुम्भांश्च पूजयेत् ।

पुण्याहं वाचयित्वा तु पूर्वोक्तविधिना गुरुः ॥१७३॥
यजेदर्घ्यादिभिः पश्चात्पालिकाद्यधिदेवताः ।
अञ्जनाभं परं चैव पद्मनाभं ध्रुवं तथा ॥१७४॥
पात्रस्कन्धत्रिके विप्राः ! क्रमेण परिपूजयेत् ।
पालिकानां द्वादशके वक्ष्यादीशानपश्चिमम् ॥१७५॥
अनन्तादि द्वादशक घटिकाद्वादशे ततः ।
कूर्मादिक द्वादशक शरावाणा तु द्वादशे ॥१७६॥
द्विपदक्रमेकशृङ्गाद्यं क्रमेण परिपूजयेत् ।
प्रत्येक पालिकादीनां कृते षोडशकल्पने ॥१७७॥
अनन्ताद्यं च षट्त्रिंशत्पातालशयनान्तिमम् ।
लक्ष्म्यादिमतिपर्यन्तं शक्तिद्वादशकं यजेत् ॥१७८॥
प्रत्येकं पालिकादीनां षट्त्रिंशत्परिकल्पने ।
चतुष्टयं तु मूर्तीना सम्राडव्ययपदमास्थितम् ॥१७९॥
प्रभवाप्ययोगेन जाग्रद्रूपं तथाऽष्टकम् ।
मूर्त्यन्तरद्वादशकं तच्छक्तीना चतुस्त्रयम् ॥१८०॥
अनन्ताद्य च षट्त्रिंशत्पातालशयनान्तिमम् ।
सुधादीनां च शक्तीना चतुस्त्रिंशच्च तत्परम् ॥१८१॥
चक्रशङ्खौ क्रमाद्भोगैरर्घ्यगन्धादिभिर्यजेत् ।
अष्टके केशवाद्याश्च तदीया शक्तयो यजेत् ॥१८२॥
चतुष्के केशवाद्यास्तु षेचकान् द्वादशार्चयेत् ।
सर्वांश्च पालिकाना तु नमान्ताऽष्टके यजेत् ॥१८३॥
वासुदेवादि चतुर केशवादींश्च द्वादश ।
अष्टके वासुदेवादीन् प्रभवाप्ययगेन ॥१८४॥
चतुष्के वासुदेवादीन् प्रभवानुक्रमेण तु ।
मूर्तिमिद्रा तत गोगकुम्भजा समार्चयेत् ॥१८५॥

कुम्भे सोमात्मकं देवं करके च सुदर्शनम् ।
अष्टदिक्षु च विन्यस्तकुम्भेष्विन्द्रादिकान्यजेत् ॥१८६॥
एवं कुम्भार्चनं कृत्वा बीजक्षालनमाचरेत् ।
गव्येन पयसा सम्यङ् मूलमन्त्रेण वै द्विजाः ॥१८७॥
बीजानां नामधेयैस्तु चतुर्थ्यन्तैः पृथक् पृथक् ।
अर्घ्याद्यैः पूजयित्वा तु वाससा परिवेष्ट्य च ॥१८८॥
कुण्डे वा स्थण्डिले वाग्निं प्रतिष्ठाप्य यथाविधि ।
कृत्वा सन्तर्पणं चाग्नेस्तस्मिन्मन्त्रासनादिकम् ॥१८९॥
परिकल्प्य च तन्मध्ये देवमावाह्य पूर्ववत् ।
सन्निधानादिकं सर्वं प्रागेव समाचरेत् ॥१९०॥
समिद्भिश्चैव नित्याभिः काम्यैश्च जुहुयात्ततः ।
पालिकाद्यधिदेवानां मन्त्रैश्चापि यथाक्रमम् ॥१९१॥
अष्टौ चतुः सकृद्वापि हुनेदाज्येन वै द्विजाः ।
हुत्वा सोमादिमन्त्रैश्च सम्पाताज्यं समाहरेत् ॥१९२॥
हुतावशिष्टमाज्यं तु तदन्यं चापि संस्कृतम् ।
आदाय लोहजे पात्रे मृण्मये वा यथारुचि ॥१९३॥
उभाभ्यां चैव हस्ताभ्यां दूर्वामादाय मूलतः ।
घृते निमज्ज्य चाग्राणि पालिकादिषु सेचयेत् ॥१९४॥
हस्तव्यत्यासमार्गेण वह्न्यादीशानपश्चिमम् ।
प्रतिस्कन्धं घृतारोपे दूर्वाभेदः प्रकीर्तितः ॥१९५॥
एवं कृत्वा घृतारोपं भूयः स्कन्धाधिदेवताः ।
सम्पूज्य सर्वबीजानि मन्त्रयेन्मूलमन्त्रतः ॥१९६॥
आचार्यादीननुज्ञाप्य देशिकेन्द्र उदङ्मुखः ।
प्राङ्मुखो वा मुहूर्ते तु शोभने पालिकादिषु ॥१९७॥
अष्टाक्षरेण मन्त्रेण सर्वबीजानि वापयेत् ।

यद्वा जितन्तामन्त्रेण ह्यभयेनाथ वा द्विजा ! ॥१९८॥
आग्नेयादीशपर्यन्तं प्रतिस्कन्धं क्रमेण तु ।
शङ्खदुन्दुभिनिर्घोषजयनादसमन्वितम् ॥१९९॥
बीजानि द्वादशोक्तानि वपेद्द्वादशसु क्रमात् ।
यद्वा सर्वाणि समिश्रय वपेदिच्छानुसारतः ॥२००॥
बीजानामप्यलाभे तु मुद्गमेकं तु वा वपेत् ।
आचार्यानुगताश्चान्ये देशिकाः साधका अपि ॥२०१॥
वपेयुर्ध्यानसयुक्ताः केवलं गुरुरेव वा ।
हरिद्राचूर्णसमिश्रैर्जलैः कुसुमवासितैः ॥२०२॥
बहुभिः सेचयेद्विप्रा ! देशिकेन्द्रः क्रमेण तु ।
प्रतिस्कन्धोपरिष्टात्तु चन्द्रमण्डलमध्यगम् ॥२०३॥
तत्कान्तिसन्निभं देवं स्वदेहोत्थैर्निरन्तरैः ।
सिञ्चन्तममृतौघैस्तु बीजान्युप्तानि सर्वतः ॥२०४॥
ध्यात्वार्चयित्वा पात्राणि नवैस्तु सदशैः शुभैः ।
आच्छादयित्वा वसनैः प्रतिस्कन्धं क्रमेण तु ॥२०५॥
वासुदेवं जगद्योनिं सर्वेषामूर्ध्वतो यजेत् ।
भूतकूरबलिं दद्यादष्टदिक्षु द्विजोत्तमाः ! ॥२०६॥
भूतानां कुमुदादीनां पूर्वादिक्रमयोगतः ।
तत्र प्रभृति ते सर्वे रक्षन्ति कुमुदादयः ॥२०७॥
आचार्यान् गुरुपूर्वांश्च साधकान् वैष्णवानपि ।
प्रभूतैस्तु तथोद्दिष्टैस्ताम्बूलैः सुमनःफलैः ॥२०८॥
गुरुं च तोषयेद्वित्तैर्यजमानः प्रयत्नवान् ।
क्रमादुद्धृत्य तान् सर्वान् शुभे स्थापयेत्तत ॥२०९॥
मण्डपेशानकोणे वा देशेऽन्यत्र यथारुचि ।
तत्रापि पालिकादीनां परितोऽष्टासु दिक्षु च ॥२१०॥

भूताना कुमुदादीनामैन्द्रादिक्रमयोगत ।
बलिं तु मण्टपे दद्याद्भूततन्त्रविधानत ॥२११॥
दीपान् बहूननिर्वाणान् परित परिदीपयेत् ।
ऊनाधिक्योपशान्त्यर्थं शतमष्टोत्तर हुनेत् ॥२१२॥
पूर्णाहुत्यादिकं कृत्वा देशिकेन्द्रो यथाविधि ।
तत कुण्डगत देव विसृज्य हृदयान्तरे ॥२१३॥
चतुर्द्वाराधिदेवाना मन्त्रैश्चापि यथाक्रमम् ।
हुत्वाज्येन ततो वह्निं विसृजेत्तु यथाविधि ॥२१४॥
परित पालिकादीना प्रतिरात्र पृथक् पृथक् ।
दद्याद्दिवा रजन्या वा बलिं कालद्वयेपि वा ॥२१५॥
प्रात कर्मदिने दद्याद्बलिं देशिकसत्तम ।
यदा चोप्तानि बीजानि तदा प्रभृति नित्यश ॥२१६॥
न कश्चित्प्रविशेत्तत्र न स्पृशेद्वा कथ चन ।
आचार्य एव प्रविशेत्तच्छिष्यो वा समाहित ॥२१७॥
उच्छिष्टादीनि सर्वाणि दूरत परिवर्जयेत् ।
अदत्वा तु बलिं पाञ्चित्र कुर्यात्पालिकाक्रियाम् ॥२१८॥
हरिद्राद्यारिभि सिञ्चेदङ्कुराण्याभिवृद्धये ।
अङ्कुरान् श्यामळान् रक्तान् कृष्णांस्तिर्यग्गतांस्तथा ॥२१९॥
अप्ररूढान् मुनिश्रेष्ठा ! वर्जयेत्तु प्रयत्नत ।
श्यामेषु द्रव्यनाश स्याद्रक्तेषु कलहो भवेत् ॥२२०॥
कृष्णेषु मानसी पीडा रोगी तिर्यग्गतेषु च ।
अप्ररूढेषु मरण भवेत्तत्र न सशय ॥२२१॥
शुभ पीतेषु शुद्धेषु ऋजुषूर्ध्वगतेष्वपि ।
सर्वसम्पत्समृद्धिश्च कर्तु कारयितुर्भवेत् ॥२२२॥
कर्मार्थमङ्कुराण्यादौ य समारोपयेद्गुरु ।

स एव कर्म कात्स्न्येंन कुर्यात्प्राज्ञोपि नेतरः ॥२२३॥
अनुज्ञया वा तत्पुत्र शिष्यो वा तत्समाचरेत् ।
एवं सर्वेपु यागेषु अङ्कुरारोपणं भवेत् ॥२२४॥
देशं कालं तथा वित्तं ज्ञात्वा स्वाधीनतां तथा ।
उक्तं सर्वं समभ्यूह्य कुर्यात्कर्म प्रधानकम् ॥२२५॥
एवं कृत्वाङ्कुरारोपं गत्वा देवस्य संनिधिम् ।
देवमर्घ्यादिनाभ्यर्च्य नैवेद्यान्तं यथाविधि ॥२२६॥
अनिर्वाणं यथादीपं रात्रिशेपं समापयेत् ।
तदन्येद्यु प्रभातायां ध्वजार्थं पटमाहरेत् ॥२२७॥
यथावित्तानुसारेण क्रीतं वाभिनवं शुभं ।
दुकूलपट्टं देवाङ्गं चित्रक्षौममथापि वा ॥२२८॥
अथ कार्पासकं वापि नीलरोमादिवर्जितम् ।
सुलक्षणं दृढं स्निग्धं पटमानमिहोच्यते ॥२२९॥
आयतं नवभिर्हस्तैः सप्तभिः पञ्चभिस्तु वा ।
मूलेनेरसमायामं द्व्यागयाममथापि वा ॥२३०॥
आयामार्धेन विस्तीर्णं पादेन कृतशेखरम् ।
शेखरेण समं पुच्छं तदर्धं कर्णपुच्छकम् ॥२३१॥
शाल्याग्रं त्वनवस्त्रं तु पटास्यपरिसमितम् ।
निम्नाग पटतुल्यं तु पूर्वरच्छिदरं भवेत् ॥२३२॥
निर्णेनितं गर्गीयुक्तं शोपिनं लक्षणान्वितम् ।
पटं विचित्रयेद्विद्वान् शिल्पिना कुशलेन वै ॥२३३॥
छत्रं तु शिखरे कुर्यात्पार्श्वयोः श्वेतचामरे ।
अधोऽन्ते स्दलं पद्मं तदधः पूर्णकुम्भकम् ॥२३४॥
कुम्भस्य पार्श्वे निम्नेरमाङ्कुरं पालिकागणम् ।
द्वार्यौ सुशोभनौ कुर्यात्तान्विताना तु पार्श्वयोः ॥२३५॥

ध्वजं तु गरुडाकारमेकमूर्तेस्तु सत्तमाः।
सत्यं सुपर्णो गरुडस्ताक्ष्यश्च चतुरात्मनः ॥२३६॥
पञ्चमूर्तेस्तु चत्वारो विहगेश्वरसंयुताः।
सुपर्णतालमकरऋश्या वा चतुरात्मनः ॥२३७॥
ततऊर्ध्वं तु सर्वेषां व्यूहानां गरुडो ध्वजः।
पटमध्ये तु गरुडं द्विभुजं विधृताञ्जलिम् ॥२३८॥
पुष्पाञ्जलिपुटं वाऽथ सुवर्णाचलसन्निभम्।
गगनेगमनारम्भपक्षविक्षेपणान्वितम् ॥२३९॥
कुञ्चितो वामपादस्तु दक्षिणः पृष्ठतः स्थितः।
किंचिदायतवृत्ताक्षं नीलदीर्घाभनासिकम् ॥२४०॥
अतीव शान्तवेषं तु तथा प्रहसिताननम्।
बालचन्द्रसमाकारं दंष्ट्राद्वयविराजितम् ॥२४१॥
कुटिलभ्रुकुटीभङ्गं भङ्गुरालकशोभितम्।
कम्बुग्रीवं बृहद्बाहुं पीवांसं दृढवक्षसम् ॥२४२॥
पृथूदरं निम्ननाभिं रोमराजिविराजितम्।
सुवृत्तकनकस्तम्भपीवरोरुद्वयान्वितम् ॥२४३॥
हेमरम्भासमाकारजङ्घाक्रान्तपदद्वयम्।
करण्डमकुटाक्रान्तपुष्पापीडविराजितम् ॥२४४॥
वृत्ते वैपुल्यमानेन लोचने पद्मपत्रवत्।
भ्रूयुग्मं तारसिन्धोत्थं घ्राणाग्रं शुकतुण्डवत् ॥२४५॥
स्मितसन्मुखदेशस्तु तद्वत् गजपृष्ठवत्।
तद्वेच देवदीर्घेण विस्तृतं हंसपक्षवत् ॥२४६॥
स्वपक्षमानाद्द्विगुणं तत्पुच्छं ततमान्वितम्।
सर्वेषामेव सामान्यं विशेषान्तरमथोच्यते ॥२४७॥
मकुटादिकपदान्तं नानारत्नेन शोभितम्।

हारकेयूरकटकयज्ञसूत्रविभूषितम् ॥२४८॥
प्रलम्बकर्णपाशान्तविश्रान्तशुभकुण्डलम् ।
ललाटतिलकोपेतं पुष्पकर्णावतंसकम् ॥२४९॥
रत्नाङ्गुलीयकोपेतं शिञ्जिनीरञ्जिताङ्घ्रिकम् ।
अन्यैराभरणैर्दिव्यैर्भूषितं सर्पभूषितम् ॥२५०॥
नीलाम्बरधरं नीलवारवाणविराजितम् ।
फुल्लरक्तोत्पलदलस्रग्भिर्मण्डितकन्धरम् ॥२५१॥
तथा विचित्रकुसुमस्रग्भिरन्याभिरुज्वलम् ।
अनन्तो वामकटको यज्ञसूत्रं तु वासुकिः ॥२५२॥
तक्षकः कटिसूत्रं तु हारं कार्कोटकस्तथा ।
पद्मो दक्षिणकर्णे तु महापद्मस्तु वामतः ॥२५३॥
शङ्खः शिरःप्रदेशे तु गुलिकश्च भुजान्तरे ।
एतैरष्टोरगैराद्यैर्भूषितं भुजगोत्तमैः ॥२५४॥
अनन्तः शुद्धवर्णाभो रक्तवर्णस्तु वासुकिः ।
तक्षकः पीतवर्णाभो धूम्रः कार्कोटकस्तथा ॥२५५॥
शङ्खस्तुहिनवर्णाभो गुलिकस्त्वलिसन्निभः ।
पद्मः पद्मसमानाभो महापद्मस्तु पिङ्गळः ॥२५६॥
पद्मवर्णैर्लिखेदेवं देवं पद्मायुधं तथा ।
चक्रं खड्गं शरं चैव शङ्खं शार्ङ्गं गदां तथा ॥२५७॥
पद्मोर्ध्वं तूभये पार्श्वे विलिखेच्च यथाविधि ।
तदधो दक्षिणे पार्श्वे वह्निमण्डलमालिखेत् ॥२५८॥
तद्वल्लिखेद्वामभागे स्वस्तिकं लक्षणान्वितम् ।
रूपयेत्पश्चिमे तु श्यामलेनासितेन वा ॥२५९॥
विचित्रपुष्पसंयुक्तपत्रवल्लीसमन्वितम् ।
एवं शिल्पिवरेणैव कार्येच्छिल्पिनोत्तम ॥२६०॥

शूद्रेण वा द्विजश्रेष्ठा ! दीक्षितेन यथाविधि ।
कुलालेनाऽथवा मन्त्री कारयेत्कुशलेन च ॥२६१॥
एवं सर्वं समापाद्य देशिक सुसमाहित ।
सायंकाले तु सम्प्रासे सहितो मूर्तिधारकैः ॥२६२॥
कारशाला प्रविश्याथ तोषयित्वा तु शिल्पिनम् ।
तत्पटं तु समादाय विन्यसेच्छिष्यमूर्धनि ॥२६३॥
शङ्खदुन्दुभिनिर्घोषैः काहळध्वनिभिस्तथा ।
गीतैश्च विविधैरन्यैः श्रुतिघोषैः पृथग्विधैः ॥२६४॥
सह ध्वजपटं तस्मादानयेत्सुखमण्टपे ।
प्रविश्याभ्यन्तरं मूलबिम्बस्य परमेश्वरम् ॥२६५॥
अभिवाद्यार्घ्यगन्धाद्यैः पूजयेत्पुष्पधूपकैः ।
विसृज्य शिल्पिनं पश्चात्सम्प्रोक्ष्यार्घ्याम्भसा पटम् ॥२६६॥
सिद्धार्थकान्वितैः पुष्पैस्ताडयेदस्त्रमन्त्रत ।
दर्शयेद्देवदेवस्य सम्मुखं साधकोत्तम ॥२६७॥
दहनाप्यायनं कुर्याद्विधिदृष्टेन कर्मणा ।
भूयोऽर्घ्यगन्धपुष्पाद्यैः प्रपूज्य परमेश्वरम् ॥२६८॥
शिरोच्चया त्विमं मन्त्रं बद्धाञ्जलिकर पठेत् ।
भगवन् ! पुण्डरीकाक्ष ! सर्वेश्वर ! जगन्मय ! ॥२६९॥
त्वया यथा तु कथितं तथा कर्तुं न शक्यते ।
अस्वातन्त्र्यादसामर्थ्याच्छूद्रादीनामभावत ॥२७०॥
तस्मान्मानादिसर्वेषामूनाधिक्योपशान्तये ।
सम्यगालोकय नेत्राभ्यां शीतळाभ्यां पटान्वितम् ॥२७१॥
सर्वदोषापहारिभ्यां वैनतेयं प्रसीद ओं ।
दीक्षितानां ततो विप्रा ! हस्ते दत्वा तु तं पटम् ॥२७२॥
कृतु प्रदक्षिणीकृत्य तेन सार्धं तु देशिक ।

प्रथमावरणे वाऽपि द्वितीयावरणेऽपि वा ॥२७३॥
प्रविशेद्यजमानेन प्रासादाग्रस्थमण्टपम् ।
तत्र न्यस्त्वा भद्रपीठं तदूर्ध्वे शालितण्डुलै ॥२७४॥
वेदिं कृत्वा तु तत्पृष्ठे भद्राख्य मण्डल लिखेत् ।
विभने सति वस्त्रं तु समास्तीर्य तदूर्ध्वत ॥२७५॥
तिलराशिं समुत्कीर्य तन्मध्ये स्वस्तिक लिखेत् ।
तस्योपरिष्टात्संस्थाप्य प्रासादाभिमुख पटम् ॥२७६॥
उपविश्यासने पश्चादाचार्य सुसमाहित ।
करशुद्धयादि पूर्वोक्त स्वदेहार्चनपश्चिमम् ॥२७७॥
सर्वं खगेशमन्त्रेण साङ्गेन तु समाचरेत् ।
द्वार्स्थतोरणकुम्भादियजन माग्वदाचरेत् ॥२७८॥
तत पुण्याहघोष तु कारयेत्पूर्ववद्द्विजा ॥
गरुडस्यामत प्राग्वत्कुम्भ करकसंयुतम ॥२७९॥
भारमात्रोपकल्पं तु धान्यपीठे तु विन्यसेत् ।
जलद्रोण्यादिकं पात्र गन्धतोयै सुपूरितम् ॥२८०॥
दक्षिणे करकस्याथ विनिवेश्य च तत्र त ।

कुम्भे गरुडमावाह्य करके मन्त्रमव्ययम् ।
पूजयित्वार्घ्यगन्धाद्यैस्ततो दिक्कलशाष्टके ॥२८६॥
इन्द्रादिलोकपालांस्तु प्रादक्षिण्येन पूज्य च ।
भित्तिसंसेचनं कृत्वा भूयः संस्थाप्य तत्र तु ॥२८७॥
ततो ध्वजपटे प्राग्वदासनं परिकल्प्य च ।
ततो गरुडमन्त्रं तु सहस्रादित्यभास्वरम् ॥२८८॥
सर्वरोगप्रशमनं सर्वोपद्रवनाशनम् ।
सर्वसिद्धिप्रदं नृणां सर्वदारिद्र्यनाशनम् ॥२८९॥
हृदयाद्रेच्य विप्रेन्द्राः ! पटस्थगरुडे न्यसेत् ।
सकलीकरणं कृत्वा सान्निधिं च समाचरेत् ॥२९०॥
सन्निरोधं च सांमुख्यं मुद्राबन्धं तथैव च ।
लययागं भोगयागं यथावद्द्विजसत्तमाः ! ॥२९१॥
सर्वं गरुडमन्त्रेण साङ्गेन तु समाचरेत् ।
कुम्भे च करके चैव पटे च क्रमयोगतः ॥२९२॥
महता विभवेनैव पूजनं च समाचरेत् ।
अलङ्कारासनान्तं च यथोक्तेन क्रमेण तु ॥२९३॥
कृत्वा सम्पूजनं विप्राः ! गरुडस्य ततः परम् ।
प्रासादाभ्यन्तरे विप्राः ! देशिकानुमतेन तु ॥२९४॥
अन्येन गुरुणा यद्वा साधकेन विशेषवत् ।
पूजनं कारयेत्सम्यङ्मूर्तिगतस्य च ॥२९५॥
यात्रामूर्तिगतस्यापि विभोर्डोलान्तमेव च ।
तस्य वैनतेयस्य भोज्यासनपुरःसरैः ॥२९६॥
विविधैर्मधुपर्कान्तैर्वै. सकलमूलकैः ।
अर्घ्यगन्धप्रसूनैश्च तथान्यैर्विविधैरपि ॥२९७॥
भोगैरिष्ट्वा अवान्ते च पूर्ववत्क्रमयोगतः ।

सम्प्रदानं पृथक्कुर्यात्ताभ्यस्तु यथाविधि ॥२९८॥
मन्त्रास्त्रकुम्भयोर्दत्तमाचार्येभ्यो ददेद्‌धृतम् ।
पटस्थस्यापि नैवेद्यं किञ्चिदादाय पानगम् ॥२९९॥
देशिकः स्वयमादद्याद्गुर्वादिभ्योऽपि वै ददेत् ।
मूलबिम्बस्थितस्यापि यात्राबिम्बस्थितस्य च ॥३००॥
देवस्य मधुपर्कार्चनैव प्रतिपादितम् ।
दापयेद्देशिकादिभ्यस्ततो होमं समाचरेत् ॥३०१॥
कुण्डं सलक्षणं कृत्वा प्राग्भागे गरुडस्य तु ।
तत्रानलं तु सम्स्कृत्य आराध्य विहगेश्वरम् ॥३०२॥
समिधा सप्तकं हुत्वा शान्त्यर्थं तु तिलैर्घृतैः ।
आहुत्यष्टोत्तरशतं हुत्वा पूर्णां निवेदयेत् ॥३०३॥
यद्वा नैमित्तिके कुण्डे होमं कुर्यात्तु देशिकः ।
एवं स्नानाधिवासं तु कृत्वा गर्भगृहं व्रजेत् ॥३०४॥
रक्षाबन्धं ततः कुर्याद्यथाविधि मुनीश्वर ! ।
मूलस्थानगतं देवमर्घ्याद्यैः सम्प्रपूज्य च ॥३०५॥
तत्पादयोः करौ कृत्वा देवं विज्ञापयेदिदम् ।
भगवन् ! पुण्डरीकाक्ष ! कारुण्य कौतुकक्रियाम् ॥३०६॥
महोत्सवार्थं देवेश ! तदर्थं त्वं प्रसीद मे ।
इति विज्ञाप्य देवेशमाचार्यो मण्डपालुके ॥३०७॥
अभ्यङ्गपादिनाभ्यर्च्य यागाभिविदिते शुभे ।
भूषणादिव्यगन्धैश्चाप्यलङ्कृत्य निवेशयेत् ॥३०८॥
गोपुरं यानमारोप्य शङ्खभेर्यादिसंयुतम् ।
छत्रादिभिश्च संयुक्तं प्रादक्षिण्यक्रमेण तु ॥३०९॥
आस्थानमण्डपं नीत्वा सौवर्णे भद्रपीठके ।
तत्र मुक्तावितानादिचित्रपिष्टादिशोभिते ॥३१०॥

सर्वसाधनसंयुक्ते समारोप्य विधानतः ।
पूजयित्वा जगन्नाथं प्रभूतान्नं निवेद्य च ॥३११॥
कृत्वा सन्तर्पणान्तं च प्रासादं सम्प्रवेशयेत् ।
ततस्तु हेमजं पात्रं राजतं वा समाहरेत् ॥३१२॥
शालिभिस्तण्डुलैर्विप्राः ! भारमानैः सुपूरितम् ।
तदर्धैर्वापि तत्पादैः षडंशैर्वाऽष्टमांशकैः ॥३१३॥
तदूर्ध्वे हेमजं सूत्रं क्षौमं कार्पासमेव वा ।
पट्टजं पञ्चभिः सूत्रैश्चतुर्भिः सप्तभिस्तु वा ॥३१४॥
कृतं न्यस्य सताम्बूलं तत्पात्रं विन्यसेत्ततः ।
गर्भाग्रमण्टपे पीठे शालिभिः परिकल्पिते ॥३१५॥
भारमानैस्तदर्धैर्वा एवं शालिविनिर्मिते ।
पीठे पात्रान्तरे न्यसेदपूपिकसमन्वितम् ॥३१६॥
अर्घ्यादिना समभ्यर्च्य सम्यगाच्छाद्य वाससा ।
पात्रद्वयं दीक्षितयोर्न्यस्त्वा शिरसि देशिकः ॥३१७॥
यानादिके वा संस्थाप्य विभवानुगुणं द्विजाः ! ।
सह ताभ्यां तु यानाभ्यां नृत्तगीतादिसंयुतम् ॥३१८॥
प्रदक्षिणं परिभ्राम्य सर्वेष्वावरणेष्वपि ।
एकस्मिन्वा चतुः कृत्वा प्राकारे वा प्रदक्षिणम् ॥३१९॥
नर्तकैर्वा ततो विप्राः ! प्रविशेन्मूलमन्दिरम् ।
यद्वा सुदर्शनोपेतं विष्वक्सेनेन वा द्विजाः ॥३२०॥
[illegible] वा [illegible] ।
यानादिकं समारोप्य प्रासादेषु यथाविधि ॥३२१॥
गर्भगेहे प्रविश्याऽथ देवदेवस्य सन्निधौ ।
पात्रद्वयं तु विन्यस्य आधारोपरि पूजयेत् ॥३२२॥
अष्टाक्षरेण मन्त्रेण अर्घ्यगन्धादिभिस्तथा ।

कृत्वा पुण्याहघोषं तु देवमर्घ्यादिभिर्यजेत् ॥३२३॥
ततः प्रतिसरं चेद्वा गन्धधूपाधिवासितम् ।
प्रथमं देवदेवस्य मूलमूर्तिगतस्य च ॥३२४॥
बन्धयेत्कौतुकं सूत्रैर्हैमजैः पट्टजैस्तु वा ।
हेमजं सूत्रमादाय गन्धेनालिप्य बन्धयेत् ॥३२५॥
देवस्य दक्षिणे हस्ते यात्रामूर्तिगतस्य च ।
निनन्तास्त्येनमन्त्रेण शङ्खगीतादिसंयुतम् ॥३२६॥
स्पृष्ट्वा दक्षिणहस्तेन सूत्रमष्टशतं जपेत् ।
श्रियो वामकरे कुर्यात्पट्टसूत्रेण कौतुकम् ॥३२७॥
श्रीसूक्तमुच्चरन्वाऽपि तन्मन्त्रेण द्विजोत्तमाः ।
पुष्ट्यास्तु वामहस्ते तु क्षौमसूत्रेण बन्धयेत् ॥३२८॥
कुर्यात्स्नपनबिम्बस्य पट्टसूत्रेण कौतुकम् ।
बलिबिम्बादिकानां च हस्तेन कौतुकं ततः ॥३२९॥
कौतुकं देशिकेन्द्रस्तु कार्पासेन स्वदक्षिणे ।
करे तु मूलमन्त्रेण बन्धयेत्तु ततः परम् ॥३३०॥
सर्वत्र कर्मकर्तॄणां कौतुकं बन्धयेत्क्रमात् ।
विभवे सति सर्वेषां सूत्रं हैममयं भवेत् ॥३३१॥
देवमर्घ्यादिनाभ्यर्च्य अपूपादीन्निवेदयेत् ।
ताम्बूलादीन् समर्प्याथ ताम्बूलैस्तोषयेद्द्विजान् ॥३३२॥
दीक्षितान् वैष्णवांश्चापि देशिकेन्द्रपुरस्सरान् ।
आचार्यं स्वयमाद्यात्तदर्थं तण्डुलादिकम् ॥३३३॥
एवं सर्वेषु यागेषु कार्यं कौतुकबन्धनम् ।
रक्षाबन्धं तु हस्तेन ग[illegible] समापयेत् ॥३३४॥
ततः प्रभाते सुस्नातः स्वाचान्तो देशिकोत्तमः ।
नित्यार्चनं विभोः कृत्वा विशेषयजनं तथा ॥३३५॥

वैनतेयं ततोऽभ्यर्च्य कुम्भपूर्वं यथाविधि ।
महाहविर्निवेद्याथ होमं कृत्वा तु पूर्ववत् ॥३३६॥
ततः कुर्यात् ध्वजस्तम्भस्थापनं देशिकोत्तमः ।
प्रथमावरणे वापि द्वितीयावरणादिके ॥३३७॥
स्थापयेद्गोपुरस्यान्तर्बहिर्वा स्तम्भमुत्तमम् ।
अथ वा बलिपीठस्य पुरोभागे मुनीश्वराः ! ॥३३८॥
पश्चाद्भागेऽपि वा कुर्यात् ध्वजपीठप्रकल्पनम् ।
तयोस्तदन्तरं कुर्याद्धस्तं वा तालमेव वा ॥३३९॥
उत्तरे ध्वजपीठस्य पूर्वस्यां दिशि वा द्विजा: ! ।
शाययेच्च ध्वजस्तम्भं ध्वजयष्टिसमन्वितम् ॥३४०॥
पूर्वाग्रमुत्तराग्रं वा लक्षणाढ्यं सुशोभनम् ।
अन्तस्सारो बहिस्सारो निस्सारस्त्रिविधस्तरुः ॥३४१॥
अन्तस्सारश्चन्दनादिः प्रशस्तः स्तम्भकल्पने ।
क्रमुकादिर्बहिस्सारः सोऽपि शस्तो मुनीश्वराः ! ॥३४२॥
किंशुकाद्यं तु निस्सारं वर्जयेत् स्तम्भकर्मणि ।
आर्द्रं नवमृजुं स्निग्धं ग्रन्थिस्फोटनवर्जितम् ॥३४३॥
अयुग्मपर्वकं स्निग्धं सत्वचं सुषिरं तथा ।
आहरेत्तु ध्वजस्तम्भं सम्यक्सम्यक् परीक्ष्य तु ॥३४४॥
शततालं तु मुख्यं स्यादशीत्यङ्गुलमथापि वा ।
षष्टितालमितं वापि मानाङ्गुलवशेन तु ॥३४५॥
मात्राङ्गुलवशेनापि प्रमाणं परिकल्पयेत् ।
प्रासादशिखराग्रेभ्यो मानेनाधिकमथापि वा ॥३४६॥
कर्तव्यं गोपुराणां वा यथाशक्ति प्रकल्पयेत् ।
चतुर्धा विभजेत् स्तम्भमेकांशेनैव खननम् ॥३४७॥
मध्य पादभागस्तो [illegible] [illegible] ।

त्रयाणामपि पीठानां स्तम्भाग्रे विनिवेशनम् ॥३४८॥
अग्रे पीठद्वयच्छिद्रे ध्वजयष्टिं तु योजयेत् ।
दर्भमुष्टिं तदूर्ध्वे तु बन्धयेत् घण्टया सह ॥३४९॥
वेष्टयेद्दर्भमालाभिर्ध्वजदण्डं प्रदक्षिणम् ।
एवं कृत्वा ध्वजस्तम्भं प्रोक्षयेदस्त्रवारिणा ॥३५०॥
ध्वजपीठस्थिते गर्ते रत्नधान्यानि निक्षिपेत् ।
देशिकस्त्वस्त्रमन्त्रेण ततो ब्राह्मणसत्तमैः ॥३५१॥
शूद्रैर्वा दीक्षितैर्विप्रा देवदासैरथापि वा ।
शङ्खभेर्यादिनिर्घोषगीतवादित्रसंयुतम् ॥३५२॥
स्थापयेत्तु ध्वजस्तम्भं तस्मिन् गर्ते ऋजुस्थितम् ।
प्रासादाभिमुखं स्थाप्य वालुकाभिश्च पूरयेत् ॥३५३॥
हस्तपादादिभिः कृत्वा सुदृढं तु यथा भवेत् ।
स्तम्भमूलस्थले वेदिं पञ्चहस्तसमुच्छ्रिताम् ॥३५४॥
त्रिहस्तैरुच्छ्रिता वापि एकहस्तसमुच्छ्रिताम् ।
तावद्भिरेव विस्तीर्णां चतुरश्रां प्रकल्पयेत् ॥३५५॥
तदूर्ध्वे मध्यदेशे तु पद्ममष्टदलैर्युतम् ।
कर्णिकास्थो यथा स्तम्भस्तथा कुर्याद्विचक्षण ॥३५६॥
प्रासादान्तः प्रविश्याथ मूलमूर्तिगतं विभुम् ।
अर्घ्यगन्धादिनाभ्यर्च्य तस्मात् सर्वकौतुके ॥३५७॥

प्रभया चित्रकुसुमै कृतया भूषयेत् ध्वजम् ।
वासोभिर्भूषणै स्रग्भिर्विचित्राभिश्च भूषयेत् ॥३६१॥
छत्रचामरपूर्वैश्च मयूरव्यजनैस्तत ।
विचित्रैस्तालवृन्तैश्च आतपत्रैर्मनोहरै ॥३६२॥
केतुदण्डैर्विचित्रैश्च दुकूलपटशोभितै ।
चतुर्वेदमयोद्घोषै स्तोत्रघोषसमन्वितै ॥३६३॥
गीतकैर्विविधैर्वाद्यै शङ्खकाहळनिस्वनै ।
भेरीमृदङ्गपूर्वाणा घोषैरन्यैश्च मङ्गळै ॥३६४॥
ब्राह्मणैर्ध्रियमाणैश्च साङ्कुरै पालिकागणै ।
सुवेषगणिकासङ्घै सदा भक्तजनै सह ॥३६५॥
क्ष्वेळितास्फोटितैर्युक्त जयशब्दसमन्वितम् ।
बलिबिम्ब पुरस्कृत्य मध्ये ध्वजपट तत ॥३६६॥
यात्रामूर्ति च तदनु क्रमेण भ्रामयेत्तत ।
प्रथमावृतिमारभ्य रथ्यावरणपश्चिमम् ॥३६७॥
बलिदानपुरस्क तु कृत्वा ग्रामप्रदक्षिणम् ।
बालबिम्ब च तदनु नयेदास्थानमण्टपे ॥३६८॥
निवेश्य विष्टरे हैमे ध्वजपीठस्य सम्मुखम् ।
आचार्यो मूर्तिपै सार्धमादाय गरुडध्वजम् ॥३६९॥
सह शङ्खनिनादाद्यै प्रादक्षिण्येन योगत ।
ध्वजपीठ समानीय स्तम्भ प्रक्षाल्य सज्जलै ॥३७०॥
विभवे सति वस्त्रेण संवेष्ट्य ध्वजदण्डकम् ।
त्रिवृत्तैस्तु कार्पाससूत्रैरतिदृढै दृढाम् ॥३७१॥
रज्जुमादाय तदनु गुड्डा देशिकोत्तम ।
यष्टचक्रसमन्विते यन्त्रे योजयित्वा तया तत ॥३७२॥
ध्वजस्य शिखर विप्रा बन्धयेद्गुड्ड तत ।

सर्वै परिजनै सार्धं कुम्भपार्श्वं समाश्रयेत् ॥३७३॥
तत्कुम्भ तु समुद्धृत्य विन्यसेच्छिष्यमूर्धनि ।
उपकुम्भाऽष्टक चैव वाहयेद्ब्राह्मणै सह ॥३७४॥
वर्धनीं च समादाय आचार्य स्वकरेण तु ।
अच्छिन्नधारया युक्त वाद्यघोषपुरस्सरम् ॥३७५॥
देवागार परिभ्राम्य स्तम्भमूल समाश्रयेत ।
पुण्याह वाचयित्वा तु सम्प्रोक्ष्यास्त्रेण वै ध्वजम् ॥३७६॥
गारुडेनैव मन्त्रेण पटस्थ गरुड यजेत् ।
अर्घ्यं पाद्य तथाचाम गन्ध माल्य च धूपकम् ॥३७७॥
अपूपान् पृथुकांश्चापि पानक तर्पण तत ।
नालिकेरजलैर्युक्तमाचाम तदनन्तरम् ॥३७८॥
कर्पूरादिसमायुक्त दत्वा ताम्बूलमुत्तमम् ।
तन्मुद्रा दर्शयित्वा तु तत पुरुषसूक्तत ॥३७९॥
महाकुम्भस्थतोयेन सम्प्रोक्ष्य गरुड तत ।
महाकुम्भस्थगरुड पटस्थे तु निवेशयेत ॥३८०॥
उपकुम्भाष्टकेनैव अष्ट नागान् यथाक्रमम् ।
आयुधाना तथैवोक्त करकास्त्रजलेन तु ॥३८१॥
एव क्रमेण सम्प्रोक्ष्य ततो देशिकसत्तम ।
मन्त्रन्यासादिक कृत्वा पुष्पाञ्जलिपुर सरम् ॥३८२॥
सन्निधिं सन्निरोध च सायुज्य च समाचरेत् ।
ततस्त्वर्घ्यादिभि पूज्य उपहारान् बहूनपि ॥३८३॥
मुद्गान्नादीन्निवेद्याथ ताम्बूलादीन् समर्पयेत् ।
स्तोत्रै स्तुवीत गरुड बद्धाञ्जलिपुटो गुरु ॥३८४॥
वाहनाय महाविष्णो तार्क्ष्यायामिततेजसे ।
गरुडाय नमस्तुभ्य सर्वसर्पेन्द्रमृत्यवे ॥३८५

नमो नमस्ते पक्षीन्द्र ! साध्यायवपुषे नमः ।
विहगेन्द्र ! नमस्तेऽस्तु समुत्पाटितकल्पक ! ॥३८६॥
आहृतामृतकुम्भाय जननीदासमोचिने ।
सुरासुरेन्द्रजयिने नागेन्द्राभरणाय ते ॥३८७॥
यदाधारमिदं सर्वं तदाधाराय ते नमः ।
पक्षौ यस्य बृहत्साम रथन्तरमपि द्वयम् ॥३८८॥
अक्षिणी चापि गायत्री त्रिवृत्साम शिरः स्मृतम् ।
स्तोम आत्मा नमस्तस्मै वामदेव्याङ्गसम्पदे ॥३८९॥
नमः प्राणादिवायूनामीशानाय गरुत्मते ।
दोषानपनयास्मण्डान् गुणानावह सर्वतः ॥३९०॥
विघ्नानि जहि सर्वाणि आत्मसात्कुरु मामपि ।
स्तुत्वैवं श्रावयेत्तस्य बृहत्साम रथन्तरम् ॥३९१॥
तत्काले देशिकेन्द्रस्तु ध्यायमानः खगेश्वरम् ।
नैवेद्यं कवलीकृत्य मन्त्रयित्वा तु मन्त्रवित् ॥३९२॥
पौरुषैर्गारुडैर्मन्त्रैः कन्यानामपि योषिताम् ।
क्षिपेदञ्जलिषु ध्यात्वा गरुडं चाच्युतं हरिम् ॥३९३॥
भक्षयित्वा स्त्रियः पिण्डान् जनयेयुः सुतान् बहून् ।
ततस्तु गरुडामे तु [illegible] ॥३९४॥
देवेशं पूजयित्वा तु नत्वा त्वां शुभप्रदम् ।
गुरवे [illegible] च आशीर्वादपुरस्सरम् ॥३९५॥
[illegible] ।
[illegible] गुरवेऽपीति मन्त्रतः ॥३९६॥
[illegible] तु ।
[illegible] ॥३९७॥
[illegible] ।

ग्रामस्य यजमानस्य वैष्णवानां विशेषत
तुष्ट्यै पुष्ट्यै चैव सर्वशत्रुजयाय च ॥४०२
अपमृत्युजयार्थाय वैनतेय ! प्रसीद ओम्
इति विज्ञाप्य पक्षीन्द्रं विकिरेत्कुसुमाञ्जलिम् ।
सन्निधौ देवदेवस्य गत्वा पुष्पाञ्जलिं क्षिपेत् ।
ज्ञानतोऽज्ञानतो वापि यथोक्तं न कृतं मया।
तत्सर्वं पूर्णमेवास्तु सुतृप्तो भव सर्वदा ।
ओमच्युत ! जगन्नाथ ! मन्त्रमूर्ते ! जनार्दन ! ४
रक्ष मां पुण्डरीकाक्ष ! क्षमस्वाद्य प्रसीद ओम् ।
इति विज्ञाप्य देवेशं यानामूर्तिगतं विभुम् ॥४०६
अन्यत्र मण्टपे नीत्वा विशेषार्चनपूर्वकम् ।
प्रभूतान्नं निवेद्याथ सर्वं हवनपश्चिमम् ॥४०७॥
कृत्वा यथाक्रमेणैव प्रासादे तु प्रवेशयेत् ।
कल्पयेत् ध्वजपीठोर्ध्वे चतुस्तम्भान्वितां प्रपाम् ॥४०
यद्वा स्तम्भाष्टकापेतां षोडशस्तम्भसंयुताम् ।
चतुस्तोरणसंयुक्तां दर्भमालापरिष्कृताम् ॥४००॥
भूषितां तु पताकाद्यैर्वस्त्रैर्यवनिकान्विताम् ।
दीपान् प्रदीपयेत्तत्र अनिर्वाणान् समन्ततः ॥४१०॥

तद्वामरात्समारभ्य पुष्पयागदिनान्तिमम् ।
त्रिसन्ध्यमर्चनं कुर्यात्सविशेषं जपान्वितम् ॥४११॥
बलिकाले बलिं दद्यादन्यापि प्रतिग्रामरम् ।
एवं ध्वजाधिरोहान्तं दिवाकृत्यमुदीरितम् ॥४१२॥

इति श्रीपाञ्चरात्रे ईश्वरसंहितायां
महोत्सवध्वजारोहणान्तविधिर्नाम
दशमोऽध्यायः



विष्णोरराटमन्त्रेण दर्भैस्सम्मार्ज्य देशिक ॥७॥
गन्धद्वारेति मन्त्रेण गोमयेनानुलेपयेत् ।
आपउन्दन्तुमन्त्रेण सुधाचूर्णैरलङ्कृति ॥८॥
देवस्यत्वेति मन्त्रेण विकिरेदक्षतान् क्षितौ ।
श्रीप्मोहेमन्तमन्त्रेण धान्यपीठ प्रकल्पयेत् ॥९॥
शन्नोदेवीति मन्त्रेण शतपत्र चतुर्दिशि ।
त्रातारमिति मन्त्रेण मध्ये पद्म च सलिखेत् ॥१०॥
धननागेति मन्त्रेण ऊर्ध्वं दर्भं परिस्तरेत् ।
मूर्धानमिति मन्त्रेण नमस्कुर्याद्ध्रुव तत ॥११॥
तत्र कोणचतुष्के तु न्यसेद्दीपचतुष्टयम् ।
वाचयेत् स्वस्ति पुण्याह ततो देशिकसत्तम ॥१२॥
तस्मै प्रोक्षयेद्वेरीं आपउन्दन्तुमन्त्रत ।
अग्निरायुष्मन्त्रेण प्रोक्षयेत्सर्ववाधकान् ॥१३॥
अर्यमायेति तद्भेरीं विन्यसेद्धान्यविष्टरे ।
तत्पूर्वे शङ्खनिकर वहो काहलसञ्चयम् ॥१४॥
याम्ये तु मर्दल नन्त्री वशयुक्ता तु यातुदिक् ।
वारुण्या तु मृदङ्ग च डुड्डुकान् हस्तमर्दलान् ॥१५॥
वायव्ये झल्लरीं न्यस्य कांस्यतालसमन्वितम् ।
पटह दक्षपटह सोमे डुड्डुकसयुतम् ॥१६॥
ऐशान्या डिंदुका झल्ली हस्तघण्टासमन्विताम् ।
तेषा वामे तु विप्रेन्द्रा ! दक्षिणे गणिकाजनान् ॥१७॥

१– धान्यपीठ प्रकल्पयेत् ॥७॥
शन्नोदेवीतिमन्त्रेण गोमयेनानुलेपयेत् ।
आप उन्दन्तु मन्त्रेण सुधाचूर्णैरलङ्कृति ॥
देवस्यत्वेति मन्त्रेण ऊर्ध्वं दर्भं परिस्तरेत् । इति–(ग)

न्यसेन्मङ्गलगानार्थं तत्पार्श्वे मन्त्रगायकान् ।
नर्तकानग्रतः स्थाप्य उत्तरे बन्दिवृन्दकान् ॥१८॥
स्वस्वस्थानेषु संस्थाप्य अन्यांश्चै वाद्यकोविदान् ।
एवं क्रमेण संस्थाप्य सम्भवानुगुणं द्विजाः ! ॥१९॥
गरुडस्थानमासाद्य अर्घ्याद्यैर्हविरन्तिमैः ।
आराध्य गरुडं पूर्वं भेरीपार्श्वे समाश्रयेत् ॥२०॥
वाससा वेष्टयेद्भेरीं यथावित्तानुसारतः ।
शब्दविग्रहमाकाशं भेर्यां संस्कृत्य पूजयेत् ॥२१॥
भेरीमध्ये ततो विष्णुं पूजयेद्विष्णुमन्त्रतः ।
ब्रह्माणं दक्षिणेभ्यर्च्य रुद्रमभ्यर्च्य वामके ॥२२॥
कोणं तद्दक्षिणे स्थाप्य वायुं तत्र सुपूजयेत् ।
शंखेषु विष्णुमभ्यर्च्य काहलेषु सरस्वतीम् ॥२३॥
मर्दलेष्विन्दुमभ्यर्च्य तन्त्र्यां गन्धर्वमर्चयेत् ।
मृदङ्गे रुद्रमभ्यर्च्य षण्मुखं ड्डुड्डुकेषु च ॥२४॥
ह्रस्वमर्दलवाद्येषु मेदिनीं च समर्चयेत् ।
झल्लर्यां विष्णुमभ्यर्च्य ब्रह्माणं कांस्यतालके ॥२५॥
पटहेषु श्रियं देवीं घण्टायां तु सरस्वतीम् ।
अन्येषु सर्ववाद्येषु विष्णुमेव समर्चयेत् ॥२६॥
भेर्यादिसर्ववाद्यानि यजेदेवं गुरुः स्वयम् ।
तत्काले वारवनिताः पुष्पाञ्जलिसमन्विताः ॥२७॥
भेर्यूर्ध्वे तानि पुष्पाणि विकिरेयुर्मुदान्विताः ।
ततः पारशवं स्नातं दर्भपाणिमलङ्कृतम् ॥२८॥
उपवीतादिसंयुक्तं पञ्चसंस्कारशालिनम् ।
भगवद्भक्तिसंयुक्तमग्रतः स्थाप्य वीक्षयेत् ॥२९॥
अस्त्रेण प्रोक्षयेत्पश्चादर्घ्यतोयेन तत्परम् ।

मुहूर्ते शोभने प्राप्ते भेरीमेव प्रपूजिताम् ॥३०॥
कोणेन ताडयेन्मूर्तित्रय ध्यायन् गुरु स्वयम् ।
तद्विष्णोरिति मन्त्रेण प्रथम ताडन भवेत् ॥३१॥
ब्रह्मजज्ञान मन्त्रेण द्वितीय ताडन भवेत् ।
कद्रुद्रायेति मन्त्रेण तृतीय ताडन भवेत् ॥३२॥
त्रिस्थानादिषु देवाना त्रिधा वै तेन ताडयेत् ।
तत पाराशवस्ता तु वहन् भेरीमलङ्कृताम् ॥३३॥
प्रथम वामहस्तेन त्रिधा सन्ताडन चरेत् ।
दक्षिणेन तत सम्यक्तथा सन्ताडयेत्त्रिधा ॥३४॥
प्रथम शङ्खनाद तु द्वितीय काहलस्वनम् ।
तृतीय ताडन प्रोक्त क्रमेणैव हि कारयेत् ॥३५॥
देवताह्वानवेलाया सर्ववाद्यानि घोषयेत् ।
देवतावाहिनीं गाथा सस्कृता प्राकृता तु वा ॥३६॥
द्रामिडीं वा यथेन्टातस्तदा सश्रावयेद्विभुम् ।
तत्काले देवतानृत्त तवद्गीतादिसयुतम् ॥३७॥
दर्शयेद्देवदेवस्य देवताना सुतृप्तये ।
ततस्तु चोत्सव बिम्ब देवीभ्या सह देशिक ॥३८॥
यानमारोप्य सुदृढमलङ्कृत्य विशेषत ।
बलिबिम्बपुरस्क तु यात्रामूर्तिमनन्तरम् ॥३९॥
भ्रामयेत्क्रमयोगेन वाद्यघोषपुरस्सरम् ।
सर्वै परिजनै सार्ध बलिदानपुरस्सरम् ॥४०॥
पायस द्रोणमान तु समादायाथ पात्रत ।
तथार्घ्यगन्धमाल्यानि धूप ताम्बूलमेव च ॥४१॥
ग्रामादिग्रामसम्य बलिद्रांग्यसानक्रम ।
अनुलिप्यपि सर्वासु वीथ्यासस्वपरिश्रमम ॥४२॥

बलिं प्रदाय विधिना गीतनृत्तादिसंयुतम्।
ततः प्रविश्य ग्रामं तु पूर्वस्यां दिशि संस्थितः ॥४३॥
देवताऽऽवाहनं कुर्यात्प्राङ्मुखो देशिकः स्वयम्।
तत्पुत्रकस्य शिष्यो वा स्वरेणोच्चतरेण तु ॥४४
आगच्छतामरगणाः प्रागाशां येऽधिशेरते।
विरूपाश्च सुरूपाश्च सपर्यामुद्यतामिमाम् ॥४५॥
गृहीत्वा पान्तु नस्तृप्ताः कुमुदस्यानुयायिनः।
महन्त्विममुपायान्तु प्रीतास्तेभ्यो नमोऽस्तु वः ॥४६॥
अनेन मन्त्रेणावाह्य कुमुदं सगणं ततः।
अर्घ्यलेपनमाल्यानि धूपं तोयं यथाक्रमम् ॥४७॥
पायसान्नं पुनस्तोयं ताम्बूलं च प्रदापयेत्।
पश्चात्सन्तोषयेद्रम्यैर्महद्भिः शङ्खजै रवैः ॥४८॥
तदीयतालसङ्गीतनृत्तैश्चापि ततः परम्।
आगच्छतामरगणाः येऽग्न्याशामधिशेरते ॥४९॥
भीमा भीममुखा रौद्राः सपर्यामुद्यतामिमाम्।
गृहीत्वा पान्तु नस्तृप्ताः कुमुदाक्षानुयायिनः ॥५०॥
महन्त्विममुपायान्तु प्रीतास्तेभ्यो नमोस्तु वः।
अनेन कुमुदाक्षं तु समावाह्य गणाधिपम् ॥५१॥
प्राग्वत्सन्तोषयित्वा तु ततः सम्प्राप्य याम्यदिक्।
आगच्छत पितृगणाः याम्याशां येधिशेरते ॥५२॥
दारुणा दारुणाचाराः सपर्यामुद्यतामिमाम्।
गृहीत्वा पान्तु नस्तृप्ताः पुण्डरीकानुयायिनः ॥५३॥
महन्त्विममुपायान्तु प्रीतास्तेभ्यो नमोस्तु वः।
अनेन पुण्डरीकाख्यं समावाह्य गणेश्वरम् ॥५४॥
क्रमेण पूजयित्वा तु गत्वा वै यातुधानदिक्।

आगच्छत यातुगणा यात्वाशा येधिशेरते ॥५५॥
क्रव्याशिन क्रूरधिय सपर्यामुद्यतामिमाम् ।
गृहीत्वा पान्तु नस्तृप्ता वामनस्यानुयायिन ॥५६॥
महन्त्विममुपायान्तु प्रीतास्तेभ्यो नमोस्तु व ।
इत्यावाह्य गणेश तु वामन पूजयेत्क्रमात् ॥५७॥
वारणाशा ततो गत्वा शङ्कुकर्णं गणेश्वरम् ।
आगच्छताहिप्रथमा प्रतीचीं येधिशेरते ॥५८॥
महाविषा दन्दशूका सपर्यामुद्यतामिमाम् ।
गृहीत्वा पान्तु नस्तृप्ता शङ्कुकर्णानुयायिन ॥५९॥
महन्त्विममुपायान्तु प्रीतास्तेभ्यो नमोस्तु व ।
इत्यावाह्य यजेत्प्रागत्पश्चात्सम्प्राप्य वायुदिक् ॥६०॥
आयान्तु गन्धर्वगणा वाय्वाशा येधिशेरते ।
सुदर्शना भीमवेगा सपर्यामुद्यतामिमाम् ॥६१॥
गृहीत्वा पान्तु नस्तृप्ता सर्वनेत्रानुयायिन ।
महन्त्विममुपायान्तु प्रीतास्तेभ्यो नमोस्तु व ॥६२॥
अनेनावाह्य सगण सर्वनेत्र तु तोषयेत् ।
तत सोमदिश गत्वा सुमुख तु गणाधिपम् ॥६३॥
आगच्छत यक्षगणा उदीचीं येधिशेरते ।
विरूपा दण्डहस्ताश्च सपर्यामुद्यतामिमाम् ॥६४॥
गृहीत्वा पान्तु नस्तृप्ता सुमुखस्यानुयायिन ।
महन्त्विममुपायान्तु प्रीतास्तेभ्यो नमोस्तु व ॥६५॥
इति मन्त्रेण चावाह्य तोषयेत्पूर्ववर्त्मना ।
ततस्त्वीशानदिश गत्वा गणेश सुप्रतिष्ठितम् ॥६६॥
आयान्तु पिशाचगणा ईशाशा येधिशेरते ।
गन्यायुपहस्ताश्च सपर्यामुद्यतामिमाम् ॥६७॥

गृहीत्वा पान्तु नस्तृप्ताः सुप्रतिष्ठानुयायिनः ।
महन्त्विममुपायान्तु प्रीतास्तेभ्यो नमोस्तु वः ॥६८॥
मन्त्रेणावाह्य सम्पूज्य गत्वा वै ग्राममध्यतः ।
तत्र चावाहयेदूर्ध्वे प्रश्निगर्भं गणेश्वरम् ॥६९॥
आगच्छत सिद्धगणाः गगनं येधिशेरते ।
शुचिमतयः शुचयः सपर्यामुद्यतामिमाम् ॥७०॥
गृहीत्वा पान्तु नस्तृप्ताः प्रश्निगर्भानुयायिनः ।
महन्त्विममुपायान्तु प्रीतास्तेभ्यो नमोस्तु वः ॥७१॥
आवाह्य तोषयित्वा तु अधस्तान्मानवं ततः ।
आगच्छताधरगणाः पृथिवीं येधिशेरते ॥७२॥
बहुरूपा बहुज्ञानाः सपर्यामुद्यतामिमाम् ।
गृहीत्वा पान्तु नस्तृप्ताः मानवस्यानुयायिनः ॥७३॥
महन्त्विममुपायान्तु प्रीतास्तेभ्यो नमोस्तु वः ।
आवाह्य तोषयेत्प्राग्वत्क्रमात्क्रत्वावसानकम् ॥७४॥
तृप्तये सर्वभूतानां बलिशेषं ततः क्षिपेत् ।
बलिदाने तु पूर्वादि वैवस्वतदिगन्तिमम् ॥७५॥
आचार्यः प्राङ्मुखः स्थित्वा कुर्यादावाहनादिकम् ।
यास्त्वादित्रितये कुर्यात् पूर्वोदितमुदङ्मुखः ॥७६॥
सोमेशदिग्द्वये ग्राममध्येपि प्राङ्मुखो भवेत् ।
समतालस्तथा चद्धतालो वै शृङ्गिणी तथा ॥७७॥
मल्लतालो मङ्गलश्च जयतालश्च भद्रकः ।
दबरीमंझितस्तालो ब्रह्मतालस्तथैव च ॥७८॥
अनन्तताल इत्येते दश तालाः प्रकीर्तिताः ।
कुमुदादिगणेशानां दशानां क्रमशो द्विजाः ! ॥७९॥
षड्जर्षभौ च गान्धारो मध्यमः पञ्चमस्तथा ।

धैवतश्चैव निषादो धैवतो मध्यमस्तथा ॥८०॥
पञ्चमश्च क्रमेणैव कथिता स्तुर्दश स्वरा ।
गान्धारराग कौलास्य कौशिको नटभाषिक ॥८१॥
श्री कामदश्च तक्केशी दक्षरागस्तथैव च ।
चालापाण्यभिधो रागो मेघरागश्च पञ्चम ॥८२॥
इत्येते कुमुदादीना दशरागा प्रकीर्तिता ।
विलास सर्वतोभद्र खेटक चक्रमण्डलम् ॥८३॥
कान्तारकुट्टिम पृष्ठकुट्टिम कटिबन्धनम् ।
वामनानूर्ध्वनृत्त तु आदिम च द्वय पुन ॥८४॥
एते नृत्तविशेषाश्च कुमुदादे क्रमात् स्मृता ।
एते ह्यावृतिदेवाना क्रमाच्चालादय स्मृता ॥८५॥
अन्येषा सर्वदेवाना तालो भद्र प्रशस्यते ।
भद्रेरुडतालस्तु पक्षीदास तु मध्यम ॥८६॥
स्वरो रागस्तु गौड स्यान्नृत्त वै विष्णुक्रान्तकम् ।
विमार्गेर्नयताल स्यान्नृत्त स्वस्तिकमुच्यते ॥८७॥
ऋषभस्तु स्वर प्रोक्तो वराटीराग एव च ।
भेरीताडनपूर्व तु देवतावाहन चरेत् ॥८८॥
घोषयेद्डाहड ताळमन्तराळे तु वै दिशाम् ।
तत्काले देशिकेन्द्रेण स्वय सस्कृतगाथया ॥८९॥
अन्ये चतुर्मुखमुखा आहूतास्त्या मन्त्रणा ।
देवस्योत्सवमेवार्थ तथान्ये भगवद्गणा ॥९०॥
तथान्ये भगवद्भक्ता जनास्तत्पादसेविन ।
यज्ञा गुणैर्गुणैर्भगवद्भक्तिगृहीते ॥९१॥
आहातव्यास्तु तैर्विप्रैर्द्रव्यया गाथया द्विजा ।
एव ग्राम परिक्रम्य प्रासाद सम्प्रविश्य तु ॥९२॥

गरुडस्थानमासाद्य तोषयित्वा खगध्वजम् ।
ताळादिनैस्ततस्त्वेन विष्वक्सेनं तु तोषयेत् ॥९३॥
ततस्तु चौत्सवं बिम्बं यागशालां प्रवेशयेत् ।
वक्ष्यमाणप्रकारेण सर्वलक्षणसंयुताम् ॥९४॥
प्रथमावरणे वापि द्वितीयावरणेऽपि वा ।
तृतीयावरणाद्यौ वा यथाभिमतदिग्गताम् ॥९५॥
तथा प्रागानना यद्वा यथाभिमतदिङ्मुखाम् ।
एकद्वारा चतुर्द्वारा यद्वा द्वारद्वयान्विताम् ॥९६॥
भित्तियुक्तामयुक्तां वा कोणभित्तिसमन्विताम् ।
क्षिप्रकर्मप्रसिद्ध्यर्थं केवलं वा प्रपाकृतिम् ॥९७॥
धूमनिर्गमनोपेतां मध्ये वेदिसमन्विताम् ।
तदूर्ध्वे होमकुण्डं तु सचतुर्मेखलं भवेत् ॥९८॥
मेखलात्रययुक्तं वा द्विमेखलमथापि वा ।
तथैकमेखलं वापि चतुरश्रं सलक्षणम् ॥९९॥
तत्पूर्वे मण्डलोपेतां वह्नौ दीपघटान्विताम् ।
पश्चिमे दीप (बिम्ब) संयुक्तामुत्तरे चाङ्कुरैर्युताम् ॥१००॥
ईशान्ये कुम्भसंयुक्तां सर्वोपकरणैर्युताम् ।
अलङ्कृतां वितानाद्यैस्तोरणध्वजशोभिताम् ॥१०१॥
एवंविधां यागशालां प्रविश्य गुरुसत्तम ।
प्राग्दिशि प्रत्यङ्मुखा योज्या ऋग्वेदा ह्याग्नेयेषु च ॥१०२॥
दक्षिणे च उदग्वक्त्रान्यजुर्वेदांश्च योजयेत् ।
प्राङ्मुखान्पश्चिमे भागे सामगान्विनियोजयेत् ॥१०३॥
सह वेदान्तैर्विप्रैर्निगमैरन्तर्भिने ।
दिश्युत्तरस्यां च ततो नियोज्य गणपान् ॥१०४॥
निवेश्याथर्ववेदज्ञान् सर्वान् [illegible]समन्वया ।

प्रवर्तिते वेदघोषे वाद्यघोषे च बाह्यत ॥१०५॥
प्रविश्य कलशस्थान समीपे तु वरासने ।
प्राङ्मुख सस्मरेन्मन्त्र पूर्ववद्ध्यातिभाविते ॥१०६॥
उपविश्य यथान्यायमन्तर्यागान्तमाचरेत् ।
करादिशुद्धिपूर्वं तु पश्चादर्घ्यादिकल्पनम् ॥१०७॥
प्राग्वत्कृत्वा ततोऽभ्यर्च्य मन्त्रसङ्घ तु देहगम् ।
पुण्याह वाचयित्वा तु प्रोक्षयेत्सर्वसाधनम् ॥१०८॥
द्वौ द्वौ तु पूर्वं कलशौ सौवर्णौ राजतौ तु वा ।
ताम्रजौ मृण्मयौ वाथ सापिधानौ सपल्लवौ ॥१०९॥
फलरत्नादिकैर्युक्तौ सूत्रेण परिवेष्टितौ ।
शालिपीठोपरि स्थाप्य प्रतिद्वारे तु पार्श्वयो ॥११०॥
द्वारयाग तत कुर्यात्पूर्वाद्युत्तरपश्चिमम् ।
अर्घ्यालेपनमाल्यैश्च धूपैर्गुग्गुलमिश्रितै ॥१११॥
अथादाय दृढ शुभ्रमेकरूप च निर्व्रणम् ।
कुम्भ च मृण्मय रम्य सौवर्णं वाथ राजतम् ॥११२॥
रत्नहाटकस्रग्गन्धफलसर्वौषधीयुतम् ।
शुभपादपशाखाढ्य पट्टस्रग्गन्धभूषितम् ॥११३॥
गाङ्गिलोदकसम्पूर्णं वारिधारान्वित नवम् ।
चन्दनाद्यनुलिप्त च परितश्चाक्षतार्चितम् ॥११४॥
वेष्टित परित सूत्रैर्विकीर्योपरि त न्यसेत् ।
तद्देवताशरीर तु पश्येदमलवर्चसम् ॥११५॥
शस्त्रेण चक्रमन्त्रेण मन्त्रयेदथ वर्धनीम् ।
पूर्वोक्तद्रव्यसयुक्ता परित सूत्रवेष्टिताम् ॥११६॥
आवाह्य मन्त्रनाथस्य दक्षिणे कलशोत्तरे ।
विन्यस्य परितस्तत्र स्थापयेत्कलशाष्टकम् ॥११७॥

सपल्लवं सापिधानं सूत्रेण परिवेष्टितम् ।
कुम्भमध्ये विभोः पश्चादासनं परिकल्प्य च ॥११८॥
तन्मध्ये पुण्डरीकाक्षं समावाह्य विधानतः ।
सान्निधिं सन्निरोधादि भोगयागावसानकम् ॥११९॥
पूर्ववत्सकलं कृत्वा तस्य दक्षिणदिग्गतम् ।
अस्त्रविग्रहरूपं च ध्यात्वाभ्यर्च्य यथाविधि ॥१२०॥
ध्वंसयन्तं च विघ्नानां जालं कर्मावसानकम् ।
अष्टासु तत्र कुम्भेषु परितः स्थापितेषु च ॥१२१॥
वासुदेवादयः पूज्याः प्रभवाप्यययोगतः ।
इदमभ्यर्थयेद्देवं सास्त्रं बद्धांजलिः स्थितः ॥१२२॥
यागालयं हि विश्वेश गृहाण रचितं मया ।
आसामर्ति भज विभो क्रियाङ्गानां च सन्निधिम् ॥१२३॥
ततोऽस्त्रोदकधारां चाप्यच्छिन्नां भित्तिकां नयेत् ।
प्रदक्षिणेन प्राग्भावात्तत्पादान्तं च तत् स्मरेत् ॥१२४॥
अथवेशानदिग्भागात्तत्पादान्तं द्विजोत्तमाः ! ।
पृष्ठतः कलशं भ्राम्य तुल्यकालं तु वा पृथक् ॥१२५॥
कलशं वर्धनीयुक्तं विन्यस्य विकिरोर्ध्वगम् ।
अर्घ्यदानं तयोः कृत्वा पुष्पाद्यैः पूरयेत्पुनः ॥१२६॥
अस्त्रेण वस्त्रयुग्मं तु अहतं चाभिमन्त्र्य वै ।
धूपाधिवासितं कृत्वा तावुभौ परिवेष्टय च ॥१२७॥
अथ वा भद्रपीठं तु विन्यसेद्विकिरोर्ध्वगम् ।
सास्त्रं हि मन्त्रकलशं तत्राधारगतं न्यसेत् ॥१२८॥
चतुर्भिर्द्यैकभारैर्वा शालिभिर्विष्टरे कृते ।
तावन्मानैस्तिदर्धान्वा तदूर्ध्वे तण्डुलान्न्यसेत् ॥१२९॥
तत्पादांस्तत्समान्वापि तदूर्ध्वे विन्यसेत्तिलान् ।

तदूर्ध्वे चाहतं वस्त्रयुग्ममास्तीर्य वै शुभम् ॥१३०॥
कलशं वर्धनीयुक्तं तदूर्ध्वे चापि विन्यसेत् ।
प्राग्वत्सास्त्रं तु देवेशमासनादिक्रमाद्यजेत् ॥१३१॥
व्यापारमाचरेद्दिव्यं कुम्भके च स्मरन्विभुम् ।
नानिशं युज्यते यस्मात्तस्मादेषा प्रतिक्रिया ॥१३२॥
विभाव्य मन्त्रिणा कौम्भीं अस्त्रं रक्षार्थमेव हि ।
ततो मण्डलवेदिं तु समासाद्य च देशिकः ॥१३३॥
उपलिप्याथ भूभागं साम्भसा गोमयेन तु ।
तत्र मण्डलमालेख्यं सूत्रयित्वा यथाविधि ॥१३४॥
तद्विधानं विशेषेण शृणुध्वं मुनिपुङ्गवाः ! ।
संसाध्य यष्टियोगेन सूत्रात्पूर्वापरे पुरा ॥१३५॥
तद्दिग्द्वयान्तरे दद्यात्पार्श्वे सूत्रचतुष्टयम् ।
समांशेन द्विधा कृत्वा स्फुटं मध्यात्तदन्त्य च ॥१३६॥
साधितेनार्धमानेन प्राक्प्रत्यक्स्थेन तन्तुना ।
दक्षिणोत्तरभागाभ्यां समुत्पाद्य चतुष्पथौ ॥१३७॥
सूत्रं पूर्वापरसमं कृत्वा तदुपरि क्षिपेत् ।
पुनरर्धसम दिक्षु दत्वा कोणचतुष्टयम् ॥१३८॥
चतुष्पथचतुष्केण नयेद्यक्तिं प्रसार्य वै ।
समं सूत्रचतुष्कं च चतुरश्राश्रसिद्धये ॥१३९॥
तद्विभज्याष्टदशभिश्चतुर्दिक्षु पदैः समैः ।
क्षिपेत्सूत्रगणं तत्र घटिकारेणुरञ्जितम् ॥१४०॥
मध्ये पद्मावनीं कुर्याद्भागपङ्क्तित्रये क्रमात् ।
तद्बहिः पदपङ्क्त्या तु पीठमष्टदिगन्वितम् ॥१४१॥
तस्य भागचतुष्कात्तं दिक्चतुष्कं प्रकल्प्य च ।
विदिक्चतुष्कं त्रिपदं पदपङ्क्त्या पीठमदक्षिणम् ॥१४२॥

प्रदक्षिणक्षितेर्बाह्याचतुष्कं दिक्चतुष्टयात् ।
चतुर्णां तु चतुर्णां तु बाह्याद्बाह्यं द्वयं द्वयम् ॥१४३॥
शोधयित्वा तु तद्बाह्याचतुष्कं द्वारसिद्धये ।
चतुष्टयं क्रमेणैव भूयो दिक्षु पदं पदम् ॥१४४॥
सबाह्याभ्यन्तरगतं शोधनीयं प्रयत्नतः ।
पुनः सर्वपदाभ्यां तु षट्कं षट्कं तु चान्तरात् ॥१४५॥
सम्मार्ज्य पूर्णशोभार्थं तत्र रक्तोत्पलाष्टकम् ।
यथा दिक्षु स्थितं कुर्यात्पूजनाय दिवौकसाम् ॥१४६॥
बाह्यस्थपदपङ्क्तौ तु त्रीणि त्रीणि तु लोपयेत् ।
त्रयाणामन्तरस्थं यत्पदमेकात्मतां नयेत् ॥१४७॥
उपशोभं तु तं विद्धि कुर्यान्नीलाब्जभूषितम् ।
पञ्चकं पञ्चकं कोणाद्वीथौ नीत्वा लयं पुरा ॥१४८॥
शेषैः कोणं तु निर्वर्त्य सान्तरं च ततो बहिः ।
दद्यात्सूत्रत्रयं चैव मध्येऽथ कमलं लिखेत् ॥१४९॥
सचक्रमष्टपत्रं तु तस्य लक्षणमुच्यते ।
षट्त्रिंशत्कोष्ठमध्ये तु शङ्कुं संस्थाप्य यत्नतः ॥१५०॥
सूत्रभ्रमैस्तु सुसमं कुर्यान्मण्डलपञ्चकम् ।
तेष्वाद्यं मण्डलं मध्ये भवेद्वै कर्णिकास्पदम् ॥१५१॥
द्वितीयं मण्डलं त्रेधा भङ्क्त्वा सूत्रभ्रमैः पुनः ।
तेष्वाद्यं केसरस्थानं द्वितीयं दलमंडलम् ॥१५२॥
तृतीयं तत्पुनस्त्रेधा भक्तं नाभित्रयं चरेत् ।
नाभेर्बहिर्मण्डलयोः द्वादशाराणि कल्पयेत् ॥१५३॥
तद्बहिर्मण्डलं त्वेकं नेमिस्थानं प्रकल्पयेत् ।
कृत्वेत्थं वर्णकैः पूतैः पूरणीय महोज्वलैः ॥१५४॥
उच्छ्रायवितनां पीता सबीजां विद्धि कर्णिकाम् ।

रेखान्वितानि पत्राणि सर्वाणि सुसितानि च ॥१५५॥
केसरत्रितय कुर्यात्पले पलेऽरुणप्रभम् ।
दळान्तराळमसित श्वेत पीत च पाटलम् ॥१५६॥
नाभित्रय क्रमेण स्याद्रक्तवर्णान्यराणि तु ।
नेमेस्तु पूर्वभाग स्यात्कृष्णवर्ण सितोऽन्तिम ॥१५७॥
सितानि पीठकोणानि रक्त नद्दिक्चतुष्टयम् ।
राजोपलप्रभा वीथी पत्रमाल्याद्यलङ्कृता ॥१५८॥
पश्चिमाश विना सर्वद्वाराण्यम्बुजपत्रवत् ।
कृष्णानि सर्वशोभानि द्वारोद्देशस्थितानि च ॥१५९॥
तदर्धाकृतितुल्यानि उपशोभानि गर्भवत् ।
कोणानि केसराभानि सितशङ्खान्वितानि च ॥१६०॥
शोणहेमादिवर्णं च क्रमाद्रेखागण बहि ।
कृत्वैवमनुसन्धाय सर्वात्मत्वेन देहवत् ॥१६१॥
रजासि विद्धि मूलानि सितपीतादिकानि च ।
तन्मात्राण्युपशोभानि शोभानि करणानि च ॥१६२॥
एव सर्वाणि कोणानि सद्वाराणीन्द्रियाणि च ।
बहिरावरण यद्वै सत्वाद्य त्रितय हि यत् ॥१६३॥
मन सुवितता वीथी गर्व पीठमुदाहृतम् ।
धी पद्म तदधिष्ठाता धीनात्मा चिन्मय पुमान् ॥१६४॥
अमूर्त ईश्वरश्चात्र तिष्ठत्यानन्दलक्षण ।
यस्य सदर्शनादेव शश्वद्भाव प्रसीदति ॥१६५॥
समज्ञानामसज्ञाना वपुष्पाते हृते सति ।
मायनो मुक्तिभाना च इह जन्मस्वेपिणाम् ॥१६६॥
देव आत्मेज्जना हित्वा बहिरन्तश्च कर्मिणाम् ।
अन्यथा दृष्टमार्गार्द पथमाहादमेति वै ॥१६७॥

अन्तः संवेदनसममस्तित्वप्रतिपादकम् ।
यद्यत्स्वलक्षणं तत्वं तत्तत्सर्वत्र सिद्धिगम् ॥१६८॥
वस्तुत्वेन गृहीत्वैवं मण्डलं पूर्वनिर्मितम् ।
नाम्नाब्जनाभमुवर्न सर्वदुःखक्षयंकरम् ॥१६९॥
ततस्तस्मिन् विभोः प्राग्वदासनं परिकल्प्य च ।
तन्मध्ये देवदेवेशं समावाह्य यथाविधि ॥१७०॥
सन्निधिं सन्निरोधादि भोगयागावसानकम् ।
सर्वं च पूर्ववत्कृत्वा आसनाद्यैः पुरोदितैः ॥१७१॥
पूजयेज्जपयज्ञान्तं देवेशं मण्डले गुरुः ।
मण्डले कुम्भयागे च प्रोक्षणे स्नानमाचरेत् ॥१७२॥
ततस्तु मूर्तिपैः सार्धं गत्वा वै बिम्बसन्निधिम् ।
तत्र सम्पूजयेद्देवं महता विभवेन तु ॥१७३॥
ततः कुण्डसमीपं तु गत्वा देशिकसत्तमः ।
कुण्डं तत्रानलं चापि संस्कृत्य विधिवत्ततः ॥१७४॥
अग्नौ सन्तर्पणं कुर्याद्यथोक्तविधिना विभोः ।
समिद्भिश्चैव नित्याभिः काम्याभिश्च यथाक्रमम् ॥१७५॥
पूर्णाहुत्यादिकं सर्वं प्राग्वदेव समाचरेत् ।
नोत्सृजेत्परिधीन् दर्भान् देवान्नोद्वासयेत्ततः ॥१७६॥
प्रत्यहं धारयेदग्निं यावत्तीर्थदिनान्तिमम् ।
अहोरात्रं प्रतिदिनं जुहुयादुक्तवर्त्मना ॥१७७॥
ततो बिम्बान्तिकं गत्वा कृत्वा होमनिवेदनम् ।
सर्वं तु सम्प्रदानान्तं क्रमात्कृत्वा ततः परम् ॥१७८॥
विभवे सति वै कुर्याद्भूयः सम्पूजनं विभोः ।
ततो द्वारबलिं दद्याच्चतुर्दिक्षु यथाविधि ॥१७९॥
ततश्च यागगेहात्तु देवमन्तः प्रवेशयेत् ।

तत्र सम्पूज्य देवेशं रात्रिशेषं समापयेत् ॥१८०॥
अङ्कुरारोपणदिनात्पुष्पयागदिनान्तिमम् ।
यत्र कुर्याद्देशिकेन्द्रो दिनद्वादशके क्रमात् ॥१८१॥
स्नानार्चनादिकं कृत्वा पीत्वा तच्चरणोदकम् ।
कुशोदकसमायुक्तं जपेदष्टाक्षरं मनुम् ॥१८२॥
नैवेद्यप्राशनं पूर्वं कुर्यात्रक्ताशनं द्विजाः ।
जपेत् द्वादशनामानि क्रमाद्वाच्यमनुस्मरन् ॥१८३॥
द्वितीये दिवसे प्राप्ते देशिको मन्त्रवित्तम ।
स्नानादिनित्यनियमान् निर्वर्त्य सह मूर्तिपैः ॥१८४॥
नित्यार्चनं विभोः कृत्वा विशेषेण यत्नेतः ।
प्रविश्य यागसदनं पूर्वोक्तविधिना गुरुः ॥१८५॥
कृत्वा द्वारार्चनान्तं तु गत्वा कुम्भस्य सन्निधिम् ।
कुम्भे च मण्डले चैव यजेद्देवं यथाविधि ॥१८६॥
कुम्भे च मण्डले चैव पूर्वं यत्रार्चनं कृतम् ।
अन्येद्युरपि तत्रैव पूजनं तु समाचरेत् ॥१८७॥
न पर्युषितदोषोऽस्ति तयोर्यस्मात् मुनीश्वराः ।

अष्टाङ्गेन नमस्कृत्य पूजयेत्पुरुषोत्तमम् ।
अर्घ्यालभनमाल्यैश्च धूपेरङ्गादिसंयुतम् ॥१९३॥
तत्सर्वं योग्यमाहर्तुं पूजान्तरनिवेदितम् ।
पुष्पपूर्वं समादाय शिरसा चाभिनद्य तत् ॥१९४॥
समर्प्य विष्वक्सेनस्य ह्रस्वमन्त्राभिमन्त्रिते ।
सपीठं भगवद्बिम्बं निर्मलीकृत्य वारिभिः ॥१९५॥
प्रासादं शोधयित्वा तु देवदेवं समर्चयेत् ।
स्नानैस्तु क्षीरपूर्वैर्वा धात्रीफलपुरस्सरैः ॥१९६॥
यथाक्रमोपदिष्टैस्तु नान्यभोगैरकृत्रिमैः ।
प्रदक्षिणप्रणामान्तं विशेषोत्सवमाचरत् ॥१९७॥
ततो यागगृहं गत्वा वह्नौ सन्तर्पयेद्विभुम् ।
पूर्वोक्तविधिना पश्चात्संस्कृतेनाथ वह्निना ॥१९८॥
चरुं संश्रापयेच्चुल्यां ह्रुदा क्षीराज्यतण्डुलैः ।
समुद्धृत्याज्यपूतं तु विनिवेद्य यथाक्रमम् ॥१९९॥
कलशस्थलबिम्बानामेकांश जुहुयात्ततः ।
यद्वा यागसमारम्भात्पूर्वं संसाध्य वै चरुम् ॥२००॥
कलशस्थलबिम्बानां क्रमात् कृत्वा तु पूजनम् ।
सर्वं द्विजप्रदानान्तं वह्नौ सन्तर्पयेत्ततः ॥२०१॥
दत्त्वा पूर्णाहुतिं पश्चात्कुर्याद्द्वारनलिं तथा ।
गत्वा बिम्बसमीपं तु कृत्वा होमनिवेदनम् ॥२०२॥
बलिबिम्बमथादाय यानमारोप्य वै ततः ।
अलङ्कुर्याद्विशेषेण वस्त्राभरणमाल्यकैः ॥२०३॥
वहेयुर्ब्राह्मणा यानं ध्यायन्तो विहगेश्वरम् ।
प्रथमावृतिमारभ्य रथ्यावरणपश्चिमम् ॥२०४॥
प्रदक्षिणक्रमेणैव बलिदानपुरस्सरम् ।

भ्रामयित्वा तु देवेश ततो भ्रामेऽपि पूर्ववत् ॥२०५॥
ग्रामसैन्द्रादियोगेन दिशासु विदिशासु च ।
मध्ये च कुमुदादीना सगणाना क्रमेण तु ॥२०६॥
पीठिकासु बलिं दद्यान्निर्मितासु पुरैव तु ।
भूतले गोमयाद्येन लेपिते वा यथारुचि ॥२०७॥
दशाना कुमुदादीना गणेशाना द्विजोत्तमा ।
प्रणवाद्यैर्नमोन्तैस्तु स्वैः स्वैर्नामभिरेव च ॥२०८॥
अर्घ्यं गन्ध तथा माल्य धूप गन्धाम्बुपूर्वकम् ।
बलिं भूयो जल चापि ताम्बूल क्रमशो ददेत् ॥२०९॥
नृत्तगीतादिक सर्वं पूर्ववत्परिकल्पयेत् ।
एव ग्रामबलिं कृत्वा बलिबिम्बाग्रतो गुरु ॥२१०॥
अनुक्ताना च सर्वेषा ग्राममध्ये मुनीश्वरा ।
नम पारिषदेभ्यश्चेत्युक्त्वा शिष्टबलिं क्षिपेत् ॥२११॥
ततस्तु बलिबिम्ब तु प्रवेश्यान्तर्मुनीश्वरा ।
अभ्यर्च्य श्रमशान्त्यर्थं स्वस्थाने सन्निवेशयेत् ॥२१२॥
एव कालद्वये कुर्याद्बलिं तीर्थदिनान्तिमम् ।
आरभ्य नवमे रात्रौ समाप्तिर्दिवसेऽहनि ॥२१३॥
बलिमेक विपन्मध्यदिवसेषु बलिद्वयम् ।
एव क्रिया कृत्वा च नित्यपूजापुरस्सरम् ॥२१४॥
शिबिकायानतन कुर्याद्दृत्यन्त देशिकोत्तम ।
यात्रागमन रात्रौ दिवसे वा यथारुचि ॥२१५॥
यात्रान्ते देशिक कुर्यात्तद्विधानमिहोच्यते ।
यात्राबिम्बगत देवं देवीभ्या सह वा विना ॥२१६॥
अलङ्कृत्य विशेषेण विचित्रवसनैस्तथा ।
विविधैर्भूषणैश्चापि माल्यैर्नानाविधैस्तथा ॥२१७॥

अलङ्कृतं विशेषेण यानं हेमादिनिर्मितम् ।
समानीय तु संप्रोक्ष्य ध्यात्वा गरुडरूपिणम् ॥२१८॥
तन्मन्त्रेण समभ्यर्च्य यानमर्घ्यादिभिस्ततः ।
कृत्वा पुण्याहघोषं च श्रुतिघोषसमन्वितम् ॥२१९॥
शङ्खतूर्यादिसंयुक्तं प्रादक्षिण्यक्रमेण तु ।
याने तत्र समारोप्य यात्रामूर्तिगतं विभुम् ॥२२०॥
दृढीकृत्य विशेषेण ह्यलङ्कृर्याज्जगत्प्रभुम् ।
अर्घ्याद्यैरर्चयित्वा तु ताम्बूलादीन्निवेदयेत् ॥२२१॥
वहेयुर्ब्राह्मणा यानं ध्यायन्तो विहगेश्वरम् ।
अथ वा वैष्णवाः शूद्रा वहेयुर्भक्तिसंयुताः ॥२२२॥
ग्रामे वा नगरे वापि पट्टणे वा मुनीश्वराः ! ।
प्रदक्षिणक्रमेणैव परिभ्रमणमाचरेत् ॥२२३॥
आभ्रणैर्ध्रियमाणैश्च कन्चुकोष्णीषधारिभिः ।
मौक्तिकैरातपत्रैश्च मायूरैश्च सुशोभनैः ॥२२४॥
हेमदण्डसमायुक्तैस्तालवृन्तैस्तथाविधैः ।
पट्टजैर्विविधैश्चापि चामरैश्च सितासितैः ॥२२५॥
केतुदण्डैश्च विविधैर्वैजयन्तीविभूषितैः ।
केवलै रत्नदण्डैश्च तथान्यैर्माङ्गल्यकैः ॥२२६॥
बन्दिवृन्दैश्च विविधैर्वीणावेणुस्वनैस्तथा ।
सुवर्णशृङ्गघोषैश्च तथान्यैर्मङ्गलस्वनैः ॥२२७॥
गणिकादेवदासीभिस्तथा नागरकैर्जनैः ।
विप्रैर्वेत्रलताहस्तैः कन्चुकोष्णीषभूषितैः ॥२२८॥
सुमृष्टधूपपात्राणि वहद्भिः पार्श्वतस्तथा ।
अनेकशतमङ्ग्यातैर्दीपैरतिसमुज्ज्वलैः ॥२२९॥
पादुके रत्नखचिते पात्रे हेमादिनिर्मिते ।

विन्यस्य देवपुरतो वहद्भि परिचारकै ॥२३०॥
ऋग्यजुस्सामवेदांस्तु पठद्भि पृष्ठत स्थितै ।
ब्राह्मणैर्दक्षिणे भागे तथा चैकायनीं श्रुतिम् ॥२३१॥
संहिता सात्वताद्याश्च पठद्भिर्भक्तिसंयुतै ।
वासुदेवस्य माहात्म्य कथयद्भिश्च सन्ततम् ॥२३२॥
वासुदेवार्चनपरै सात्विकै पाञ्चरात्रिकै ।
वामे तु सेतिहासानि पुराणानि स्मृतीरपि ॥२३३॥
नानाभाषाविरचिता विष्णुपारम्यसूचका ।
पठद्भिर्ब्राह्मणैर्भक्तैस्त्रय्यन्तार्थविचारिभि ॥२३४॥
शाब्दिकैस्तार्किकैश्चैव तथा मौहूर्तिकादिभि ।
तत्तच्छास्त्रप्रमेय तु ब्रुवाणैर्विनयान्वितै ॥२३५॥
गायद्भिरग्रे देवस्य द्रामिडीं श्रुतिमुत्तमाम् ।
तथा भाषाप्रबन्धाश्च गद्यपद्यात्मकानि च ॥२३६॥
तथा च वैष्णवीभक्त्या तुवाणैर्वैष्णवोत्तमे ।
ब्राह्मणै क्षत्रियैर्वैश्यै शूद्रैश्च भगवत्परै ॥२३७॥
भगवद्दर्शनासक्तचित्तै प्रणतिशालिभि ।
सेनया सर्वतो दिक्षु चतुरङ्गबलाख्यया ॥२३८॥
राजोचितै परिकरैरन्यैश्च विविधै सह ।
देव ग्रामादिवीथीषु भ्रामयेत्तु प्रदक्षिणम् ॥२३९॥
यात्राया वर्तमानया देवदेवाय भक्तित ।
सुगवास मताम्बूल बहुशो विनिवेदयेत् ॥२४०॥
चन्दन श्रमनाशार्थं कर्पूराद्य सुभावितम् ।
प्रदद्याद्देवदेवाय माल्यानि विविधान्यपि ॥२४१॥
क्षीराद्य [illegible] नारिकेरजलान्वितम् ।
श्रमापनोदनार्थानि अन्यान्यपि निवेदयेत् ॥२४२॥

दिगष्टके च ग्रामादेस्तन्मध्ये च विशेषतः ।
गीतकैर्विविधैर्नृत्तैस्तन्त्रीवाद्यसमन्वितैः ॥२४३॥
शङ्खभेरीमृदङ्गाद्यैर्देवेशं परितोषयेत् ।
एवं देवं परिभ्राम्य नयेद्वाह्ये तु मण्टपे ॥२४४॥
समारोप्य च सौवर्णे विष्टरे जगतांपतिम् ।
अर्घ्यं पाद्यं तथाचामं गन्धमाल्ये च दीपकम् ॥२४५॥
धूपं नीराजनं चैव समर्प्य च यथाविधि ।
अथार्हणजलं स्वच्छमपूपान् पृथुकानपि ॥२४६॥
तर्पणं नालिकेरोत्थरसमाचमनं तथा ।
मुखवाससमेपेतं ताम्बूलं च क्रमेण तु ॥२४७॥
निवेद्य देवदेवाय उपहारांस्तु दर्शयेत् ।
पूजाकाले तु सर्वत्र भूषामाल्याम्बरार्पणम् ॥२४८॥
विसर्जनं च तेषां वै तथा चाम्यवहारिकैः ।
भोगैरभ्यर्चनं चैव इतरालक्ष्यमाचरेत् ॥२४९॥
तत्सिद्ध्यै देवमभितः स्तरेद्यवनिकापटम् ।
ततस्तु मण्टपात्तस्मान्मन्दिरान्तः प्रवेशयेत् ॥२५०॥
महापीठस्य पुरतो देवमर्घ्यादिभिर्यजेत् ।
अपूपानुपहारांश्च ताम्बूलादीन्निवेदयेत् ॥२५१॥
देवाग्रे चतुरो वेदान् पाठयेत्तदनन्तरम् ।
पाठयेद्द्राविडीं चापि स्तुतिं वैष्णवसत्तमैः ॥२५२॥
शङ्खमर्दळनादैश्च नृत्तगीतादिभिः सह ।
भ्रामयेद्देवदेवेशं प्रादक्षिण्येन मन्दिरम् ॥२५३॥
ततः प्रवेशयेन्मन्दं मन्दं सोपानमार्गतः ।
तद्वानीं देवदेवाय ताम्बूलादीन् समर्पयेत् ॥२५४॥
चामरैस्तालवृन्ताद्यैर्वीजयेच्छ्रमशान्तये ।

स्तोत्रैः स्तुवीत देवेश संस्कृतैर्द्रामिडैस्तु वा ॥२५५॥
वीणावेणुमृदङ्गैश्च मङ्गलैस्तालनिस्वनैः ।
द्रामिडस्तुतिगीतानि कुर्यात्त्रिर्वैष्णवोत्तमैः ॥२५६॥
तथा मङ्गलगानाभिर्गणिकाभिः पदे पदे ।
उच्चैरुद्घुष्यमाणैश्च वन्दिस्तोत्ररवैः सह ॥२५७॥
नानाविधोपचारैश्च देवमन्तः प्रवेशयेत् ।
प्रासादद्वारदेशे तु देवदेवस्य भक्तितः ॥२५८॥
अर्घ्यं पाद्यं तथाचामं गन्धं माल्यं च धूपकम् ।
निवेद्य देवदेवेशं स्वस्थाने संनिवेशयेत् ॥२५९॥
वाहनारोहणं स्वेन कुर्याद्देवस्य नित्यशः ।
प्रथमे शिबिकायानं द्वितीये शेषपीठिका ॥२६०॥
तृतीये चन्द्रबिम्बं च दिवा चेत्सूर्यमण्डलम् ।
चतुर्थे दिवसे प्राप्ते पुष्पमण्टपवाहनम् ॥२६१॥
पञ्चमे दिवसे प्राप्ते गरुडारोहणं भवेत् ।
षष्ठे दिने तु सम्प्राप्ते तन्निशाया दिवापि वा ॥२६२॥
बल्यन्तमर्चनं कृत्वा देवमास्थानमण्टपे ।
भद्रासने समारोप्य पुरतस्तस्य शोधिते ॥२६३॥
भूतले धान्यपीठे तु चूर्णकुम्भं च विन्यसेत् ।
प्रोक्ष्य पुण्याहतोयेन श्रियं तत्र समर्चयेत् ॥२६४॥
सदर्भकर्मणाच्छाद्य चक्रं तत्र नियोजयेत् ।
रक्षार्थं च ततो देवमर्घ्याद्यैर्हविरन्तिमैः ॥२६५॥
समभ्यर्च्य च हारिद्रं चूर्णमादाय देशिकः ।
श्रीसूक्तमुच्चरन्देवं चूर्णं समभिषेचयेत् ॥२६६॥
मण्टपाभ्यन्तरे तु शालितण्डुलनिर्मिते ।
गिरौ तु जन्तोर्णां गोरूपां वाथ गजनाम् ॥२६७॥

हैमेन च वितानेन प्रभया च विशेषतः ॥२८०॥
मध्यतो मद्रपीठेन मौवर्णेन तथैव च ।
ध्वजैश्च विविधै रम्यैः पताकाभिश्च सर्वतः ॥२८१॥
भूषयेद्रथयानं तु तथा गरुडकेतुना ।
सौवर्णकुम्भशिखरैः रथमेवमलङ्कृतम् ॥२८२॥
सम्प्रोक्ष्य पञ्चगव्येन तथा पुण्याहवारिभिः ।
रथस्य पादादूर्ध्वान्तं स्थितान् देवान् समर्चयेत् ॥२८३॥
प्रथमं पादचक्रेषु वह्न्यादीशानपश्चिमम् ।
सत्यं सुपर्णं गरुडं तार्क्ष्यं चैव यथाक्रमम् ॥२८४॥
तत्तन्मन्त्रैः समभ्यर्च्य अन्यत्र विहगेश्वरम् ।
चक्रदण्डद्वये मायां चक्रे च शशिभास्करौ ॥२८५॥
अनन्तं च तदाधारे भारास्ये दण्डकद्वये ।
विश्वरूपधरो विष्णु शक्तीशश्चाप्युभाविमौ ॥२८६॥
परित. पट्टिकाजाले केशवादीननुक्रमात् ।
गात्रेषु गात्रपादेषु धर्माद्य स्त्वष्टक यजेत् ॥२८७॥
गात्राद्द्वारान्तरे न्यस्येच्चक्राद्यायुधमन्त्रयम् ।
रथप्रासादमूर्धान्ते स्थूपिकायां सदाहरिम् ॥२८८॥
कूटशालासु पूर्वोक्तवासुदेवादिकान्यजेत् ।
एकशृङ्गादिकान् न्यस्त्वा परितो वेदिकातले ॥२८९॥
कूर्मादीन्द्वादश तथा ग्रीवाया परितो यजेत् ।
शिखरे तु यजेत्पश्चादनन्तादीननुक्रमात् ॥२९०॥
सर्वेषामूर्ध्वतो विभा. । पद्मनाभं ध्रुवं यजेत् ।
अर्घ्यमगन्धपुष्पैश्च क्रमेणैतान् प्रपूज्य च ॥२९१॥
चण्डाद्यं च सुभद्रान्तं द्वौ द्वौ दिक्षु समर्चयेत् ।
कुमुदादिगणेशानान् लोकपालान्यथाक्रमम् ॥२९२॥

तत्तत्स्थानेषु सम्पूज्य रथं गरुडरूपिणम् ।
ध्यात्वाभ्यर्च्य ततोऽर्घ्याद्यैर्हविरन्तं ततो गुरुः ॥२९३॥
चण्डादीनां बलिं दत्वा रथस्य परितस्ततः ।
देवगेहं समासाद्य मूर्तिपैः सह देशिकः ॥२९४॥
यानमारोप्य देवेशं श्रीपुष्टिभ्यां समन्वितम् ।
आस्थानमण्टपं नीत्वा समारोप्य च विष्टरे ॥२९५॥
अर्घ्याद्यैर्देवमभ्यर्च्य विविधैरुपचारकैः ।
यात्रानिर्विघ्नसिद्ध्यर्थं बीजानि विविधानि च ॥२९६॥
फलानि च हिरण्यानि तथा दध्योदनं द्विजाः ! ।
देवस्य सन्निधौ दत्वा विप्रेभ्यो देशिकोत्तमः ॥२९७॥
सुमुहूर्ते सुलग्ने च दैवज्ञपरिचोदिते ।
रथस्यारोहणार्थं तु देवमभ्यर्च्य यत्नतः ॥२९८॥
पादुके विनिवेद्याथ यानमारोप्य पूर्ववत् ।
वेदघोषैस्तथा घण्टाघोषैर्मङ्गलनिस्वनैः ॥२९९॥
तथा जयजयारावैः काहलैः शङ्खनिस्वनैः ।
भेरीपटहवादित्रनृत्तगीतादभिः सह ॥३००॥
छत्रचामरपूर्वैश्च यात्रोपकरणैः सह ।
प्रथमावृतिमारभ्य रथ्यावरणपश्चिमम् ॥३०१॥
प्रदक्षिणक्रमेणैव परिभ्राम्य च पूर्ववत् ।
रथं प्रदक्षिणीकृत्य सुमुहूर्ते सुलग्नके ॥३०२॥
रथमारोपयेद्देवं ब्राह्मणैः सुप्रयत्नतः ।
रथस्योर्ध्वतले देवं विष्टरे विनिवेश्य च ॥३०३
यात्रार्थं देवदेवाय अर्घ्यं पाद्यं तथैव च ।
आचामं गन्धमाल्ये च दीपं धूपं तथैव च ॥३०४॥
अर्पणं मधुपर्कं च नैवेद्यं विविधं तथा ।

पृथुकार्यं पानकं च तर्पणाचमने तथा ॥३०५॥
ताम्बूलं विनिवेद्याथ मुखवाससमन्वितम् ।
तत्काले पुत्रकामानां स्त्रीणां चारोग्यमिच्छताम् ॥३०६॥
नैवेद्यं कबलीकृत्य दद्याद्देवस्य सन्निधौ ।
आचार्यः साधकाश्चापि रथस्योर्ध्वतले स्थिताः ॥३०७॥
तस्याधस्तात् स्थले स्थाप्याः पश्चिमे छत्रधारकाः ।
तत्र तत्पार्श्वतः स्थाप्यौ मायूरच्छत्रधारिणौ ॥३०८॥
दक्षिणोत्तरपार्श्वस्थावग्रे चामरधारिणौ ।
सारथिस्तत्स्थले स्थाप्यस्त्वग्रतो मध्यदेशतः ॥३०९॥
ततस्तद्रथयानं तु भ्रामयेत्सर्ववीथिषु ।
प्रादक्षिण्येन वै ग्रामे नगरे पत्तनेऽपि वा ॥३१०॥
ततो रथात् देवेशमवरोप्य सुयत्नतः ।
यानान्तरे समारोप्य स्वस्थाने सन्निवेशयेत् ॥३११॥
अष्टमेऽह्नि तु तद्रात्रौ दोलारोहणपूर्वकम् ।
अश्वारोहं तत्र कुर्यात् मृगयां चापि कारयेत् ॥३१२॥
भक्तसन्त्राणलीला च रात्रौ नगरशोधनम् ।
प्रणयः कलहश्च स्याद्देव्योर्देवेन वै मिथः ॥३१३॥
सन्धानमुभयोः कुर्यात् क्षम्यतामिति चोच्चरेत् ।
नवमेऽवभृथं कुर्यात्तदार्यः शिबिकोत्सवम् ॥३१४॥
वाहनारोहणस्यैव क्रमः सम्यङ्निरूपितः ।
अपूर्वाभरणमाल्यस्रग्भिश्चान्यैस्तथा ॥३१५॥
अपूर्वयानयानाद्यैर्यथा कौतुकं भवेत् ।
तथा विशेषः कर्तव्यो यावत्तीर्थदिनावधि ॥३१६॥
अथावभृथकार्यस्य विधानं शृणुत द्विजाः ! ।
आचार्यो मूर्तिपैः सार्धं प्रविश्य भगवद्गृहम् ॥३१७॥

देवं प्रपूज्य विधिवद्बल्यन्तं सर्वमाचरेत् ।
आचार्यो यजमानेन साधकैश्च समन्वितः ॥३१८॥
प्रासादं सम्प्रविश्याथ मूलबिम्बस्य पादयोः ।
प्रणम्य दण्डवत्तत्र तीर्थबिम्बं समानयेत् ॥३१९॥
तदभावे मुनिश्रेष्ठाः ! नित्यस्नपनकौतुकम् ।
अभावेप्यस्य बिम्बस्य बलिबिम्बं तु वा द्विजाः ! ॥३२०॥
मूलबिम्बस्य पुरतः संस्थाप्यावाह्य पूज्य च ।
तीर्थबिम्बं समुद्धृत्य वाद्यैर्घण्टारवैः सह ॥३२१॥
ध्वजपीठसमीपं तु समानीय यथाविधि ।
शोधितेऽलङ्कृते तत्र मण्टपे स्नानविष्टरे ॥३२२॥
निवेश्य स्नानबिम्बं तु मूलबिम्बस्य सम्मुखम् ।
तदग्रतस्तु संस्थाप्य स्नपनं त्वधमाधमम् ॥३२३॥
पुरतः स्थण्डिलं कृत्वोलूखलं तत्र विन्यसेत् ।
मुसलानि चतुर्दिक्षु विन्यस्योलूखलोपरि ॥३२४॥
मुसलोलूखले गृह्य दूर्वाकाण्डानि बन्धयेत् ।
नववस्त्रेण संवेष्ट्य तत्र चूर्णं विनिक्षिपेत् ॥३२५॥
सौवर्णं रजनीचूर्णसमिश्रं गन्धसंयुतम् ।
चतुर्भिर्वैष्णवैर्विप्रैर्वैष्णवीभिस्तु वा द्विजाः ! ॥३२६॥
कारयेदवघातं तु गीयमाने तु मङ्गले ।
स्थापितस्नपनाद्विप्राः ! प्राग्भागे वा तदुत्तरे ॥३२७॥
तण्डुले पीठिकां कृत्वा तत्र कुम्भं निवेश्य च ।
समूत्रं तत्र निक्षिप्य चूर्णं वर्मेण वेष्ट्य च ॥३२८॥
अथ वा पद्म नव वा कलशान् चूर्णपूरितान् ।
अर्चयित्वा तु मूलेन तत समारोपयेद्विभुम् ॥३२९॥
तेनाभ्यज्य देवेश समुद्धर्त्य च पूर्ववत् ।

तत सस्नाप्य विधिना पाद्याद्यै कलशै क्रमात् ॥३३०॥
अभ्यर्च्य देवमर्घ्याद्यैर्हेमचूर्णादिपूरितम् ।
आदाय कुम्भ तैश्चूर्णै श्रीसूक्तेनाभिषेचयेत् ॥३३१॥
सहस्रधारया स्नान कृत्वा सशुध्य वारिणा ।
अधरोत्तरवस्त्राभ्या नवाभ्या परिधाप्य च ॥३३२॥
अलकृत्य विशेषेण समभ्यर्च्य यथाविधि ।
मुद्गान्नपायसान्नादीन् विनिवेद्य तत परम् ॥३३३॥
शिबिकादौ समारोप्य तीर्थबिम्बमलकृतम् ।
तथैव चौत्सव बिम्ब श्रीपुष्टिभ्या समन्वितम ॥३३४॥
शिबिकादौ समारोप्य ह्यलकृत्य विशेषत ।
तीर्थबिम्ब पुरस्कृत्य यात्रामूर्तिगत विभुम् ॥३३५॥
छत्रचामरशङ्खादिसर्वसाधनसयुतम् ।
प्रदक्षिण परिभ्राम्य सर्वेष्वावरणेष्वपि ॥३३६॥
तीर्थपार्श्वं समासाद्य तत्तीरे मण्टपेऽथ वा ।
प्रपाया देवदेवेश विनिवेश्य च विष्टरे ॥३३७॥
यात्राबिम्बस्य पुरत स्नानपीठ निधाय वै ।
निवेश्य तत्र तीर्थार्चा पञ्चविंशतिभिर्घटै ॥३३८॥
यद्वा द्वादशभि कुम्भैर्नवभिर्वाभिषेचयेत् ।
चूर्णस्नान तु विधिवत्कृत्वा देवस्य देशिक ॥३३९॥
अर्घ्याद्यै पूजयित्वाथ बिम्ब तु परिमार्ज्य च ।
मुक्तावशिष्ट यच्चूर्णं भक्ताना मूर्ध्नि दापयेत् ॥३४०॥
गङ्गास्नानफल चूर्णं सर्वपापप्रणाशनम् ।
क्रीडया वापि तच्चूर्णं शिरसा धारयेत्तु य ॥३४१॥

१—प्रापयत् । इति—(पा)

तस्य देहगतं पापं तत्क्षणादेव नश्यति ।
कृत्वा पुण्याहघोषं तु तीर्थे सम्प्रोक्ष्य देशिकः ॥२४२॥
तत्तीर्थे सर्वतीर्थानि समावाह्य समर्चयेत् ।
ततश्च देशिकेन्द्रस्तु यात्रामूर्तिगतं विभुम् ॥२४३॥
समासाद्य तु तत्पादे प्रणम्य तदनुज्ञया ।
मुहूर्ते शोभने मासे रवौ मध्यन्दिनं गते ॥२४४॥
तीर्थबिम्बं समादाय घण्टाशङ्खरवैः सह ।
वामहस्ततले कुर्यात् क्ष्मामण्डलगतः स्वयम् ॥२४५॥
विधुयान्मध्यभागे तु पाणिना दक्षिणेन तु ।
तीर्थतीरं समासाद्य देशिकेन्द्रः समाहितः ॥२४६॥
आशीर्वादं पुरा कृत्वा राजराष्ट्रादिकस्य च ।
जलमध्यं समासाद्य नाभिदघ्ने जले स्थितः ॥२४७॥
जपन् वै मूलमन्त्रं तु बिम्बेन सह देशिकः ।
निमज्जेद्भक्तिसंयुक्तो ध्यायमानोऽच्युतं हृदि ॥२४८॥
निमज्जेयुस्तदा सर्वे भक्ता भागवता अपि ।
देवेन सह तत्काले निमज्जन्ति च ये जनाः ॥२४९॥
विमुक्तकल्मषास्ते वै प्राप्नुयुः परमां गतिम् ।
स्वयं व्यक्तादिके स्थाने मध्याह्ने वापराह्णके ॥२५०॥
रजन्यां पूर्वभागे वा कुर्यादवभृथं विभोः ।
मुहूर्तातिक्रमभासदोषस्तत्र न विद्यते ॥२५१॥
ततस्तीरे समारोप्य तीर्थबिम्बं तु विष्टरे ।
शाटकद्वितयं दत्वा स्नानवस्त्रं विसृज्य च ॥२५२॥
देशिकः स्वयमादाय ते वस्त्रे मूर्ध्नि धारयेत् ।
अर्घ्याद्यैश्च समभ्यर्च्य अलङ्कृत्य विशेषतः ॥२५३॥

१—तीर्थम्योर्ध्वतलेऽथ वा । इति—(पा)

महाहविर्निवेद्याथ ब्राह्मणान् भोजयेत्तत ।
प्रत्यह भोजयेद्विप्रान् सहस्र शतमेव वा ॥३५४॥
याने देव समारोप्य ततो गेह प्रवेशयेत् ।
तीर्थबिम्बगता शक्ति मूलबेरे निसर्जयेत् ॥३५५॥
सायङ्काले तु सम्प्राप्ते देवदेव जगत्पतिम् ।
वस्त्राभरणमाल्याद्यैरलङ्कृत्य विशेषत ॥३५६॥
शिबिकादौ समारोप्य देवीभ्या सह देशिक ।
शङ्खादिमङ्गलरवे छत्रचामरकेतुभि ॥३५७॥
राजचिह्नै परिकरैर्गणिकादेवदासिभि ।
सर्वे परिजनै सार्धं कृत्वा ग्राम प्रदक्षिणम् ॥३५८॥
मन्दिरान्त प्रवेश्याथ बलिपीठसमीपत ।
मधुपर्कं निवेद्याथ अपूपादीन्निवेदयेत् ॥३५९॥
शीतल तर्पणजल ताम्बूलादीन्निवेदयेत् ।
देवागार परिभ्राम्य महामण्टपमाश्रयेत् ॥३६०॥
निवेश्य विष्टरे तत्र देवमर्घ्यादिभिर्यजेत् ।
कृत्वा नीराजनान्त तु देशिकेन्द्र समाहित ॥३६१॥
स्थानस्य राज्ञो राष्ट्रस्य यजमानस्य मन्त्रिणाम् ।
प्रजाना परिवाराणा वैष्णवाना विशेषत ॥३६२॥
आशीर्वाद तव कुर्याद्वीक्षमाणो विभोर्मुखम् ।
ओमित्येव प्रतिब्रूयु सर्वे देवस्य सन्निधौ ॥३६३॥
ततस्तु देवदेवेश यागशाला प्रवेशयेत् ।
तत्र पश्चिमवेद्या तु देवमारोप्य पूर्ववत् ३६४॥
कुम्भपूर्वं क्रमेणैव चतु स्थानस्थित विभुम् ।
यथाविधि समभ्यर्च्य प्रभूतान्नसमन्वितम् ॥३६५॥
ततो द्वाराधिदेवाना प्रदाप्य विधिना बलिम् ।

कुण्डस्थं मण्डलस्थं च देवं हृदि विसृज्य च ॥३६६॥
विसर्जयेद्यथावच्च तथा द्वाराधिदेवताः ।
वाहयन्नौत्सवं बिम्बं महाकुम्भपुरस्सरम् ॥३६७॥
करकास्त्रं समादाय आचार्यः स्वकरेण तु ।
अच्छिन्नधारया युक्तं कृत्वा गेहं प्रदक्षिणम् ॥३६८॥
प्रासादं तु समासाद्य मूलबिम्बस्य सम्मुखम् ।
निवेश्य चौत्सवं बिम्बं सम्पूज्यार्घ्यादिभिः क्रमात् ॥३६९॥
प्रोक्षयेत्कुम्भतोयेन मूलमूर्तिगतं विभुम् ।
पुंसूक्तमुच्चरन्पश्चाद्यात्राबिम्बं च सेचयेत् ॥३७०॥
महाकुम्भगतां शक्तिं मूलबेरे समर्पयेत् ।
करकास्त्रगतां शक्तिमायुधेषु समर्पयेत् ॥३७१॥
तथैव वासुदेवादीन् पीठोर्ध्वे योजयेत्क्रमात् ।
तत्काले तु विशेषेण गुरोः सम्मानमाचरेत् ॥३७२॥
वसनैश्च दुकूलाद्यैर्देवस्य प्राङ्निवेदितैः ।
विविधैः स्रग्वरैश्चापि सुगन्धैश्चन्दनादिकैः ॥३७३॥
आचार्योऽपि समादाय दुकूलाद्यमनुत्तमम् ।
बध्वा स्वोष्णीषवत्स्वस्मिन् शिरसि द्विजसत्तमाः ! ॥३७४॥
माल्यादींश्च यथायोगं धारयन् प्रणिपत्य च ।
पुष्पाञ्जलिं ततः कृत्वा प्रणम्य च मुहुर्मुहुः ॥३७५॥
सर्वं न्यूनातिरिक्तं च मया पूर्वं हि यत्कृतम् ।
तत्सर्वं देवदेवेश ! क्षन्तुमर्हसि नः प्रभो ! ॥३७६॥
इति विज्ञाप्य देवेशं करस्थमथ कौतुकम् ।
विसृज्य हृदयेनैव यात्रामूर्तिगतं विभुम् ॥३७७॥
स्वस्थाने सन्निवेश्याथ आर्घ्याद्यैः परिपूज्य च ।
अपूपानुपदार्थांश्च समर्प्य च विभोस्तदा ॥३७८॥

शय्यासन समर्प्याथ रात्रिशेष समापयेत् ।
तदन्येद्यु प्रभाताया कृतस्नान कृताह्निक ॥३७९॥
आचार्यो मूर्तिपै सार्धं प्रासाद सम्प्रविश्य तु ।
कृत्वा नित्यार्चनान्त तु देवदेवस्य देशिक ॥३८०॥
ततस्तु वक्ष्यमाण यत्स्नपन चाधमोत्तमम् ।
तेन सन्नाप्य देवेश हविरन्त समर्चयेत् ॥३८१॥
सायङ्काले च सम्प्राप्ते नित्यपूजावसानत ।
देवेशस्याग्रत स्थित्वा विज्ञापनमथाचरेत् ॥३८२॥
भगवन् ! पुण्डरीकाक्ष ! शरणागतवत्सल ।
अङ्कुरार्पणमारभ्य उत्सवावभृथान्तिमम् ॥३८३॥
यन्मयानुष्ठित कर्म तव सम्प्रीतये विभो ! ।
तथान्यैर्मदनुज्ञातैर्देशिकैश्चापि यत्कृतम् ॥३८४॥
साधकैश्च तथान्यैश्च विविधै परिचारकै ।
तत्तत्सम्पूरणार्थं च न्यूनाधिक्योपशान्तये ॥३८५॥
त्वामद्य वासरे यष्टु पुष्पयागविधानत ।
प्रवृत्तमनुजानीहि मदनुग्रहकाम्यया ॥३८६॥
इति विज्ञाप्य देवस्य तदनुज्ञामवाप्य च ।
देवमुत्सवबिम्बस्थ देवीभ्या सह देशिक ॥३८७॥
आस्थानमण्टप नीत्वा सौवर्णे भद्रविष्टरे ।
तत्र देव समारोप्य अलङ्कृत्य विशेषत ॥३८८॥
ततस्तस्य पुरोभागे पुष्पमण्डलमालिखेत् ।
श्वेतै पीतैस्तथा रक्तै पाटलैश्च सितासितै ॥३८९॥
पञ्चवर्णैस्तु पुष्पाद्यै श्यामलैस्तुलसीदलै ।
मण्डले पूरयित्वा तु यथालोचनसुप्रियम् ॥३९०॥
मण्डलेऽन्तर्भागे तु महाकुम्भं च विन्यसेत् ।

मण्टपस्य चतुर्दिक्षु द्वारकुम्भाष्टकं न्यसेत् ॥३९१॥
मण्टपं समलङ्कृत्य वितानध्वजतोरणैः ।
पुष्पाङ्कुरं ततः कुर्याद्यथोक्तविधिना गुरुः ॥३९२॥
मण्डलस्योत्तरे भागे सूत्राण्यास्फाल्य पूर्ववत् ।
पालिकादीनि पात्राणि शालिपीठोपरि न्यसेत् ॥३९३॥
विभवेच्छानुसारेण केवलं पालिकास्तु वा ।
प्रक्षाल्य पालिकादीनि अलङ्कृत्य यथाविधि ॥३९४॥
कुशकाशतृणैस्तेषां बिलमूलानि पूरयेत् ।
बिलानि तण्डुलैरेव पूरयेत्तु यथाविधि ॥३९५॥
प्रोक्ष्य पुण्याहतोयेन यजेत्पालाधिदेवताः ।
पूर्वोक्तक्रमयोगेन तेषु पुष्पाणि वापयेत् ॥३९६॥
सोमकुम्भार्चनं होमं वर्जयेदत्र देशिकः ।
रक्षाबन्धं ततः कुर्यान्मूलबिम्बादिषु क्रमात् ॥३९७॥
औत्सवं बिम्बमादाय मृद्वास्तरणशोभिते ।
पुष्पमण्डलमध्ये तु प्राङ्मुखं विनिवेश्य च ॥३९८॥
तस्य पार्श्वद्वये विप्राः ! श्रियं पुष्टिं च विन्यसेत् ।
कुम्भपार्श्वे समासाद्य प्राग्वद्देशिकसत्तमः ॥३९९॥
कृत्वा मानसयागान्तं द्वारयागं समाचरेत् ।
महाकुम्भे मूलबिम्बात्किञ्चिदावाह्य पूजयेत् ॥४००॥
करकाद्यर्चनं तु सर्वं प्राग्वत्समाचरेत् ।
बिम्बेऽप्य पूजनं कुर्यात्प्राग्वन्नीराजनान्तिमम् ॥४०१॥
उपहारान्निवेद्याथ पुनः पूजां समाचरेत् ।
अर्घ्यं पाद्यं तथाचामं गन्धं माल्यं च दीपकम् ॥४०२॥
धूपं ततोऽर्हणजलमपूपान् पृथुकानपि ।
सक्तुं नालिकेरोन्थरसमाचमनं तथा ॥४०३॥

मुखवाससमोपेत ताम्बूल च समर्पयेत् ।
एव द्वादशवार तु कृत्वा पूजा जगत्प्रभो ॥४०४॥
महाहविर्निवेद्याथ कुर्यात्पुष्पाधिवासनम् ।
सौवर्णे राजते वापि पात्रे पुष्पाणि पूरयेत् ॥४०५॥
तत्पात्र देवपुरत शालिपीठे निधाय वै ।
प्रोक्ष्य पुण्याहतोयेन पूजयेन्मूलमन्त्रत ॥४०६॥
वस्त्रेणाच्छाद्य तत्पात्र गत्वा यागनिकेतनम् ।
कुण्डमग्निं च सस्कृत्य तन्मध्ये देवमर्चयेत् ॥४०७॥
समिद्भिश्चैव नित्याभि काम्याभिश्च यथाविधि ।
पूर्णाहुत्यादिक कृत्वा देवादींस्तु विसर्जयेत ॥४०८॥
सम्पाताज्यमथादाय गत्वा देवस्य सन्निधिम् ।
होम समर्प्य देवाय देशिको मन्त्रवित्तम ॥४०९॥
सम्पाताज्येन पुष्पाणि ससिच्य तदनन्तरम् ।
देवस्य पादयो पुष्प पुसूक्तेन समर्पयेत् ॥४१०॥
अथाष्टाक्षरबीजानि हृदयादीनि च क्रमात् ।
भूषणानि च दिव्यानि किरीटादीन्यनुक्रमात् ॥४११॥
आयुधानि च दिव्यानि श्रिय पुष्टिं खगेश्वरम् ।
तथैव परिवाराश्च समुद्दिश्य यथाक्रमम् ॥४१२॥
देवस्य पादयो पुष्प दद्याद्देशिकसत्तम ।
ततस्तु देवदेवेश यानमारोप्य यत्नत ॥४०१३॥
अलङ्कृत्य विशेषेण वस्त्राभरणमाल्यकै ।
सर्वमङ्गळसयुक्त प्रथमावरणादिषु ॥४१४॥
परिभ्राम्य च देवेश तथा वै ग्रामवीथिषु ।
प्रवेश्य देवसदन ध्वजपीठसमीपके ॥४१५॥
दर्वमर्ध्यादिनाभ्यर्च्य निवेद्य च हविस्तत ॥

ध्वजस्थानं समासाद्य पतत्रीशं समर्चयेत् ॥४१६॥
महाहविर्निवेद्याथ ध्वजस्थं विहगेश्वरम् ।
विसर्जयित्वा स्वहृदि ध्वजं समवरोपयेत् ॥४१७॥
ध्वजदण्डं ध्वजपटं तदर्हं तत्प्रपां तथा ।
आचार्यः स्वयमादद्याद्यागोपकरणान्यपि ॥४१८॥
ततस्तु देवदेवेशं प्रथमावरणेऽपि वा ।
द्वितीयावरणे चापि मण्टपे भद्रविष्टरे ॥४१९॥
निवेश्य प्राङ्मुखं चापि ह्युत्तराभिमुखं तु वा ।
देवस्योत्सवसेवार्थं ये देवाः पूर्वमागताः ॥४२०॥
वैकुण्ठवासिनश्चैव कुमुदादिगणेश्वराः ।
ब्रह्मरुद्रादयश्चैव तथा देवर्षिसत्तमाः ॥४२१॥
तथा वै भगवद्भक्ता. देशान्तरनिवासिनः ।
देवदेवस्य कल्याणमनुसन्धातुमागताः ॥४२२॥
तेषां स्वदेशयानार्थं देवानुज्ञापुरस्सरम् ।
कृत्वा विसर्जनं पश्चाद्देवमन्त. प्रवेशयेत् ॥४२३॥
ततस्तु देवं देवीभ्यां मूलबिम्बस्य सम्मुखम् ।
निवेश्य चोभयोर्मध्ये महाकुम्भं तु विन्यसेत् ॥४२४॥
कुम्भप्रोक्षणपूर्वं तु कौतुकोत्सर्जनान्तिमम् ।
प्रागवत्कृत्वा यथाशास्त्रं देवमन्तः प्रवेशयेत् ॥४२५॥
अर्घ्यगन्धादिनाभ्यर्च्य मूलबिम्बे विसर्जयेत् ।
शय्यासनं समर्प्याथ जागरेण नयेन्निशाम् ॥४२६॥
ब्राह्मे मुहूर्ते सम्प्राप्ते देशिको मन्त्रवित्तमः ।
उद्वासनबलिं दद्यान्मूकै परिजनैः सह ॥४२७॥
ग्रामे त्वावाहितान् पूर्वं कुमुदादीन् गणान्वितान् ।
सन्तोष्य बलिदानेन सविशेषं विसर्जयेत् ॥४२८॥

महातटाके नद्यादौ देशिको मन्त्रवित्तमः ।
ऋत्विग्भिः परिचारैश्च सर्वैः परिजनैः सह ॥४२९॥
स्नानं कृत्वा तु विधिवद्गत्वा देवगृहं ततः ।
नित्यपूजादिकं सर्वं यथाविधि समाचरेत् ॥४३०॥
यजमानो गुरुं हैमैर्भूषणैः कटकादिभिः ।
वसनैर्गन्धपुष्पाद्यैरलङ्कृत्याभिपूज्य च ॥४३१॥
उत्तमां दक्षिणां दद्यात्स्वर्णनिष्कशतान्विताम् ।
ततोधिकां तु वा दद्याद्विभवस्यानुगुण्यतः ॥४३२॥
तदर्धं मध्यमा वापि तदर्धमधमा तु वा ।
यथावित्तानुरूपं तु यथाश्रद्धं तु वा ददेत् ॥४३३॥
तदर्धमृत्विजां दद्यात्तदर्धं परिचारिणाम् ।
वेदपाठकपूर्वांश्च तथा गायकसत्तमान् ॥४३४॥
अन्यांश्चैव यथाशक्ति दक्षिणाभिः प्रतोषयेत् ।
यागस्तु दक्षिणाहीनो निष्फलः स्यान्न संशयः ॥४३५॥
तस्माद्वित्तानुगुण्येन देया स्वल्पापि दक्षिणा ।
तत्काले यजमानस्तु अलङ्कृत्य तु देशिकम् ॥४३६॥
वस्त्रस्रक्चन्दनाद्यैश्च समारोप्य च यानके ।
शङ्खकाहळवादित्रभेरीपटहसंयुतम् ॥४३७॥
छत्रदीपसमायुक्तं गायकादिसमन्वितम् ।
देशिकं देववत् स्मृत्वा स्वगृहे सम्प्रवेशयेत् ॥४३८॥
एवं हि देवदेवस्य उत्सवं कारयेत्तु यः ।
इह लोके सुखं प्राप्य परलोके महीयते ॥४३९॥
एवं निगदितं सम्यङ्महोत्सवविधिर्द्विजाः ॥

इति श्रीपाञ्चरात्रे ईश्वरसंहितायां
महोत्सवविधिर्नाम
एकादशोऽध्यायः

अथ द्वादशोऽध्यायः ।

नारदः ।

अतः परं प्रवक्ष्यामि पक्षमासोत्सवादिकान् ।
तथा वसन्तोत्सवादीन् शृणुध्वं मुनिपुङ्गवाः ! ॥१॥
पक्षे पक्षे च द्वादश्यां मासे मासे तथैव च ।
अमावास्यां पौर्णमास्यां श्रवणे चोत्तरे दिने ॥२॥
अवतारदिनेष्वेवं देवदेवस्य वै द्विजाः ! ।
यजमानादिजन्मर्क्षे चैत्रादिविषुवद्वये ॥३॥
अयनद्वितये चापि तथा सङ्क्रान्तिषु द्विजाः ! ।
आचरेद्देवदेवस्य विशेषयजनं गुरुः ॥४॥
नक्षत्रभेदे सम्प्राप्ते पूर्वमेव फलप्रदम् ।
परेद्युर्दशनाडी चेत्परमेव शुभं भवेत् ॥५॥
तिथिभेदे तथा प्राप्ते परमेव फलप्रदम् ।
एकादश्याममावास्यां द्वादश्यादिषु वा द्विजाः ! ॥६॥
परेद्युश्चेत्कलामात्रं तदेव शुभदं भवेत् ।
उत्तरायणपूर्वेषु षट्सु सङ्क्रान्तिषु द्विजाः ! ॥७॥
पश्चात् षोडशनाडीनामन्तरे देवमर्चयेत् ।
दक्षिणायनपूर्वेषु षट्सु सङ्क्रमणेषु च ॥८॥
प्रागेवाभ्यर्चयेद्देवं नाडीषोडशकान्तरे ।
अनुकल्पे तु तत्कुर्यात् पश्चात् षोडशकान्तरे ॥९॥
एवमृक्षादिकं ज्ञात्वा कुर्यात्तत्तद्दिनेऽर्चनम् ।
द्वादश्यादिषु कर्तव्यं उत्सव त्वनुलोम्येन ॥१०॥
पुरा नित्यार्चनं कृत्वा देवदेवस्य सत्तमाः ! ।

संस्थाप्य विधिवद्देव मूलमूर्तिगत विभुम् ॥११॥
यात्रामूर्तिगत यापि यद्वा स्नपनकौतुकम् ।
अलङ्कारासन नीत्वा समभ्यर्च्य विधानत ॥१२॥
महाहविर्निवेद्याथ होमान्त वा जपान्तिमम् ।
सर्वं कुर्याद्विशेषेण मूलादुत्सवकौतुके ॥१३॥
किञ्चिदावाह्य तदनु यात्रामूर्तिगत विभुम् ।
यानमारोप्य सौवर्णं सपुष्पप्रभयान्वितम् ॥१४॥
अलङ्कृत्य विशेषेण पूर्वोक्तविभवै सह ।
उत्सवभ्रमण कृत्वा सम्यग्ग्रामप्रदक्षिणम् ॥१५॥
भगवन्मन्दिराग्रे वा बलिपीठाग्रतोपि वा ।
देवस्य श्रमशान्त्यर्थं कुर्यादभ्यर्चन गुरु ॥१६॥
अर्घ्यं पाद्य तथाचाम गन्ध माल्य च दीपकम् ।
धूप तथार्हणजल अपूपान्पृथुकानपि ॥१७॥
तर्पण नाळिकेरोत्थरसमाचमन तथा ।
मुखवाससमोपेत ताम्बूल च निवेदयेत् ॥१८॥
विविधैर्नृत्तगीताद्यैस्तदा सन्तोषयेत्प्रभुम् ।
गणिका देवदास्यश्च तथा वै वाद्यकोविदा ॥१९॥
वन्दिनश्च तथान्येपि सर्वे भक्तिसमन्विता ।
देव प्रदक्षिणीकृत्य बलिपीठेन वै सह ॥२०॥
द्विवारं वा चतुर्वारं प्रणमेयुश्च भक्तित ।
ततस्तु देवदेवेश मन्दिरान्त प्रवेशयेत् ॥२१॥
यानादवरोप्याथ पादुके विनिवेद्य च ।
अग्रमण्टपभूभागे भद्रपीठे निवेश्य च ॥२२॥
अर्घ्याद्यै प्राग्वदभ्यर्च्य स्वस्थाने सन्निवेशयेत् ।
प्रातर्वै नियोजिता शक्ति मूलबिम्बे नियोजयेत् ॥२३॥

द्वादश्यादिषु कर्तव्यमुत्सवं त्वेवमीरितम् ।
मधुमाधवमासे तु शुक्लपक्षे विशेषतः ॥२४॥
कलयापि चतुर्दश्या ह्यपृष्टे पर्वणि द्विजाः ! ।
जलक्रीडां तु, देवस्य कुर्याद्देशिकसत्तमः ॥२५॥
जलक्रीडानुसारेण सप्ताहं वा, नवाहकम् ।
पञ्चाहं वा त्र्यहं वापि एकाहं चोत्सवं चरेत् ॥२६॥
उत्सवारम्भदिवसात्पूर्वेद्युर्निशि देशिकः ।
अङ्कुरारोपणं कृत्वा रक्षाबन्धं यथाविधि ॥२७॥
उत्सवारम्भदिवसादारभ्य प्रतिवासरम् ।
चतुःस्थानार्चनं कुर्यात्सायम्प्रातर्यथाविधि ॥२८॥
बलिं नित्योक्तविधिना कुर्यात्कालद्वयेपि च ।
मध्याह्ने बलिदानान्ते यात्रामूर्तिगतं विभुम् ॥२९॥
शिबिकायां समारोप्य श्रीपुष्टिभ्यां सह द्विजाः! ।
नीत्वा महामण्टपं तु तत्र वै भद्रविष्टरे ॥३०॥
समारोप्य च देवस्य पुरतो धान्यविष्टरे ।
चूर्णाधिवासनं प्राग्वत्कृत्वा देशिकसत्तमः ॥३१॥
अर्घ्याद्यैर्देवमभ्यर्च्य हविरन्तं यथाविधि ।
श्रीसूक्तेन ततो देवं श्रियं पुष्टिं च देशिकः ॥३२॥
अभिषिच्य च चूर्णेन हारिद्रेण यथाविधि ।
देवीभ्यां सह देवेशं भ्रामयेद्ग्रामवीथिषु ॥३३॥
प्रादक्षिण्येन पूर्वोक्तयात्रोपकरणैः सह ।
तदा देवस्य देव्योश्च युद्धक्रीडां च कारयेत् ॥३४॥
प्रथमे गन्धयुद्धं तु द्वितीये पुष्पयुद्धकम् ।
तृतीये चूर्णयुद्धं च चतुर्थे तैलयुद्धकम् ॥३५॥
पञ्चमे क्षीरयुद्धं स्यात् षष्ठे कर्पूरकुङ्कुमैः ।

नारिकेळजलैर्युद्धं सप्तमे तु समाचरेत् ॥३६॥
गन्धाम्भसाष्टमे युद्धं नवमे जलयुद्धकम् ।
गेहादिग्राममध्यान्तं भक्तैर्भागवतैः सह ॥३७॥
गणिकाभिर्देवदासीभिः कार्यं युद्धं विनोदतः ।
युद्धक्रीडां तु कृत्वैव देवमन्तः प्रवेशयेत् ॥३८॥
सप्ताहमुत्सवे कुर्यात् चूर्णयुद्धादिसप्तकम् ।
पञ्चाहमुत्सवे कुर्यात् क्षीरयुद्धादिपञ्चकम् ॥३९॥
त्र्यहोत्सवे नाळिकेररसयुद्धादिकं भवेत् ।
केवलं जलयुद्धं तु कुर्यादेकाह उत्सवे ॥४०॥
जलक्रीडाविधानं तु शृणुध्वं मुनिपुङ्गवाः ! ।
तृतीयावरणादौ वा यद्वा गोपुरबाह्यतः ॥४१॥
खात्वा पुरुषमात्रं तु क्षितौ वै मुनिसत्तमाः ! ।
शिलाभिरिष्टकाभिर्वा दृढीकृत्य समन्ततः ॥४२॥
सोपानपङ्क्तिभिर्युक्तां जलद्रोणीं प्रकल्पयेत् ।
चतुःस्तम्भसमायुक्तं मण्टपं वा प्रपां तु वा ॥४३॥
कृत्वोपरिष्टात्तद्रोणीं पूरयेच्छुद्धवारिभिः ।
शाम्बलकटाद्वापूर्य कस्तूरीकुङ्कुमादिभिः ॥४४॥
सुरभीकृत्य तदनु प्रसूनैर्विकिरेच्छुभैः ।
पृथक्चूर्णाधिवासं तु कृत्वा यागगृहे गुरुः ॥४५॥
कुण्डे वा स्थण्डिले वाग्नौ श्रियमावाह्य मन्त्रवित् ।
तत्र सन्तर्प्य विधिवत्सम्पाताज्येन सेचयेत् ॥४६॥
तच्चूर्णपात्रमादाय वाद्यघोषपुरस्सरम् ।
जलद्रोणीं समासाद्य पुण्याहोक्तिपुरस्सरम् ॥४७॥
तत्र चूर्णं विनिक्षिप्य वसन्तं तत्र पूजयेत् ।
परितो लोकपालांश्च समभ्यर्च्य निवेदनं ॥४८॥

बलिं दद्यादष्टदिक्षु गेयवाद्यपुरस्सरम् ।
जलद्रोण्यां तु सम्कारस्त्वेवमुक्तो मुनीश्वराः ॥४९॥
देवीभ्यां सह देवेशं मण्टपे प्राग्वदर्चयेत् ।
कृत्वा चूर्णाभिषेकान्तं जलद्रोणीसमीपतः ॥५०॥
देवमानीय देवीभ्यामर्घ्याद्यैः परिपूज्य च ।
भेरीपटहवादित्रशङ्खघोषसमन्वितम् ॥५१॥
स्तुतिमङ्गळघोषैश्च वेदघोषसमन्वितम् ।
पौरुषेणैव सूक्तेन कुर्याज्जलावगाहनम् ॥५२॥
यद्वा कूर्चे पादुकायां देवमावाह्य मन्त्रवित् ।
तलावगाहयेद्विप्राः तदानीं देशिकोत्तमः ॥५३॥
यजमानो मूर्तिपाश्च भूसुरा वैष्णवोत्तमाः ।
यतयो ब्रह्मनिष्ठाश्च सिञ्चेयुर्मङ्गळाम्भसा ॥५४॥
चातुर्वर्ण्यभवाः सर्वे पुरुषाश्च स्त्रियोपि च ।
गणिका देवदास्यश्च तथान्ये वाद्यवादकाः ॥५५॥
परस्परं च सिञ्चेयुः सर्वे मङ्गळवारिभिः ।
गङ्गास्नानफलं प्राप्य विष्णुसायुज्यमाप्नुयुः ॥५६॥
याने देवं समारोप्य सह स्नानार्द्रवाससा ।
जलक्रीडापुरस्कं तु यात्रोपकरणैः सह ॥५७॥
भ्रामयेद्ग्रामवीथीषु प्रीतये वरुणस्य च ।
प्रजानामपि सर्वेषां पवित्रीकरणाय च ॥५८॥
ततस्तु देवदेवेशं मन्दिरान्तः प्रवेशयेत् ।
तत्र देवं यथाशास्त्रं पञ्चविंशतिभिर्घटैः ॥५९॥
अभिषिच्य विशेषेण हविरन्तं समर्चयेत् ।
प्रत्यहं चापि युद्धान्ते स्नपनं त्वेवमाचरेत् ॥६०॥
तद्रात्रौ पूर्ववत्कुर्यात्कुम्भसम्प्रोक्षणान्तिमम् ।

आचार्यं पूजयेत्पश्चाद्वस्त्रहेमाङ्गुलीयकैः ॥६१॥
मूर्तिपादीन्यथान्यायं तोषयेद्द्रविणैस्तथा ।
इति सङ्क्षेपतः प्रोक्तो वसन्तोत्सव उत्तमः ॥६२॥
चैत्रे तु शुक्लद्वादश्यां कुर्याद्दमनिकोत्सवम् ।
पवित्रारोहवत्कुर्याच्चतु स्नानार्चनादिकम् ॥६३॥
भूषणान्युत्तमादीनि कुर्याद्दमनिकैस्तथा ।
तत्तु सङ्ख्याविरचितं यथा शोभानुरूपतः ॥६४॥
पञ्चविंशतिकुम्भैस्तु स्नापयित्वाभिषेचयेत् ।
एक एव नारायण इति प्राक्कलशेन तु ॥६५॥
तस्य ध्यानान्तःस्थस्येति द्वितीयकलशेन तु ।
अथ पुनरेव नारायण इति तु तृतीयतः ॥६६॥
अथ पुनरेव नारायण इति चतुर्थतः ।
सहस्रशीर्षा पुरुष इति पञ्चमकुम्भतः ॥६७॥
पतिं विश्वस्यात्मेश्वरमिति वै षष्ठकुम्भतः ।
नारायणपरं ब्रह्म इति वै सप्तमेन तु ॥६८॥
यच्च किञ्चिज्जगत्यस्मिन्निति ह्यष्टमकुम्भतः ।
अनन्तमव्ययं कविमिति नवमेनाभिचयेत् ॥६९॥
अधो निष्ट्या वितस्त्या तु इति स्याद्दशमेन वै ।
सन्ततं सिराभिस्तु इत्येकादशमेन तु ॥७०॥
तस्य मध्ये महानग्निरिति द्वादशमेन वै ।
सन्तापयति स्वं देहमिति त्रयोदशमेन वै ॥७१॥
नीलतोयदमध्यस्था इति चतुर्दशमेन वै ।
तस्याः शिखाया मध्य इति पञ्चदशेन वै ॥७२॥
सर्वस्य वशिनमिति षोडशमेन तु ॥

१—अथ पुरुषो नारायण । इति—(पा)

बहिरावरणस्थैस्तु कलशैरभिषेचयेत् ॥७३॥
बहिरावरणे नास्ति इति प्राक्संस्थितेन तु ।
यत्राग्निपद्मादभवदिति वह्निगतेन तु ॥७४॥
धृतोर्ध्वपुण्ड्रः परमेति याम्यदिक्संस्थितेन तु ।
दक्षिणे तु भुजे विप्र इति यातुगतेन तु ॥७५॥
विष्णुनात्तमश्नन्तीति वारुणीसंस्थितेन तु ।
पुम्प्रधानेश्वरो विष्णुरिति वायुगतेन तु ॥७६॥
इमां महोपनिषदमिति सोमगतेन तु ।
ओमिति प्रथमं नाम इतीशानगतेन तु ॥७७॥
पुरुषो ह वै वासुदेव इति मध्यगतेन तु ।
यद्वा पुरुषसूक्तीयैर्मन्त्रैः षोडशभिः क्रमात् ॥७८॥
बहिरावरणस्थैस्तु कलशैरभिषिच्य च ।
पूर्वोक्तैर्ब्रह्मसूक्तस्थैर्मन्त्रैर्द्विद्विकसंख्यया ॥७९॥
अन्तरावरणस्थैस्तु संस्नाप्य कलशैः क्रमात् ।
अवशिष्टैस्त्रिभिश्चान्ते मध्यकुम्भेन सेचयेत् ॥८०॥
रजनीचूर्णसंमिश्रान् संस्थाप्य नवकुम्भकान् ।
अर्घ्याद्यैरर्चयित्वा तु चक्ररश्मिसमप्रभान् ॥८१॥
रजनीचूर्णनिचयान् ध्यात्वा तैरभिषेचयेत् ।
सर्वविघ्ननिरासार्थं सर्वसम्पूरणाय च ॥८२॥
दक्षिणे तु भुजे विप्र इति प्राक्संस्थितेन तु ।
निचिक्षेप सुपर्णमिति वह्निगतेन तु ॥८३॥
प्रते विष्णो ! अब्जचक्रे इति याम्यगतेन तु ।
एभिर्वयमुरुक्रमस्येति यातुगतेन तु ॥८४॥
धृतोर्ध्वपुण्ड्रः कृतचक्रेति पश्चिमगेन तु ।
पवित्रमित्यग्निरिति वायुकोणगतेन तु ॥८५॥

चरण पवित्र विततमिति सोमगतेन तु ।
लोकस्य द्वारमर्चिमदिति रुद्रगतेन तु ॥८६॥
मन्त्रैरेतैस्तु चाष्टाभिरन्यै सौदर्शनैस्तथा ।
सस्नाप्य मध्यकुम्भेन शुद्धोदैरभिषिच्य च ॥८७॥
महोपनिषदन्तस्थैर्ब्रह्मसूक्ते पुरोदितै ।
मन्त्रैश्चतुर्भि पुसूक्तमन्त्रै षोडशभिस्तथा ॥८८॥
वासुदेवद्विषड्वर्णब्राह्मणद्वितयेन तु ।
ओङ्कारादिपवित्रान्तैश्चतुर्भिर्व्यापकैस्तथा ॥८९॥
सहस्रधारया देव स्नापयेद्विधिपूर्वकम् ।
यद्वाष्टाक्षरमन्त्रेण सर्वं स्नपनमाचरेत् ॥९०॥
ततोऽन्यै सकलैर्भोगै प्राग्वदिष्ट्वा क्रमेण तु ।
सर्वं पुरोदितैर्मन्त्रैर्मूलमन्त्रेण वा द्विजा ॥९१॥
होम कृत्वा विशेषेण समिद्भिस्त्रिमधुप्लुतै ।
ततो दमनिकारोपमाचरेत्तु यथाविधि ॥९२॥
अत्रानुक्तं तु सकल पवित्रारोहवद्भवेत् ।
अत पर प्रवक्ष्यामि विशाखोत्सवमुत्तमम् ॥९३॥
वृषभस्थे दिनकरे पौर्णमासी तु या भवेत् ।
विशाखाऋक्षयुक्ता वा ह्ययुक्ता वा द्विजोत्तमा ॥९४॥
चतुर्दश्या ह्यविद्धाया तस्यामुत्सवमाचरेत् ।
सहकारफलादीनि नालिकेरफलान्यपि ॥९५॥
द्राक्षाखर्जूरकादीनि मातुलुङ्गफलान्यपि ॥
अन्यानि चैव योग्यानि यथालब्धानि वा द्विजा ॥९६
आदाय सर्वाण्येकत्र न्यस्य पात्रेषु च द्विजा ।।
तानि पात्राणि विन्यस्य परिचारकमूर्धसु ॥९७॥
विन्यासेन पुरस्कृत्य वाद्यघोषसमन्वितम् ।

ग्रामं प्रदक्षिणीकृत्य मन्दिरान्तः प्रवेशयेत् ॥९८॥
महानसादौ निक्षिप्य फलपात्राण्यतः परम् ।
वैष्णवैर्ब्राह्मणैः शुद्धैर्महार्हयसमन्वितैः ॥९९॥
चस्त्रेण पिहितास्यैश्च जिह्वाचापल्यवर्जितैः ।
निस्त्वकरणयोग्यानि तथा निस्त्वाश्चि कारयेत् ॥१००॥
यथावस्थितरूपेण शोधनार्हाणि शोधयेत् ।
तथैव क्षाळनार्हाणि क्षाळयेच्छुद्धवारिभिः ॥१०१॥
फलानि सहकाराणां क्षीरेण गुडमिश्रितम् ।
पाचयेन्नाळिकेराणां खण्डैश्चैव मरीचिभिः ॥१०२॥
एलाकर्पूरचूर्णैश्च मिश्रयेदेवमेव हि ।
महाहविः पायसादीनपूपांश्च प्रकल्पयेत् ॥१०३॥
दिवापि वा रजन्यां वा नित्यपूजावसानतः ।
मन्त्रासनपुरस्कं तु देवं स्नानासनं नयेत् ॥१०४॥
पञ्चविंशतिभिः कुम्भैः संस्नाप्य पुरुषोत्तमम् ।
अलङ्कारासनेऽभ्यर्च्य ततो भोज्यासनं नयेत् ॥१०५॥
महाहविः पायसाद्यं सहकारफलादिकम् ।
निवेद्य देवदेवाय ताम्बूलादीन्निवेदयेत् ॥१०६॥
कारिभ्यो वैष्णवेभ्यश्च तत्प्रसादं प्रदापयेत् ।
ततस्तु चौत्सवं बिम्बं श्रीपुष्टिभ्यां समन्वितम् ॥१०७॥
यानमारोप्य वस्त्राद्यैरलङ्कृत्य विशेषतः ।
सर्वमङ्गळसंयुक्तं नीत्वा ग्रामं प्रदक्षिणम् ॥१०८॥
मन्दिरान्तः प्रवेश्याथ स्वस्थाने सन्निवेशयेत् ।
यजमानोऽथ गुर्वादीन् तोषयेद्दक्षिणादिभिः ॥१०९॥
एवं विशाखोत्सवस्य विधानं सम्प्रकीर्तितम् ।
अथ ग्रहोत्सवविधिं शृणुध्वं मुनिपुङ्गवाः ॥११०॥

शिशिरादिषु ऋतुषु त्रिष्वेकस्मिन् समाचरेत् ।
शुक्लपक्षेऽथ वा कृष्णे देवेशस्य महोत्सवम् ॥१११॥
यजमानस्य जन्मर्क्षे देवजन्मर्क्षकेऽपि वा ।
ध्वजाधिरोहणं कुर्याद्राजराष्ट्राभिवृद्धिदम् ॥११२॥
तन्नक्षत्रानुसारेण सप्ताहं वा नवाहकम् ।
पञ्चाहं वा त्र्यहं वापि एकाहं वोत्सवं भवेत् ॥११३॥
उत्सवारम्भपूर्वेद्युरङ्कुरार्पणमाचरेत् ।
रक्षाबन्धं च विधिवत्कुर्याद्देशिकसत्तमः ॥११४॥
आरम्भदिनमारभ्य प्रत्यहं कालयोर्द्वयोः ।
चतुस्स्थानार्चनं कुर्याद्बलिदानसमन्वितम् ॥११५॥
आदावन्ते च देवेशमघमोचममार्गतः ।
सञ्चारयेत्प्रतिदिनं वाहनारोहणं भवेत् ॥११६॥
अन्तिमे तु दिने कार्यमुद्धपम्याधिरोहणम् ।
प्रत्यहं चापि मध्याह्ने देवं देवीसमन्वितम् ॥११७॥
यानमारोप्य वस्त्राद्यैरलङ्कृत्य विशेषतः ।
ग्रामं प्रदक्षिणीकृत्य सरस्तीरं समानयेत् ॥११८॥
तत्र प्रकल्पिते दिव्ये मण्टपे सुमनोहरे ।
भद्रासने देवदेवं समारोप्य विशेषतः ॥११९॥
अर्घ्याद्यैस्तु समभ्यर्च्य महता हविषा तथा ।
ततस्तु देवदेवेशं मन्दिरान्तः प्रवेशयेत् ॥१२०॥
उद्धपारोहणदिनेष्येव देवं सरस्तटे ।
समाराध्य विशेषेण हविरन्तं जगत्प्रभुम् ॥१२१॥
स्वस्तिके चतुरश्रे वा वृत्ते वापि सरोवरे ।
परितः कृतसोपाने चतुर्द्वारोपशोभिते ॥१२२॥
चतुर्दिक्षु महोत्तुङ्गगोपुरैश्चोपशोभिते ।

समध्यमण्टपे दिव्ये विमलोदकपूरिते ॥१२३॥
प्रकल्पितं प्लवं दिव्यं फलकाभिर्दृढीकृतम् ।
अनेकस्तम्भसंयुक्तं लोहकीलैर्दृढीकृतम् ॥१२४॥
विमानसदृशाकारं मण्टपाकृतिमेव वा ।
द्वितलं त्रितलं वापि चतुःपञ्चतलान्वितम् ॥१२५॥
अलङ्कृतं च विविधैर्वितानैः पुष्पमाल्यकैः ।
दर्पणैश्चामरैश्चैव ध्वजैश्च विविधैरपि ॥१२६॥
नाळिकेरैः पूगफलस्तबकैः कदळीफलैः ।
ह्रीबेरैश्चैव घण्टाभिः परितः समलंकृतम् ॥१२७॥
प्रोक्ष्य पुण्याहतोयेन सरस्तोयं च देशिकः ।
दहनाप्यायनाभ्यां च संशोध्य विमलोदके ॥१२८॥
क्षीरार्णवं समावाह्य सम्पूज्यार्घ्यादिभिर्द्विजाः ! ।
प्लवे फणीन्द्रमावाह्य परितः कुमुदादिकान् ॥१२९॥
समभ्यर्च्यार्घ्यगन्धाद्यैः कुम्भे चावाह्य पूजयेत् ।
अप्रावनन्तमन्त्रेण हुत्वा चैव यथाविधि ॥१३०॥
प्लवं तत्कुम्भतोयेन प्रोक्षयेद्देशिकोत्तमः ।
एवं प्लवं तु संस्कृत्य मुहूर्ते तु सुशोभने ॥ १३१ ॥
देवीभ्यां सह देवेशं प्लवमारोपयेद्गुरुः ।
आचार्यः साधकश्चैव दीक्षिताः परिचारकाः ॥१३२॥
सेवापरास्तथान्ये च वैष्णवा वेदपाठकाः ।
तिष्ठेयुः परितो देवमन्येषां तु पृथक्प्लवः ॥१३३॥
अन्ये तु न स्पृशेयुस्तं यस्तु शेषात्मकः प्लवः ।
वन्दिनो वारवनिताः ये चान्ये वाद्यवादकाः ॥१३४॥
ते ते पृथक्प्लवारूढाः कुर्युर्नृत्तादिकं तथा ।
शङ्खभेर्यादिनिनदैर्वेदघोषैः समन्ततः ॥१३५॥

पुष्पवर्षैर्विनोदैश्च देवं सन्तोषयेत्तदा ।
प्रदक्षिणत्रयं कुर्यात्पञ्चकं सप्तकं तु वा ॥१३६॥
ततः सरोमध्यभागमण्टपे देवमानयेत् ।
तत्र देवं समभ्यर्च्य अर्घ्याद्यैर्देशिकोत्तमः ॥१३७॥
अर्हणं पृथुकापूपनाळिकेररसं तथा ।
तर्पणं चैव ताम्बूलं मुखवाससमन्वितम् ॥१३८॥
निवेद्य देवदेवाय ताम्बूलाद्यैस्ततः परम् ।
सेवाजनांश्च सन्तोष्य यावदस्तमयं रवेः ॥१३९॥
नानाविनोदैः सन्तोष्य देवं नीत्वा पुनः प्लवम् ।
तीरमासाद्य देवेशमवरोप्य प्लवात्ततः ॥१४०॥
ग्रामप्रदक्षिणं देवं मन्दिरात्तं प्रवेशयेत् ।
नित्यार्चनं पुरा कृत्वा विशेषयजनं तथा ॥१४१॥
प्राग्वत्कुम्भप्रोक्षणान्तं सर्वं कुर्याद्यथाविधि ।
यजमानो गुरुं चैव तोषयेद्दक्षिणादिभिः ॥१४ ॥
एवं प्लवोत्सवविधिः प्रोक्तः सङ्क्षेपतो द्विजाः ! ।
अथ चाग्रयणाख्यस्य विधानं किञ्चिदुच्यते ॥१४३॥
आषाढे पूर्वफल्गुन्यां पुष्ये चैव विशेषतः ।
माघमासे तु पञ्चम्यां सप्तम्यामथ वा द्विजाः ! ॥१४४॥
मुहूर्ते शोभने प्राप्ते कुर्याद्धान्यस्य सङ्ग्रहम् ।
सेनाधिपं तदर्थं तु तार्क्ष्यं वा मारुतिं तु वा ॥१४५॥
आरोप्य शिबिकायानं सर्वैः परिजनैः सह ।
आचार्यो यजमानश्च वाद्यघोषपुरस्सरम् ॥१४६॥
क्षेत्रदेशं समासाद्य पुण्याहं वाचयेद्गुरुः ।
क्षेत्रमर्घ्यादिनाभ्यर्च्य भूमन्त्रेणैव मन्त्रवित् ॥१४७॥
स्वस्ति च परि सम्प्रोक्ष्य मूलमन्त्रेण पूजयेत् ।

ततस्तु क्षेत्रपालेभ्यो बलिं दद्यात्समन्ततः ॥१४८॥
दध्योदनं पायसं वा देशिकः क्षेत्रवृद्धये ।
सुमुहूर्ते मौनयुक्तो देशिको मूलमन्त्रतः ॥१४९॥
धान्यानां लवनं कुर्यात्तलश्चैवं कृपविलैः ।
कारयित्वा धान्यभारान् विविधानि फलानि च ॥१५०॥
सङ्गृह्य वाहयन् पश्चाद्वेदवाद्यरवैः सह ।
विष्वक्सेनपुरस्कं तु कृत्वा ग्रामप्रदक्षिणम् ॥१५१॥
देवगेहं समासाद्य प्रासादान्तः प्रविश्य च ।
देवस्य दक्षिणे हस्ते धान्यं किञ्चित्प्रदर्शयेत् ॥१५२॥
आतपे शोषयेत्पश्चादवघातं समाचरेत् ।
तत्स्थाने गोमयाम्भोभिः समालिप्य समन्ततः ॥१५३॥
सुधाचूर्णैरलंकृत्य मुसलं तदुलूखलम् ।
क्षाळयित्वा शुद्धजलैरर्घ्यगन्धादिनार्चयेत् ॥१५४॥
धान्यान्युलूखले न्यस्य सुमुहूर्तेवघातयेत् ।
सार्धं मङ्गळगानैश्च सर्ववाद्यरवैः सह ॥१५५॥
सधवब्राह्मणस्त्रीभिर्देवदासीगणैस्तु वा ।
सुपानपोह्य शूर्पेण क्षाळयेच्छुद्धवारिणा ॥१५६॥
शोधयित्वा पुनः सर्वान् गुडपाकेन मिश्रितान् ।
मरीचिजीरकैर्युक्तान् नाळिकेरफलान्वितान् ॥१५७॥
विधाय मूलबिम्बादीनभ्यर्च्य च विशेषतः ।
निवेद्य तानि तदनु वह्नौ सन्तर्पयेद्विभुम् ॥१५८॥
होमान्ते सप्त समिधां तण्डुलैर्जुहुयाच्चतः ।
पश्चान्निवेदितं सर्वं गुर्वादिभ्यः प्रदापयेत् ॥१५९॥
एवमाग्रयणाख्यं हि अश्वमेधसहस्रतः ।
उत्तमं देवदेवस्य कारयेत्प्रतिवत्सरम् ॥१६०॥

अथ डोलोत्सवविधिं शृणुध्वं मुनिपुङ्गवाः ।
उत्तरायणकाले वा दक्षिणायन एव च ॥१६१॥
शुक्लपक्षे विशेषेण पञ्चमीं सप्तमीं तु वा ।
एकादशीं वा दशमीं द्वादशीं पूर्णिमां तु वा ॥१६२॥
समारभ्योत्सवं कुर्यात्सप्ताहं वा नवाह्नकम् ।
पञ्चाहं वा त्र्यहं वापि विभवेच्छानुसारतः ॥१६३॥
उत्सवारम्भपूर्वेद्युर्निशायामङ्कुरार्पणम् ।
रक्षाबन्धं च विधिवत्कुर्याद्देशिकसत्तमः ॥१६४॥
प्रथमावरणे वापि द्वितीयावरणादिके ।
बहिर्वा गोपुरद्वारात्क्वचित्सुमनोहरे ॥१६५॥
देशे डोलोत्सवार्थं तु मण्टपं परिकल्पयेत् ।
द्वात्रिंशत्स्तम्भसंयुक्तं चतुर्विंशतिभिस्तु वा ॥१६६॥
षोडशस्तम्भयुक्तं वा चतुर्द्वारसमन्वितम् ।
मण्टपं समलङ्कुर्यान्नानावर्णवितानकैः ॥१६७॥
विचित्रक्षौमवस्त्रैश्च मुक्तादामभिरेव च ।
नानाकुसुममाल्यैश्च दर्पणैश्चामरादिभिः ॥१६८॥
ध्वजैश्च विविधै रम्यैः प्रसूनस्तबकैस्तथा ।
घण्टाभिः फलभारैश्च प्रदीपावलिभिस्तथा ॥१६९॥
मण्टपाभ्यन्तरभुवं कस्तूरीकुङ्कुमादिभिः ।
कर्पूरैश्च समालिप्य सुधाचूर्णादिभिर्भुवम् ॥१७०॥
अलङ्कृत्य विशेषेण कुसुमैरक्षतैः शुभैः ।
विकीर्य दिव्यधूपैश्च धूपयित्वा समन्ततः ॥१७१॥
सौवर्णीं राजतीं ताम्रीं दारुजां वा यथा रुचि ।
यथोक्तलक्षणां डोलां वृत्तां वा चतुरश्रकाम् ॥१७२॥
विमानसदृशीं वापि संयक्तलशोभिताम् ।

चतुःस्तम्भसमायुक्तां यद्वा स्तम्भद्वयान्विताम् ॥१७३॥
वितानैर्विविधैर्माल्यैर्दर्पणैः केतुभिस्तथा ।
अलंकृत्य विशेषेण लम्बयेन्मण्टपान्तरे ॥१७४॥
रज्जुभिर्लोहकल्माभिः क्षौमकार्पासतन्तुभिः ।
कृताभिर्वा यथायोगं ततो देशिकसत्तमः ॥१७५॥
पुण्याहं वाचयित्वा तु डोलां सम्प्रोक्ष्य मन्त्रवित् ।
डोलायाः फलकामध्ये अनन्तं परिपूजयेत् ॥१७६॥
पादेषु चैव धर्माधमष्टकं वा चतुष्टयम् ।
स्तम्भेषु गारुडव्यूहमभ्यर्च्य क्रमयोगतः ॥१७७॥
तथैव चतुरो वेदान् रज्जुषु क्रमशोऽर्चयेत् ।
इतिहासपुराणानि वेदाङ्गानि तथैव च ॥१७८॥
फलकायामष्टदिक्षु पूजयेन्मुनिसत्तमा. ?।
व्यापकांस्तु चतुर्मन्त्रान् पादेषु परिपूजयेत् ॥१७९॥
इष्ट्वा ध्वजेषु सावित्रीं छत्रेषु व्याहृतीस्तथा ।
प्रणवं तु पताकासु तोरणेषु स्वरांस्तथा ॥१८०॥
व्यञ्जनानि च सम्पूज्य डोलां कृत्वा तु वाङ्मयीम् ।
डोलायाः परितो दिक्षु इन्द्रादीन् परिपूजयेत् ॥१८१॥
डोलायास्तु पुरोभागे यद्वान्यत्र यथाविधि ।
धान्यपीठे महाकुम्भमुपकुम्भाष्टकान्वितम् ॥१८२॥
विन्यस्य तत्र डोलोक्तान् देवानावाह्य पूजयेत् ।
उपकुम्भाष्टके चैव इन्द्रादीन् परिपूजयेत् ॥१८३॥
कुण्डे वा स्थण्डिले वापि वह्निं संस्कृत्य पूर्ववत् ।
तान् देवांस्तत्र चावाह्य तत्तन्मन्त्रैरनुक्रमात् ॥१८४॥
पृथगष्टाहुतीर्हुत्वा घृताद्यैर्देशिकोत्तमः ।
पूर्णाहुत्यादिकं कृत्वा नियम्यामिं ततो गुरुः ॥१८५॥

सम्पाताज्यने तां डोला संसिच्य सुमुहूर्तके ।
कुम्भतोयेन सम्प्रोक्ष्य पूजयेच्च विशेषतः ॥१८६॥
डोलायाः परितो दिक्षु इन्द्रादिभ्यो बलिं ददेत् ।
एवं डोलां तु संस्कृत्य कुर्याड्डोलोत्सवं विभोः ॥१८७॥
चतुःस्थानार्चनयुतं बलिदानसमन्वितम् ।
आरम्भे चावसाने च पूर्वोक्तस्नपनान्वितम् ॥१८८॥
सायं नित्यार्चनं कृत्वा विशेषयजनं तथा ।
देव याने समारोप्य श्रीपुष्टिभ्यां समन्वितम् ॥१८९॥
धाम प्रदक्षिणीकृत्य डोलापार्श्वं समानयेत् ।
शङ्खभेरीनिनादैश्च तूर्यमङ्गलनिस्वनैः ॥१९०॥
सुमुहूर्ते सुलग्ने च डोलामारोपयेद्विभुम् ।
तत्रार्चयेज्जगन्नाथमलङ्कारासनोदितैः ॥१९१॥
भोगैर्नीराजनान्तं च ततो भोज्यासने विभुम् ।
नीत्वा महाहविर्दिव्यमपूपानुपहारकान् ॥१९२॥
निवेद्य तर्पणादीनि ताम्बूलान्तं निवेदयेत् ।
डोलारज्जून् चतुर्दिक्षु गृहीत्वा द्विजसत्तमाः ॥१९३॥
मन्दं मन्दं चालयेयुस्तदानीं देशिकोत्तमः ।
पुंसूक्ताद्यैर्देवदेव स्तुवन्नुच्चरवैस्तदा ॥१९४॥
कस्तूरीकुङ्कुमाद्यैश्च कर्पूरैः परिभावितम् ।
दिव्यगन्धं तु देवाय समर्प्य च विशेषतः ॥१९५॥
वीजयेयुर्नीलवृन्तैश्चामरैश्च विशेषतः ।
विचित्रकुसुमस्रग्भिर्हेमरत्नमरादिभिः ॥१९६॥
अलङ्कुर्याद्देवदेवं तत्काले द्विजसत्तमाः ।
विविधानुपहारांश्च पुनराचमनं तथा ॥१९७॥
मुखवासमनोपेतं ताम्बूलं च निवेदयेत् ।

विविधानि च नृत्तानि कुर्युर्वाराङ्गनास्तदा ॥ १९८ ॥
वीणावेणुनिनादैश्च गीतैश्च विविधैस्तदा ।
तोषयेद्देवदेवेशं स्तोत्रैश्च विविधैस्तथा ॥ १९९ ॥
स्तुवन्तु वन्दिनः सर्वे भगवद्भक्तिबृंहिताः ।
एवमन्यैश्च विविधैरुपचारैश्च तोषयेत् ॥ २०० ॥
डोलाचालनवेळायां ये पश्यन्ति श्रियः पतिम् ।
इह ते प्राप्य चाभीष्टान् प्राप्नुवन्ति परां गतिम् ॥२०१॥
ततस्तु देवं देवीभ्यां यानमारोप्य देशिकः ।
धाम प्रदक्षिणं कृत्वा प्रासादान्तः प्रवेशयेत् ॥ २०२॥
सकृत् त्र्यहं वा पञ्चाहं सप्ताहं वा नवाहकम् ।
कृत्वैवमुत्सवं नित्यं सायङ्काले यथाविधि ॥२०३॥
प्राग्वत्कुर्यादुत्सवान्ते कुम्भसम्प्रोक्षणान्तिमम् ।
आचार्यं पूजयेत्पश्चाद्यजमानस्तु पूर्ववत् ॥२०४॥

इति डोलोत्सवविधिः सङ्क्षेपेण प्रदर्शितः ।
आषाढशुक्लद्वादश्यां स्वापोत्सवमथाचरेत् ॥२०५॥
तदादि कौमुदाख्यस्य यावन्मासस्य तद्दिनम् ।
तपसा योगनिद्रायाः सन्तुष्टो जगदीश्वरः ॥२०६॥
योगनिद्रां प्रभजति लोकरक्षणहेतुना ।
नैमित्तिकान्मासिमासि तथा संवत्सरोत्सवान् ॥२०७॥
विशेषयागसंयुक्तान् सर्वसम्पूरणादृते ।
नान्यं नैमित्तिकं काम्यं कुर्यान्मासचतुष्टये ॥२०८॥
अभीष्टव्रतमाश्रित्य नेतव्यं तच्चतुष्टयम् ।
भगवद्भक्तिनिष्णातैः कार्यं तत्रेदमुच्यते ॥२०९॥
प्रासादस्य पुरोभागे यद्वान्यत्र मुनीश्वराः ।
कल्पयेच्छयनागारं सर्वालङ्कारसंयुतम् ॥२१०॥

सर्वोपकरणैर्युक्तं पर्यङ्काद्युपशोभितम् ।
यद्वा गर्भगृहे विष्णोर्मूलमूर्तेस्तु दक्षिणे ॥२११॥
शयनं कल्पयेद्विप्राः सर्वोपकरणैः सह ।
सगृह्य सर्वसम्भारान् दशम्यां द्विजसत्तमाः ॥२१२॥
एकादश्यां निशि विभुं चतुस्स्थानेषु पूजयेत् ।
यागमण्टपमासाद्य जागरेण नयेन्निशाम् ॥२१३॥
ब्राह्मे मुहूर्ते सम्प्राप्ते कृतस्नानः कृताह्निकः ।
नित्यार्चनं पुरा कृत्वा चतुस्स्थानार्चनं तथा ॥२१४॥
ततो विसृज्य देवेशं कुम्भमण्डलकुण्डगम् ।
अर्घ्येण गन्धपुष्पाभ्यां धूपेन सुशुभेन च ॥२१५॥
मूलमूर्तिं समभ्यर्च्य तस्माच्छयनकौतुके ।
कूर्चे वा देवमावाह्य श्रीभूमिभ्यां समन्वितम् ॥२१६॥
सस्नाप्य समलङ्कृत्य अभ्यर्च्य हविरन्तिमम् ।
निशासुरे प्रवृत्ते तु कृत्वा नित्यार्चनं विभोः ॥२१७॥
ततस्तु शयनागारं नीत्वा शयनकौतुकम् ।
ततः शयनदेशे तु पश्चिमे हेमविष्टरे ॥२१८॥
निवेश्य प्राङ्मुखं देवं हविरन्तं समर्चयेत् ।
होमं निधाय विधिवत्कृत्वा होमसमर्पणम् ॥२१९॥
पर्यङ्केनन्तमाप्राद्य तस्मिन् देवं यथाविधि ।
शाययित्वाथ तस्याग्रे नियमान् शास्त्रचोदितान् ॥२२०॥
सङ्कल्प्य चतुरो मासान् देवस्योत्थापनावधि ।
मतानुष्ठाननिरतः प्रत्यहं देवमर्चयेत् ॥२२१॥
सर्वेपि वैष्णवाः कुर्युर्मदादि व्रतमुत्तमम् ।
शयनाख्योपचारैश्च प्रत्यहं तोषयेद्विभुम् ॥२२२॥
...र मासद्वये याते मासि भाद्रपदे द्विजाः ।

द्वादश्यां शुक्लपक्षस्य देशिकेन्द्रो निशामुखे ॥२२३॥
विशेषयागपूर्वं तु परिवर्तनमाचरेत् ।
प्रबोधनं ततः कुर्यात् शयनस्थस्य वै विभोः ॥२२४॥
द्वादश्यां शुक्लपक्षस्य कार्तिके मासि तु द्विजाः ! ।
दशम्यां पूर्ववत्सर्वसम्भारान् समुपार्ज्य च ॥२२५॥
एकादश्यां निशायां तु चतुःस्थानस्थितं विभुम् ।
समभ्यर्च्य विशेषेण जागरेण नयेन्निशाम् ॥२२६॥
ब्राह्मे मुहूर्ते द्वादश्यां मन्त्रमूर्तिं प्रबोधयेत् ।
नित्यार्चनं पुरा कृत्वा चतुःस्थानार्चनं तथा ॥२२७॥
ततः शयनमूर्तिं च समभ्यर्च्य विशेषतः ।
स्नानादिहविरन्तं तु गर्भगेहे प्रवेशयेत् ॥२२८॥
विसर्जयेन्मूलमूर्तौ मन्त्रं शयनमूर्तिगम् ।
ततस्तु चौत्सवं बिम्बं देवीभ्यां समलंकृतम् ॥२२९॥
रथादिके समारोप्य यात्रोपकरणैः सह ।
ग्रामप्रदक्षिणं कृत्वा स्वस्थाने सन्निवेशयेत् ॥२३०॥
ततो विसर्जयेद्देवं कुम्भमण्डलकुण्डगम् ।
तदा चाश्रमिणः सर्वे कुर्युर्व्रतविसर्जनम् ॥२३१॥
यजमानोथ गुर्वादीन साधकान् ब्राह्मणानपि ।
हिरण्यैस्तोषयेत्सर्वान् यथाशक्ति द्विजोत्तमाः ! ॥२३२॥
इत्येवमुक्तं देवस्य शयनं च प्रबोधनम् ।
शयनस्थे जगन्नाथे चातुर्मासस्य मध्यतः ॥२३३॥
पवित्रारोहणं कुर्यादनन्तस्यातितुष्टिदम् ।

इति श्रीपाञ्चरात्रे ईश्वरसंहितायां
पक्षोत्सवविधिर्नाम
द्वादशोऽध्यायः ।

अथ त्रयोदशोऽध्यायः ।

नारदः ।

जन्मोत्सवं च कृष्णस्य शृणुध्वं मुनिपुङ्गवाः ! ।
कृष्णजन्मदिनं त्वेतद्विविधं परिकीर्तितम् ॥१॥
जन्माष्टमी जयन्तीति तयोर्भेदस्तु कथ्यते ।
चन्द्रोदयेऽष्टमीयुक्ता सप्तमीकलया विना ॥२॥
रोहिणीरहिता वापि सा हि जन्माष्टमी स्मृता ।
सिंह गतेऽर्के सा मुख्या यद्वा श्रावणमासगा ॥३॥
तस्यामभ्यर्चनं विष्णोर्धर्मकामार्थसिद्धिदम् ।
निष्कामो यदि कैवल्यफलदं भवति ध्रुवम् ॥४॥
सूर्योदयेपि सप्तम्या तथा कृत्तिकयापि च ।
कलयापि ह्यविद्धा या रोहिणी द्विजपुङ्गवा ! ॥५॥
अष्टमीसहिता वापि अष्टमीरहितापि वा ।
तथैव बुधवारेण सहिता रहितापि वा ॥६॥
जयन्ती नाम सा प्रोक्ता जयत्यशुभमित्यसौ ।
अष्टम्यां वा नवम्यां वा दशम्यां वापि रोहिणी ॥७॥
अविद्धा यदि लभ्येत कलामात्रापि वैष्णवैः ।
ग्राह्या कदापि विद्धा तु न ग्राह्या वैष्णवोत्तमैः ॥८॥
मृगशीर्षे तु वा ग्राह्य शुद्धर्क्षस्य ह्यभावतः ।
सिंहभाद्रपदे मुख्या जयन्ती सिंहगापि वा ॥९॥
तस्मिन् मासे मुनिश्रेष्ठाः ! यदा ऋक्षद्वयं भवेत् ।
परत्रैवोत्सवं कुर्यान्महापातकनाशनम् ॥१०॥
पश्चाद्वेद्रोहिणी विद्धा पूर्ववत्तैव समाचरेत् ।
पूर्वेभ्य हि सदृक्तान्निवेधत्यागोपि शस्यते ॥११॥

दिवा सङ्क्रान्तियोगश्चेज्जयन्तीं पूर्वतस्त्यजेत् ।
परतो निशि योगे तु त्यजेद्योगान्वितामपि ॥१२॥
उभयोः क्रान्तिवेधश्चेज्जयन्त्योर्मुनिसत्तमाः ! ।
उत्सवं मृगशीर्षे वा पूर्वमेव समाचरेत् ॥१३॥
एवं जयन्त्यां रामस्य नरसिंहवराहयोः ।
वामनादिजयन्त्यामप्येवमेव विनिर्णयः ॥१४॥
जयन्त्यां तत्र कृष्णस्य दिवोपोष्य विशेषतः ।
रात्रावभ्यर्चनं कुर्यात्तद्विधानमिहोच्यते ॥१५॥
नित्यकर्माणि निर्वर्त्य सायं देशिकसत्तम. ।
भगवद्गृहमासाद्य कृत्वा नित्यार्चनं पुरा ॥१६॥
प्रासादस्य पुरोभागे मण्टपं परिकल्पयेत् ।
क्लृप्तं वा मण्टपं पूर्वमलङ्कुर्याद्विशेषतः ॥१७॥
चतुर्द्वारसमायुक्तं ध्वजतोरणभूषितम् ।
वितानैर्विविधैश्चित्रैः सर्वतः परिशोभितम् ॥१८॥
परितश्चित्रकौशेयमहायवनिकान्वितम् ।
मुक्तासरैश्च विविधपुष्पमाल्यैर्विराजितम् ॥१९॥
फदळीजम्बुजम्बीरनाळिकेरफलादिभि. ।
रम्भास्तम्भैः पूगफलस्तबकैः समलङ्कृतम् ॥२०॥
दर्पणैर्दीपमालाभि. शोभितं धूपधूपितम् ।
कुङ्कुमागरुकस्तूरीसमालिप्तमहीतलम् ॥२१॥
सुधाचूर्णादिभिश्चित्रैः परितः समलंकृतम् ।
मध्ये प्रविलसद्दिव्यरत्नविष्टरशोभितम् ॥२२॥
एवं पूर्वमलंकृत्य मण्टपे तु ततः परम् ।
कृष्णबिम्बं समानीय विन्यसेद्भद्रविष्टरे ॥२३॥
अर्घ्यादिभि. समभ्यर्च्य ततस्तु तदनुज्ञया ।

पुष्पाङ्कुरं निधायाथ रक्षाबन्धं समाचरेत्॥२४॥
देवस्यैशानभागे तु महाकुम्भं तु विन्यसेत् ।
मण्डलं तु पुरोभागे समालिख्य यथाविधि ॥२५॥
मण्टपस्य पुरोभागे कुण्डं तु परिकल्पयेत् ।
एवं सर्वं समापाद्य यावच्चन्द्रोदयं गुरुः ॥२६॥
देवस्य दक्षिणे पार्श्वे जपन्नष्टाक्षरं मनुम् ।
गापयन् कृष्णमाहात्म्यं तथान्याः वैष्णवीः कथाः॥२७॥
गानैर्नृत्यैर्विनोदैश्च तोषयेज्जगतां पतिम् ।
उदिते तु निशानाथे जन्मकाले जगत्पतेः ॥२८॥
कुम्भे च मण्डले कृष्णं यथोक्तविधिना यजेत् ।
ततो विम्बे समभ्यर्च्य देवं मन्त्रासनान्तिमम् ॥२९॥
एकाशीतिघटैर्देवं स्नापयेद्धोमपूर्वकम् ।
पञ्चविंशतिकुम्भैर्वा स्नापयेत्तु यथाविधि ॥३०॥
अलङ्कारासनं नीत्वा समभ्यर्च्य विशेषतः ।
कृत्वा नीराजनान्तं च ततो भोज्यासनं नयेत् ॥३१॥
अर्घ्यादिभिः समभ्यर्च्य अर्हणं च समर्पयेत् ।
मधुपर्कं निवेद्याथ नवनीतं च शर्कराम् ॥३२॥
गोक्षीरं घृतसंयुक्तं फलानि विविधानि च ।
पृथुकादींश्चोपहारान् गुडखण्डान्विनानपि ॥३३॥
माषमुद्गतिलव्यञ्जनदधिमध्वाज्यदुग्धकैः ।
हरिद्राजीरकैलाद्यैर्याजितानि विशेषतः ॥३४॥
विविधानि च भक्ष्याणि गोघृते पाचितानि च ।
क्रमादष्टविधान्नानि गुर्जन क्षीरमुत्तमम् ॥३५॥
[illegible] तर्पणजलं पानकं च विशेषतः ।
भक्ष्यं भोज्यं तथा लेह्यं पेयं चापि घनेकशः ॥३६॥

निवेद्य देवदेवाय मात्रान्तं देशिकोत्तमः।
मुखवाससमोपेतं ताम्बूलं विनिवेद्य च ॥३७॥
कृत्वाथ जपयज्ञान्तं गत्वा कुण्डसमीपकम्।
तत्र प्रतिष्ठिताग्नौ तु योगपीठं प्रकल्पयेत् ॥३८॥
तन्मध्ये कृष्णमावाह्य सकलीकृत्य मन्त्रवित्।
कृत्वा सप्तसमिद्धोमं ततः पूर्णां निवेदयेत् ॥३९॥
ततो देवं विसृज्याग्नेरग्निं च विसृजेद्गुरुः।
ततस्तु देवदेवाय कृत्वा होमसमर्पणम् ॥४०॥
अर्घ्यदानं विशेषेण कुर्यात्सर्वफलप्रदम्।
तद्विधानं प्रवक्ष्यामि देवस्य पुरतो भुवि ॥४१॥
गोमयेनोपलिप्याथ वृत्ताकारं सुशोभनम्।
सुधाचूर्णैरलंकृत्य गन्धपुष्पाक्षतैः फलैः ॥४२॥
तन्मण्डले तु रोहिण्या सह चन्द्रं समर्चयेत्।
ततस्तस्मै नमस्कुर्यान्मन्त्रेणानेन वै द्विजाः! ॥४३॥
ज्योत्स्नापते! नमस्तुभ्यं नमस्ते ज्योतिषां पते!।
नमस्ते रोहिणीकान्त! सुधाकुम्भ! नमोऽस्तु ते ॥४४॥
इति चन्द्रं नमस्कृत्य दद्यादर्घ्यं ततः परम्।
शङ्खे तोयं समापूर्य गोक्षीरेण विमिश्रितम् ॥४५॥
शङ्खाग्रे चन्द्रमभ्यर्च्य तन्मूले कृष्णमर्चयेत्।
हस्ताभ्यां शङ्खमादाय सपुष्पफलचन्दनम् ॥४६॥
जानुभ्यामवनिं स्पृष्ट्वा चन्द्रायार्घ्यं निवेदयेत्।
क्षीरोदार्णवसम्भूत! अत्रिनेत्रसमुद्भव! ॥४७॥
गृहाणार्घ्यं शशाङ्केदं रोहिण्या सहितो मम।
इति चन्द्रायार्घ्यदानं कृष्णसन्तोषकारणम् ॥४८॥
प्रीणनं सर्वदेवानां सर्वसम्पद्विवृद्धिदम्।

कृष्णायार्घ्यं ततो दद्यान्मन्त्रेणानेन वै द्विजा ! ॥४९॥
जात. कसवधार्थाय भूभारोत्तारणाय च ।
पाण्डवाना हितार्थाय धर्मसंस्थापनाय च ॥५०॥
कौरवाणा विनाशाय दैत्याना निधनाय च ।
गृहाणार्घ्यं मया दत्त देवक्या सहितो हरे ! ॥५१॥
इति कृष्णायार्घ्यदान राजराष्ट्राभिवृद्धिदम् ।
सर्वसम्पत्करं चैव सर्वलोकहितार्थकृत् ॥५२॥
यजमानोपि वा दद्यादर्घ्यमेव जगत्प्रभो ।
इह सर्वाभीष्टसिद्धयै परत्र च सुगायते ॥५३॥
तत्काले देशिकादिभ्यो गोभूस्वर्णान्यनेकश. ।
दद्याद्देवस्य सन्तुष्टयै यजमानो विशेषत. ॥५४॥
अर्थोपहारैर्विविधैस्ताम्बूलाद्यैश्च देशिक. ।
जपस्तोत्रादिभिश्चैव तोषयेत्तु श्रिय पतिम् ॥५५॥
निवेदितान्नभक्ष्यादीन् चतुर्धा विभजेत्तत ।
आचार्य. स्वयमादद्यादेकाश तु ततस्त्रिभि. ॥५६॥
मूर्तिपान् वैष्णवानन्यान् भक्तान् भागवतोत्तमान् ।
तोषयित्वा तत सर्वांस्ताम्बूलाद्यैश्च तोषयेत् ॥५७॥
कुम्भस्य मण्डलस्य च प्राग्वदेव विसर्जयेत् ।
ततस्तु देवदेवस्य शयन कारयेद्गुरु ॥५८॥
रम्ये तु मण्टपे डोला कृत्वा मणिमयीं शुभाम् ।
मृदूपधानतूलाढ्या स्वर्णरज्जुविलम्बिताम् ॥५९॥
सौवर्णकिङ्किणीयुक्ता मुक्तादामविलम्बिताम् ।
कस्तूरीकुङ्कुमाद्यैश्च वासितां धूपधूपिताम् ॥६०॥
तत्रानन्त समभ्यर्च्य देवमारोपयेद्गुरु ।
शयनासनभोगैस्तु देव तत्र समर्चयेत् ॥६१॥

एवं हि शयनान्तं तु कृत्वा चैकदिनोत्सवम् ।
अनुयागं ततः कुर्यादाचार्यो वैष्णवैः सह ॥६२॥
वैष्णवानामुत्सवान्ते पारणं विहितं द्विजाः ! ।
यद्वा फलेच्छया कार्यं पारणं तु परेहनि ॥६३॥
ततोऽवशिष्टयामिन्यामाचार्यो देवसन्निधौ ।
भक्तैर्भागवतैः सार्धं गापयन् वैष्णवीः कथाः ॥६४॥
गानैर्नृत्तैस्तथा हास्यैर्जागरेण नयेन्निशाम् ।
ततः प्रभाते त्वाचार्यः कृतस्नानः कृताह्निकः ॥६५॥
देवमुत्थाप्य विधिवन्नित्यपूजां समाचरेत् ।
विशेषेणार्चयेद्देवं स्नानाद्यैर्हविरन्तिमैः ॥६६॥
ततः कृष्णमलंकृत्य विविधैर्वस्त्रभूषणैः ।
दिव्ये तु कुञ्जरे वाश्वे शिबिकायां रथेपि वा ॥६७॥
समारोप्य दृढीकृत्य ह्यलंकृत्य विशेषतः ।
उत्सवं देवदेवस्य कुर्याद्ग्रामप्रदक्षिणम् ॥६८॥
विचित्रैर्दारुरचितैश्चतुस्स्तम्भैर्मनोहरैः ।
चित्रवस्त्रवितानाढ्यैः फलपल्लवसंयुतैः ॥६९॥
मध्यालम्बिक्षीरघटैर्नवनीतघटान्वितैः ।
दधिभाण्डान्वितैश्चैव तोरणैर्विविधैस्तदा ॥७०॥
चित्रध्वजपताकाभिः पुष्पमालाशतान्वितैः ।
वितानैः फलभारैश्च रम्भास्तम्भादिभिस्तथा ॥७१॥
अलङ्कृतासु सिक्तासु दिव्यकुङ्कुमवारिभिः ।
सुधाचूर्णालंकृतासु कीर्णासु कुसुमाक्षतैः ॥७२॥
दिव्यधूपैर्धूपितासु वीथीषु द्विजसत्तमाः ! ।
शनैः शनैर्देवदेवं सविलासं नयेत्तदा ॥७३॥
छत्रध्वजपताकाभिर्वन्दिभिर्गणिकादिभिः ।

नायघोषैर्वेदघोषैर्भक्तैर्भागवतोत्तमैः ॥७४॥
तैलं च रजनीचूर्णं विकिरद्भिः परस्परम्।
नवनीतं च दधि च क्षीरं च कुसुमादिकम्॥७५॥
क्षिपद्भिश्च हसद्भिश्च भक्षयद्भिश्च वैष्णवैः।
अर्थात् सन्तोषयद्भिश्च नवनीतघृतादिकैः ॥७६॥
ताम्बूलं रजनीचूर्णं ददद्भिः पौरयोषिताम्।
विकिरद्भिः पुष्पगन्धैः कुङ्कुमैः कृष्णमव्ययम्॥७७॥
हस्तमुद्धृत्य कूर्जद्भिस्तथा गोपालबालकैः।
दध्यादिभाण्डान् भिन्दद्भिः कृष्णस्य पुरतो भुवि॥७८॥
पिबद्भिः क्षीरदध्यादीन् किरद्भिश्च परस्परम्।
आस्वाद्य नवनीतं च क्षिपद्भिर्बहुधा मिथः ॥७९॥
रोहद्भिस्तोरणस्तम्भान् नृत्यद्भिर्गर्वितैर्मुहुः।
आभीरकुलजैर्युक्तैः कृष्णानुचरभावतः ॥८०॥
यन्त्रस्थभाण्डान् दण्डेन ताडयद्भिर्मुहुर्मुहुः।
तत्र भाण्डस्रुता धारा पिबद्भिश्च पदे पदे ॥८१॥
एवं क्रीडारतैर्भक्तैर्विनोदैरेवमादिभिः।
ग्रामप्रदक्षिणं कृत्वा मन्दिरान्तः प्रवेशयेत् ॥८२॥
आस्थानमण्टपं नीत्वा देवं वै हेमविष्टरे।
समारोप्य समभ्यर्च्य विविधैरुपहारकैः ॥८३॥
ताम्बूलाद्युपचारैश्च देवमन्तः प्रवेशयेत्।
सकृत् त्र्यहं वा पञ्चाहं सप्ताहं वा नवाहकम्॥८४॥
पक्षं मासं तु वा चैवमुत्सवैस्तोषयेद्विभुम्।
स्वतन्त्रं परतन्त्रं वा कृष्णमेव समर्चयेत् ॥८५॥
अभावे कृष्णबिम्बस्य तत्प्रासादसम्स्थितम्।
देवमेवार्चयेद्भक्त्या जयन्त्यां तु विशेषतः ॥८६॥

एवं नृसिंहं रामं च वराहं वामनादिकान्।
तत्तज्जन्मदिने सम्याविशेषस्नपनेन तु ॥८७॥
महता हविषा चैव चतुःस्थानेषु पूजयेत्।
कुम्भे च मण्डले बिम्बे वह्नौ च यजनं विभो ॥८८॥
मुख्ये कल्पे प्रकुर्वीत ह्यनुकल्पे तु मण्डलम्।
विना कुम्भादिषु यजेद्धिम्बवह्न्योस्तु वा यजेत् ॥८९॥
इत्थं यः कारयेद्भक्त्या जयन्त्युत्सवमुत्तमम्।
इहेप्सितार्थान् सम्पाद्य सायुज्यं पदमाप्नुयात् ॥९०॥
अथ चाश्वयुजे मासि कर्तव्यं सर्वसिद्धिदम्।
वीरलक्ष्म्युत्सवविधिं वक्ष्यामि मुनिसत्तमा[1] ॥९१॥
तस्मिन् मासि सिते पक्षे ह्यष्टमीकलयापि वा।
अविद्धाया नवम्या तु श्रीदेव्युत्सवमाचरेत् ॥९२॥
तद्वासरानुसारेण नवाहोत्सवमाचरेत्।
तिथिलोपे ह्यमावास्या आरभ्योत्सवमाचरेत् ॥९३॥
वृद्धौ द्वितीयामारभ्य नवाहोत्सवमाचरेत।
सप्ताहं वापि पञ्चाहं त्र्यहमेकाहमेव वा ॥९४॥
आचरेदुत्सवं लक्ष्म्याः फलकामनया द्विजाः!।
नवाहं वैष्णवं प्रोक्तं सप्ताहं त्वार्षकं भवेत् ॥९५॥
पञ्चाहं त्वैन्द्रकं प्रोक्तं त्रियहं शैवमुच्यते।
एकाहमुत्सवं ब्राह्मं पञ्चधैवं प्रकीर्तितम् ॥९६॥
ब्राह्मं वै ब्रह्मसिद्ध्यर्थं शैवं रोगविनाशनम्।
ऐन्द्रं दुर्भिक्षनाशार्थमार्षं राष्ट्राभिवृद्धिदम् ॥९७॥
वैष्णवं तूत्सवं प्रोक्तं भुक्तिमुक्तिफलप्रदम्।

१— मुक्ति—इति—(पा)

उत्सवारम्भपूर्वेद्युर्निशायामङ्कुरार्पणम् ॥९८॥
रक्षाबन्ध च विधिवत्कुर्याद्देशिकसत्तम ।
आरम्भे चावमाने च अधमोत्तममार्गत ॥९९॥
सन्नापयेच्छ्रिय देवीं श्रीमन्त्रेणैव देशिक ।
प्रत्यह नित्यपूजान्ते विशेषार्चनमाचरेत् ॥१००॥
कुम्भे च मण्डले बिम्बे वह्नौ चापि यथाविधि ।
तत्र तत्र विशेषो य कथ्यते सम्प्रति द्विजा[1] ॥१०१॥
कुम्भार्चने श्रिय देवीं मध्यकुम्भे समर्चयेत ।
सुदर्शन तु वर्धन्या प्रागेव समर्चयेत् ॥१०२॥
लक्ष्मीं कीर्तिर्जया माया उपकुम्भाष्टके द्विजा[1] ।
प्रभवाप्ययपयोगेन पूज्या प्रागादिषु क्रमात् ॥१०३॥
तत्र द्वारार्चनविधिं शृणुध्व मुनिपुङ्गवा[1] ।
वास्त्वीशक्षेत्रपालौ द्वौ सर्वद्वारेषु पूजयेत् ॥१०४॥
लक्ष्मी कीर्तिर्जया माया द्वारेषूर्ध्वस्थिता क्रमात ।
सृष्टिर्लज्जा जया माया सावित्री च क्षमा तथा ॥१०५॥
शुद्धाऽशुद्धा तथा द्वे द्वे प्रागादिद्वारशाखयो ।
तथाऽऽदिद्वारकुम्भेषु ज्येष्ठाविघ्योस्तथैव च ॥१०६॥
श्रद्धाकान्त्यो क्रियात्तुष्ट्यो क्षमामूर्तिनयास्त्ययो ।
क्रमाद्द्वन्द्वप्रयोगेण पूजन तु समाचरेत् ॥१०७॥
चण्डीं चैव प्रचण्डीं च पूर्वद्वारे प्रपूजयेत ।
दक्षिणोत्तरयोगेन तोरणस्तम्भमूलयो ॥१०८॥
मन्दाकिनीं दक्षिणे तु यजेच्च वनमालिनीम् ।
विमलिका शार्ङ्गीं च पश्चिमे सम्प्रपूजयेत् ॥१०९॥

[1] — दिग्द्वार — इति —(पा)

तथैव चोत्तरद्वारे शङ्खपद्मनिधी यजेत् ।
सत्यादींश्च पताकासु इन्द्रादींश्च यथाक्रमम् ॥११०॥
प्राग्वदेवार्चयेद्विप्राः । अयं द्वारार्चनक्रमः ।
मासविशेषयागान्ते उत्सवं च समाचरेत् ॥१११॥
सौवर्णशिबिकायाने अथ वा पुष्पमण्टपे ।
श्रियं देवीं समारोप्य ह्यलङ्कृत्य विशेषतः ॥११२॥
सर्वैर्यात्रोपकरणैर्नयेद्ग्रामप्रदक्षिणम् ।
एवं कृत्वोत्सवं पश्चाद्देवीमास्थानमण्टपे ॥११३॥
हेमपीठे समारोप्य ह्यलङ्कारासनोदितैः ।
भोगैः क्रमेण सम्पूज्य नयेद्भोज्यासनं ततः ॥११४॥
अर्घ्यादीनर्हणं चापि मधुपर्कं समर्पयेत् ।
मुद्गान्नपायसादीनि भक्ष्याणि विविधानि च ॥११५॥
पृथुकादींश्चोपहारान् श्रियै देव्यै निवेदयेत् ।
शीतलं तर्पणं चैव नाळिकेररसं तथा ॥११६॥
समर्प्य दद्यात्ताम्बूलं मुखवाससमन्वितम् ।
जपयज्ञं ततः कुर्याल्लक्ष्मीमन्त्रेण मन्त्रवित् ॥११७॥
निवेदितं तु यद्द्रव्यं चतुर्धा विभजेत्ततः ।
तेष्वेकांशं समादाय आचार्याय प्रदापयेत् ॥११८॥
शिष्टानंशांस्तथा सर्वान् भक्तेभ्यश्च प्रदापयेत् ।
स्तोत्रैश्च विविधैर्नृत्तैः गीतैर्वाद्यरवैः सह ॥११९॥
तद्वा सन्तोषयेल्लक्ष्मीं सर्वाभीष्टफलप्रदाम् ।
एवं कृत्वा ततो लक्ष्मीं प्रासादान्तः प्रवेशयेत् ॥१२०॥
एवं प्रतिदिनं कुर्यात्सम्पन्नं महोत्सवम् ।
मासं मासधुःस्नानपूजनेन समन्वितम् ॥१२१॥
नवमीदिवसे प्रोमे प्राप्तपूर्णोत्सवादिदम् ।

रात्रौ विशेषयागान्ते कुण्डमण्डलमध्यगाम् ॥१२२॥
श्रिय विसृज्य हृदये कुम्भ देव्यास्तु सन्निधिम् ।
समानीय समभ्यर्च्य श्रिय श्रीसूक्तमुच्चरन् ॥१२३॥
कुम्भतोयेन सम्प्रोक्ष्य कौतुक च विसृज्य च ।
हविरन्त समभ्यर्च्य प्रणिपत्य क्षमापयेत् ॥१२४॥
यजमानो दक्षिणाभिराचार्यादीन् प्रतोषयेत् ।
एव य कारयेद्भक्त्या महानवमिकोत्सवम् ॥१२५॥
आयुष्यारोग्यमैश्वर्य तेज कीर्ति च सन्ततिम् ।
सर्वाभीष्टाश्च सम्प्राप्य ब्रह्मसायुज्यमाप्नुयात् ॥१२६॥
तदन्येद्युर्दशम्या तु देवस्य मृगयोत्सवम् ।
वक्ष्यमाणेन विधिना कुर्याद्राष्ट्राभिवृद्धिदम् ॥१२७॥
नवम्यामेव देवस्य तुरग च विशेषत ।
अलङ्कृत तथास्त्रौघ देवस्य धनुरादिकम् ॥१२८॥
वाहयस्तु नदीतीर सरस्तीरमथापि वा ।
समानीयाथ सस्नाप्य तुरग चायुधादिकम् ॥१२९॥
अलङ्कृत्य विशेषेण माल्यैर्वस्त्रादिकैस्तथा ।
छत्रध्वजपताकाद्यैर्नृत्तवाद्यरवै सह ॥१३०॥
ग्रामप्रदक्षिण नीत्वा आलय सम्प्रवेशयेत् ।
तत्र देवस्य तुरग तार्क्ष्यमन्त्रेण मन्त्रवित ॥१३१॥
समभ्यर्च्यार्घ्यगन्धाद्यैर्हविरन्त समर्चयेत् ।
आयुधान्यर्चयेत्तद्वत्तत्तन्मन्त्रेण देशिक ॥१३२॥
दशम्या देवदेवस्य कृत्वा नित्यार्चन पुरा ।
यात्रार्थनिर्गत देव नयेदास्थानमण्टपम् ॥१३३॥
त देव तत्र सस्थाप्य पञ्चविंशतिभिर्घटै ।
अस्त्रारामनेभ्यर्च्य निवेद्य च महाहवि ॥१३४॥

देवमश्वे समारोप्य ततस्तु मृगयोचितैः ।
अलङ्कारैरलङ्कृत्य यात्रोपकरणैः सह ॥१३५॥
भक्तैर्भागवतैः सार्धं सन्नद्धैः सायुधैर्भटैः ।
महावनं समानीय तत्र तत्र विशेषतः ॥१३६॥
वानप्रस्थैस्तापसाद्यैरर्पितानि च भक्तितः ।
कन्दमूलफलादीनि विविधाः कुसुमस्रजः ॥१३७॥
समर्प्य देवदेवाय वह्निवृक्षसमीपतः ।
नीत्वा प्रदक्षिणीकृत्य देवं तत्र प्रपादिके ॥१३८॥
भद्रासने समावेश्य वह्निवृक्षस्य मूलतः ।
आयुधानि समभ्यर्च्य पुण्याहोक्तिपुरस्सरम् ॥१३९॥
शमीपत्रं तु सङ्गृह्य मूलमन्त्रेण देशिकः ।
दत्वा देवस्य शिरसि अर्घ्याद्यैः सम्प्रपूज्य च ॥१४०॥
ताम्बूलं विनिवेद्याथ देशिकस्तदनुज्ञया ।
धनुर्बाणान् समादाय सर्वदिग्विजयाय च ॥१४१॥
सर्वशत्रुविनाशाय राजराष्ट्राभिवृद्धये ।
चतुर्दिक्षु चतुर्बाणान् ऊर्ध्वेऽधश्च शरद्वयम् ॥१४२॥
प्रयुञ्जेदस्त्रमन्त्रेण धन्वनागेति वा ऋचा ।
ततोऽर्चयेद्देवदेवं विविधैरुपहारकैः ॥१४३॥
सायङ्काले तु सम्प्राप्ते आरोप्याश्वे जगत्प्रभुम् ।
प्रदीपशतसंयुक्तं नानावाद्यसमन्वितम् ॥१४४॥
ग्रामप्रदक्षिणं देवं मन्दिरान्तः प्रवेशयेत् ।
देवेशं नवभिः कुम्भैः स्नाप्यालंकृत्य देशिकः ॥१४५॥
श्रीपुष्टिभ्यां सह विभुं हविरन्तं समर्चयेत् ।
एवं दशम्यां कर्तव्यमुत्सवं च प्रकीर्तितम् ॥१४६॥
अतः परं प्रवक्ष्यामि दीपोत्सवमनुत्तमम् ।

वृश्चिकस्थे दिनकरे पौर्णमासी तु या द्विजाः ॥१४७॥
चतुर्दश्या भरण्याश्च कलयाप्यरुणोदये ।
अविद्धा कृत्तिकायुक्ता ह्ययुक्ता वा मुनीश्वराः ॥१४८॥
तस्या वृषभकाले तु दीपारोपणमाचरेत् ।
द्वयोरह्नो सङ्क्रान्तिश्चेत्पर्वणस्त्वन्तिमे दिने ॥१४९॥
ग्राह्यं पर्व कालामात्रमपि दीपोत्सवादिके ।
दीपं कुर्यात्प्रतिपदि त्वलब्धौ शुद्धपर्वणः ॥१५०॥
पर्वद्वये तु सम्प्राप्ते तस्मिन्मासे द्विजोत्तमाः ।
दीपोत्सवं तु मासान्तपर्वण्येव समाचरेत् ॥१५१॥
तस्मिन् सङ्क्रान्तिदुष्टे तु पूर्वमेव समाचरेत् ।
उभयत्रापि सङ्क्रान्तौ कृत्तिकाभिः समन्विते ॥१५२॥
पर्वण्येव मुनिश्रेष्ठाः ! दीपारोपणमाचरेत् ।
पर्वद्वयं कृत्तिकाभिरयुक्तं चेत्तदा द्विजाः ॥१५३॥
रोहिण्या वापि संयुक्ते पर्वण्युत्सवमाचरेत् ।
रोहिण्या अप्ययोगे तु तदा मासान्तपर्वणि ॥१५४॥
सङ्क्रान्तियोगदुष्टेपि दीपारोपणमाचरेत् ।
अथ चन्द्रोपरागेण दुष्टं पर्व यदि द्विजाः ! ॥१५५॥
प्राक्पश्चादुपरागस्य सन्त्यक्त्वा सप्त नाडिकाः ।
दीपं रात्र्यन्तरे कुर्याद्राजराष्ट्रसुखावहम् ॥१५६॥
एवं सम्यग्विचार्याथ कुर्याद्दीपोत्सवं बुधः ।
तद्विधानं विस्तरेण वक्ष्यामि मुनिसत्तमाः ! ॥१५७॥
तद्दिने देवदेवस्य मन्दिरं सर्वतो द्विजाः ! ।
ग्रामान्तरागमारभ्य बहिरावरणान्तिमम् ॥१५८॥
मशालैश्चतुर्दनोपैत्रांकणे परिचारकैः ।
सम्पादितार्थिनिदेशं सद्देवीविमिश्रिते ॥१५९॥

मार्जयेत्सर्वतस्तत्रालेपयेद्गोमयाम्बुभि ।
अस्त्रेण प्रोक्षयेत्पश्चात्पञ्चगव्यकुशाम्बुभि ॥१६०॥
सुधाचूर्णैरलङ्कृत्य विकिरेदक्षतैर्भुवम् ।
वितानै पुष्पमालाभिरलङ्कृत्य च सर्वत ॥१६१॥
चन्दनागरुकर्पूरधूपै सर्वत्र धूपयेत् ।
ततोपराह्णे सम्प्राप्ते देशिको मूर्तिपै सह ॥१६२॥
प्रासाद सम्प्रविश्याथ मूलबिम्बगत विभुम् ।
समभ्यर्च्यार्घ्यगन्धाद्यैस्तस्मादुत्सवकौतुके ॥१६३॥
समावाह्य समभ्यर्च्य श्रीपुष्टिभ्या समन्वितम् ।
यात्राबिम्ब भद्रपीठे निवेश्यास्थानमण्टपे ॥१६४॥
पुष्पाङ्कुर तत कृत्वा मूलबिम्बादिषु द्विजा ! ।
रक्षाबन्ध च विधिवत्कृत्वा देशिकसत्तम ॥१६५॥
चतुस्स्थानार्चन कुर्याद्यथोक्तविधिना तत ।
सस्नापयेत्तदा देव पञ्चविंशतिभिर्घटै ॥१६६॥
महता हविषा चैव अपूपैरुपहारकै ।
अभ्यर्च्य देवदेवेश कुर्याद्दीपाधिवासनम् ॥१६७॥
मूलबिम्बस्य पुरतो धान्यपीठ प्रकल्पयेत् ।
सौवर्णं राजत वापि ताम्र मृण्मयमेव वा ॥१६८॥
दीपपात्र समादाय तस्मिन्नाढकसम्मितम् ।
गव्यमाज्य समापूर्य वर्ति तन्मध्यतो न्यसेत् ॥१६९॥
नूतनैर्वस्त्रखण्डैर्वा रचिता कार्पासतन्तुभि ।
तत्पात्र धान्यपीठोर्ध्वे विन्यस्य मुनिपुङ्गवा ! ॥१७०॥
तत्पात्रपरितश्चाष्टौ शरावान् घृतपूरितान् ।
गर्भनिधान् न्यसेत्तत्र प्रागादिषु यथाक्रमम् ॥१७१॥
पुण्याह वाचयित्वा तु प्रोक्षयेत्तत्र गिरा ।

प्रदोषे दीपपात्राणि वाहयन् दीक्षितैर्द्विजै ॥१७२॥
गत्वा कुण्डसमीप तु तत्र कुण्डस्थवह्निना ।
दीपान् प्रज्वाल्य नेत्रेण वाहयन् ब्राह्मणैस्तदा ॥१७३॥
वेदघोषैर्वाद्यघोषै साक धामप्रदक्षिणम् ।
कृत्वा देवस्य पुरत प्राग्वत्पीठे तु विन्यसेत् ॥१७४॥
नेत्रेण वाग्निमन्त्रेण दीपमर्घ्यादिभिर्यजेत् ।
तत शुभे मुहूर्ते तु वृषलग्ने गुरूत्तम ॥१७५॥
देवमर्घ्यादिनाभ्यर्च्य दीपपात्र समुज्वलम् ।
आदाय नेत्रमन्त्रेण उद्दीप्यस्वेति वा ऋचा ॥१७६॥
प्रदर्श्य देवदेवाय सर्वमङ्गळसयुतम् ।
परिचारकहस्ते तद्दीप दत्वा ततो गुरु ॥१७७॥
तेन द्वारेषु सर्वेषु मण्टपावरणेषु च ।
विन्यस्ता दीपिका सर्वा दीपयेद्द्विजपुङ्गवा ॥१७८॥
तदानीमोत्सव विम्ब श्रीपुष्टिभ्या समन्वितम् ।
यानमारोप्य वस्त्राद्यैरलङ्कृत्य विशेषत ॥१७९॥
यात्रोपकरणै सार्धं प्रदीपाना सहस्रकै ।
अधीयानैर्द्विजश्रेष्ठैर्मन्त्राननल्देवतान् ॥१८०॥
प्रथमावरणाद्येषु सर्वेष्वावरणेष्वपि ।
भ्रामयेद्देवदेवेश प्रादक्षिण्येन वै द्विजा ॥१८१॥
देवस्योत्सववेळाया सर्वत्रावरणादिषु ।
दीपा नानाविधाकारा कल्पनीया समन्तत ॥१८२॥
तथा प्रासाददिग्भागे मण्टपे गोपुरेषु च ।
श्रियाश्चैना मन्दिरेषु परिवारालयेषु च ॥१८३॥
धनधान्यादिगेहेषु तथा पुष्पाल्यादिके ।
दीपारोप नरा कुर्याद्यात्राबिम्बस्य सन्निधौ ॥१८४॥

ततस्तु देवदेवेश गोपुरद्वारमानयेत् ।
तत्र द्विजा ! वक्ष्यमाणं विष्णुदीपं प्रकल्पयेत् ॥१८५॥
शैलजं लोहजं वापि दारुजं वा यथारुचि ।
प्रासादोच्छ्रायमानं वा शततालमथापि वा ॥१८६॥
तदर्धं वा तदर्धं वा दीपस्तम्भं समाचरेत् ।
चतुर्धा विभजेत् स्तम्भं एकांशं चतुरश्रकम् ॥१८७॥
त्र्यंशं तूर्ध्वे षोडशाश्रमष्टाश्रं वृत्तमेव वा ।
एकहस्तं द्विहस्तं वा त्रिहस्तं वा घनं तथा ॥१८८॥
स्तम्भाग्रे चतुरश्रं च पीठं कुर्यात्सपद्मकम् ।
तथा स्तम्भमलङ्कृत्य पत्रपुष्पलताचयैः ॥१८९॥
आहृत्यैवंविधं स्तम्भं बहिर्द्वारस्य बाह्यतः ।
संस्थापयेदन्तरालं स्तम्भगोपुरयोर्भवेत् ॥१९०॥
द्वात्रिंशद्धस्तमानं वा चतुर्विंशत्करं तु वा ।
रथयालाऽविरोधेन ततोऽप्यधिकमेव वा ॥१९१॥
यद्वा स्तम्भं गोपुरान्तं स्थापयेन्मुनिपुङ्गवाः ! ।
पीठगोपुरयोर्मध्ये यद्वा स्तम्भं प्रकल्पयेत् ॥१९२॥
स्तम्भमूले चतुर्हस्तं त्रिहस्तं वायतं द्विजाः ! ।
तावन्मानेन विस्तीर्णं द्वित्रिहस्तोच्छ्रितं द्विजाः ! ॥१९३॥
सार्धहस्तोच्छ्रितं वापि चतुरश्रं तु पीठकम् ।
शिलाभिरिष्टकाभिर्वा कल्पयेन्मुनिपुङ्गवाः ! ॥१९४॥
स्तम्भाधस्तात्पूर्वभागे सिंहं दक्षे तु मारुतिम् ।
पश्चिमे वैनतेयं चाप्युत्तरे हंसमाविशेत् ॥१९५॥
एवं कृते दीपदण्डे यथाशास्त्रं सुशोभने ।
मुहूर्ते नाक्षत्रयोगेन पूर्वमेव प्रतिष्ठिते ॥१९६॥
तदा पूर्वदिवं दीपस्तम्भे चयेद्दिने ।

इत्येव विष्णुदीपस्य विधानं सम्प्रकीर्तितम् ॥१९७॥
एवं कृत्वा ततो देवं नयेद्ग्रामप्रदक्षिणम् ।
तत्र तत्र ग्रामवीथ्यां दीपारोपणमाचरेत् ॥१९८॥
तीर्थतीरेषु चोद्याने कूपतीरादिषु द्विजाः ! ।
चत्वरेषु च सर्वत्र दीपारोपणमाचरेत् ॥१९९॥
गृहे गृहे तथा कुर्याद्भ्रमयन् सर्ववीथिकाः ।
ततस्तु देवदेवेशं मन्दिरान्तः प्रवेशयेत् ॥२००॥
आस्थानमण्टपे भद्रविष्टरे सन्निवेश्य तु ।
अर्घ्यादिभिः समभ्यर्च्य अपूपानुपहारकान् ॥२०१॥
पायसादीन् तथा लाजान् ताम्बूलादीन्निवेदयेत् ।
अग्नौ सन्तर्पयेद्देवं प्रायश्चित्ताहुतीस्तथा ॥२०२॥
घृतेनाष्टोत्तरशतं जुहुयाद्देशिकोत्तमः ।
ततो विसर्जयेद्देव कुण्डमण्डलमध्यगम् ॥२०३॥
कुम्भसम्प्रोक्षणादींस्तु प्राग्वदेव समाचरेत् ।
ततस्तु चौत्सवं बिम्बं प्रासादान्तः प्रवेशयेत् ॥२०४॥
तत्र चावाहितां शक्तिं पुनर्मूले नियोजयेत् ।
यजमानो दक्षिणाभिराचार्यादीन् प्रतोषयेत् ॥२०५॥
एवं यः कारयेद्भक्त्या दीपोत्सवमनुत्तमम् ।
इह लोके सुखं प्राप्य परलोके महीयते ॥२०६॥
कार्तिक्यां पौर्णमास्यां हि कर्तव्यमिदमुत्सवम् ।
लोकेशदेवदेवस्य विस्तरेण प्रकीर्तितम् ॥२०७॥
कार्तिके मासि विप्रेन्द्राः! शुक्लैकादशिका तु या ।
तस्यामुपोष्य रात्र्यां तु जागरेण जगत्पतिम् ॥२०८॥
तत्कालोचितगन्धैस्तोषयित्वा तु गीतकैः ।
ब्राह्मे मुहूर्ते सम्प्राप्ते विशेषेण यजेद्विभुम् ॥२०९॥

संश्रावयेद्गीतकानि स्तोत्राणि विविधाः कथाः।
होमावसानं सर्वं तु सविशेषं समाचरेत् ॥२१०॥
तत्काले ये च गायन्ति तच्च शृण्वन्ति ये जनाः।
तेषां पुण्यफलावाप्तिं कः शक्नोत्यभिवर्णितुम् ॥२११॥
अतः परं प्रवक्ष्यामि मार्गशीर्षोत्सवं परम्।
कोदण्डस्थे दिनकरे तत्काले सङ्क्रमे द्विजाः! ॥२१२॥
संस्नाप्य देवदेवेशमघमोत्तममार्गतः।
अलङ्कारासनं नीत्वा ह्यर्घ्याद्यैः परिपूज्य च ॥२१३॥
वासोभिर्भूषणैर्माल्यैर्गन्धैः कस्तूरिकादिभिः।
अलंकृत्य च देवेशं विष्वक्सेनादिकांस्तथा ॥२१४॥
तथैव भक्तबिम्बांश्च संस्नाप्य नवभिर्घटैः।
अलंकृत्य विशेषेण यजेदर्घ्यादिभिः क्रमात् ॥२१५॥
ततस्तु देवदेवेशं नीत्वा भोज्यासनं शुभम्।
मुद्गान्नं पायसान्नं च शर्कराघृतसंयुतम् ॥२१६॥
नानाविधानि भक्ष्याणि विविधानि फलानि च।
ताम्बूलं मुखवासं च विनिवेद्य यथाविधि ॥२१७॥
निवेदितान्नभक्ष्यादीन् विष्वक्सेनादिकस्य च।
भक्तानां च निवेद्याथ देवदेवं श्रियः पतिम् ॥२१८॥
प्रदक्षिणीकृत्य तदा प्रणम्य च यथाविधि।
तोषयेद्वैष्णवैर्देवं स्तोत्रैर्नानाविधैस्तदा ॥२१९॥
संस्कृतैर्द्राविडैर्वापि देवपारम्यसूचकैः।
मानसं ध्यानमित्युक्तं कायिकं कर्मचोच्यते ॥२२०॥
वाचिकं स्तोत्रमित्युक्तं त्रिविधैस्तोषयेत्प्रभुम्।
ततस्तु वैष्णवाग्र्याणां वैष्णवस्तुतिगायिनाम् ॥२२१॥
सर्वं निवेदितान्नादीन् दद्याद्देवस्य सन्निधौ।

वैष्णवा भगवद्भक्ता गृहीत्वा विनयान्विता ॥२२२॥
पीत्वा तीर्थं प्रसादं च भक्षेयुर्देवसन्निधौ ।
आरभ्य सङ्क्रमादेव मासान्तं मुनिपुङ्गवा ! ॥२२३॥
अरुणस्योदयात्पूर्वं समाराध्य यथाविधि ।
मुद्गान्नपायसापूपादीन् भक्ष्याणि विविधानि च ॥२२४॥
निवेदयेच्च देवाय भक्तेभ्यश्च दिने दिने ।
भक्तप्रणीतगाथाभि स्तुवीत पुरुषोत्तमम् ॥२२५॥
तस्मिन् मासे विशेषेण देवदेवस्य सन्निधौ ।
सर्पिषा तिलतैलैर्वा दीपारोपणमाचरेत् ॥२२६॥
त्रिंशद्दिने विशेषेण दीपमारोपयेत्तु य ।
इह भुक्त्वाखिलान् भोगान् विष्णुलोकं स गच्छति ॥२२७
एवं त्रिंशद्दिनं कुर्यादर्चनं त्वरुणोदये ।
तस्मिन्नन्त्ये दशदिने विशेषोत्सवमाचरेत् ॥२२८॥
उत्सवारम्भपूर्वेद्युर्निशायामङ्कुरार्पणम् ।
रक्षाबन्धं च विधिवत्कृत्वा देशिकसत्तम ॥२२९॥
उत्सवारम्भदिवसादारभ्यान्त्यदिनावधि ।
चतुस्स्थानार्चनं कुर्यात्सायम्प्रातर्यथाविधि ॥२३०॥
आरम्भे चावसाने च स्नपनं प्राग्वदाचरेत् ।
द्वितीयावरणादौ वा गोपुराद्बहिरेव वा ॥२३१॥
कल्पयेद्देवदेवस्य महामण्टपमुत्तमम् ।
वितानैः फलपुष्पैश्च दर्पणैश्चामरादिभिः ॥२३२॥
अलङ्कुर्याद्विशेषेण यथालोचनसुप्रियम् ।
मध्याह्ने देवदेवेशं श्रीपुष्टिभ्यां समन्वितम् ॥२३३॥
शिबिकायां समारोप्य अलङ्कृत्य विशेषत ।
विष्वक्सेनादिभिश्चैव भक्तबिम्बादिभिः सह ॥२३४॥

यात्रोपकरणै सार्धं कृत्वा ग्रामप्रदक्षिणम् ।
महामण्टपमानीय तत्र वै सिंहविष्टरे ॥२३५॥
देवमारोप्य देवीभ्या विष्वक्सेनादिकानपि ।
देवस्याभिमुख स्थाप्य ह्यलङ्कारासनोदिते २३६॥
भोगैर्देव समभ्यर्च्य भक्तबिम्बाश्च देशिक ।
सदागमादिकान्वेदास्तथा दिव्याश्च संहिता ॥२३७॥
इतिहासपुराणानि स्तोत्र दैव च मानुषम् ।
वेदोपबृंहणचान्यत्संस्कृत प्राकृत तु वा ॥२३८॥
भाषान्तरगत वापि तदा सश्रावयेद्विभुम् ।
ततस्त्वष्टविधान्नानि भक्ष्याणि विविधानि च ॥२३९॥
पृथुकान्नाळिकेरेक्षुकदळीचणकादिकान् ।
नाळिकेरोदकादीनि ताम्बूलमुपहारकान् ॥२४०॥
निवेद्य देवदेवाय भक्तेभ्यश्च यथाक्रमम् ।
निवेदितान्नभक्ष्यादीन् वैष्णवेभ्य प्रदापयेत् ॥२४१॥
ततस्तु देवदेवेश श्रीपुष्टिभ्या समन्वितम् ।
शिबिकाया समारोप्य भक्तबिम्बादिभि सह ॥२४२॥
सविलास नयेत्तत्र मण्टपे द्विजसत्तमा ! ।
तत्काले भक्तबिम्बाना सम्मान च समाचरेत् ॥४३॥
वेदघोषै स्तोत्रघोषैर्गद्यपद्यात्मकै स्तवै ।
वीणावेणुरवैश्चैव नृत्तगीतादिभि सह ॥२४४॥
मण्टप द्वि परिभ्राम्य पुन सिंहासने विभुम् ।
समारोप्य समभ्यर्च्य सायङ्काले विशेषत ॥२४५॥
चतु सहस्रिकामाद्या द्रामिडीं स्तुतिमुत्तमाम् ।
गापयेद्वैष्णवैस्तत्र नैवेद्यान्ते दिने दिने ॥२४६॥
एवमस्तु देवदेवेश पूर्वोक्तविधिना द्विजा ! ।

धामप्रदक्षिण नीत्वा मन्दिरान्त प्रवेशयेत् ॥२४७॥
आस्थानमण्टप नीत्वा कृत्वा नित्यार्चन विभो ।
चतु स्थानार्चन चापि कृत्वा स्वस्थानमानयेत् ॥२४८॥
एव दशदिन कुर्यादुत्सव मुनिसत्तमा ! ।
उत्सवान्ते तु कुम्भादिगत देव यथाविधि ॥२४९॥
विसर्जयेत्ततो देव प्रणिपत्य क्षमापयेत् ।
यजमानो दक्षिणाभिराचार्यादीन् प्रतोषयेत् ॥२५०॥
मार्गशीर्षोत्सवविधिरित्येव सम्प्रकीर्तित ।
मकरस्थे दिनकरे तत्काले सङ्क्रमे द्विजा ! ॥२५१॥
सस्नाप्य देवदेवेश पञ्चविंशतिभिर्घटै ।
अलकृत्य विशेषेण हविरादीन्निवेदयेत् ॥२५२॥
तत्काले यजमानश्च गोभूस्वर्णादिकास्तथा ।
कूश्माण्डव्रीहिदान च कुर्याद्देवस्य तुष्टये ॥२५३॥
तदन्येद्युर्देवदेव समभ्यर्च्य विशेषत ।
अश्वरथे समारोप्य देवमुत्सवबिम्बगम् ॥२५४॥
पूर्वोक्तविधिना कुर्यान्मृगयोत्सवमुत्तमम् ।
वने वने समानीय सविलास जगत्पतिम् ॥२५५॥
तत्र तत्र विशेषेण समभ्यर्च्य यथाविधि ।
मृगया कारयेत्तस्मात्सविनोद मुनीश्वरा ! ॥२५६॥
वराहवारणव्याघ्रऋश्यसारङ्गशशादिकान् ।
मध्ये हत्वा तु परित सेना विन्यस्य सायुधाम् ॥२५७॥
अतिशुभ्रपटान्तर मध्ये प्रविश्य यत्नत ।
जीवमात्र मृगान् धृत्वा नयेयुर्देवसन्निधिम् ॥२५८॥
ततो विमोचयेत्सर्वान्मृगानेकैकश क्रमात् ।
हतानां वा मृगाणां च भेरुण्यगतिर्भवम् ॥२५९॥

ततस्तु देवदेवेशं मण्टपे वा प्रपादिके ।
भद्रासने समारोप्य समभ्यर्च्य विशेषतः ॥२६०
सायङ्काले तु सम्प्राप्ते पूर्वोक्तविभवैः सह ।
ग्रामप्रदक्षिणं नीत्वा मन्दिरान्तः प्रवेशयेत् ॥२६१॥
संस्नाप्य देवदेवेशमलंकृत्य यथाविधि ।
श्रीपुष्टिभ्यां सह विभुं हविरन्तं समर्चयेत् ॥२६२॥
एवं हि देवदेवस्य मृगयोत्सव ईरितः ।
प्रतिसंवत्सरं त्वेवं देवस्य सकलोत्सवान् ॥२६३॥
यः कारयति विप्रेन्द्राः ! स तु साम्राज्यसंयुतः ।
इह लोके सुखं भुक्त्वा चिरं भोगान् यथेप्सितान् ॥२६४॥
देहसन्यासकाले तु प्राप्नोति भगवत्पदम् ।
इति सङ्कीर्तिताः सम्यग्देवस्य सकलोत्सवाः ॥२६५॥
इतोऽन्यच्छ्रोतुमिच्छा चेत्कथ्यतां मुनिपुङ्गवाः! ।

इति श्रीपाञ्चरात्रे ईश्वरसंहितायां
पक्षोत्सवादिविधिर्नाम
त्रयोदशोऽध्यायः ।

अथ चतुर्दशोऽध्यायः ।

मुनयः ।

शयनस्थे जगन्नाथे चातुर्मास्यस्य मध्यतः ।
पवित्रारोपणं कार्यमित्युक्तं भवता पुरा ॥१॥
तद्विधानं विस्तरेण वदस्व वदतां वर ! ।

नारदः ।

वक्ष्ये [illegible] पवित्रारोपणक्रमम् ॥२॥

शृणुध्व सावधानेन चेतसा मुनिपुङ्गवा ! ।
लोपबुद्धिं विना यस्य भोगानामप्यसम्भव ॥३॥
सामर्थ्येन विना यस्य कृच्छ्रादीना परिच्युति ।
ज्वरादिव्याधिदोषेण जातो यस्याह्निकक्षय ॥४॥
चातुर्मास्यस्य वाऽप्राप्तिर्यस्य स्वातन्त्र्यतो विना ।
तस्य तस्य महाबुद्धे ! शृणु यद्विहित हितम् ॥५॥
सार्स्पर्शिकाना भोगाना मात्राविच हि पूरणम् ।
हृदयङ्गमसज्ञानामन्न च हविषाऽऽप्लुतम् ॥६॥
औपचारिकभोगाना बीजानि विहितानि वै ।
कृच्छ्रचान्द्रायणादीना व्रताना परिपूरक ॥७॥
विशेषार्चनसयुक्तश्चातुर्मास्यस्य सयम ।
सौत्र प्रतिसर चित्र मुक्ताहारोपम शुभम् ॥८॥
शम नयति भक्ताना सर्वदा लोपमाह्निकम् ।
तच्च मासचतुष्कस्य मध्ये कुर्याच्छुभे दिने ॥९॥
आषाढपञ्चदश्यास्तु यावद्वै कार्तिकस्य च ।
सम्पूर्णं चन्द्रदिवस त काल चान्द्रमन्तिमम् ॥१०॥
आकर्कटकसङ्क्रान्तेस्तुलाभागक्षयावधि ।
काल तमष्टपक्ष च सौर मध्यमसज्ञितम् ॥११॥
एकादश्या दिनान्तो यश्चातुर्मास्योपलक्षित ।
काल त वैष्णव विद्धि तूत्तम सर्वसिद्धिदम् ॥१२॥
अपापरस्य कालस्य त्वन्तरायेण केनचित् ।
निर्वाहणीयोऽप्यपर कालश्चान्द्रायणादिना ॥१३॥
सम्पाद्यश्चैव तन्मध्ये विधिवद्यागपूर्वकम् ।
मासादस्यामन कुर्यात्तदर्थं मण्टप द्विजा ! ॥१४॥
प्रथमावरणे वापि द्वितीयावरणेऽपि वा ।

तृतीयावरणे वाथ चतुर्थे पञ्चमेऽपि वा ॥१५॥
अभ्यालाभे तदन्यत्र यथा वाञ्छितदिग्गतम् ।
चतुरश्रं समं वापि प्राक्पश्चिमदिगायतम् ॥१६॥
सौम्ययाम्यायतं वापि कर्तुरिच्छानुरूपतः ।
तथा प्रागाननं यद्वा यथाभिमतदिङ्मुखम् ॥१७॥
द्वाविंशतिधनुर्मानं मण्टपं चोत्तमं भवेत् ।
अष्टादशधनुर्मानं मण्टपं मध्यमं भवेत् ॥१८॥
अधमं द्वादशधनुर्मानं स्यादथ वा द्विजाः ! ।
पञ्चहस्तात्समारभ्य द्विद्विहस्तप्रवर्धनात् ॥१९॥
त्रिसप्तकरपर्यन्तं मानैर्नवविधं भवेत् ।
यद्वोत्तमं दशकरं मध्यमं चाष्टहस्तकम् ॥२०॥
षड्ढस्तं त्वधमं विद्यात् क्षुद्रं हस्तत्रयायतम् ।
त्रिंशत्करावसानं वा षट्करात्पञ्चविंशति. ॥२१॥
एकं सङ्गृह्य मानेषु ह्येषु वित्तानुरूपतः ।
सोपपीठमधिष्ठानं केवलं वा मसूरकम् ॥२२॥
अधिष्ठानोपरि स्तम्भं प्रस्तरं च त्रिवर्गकम् ।
कपोतप्रतिसंयुक्तं यद्वोक्ताकृतिवर्जितम् ॥२३॥
एकत्रिपञ्चसप्तादिभित्तिभेदैः समावृतम् ।
प्रत्यङ्गोक्तैरलङ्कारैर्युक्तं वा तद्विवर्जितम् ॥२४॥
शिलयेष्टकया वापि पक्वया वाप्यपक्वया ।
एकद्वारं चतुर्द्वारं यद्वा द्वारद्वयान्वितम् ॥२५॥
भित्तियुक्तमयुक्तं वा कोणभित्तियुतं तु वा ।
केवलं वा सपामातमुक्तलक्षणवर्जितम् ॥२६॥
क्षिप्रकर्मप्रसिद्ध्यर्थं शरकाष्ठमयं शुभम् ।
गवाक्षकान्वितं चैव द्वारैस्तु परिभूषितम् ॥२७॥

छत्रं वितानकेनोर्ध्वे प्रासादं परिकल्पयेत् ।
क्षेत्रसङ्कोचविस्तारौ कर्तुरिच्छानुसारतः ॥२८॥
शिल्पशास्त्रानुसारेण कृत्वैव मण्टपं द्विजाः ! ।
यागार्थं सुशुभं विप्रास्तन्मध्येथ प्रकल्पयेत् ॥२९॥
मसूरकमधिष्ठानं वास्त्वाधार धरातलम् ।
दृढा समा तदाकारामीषत्प्रागुत्तरप्लवाम् ॥३०॥
प्रोच्छ्रिता च विशेषेण स्थलीं दर्पणसन्निभाम् ।
सामान्या न भवेद्येन मेदिनी मण्टपस्य तु ॥३१॥
द्विद्विकेनाङ्गुळाना तु प्रोन्नतेर्यावदष्टकम् ।
एकवृध्याल्पमानानां यागानां तु स्थलाङ्गणम् ॥३२॥
नवाङ्गुळोन्नतेस्तावद्यावत्पञ्चदशाङ्गुळम् ।
प्रोन्नतत्वं स्थलानां च मध्यमानं मितात्मनाम् ॥३३॥
चतुर्विंशत्यङ्गुळान्तमुच्छ्राय षोडशाङ्गुळात् ।
प्रागुक्तवृध्या कर्तव्य ज्येष्ठमानं मितात्मनाम् ॥३४॥
एवमुच्छ्रायमानं च कथित च स्थलीषु हि ।
पादमर्धं तु हस्तं वा विस्तारात्सर्वदिक्षु वै ॥३५॥
स्थलीनामिष्टकाद्यैश्च चिन्वीयात्प्रथमं ततः ।
मृदा सम्पूर्य तन्मध्यमीषद्वालुकयान्वितम् ॥३६॥
परीक्ष्य केशकीटादीनाकोश्य तदनन्तरम् ।
यावद्भवति पूर्वोक्तलक्षणं वा विशेषतः ॥३७॥
स्थलीं मध्योन्नता रम्या सम्यक् सम्परीक्ष्य सा ।
न ददाति यदा भेदं यागयोग्या भवेत्तदा ॥३८॥
तदूर्ध्वे वेदिकां कुर्यादनेकचरणान्विताम् ।
तोरणैश्च समायुक्ता शिवेच्छानुसारतः ॥३९॥
पार्श्वर्यन्त्रकाद्यैश्च सुदृढैः सरलैः समैः ।

यथालक्षणयुक्तानि तोरणानि चतुर्दिशि ॥४०॥
द्वाराणां बाह्यतो विप्रास्तदन्तर्वा नियोजयेत् ।
त्रीणि त्रीण्यथ वा सम्यगेकैकस्यां न्यसेद्दिशि ॥४१॥
बुध्वा मण्टपविस्तारं पञ्चकं सप्तकं तु वा ।
एतानि हेमरत्नाद्यैश्चित्रयेद्विभवे सति ॥४२॥
श्रीवृक्षोदुम्बरवटप्लक्षोत्थैरथ वा द्विजाः ! ।
पूर्वाद्युत्तरपर्यन्तं तोरणानां चतुष्टयम् ॥४३॥
चतुष्टयं चतुर्दिक्षु ह्येषामेकैकमेव वा ।
तोरणानां समुछ्रायं स्तम्भायामसमं स्मृतः ॥४४॥
स्तम्भद्वयान्तरस्थेन मानेन स्यात्तु विस्तृतिः ।
स्तम्भमस्तकमानेन साधिकेन सदैव हि ॥४५॥
तद्दण्डान् विन्यसेद्भूमौ स्तम्भाभ्यन्तरगा स्थितिः ।
सदैव दक्म्वरूपाणां कार्या वेदविदां वराः[1] ॥४६॥
द्वाराणां बाह्यतो विप्रास्तोरणानां यदा स्थितिः ।
तलाच्छिखरपर्यन्तं मानमुच्छ्रायतस्तदा ॥४७॥
सार्धं समं वा द्विगुणं तद्दण्डेषु च भूगतम् ।
चक्रद्वितयमध्यस्थं पक्षमण्डलमण्डितम् ॥४८॥
तोरणे तोरणे कुर्याद्गरुडं चोर्ध्वसंस्थितम् ।
तत्पार्श्वयोश्चक्रचिह्नौ नानावर्णध्वजौ न्यसेत् ॥४९॥
सितरक्तादिभेदेन प्रागादौ तु ध्वजाष्टकम् ।
निवेश्य मध्यवेद्यां तु प्रभवाप्ययगोगतः ॥५०॥
मत्स्यादीनवताराश्च प्रादुर्भावानशेषतः ।
चित्रोदितेन विधिना चतुर्दिक्षु समालिखेत् ॥५१॥
मुनिसिद्धामरव्रातैरनेकाद्भुतदर्शिभिः ।
द्वीपाचलवनोद्यानैर्बहुभिर्मृगपक्षिभिः ॥५२॥

सरस्सारमन्दारनलक्रीडापरान्विते ।
खेचरैरङ्गनायुक्तैर्नृपैर्विद्याधराधिपै ॥५३॥
प्रशान्तमानसैर्विप्रैरात्मध्यानपरायणै ।
एवमाद्यैरनन्तैश्च व्यापारैश्चित्रसम्भवै ॥५४॥
तद्यागवेश्म सकल रञ्जनीय प्रयत्नत ।
कुर्यात्सुधावलिप्त वा भूषयेत्तदनन्तरम् ॥५५॥
दर्पणैश्चामरैर्वस्त्रैर्दुकूलैर्विविधोज्ज्वलै ।
घण्टाभिर्ध्वजच्छत्रैरातपत्रैर्मनोहरै ॥५६॥
प्रोच्छ्रितै कदलीपूगै द्रुमाद्यै पावनैर्दृढै ।
मध्वाज्यदधिसत्क्षीरसम्पूर्णै कांस्यभाजनै ॥५७॥
शालितण्डुलपात्रैश्च सहिरण्यै फलै शुभै ।
नानसिद्धार्थकैर्मीनभाजनै षड्रसान्वितै ॥५८॥
सत्सुगन्धैस्त्वगेलाद्यै पर्णै पूगफलैस्तथा ।
मधूकनदरद्राक्षाइक्षुभिस्त्रिफलै फलै ॥५९॥
यथर्तुप्रभवै पुष्पै बहुभि प्रकरीयकै ।
इत्येनमाद्यैर्विविधैर्भोगपूगैस्तु पावनै ॥६०॥
पवित्रेण वितानेन सुसितेनोज्ज्वलेनवा ।
चराम्बुरुहचिह्नेन भूषयेच्च तदूर्ध्वत ॥६१॥
स्तम्भान् सनेष्टयेत्पश्चात्[illegible]विधै पृथक् ।
मागुत्तग[illegible]भाग[illegible]त्कोण च मारतम् ॥६२॥
[illegible] पताकास्तत्र योजयेत् ।
[illegible] गागविभागेन [illegible]भागाच्च वै पुन ॥६३॥
दक्षिणा[illegible]विद्विर्नीय च चतुष्टयम् ।
एकैक स्वर्ण(सर्व)[illegible] च नापी कार्या विनानके ॥६४॥
बाह्यतो वेदिकामाशु मण्डपस्य [illegible] ।

वह्निकोणात्समारभ्य यावत्कोणं तु शाङ्करम् ॥६५॥
सितारुणं च पीतं च कृष्णं कुर्याच्चतुष्टयम् ।
भूयश्चोत्तरदिग्भागाद्यावत्पश्चिमदिक् द्विजाः ॥६६॥
तथाविधं चतुष्कं तु ध्वजानां परिकीर्तितम् ।
राजपाषाणवर्णाभं चक्रपक्षीश्वरोपगम् ॥६७॥
वैजयन्तीत्रयं कुर्यात्तोरणे पूर्वदिक्स्थिते ।
दक्षिणे स्फटिकाभं तु आप्ये सिन्दूरवर्चसम् ॥६८॥
हेमाभं चोत्तरे कुर्यात्तोरणे ध्वजकत्रयम् ।
चतुष्केणपताकानां युक्तं श्वेतादिकेन च ॥६९॥
एकैकं तोरणं चात्र तृतयं पञ्चकं तु वा ।
अर्धेन तोरणायामात्पताकानां च दीर्घता ॥७०॥
एवं त्वमिनवं कृत्वा यागार्थं मण्टपं द्विजाः ! ।
स्नपनाद्युत्सवान्तस्य वैशेषिकगणस्य च ॥७१॥
पुरा प्रकल्पितं वाथ मण्टपं भूषयेत्तदा ।
एवं कृते ततः पश्चाद्वेदिकां तोरणैः सह ॥७२॥
विलिप्य चन्दनाद्यैस्तु गन्धवर्णोज्वलैः क्रमात् ।
चन्दनेन समालभ्य वेदिकां केवलेन च ॥७३॥
वाह्निकभावितेनैव तेनैवाद्यं च तोरणम् ।
लिप्तं मृगमदेनैव कुर्याद्दक्षिणदिग्गतम् ॥७४॥
तुषारधूळीधवळं पश्चिमं कारयेत्ततः ।
कुङ्कुमेन समालभ्यं केवलेनोत्तरे स्थितम् ॥७५॥
क्षीरेण चन्दनेनैव कुङ्कुमेन कृतां स्थलीम् ।
रजनीचूर्णयुक्तेन ह्रीबेरेणाम्बुना सह ॥७६॥
पुण्यगन्धौषधीभिस्तु द्वाराणां मण्टपावनिम् ।
ततस्तु विविधैर्धूपैर्बहुभिर्भूषयेद्द्विजाः ! ॥७७॥

ततस्तिरस्करिण्या तद्वेष्टयेत्सर्वतो बहि ।
मण्टपस्योत्तरे भागे कुर्यात्कुण्ड पुरैव तु ॥७८॥
यद्वा द्विजास्ततोऽन्यत्र यागग्रस्था च वर्ज्यदिक् ।
दिक्त्रयेऽभिमता या दिक्कुर्यादनलमण्टपम् ॥७९॥
धूमनिर्गमनोपेत नानाकुण्डविभूषितम् ।
सार्द्रैश्च सुपलाशैश्च सयुक्त तोरणादिकै ॥८०॥
यद्वा पचनगेहे तु कुण्ड कुर्यात्सलक्षणम् ।
अन्यन्नैमित्तिकार्थं तु पुरा क्लप्त तु वा भवेत् ॥८१॥
यागमण्टपविन्यास सर्वत्रैव समाचरेत् ।
एव कृते तत कुर्यात्सम्भारग्रहण द्विजा ! ॥८२॥
तत्र तावत्पवित्राणा निर्माणमधुनोच्यते ।
तेषा तु द्विविध रूप सूक्ष्मस्थूलविभेदत ॥८३॥
सर्वभावेन भक्ताना यत्पालयति सर्वदा ।
मनोवाक्चित्तज कृत्स्न व्यापार शुभलक्षणम् ॥८४॥
परिज्ञेयमतस्तस्मात्स्वरूप तस्य यादृशम् ।
पम्मेति च वै येन भक्ताना तत्समापनात् ॥८५॥
यदच्छिन्न जगद्योनेरनन्तभ्रमर सितम् ।
विच्छेदमदनज्ञानामेति नानात्मना स्वयम् ॥८६॥
जग[illegible]त्र तु तद्विद्धि हेमसूत्रादिना तु वै ।
पाड्गुण्यमहिमान यद्धत्ते प्रतिमगात्मना ॥८७॥
ज्ञानरागोपरक्त तु युक्त कार्यस्तु वीर्यजे ।
नैत्रसरागून मन्त्रैर्विन्यासाधित परि ॥८८॥
ऐश्वर्यमुपराग तु सम्पर्को शक्तितोऽव्ययम् ।
एव प[illegible]त्रक तत्परिज्ञेय जगत्प्रभो ॥८९॥
अभ्यन्तापिहितो [illegible] स्थाकारे प्रतिष्ठिते ।

भक्त्या च विधिवद्दत्तं ददाति भगवत्पदम् ॥९०॥
स्थूलस्य व्यतिरिक्तस्य व्यवहारपदे स्थितैः ।
पदार्थैः कल्पनीयं च तद्विधानमिहोच्यते ॥९१॥
सूक्ष्मं दृढं सितं श्लक्ष्णं सूत्रं ब्रह्मप्रसूतया ।
विनिर्मितं कुमार्या वा वृद्धया वा विनीतया ॥९२॥
शुद्धया वा विधवया सम्पादितमथापि वा ।
क्षौमं वा पट्टजं वापि केशरोमादिवर्जितम् ॥९३॥
यथालब्धं समादाय सम्यक्प्रक्षाल्य वारिणा ।
तस्य शुद्धिं पुरा कृत्वा दहनाप्यायनेन च ॥९४॥
अवलोक्य स्मरन्मूलं विनिष्पाद्य चतुर्गुणम् ।
चातुरात्म्यव्यपेक्षायामथ वाष्टगुणं द्विजाः ॥९५॥
प्रभवाप्ययबुध्या तु भेदभिन्नोपलक्षितम् ।
केशवादिष्वधिष्ठातृभावेन त्रिचतुर्गुणम् ॥९६॥
तन्तुभिर्विषमैर्विष्णोः समस्य परिवर्जयेत् ।
पावित्रिकी क्रिया यस्माद्विषमा सा न कस्य चित् ॥९७॥
पवित्राणि कार्याणि तन्तुभिस्तैः सितासितैः ।
मूलमन्त्रादिमर्येषां मन्त्राणां मुनिसत्तमाः ॥९८॥
कुम्भस्थमन्त्रमूर्तेः प्राक्कल्पयेदर्पणं द्विजाः ॥
अध्यर्धशतजैर्व्यामाद्धाराकारैश्च तन्तुभिः ॥९९॥
शतेनाष्टोत्तरेणाद्यं द्विगुणेन द्वितीयकम् ।
त्रिगुणेन तृतीयं तु व्याममेवं तु कल्पयेत् ॥१००॥
षट्त्रिंशद्ग्रन्थिकं चाद्यं द्वितीयं द्विगुणं स्मृतम् ।
तृतीयं त्रिगुणं कुर्यादेवमेव महामतिः ॥१०१॥
मण्डलस्य च विमानस्य वह्निगतस्य च ।
बिम्बस्थस्य परिवाराणां विशेषोऽस्य च पार्षदानाम् ॥१०२॥

मालाकृतिं तु शिरसि यथेच्छग्रन्थिपूर्वकम् ।
द्वितीयमंसयोर्यावल्लम्बितं जानुमण्डले ॥१०३॥
मूर्ध्नः पादावधिर्यावत्तृतीयमिति विश्रुतम् ।
आमूर्ध्नः पीठपर्यन्तं वनमालापवित्रकम् ॥१०४॥
पृथक्पीठस्य वै कुर्यात्स्वप्रमाणेन शोभनम् ।
बिम्बप्रतिसराणां च व्यासश्चानियतः स्मृतः ॥१०५॥
सूत्रमानं च पूर्वोक्तं द्विगुणं सति सम्भवे ।
त्रिगुणं वा मुनिश्रेष्ठाः ! वनमालाख्यभूषणम् ॥१६॥
अष्टोत्तरेण सूत्राणां सहस्रेण समन्वितम् ।
यद्वा तदर्धं पादं वा कुर्याद्वित्तानुरूपतः ॥१०७॥
लेपभित्तिपटस्थे तु मूलबिम्बे यदा द्विजाः ! ।
कुर्यादुत्सवबिम्बस्य भूषणानां तु पञ्चकम् ॥१०८॥
तदापि मूलबिम्बस्य भूषणान्यपि पूर्ववत् ।
कल्पयेदाद्यपूर्वाणि बिम्बप्रतिसरेषु तु ॥१०९॥
विभवे देवदेवेशे हारपञ्चकसंयुतम् ।
नानाकाराणि तन्तूनि मुक्ताहारसमन्वितम् ॥११०॥
त्र्यङ्गुळान्तरिता देया सर्वेषां ग्रन्थयः समाः ।
सङ्ख्यानेन विना सम्यङ्मातुलुङ्गोपमाः शुभाः ॥१११॥
अष्टोत्तरशतग्रन्थिसंयुक्ता वनमालिका ।
चतुःस्थानावतीर्णस्य विभोरामन्त्रणाय च ॥११२॥
पवित्रमाद्यमद्दशमेकैकं वा द्वयं द्वयम् ।
सर्वेषां कर्मबिम्बानां तथा वै गोपुरादिषु ॥११३॥
स्थितानां मन्त्रबिम्बानां भजतां सन्निधिं सदा ।
उत्तमादीनि कर्माणि कुर्याद्वै मुख्यकल्पने ॥११४॥
मध्यमेनाधमेन मध्यमेनोत्तमेन वा ।

द्वितयं द्वितयं वापि· ह्येकैकं वानुकल्पने ॥११५॥
अङ्गानां भूषणानां च लाञ्छनानां तथैव च ।
शक्तीनां विहगेशस्य पवित्रं कल्पयेत्तथा ॥११६॥
प्राग्वत्त्रीण्यथ वा द्वे द्वे एकैकं वाथ वा द्विजाः! ।
यथेच्छामानसंख्योरथैः सूत्रैस्तु परिकल्पयेत् ॥११७॥
सूत्रभ्रमसमोपेतैर्गर्भैर्भूषणसञ्चयम् ।
अन्येषां मण्डलाङ्गानां देवानां विभवे सति ॥११८॥
पवित्रकगणं कुर्याद्यथेच्छामन्वितन्तुभिः ।
तथैव विष्वक्सेनादेः परिवारगणस्य च ॥११९॥
मन्त्रास्त्रकुम्भयोर्द्वे वै ह्येकं वै मण्डलस्य च ।
द्वयं च कुण्डानलयोः शास्त्रपीठस्य च द्वयम् ॥१२०॥
लिपेर्वाक्तत्वभूतस्य शब्दतत्त्वस्य च प्रभोः ।
घण्टाक्षसूत्रपूर्वाणां क्रियाङ्गानां महात्मनाम् ॥१२१॥
बलिपीठाधिदेवानां देशान्तरनिवासिनाम् ।
गुर्वादीनां चतुर्णां तु हरिलिप्सामलापिनाम् ॥१२२॥
द्विजोत्तमादिवर्णानां नित्यमच्युतभाविनाम् ।
गृहस्थब्रह्मचारिणां यतीनां वनवासिनाम् ॥१२३॥
वृद्धानां जनकादीनां भगवत्तत्त्ववेदिनाम् ।
बन्धूनां भ्रातृपुत्राणां नारायणगतात्मनाम् ॥१२४॥
जायाया भक्तिनम्राया रताया अर्चने हरेः ।
सम्बन्धिनां च मित्राणां भगवद्धामवासिनाम् ॥१२५॥
तदुत्तरगहायानां चातुरात्म्यानिराशिनाम् ।
भृत्यानां स्वानुरक्तानां पुरुषोत्तमयाजिनाम् ॥१२६॥

१—सेविनाम्—इति—(ग)

वृद्धये योग्यतायै च पवित्रीकरणाय च ।
यथाभिमतमानैस्तु तन्तुभिर्ग्रन्थिभिस्तथा ॥१२७॥
कुर्यात्पवित्रनिचयमथ वा मुनिसत्तमा ! ।
गुर्वादीना चतुर्णां तु यतीना च कुटुम्बिनाम् ॥१२८॥
क्रमाच्चतुर्विंशतिभि सूत्रै षोटशभिस्तथा ।
ततो द्वादशिभिश्चैव अष्टभि षट्त्रिभिस्तथा ॥१२९॥
पवित्राणि कार्याणि ग्रन्थय सूत्रसख्यया ।
आराधकस्य च गुरो कुर्याद्वे भूषणद्वयम् ॥१३०॥
स्थूलकल्पमिद प्रोक्त सूक्ष्मकल्पमिहोच्यते ।
शिर प्रमाणेनार्चाया भूषण प्रथम स्मृतम् ॥१३१॥
चतु शतेन सूत्राणा द्वात्रिंशद्भिस्तथाधिकै ।
सूत्रावर्तैश्च सुसमै परिकल्प्य च शोभनम् ॥१३२॥
सप्तविंशत्प्रमाणेन दत्वास्मिन् ग्रन्थिसञ्चयम् ।
कर्णादूर्ध्वगत नाभिप्रमाणेन पवित्रकम् ॥१३३॥
परिकल्प्य द्वितीय च सूत्राणा मुनिसत्तमा ! ।
शतत्रयेण च तथा चतुर्विंशद्भिरेव च ॥१३४॥
द्विगुणैर्ग्रन्थिनिचयैरनुगर्भं तु तत्स्मृतम् ।
स्कन्धदेशात्समारभ्य यावत्पादद्वयावधि ॥१३५॥
नेत्रसूत्रत्रिभागोनैः सूत्रमार्गैश्च कल्पयेत् ।
त्रिगुणैर्ग्रन्थिनिचयैस्ततोन्यद्द्विजसत्तमा ! ॥१३६॥
अष्टोत्तरेण सूत्राणा शतेन ग्रन्थिभिस्तथा ।
शिर पूर्वावनाराद्यो यावत्पीठ तु वैष्णवम् ॥१३७॥
सर्वेषां ग्रन्थिगणैश्चैव गर्भैस्तु त्रिविधैस्तत ।
मण्डलस्य प्रमाणेन कुर्याच्चान्यत्तृतीयम् ॥१३८॥
प्रथम पद्ममानेन नाभिमान द्वितीयकम् ।

अरतुल्यं तृतीयं स्यात् चतुर्थं नेमिभिः समम् ॥१३९॥
एकाशीतिभिरावर्तैः सूत्राणां द्विजसत्तमाः! ।
अग्नेः कुण्डप्रमाणेन ग्रन्थिभिस्तावदेव हि ॥१४०॥
भूषणत्रितयं कुर्याद्यथायोगं महामतिः ।
अष्टोत्तरशतादर्धैस्सूत्रैस्तद्ग्रन्थिभिस्तथा ॥१४१॥
भूषणं सुसमं चैव सुशुभं परिकल्पयेत् ।
द्विजेन्द्रा द्विजमुख्यानां ब्राह्मणानां तदर्धतः ॥१४२॥
मुख्यमेतत्स्मृतं कल्पमनुकल्पोधुनोच्यते ।
अष्टाधिकेन सूत्रेण शतेन प्रथमं त्विदम् ॥१४३॥
चतुर्भागोनमपरं तदर्धेन तृतीयकम् ।
आद्याच्चतुर्थभागेन चतुर्थं कल्पयेत्ततः ॥१४४॥
त्रिभागोनं चतुर्थात्तु अग्नेः कुर्यात्तु भूषणम् ।
द्विजेन्द्राणां प्रकुर्वीत सप्तविंशतितन्तुजम् ॥१४५॥
ब्राह्मणानां प्रकुर्वीत तन्तुभिर्नवभिर्द्विजाः! ।
स्तनादूर्ध्वमधो नाभेर्न कर्तव्यं कदाचन ॥१४६॥
सूत्रत्रयेण चान्येषां भक्तानां तु जगद्गुरोः ।
सूक्ष्मकल्पमिदं प्रोक्तं परकल्पमिहोच्यते ॥१४७॥
चतु:स्थानावतीर्णस्य मुख्यमन्त्रस्य वै विभोः ।
शतेनाष्टोत्तरेणैव ह्यर्धेनांशेन वा द्विजाः! ॥१४८॥
तन्तूनां भूषणं कुर्यादेकैकं वा त्रयं त्रयम् ।
जपहोमादिका संख्या पूर्णा रिक्ता महात्मनाम् ॥१४९॥
समीकरोति भक्तानां मन्त्रिणामत एव हि ।
कुर्यात्तद्ग्रन्थिनिचयं सूत्रसंख्योपलक्षितम् ॥१५०॥
यदृच्छया ततोन्येषां याज्यानां परिकल्प्य च ।
सूत्रभ्रमसमोपेतैर्गर्भैर्भूषणसञ्चयम् ॥१५१॥

ततस्तु देवदेवस्य चतुःस्थानस्थितस्य यत् ।
पवित्रकगणं विप्रा ! प्रोक्तमाद्यपुरस्सरम् ॥१५२॥
कुर्यात्तु गर्भरचनां तस्य सर्वस्य सत्तमाः ! ।
हेमसद्रत्नकर्पूरमलयक्षोदकुङ्कुमैः ॥१५३॥
सर्वौषधिसमोपेतैस्त्वगेलादिविमिश्रितैः ।
पावनैर्विविधैर्द्रव्यैर्नीव्या सवितुना सह ॥१५४॥
बीजपूरसमाकारमाम्रामलकशङ्खवत् ।
तदन्तरालानि पुनस्त्वच्छिन्नेन तु तन्तुना ॥१५५॥
विभागप्रतिपत्त्यर्थं ग्रथनीयान्यदूरतः ।
अन्येषां सर्वबिम्बानां यथावित्तानुरूपतः ॥१५६॥
कल्पयेद्गर्भरचनां पूर्वोक्तैर्द्रव्यसञ्चयैः ।
आराधकस्य च गुरोः सगर्भं भूषणद्वयम् ॥१५७॥
विहितं भगवन्मन्त्रन्यासात्तादात्म्यभावनात् ।
अतोऽन्येषामगर्भं च रचनीयं यथाक्रमम् ॥१५८॥
अन्तरालगणं गार्भं कुर्याद्बाह्याकारञ्जितम् ।
अलङ्कृत्य च सौवर्णैरुपरिष्टाच्च रूप्यकैः ॥१५९॥
पवित्रच्छेदसमूलं जातरूपमयैस्तु वा ।
शङ्खपद्मगदाचक्रमालाश्रीवत्सपूर्वकैः ॥१६०॥
एकस्यैव वहनां वा यथावित्तानुसारतः ।
एवं कृत्वा पवित्राणि क्रमेण द्विजसत्तमाः ! ॥१६१॥
धातुजे वितते भाण्डे वस्त्रच्छन्ने निधाय च ।
अथ वा वैदले भाण्डे मृण्मये वा सुशोभने ॥१६२॥
पात्रान्ते सापि चैकस्मिन् मात्रं भूषणसञ्चयम् ।
अयामिन् ह्यांशिकं साप्य गमन्त द्विजसत्तमाः ! ॥१६३॥
आच्छाद्य वाससा पश्चात् सुसितेनाऽहतेन च ।

बन्धयित्वा तु सूत्रेण दृढेन सुसितेन च ॥१६४॥
मध्ये तु यागद्रव्याणां ते भाण्डे विनिवेशयेत् ।
एवं हि सर्वसम्भारान् सम्पाद्य द्विजसत्तमाः ! ॥१६५॥
चातुर्मास्ये त्वन्यतमे मासे वै शुक्लपक्षके ।
द्वादश्यां देवदेवस्य पवित्रारोपमाचरेत् ॥१६६॥
पूर्वे दशम्येकादश्योः कुर्यात् कर्माधिवासनम् ।
एकादश्यां वानुकल्पे अधिवासनमाचरेत् ॥१६७॥
सद्योधिवासं द्वादश्यां कुर्याद्वा शक्त्यभावतः ।
अधिवासदिनात्पूर्वदिने कृत्वाङ्कुरार्पणम् ॥१६८॥
अधिवासदिने कुर्याद्रक्षाबन्धं च देशिकः ।
अधिवासादिकं सर्वं शृणुध्वं मुनिपुङ्गवाः ! ॥१६९॥
आचार्यो मूर्तिपैः सार्धं दशम्यां तु निशामुखे ।
मन्त्रेशसन्निधिं गत्वा प्रपूज्यार्घ्यादिभिः क्रमात् ॥१७०॥
तस्मादनुज्ञामादाय प्रासादाग्रस्थितं शुभम् ।
यागमण्टपमासाद्य द्वारार्चनपुरस्सरम् ॥१७१॥
पूर्ववत्पूजनं कुर्यात्कलशे मण्डलाक्षितौ ।
सम्प्रविश्य ततः प्राग्वन्मूलमूर्तौ तु पूजनम् ॥१७२॥
प्रदक्षिणप्रणामान्तं सविशेषं समाचरेत् ।
लेपभित्तिपटस्थं तु मूलबिम्बं यदा द्विजाः ! ॥१७३॥
तदा नैमित्तिके बिम्बे सर्वं कुर्याद्विशेषतः ।
एतस्य सन्निधौ विप्राः ! कृत्वा स्नपनमादरात् ॥१७४॥
स्नपनाभिकृते बिम्बे नित्यनैमित्तिकेपि वा ।
सर्वमन्यत्पवित्रान्तं मूलबिम्बे समाचरेत् ॥१७५॥
नित्योत्सवार्थे बिम्बे तु तदा कुर्यात्तदुत्सवम् ।
तेषामसन्निधौ विप्राः ! दर्पणे तत्समीपगे ॥१७६॥

कुर्यात्स्नपनमात्रं तु तदा कुर्यात्तदुत्सवम् ।
दर्भमञ्जरिजे कूर्चे चक्रे वा कुम्भकेपि वा ॥१७७॥
प्राग्वदन्यत्समस्तं तु मूलबिम्बे समाचरेत् ।
ततो होमगृहं गत्वा कुण्डं सम्स्कृत्य पूर्ववत् ॥१७८॥
तत्रानलं च सस्कृत्य कुर्याद्वै मन्त्रतर्पणम् ।
प्रासादं सम्प्रविश्याथ कृत्वा होमसमर्पणम् ॥१७९॥
प्रणम्य देवदेवेशं ततस्त्वेकं पवित्रकम् ।
दहनाप्यायसंशुद्धं प्रोक्षितं चार्घ्यवारिणा ॥१८०॥
वासितं गन्धधूपाभ्यां चतुस्स्थानस्थितस्य च ।
निवेद्य च क्रमेणैव धूपं दत्वार्घ्यपूर्वकम् ॥१८१॥
निजानन्दमयैर्भोगैर्नित्यतृप्तस्त्वमव्ययः ।
तथापि भक्त्या तृप्तोहं त्वां यजाम्यात्मसिद्धये ॥१८२॥
इति विज्ञाप्य देवस्य ततोस्त्रेणार्घ्यवारिणा ।
सर्वं भूषणपूर्वं तु सम्प्रोक्ष्य द्रव्यसञ्चयम् ॥१८३॥
अथ पाणिद्वयेनैव अग्नीषोमात्मकेन तु ।
योग्यतापदवीं नीत्वा सर्वं भूषणसञ्चयम् ॥१८४॥
मूलमन्त्रेण सम्प्रोक्ष्य सम्पूज्याथ निरीक्ष्य च ।
कुम्भयोग्यानि चैकस्मिन् मण्डलीयानि चापरे ॥१८५॥
बिम्बयोग्यानि चैकस्मिन्नग्नियोग्यानि चापरे ।
अन्यानि मन्त्रयोग्यानि एकस्मिन् द्विजसत्तमाः ॥१८६॥
पात्रे पात्रे पृथक् स्थाप्य पात्रलाभानुरूपतः ।
आच्छाद्य वाससा पश्चात्सुसितेनाहतेन तु ॥१८७॥
तानि भूषणपात्राणि क्रमेण च पृथक् पृथक् ।
पञ्जनीयानि गुप्तेन हृदेन गुणितेन च ॥१८८॥
शान्तिभिन्नपदैर्वापि नित्यैर्वा विनयेन वा ।

चतुर्स्त्रिद्व्येकभारैर्वा कृते पीठेथ वा स्थले ॥१८९॥
तानि भूषणपात्राणि संस्थाप्य पुरतो विभोः ।
प्रणवेनार्चयित्वा तु वर्मणा स्थगयेत्पुनः ॥१९०॥
देवागारं बहिश्चान्तः मन्दिरं यागसंज्ञितम् ।
संवेष्ट्य सितसूत्रेण चतुर्धा तद्गुणेन तु ॥१९१॥
ततोऽभ्यर्थ्य समूहं तु पञ्चकालपरायणम् ।
षट्कर्मनिरतं चापि यतिवृन्दं तु वैष्णवम् ॥१९२॥
समक्षं भवता भक्त्या श्वः प्रभुं पूजयाम्यहम् ।
सन्निधानमतः कार्यं मदनुग्रहकाम्यया ॥१९३॥
एवमभ्यर्थ्य तेभ्यस्तु ह्यनुज्ञां प्रतिगृह्य च ।
सन्निधौ देवदेवस्य जागरेण नयेन्निशाम् ॥१९४॥
एकादश्यां प्रभातेथ कृतस्नानः कृताह्निकः ।
आचार्यो ब्राह्मणैः सार्धं यतिभिर्वैष्णवोत्तमैः ॥१९५॥
स्वधर्मनिरतैश्चैव विष्णुभक्तैर्दृढव्रतैः ।
प्रविश्य भगवद्गेहं कृत्वा नित्यार्चनं विभोः ॥१९६॥
चतुःस्थानार्चनं चापि सविशेषं समाचरेत् ।
तथैव रात्रावपि च सविशेषं समाचरेत् ॥१९७॥
हवनान्तं क्रियाकाण्डं जपस्तुतिपरस्ततः ।
आराध्यस्याग्रतः स्थित्वा जागरेण नयेन्निशाम् ॥१९८॥
स्नात्वा ब्राह्मे मुहूर्तेथ देशिको वैष्णवैः सह ।
प्रविश्य देवसदनं कृत्वा नित्यार्चनं विभोः ॥१९९॥
चतुःस्थानस्थितं देवं समभ्यर्च्य यथाविधि ।
ततस्तु चौत्सवं बिम्बं श्रीपुष्टिभ्यां समन्वितम् ॥२००॥
यानमारोप्य वस्त्राद्यैरलङ्कृत्य विशेषतः ।
मण्टपं तु समानीय विनिवेश्य च विष्टरे ॥२०१॥

पाठयेच्चतुरो वेदान् चतुर्दिक्षु यथाविधि ।
अथ भूषणपानस्य गत्वा वै सन्निधिं द्विजा ! ॥२०२॥
पूजयित्वा समुद्घाट्य पात्र प्रतिसरीयकम् ।
अवलोक्य समादाय ध्यायेदाद्येखिल द्विजा ! ॥२०३॥
सावत्सर तु यत्कर्म आप्रभातान्निशान्तिमम ।
ध्यानोत्थ निष्कल सम्यगपवर्गप्रद तु यत् ॥२०४॥
सस्मृत्य निष्कल मन्त्र शुद्धोच्चारक्रमेण तु ।
मन्त्रे सन्धाय तत्सूत्र सूत्रे मन्त्र तथैव च ॥२०५॥
एकीकृत्यात्मना सार्धं दद्याद्वै मन्त्रमूर्धनि ।
समादायापर सूत्र तस्मिन् सकलनिष्कलम् ॥२०६॥
ध्यानकर्मस्वरूप तु कर्म ध्यायेच्च वात्सरम् ।
स्मृत्वा चोभयरूप तु मन्त्र कलशपूजितम् ॥२०७॥
पूर्ववच्चानुसन्धान कृत्वा दद्यात्पवित्रकम् ।
तत प्रतिसर विप्रा ! तृतीय च समाचरेत् ॥२०८॥
वाद्य सावत्सर कर्म सकल चाखिल स्मरेत् ।
पूजयन्त स्वमात्मान आधाराच्च परावधिम् ॥२०९॥
लयभोगाधिकाराख्यक्रमेण सकलात्मना ।
सकल मन्त्रनाथ तु लयभोगादि विग्रहम् ॥२१०॥
स्मृत्वा कृत्वा च सन्धान दद्यात्प्रतिसर तत ।
अर्घ्यपुष्पैस्तथा गन्धैर्माल्यैर्धूपैस्तथा द्विजा ! ॥२११॥
पूजया सम्पुटीकुर्याद्भूषणानि पृथक् पृथक् ।
अन्तरान्तरयोगेन घण्टाशब्दसमन्विता ॥२१२॥
सामन्त्ररत्नसद्धातुपुष्पाक्षतफलान्विता ।
सानुगन्धार्घ्यदर्भाढ्या लाजसिद्धार्थकैर्युता ॥२१३॥
प्रणेमध्या तु वसुनो वृष्टि करगनैर्मुदा ।

केवलापुष्पवृष्टिर्वा शङ्खादीनपि नादयेत् ॥२१४॥
दत्वैवं कलशस्थस्य पुरा विप्राः ! पवित्रकम् ।
अनेन विधिना दद्यान्मण्डलस्थस्य वै पुरा ॥२१५॥
पवित्रकलयं शुभ्रं भोगस्थाने च नारद! ।
दद्यात्समस्तमन्त्राणां त्रीण्येकं वा यथेच्छया ॥२१६॥
बिम्बस्थं तु समभ्यर्च्य प्रदद्याद्भूषणानि तु ।
कलशोक्तक्रमेणैव वनमालाख्यभूषणे ॥२१७॥
पूर्ववच्चानुसन्धानं सर्वं कृत्वा निवेदयेत् ।
पृथङ्न्यासो यदा प्रोक्तः किरीटाद्यं चतुष्टयम् ॥२१८॥
क्रमेणावाहयेद्विप्रा भूषणानां चतुष्टये ।
किरीटाख्य ! सुरेशस्य भानुतुल्यप्रभान्वित! ॥२१९॥
परिवारयुतस्तिष्ठ त्वमस्मिन् शीर्षभूषणे ।
श्रीवत्सागच्छपूर्णेन्दु समाने ! भगवत्प्रिय! ॥२२०॥
वक्षःस्थले जगद्योनेर्भूषणं कल्पितं मया ।
कौस्तुभागच्छ रत्नानामीश ! त्वं भगवत्प्रिय! ॥२२१॥
वक्षःस्थले जगद्यानेर्भूषणं कल्पितं मया ।
धातुपुष्पसमाकीर्णे प्रवाळमणिभूषिते ॥२२२॥
वनमाले ! समागच्छ देवदेवप्रिये ! शुभे ।
चतुर्भिरेतैर्मन्त्रैस्तु क्रमेणावाहयेद्द्विजाः ! ॥२२३॥
अस्त्राणां भूषणानां च लाञ्छनानां तथैव च ।
शक्तीनां विहगेशस्य तथैव मुनिसत्तमाः ! ॥२२४॥
पीठस्य च पवित्राणि प्रदद्यात्क्रमशस्ततः ।
एवमेव विभोर्दद्यान्मूलबिम्बगतस्य च ॥२२५॥
सर्वेषां मूलबिम्बानां लक्ष्म्यादीनां तथैव ।
अन्येषामर्चबिम्बानां परिवारगणस्य च ॥२२६॥

शास्तृपीठस्य च लिपे. शब्दतत्वस्य च प्रभो' ।
घण्टाक्षसूत्रपूर्वाणां अर्घ्यपात्रादिकस्य च ॥२२७॥
छत्रचामरपूर्वाणा सर्वोपकरणस्य च ।
द्वारावरणदेवाना सर्वेषा च द्विजोत्तमा ! ॥२२८॥
क्रमेण भूपण दत्वा यायादग्निनिकेतनम् ।
अग्निस्थस्य विभोर्दद्याद्भूपणानि तु पूर्ववत् ॥२२९॥
अग्नौ निवेदयेद्विप्रा ! भूपण न तु होमयेत् ।
यस्मात्सन्यासमूर्ध्वे तु विहित भूपणस्य च ॥२३०॥
नाहर्तुं युज्यते दग्ध दोपमाभरण विना ।
तथैव सुस्रुवादीना दद्यात्प्रतिसरं तदा ॥२३१॥
देशिकस्य हृदारोप्य पूजितस्य च देववत् ।
स्व स्व चारोप्य चान्येपा देशिकाना तथैव च ॥२३२॥
साधकाना ततो दद्याद्यागाङ्गानामपि क्रमात् ।
मूलबिम्बे यदा कुर्यात्पवित्रारोपण द्विजा ! ॥२३३॥
तदा तु मूलबेरस्य दत्वा प्रतिसर पुरा ।
नैवेद्यान्त समभ्यर्च्य पश्चादुत्सवकौतुके ॥२३४॥
यागमण्टपमानीय अथ वास्थानमण्टपे ।
भद्रासने समारोप्य पूर्वोक्तविधिना तत ॥२३५॥
चतु स्थानस्थितस्यापि दद्यात्प्रतिसर द्विजा ! ।
एव हि देवदेवस्य चतु स्थानास्थितस्य च ॥२३६॥
अलङ्कारासने मूलमन्त्रेण प्रणवेन वा ।
आमूर्ध्न क्रमशो दत्वा भूपणानि यथाविधि ॥२३७॥
भोग्यासन ततो नीत्वा विविधाभ्यवहारिकै ।
भोगैरभ्यर्च्य देवेश ब्रूयाद्बद्धाञ्जलिरिस्त्वदम् ॥२३८॥
नावरेणास मोहाच कर्मत्यागो मया कृत ।

त्वमेव सर्वं जानासि सर्वेश ! हृदये स्थितः ॥२३९॥
यथाशक्त्या त्वनिच्छातस्तत्रापि परमेश्वर ! ।
तन्निमित्तमिदं कर्म कृतं त्वत्प्रीतये मया ॥२४०॥
एवमुक्त्वा समभ्यर्च्य चतुरः पाञ्चरात्रिकान् ।
भगवत्प्रतिपत्त्या तु शक्त्या प्रावरणैर्धनैः ॥२४१॥
तथा प्रतिसरान्तैस्तु ब्रह्मचारीन् यतीन् गुरून् ।
तर्पयित्वाथ चान्नेन पूतेन विविधेन तु ॥२४२॥
पश्चादुत्सवबिम्बं तु यानमारोप्य देशिकः ।
महोत्सवविधिप्रोक्तसर्वमङ्गलसंयुतम् ॥२४३॥
प्रदक्षिणक्रमेणैव प्रासादं तु प्रवेशयेत् ।
देशिकस्त्वथ नैवेद्यपूर्वं कुर्याच्च भोजनम् ॥२४४॥
बन्धुभ्रातृसमोपेतः सविशेषं द्विजोत्तमा ! ।
सायम्प्रातः प्रतिदिनं भूषणोत्सर्जनावधि ॥२४५॥
चतुःस्थानस्थितं देवं समभ्यर्च्य यथाविधि ।
मण्टपे चौत्सवं बिम्बं सविशेषं समर्चयेत् ॥२४६॥
उत्सवं देवदेवस्य कुर्यात्कालद्वयेपि च ।
वाहनारोहणं रात्रौ दिवसे वाचरेद्विजाः ! ॥२४७॥
समाप्तिदिवसे प्रातर्विशेषयजनं ततः ।
चतुःस्थानस्थितस्यापि मध्ये मध्येऽर्चनैः सह ॥२४८॥
अवरोप्य पवित्राणि रात्रौ मण्डलवाहिगम् ।
विसृज्य विधिवत्कुर्यात्कुम्भसम्प्रोक्षणादिकम् ॥२४९॥
एकरात्रं त्रिरात्रं वा पञ्च वा सप्तरात्रकम् ।
पवित्रकं स्थापयित्वा ततः सन्यासमाचरेत् ॥२५०॥
अथ वार्चागतं विप्राः ! तावत्संस्थाप्य भूषणम् ।
यावदेकादशी शुक्ला संवृत्ता कार्तिकस्य तु ॥२५१॥

अपनीय च माल्यादीन् प्रदद्याद्वा दिने दिने ।
नो याति म्लानतां यावत्सम्प्राप्ते कालवासरे॥२५२॥
अपनीय गुरोर्भक्त्या निवेद्य ब्राह्मणस्य वा ।
पञ्चकालप्रसक्तस्य सद्भावात्तु नारद ! ॥२५३॥
षट्कर्मसम्प्रवृत्तस्य विष्णुभक्तस्य तत्वतः ।
विशेषयागहोमान्ते कृत्वाचार्यप्रपूजनम् ॥२५४॥
वैष्णवा. पूर्ववत्पूज्या· दद्यादाच्छादनं ततः ।
तेषां चैव यथाशक्ति अभावादथ नारद ! ॥२५५॥
युग्ममेकं तु वा वस्त्रमेकस्यावश्यमेव हि ।
उपवीतानि चान्येषां सोत्तरीयाणि योजयेत् ॥२५६॥
प्रार्थना च ततः कार्या यतीनां संयतात्मनाम् ।
युष्मत्प्रसादसामर्थ्यान्ममास्तु परिपूर्णता ॥२५७॥
क्रियाज्ञाना च सर्वेषां मा मेस्तु समयच्युतिः ।
एवमस्त्विति वक्तव्यं सर्वैस्तालसमन्वितम् ॥२५८॥
संवत्सरकृताकृत्यदोष समयपूर्वकः ।
नाशमायाति वै क्षिप्रं पवित्रारोपणावतु ॥२५९॥
पाति यस्मात्सदोषं हि पतनात्परिरक्षति ।
विशेषेण द्विजास्त्राति पूर्णं कर्म करोति च ॥२६०॥
साधके च क्रियाहीने तस्मादुक्तो मया महान् ।
याग एष पवित्राख्य उक्तलक्षणलक्षितः ॥२६१॥
वक्ष्यते सूक्ष्मरूपोऽन्य. प्रकारो मुनिपुङ्गवा· ! ।
केवले बिम्बके वापि यागमन्दिरसंस्थिते ॥२६२॥
प्रासादसंस्थिते वापि दशम्यामधिवासिते ।
कल्पयेद्रूपणारोपं विना कलशमण्डले ॥२६३॥
अग्निस्थेऽपि तदा कुर्याचत्प्रागदधिवासिते ।

एकं द्वे त्रीणि वा दद्यात्पवित्राणि तदा विभो ॥२६४
समानीयोत्तमाद्येन भेदेन तु कृतानि वा ।
द्रव्याभावे द्विजश्रेष्ठा अशक्तिर्यदि वा भवेत् ॥२६५॥
सद्योऽधिवासं द्वादश्यां कृत्वा शक्त्या तु कारयेत् ।
सोपवासा द्विजश्रेष्ठा अर्चाया भूषणं विभो ॥२६६॥
यथेच्छाकल्पितैः सूत्रैर्ग्रन्थिभिस्तु यथेच्छया ।
निशारोचनया वापि पवित्राणा न धातुना ॥२६७॥
फेनचिह्नमयो विप्रा विधिवत्परिरक्षयेत् ।
पुष्पपूर्णानि गर्भाणि कृत्वा वा केवलान्यतः ॥२६८॥
प्रपूज्य पूर्ववद्विप्रा बिम्बसन्निहितं विभुम् ।
निवेद्य भूषणं दद्याद्वाणीमुच्चारयेदिमाम् ॥२६९॥
यन्मया मकारूं च कल्पितं ग्राहयस्व च ।
कर्मणां पूरणार्थाय यथा दोषो न मे भवेत ॥२७०॥
इत्युक्त्वा च ततो दद्यात्पूज्योपरि पवित्रकम् ।
स्तुत्वा च देवदेवेश हिर्तयेद्धि प्रयत्नत ॥२७१॥
पूजयित्वाथ देवेश कुर्यात्तदुपरोपितम् ।
गृहे पवित्रयागे तु विशेषोऽयमथोच्यते ॥२७२॥
बिम्बस्थे मण्डलस्थे वा चतुःस्थानस्थितेऽपि वा ।
पवित्राणां त्रयं दद्यादेकैकं वा यथेच्छया ॥२७३॥
इत्युक्तं योगिना श्रेष्ठाः पवित्रारोहणं परम् ।
एवं कृते सति तदा सिद्धिर्भवति शाश्वती ॥२७४॥
सर्वार्थं साधकानां च चेतसामीप्सितं सदा ।
सद्योदानरतानां च सिद्धिदं ह्यचिरस्य च ॥२७५॥
निर्दोषयागभोगानां कृत्वा सम्पूर्णताम् ।
अन्येऽहनि वै कुर्यात्तुर्ये सप्तमेऽपि वा ॥२७६॥

स्नपन पूज्यमन्त्रस्य तीर्थेद्दिशेऽथ सङ्गमे ।
नद्या समुद्रगामिन्या देवखाते ह्रदे तु वा ॥२७७॥
प्रीतये परमेशस्य त्वात्मनो दु खहानये ।
अह्लादायामराणा च पितृणा तृप्तये तु वै ॥२७८॥
आप्यायनार्थं भूताना भुवनाना च भूतये ।
देशदोषप्रशान्त्यर्थं गोब्राह्मणहिताय वै ॥२७९॥
यथावत्स्नपन कुर्यात्तीर्थबिम्बे विशेषत ।
नित्यस्नपनबिम्बे तु कुर्यात्तत्तदसन्निधौ ॥२८०॥
नित्योत्सवपरे बिम्बे ह्याचरेत्तदसंनिधौ ।
तदभावे पवित्रे तु दर्भमञ्जरिजे शुभे ॥२८१॥
विधानमत्र मे सम्यक् शृणुष्व सुसमाहिता ।
बहुश'खमभग्नाग्र समूल यदपुष्पितम् ॥२८२॥
प्राङ्मुखो दर्भमादाय प्रणवेन पुरा क्षिते ।
ततस्तेनैव तन्मूल प्राग्गत्कुर्यादधिष्ठितम् ॥२८३॥
तस्य मध्यमनाळ यन्न्यग्भूतमवतिष्ठते ।
आराध्य मन्त्रनाथेन स्मरेद्ब्रह्म महात्मना ॥२८४॥
विवर्तं परमार्थीयमध्यक्षाख्य च विद्धि तम् ।
अनेन्दर्भमुख्य यत्काण्ड काण्डेपु चोत्तमम् ॥२८५॥
अणिमादिगुणैर्युक्त पुस्त्व तेन कल्प्यते ।
वाचक तस्य योक्तव्य हसयुक्त द्विलक्षणम् ॥२८६॥
बहि काण्डचतुष्केण चित्तपूर्वं चतुष्टयम् ।
प्रथनीयमथो नत्तमव्यक्तान्त स्वकै पदै ॥२८७॥
प्रणवादिनमोन्तैस्तु व्यापक सूक्ष्मलक्षणम् ।
एव श्रोत्रादिकान् पञ्च स्वनाम्ना ग्रथयेत्तदा ॥२८८॥
कर्मेन्द्रियाणि तन्तु तन्मात्रपञ्चकम् ।

पञ्चकं त्वथ भूताना बध्वा वै क्ष्मावसानिकम् ॥२८९॥
अवशिष्टैस्तु तत्काण्डैर्बध्नीयात्तु करण्डवत् ।
विना शिखासमूहेन समुत्थानावधेरथ ॥२९०॥
किंश्चित्तदूर्ध्वदेशाच्च यथा नो याति वै पुन ।
बहुधा काण्डसङ्घस्तु कल्पितस्तत्त्वसङ्ख्यया ॥२९१॥
विभिन्नाना च काण्डाना भङ्गादेकरतस्य च ।
उत्पद्यतेऽन्यथात्व च तस्मात्तद्रुमधयेत् दृढम् ॥२९२॥
दर्भमञ्जरिज त्वेवं सम्पाद्यादौ पवित्रकम् ।
अनुसन्धीयते तत्र मात्राध्यान यथास्थितम् ॥२९३॥
पूजयित्वार्घ्यपुष्पाद्यैरलङ्कृत्य पठेदिदम् ।
त्वमेव तीर्थं भगवन् ! त्वमेवायतन परम् ॥२९४॥
त्वयैवाधिष्ठित सर्वमिद जानामि तत्वत ।
तत्रापि च त्वयाऽऽदिष्ट क्रियाकाण्ड शुभप्रदम् ॥२९५॥
यच्चन्निर्वाहयाम्यद्य त्वदनुग्रहकाम्यया ।
एव विज्ञाप्य भगवन्मन्त्रमूर्ति परात्परम् ॥२९६॥
तत्पात्रपात्रग कृत्वा ब्रह्मयानगत तु वा ।
वेदगेयध्वनीशङ्खशब्दमङ्गलपूर्वकम् ॥२९७॥
नीत्वा तीर्थान्तिकं तत्र नीरदेशे निधाय च ।
पूर्वामुख च तद्यानमादाय च पवित्रकम् ॥२९८॥
वामहस्ततले कुर्यात् क्ष्मामण्डलगत त्विव ।
विपूयान्मध्यभागे च पाणिना दक्षिणेन तु ॥२९९॥
अवनीयाम्भसो मध्य निमज्जेन्मह तेन वै ।
सान्निध्यं तत्र तत्काल प्रकुर्वन्त्यचिरात्तु वै ॥३००॥
अशेषाणि च तीर्थानि लोकत्रयगतानि च ।
मन्त्रात्मा यत्र रक्षार्थं सम्मान्ये जलाशये ॥३०१॥
तत्रागमननीर्थाना सर्वेषा स्यात्समागम ।

किं पुनर्यत्र भगवान् मन्त्रमूर्तिरधोक्षज ॥ ३०२॥
साधकाभ्यर्थित स्नायात्सर्वानुग्रहया धिया ।
विद्वान् योनेन विधिना तीर्थमासाद्य तत्त्ववित् ॥३०३॥
स्नापयेद्वान्धवादीना प्राप्नुवन्त्यचिराच्च ते ।
तैर्थं फलमनायासान्मन्त्रमूर्ते प्रसादत ॥३०४॥
किं तु तत्रानवादित्रवर्जितम्तु भवेद्विधि ।
इम विद्यान्महाबुद्धिर्विशेष चात्र कर्मणि ॥३०५॥
सामान्यमविनाश यच्चिन्मय रूपवर्जितम् ।
विशेषज्ञानसम्बन्ध जीवहस विभाव्य तम् ॥३०६॥
पवित्रक तदाकार स्मृत्वा स्नाव्य ततोम्भसा ।
एव तेनैव चान्येषा बहूना बहुभिस्तु वा ॥३०७॥
सम्पाद्य विष्टरे स्नान दूरस्थाना सदैव हि ।
सम्पन्ने स्नपने त्वेव द्वितीयेह्नि महामति ॥३०८॥
रथे कृत्वार्चिते त वै प्रपूज्य च यथाविधि ।
यात्राख्यमुत्सव कुर्यादन्नदानपुरस्सरम् ॥३०९॥
सनृत्तगेयवादित्र जागरेण समन्वितम् ।
एकरात्र द्विरात्र वा त्रिरात्र भक्तिपूर्वकम् ॥३१०॥
सकृत्सवत्सरस्यान्ते तूत्सव स्नपनादिकम् ।
कुर्याद्वै मन्त्रनाथस्य स सिद्धि लभते पराम्॥३११॥
अथ वा मन्दिरे देवमुत्तमोत्तममार्गत ।
सम्प्राप्य समलकृत्य रथादौ जगता पतिम् ॥३१२॥
समारोप्य विशेषेण यात्रोत्सवमथाचरेत् ।
इति पावित्रक सम्यग्विधान परिकीर्तितम् ॥३१३॥
इत पर च श्रोतव्यमस्ति चेत्कथ्यता द्विजा ! ।

इति श्रीपाञ्चरात्रे ईश्वरसहितायां
पवित्रोत्सवादिविधिर्नाम
चतुर्दशोऽध्याय ।

अथ पञ्चदशोऽध्यायः ।

मुनयः ।

स्नपनानां विधिं सम्यक्समाख्याहि मुनीश्वर ! ।
यद्ज्ञानात्सकलाः पूर्णा नित्यनैमित्तिकाः क्रियाः ॥१॥

नारदः ।

शृणुध्वं मुनयः ! सर्वे सावधानेन चेतसा ।
विधानं स्नपनानां तु बहुभेदविनिर्मितम् ॥२॥
प्रासादस्याग्रत कुर्यान्मण्टपं तु तदर्थतः ।
प्रथमावरणे वापि द्वितीयावरणेपि वा ॥३॥
तृतीयावरणे वापि चतुर्थे पञ्चमेपि वा ।
आग्नेय्यां दक्षिणस्यां वा नैर्ऋत्यां पश्चिमे तु वा ॥४॥
वायव्यामुत्तरस्यां वा ऐशान्यां वा यथारुचि ।
कुर्यात्स्नानादिकं सर्वं यागमण्टपवद्द्विजाः ! ॥५॥
विना यागस्थलं मध्ये वेदीं चापि तदूर्ध्वतः ।
अधिवासश्च कुम्भानां स्थापनं स्नपनं तथा ॥६॥
युज्यते वै यथैकस्मिन् तथाभ्यूह्य समाचरेत् ।
आचार्यांश्चतुरो विप्राः ! षडष्टौ द्वादशापि वा ॥७॥
यजमानस्तु वरयेच्छास्त्रज्ञान् गुरुणा सह ।
प्रवीणांश्च बहुत्वे तु तत्संख्यानियतिः कृता ॥८॥
तेषां यथोक्तसंख्यानामभिज्ञानामसन्निधौ ।
तादृशान् वरयेद्विप्रांश्चतुस्त्र्येकमेव वा ॥९॥
साधकाश्चतुरः षड्वा ह्यष्टौ द्वादश षोडश ।
वरयेच्छास्त्रकुशलान् प्रवीणानुक्तकर्मसु ॥१०॥
एवं सर्वेषु यागेषु नित्यनैमित्तिकात्मसु ।
आचार्याणां साधकानां सङ्ख्यानियम ईरितः ॥११॥

सङ्ख्याहीनं न गृह्णीयादापद्यपि कदाचन ।
मोहेन यदि गृह्णीयाद्द्वयं स्याद्राजराष्ट्रयोः ॥१२॥
प्राङ्मुखे मण्टपे भागे तृतीये पश्चिमे स्थिते ।
मध्यसूत्रं समाश्रित्य स्नानपीठं प्रकल्पयेत् ॥१३॥
प्राग्गतं प्रत्यगास्ये तु सौम्यास्ये दक्षिणागतम् ।
तदास्ये चोत्तरास्स्यं यथालक्षणलक्षितम् ॥१४॥
यदा स्नपनबिम्बादौ बिम्बे स्नपनमाचरेत् ।
एवं तदा प्रकुर्वीत मण्टपं द्विजसत्तमाः ! ॥१५॥
मूलबिम्बे यदा कुर्यात्तदग्रे मण्टप तदा ।
तदानीं न तु कुर्वीत स्नानपीठं द्विजोत्तमाः ! ॥१६॥
सप्तमे पञ्चमे वापि पूर्वे स्नपनवासरात् ।
तृतीये वा मुनिश्रेष्ठास्तस्मिन्नहनि वा द्विजाः ! ॥१७॥
अङ्कुरानर्पयित्वा तु तत स्नपनमारभेत् ।
यदा पूर्वदिने कुर्यात्कुम्भानामधिवासनम् ॥१८॥
तदानीं पूर्वरात्रौ तु कुर्यात्कौतुकबन्धनम् ।
पूर्वेद्युर्विहिते पश्चात्तस्मिन्नहनि वाचरेत् ॥१९॥
यदा कर्मदिने विप्राः ! कुर्यात्कुम्भाधिवासनम् ।
तदानीं तु दिने तस्मिन् कुर्यात्कौतुकबन्धनम् ॥२०॥
तत. प्रभात आचार्य कृतस्नान. प्रसन्नधीः ।
प्रविश्य मण्टपं सार्धं परिचर्यापरैर्जनैः ॥२१॥
शलाकासहितैर्दर्भैः महदेवीविमिश्रितैः ।
मार्जयेत्सर्वतो विप्राः ! प्राङ्मुखो वाप्युदङ्मुख ॥२२॥
आलेपयेद्गोमयेन पूर्वादीशानपश्चिमम् ।
नूतनेनाम्बरेणैव गालितेन जलेन तु ॥२३॥
प्रोक्षयेन्मण्डपं विप्राः ! पञ्चगव्यकुशाम्बुभिः ।
एका द्वौ सप्त वा वापि वेदिकाः स्नपने स्मृताः ॥२४॥

नववस्त्रधराः सर्वे सर्वालङ्कारसंयुताः ।
नववस्त्रोत्तरीयाश्च सोष्णीषा गुरुसम्मताः ॥२५॥
नियमस्थास्तु बहवस्तथैव परिचारकाः ।
यद्यद्योग्यं भवेद्विप्राः! स्नपने यत्र यत्र तु ॥२६॥
तत्समस्तं समाहृत्य मण्टपे सम्प्रवेश्य च ।
स्नपनं प्रारभेत्पश्चाद्देशिकः शास्त्रपारगः ॥२७॥
स्नपनं द्विविधं विद्धि परापरविभेदतः ।
परं तु दशधा प्रोक्तं प्रधानादिविभेदतः ॥२८॥
प्रधानं प्रथमं विद्धि द्वितीयं तु परं स्मृतम् ।
तृतीयं परसूक्ष्मं स्यात्परस्थूलं चतुर्थकम् ॥२९॥
पञ्चमं स्यात्सूक्ष्मपरं सूक्ष्मसूक्ष्मं तु षष्ठकम् ।
सूक्ष्मस्थूलं सप्तमं स्यात् स्थूलं स्यात्परमष्टमम् ॥३०॥
स्थूलसूक्ष्मं तु नवमं स्थूलस्थूलं तदुत्तरम् ।
उत्तमादिविभेदेन त्वपरं नवधा स्थितम् ॥३१॥
परापरविभेदानामेषां साधारणं स्मृतम् ।
अनन्तकलशं नाम्ना स्नपनं सर्वपूरकम् ॥३२॥
एषां प्रधानपूर्वाणां सूत्रपातपुरस्सरम् ।
सर्वमुद्धारपर्यन्तं क्रमेण शृणुत द्विजाः! ॥३३॥
लोहजं दारुजं वापि मृण्मयं वा सुशोभनम् ।
मण्टपेशानदिग्भागे संस्थाप्य जलभाजनम् ॥३४॥
वेदिं प्रक्षाल्य तोयेन वस्त्रैः संवेष्ट्य नूतनैः ।
सूत्रपातं ततः कुर्यात्कुम्भसंख्यानुरूपतः ॥३५॥
यथोक्तमानविस्तीर्णे क्षेत्रमण्टपमध्यतः ।
मण्टपस्य तु विप्रेन्द्राः! प्राग्भागमवलम्ब्य वा ॥३६॥
स्वीकृत्य पश्चात्प्राक्प्रत्यग्दयात्सूत्रचतुष्टयम् ।

दक्षिणोत्तरग सूत्रपञ्चक विनिवेशयेत् ॥३७॥
एव कृते भवन्त्यत्र पदानि द्वादश द्विजा ! ।
एकैकस्य तु विस्तार ताल प्रादेशमेव वा ॥३८॥
हस्त वारत्निमात्र वा मण्टपस्यानुरूपत ।
महत्त्वस्य च कुम्भानामेव सर्वत्र चोर्ध्वत ॥३९॥
पिष्टचूर्णैरलङ्कृत्य चतुर्दिक्षु समन्तत ।
कोष्ठेषु पीठिका कुर्यात्तण्डुलैर्व्रीहिभिस्तु वा ॥४०॥
तासा हि प्रतिकोष्ठ तु कुर्यादाढकसम्मितै ।
अर्धाधिकैस्त्रिभि प्रस्थैरथवा केवलैस्त्रिभि ॥४१॥
अर्धोत्तरेण वा विप्रा ! कुर्यात्प्रस्थद्वयेन वा ।
यद्वा प्रस्थद्वयेनैव प्रस्थेनार्धोत्तरेण वा ॥४२॥
प्रस्थेन वा तदर्धेन तत्पादेनाथ वा द्विजा ! ।
तुर्योंशमथ वा वृत्ता कृत्वैव पीठिका तत ॥४३॥
सौवर्णा राजता ताम्रा वा भेदवर्जिता ।
श्लक्ष्णा असुषिरा कुम्भाश्चतुर्विंशाङ्गुलोन्नता ॥४४॥
विस्तृतेर्मध्यतस्तद्वत्तद्दल त्र्यङ्गुलोन्नतम ।
ततमङ्गुलिपङ्क्तेन तत्रास्य त्र्यङ्गुल स्मृतम् ॥४५॥
मेखला परितो ज्ञेया त्र्यङ्गुला द्विजसत्तमा ! ।
यद्वा तदर्धमान तु सर्वमुच्छ्रायपूर्वकम् ॥४६॥
यद्वोत्तमोत्तमा विप्रा ! द्रोणमानोदपूरका ।
तदष्टमाशनो न्यूना क्रमात्प्रस्थद्वयावधि ॥४७॥
अधमाधमकुम्भास्तु प्रस्थमात्रोदपूरका ।
एव लक्षणयुक्तास्तु कार्या वित्तानुसारत ॥४८॥
चक्राद्यागोपरिस्थास्तु विनता कमठोदरा ।
पाद्यन्त यवत्रिमांवा शतपत्रमुखानना ॥४९॥
ऊर्ध्वाध कौमुदीमाग्गमण्डलालङ्कृता द्विजा ! ।

मकराननशेषाभिरमृताम्बुप्रवाहका ॥५०॥
नदीसमुद्रश्रीवृक्षनानामाल्यै परिष्कृता ।
चक्राधारादिभिर्युद्धा रहिता सत्यसम्भवे ॥५१॥
मृण्मया वानुकल्पे तु भेदच्छिद्रविवर्जिता ।
न द्वितप्ता सुतप्ताश्च ह्येकवर्णास्तु सुस्वरा ॥५२॥
सङ्गृह्य क्षाळयेत्सम्यक् शुद्धतोयैश्च सर्वत ।
सूत्रेण वेष्टयेद्यत्नादङ्गुळाङ्गुळमन्तरम् ॥५३॥
पश्चिमे कलशस्थानात्कलशानधिवासयेत् ।
शालिभि स्थण्डिलं कृत्वा केवले स्थण्डिले तु वा ॥५४॥
पूर्वाग्रानुत्तराग्राश्च कुशास्तत्र परिस्तरेत् ।
तारेण तत्र कलशान् न्यस्य पुष्पेण पूजयेत् ॥५५॥
अधोमुखास्तु तानेव न्यस्य पङ्क्तिक्रमेण तु ।
कुशानुपरि सस्तीर्य प्राङ्मुख परमेष्ठिना ॥५६॥
दर्भमुद्रा प्रदर्श्याथ गन्धतोयेन सर्वत ।
सम्प्रोक्ष्य पुसा विश्वेन विकिरेदक्षतानि च ॥५७॥
निवृत्त्या चोन्मुखीकृत्य सर्वेण मुनिपुङ्गवा ॥
पृथगुद्धृत्य कलशान् स्वस्थानेषु क्रमान्न्यसेत् ॥५८॥
कुम्भन्यासादिकं सर्वं मूलमन्त्रेण वाचरेत् ।
निरीक्षणादिसमुद्रान् कृत्वा सहृदयेन तु ॥५९॥
अष्टाक्षरेण मन्त्रेण मन्त्रयेत्तान् मकृत्सकृत् ।
तेनैव पूजयेत्पश्चादर्घ्यस्रक्चन्दनादिना ॥६०॥
तदाहरणहोमं तु यथाशक्ति समाचरेत् ।
पूर्णान्तमथ सम्पूर्य क्रमादर्घ्यनियोजयेत् ॥६१॥
पङ्क्तित्रये पश्चिमादि पूर्वान्तं च चतुष्टयं ।
तत्र त्वग्निर्निऋतिर्वायु ... पश्चिमग्निके ॥६२॥

धात्रीफलोदकं चैव लोध्रतोयमनन्तरम् ।
रक्तचन्दनतोयं च रजनीनीरमुत्तमम् ॥६३॥
ततस्तु मध्यपङ्क्तौ तु तथैव विनिवेशयेत् ।
ग्रन्थिपल्लववार्येव ततस्तु तगरोदकम् ॥६४॥
प्रियङ्गुवारि तदनु मासीजलमतः परम् ।
तथैवोत्तरपङ्क्तौ तु भवेदेतच्चतुष्टयम् ॥६५॥
सिद्धार्थकोदकं चैव सर्वौषधिजलं ततः ।
सर्वरत्नोदकं चैव शुद्धोदकमतः परम् ॥६६॥
न्यसेत्कूर्चं कुशं दार्भमुदग्रं षोडशाङ्गुळम् ।
अङ्गुळं ग्रन्थिमानं तु मूलं वै द्वादशाङ्गुळम् ॥६७॥
शेषमग्रं विजानीयादित्येतत्कूर्चलक्षणम् ।
अथ वार्धाङ्गुळा ग्रन्थिरग्रं वै व्यङ्गुळं भवेत् ॥६८॥
मूलं कुर्यात्तु विप्रेन्द्राः द्वादशाङ्गुळसम्मितम् ।
ब्राह्मणस्य चतुर्दर्भं त्रिदर्भं क्षत्रियस्य तु ॥६९॥
द्विदर्भं तु विशां कूर्चं स्त्रीशूद्राणां तथा भवेत् ।
सर्वेषामथ वा कूर्चं चतुःसप्तकृतं तु वा ॥७०॥
मूलमन्त्रेण तदनु पूजयेत्कलशान् क्रमात् ।
अर्घ्यालभनपुष्पैश्च धूपेन मुनिपुङ्गवाः ॥७१॥
अपिधाय क्रमेणैव पिधानैः सूत्रवेष्टितैः ।
प्रतिकुम्भं तु वसनैर्वेष्टयेद्विभवे सति ॥७२॥
आच्छाद्य नववस्त्रेण सर्वतः प्रागुदङ्मुखः ।
पूर्ववत्पूजयित्वा तु ततो होमं समारभेत् ॥७३॥
अष्टोत्तरशतं हुत्वा समिदादीन् पृथक् पृथक् ।
पूर्णाहुतिं ततो हुत्वा कलशानभिमन्त्रयेत् ॥७४॥
मूलमन्त्रेण सर्वेषां स्नपनं विहितं द्विजाः ।
अन्तरान्तरयोगेन कुम्भैः शुद्धोदपूरितैः ॥७५॥

स्नपनं चार्घ्यदानं च द्रव्याणां तु समाचरेत् ।
द्रव्यन्यासक्रमेणैव तदुद्धारं प्रकीर्तितं ॥७६॥
प्रधानमेतत्कथितं द्विपट्कफलशात्मकम् ।
सर्वेषां कारणमिदं कार्याण्यन्यानि सत्तमा ! ॥७७॥
अम्बुना पञ्चगव्येन क्षीरेण तदनन्तरम् ।
दध्ना घृतेन मधुना सर्वौषधिजलेन तु ॥७८॥
बीजाम्बुफलतोयेन गन्धपुष्पाम्बुना ततः ।
हेमरत्नोदकेनाथ पूरितं तु यथाक्रमम् ॥७९॥
कलशानां द्विषट्कं यत्परमेतदुदाहृतम् ।
पञ्चगव्यदधिक्षीरघृतमध्विक्षुवारिणा ॥८०॥
सर्वौषधीगन्धरत्नफलपुष्पजलैस्तथा ।
केवलेनोदकेनापि क्रमेण परिपूरितम् ॥८१॥
द्विषट्कमेतत्कुम्भानां परसूक्ष्ममुदाहृतम् ।
सूत्रपातादिकं चास्मिन् द्वितयेऽपि प्रधानवत् ॥८२॥
पाद्यमर्घ्यं तथाचामं सर्वौषधिजलं तथा ।
दधि क्षीरं मधु घृतं तथा शुद्धोदकं द्विजा ! ॥८३॥
कुम्भानां नवकं त्वेतत्परस्थूलमुदाहृतम् ।
सूत्रपातादिकं चास्य प्रागेव परिकीर्तितम् ॥८४॥
पञ्चधा भाजिते क्षेत्रे भागाः स्युः पञ्चविंशतिः ।
बर्हिः प्रागादियोगेन कलशानां द्विरष्टके ॥८५॥
क्षीरं दधि घृतं चैव मधु वै रसमैक्षवम् ।
धात्रीफलादिदशकं सर्वापः यन्तमेव हि ॥८६॥
पत्रोदकं ततः पश्चात्तदन्तं कलशाष्टके ।
प्रागादि पुष्पतोयं च फलबीजोदके त्वथ ॥८७॥
गन्धोदकं च तदनु हेमरत्नजले तथा ।

पुण्यतीर्थसरित्तोये मध्ये शुद्धोदकं न्यसेत् ॥८८॥
द्रव्यन्यासक्रमेणैव तदुद्धार उदाहृतः ।
एवं क्रमाद्द्रव्ययुक्तकलशैर्द्विजसत्तमाः ! ॥८९॥
स्नपनं पञ्चविंशाख्यैरेतत्सूक्ष्मपरं स्मृतम् ।
पञ्चविंशत्तु कोष्ठानि कल्पयित्वा तु पूर्ववत् ॥९०॥
मध्ये शुद्धोदकं न्यस्य बहिरिन्द्रादियोगतः ।
पूर्वं क्षीराम्भसा पूर्णं परं शुद्धेन वारिणा ॥९१॥
तृतीयं रत्नतोयेन हेमतोयेन चापरम् ।
गन्धाम्बुमिश्रितं चान्ये फलपुष्पोदकान्विते ॥९२॥
शालिबीजाम्भसा पूर्णमष्टमं परिकीर्तितम् ।
कुम्भाष्टकं तु तद्बाह्यदिगष्टकसमाश्रितम् ॥९३॥
धात्रीफलोदकं पूर्वे पथ्यातोयं ततोऽपरे ।
गुडूचीक्षोदमन्यस्मिन् विभीतकजलं परे ॥९४॥
कुमारीक्वथितं तोयं व्याघ्रीसलिलमेव च ।
नागरोदकमन्यस्मिन् तथान्यस्मिन् मधूदकम् ॥९५॥
विहितोऽत्र समुद्धारो द्रव्यन्यासक्रमेण तु ।
नृसिंहमन्त्रैर्जप्तेन केवलेनोदकेन तु ॥९६॥
सत्याद्यैः पञ्चभिर्मन्त्रैस्त्रिभिः सिंहादिभिः क्रमात् ।
अन्तरावरणस्थानां कलशानां मुनीश्वराः ॥९७॥
एकैकं सप्तवामन्त्र्य प्रागादौ तद्बहिः स्थितान् ।
कलशाष्टकमन्त्रेण हृदाद्येनाभिमन्त्रयेत् ॥९८॥
गायत्र्यान्तर्गतैर्विप्राः ! कलशैः स्नापयेत्क्रमात् ।
द्विर्नीराजनमेभ्यस्तु उपचारा इह मताः ! ॥९९॥
केवलेनोदकेनाथ अस्त्रजप्तेन सेचयेत् ।
यद्वा मातृकयैवैनं वर्त्मना सर्वमाचरेत् ॥१००॥

दशभिः सप्तभिः कुम्भैः सूक्ष्मसूक्ष्ममिदं स्मृतम्।
चतुर्हस्तं त्रिहस्तं वा क्षेत्रं सार्धद्विहस्तकम् ॥१०१॥
द्विहस्तं वा समापाद्य तदर्धं तु द्विधा भवेत्।
एकेन कर्णिकां कुर्याद्द्वितीयेन द्विरष्टकम् ॥१०२॥
दळानां तु ततो विप्राः कर्णिकोपरि विन्यसेत्।
कलशानां चतुष्कं तु दिक्चतुष्कसमाश्रितम् ॥१०३॥
पूर्वं तु पञ्चगव्येन ततश्चैव मृदम्बुना।
सर्वौषध्युदकेनैव केवलेनाम्भसाऽथ च ॥१०४॥
पूर्वपत्रात्समारभ्य यावदीशानगोचरम्।
षोडशान्यान् प्रतिष्ठाप्य तत्रैव कलशान् क्रमात् ॥१०५॥
प्रथमं पञ्चगव्येन केवलेन तु पूरयेत्।
गोमूत्रेण द्वितीयं तु तृतीयं गोमयाम्बुना ॥१०६॥
त्रेताग्निमृत्तिना विप्राः चतुर्थं सोदकेन तु।
गजगोवृषभशृङ्गवल्मीकाल्यमृदा परम् ॥१०७॥
शालिक्षेत्रान्नदीमध्यात्पद्मषण्डाच्च पर्वतात्।
मृद्भिः षष्ठं तु कलशं पूरणीयं ततो द्विजाः ॥१०८॥
सप्तमं सर्षपाम्भोभिः सर्वौषधिभिरष्टमम्।
क्षीरेण नवमं विद्धि दध्ना दशममुच्यते ॥१०९॥
घृतेन चैकादशमं मधुना द्वादशं द्विजाः।
सर्वैस्त्रयोदशं बीजैः फलैः सर्वैश्चतुर्दशम् ॥११०॥
समस्तधान्यैरपरं सर्वगन्धैस्तु षोडशम्।
विहितोऽत्र समुद्धारो ह्यन्यन्यामन्त्रेण तु ॥१११॥
दशाभिमन्त्रितं कृत्वा एकैकं कलशं पुनः।
स्नापयेन्मूलमन्त्रेण एकैकेन ततः क्रमात् ॥११२॥
इति विंशतिभिः कुम्भैरपितं द्विजसत्तमाः।

सूक्ष्मस्थूलमिदं प्रोक्तं ततोन्यत्कथ्यते द्विजाः ॥११३॥
प्राक्प्रत्यगायतं सूत्रपञ्चकं विनिवेश्य च ।
दक्षिणोत्तरसूत्राणामेकादश विनिक्षिपेत् ॥११४॥
एवं कृते तु कोष्ठानि चत्वारिंशद्भवन्ति हि ।
तत्र पश्चिमदिक्पङ्क्तेरारभ्य क्रमयोगतः ॥११५॥
दक्षिणादुत्तरान्तं च कलशानां श्चतुश्चतुः ।
विन्यस्य पूरयेत्तांस्तु क्रमाद्द्रव्यैर्निबोधत ॥११६॥
पाद्यार्घ्याचमनीयार्थद्रव्यैः पूर्वोदितस्त्रयम् ।
नगादाद्यन्तमध्यस्था नदीमृगरसम्भवा ॥११७॥
ह्रदाद्वल्मीकशिखराद्गजदन्तक्षतीकृतात् ।
हलोत्था गोवृषशृङ्गशालीना तु समुद्भवा ॥११८॥
तथा च पद्मषण्डोत्था त्वेकस्मिन्गोमयं परे ।
वनदाहसमुद्भूतं तथैव च महानसात् ॥११९॥
त्रेताग्निभस्म त्वपरे विनिवेश्य घटान्तरे ।
अन्यस्मिन् पञ्चगव्यं तु कुशोदकसमन्वितम् ॥१२०॥
मधून तत्कुम्भं तु चमसीनागिपूरितम् ।
पलाशखदिराश्वत्थशमीरोहितचन्दनम् ॥१२१॥
कषायोदकमन्यस्मिन् परे तु त्रिफलोदकम् ।
वचा शतावरी कन्या व्याघ्री सिंही कृताञ्जलि ॥१२२॥
गोरोमी सिंहलोमी च कुष्ठं भूम्यञ्जनं तथा ।
महागन्धेगा च रक्ष्मेन्यच मतमा ॥१२३॥
महानीला गुडूची च मन्देवी शतावरी ।
विष्णुक्रान्ता च वासेंटा गाढा वह्निशिखा परे ॥१२४॥
षष्ठी वराहकर्णी चाप्यन्यस्मिन् गजपिप्पली ।
श्रीपर्ण्यादीनि चान्यस्मिन् पावनानि फलानि च ॥१२५॥

दधिक्षीराज्यकुम्भांश्च द्वौ मध्विक्षुरसान्वितौ ।
मूलान्यम्भोरुहाणां च तान्यन्यस्मिन् द्वये न्यसेत् ॥१२६॥
द्रुमाणां पावनानां तु सक्षीराणां विशेषतः ।
पत्रपुष्पफलोपेतमेकस्मिन् मञ्जरीगणम् ॥१२७॥
जात्यादिकमथैकस्मिन् कौसुमीयं लताचयम् ।
रोचनारजनीयुग्मं चला मोटाथ पद्मकम् ॥१२८॥
इति पञ्चकमन्यस्मिन् दर्भदूर्वाङ्कुराणि च ।
सास्यं शाल्यंकुरचयं कलशे ह्यपरे तु वै ॥१२९॥
सिद्धार्थकान् सितायांस्तु प्रियङ्गुं गन्धसज्ञितम् ।
अपरस्मिम् न्यसेत्कुम्भे सह वै नागकेसरैः ॥१३०॥
ग्राम्याश्चौषधयः सप्त सप्तारण्या घटद्वये ।
बाह्लीकं चन्दनं चैव रसं कर्पूरमेव च ॥१३१॥
चतुष्कमेतदपरे त्वन्यस्मिन् धातवः शुभाः ।
ताम्रजाम्बूनदाद्यास्तु परे रत्नचयं महत् ॥१३२॥
न्यसेद्विद्रुमजालं च द्वयोर्मुक्ताफलानि च ।
अर्घ्योदकमथैकस्मिन् नदीतीर्थोदकं द्वये ॥१३३॥
सर्वौषधिघटं चैव सुशीताम्भोघटं ततः ।
सुगन्धपुष्पकलशं चत्वारिंशत्त्वमी स्मृताः ॥१३४॥
द्रव्यन्यासक्रमोद्धार इदं स्थूलपरं स्मृतम् ।
शीताम्बुपूरितानां च घटानां केवलं द्विजाः ! ॥१३५॥
चत्वारिंशत्समायुक्तं स्थूलसूक्ष्मं प्रकाशितम् ।
गन्धोदकेन पूर्णानां चत्वारिंशद्भिरेव च ॥१३६॥
समन्वितं घटानां तु स्थूलस्थूलं प्रकीर्तितम् ।
सूत्रपानविधानं च कुम्भन्यासक्रमं तथा ॥१३७॥
उद्धारं चानयोः कुर्यात् स्थूलाद्यमष्टधा द्विजाः ! ।

भक्तिश्रद्धावशाचापि विभवानुगुणं तु वा ॥१३८॥
त्रिविधं स्थूलभेदं तु द्विगुणं तु समाचरेत् ।
अनुकल्पे तदर्धं वा पादमष्टांशमेव वा ॥१३९॥
चतुष्टयं वा कुम्भानां प्रत्येकं वा द्वयं द्वयम् ।
एकैकं वापि विप्रेन्द्राः ! सर्वद्रव्यमयं घटम् ॥१४०॥
नवानां परिपूर्णानामुक्तादन्यदपेक्षितम् ।
कुर्यादम्यूह्य तत्सर्वं प्रधानोदितवर्त्मना ॥१४१॥
एवं तु दशधा विप्राः! परभेदाः प्रकीर्तिताः ।
अपरस्य विभेदांस्तु क्रमेण शृणुत द्विजाः! ॥१४२॥
चतुरश्रीकृते क्षेत्रे ह्येकत्रिंशद्विभाजिते ।
कोष्ठकानां नवशतमेकषष्टिस्तथैव च ॥१४३॥
मध्ये पङ्क्तित्रयं स्थाप्य मार्जयेत्तद्बहिर्द्वयम् ।
वीथ्यर्थं तद्बहिर्भूयः स्थाप्य पङ्क्तिलयं पुनः ॥१४४॥
द्वयं विमृज्य वीथ्यर्थं स्थापयेत्सप्तकं पुनः ।
विभज्य वा त्रिनवधा ह्येकैकं विमृजेद्द्विजाः ! ॥१४५॥
वीथ्यर्थं सङ्कटे देशे कलशानां तु पूर्ववत् ।
क्रमेण तेषु कोष्ठेषु कलशान् पूर्ववन्न्यसेत् ॥१४६॥
घृतमुष्णोदकं चैव रत्नवारि फलोदकम् ।
लोहाम्भो मार्जनाम्भश्च गन्धाम्भोक्षतवारि च ॥१४७॥
यवोदकमथेशान्तं मध्यादारभ्य मध्यमे ।
पाद्यमर्घ्यं तथाचामं पञ्चगव्यं क्रमेण तु ॥१४८॥
द्विचतुष्कोणसंवीतनवकानां तु मध्यमे ।
ऐन्द्रादुत्तरपर्यन्तं विदिक्स्थानां तु मध्यमे ॥१४९॥
दधि क्षीरं मधु तथा कषायं वह्निदिक्क्रमात् ।
एवं सप्तदश प्रोक्ताः प्रधानद्रव्यसंयुताः ॥१५०॥

शेषाश्चान्ये चतुष्पष्टि शुद्धोदकसमन्विताः ।
इत्येकाशीतिकलशा मध्यतः संस्थिता द्विजाः ! ॥१५१॥
ततस्त्वेकोनपञ्चाशत्कलशास्तद्दिगष्टके ।
तत्र मध्यमकुम्भेषु दिक्स्थितानां तु सेचयेत् ॥१५२॥
गुडोदकं चेक्षुरसं नालिकेररसं तथा ।
शान्तिवारि मुनिश्रेष्ठाः ! पूर्वादिक्रमयोगतः ॥१५३॥
विदिक्स्थब्रह्मकुम्भेषु सेचयेन्मङ्गळोदकम् ।
आग्नेयादीशपर्यन्तं शिष्टमन्यच्छतत्रयम् ॥१५४॥
अशीतियुक्तं कुम्भानां तथैव चतुरुत्तरम् ।
सुगन्धैः शीतलैस्तोयैः सम्पूर्णं द्विजसत्तमाः ! ॥१५५॥
पश्चान्मध्यस्थनवके मध्यादीशानपश्चिमम् ।
वासुदेवाद्वराहान्तं मूर्तीनां नवकं यजेत् ॥१५६॥
अर्घ्यालभनमाल्यैश्च धूपेन च यथाक्रमम् ।
तद्बहिर्नवकानां तु ब्रह्मकुम्भेषु पूजयेत् ॥१५७॥
केशवाद्यामनान्तं च द्विचतुः पूर्वदिक्क्रमात् ।
तत एकोनपञ्चाशत्कलशानां मुनीश्वराः ! ॥१५८॥
पूजयेद्ब्रह्मकुम्भेषु श्रीधराद्यं चतुष्टयम् ।
पूर्वाद्युत्तरपर्यन्तं वह्न्यादीशानपश्चिमम् ॥१५९॥
नराद्यं कृष्णपर्यन्तं चतुष्कं पूजयेद्द्विजाः ! ।
भास्वत्कूर्चानि विन्यस्य चक्रिकाभिः पिधाय च ॥१६०॥
ततः प्रच्छादयेद्वस्त्रैः नूतनैस्तु पृथक् पृथक् ।
तत ऊर्ध्वं यजेद्देवं वासुदेवं जगत्पतिम् ॥१६१॥
पाद्यान्तैर्मङ्गळान्तैस्तु कुम्भैः संस्नापयेद्विभुम् ।
महाक्षरेण मन्त्रेण द्विषट्काक्षरतोपि वा ॥१६२॥
विष्णुगायत्रिया वापि तन्मूर्तिमनुनापि वा ।

स्नपन सर्वकलशैर्विहित स्त्वथवा द्विजा ! ॥१६३॥
देव वेष्णवगायत्र्या स्नापयेत्पाद्यवारिणा ।
तद्विष्णोरितिमन्त्रेण स्नापयेदर्घ्यवारिणा ॥१६४॥
प्रतेविष्णो इति ऋचा स्नानमाचमनेन तु ।
विष्णोः कर्मेति मन्त्रेण स्नान स्यात्पञ्चगव्यके ॥१६५॥
दधिक्राविण्णमन्त्रेण दध्ना सस्नापयेद्विभुम् ।
आप्यायस्वेति मन्त्रेण गोक्षीरेणाभिषेचयेत् ॥१६६॥
मधुवातेति मन्त्रेण मधुना स्नपन विभो ।
ओषध्य इति मन्त्रेण कषाये स्नपन भवेत् ॥१६७॥
त्व विष्णुरिति मन्त्रेण स्नपन तूष्णवारिणा ।
फलिनीत्यादि मन्त्रेण स्नापयेत्फलवारिणा ॥१६८॥
शन्नो देवीति मन्त्रेण स्नपन मार्जनाम्बुभि ।
सावित्र्याक्षततोयेन अग्न आयाहि मन्त्रत ॥१६९॥
रत्नोदकैरिषेत्वेति लोहतोयेन सेचयत् ।
गन्धद्वारेति मन्त्रेण स्नपन यववारिणा ॥१७०॥
शतधारेति मन्त्रेण स्नपन गन्धवारिणा ।
घृतेन स्नापयेद्देव तत शुक्रमसीत्यृचा ॥१७१॥
अथ वा पाद्यपूर्वं तु यावत्तोयान्स्नानकम् ।
ऋग्भि पुरुषसूक्तस्य तत शुक्रमसीत्यृचा ॥१७२॥
आज्य च गुडतोयाद्य चतुष्क शान्तिपश्चिमम् ।
न विष्णुरिति मन्त्रेण विष्णोर्नुकमिति द्विजा ! ॥१७३॥
स्नापयेन्मन्त्रशान्त्येन तोयेन मुनिपुङ्गवा ! ।
येनाभिषिञ्चेद्देवेश प्रधानकलशेन तु ॥१७४॥
तन्दुद्रवाभिरन्त्येन मन्त्रेणाभिषेचयेत् ।
प्रतिष्ठाप्य तु मन्त्रेण धर्म्यान्भनमाल्यकै ॥१७५॥

धूपेन च समभ्यर्च्य तत्तत्तेनाभिषेचयेत्।
यद्वार्घ्यं पाद्यमाचामं गन्धस्रग्धूपदीपकम् ॥१७६॥
दद्याद्यथाक्रमं सर्वं केवलं चार्घ्यमेव वा।
युक्तं शतचतुष्केण सशत्या च त्रयेण च ॥१७७॥
कुम्भानां स्नपनं ह्येतदुत्तमोत्तममुच्यते।
हीनमष्टाष्टसङ्ख्यातैरन्तः शुद्धोदवारिभिः ॥१७८॥
कलशैः स्नपनं यत्तु तत्स्यादुत्तममध्यमम्।
तथा पङ्क्तिचतुष्कं तु हीनं स्यात्पूर्वनिश्चितात् ॥१७९॥
यदेतत् स्नपनं युक्तमेकाशीत्या च मध्यतः।
दिक्षु चैकोनपञ्चाशच्चतुष्केण विदिक्षु च ॥१८०॥
त्र्यष्टदैविकभागस्थैः कलशैरन्वितं द्विजाः।
शेषैः पञ्चोत्तरशतसङ्ख्यातैः शुद्धवारिभिः ॥१८१॥
विहीनं कलशैर्विभात्तद्ध्वेदुत्तमाधमम्।
शतद्वयेन कुम्भानां चतुर्दिक्संस्थितेन च ॥१८२॥
चतुर्हीनेन वै विप्रा ह्येकाशीत्या च मध्यतः।
संयुक्तं स्नपनं प्राग्वत्तद्भवेन्मध्यमोत्तमम् ॥१८३॥
अष्टाष्टपरिसंख्यातैरन्तः शुद्धोदवारिभिः।
कलशैर्यद्भवेद्धीनं तत्स्यान्मध्यममध्यमम् ॥१८४॥
एकाशीत्या च कुम्भानां मध्यतस्तु समन्वितम्।
दिक्षु चैकोनपञ्चाशन्मध्यस्थनवसंयुतम् ॥१८५॥
शेषैः शुद्धोदकलशैर्विहीनं मध्यमाधमम्।
पङ्क्तिमामष्टसेनात्र हीनमेवं तु कल्पयेत् ॥१८६॥
एकाशीत्या च कुम्भानां केवलं पूर्ववद्द्विजाः।
अधमोत्तममेतत्तु स्नपनं परिकीर्तितम् ॥१८७॥
द्वाविंशद्भिस्तु कलशैः कोणस्थैः शुद्धवारिभिः।

विहीन स्नपन यत्तद्धवेदधममध्यमम् ॥१८८॥
यच्चतु षष्टिकलशैर्विहीन सर्वदिक्स्थितै ।
शुद्धोदकैर्द्विजश्रेष्ठास्तद्धवेदधमाधमम् ॥१८९॥
नवधा सप्तधा चात्र क्षेत्र कृत्वा तु पीडयेत् ।
द्वय चतुष्क वा शिष्ट कुम्भाना स्थापनार्थत ॥१९०॥
इत्येवमपर प्रोक्त नवधा मुनिसत्तमा ! ।
कुम्भाधिवासपूर्वं तु सर्वं पूर्ववदाचरेत् ॥१९१॥
आज्यस्य दैवत देवो वासुदेव पर स्मृत ।
उष्णाम्भम सङ्कर्षण प्रद्युम्नो रत्नवारिण ॥१९२॥
फलाम्भसोऽनिरुद्धस्तु भगवान् देवत द्विजा ! ।
नारायणस्तु मन्त्रात्मा कोष्टतोयस्य देवतम् ॥१९३॥
मार्जनस्य हयग्रीवो विष्णु स्याद्गन्धवारिण ।
नृसिंहोऽक्षततोयस्य वराहो यववारिण ॥१९४॥
पाद्यस्य केशवो देवोऽर्घ्यस्य नारायण स्मृत ।
देव आचमनीयस्य माधवस्त्वधिदेवता ॥१९५॥
गोविन्द पञ्चगव्यस्य विष्णुस्तु दधिदैवतम् ।
मधुसूदनसञ्ज्ञस्तु पयसो देवता स्मृता ॥१९६॥
त्रिविक्रमाख्यो मधुन कषायस्य च वामन ।
भगवान् श्रीधराख्यस्तु गुडतोयस्य देवता ॥१९७॥
देवदेवो हृषीकेश इक्षुसारस्य दैवतम् ।
दामोदरोऽधिदैव तु नालिकेराम्भसो द्विजा ! ॥१९८॥
पद्मनाभस्तु भगवान् शान्तितोयस्य देवता ।
नरो नारायणश्चैव हरि कृष्णस्तथैव च ॥१९०॥
आग्नेयादीनामैन्द्र देवता स्कन्दभाग ।
स्पर्शाभिधानाना तु शुद्धोदाना च दैवतम् ॥२००॥

कान्त्याद्युन्नतिपर्यन्तमष्टकं प्रतिदिक्क्रमात्।
बहिरेकोनपञ्चाशच्छुद्धतोयेषु च क्रमात् ॥२०१॥
स्वधादिगायत्र्यन्तास्तु शक्तयो ह्यधिदेवता।
अष्टावष्टौ तु पूर्वादिदिक्ष्वग्न्यादिविदिक्षु च ॥२०२॥
कलशानां तु गरुडः शेषः सूत्रस्य दैवतम्।
कूर्चानां तु परं ब्रह्म चक्रिकाणां तु चक्रराट् ॥२०३॥
वाससां वासुदेवस्तु सर्वेषां च स एव वा।
मार्जनं प्रोक्षणं चैव शकृदा चानुलेपनम् ॥२०४॥
सूत्रपातमलङ्कारं पिष्टचूर्णैः समन्ततः।
अष्टाक्षरादिमन्त्रेण कारयेत्पञ्च मन्त्रवित् ॥२०५॥
पञ्चोपनिषदा मन्त्री कलशानधिवासयेत्।
विष्णुगायत्रिया तत्र कोष्ठेषु कलशान्न्यसेत् ॥२०६॥
तत्र द्रव्याधिदेवानां वाचकैः पूरयेत्क्रमात्।
कूर्चांस्तु प्रक्षिपेत्तेषु द्विषट्कब्रह्मविद्यया ॥२०७॥
तत्तद्द्रव्याधिदेवास्तु तत्तद्द्रव्येषु पूजयेत्।
चक्रिकां स्थापयेत्पश्चाच्चक्रमन्त्रेण साधकः ॥२०८॥
वासोभिश्छादयेत्पश्चाद्द्विषट्कार्णेण मन्त्रवित्।
वस्त्रापनयनं कुर्यान्मूलमन्त्रेण मन्त्रवित् ॥२०९॥
प्रणवेन तु सूत्राणि छित्वा तेनाभिवन्द्य च।
उद्धृत्य विष्णुगायत्र्या दद्याद्वस्त्रं गुरोस्तथा ॥२१०॥
यस्मिन्यस्मिन्मन्त्रोक्तं विहितं कर्मणि द्विजाः।
अष्टाक्षरेण मन्त्रेण तत्तत्कुर्याद्विचक्षणः ॥२११॥
अथ वा सर्वकर्माणि मूलेनैव समाचरेत्।
पूर्वोक्तं परभेदानां स्नपनानां द्विजोत्तमाः ॥२१२॥
अर्घ्यादिद्रव्यनिचयं इतरेषां तु कथ्यते।

विष्णुपर्णी च दूर्वा च पद्मं श्यामाकमेव च ॥२१३॥
एतानि पाद्यस्याङ्गानि चत्वारि द्विजपुङ्गवाः ।
गन्धपुष्पाक्षतफले यवसिद्धार्थकं तिलम् ॥२१४॥
कुशाग्रमर्घ्यस्याङ्गानि ह्येतान्यष्टौ भवन्ति हि ।
लवङ्गजातितक्कोलमङ्गमाचमनीयके ॥२१५॥
शकृद्रसं च गोमूत्रं क्षीरं दधि घृतं तथा ।
अङ्गानि पञ्चगव्यस्य पञ्चैतानि च सर्वत ॥२१६॥
शम्युदुम्बरबिल्वानां पलाशवटयोस्तथा ।
खदिराश्वत्थयोश्चापि विकङ्कततरोस्तथा ॥२१७॥
त्वक्सारं तु कषायं स्यात्सर्वपापापनोदनम् ।
कदळीबिम्बचूताश्च पनसं मातुलुङ्गकम् ॥२१८॥
नाळिकेरं चामलकं बीजपूरं फलाम्भसः ।
अङ्गान्येतानि चैवाष्टौ फलानि कथितानि वै ॥२१९॥
सहदेवी शिरीषं च रजनी सूर्यवर्तिनी ।
सदाभद्रा कुशाग्राणि मार्जनाङ्गानि षट् द्विजाः ॥२२०॥
सूर्यकान्तं पद्मरागमिन्दुकान्तं तथैव च ।
वैडूर्यं चाप्ययस्कान्तमिन्द्रनीलप्रवाळकौ ॥२२१॥
गारुडं पुष्यरागं च स्फटिकजलगागरौ ।
वज्रं मौक्तिकमङ्गानि रत्नोदस्याथ वा द्विजाः ॥२२२॥
मणिर्मुक्ताफलं वज्रं प्रवाळं पुष्पकं तथा ।
रत्नोदकाङ्गान्येतानि पञ्चैव मुनिपुङ्गवाः ॥२२३॥
चार्डीरं चन्दनं चैव कर्पूरमगरुं तथा ।
गन्धाङ्गानि च चत्वारि स्युर्वा मुनिपुङ्गवाः ॥२२४॥
चन्दनं कुङ्कुमं मांसी हरिद्रा मुरं तथा ।
उशीरं कुङ्कुमाङ्गान्याम्भोदं तु चाष्टकम् ॥२२५॥

रुक्मं रूप्यं च ताम्रं चाप्ययस्त्रपुकमेव च ।
अङ्गानि कथितान्येवं पञ्च वै लोहवारिणि ॥२२६॥
तिलसिद्धार्थनीवारयववेणुयवानि च ।
तुळसीपत्रयुक्तानि शान्त्यम्भोङ्गानि चैव षट् ॥२२७॥
इन्द्रवल्ल्यङ्कुरं पद्ममश्वत्थाङ्कुरमेव च ।
एकपद्मं च चत्वार्यङ्गानि मङ्गळवारिणि ॥२२८॥
शुद्धोदकलशाः सर्वे चन्दनैकाङ्गसंयुताः ।
इत्युक्तोपरभेदानां स्नपनानां यथाक्रमम् ॥२२९॥
द्रव्याणां निचयश्चाथ सर्वौषध्यादि चोच्यते ।
कुष्ठं मांसी हरिद्रे द्वे मुराशैलेयचम्पकाः ॥२३०॥
वचाकर्चोरमुस्ताश्च सर्वौषध्यः प्रकीर्तिताः ।
पलाशबिल्ववकुळकदम्बाम्रशिरीषजाः ॥२३१॥
न्यग्रोधाश्वत्थजाश्चापि पल्लवाः पत्रवारिणि ।
केतकीमल्लिकाजातिनन्द्यावर्तोत्पलोद्भवाः ॥२३२॥
पद्मचम्पककुन्दोत्थाः कुसुमाः पुष्पवारिणि ।
यवगोधूमकनीवारशालिमुद्गप्रियङ्गुकाः ॥२३३॥
माषनीवारकौ चाष्ट कथिताः बीजवारिणि ।
अथ चानन्तकलशं नाम्ना सकल्पपूरकम् ॥२३४॥
यदेतस्य विधानं तु शृणुध्वं मुनिसत्तमाः ! ।
पूर्ववन्मण्टपं कुर्याच्चत्वारिंशत्करायतम् ॥२३५॥
द्वात्रिंशत्करविस्तारं चतुर्द्वारादिसंयुतम् ।
ध्वजाद्यैरप्यलङ्कारैः पूर्ववत्सुविभूषितम् ॥२३६॥
आपाद्य वा प्रमाणं यथाभिमतदेशगम् ।
यागार्थं मण्टपं प्राक्चाप्येवमेव निर्मितम् ॥२३७॥
उक्ते दिनेऽनुगणे ह्न्त्वा सर्वदिनाप्तगम् ।

तदर्थान् सर्वसम्भारान् सम्भृत्य सुसमाहित ॥२३८॥
देशिकेन्द्रस्तु पूर्वेद्यु सुस्नातश्च कृताह्निक ।
भूषणैर्विविधैर्वस्त्रैर्नूतनैश्च विभूषित ॥२३९॥
सितोष्णीषोत्तरीयश्च चित्रैर्माल्यैरलङ्कृत ।
चतुर्भिरष्टभिर्वार्यैस्ताद्दशैरपि साधकै ॥२४०॥
तत्सङ्ख्यै शास्त्रकुशलै कञ्चुकादिविभूषितै ।
अन्यैश्च सुसितैर्वस्त्रै स्थगिताननासिकै ॥२४१॥
तत्तत्प्रयोगकुशलैरनेकै परिचारकै ।
प्राप्तेऽपराह्णसमये कृत्वा द्वारार्चन विशेत् ॥२४२॥
यागार्थं मण्टप तत्र देव कुम्भादिके यजेत् ।
तत्रैव वा यजेद्बिम्ब वह्नौ सन्तर्प्य पूर्ववत् ॥२४३॥
ततोऽनुज्ञा समादाय क्रमेण मुनिपुङ्गवा ।
अनुक्तपविधाने तु प्रासाद सम्प्रविश्य च ॥२४४॥
मूलबिम्ब तु सम्पूज्य अर्घ्यालमनमाल्यके ।
धूपेन च ततोनुज्ञा समादायारभेत्तत ॥२४५॥
द्वारार्चाभ्यर्चनपूर्वं तु विशेत्स्नपनमण्टपम् ।
प्रोक्षयेत्पञ्चगव्येन मूलमन्त्रेण सर्वत ॥२४६॥
नानाविधानि पुष्पाणि विकिरेत्सर्वदिक्षु च ।
सिद्धार्थकाश्च ब्रीहीनि ततो मण्टपमध्यत ॥२४७॥
सार्धद्वाविंशतिकर भजेत् क्षेत्र तु पञ्चधा ।
एकैक नवधा भूयश्चत्वारिंशच्च पञ्च च ॥२४८॥
पदत्रयश्चापि कोष्ठाना पञ्चविंशोत्तर भवेत् ।
द्विसहस्र ततो मध्ये कलशस्थापनार्थत ॥२४९॥
एकाशीति च कोष्ठानि सम्पाद्य परिमार्जयेत् ।
परितो वीथय पङ्क्तिद्वितय तद्बहि पुन ॥२५०॥

पूर्वादिदिक्चतुष्के तु एकाशीतिपदानि च ।
कल्पयेत्पार्श्वतो वीथ्यै पुन पङ्क्तिद्वय भवेत् ॥२५१॥
चतुर्षु कोणेष्वेकोनपञ्चाशत्कोष्ठकानि च ।
कल्पयेत्तत्र चाप्येकाशीतिमध्यानुसारत ॥२५२॥
मध्यतो नवक स्थाप्य पङ्क्त्येका लोपयेत्परि ।
बहि पङ्क्तिद्वये दिक्षु षट्क षट्क विदिक्षु च ॥२५३॥
चतुश्चतुश्च सस्थाप्य शेषाणि परिमार्जयेत् ।
तद्बहि परितो वीथ्यै लुम्पेत्पङ्क्तिद्वय तत ॥२५४॥
कोणानि कल्पयेद्यत्नात्पदषोडशकानि तु ।
तत्पार्श्वे लोपयेत्पङ्क्तिमेकैका दिक्चतुष्टये ॥२५५॥
पङ्क्तिद्वये तु द्वाराणामन्तर्भागास्त्रयो बहि ।
पञ्च पार्श्वे तु शोभार्थं चतुर तद्बहिर्द्वयम ॥२५६॥
तदन्त पङ्क्तित्रितये त्रयस्त्रिंशत्पदानि तु ।
वीथ्या सहैकता नीत्वा द्व्येकैक स्थापयेद्बहि ॥२५७॥
द्वाराणामपि कोणाना मध्ये षोडशसङ्ख्यया ।
पञ्चविंशतिकोष्ठानि स्थापयित्वा तु पार्श्वत ॥२५८॥
अन्योन्य लोपयेत्पङ्क्तिमेकैका तु मुनीश्वरा ! ।
एवमापाद्य कुम्भाना पदानि स्थापनार्थत ॥२५९॥
तत सुगन्धरजसा सितेन सुसमा द्विजा ! ।
अङ्गुष्ठविस्तरोत्सेधा ऋज्वी रेखास्तु कल्पयेत् ॥२६०॥
विकीर्य कोष्ठेषु रज पश्चाद्द्वाराणि पूरयेत् ।
तेनैव शोभा परितेन किञ्चिन्नै कुसुमान्वितै ॥२६१॥
रत्नाद्यैर्मुनिश्रेष्ठा ! वीथी सर्वत्र भूषयेत् ।
तत सङ्गृह्य कलशान् सर्वलक्षणलक्षितान् ॥२६२॥
अष्टोत्तरशत हुत्वा मूलमन्त्रेण वै घृतम् ।

गायत्र्या वा ततो द्वारचतुष्के पूर्वदिक्क्रमात ॥२६३॥
द्वौ द्वौ सस्थाप्य कलशौ कुमुदादीन्प्रपूज्य च ।
पुष्पैरभ्यर्च्य कोष्ठानि विचित्रैर्मन्त्रमन्त्रितै ॥२६४॥
सर्वधान्यै प्रयत्नेन कल्पयित्वा तु वीथिका ।
तासु द्वौ द्वौ कुशाग्रौ च निक्षिपेन्मूलमन्त्रत ॥२६५॥
सूत्रेण वेष्टितान् कृत्वा कलशान् पूर्ववद्द्विजा ! ।
गायत्र्या क्षाळयित्वा तान् कोष्ठेषु न्यस्य तानत ॥२६६॥
अधोमुखान् न्यसेत्पृष्ठे परमेष्ठ्यात्मना कुशान् ।
तत सम्प्रोक्षयेत्पुमा पञ्चगव्येन तान् कुशै. ॥२६७॥
विश्वेन विकिरेत्सिकान् अक्षताश्च तदूर्ध्वत ।
उत्तानयेन्निवृत्त्या तान् क्रमाद्यत्नेन वै तत ॥२६८॥
गाळितेन तु तोयेन सुगन्धैश्चन्दनादिकै ।
वासितेन तु तान् विप्रा ! सर्वणापूरयेत्क्रमात् ॥२६९॥
मध्यैकाशीतिमध्यस्थनवके मध्यकुम्भके ।
सूर्यकान्त पद्मराग वैडूर्य चन्द्रकान्तकम् ॥२७०॥
अयस्कान्त चेन्द्रनील प्रवाळ गारुड तथा ।
पुष्यराग स्फाटिक च ब्रह्मराग च मेचकम् ॥२७१॥
वज्र च रजत चैव मौक्तिक ताम्रमेव च ।
सर्वाण्येतानि निक्षिप्य तद्वहिर्नवकाष्टके ॥२७२॥
पूर्वादीशानपर्यन्त मध्यकुम्भेषु वै क्रमात् ।
द्रव्याणि षोडशैतानि द्वन्द्वयोगेन विन्यसेत् ॥२७३॥
द्विसप्ततिकमध्येषु स्वर्णमध्येष्वपि मौक्तिकम् ।
पूर्वेशानीनिमध्यस्थनवके मध्यगोचरे ॥२७४॥
षड्विंशतिसमाख्याणा क्षीरिकावल्ग्मध्ययो ।
मातुलुङ्गकेसरयोमध्यनर्थोरपि ॥२७५॥

फलानि निक्षिपेत्पश्चात्तद्बहिर्नवकाष्टके ।
प्रागादीशानपर्यन्तं मातुलुङ्गं च दाडिमम् ॥२७६॥
नारङ्गं चापि जम्बीरं तक्कोलं बदरी तथा ।
क्षीरिकामलके चैव द्राक्षाखर्जूरके तथा ॥२७७॥
आम्रं च सहकारं च पनसस्य फलं तथा ।
क्षुद्रपूर्वं च पनसं कदलीमोचके तथा ॥२७८॥
क्रमाद्द्वन्द्वप्रयोगेण मध्यकुम्भेषु विन्यसेत् ।
नवकाष्टककुम्भेषु बदराणि विनिक्षिपेत् ॥२७९॥
उशीरं कुङ्कुमं चैव मांसीं मलयजं तथा ।
मुरं च हरिबेरं च कुष्ठं चागरुमेव च ॥२८०॥
एकाशीतिपदे याम्ये विश्वान्येतानि निक्षिपेत् ।
मध्ये मध्यस्थकलशे पूर्वादिक्रमयोगतः ॥२८१॥
शेषेषु मध्यकुम्भेषु न्यसेदेकैकजं पलम् ।
विनिक्षिपेन्मलयजमेतेषामष्टकेषु च ॥२८२॥
समुद्रवापीकूपानां तटाकानां ह्रदस्य च ।
वृष्टेर्नदीहिमानां च तोयानि प्रतिपादयेत् ॥२८३॥
वारुणे मध्यमे कुम्भ एकैकं शेषमध्यमे ।
शेषेषु चाष्टवर्गेषु शुद्धोदानि विनिक्षिपेत् ॥२८४॥
यवगोधूमकव्रीहिशालिमुद्गप्रियङ्गुकान् ।
माषनीवारकौ चापि नवमे मध्यमे घटे ॥२८५॥
शेषेषु धान्यमेकैकं मध्यकुम्भेषु च क्रमात् ।
अष्टकेषु च शुद्धानि तोयानि प्रतिपादयेत् ॥२८६॥
आग्नेये कोनपद्मागनवके पूरयेद्घृतम् ।
पट्केष्विन्द्रादियोगेन गोमूत्रं गोमयं तथा ॥२८७॥
क्षीरं दधि विनिक्षिप्य कोणेष्वम्बोदकं न्यसेत् ।
नैर्ऋते मध्यनवके तैलं विन्यस्य तद्बहिः ॥२८८॥

शेषेषु चत्वारिंशत्सु कलशेषु गुडोदकम् ।
वायव्यनवके मध्ये न्यसेत्तैलं तु सार्षपम् ॥२८९॥
कलशेषु च शेषेषु विन्यसेदैक्षवं रसम् ।
ईशानैकोनपञ्चाशन्नवके मधु विन्यसेत् ॥२९०॥
शेषेषु नालिकेराम्भस्तत्क्षीरं चापि विन्यसेत् ।
ऐन्द्रादिपञ्चविंशत्सु प्रथमे मध्यमे घटे ॥२९१॥
क्षेत्रतीर्थाब्धिशैलेभ्यः सूकराख्यबिलाद्गजात् ।
वल्मीकाद्वृषशृङ्गाच्च मृदमादाय पूरयेत् ॥२९२॥
शेषेष्वष्टसु चैकैकं षोडशे गन्धवारि च ।
सहदेवी वचा चैव शतमूली शतावरी ॥२९३॥
कुमारी च गुळूची च सिंही व्याघ्री तथैव च ।
द्वितीये मध्यमे कुम्भे विन्यसेद्बहिरष्टके ॥२९४॥
एकैकं प्राक्क्रमेणैव षोडशे पूर्ववद्भवेत् ।
न्यग्रोधोदुम्बराश्वत्थजम्बुबिल्वपलाशजैः ॥२९५॥
शिरीषमधुकोत्थैश्च त्वग्रसैर्मध्यमं घटम् ।
तृतीये पूरयित्वाष्टौ न्यस्तैः षोडश पूर्ववत् ॥२९६॥
पलाशबिल्वबकुलकदम्बाम्रशिरीषजान् ।
न्यग्रोधाश्वत्थजान् क्षिप्त्वा चतुर्थे पल्लवान् घटे ॥२९७॥
मध्यमेऽष्टासु च व्यस्तान् प्राग्वत् षोडश विन्यसेत् ।
मल्लिकाजातिबकुलनन्द्यावर्तप्रियङ्गुजैः ॥२९८॥
पद्मचम्पककुन्दैश्च पुष्पैरापूर्य मध्यमम् ।
कलशं पञ्चमे व्यस्तैरष्टौ शेषाश्च पूर्ववत् ॥२९९॥
सिद्धार्थं सर्षपं माषं रोचनां गोसमुद्भवाम् ।
इन्द्रयवं वेणुयवं शमीश्यामाकधीजकं ॥३००॥
षष्ठे मध्यमिते कुम्भे न्यसेदष्टासु च क्रमात् ।

व्यस्तानि तानि द्रव्याणि प्राग्वच्छेषांश्च षोडश ॥३०१॥
तिलं वनतिलं चैव जीरकं कृष्णजीरकम् ।
अतसीं शतपुष्पां च कुठारच्छिन्नमेव च ॥३०२॥
ऋषिबीजं च विन्यस्य मध्यकुम्भे तु सप्तमे ।
एकैकं बहिरष्टासु प्राग्वत् षोडशसु द्विजाः ! ॥३०३॥
षष्टीश्यामाकशालीनां नीवारस्य च तण्डुलम् ।
दूर्वाकुशेन्द्रवल्लीनामङ्कुरान् पिप्पलस्य च ॥३०४॥
न्यसेन्मध्येऽष्टमेऽष्टासु व्यस्तानन्येषु पूर्ववत् ।
कुशोदीच्येक्षुकाशानामुशीरशरपुङ्खयोः ॥३०५॥
अगर्वपामार्गयोश्च मूलानि नवमे न्यसेत् ।
कुम्भे मध्यस्थितेऽष्टासु व्यस्तानन्येषु पूर्ववत् ॥३०६॥
तुलस्याः कृष्णतुलस्या ग्रन्थिवेणोरपि च्छदाः ।
भृङ्गराजस्य बिल्वस्य शम्याः केनाकिजातयोः ॥३०७॥
दशमे मध्यमेऽष्टासु व्यस्तान् शेषेषु पूर्ववत् ।
मुस्तानागरमुस्ताख्यकन्दे कुवलयस्य च ॥३०८॥
कुमुदोत्पलयोश्चापि शीतळीयककन्दकम् ।
कल्हारस्य कशेरोश्च कन्दे एकादशे क्षिपेत् ॥३०९॥
मध्यकुम्भेषु चैतानि क्रमादन्येषु पूर्ववत् ।
मुद्गमाषकनिष्पावशिम्बिव्रीहियवाङ्कुरान् ॥३१०॥
आढकानां कुलुत्थानामङ्कुरान् द्वादशे क्षिपेत् ।
मध्यकुम्भेऽष्टके व्यस्तान् प्राग्वत् षोडशसु द्विजाः ! ॥३११॥
शङ्खपुष्पी सदाभद्रा विष्णुक्रान्तैकपत्रयोः ।
बलायाः स्मरमञ्जर्याः सहायाश्च तथैव च ॥३१२॥
अङ्कुरान् सहदेव्याश्च मध्ये कुम्भे त्रयोदशे ।
विन्यस्याऽष्टासु च व्यस्तानन्येषु प्राग्वदाचरेत् ॥३१३॥

श्वेतार्कं ब्रह्मदण्डीं च तथा ब्रह्मसुवर्चलाम् ।
सरक्ता च विरक्ता च प्रश्निपर्णी स्थिरा तथा ॥३१४॥
एरण्ड चापि विन्यस्य मध्ये कुम्भे चतुर्दशे ।
अष्टासु तानि व्यस्तानि प्राग्वदन्येषु विन्यसेत् ॥३१५॥
सुरभि पद्मकिञ्जल्क नागकेसरमेव च ।
पत्रमेलात्वच चैव लता कस्तूरिका तथा ॥३१६॥
जातीफल च वै पञ्चदशमे मध्यसंस्थिते ।
कुम्भे न्यस्याष्टके व्यस्त शेष पूर्ववदाचरेत् ॥३१७॥
सुवर्ण रजत ताम्रमायस त्रपु सीसकम् ।
आर कास्य च विन्यस्य षोडशे मध्यसस्थिते ॥३१८॥
कलशेऽष्टासु च व्यस्त प्राग्वत् षोडशसु द्विजा ! ।
एव द्रव्याणि विन्यस्य क्रमेण सुसमाहित ॥३१९॥
तत आग्नेयकोणे तु देवस्याराधनार्थत ।
अर्घ्यादिद्रव्यनिचय मधुपर्कं च विन्यसेत् ॥३२०॥
ततो नैर्ऋतकोणे तु हरिद्राशालिपिष्टके ।
दूर्वामश्वत्थपत्र च सिद्धार्थं च तथाक्षतम् ॥३२१॥
माल्यानि पूर्णकुम्भ च न्यसेन्नीराजनार्थत ।
तथा चोद्वर्तनार्थं च चूर्णं गोधूमशालिजम् ॥३२२॥
रजनीचूर्णसम्मिश्रमीपत्पयस्कभावितम् ।
चमसीं च खलीं चैव तथैव मुनिपुङ्गवा ! ॥३२३॥
चन्दन सुरलेपार्थं घृष्टकर्पूरभावितम् ।
चम्पकैर्मुरमामीभ्या हरिबेरै समन्वितम् ॥३२४॥
पिष्टामलक चैव शिर स्नानार्थक न्यसेत् ।

तत ईशानकोणे तु शलाकान्यायसानि तु ॥३२६॥
आयसा गुलिकाश्चैव तथा सन्दशन द्विजा ! ।
अन्यद्यदुपयोगि स्यात् स्थापयेत्तद्यथारुचि ॥३२७॥
एतदुक्त समस्त वा यथाभिमतकोणगम् ।
मध्यैकाशीतिमध्यस्थनवके मध्यसंस्थिते ॥३२८॥
कुम्भे यजेद्वासुदेव तत प्रागादियोगत ।
दिक्स्थाना नवकाना तु मध्येषु प्रभवक्रमात् ॥३२९॥
चतुरो वासुदेवादीन् विदिक्स्थाना तु मध्यत ।
ईशादिवह्निपर्यन्त तानेराप्ययोगत ॥३३०॥
मध्यशुद्धोदकुम्भेषु सत्य सर्वेषु पूजयेत् ।
बहिर्दिङ्नवकाना तु शुद्धोदेषु च दिक्क्रमात् ॥३३१॥
सुपर्ण गरुड चैव तार्क्ष्य च विहगेश्वरम् ।
वह्न्यादीशानपर्यन्त नवकाना चतुष्टये ॥३३२॥
शुद्धोदेषु च तानेव क्रमेण परिपूजयेत् ।
एकाशीतिषु दिक्स्थेषु पूर्वादिक्रमयोगत ॥३३३॥
मध्यकुम्भेषु षट्त्रिंशत्सख्यातेषु यथाक्रमम् ।
पद्मनाभादयो विप्रा ! देवा वेदविदन्तिमा ॥३३४॥
पूज्या गवक्षुकत्या तु मध्यादीशानपश्चिमम् ।
मध्यशुद्धोदकुम्भेषु यजेत्कल्किस्वरूपिणम् ॥३३५॥
बहिर्नवकशुद्धोदकलशेषु यजेद्विभुम् ।
पाताळशयनाख्य तु पश्चादग्निदिगादित ॥३३६॥
चतुर्षु कोणेष्वेकोनपञ्चाशन्नवकेषु च ।
मध्येषु केशवादीना क्रमात्त्रिकचतुष्टये ॥३३७॥
आद्यान् दिक्स्थेषु कुम्भेषु द्वितीयास्तु चतुर्ष्वपि ।
विदिक्स्थेषु तृतीयाश्च षट्कषोडशके क्रमात् ॥३३८॥

चक्रादिवज्रपर्यन्तमस्त्रपोडशक यजेत् ।
कोणस्थेषु चतुष्केषु न्यसेच्छक्तिं तत परम् ॥३३९॥
ऐन्द्रीदक्षिणत पञ्चविंशतौ प्रथमे यजेत् ।
सर्वसम्पत्प्रदा लक्ष्मीं मध्यकुम्भेषु तद्बहि ॥३४०॥
अष्टासु पुष्टिं तद्बाह्ये कान्तिं पोडशके द्विजा ।
एवमाद्येषु चान्येषु पञ्चविंशतिषु क्रमात् ॥३४१॥
प्रभादीना च शक्तीना त्रितय त्रितय यजेत ।
तत्रापि पञ्चदशमे बहि पोडशके न्यसेत् ३४२॥
किरीटमन्तिमे पञ्चविंशतौ त्रितय यजेत् ।
श्रीवत्स कौस्तुभ चापि वनमाला तथैव च ॥३४३॥
वासुदेवादिमन्त्रैस्तु वनमालान्तिमै क्रमात ।
अष्टाविंशतिसख्य तु हुत्वाज्य वै यथारुचि ॥३४४॥
पूर्णां दत्वा तत कुम्भान् सम्पातविधिना स्पृशन् ।
पिधाय चक्रिकाभिस्तु सर्वानुक्तक्रमेण तु ॥३४५॥
वासोभि छादयेत्पश्चान्नूतनैस्तु पृथक् पृथक् ।
भूय पूर्णाहुतिं दत्वा दिक्षु भूतबलिं हरेत् ॥३४६॥
मृदादि सर्वरत्नान्तमुद्धारक्रम इष्यते ।
पूर्वं विष्णोर्नुकमिति मन्त्रेण च मुनीश्वरा ।॥३४७॥
पूर्वादीशानपर्यन्त मृत्कुम्भैरभिषिच्य च ।
सर्वमूलकलशेनैव मध्यस्थेन ततो बहि ॥३४८॥
कुम्भै पोडशभिर्विप्रा । प्रागादिक्रमयोगत ।
एवमेव क्रम सर्वपञ्चविंशतिषु द्विजा ।॥३४९॥
प्रतद्विष्णुरित्यनेन मूलाद्विराशिपेन्नयेन् ।
प्रनष्ट विष्णुरास इति कषायैरयिनाम्बुभि ॥३५०॥
यस्य त्रिपूर्णत्यनेन कुम्भै पद्मरान्वितै ।

तदस्येति च मन्त्रेण पुष्पैरापूरितैर्घटैः ॥३५१॥
तावामिति च मन्त्रेण सिद्धार्थादिसमन्वितैः ।
प्रवः पान्तमित्यनेन तिलाद्यन्वितवारिभिः ॥३५२॥
परोमात्रेतिमन्त्रेण पथ्यादिद्रव्यवारिभिः ।
नते विष्णोरित्यनेन कुशमूलान्विताम्बुभिः ॥३५३॥
इरावतीति मन्त्रेण तुलस्यादिजलैस्ततः ।
अतो देवेति मन्त्रेण मुस्ताकन्दादिसंयुतैः ॥३५४॥
इदं विष्णुरित्येतेन मुद्गाद्यङ्कुरपूरितैः ।
त्रीणि पदेति मन्त्रेण शङ्खपुष्पादिवारिभिः ॥३५५॥
विष्णोः कर्माणीत्यनेन श्वेतार्काद्यम्बुभिस्ततः ।
तद्विष्णोरिति मन्त्रेण सुरभ्यादिजलैस्ततः ॥३५६॥
तद्विप्रास इत्यनेन स्नापयेल्लोहवारिभिः ।
प्रागेकाशीतिकलशैः स्नापयेत्क्रमयोगतः ॥३५७॥
पूर्वादिमध्यपर्यन्तनवकस्नपने क्रमः ।
ऐन्द्रेण नवकेनादौ पुरूयज्ञाय इत्यृचा ॥३५८॥
इन्द्राविष्णु दंहितेति वह्निदिक्संस्थितेन च ।
यं मन्येपेति याम्येन नवकेनाभिषेचयेत् ॥३५९॥
वषट्ते विष्णुवासेति नैर्ऋतेन ततः परम् ।
तिस्रोवाच इत्यनेन वारुणेन मुनीश्वराः ! ॥३६०॥
योवर्द्धओषधिमन्त्रेण वायव्यनवकेन तु ।
स्तरीरतुर्क भवतीति सौम्येन नवकेन तु ॥३६१॥
ईशानदिक्स्थितेनैव यस्मिन्विश्वेत्यृचा ।
इदंवचः पर्जन्यायेति स्नापयेन्मध्यमेन तु ॥३६२॥
याम्यैकाशीतिकलशैस्ततः संस्नापयेद्विभुम् ।
सहस्रशीर्षं देवमिति मन्त्रपुरस्सरैः ॥३६३॥

सन्तत सिराभिरिति पर्यन्तैश्च क्रमेण तु ।
अष्टमन्त्रैर्मुनिश्रेष्ठा ! प्रागादिनवकाष्टकै ॥३६४॥
एतैरेव समस्तैस्तु स्नापयेन्मध्यमेन तु ।
एकाशीत्या तु वारुण्या कलशैरभिषेचयेत् ॥३६५॥
समुद्रज्येष्ठा इत्यनेन पूर्वादिनवकेन तु ।
वापीकूपतटाकोत्थै ह्रदवृष्टिसमुद्भवै ॥३६६॥
या आपो दिव्या इति मन्त्रेणैवाभिषेचयेत् ।
नद्यम्भसा स्नापयित्वा यासा राजेत्यृचा तत ॥३६७॥
यासु राजेतिमन्त्रेण हिमतोयेन वै तत ।
समुद्रज्येष्ठपूर्वैस्तु चतुर्भिर्मध्यमेन तु ॥३६८॥
ततोऽभिषिञ्चेत्सौम्यैकाशीतिकुम्भै क्रमेण तु ।
यदिमा इति मन्त्रेण शाक्रेण नवकेन तु ॥३६९॥
यस्यौषधीरित्येतेन वह्निदिक्सस्थितेन तु ।
साकयक्ष्मेति याम्येन अन्यावो इति नैर्ऋते ॥३७०॥
या फलिनीरिति मन्त्रेण वारुण्या नवकेन तु ।
मुञ्चन्तु मा शपथ्यादिति वायुदिङ्नवकेन तु॥३७१॥
अवपतन्तीरित्यनेन सोमदिक्सस्थितेन च ।
या ओषधी सोमराज्ञीरिति मन्त्रेणैशानकेन तु ॥३७२॥
या ओषधी सोमराज्ञीविष्ठिता इति मध्यत ।
ततोऽन्यैकोनपञ्चाशत्कलशैरभिषेचयेत् ॥३७३॥
गायत्र्या चैन्द्रषट्केण गन्धद्वारेति याम्यत ।
पयस्वतीरोषधय इति षट्केण पश्चिमे ॥३७४॥
दधिक्राव्ण्ण, स्वस्त्यूप, सौम्यषट्केण, नतस्य, ।,
गव्यवसवन्तिमग्निमन्मूक्तेनैव घृतेन च ॥३७५॥
नैर्ऋतैशानपञ्चाशत्कलशैरभिषेचयेन ।

तेजोऽसीत्यादियजुषा तैलेन स्नापयेत्ततः ॥३७६॥
द्वादशाक्षरमन्त्रेण प्राक्क्रमेण गुडोदकैः ।
तेजोऽसीत्यादिमन्त्रेण वायौ तैलैस्तु सार्षपैः ॥३७७॥
द्वादशार्णाख्यमन्त्रेण सर्वैरिक्षुरसैस्ततः ।
मधुवातादिभिर्मन्त्रैः कलशैर्मधुपूरितैः ॥३७८॥
पूर्वोदितेन मन्त्रेण नाळिकेरजलैः क्रमात् ।
तेनैवोष्णजलैः पश्चाद्वह्न्यादीशानपश्चिमम् ॥३७९॥
सुतप्तायोगुळक्षेपात्सञ्जातोष्णस्तदैव तु ।
उद्वर्तयेत्ततो देवं द्रुपदादिति मन्त्रतः ॥३८०॥
शिरस्यामलक-[द्वा]द्यान्मानस्तोकेति मन्त्रतः ।
प्रक्षाल्य शुद्धतोयैश्च बहुभिश्च सुगन्धिभिः ॥३८१॥
मध्ये काशीतिकलशैस्ततः सस्नापयेत्क्रमात् ।
सहस्रशीर्षेत्यनया ऋचैन्द्रीनवकैर्घटैः ॥ ३८२॥
अष्टाभिरष्टदिक्संस्थैर्मध्यमेन द्वितीयया ।
द्वाभ्यां द्वाभ्यां तथा ऋग्भ्यां क्रमान्नवकसप्तके ॥३८३॥
पौरुषेण तु सूक्तेन समस्तेन शनैः शनैः ।
स्नापयेद्देवदेवेशं मध्यस्थनवकेन तु ॥३८४॥
यद्वा सर्वस्य वशिनमित्याद्यैर्मनुभिः क्रमात् ।
महोपनिषदन्तैः सैर्दिक्स्थितैः कलशाष्टकैः ॥३८५॥
एक एव नारायण इति मध्यगतेन तु ।
यद्वाष्टाक्षरमन्त्रेण सर्वकुम्भैः क्रमेण तु ॥३८६॥
मृदादि सर्वरत्नान्तं स्नापयेद्द्विजसत्तमाः ।
उद्धार एव कथितः कर्मक्रम इहोच्यते ॥३८७॥
प्रभाते तु कृतस्नानः कृतकौतुकमङ्गलः ।
[इ]तरैरिन्द्रमुखैश्चान्यैर्दानैश्च समन्वितः ॥३८८॥

प्रासादं सम्प्रविश्याथ नित्यं निर्वर्त्य पूर्ववत् ।
यागमण्टपमासाद्य रजोभिः पूर्य मण्डलम् ॥३८९॥
कुम्भमण्डलयोरिष्ट्वा प्रासादं सम्प्रविश्य च ।
ततस्त्वर्घ्यादिभिर्भोगैर्मूलबिम्बं तु पूजयेत् ॥३९०॥
तस्मात् स्नपनबिम्बे तु समावाह्य तथैव च ।
इष्ट्वालङ्कृत्य विविधैर्वस्त्रैर्माल्यैश्च भूषणैः ॥३९१॥
शिबिकादौ समारोप्य सर्वालङ्कारसंयुतम् ।
पूर्वोक्तविधिना विप्रा ! विनयेत्स्नानमण्टपम् ॥३९२॥
स्नानपीठे समारोप्य पूर्वोदितविधानतः ।
यथाक्रमं समभ्यर्च्य यावदात्मनिवेदनम् ॥३९३॥
ततस्तु देवदेवस्य कुर्यात्कौतुकबन्धनम् ।
कुम्भानां विहितं कर्म न कृतं यदि वै पुरा ॥३९४॥
क्रिया त्वनुपपत्त्या तु तदा तत्सर्वमाचरेत् ।
स्नानासनोदितैर्भोगैर्मुखलेपान्तिमैः क्रमात् ॥३९५॥
पूजयित्वा ततः कुम्भैः स्नापयेदुक्तवर्त्मना ।
सर्वेषामपि कुम्भानां स्नानशेषं तु पूरयेत् ॥३९६॥
घटान्तरं तु द्रव्याणामन्तरान्तरयोगतः ।
शुद्धाम्भसा स्नापयित्वा वस्त्रेणार्घ्यादिभिर्यजेत् ॥३९७॥
गन्धं सम्प्राप्य विधिवद्रजनीचूर्णपूरितैः ।
अलङ्कृते धान्यपीठे पुरस्तादधिवासितैः ॥३९८॥
पञ्चविंशतिभिः कुम्भैर्नवभिः पञ्चभिस्तु वा ।
गन्धेन वापि तच्चूर्णं श्रीसूक्तेन द्विजोत्तमाः ! ॥३९९॥
स्नाप्यामूर्तिं देवस्य भूयश्चार्घ्यादिभिर्यजेत् ।
सर्वाङ्गं परिमृज्याथ भक्तानां मूर्तिं दापयेत् ॥४००॥
तिलकमेतस्य कृत्वा तु तन्मन्त्रेण ततो द्विजाः ! ।

सहस्रधारास्नपनमाचरेच्छुद्धवारिभिः ॥४०१॥
सचन्दनादिकं दत्वा ततः पीठन्ततः प्रभुम् ।
अलङ्कारासनं नीत्वा आसनादिक्रमाचरेत् ॥४०२॥
भोगैः सांस्पर्शिकैः प्राग्वद्विविधैरौपचारिकैः ।
हृदयङ्गमसंज्ञैश्च विचित्रैश्च मनोहरैः ॥४०३॥
एवं द्विजप्रदानान्तं होमान्तं वा प्रपूज्य च ।
शिबिकादौ समारोप्य पूर्ववत्सम्प्रवेशयेत् ॥४०४॥
प्रदक्षिणक्रमेणैव प्रासादाभ्यन्तरं ततः ।
तत्रावरोप्य तद्बिम्बं स्वस्थाने सन्निवेश्य च ॥४०५॥
इष्ट्वा चार्घ्यादिभिर्भोगैर्मूलबिम्बं तथैव च ।
समर्प्य च कृतं कर्म कुर्याच्चैव विसर्जनम् ॥४०६॥
मृण्मयादौ मूलबिम्बे विधिरेवं प्रकीर्तितः ।
शिलामयादिके मूले स्नपनार्हे मुनीश्वराः ! ॥४०७॥
तमेव स्नाप्य पूर्वोक्तविधिना कौतुकादिमम् ।
हविरन्तैः समभ्यर्च्य होमान्तं सर्वमाचरेत ॥४०८॥
ततस्तु चोत्सवं बिम्बं विचित्रैर्वसनैस्तथा ।
अनेकैर्भूषणै रम्यैर्माल्यैश्च सुसुगन्धिभिः ॥४०९॥
अलंकृत्य समारोप्य शिबिकां सम्प्रवेशयेत् ।
आस्थानमण्टपं सम्यगुत्सवोदितवर्त्मना ॥४१०॥
तत्रावरोप्य यानाच्च सौवर्णे वितते शुभे ।
भद्रासनेथ वा विप्राः ! विचित्रास्तरणान्विते ॥४११॥
यथाक्रमोदितेनैव वर्त्मना सम्प्रपूजयेत् ।
सांस्पर्शिकादिकैर्भोगैर्विविधैस्तु विशेषतः ॥४१२॥
महाहविर्निवेद्याथ कृत्वा सर्वं क्रमेण तु ।
द्विजप्रदानपर्यन्तममी सन्तर्पयेत्क्रमात् ॥४१३॥

समर्पणादिक सर्व कृत्वा देव जगत्पतिम् ।
समारोप्य च यानादौ सर्वमङ्गळसयुतम् ॥४१४॥
प्रवेशयेत्तु प्रासाद यानादेरवरोप्य च ।
स्वस्थाने सन्निवेश्याथ अर्घ्यगन्धादिभिर्यजेत् ॥४१५॥

मूलबिम्ब तथाभ्यर्च्य कृत कर्म समर्पयेत् ।
स्नानशेषेण तोयेन कुम्भस्थेन क्रमेण तु ॥४१६॥
द्वारस्थान् सकलान् देवान् तथा चावरणस्थितान् ।
बलिदानक्रमेणैव सम्प्रोक्ष्य परिपूज्य च ॥४१७॥
बलिं च दत्वा शेषेण गणेशमभिषिच्य च ।
पूजयेदर्घ्यगन्धाद्यैरथ वा ह्यनुकल्पके ॥४१८॥

पूजावसाने देवस्य स्नपनव्यक्तिगस्य च ।
प्रोक्षण देवताना च गणेशस्याभिषेचनम् ॥४१९॥
आचरेत्क्रमयोगेन यजमानस्ततो द्विजा ! ।
आचार्यान् साधकांश्चैव तोषयेद्विविधैर्धनै ॥४२०॥

अन्यांश्च वैष्णवान् सर्वान् यथाशक्ति च तोषयेत् ।
अनिवारितमन्नाद्य सार्वजन्य तु कारयेत् ॥४२१॥
एवमेव हि सर्वेषु स्नपनेषु नियामक ।
प्रोक्षण परिवाराणा बलिदान च वर्जयेत् ॥४२२॥
महाहविर्विधान च विभवे सति कल्पयेत् ।
प्रधानादिक्रमेणैव स्नपनाना तु पञ्चकम् ॥४२३॥
कुर्यान्नित्ये विधौ विप्रा ! तथा नैमित्तिकेषु च ।
ततस्तु सूक्ष्मसूक्ष्मादिस्थूलस्थूलान्तपञ्चकम् ॥४२४॥
चातुरात्म्यादिदेवाना कार्यं स्नापनकर्मणि ।
अयने विषुवे चैव ग्रहणे च द्रुमूर्ययो ॥४२५॥
स्नपन मुख्यकल्पे तु ह्याचरेदुत्तमोत्तमम् ।

अनुकल्पे तु तन्मध्यं तन्न्यूनादिचतुष्टयम् ॥४२६॥
अयनद्वयमध्यस्थसङ्क्रान्तिद्विचतुष्टये ।
आवृत्तिक्रमयोगेन कल्पयेन्मुनिपुङ्गवाः ! ॥४२७॥
उत्सवारम्भदिवसे तदन्ते च समारभेत् ।
अथमोत्तमसंज्ञं तु तन्मध्यं चानुकल्पके ॥४२८॥
महाहविर्विधाने तु तन्न्यूनं तु समाचरेत् ।
प्रायश्चित्तेषु कार्येषु सर्वाण्येतानि कल्पयेत् ॥४२९॥
तेषां स्नपनभेदं तु वक्ष्याम्युपरि विस्तृतम् ।
स्नपनानां विधानं तु दिव्यशास्त्रोक्तवर्त्मना ॥४३०॥
यथावत्कथितं सम्यक् किमन्यच्छ्रोतुमिच्छथ ।

इति श्रीपाञ्चरात्रे ईश्वरसंहितायां
स्नपनविधिर्नाम
पञ्चदशोऽध्यायः ।

अथ षोडशोऽध्यायः ।

मुनयः ।

भगवन्मुनिशार्दूल ! सर्वज्ञ ! वदतां वर ! ।
प्रतिष्ठा मन्त्रबिम्बस्य कथं कार्या ! नरोत्तमैः ॥१॥
प्रासादस्य च बिम्बस्य पीठादेर्लक्षणं कथम् ! ।
तत्सर्वं विस्तरेणैव वदस्व कृपयाधुना ॥२॥

नारदः ।

शृणुध्वं मुनयः ! सर्वं सावधानेन चेतसा ।
मन्त्रबिम्बप्रतिष्ठाया विधानं लक्षणादिकम् ॥३॥

तत्सर्वं देवदेवेन सात्वतादिषु कीर्तितम् ।
तेषां सारं समुद्धृत्य प्रवक्ष्यामि समासतः ॥४॥
ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वा भगवन्मयः ।
श्रद्धाभक्तिसमायुक्तः सम्पन्नः शान्तमानसः ॥५॥
आस्तिकः सत्यसन्धश्च सदाचारसमन्वितः ।
आचार्यं वरयेत्पूर्वं भगवच्छास्त्रकोविदम् ॥६॥
तत्त्वज्ञं भगवद्भक्तं भगवद्वंशसम्भवम् ।
आचार्यो यजमानश्च सह सम्मन्त्र्य शिल्पिभिः ॥७॥
पुण्ये देशेऽनुकूले च मनोज्ञे साधुसेविते ।
मृद्वाग्निफलपुष्पाढ्ये कुशेन्धनसमन्विते ॥८॥
गोसस्यशालिसुभगे क्षुद्रप्राणिविवर्जिते ।
पर्वताग्रे च तन्मध्ये सानुदेशे द्विजोचिते ॥९॥
मृगते तु वने रम्ये पादपौषधिसङ्कुले ।
भद्रे चोपवने वाथ प्रशस्ते कमलान्विते ॥१०॥
कूलेषु निम्नगानां च तासामपि च सङ्गमे ।
समीपे पुण्यतीर्थानां सुस्थिरे सारसङ्कुले ॥११॥
दुष्टप्राणिविनिर्मुक्ते चोरातङ्कभयोज्झिते ।
सर्वदोषविनिर्मुक्ते देशे दिव्ये मनोहरे ॥१२॥
भुवः परीक्ष्य तत्रादौ शास्त्रदृष्टेन वर्त्मना ।
ततः परं द्विजश्रेष्ठाः ! क्ष्मापरिग्रहमाचरेत् ॥१३॥
क्ष्मापरिग्रहपूर्वाणामारम्भे सर्वकर्मणाम् ।
द्वादशाक्षरपूर्वैस्तु मन्त्रैः सर्वेश्वरः पुरा ॥१४॥
आराध्यो भगवान्भक्त्या वेद्यां वा कलशे स्थले ।
गन्धपुष्पाज्यादिकैर्भक्त्या मन्त्रैः श्रुतिमयैस्तनः ॥१५॥
भगवान् विश्वकर्मात्मा मगणेन तु याजकैः ।

विविधैरुपचारैस्तु पुष्पधूपानुलेपनैः ॥१६॥
विसर्जने कृते विष्णोः सानले कमलोद्भव ! ।
शिल्पिनो यत्र ये दक्षाः मान्यास्ते तदनन्तरम् ॥१७॥
तथा प्रसन्नबुद्ध्या तु शश्वन्निर्वर्तयन्ति च ।
तैरपि प्रयतैः स्नातैस्तर्पणीयः स्वकः पतिः॥१८॥
ततः परिगृहीतव्यं क्षेत्रं त्वभिमतं द्विजाः! ।
अभुक्तमथवा भुक्तं वसुधागुणलक्षितम् ॥१९॥
निश्शल्यमनुकूलं च स्थपतीनां च सम्मतम् ।
समादाय प्रतिष्ठार्थं यथाभिमतविस्तृतम् ॥२०॥
महेन्द्रोपांपतिर्वायुर्वित्तपेशानदिक्षु च ।
पदमासाद्य वै कुर्याद्दिव्यायायतनाश्रितम ॥२१॥
पञ्चायतनपूर्वं तु शुभं देवगृहं महत् ।
सिद्धये तत्स्वमार्गात्तु विमार्गात्तदसिद्धये ॥२२॥
एतावदर्थनान्युक्तमतोन्येषां तु दोषकृत् ।
स्वमार्गे परमार्गे वा येषां सर्वगतो हरिः ॥२३॥
स्फुरत्यविरतं बुद्धौ गुरुं तं शास्त्रतः स्वयम् ।
शुभेनुकूले नक्षत्रे नमस्कृत्याच्युतं विभुम् ॥२४॥
निर्वर्त्य नित्यं विशेषपूर्वमर्चापयेद्द्विजाः ! ।
सह चैकायनैश्चान्यैः ऋग्यजुस्सामपाठकैः ॥२५॥
सालङ्कारैश्च सोष्णीषैः सिताम्बरधरैस्तथा ।
समालभनमाल्यैश्च भूषितैः साङ्गुलीयकैः ॥२६॥
शङ्खवादित्रनिर्घोषैर्गीतिभिर्माङ्गल्यपदैः ।
फलपुष्पाशनकरो लाजसिद्धार्थकादिकम् ॥२७॥
समादाय शुचिः कर्ता देशिकेन सह द्विजाः!
स्नानमासाद्य सर्वेषां वासुदेवं हृदि स्मरन् ॥२८॥

पुण्याह वाचयित्वा तु पूर्वोक्तविधिना तत ।
जपन्नष्टाक्षर तिष्ठन् कर्त्रास्ते देशिकस्तत ॥२९॥
बहि क्षेत्रस्य चैशान्या प्राच्या वा मुनिपुङ्गवा ! ।
तता पर्णकुटीं कृत्वा वातवृष्टिक्षमा शुभाम् ॥३०॥
तत्र पुष्पार्घ्यधूपाद्य कृत्वा वै भद्रपीठगम ।
पञ्चगव्य समापाद्य सार्धं मन्त्रैर्विलक्षणै ॥३१॥
नारायणमपा मूर्ति हेमाद्ये कुतपे शुभे ।
सन्निधीकृत्य सम्पूज्य सरित्तीर्थाम्बुपूरिते ॥३२॥
हेमसर्वौषधीरत्नदर्भवर्गस्रगन्विते ।
मन्त्रास्त्रकलशाभ्या तु सम्पाद्य रचना तत ॥३३॥
साधारमासन ताभ्या ध्यात्वा कुर्यात्तदर्चनम् ।
हृदि मन्त्रेश्वर सास्त्र पूजयित्वा यथाविधि ॥३४॥
न्यस्तत्र्यमासने कौम्भे प्रणव नमसा सह ।
सौम्यनाडीपथा चैव ततो ह्यस्त्र समन्त्रराट् ॥३५॥
दक्षिणेन तु मार्गेण स्वपसव्यघटे विभो ।
अवनार्य ज्वलद्रूप दहन्त विघ्नसञ्चयान् ॥३६॥
मन्त्रत्रय तु सामान्य सर्वत्र विहित द्विजा ! ।
षडक्षरमन्त्र यत्तथा वै द्वादशाक्षरम् ॥३७॥
हेतीश यत्सहस्रार परिज्ञेय तथायुधम् ।
कृत्तदीशेण यल्लब्ध सुप्रसन्नाच्च वै गुरो ॥३८॥
अन्त्र तदङ्गमापाद्य सविशेषमिद शुभम् ।
साङ्ग समर्चयित्वा तु भोगैर्मात्रावसानकै ॥३९॥
मन्मूर्तयज्जुभि सार्मैयथावमरलक्षणै ।
ज्वर्ङ्कम्य सर्वेशमय होम समाचरेत् ॥४०॥
सहस्रनतमष्टान्य यत्पूर्णान्त साक्षतैस्तिलै ।
कुण्डे मन्त्राम्बुनिष्पूते एव कुर्यात्तु देशिक ॥४१॥

स्थलेषु वालुकाद्येषु प्रागादौ विनिवेश्य च ।
चत्वारश्चातुरात्मीयाः मन्त्रज्ञाः कृतमण्डनाः ॥४२॥
ऋग्वेदाद्याश्चतस्रो ये ईशाद्वायुपदावधि ।
भक्त्यानया परा योज्या होमार्थं क्षेत्रसद्मदे ॥४३॥
होतव्यं भूमिलिङ्गैस्तैर्मन्त्रैराज्यादिकं बहु ।
चतुर्भिश्चातुरात्मीयैर्द्विषट्कार्णपुरस्सरैः ॥४४॥
होतव्यमपरैर्विप्रैः स्मरन् सर्वेश्वरं हरिम् ।
उपद्रष्टा चतुष्कोणे एकैकं विनियोज्य च ॥४५॥
होमार्थं सर्वकुण्डेषु मन्त्रविन्यस्तविग्रहम् ।
शुचयः संयता दक्षा वास्तुशास्त्रकृतश्रमान् ॥४६॥
विश्वकर्मकुलोद्भूतानाहूयाग्रे निवेश्य च ।
पञ्चगव्यादिनाभ्युक्ष्य सिताम्बरधरांस्तु वै ॥४७॥
माल्यचन्दनचूर्णाद्यैः भूषितानङ्गुलीयकैः ।
संवीक्ष्य पावनीकृत्य ह्यादाय घटिकान्वितम् ॥४८॥
कार्पासं सुदृढं सूत्रं सहस्राराभिमन्त्रितम् ।
स्थपतीनां करे दद्यात्सह चैकशलाकया ॥४९॥
प्रोक्षितान् पञ्चगव्येन सहस्राराभिमन्त्रितान् ।
विकीर्य लाजसम्मिश्रान् बीजान् सिद्धार्थकान्वितान् ॥५०॥
अपसव्यं सव्यकं च त्रिधा कुर्यात्प्रदक्षिणम् ।
प्राक्पदाद्यपदं यावत्स्यात् घण्टारवैः शुभैः ॥५१॥
क्षेत्रमानमथादाय शङ्खभिर्निनदैः ।
शिल्पवेदविदां मुख्यैर्विश्वकर्मनिजैस्तु वा ॥५२॥
ईशकोणादि तत्सूत्रं चतुर्दिक्षु प्रसार्य च ।
शङ्कूनिर्पद्दारव्यैर्मुद्गरेण दिगष्टकम् ॥५३॥
ततो भूतबलिं दद्यान्नानाद्रव्येण बुद्धिमान् ।

मृदोपलैश्च सम्पूर्य जातिपु स्निग्धया तया ॥७९॥
आक्रोश्य पौन पुन्येन बालार्द्रं वारिसेचनात् ।
समीकृत्योपलिप्याथ गोगणास्तत्र वासयेत् ॥८०॥
बालवत्ससमेत च वृक्षेन्द्रगणसयुतम् ।
सतोयाः शालयश्चैव प्रभूततृणसञ्चयम् ॥८१॥
विकीर्य सलिलं तत्र सन्त्यक्ते गोमयादिके ।
अपास्य गोगण तत्र त्रिदिनान्ते पुनर्महीम् ॥८२॥
शोधयित्वा चतुर्थेऽह्नि लाङ्गलैः परिवर्तितम् ।
मर्दयित्वेनेष्टकेनाथ स्पर्शनीया च सर्वदा ॥८३॥
तत काञ्चनजं रेणु ताम्रतारमयं त्वपि ।
रत्नजं गन्धमाल्याढ्य सस्यशालिफलान्वितम् ॥८४॥
सपुष्पाक्षतलाजाढ्य सिद्धार्थैश्च तिलैर्युतम् ।
श्रीकरं पञ्चगव्येन भूमौ सर्वत्र सेचयेत् ॥८५॥
अकृते वा कृते खाते शुद्धिमेति च तत्क्षणात् ।
यस्मात्तस्मादिद सम्यग्यत्नतस्तु समाचरेत ॥८६॥
ततो भुव समीकृत्य गोमयेनोपलिप्य च ।
समर्चयित्वा विधिवत्ततो दिक्शुद्धिमाचरेत् ॥८७॥
शास्त्रदृष्टेन मार्गेण शङ्कुसंस्थापनादिकम् ।
कृत्वा यथोक्तविधिना प्रासाद कर्तुमारभेत् ॥८८॥
आरभ्यमाणे प्रासादे ये वै प्रत्यूहकारिण ।
भूतदानवयक्षाश्च राक्षसास्तत्प्रशान्तये ॥८९॥
बालालये देवदेव प्रतिष्ठाप्य यथाविधि ।
अर्चयेद्विविधैर्भोगैर्यावद्वै मूलमन्दिरे ॥९०॥
स्नापन देवदेवस्य तदन्ते बालबिम्बगाम् ।
शक्ति कुम्भे समावाह्य मूलबिम्बे समर्पयेत् ॥९१॥

एव बालगृहे विष्णौ पूजिते मुनिपुङ्गवा ! ।
प्रत्यूहकारिण सर्वे प्रणश्यन्ति ततो गुरु ॥९२॥
शुभे दिनेनुकूले च नक्षत्रे पूजितग्रहे ।
लग्ने स्थिरे स्थिरांशे च दृक्शुद्धे चोत्तरायणे ॥९३॥
दिव्याद्युत्पातसंशुद्धे सितपक्षेऽमलेऽम्बरे ।
आजलान्त कृते खाते पूर्ववत्सम्प्रपूरिते ॥९४॥
विमुक्तदोषे भूभागे सर्वलक्षणलक्षिते ।
पूरणादशशेषे तु सूपलिप्ते धरातले ॥९५॥
चतुष्षष्टिपदे भूते प्रागवत्सूत्रेण सर्वदिक् ।
स्नात शुक्लाम्बर स्रग्वी कृतन्यास सुशान्तधी ॥९६॥
सर्वसाधनसयुक्तश्चार्घ्यपात्रसमन्वित ।
मङ्गल्यकुम्भमादाय ध्यायमानोऽच्युत हृदि ॥९७॥
सह चैकायनैर्विप्रै ! सदागमपरायणै ।
तथा ऋङ्मयपूर्वैस्तु आमूलाद्भगवन्मयै ॥९८॥
विशेत्प्रासादभूभाग मध्ये कुम्भ निधाय तम् ।
कुर्यान्निरीक्षण भूमेस्ताडन प्रोक्षण तथा ॥९९॥
सेचन पञ्चगव्येन सह चार्घोदकेन तु ।
ओङ्काराद्य पवित्रान्त मन्त्राणा मात्रचतुष्टयम् ॥१००॥
पाठयेच्च सपुण्याह ब्राह्मणान् कृतमङ्गलान् ।
बह्वृचान् शाकुन सूक्त ततो भद्र यजुर्मयान् ॥१०१॥
इडामयेति सामज्ञान् शान्तायेत्यथर्वणान् ।
ईशकोणात्समारभ्य प्रागादौ मनिपङ्क्तिषु ॥१०२॥
द्वादशाक्षरमन्त्रेण स्वनाम्ना तु पदे पदे ।
नतिप्रणवगर्भेण दैवत देहलक्षणम् ॥१०३॥
यष्टव्यो वास्तुपुरुषो दधिमधुचन्दनाग्निना ।

सात्विकेनोपहारेण अर्घ्यो सन्तर्पयेत्तत ॥१०४॥
यद्वा विध्यन्तर भूय शृणुत मुनिपुङ्गवा ! ।
सर्वदिक्षु समेर्भागैर्नवधा सविभज्य च ॥१०५॥
सूत्रै सुधावलिसिश्च यागागारवसुन्धराम् ।
एकाशीतिपदोपेता कृत्वैता सम्प्रयत्नत ॥१०६॥
प्रत्येकस्मिन् पदे कुर्याच्चतुर्थांशेन चाम्बुजम् ।
दलाष्टकयुत चैव काणकाकेसरान्वितम् ॥१०७॥
अर्घ्यादिरक्षोवायव्यन्तहि कोणपदेषु च ।
चतुष्टय यत्पद्माना केवल तच्चतुष्टलम् ॥१०८॥
ईशानपदपद्मात्तु समारभ्य प्रपूजयेत् ।
बाह्यपङ्क्तिषु पद्मेषु क्रमाद्देवासुरान् ऋषीन् ॥१०९॥
वृषाङ्कपदपद्मे तु ब्रह्माण कर्णिकान्तरे ।
ईश्वर लपन चैव दिति चैव तथाऽदितिम् ॥११०॥
पूर्वपत्र समारभ्य विन्यसेद्यावदुत्तरम् ।
एव तस्मिन् पदाब्जे तु पूजयित्वा तु पञ्चकम् ॥१११॥
मरुत्य च तत सम्यग्विबुधाना च सप्तकम् ।
क्रमात्सप्तपदस्थाना पद्माना कर्णिकोपरि ॥११२॥
याम्याग्न्य चापवत्स च जयेन्द्र समरीयक ।
रवि सत्यासमेदौ च तनौ वह्निपदाम्बुजे ॥११३॥
भूय पितामह मध्ये पूर्वपत्रे न्यसेद्भृगुम् ।
गगन दि विभु पूषा दक्षिणे पश्चिमोत्तरे ॥११४॥
ईट्श कोणपत्रेषु पत्रस्य च चतुष्टयम् ।
यमेन्द्राग्नमकोणान्तमम्बुन्य्वथ सप्तकम् ॥११५॥
सावित्र्यथ सावित्र समैन्यथ गृहक्षत ।
विवस्वान् धर्मराजस्तु गन्धर्वाधिपति स्मृत ॥११६॥

पद्मे नैर्ऋतकोणस्थे भूयो ब्रह्माणमन्तरे ।
भृङ्गाख्यो भृङ्गराट् चैव ततः पितृगणाधिपः ॥११७॥
देवदौवारिकाख्यश्च प्राक्पत्रादौ चतुष्टयम् ।
ततोऽष्टपत्रपद्मेषु देवतासप्तकं क्रमात् ॥११८॥
कर्णिकान्तर्गतं न्यस्य यावद्वायुपदावधि ।
इन्द्रश्चेन्द्रपदाख्यश्च सुग्रीवः कुसुमद्विजः ॥११९॥
मित्राख्यो वरुणश्चैव त्वसुराधिपतिः पुनः ।
वायव्यपदपद्मे तु मध्ये चैव प्रजापतिम् ॥१२०॥
प्राक्पूर्वेषु च पद्मेषु शेषश्चाधर्म एव च ।
यन्मयाधिपतिश्चैव नागेन्द्रस्तदनन्तरम् ॥१२१॥
सप्तकं देवतानां च पूर्ववत्पूजयेत्ततः ।
पूर्वाख्यो रुद्रदासश्च मुख्यो भल्लकसोमकौ ॥१२२॥
धाराधरश्च मत्संज्ञ इत्येतद्देवतागणम् ।
पूजयित्वा ततः पश्चादैकैकार्थिस्तु पङ्कजे ॥१२३॥
स्वनाम्ना वास्तुनाथं तु पद्ममध्ये स्थितं यजेत् ।
कोणभागस्थपद्मानां केसराग्रे यजेच्च तम् ॥१२४॥
प्रणवं वास्तुनाथाय नमश्चान्ते प्रपूजयेत् ।
पूजयित्वा विधानेन पुष्पधूपादिकेन च ॥१२५॥
दधिक्षीरोदकेनैव भक्ष्यैः सफलमूलकैः ।
इष्ट्वैवं विबुधनाथं चाद्ये त्वावरणे पुरा ॥१२६॥
स्वदन्तरपदाब्जानामीशकोणादितः पुनः ।
यावन्नाभ्यपदाब्जं तु पूर्व वर्णाष्टकेन तु ॥१२७॥
मातृकावर्णभेदेन अकारादिक्रमेण तु ।
यावद्धकारवर्णं तु ततोऽब्जेऽब्जदलेषु च ॥१२८॥
तेनैव क्रमयोगेन पूजयेद्देवतागणम् ।

द्वितीयावरणे चैव अन्तरीये निबोधत ॥१२९॥
धाता याता ध्रुव काल काम कर्ता जयन्तक ।
जीव प्राणस्तरो यज्ञो रविश्च मृगयाम्यकौ ॥१३०॥
लोकनाथो विधाता वै भृगु स्रष्टा नियामक ।
मनोजवश्च कल्याण पर्जन्यो द्रविणस्तत ॥१३१॥
सप्तारो विश्वकर्मा च इत्येता मुनिपुङ्गव ! ।
देवताश्चान्तरे पूज्याश्चतुर्विंशतिसख्यया ॥१३२॥
एतेषामन्तरे भूयस्तृतीयावरणे तथा ।
षोडशाना तत सम्यग्देवताना गण क्रमात् ॥१३३॥
समुद्रा मातरो द्वीपा मासा नद्यश्च तारका ।
विश्वे देवाश्चाप्सरसो मनवो ऋषयस्तथा ॥१३४॥
वसवो मरुत सिद्धा नागा साध्या ग्रहा क्रमात् ।
इन्द्रादिलोकपालास्तु चतुर्थावरणे न्यसेत् ॥१३५॥
तत्पादादौ तु चेशान्त पद्माना पत्रमध्यत ।
मध्यपद्मे तु पद्मस्य विश्वरूप यजेत्प्रभुम् ॥१३६॥
यस्यैव देवताचक्र वाहनास्त्रानुयायिभि ।
सयुक्त त्रिगुणे देहे सकलस्य महात्मन ॥१३७॥
प्रणवेन स्वनाम्ना च नमस्कारयुतेन तु ।
एकैक पूजयेद्देव तथैकैकमिहाक्षरम् ॥१३८॥
इष्ट्वैव देवता प्राग्वद्वह्नौ सन्तर्पयेत्तत ।
कुर्यात्कुम्भप्रतिष्ठान यथा तदवधार्यताम् ॥१३९॥
पूर्ववत्तोरणाद्यैस्तु भूभागमुपशोभयेत् ।
निर्णिक्तान्यवक्त्रस्य अमतल्पत्क्षितेर्नहि ॥१४०॥
पूर्वोपकरणोपेत कुर्यान्मण्डलमुत्तमम् ।
कुण्डाष्टकान्तरस्य च स्थल तत्राष्टहस्तकम् ॥१४१॥

सपिण्डिका द्विहस्तास्तु कुण्डाः पूर्वोक्तलक्षणाः ।
त्रिहस्तपरिता वीथी स्यादेवं द्विनवः क्रमः ॥१४२॥
पूर्ववत्प्रतिकुण्डे तु विनिवेश्य च साधनम् ।
आत्मनश्चोत्तरे कुर्यात्कुण्डं चाथ समस्थले ॥१४३॥
दक्षिणे पूर्ववद्देवमवतार्य यजेत्क्रमात् ।
स्थलायां स्थण्डिलस्योर्ध्वे उन्नतायां च पूर्ववत् ॥१४४॥
तर्पयित्वा यथाकाममुद्धृत्याग्निगणं ततः ।
दिक्कुण्डेषु विनिक्षिप्य संस्कृतेषु च पूर्ववत्॥ १४५॥
तथैव च विदिक्स्थेषु उद्धृत्याभ्यर्च्य वै क्रमात् ।
ततः प्रणवयोगेन चतुर्दिक्षु निवेशयेत् ॥१४६॥
चतुरो वासुदेवादीन् नाम्ना एकायनान् द्विजान् ।
स्वाभिः स्वाभिरसंख्यं तु तैः कार्यमभिधाय च ॥१४७॥
कर्मावसानं हवनं स्राज्यैस्तु तिलतण्डुलैः ।
एवमप्यययोगेन वाय्वादीशानगोचरम् ॥१४८॥
ऋग्वेदाद्यांस्तु चतुरः संस्कृत्यादौ तथा न्यसेत् ।
तैरप्यच्युतनिष्ठैस्तु स्वशाखोक्तैश्च पावनैः ॥१४९॥
हवनं विधिवत्कार्यं भक्तियुक्तेन चेतसा ।
अथेशकोणमासाद्य ब्राह्मणैरपरैः सह ॥१५०॥
प्राङ्निर्दिष्टं न्यसेत्तत्र स्नानोपकरणं तु यत् ।
दत्वार्घगन्धपूर्वं तु कलशेषु पृथक् पृथक् ॥१५१॥
तानर्च्य प्रणवादिना पश्चाद्विपदकेनाभिमन्त्र्य च ।
समानीय निर्लेपितान् कलशान् पूर्वसम्भृतान् ॥१५२॥
उत्कृष्टभानुसम्भूतान् नव तैजसांस्तु वा ।
मृन्मयान् सुवर्णान् सुघनान् सम्यक्पात्रस्वभावत ॥१५३॥
द्वादशाङ्गुलविस्तीर्णान् तन्मानेन तु चोन्नतान् ।

द्विगुणान् सति सामर्थ्ये नृपाणा हेमजान् हितान् ॥१५४॥
तत्सख्य चतुरश्र तु द्वादशाङ्गुळविस्तृतम् ।
तत्त्वशतुल्य बाहुल्याच्छिलाद्वृ द समाहरेत् ॥१५५॥
सस्थाप्य विधिवत्कुम्भान् पूर्वोक्तेन क्रमेण तु ।
कम्बुतुल्यमथैक वा तत्कण्ठ त्र्यङ्गुलोन्नतम् ॥१५६॥
तद्गुणैरपि विस्तीर्णं तत्खातोऽष्टाङ्गुळ स्मृत ।
परित कर्णदर्जं तु शङ्खो वा सुसितो महान् ॥१५७॥
विहितो हत नासस्तु अन्त शुद्धस्तु साक्षत ।
एव हि सान्तराद्वाद्यात्समालभ्याधिवास्य च ॥१५८॥
फलैर्हेमादिकै रत्नै सर्वौषधिमयैस्तत ।
गन्धैर्बीजैस्तथा धान्यैर्विद्रुमाद्यैस्तु मौक्तिकै ॥१५९॥
नेत्रवस्त्रैरलङ्कारैर्भूषयेत्सग्वरै शुभै ।
द्वादशाक्षरमन्त्रेण एकैकस्य समाचरेत् ॥१६०॥
मूर्तिससिद्धये न्यास प्रणवैस्तांश्चिदात्मनाम् ।
ततश्चार्घ्यादिकैर्भोगैर्बल्यन्तैर्विविधैर्यजेत् ॥१६१॥
शिलास्वेव कृते पश्चान्नियेत्कुण्डसन्निधिम् ।
सशिल कुम्भवृन्द तु आधारेपूपरि न्यसेत् ॥१६२॥
तदाधारशिला पश्चात्तत्र वा सप्टपाद्वहि ।
एवमेव च सस्कृत्य भावयेत्प्रणवेन तु ॥१६३॥
ज्वलन्तीं गोसहस्रेण खचिता सूर्यबिम्बवत् ।
ततश्चाराध्य मन्त्र तु सन्तर्प्य शतसङ्ख्यया ॥१६४॥
मध्ये तत्कलश न्यस्य साङ्ग सपरिवारकम् ।
निरशेषशक्तिगर्भ तु व्यापक मक्षतत्त्ववित् ॥१६५॥
अत ऊर्ध्वं निर्यगाभिर्वागाद्याभिश्च शक्तिभि ।
व्रतमूर्तिसमेताभिरभिन्नाभिस्तु तन्वत ॥१६६॥

पाठयेद्ब्राह्मणान् तत्र आत्मव्यूहं तु मन्त्रराट् ।
तथैवात्मानुवाकं च प्रणवाद्यन्तगन्तु वै ॥१६७॥
तमर्चयित्वा विधिवत्तर्पयित्वा त्वनन्तरम् ।
दिक्स्थिताना च कुम्भाना वासुदेवादिकान् न्यसेत् ॥१६८॥
पूर्ववच्चानिरुद्धाद्यान् विदिक्संस्थापितेषु च ।
पाठयेच्चातुरात्मीयं संज्ञामन्त्रचतुष्टयम् ॥१६९॥
प्रभवाप्ययंयोगेन ततः सूक्तं तु पौरुषम् ।
ऋग्वेदान् पाठयेद्भक्त्या युञ्जतेत्यपरान् यजुः ॥१७०॥
रथन्तराख्यं यत्साम सामज्ञान् भगवन्मयान् ।
सहस्रशिरसं चेति मन्त्रं चाथर्वणं ततः ॥१७१॥
एकस्मिन् वा मुनिश्रेष्ठाः सर्वोक्तं कलशे हितम् ।
तथैव हवनं कुण्डे मध्यमे विहितं स्वयम् ॥१७२॥
किं तु क्रमेण वै मन्त्रान् पाठयेच्च यथास्थितान् ।
एवं सम्पातहोमं तु कृत्वा पूर्णान्तिकं ततः ॥१७३॥
महाशक्तिसमूहस्तु परं सामर्थ्यलक्षणः ।
अभेदेन च मन्त्रादिमूर्तीना यः स्थितः स्फुटम् ॥१७४॥
संसन्धेयं शिलानां च स्वनाम्ना प्रणवेन तु ।
ज्ञानभासा निवसति तथा नन्दवला प्रभा ॥१७५॥
सर्वगा ब्रह्मवदना द्योतकी सत्यविक्रमा ।
सम्पूर्णा चेति कथिता शक्तयो विधधारिका ॥१७६॥
या शिला कलशाधारसंज्ञा सा विद्धि सर्वगाम् ।
सामर्थ्यशक्तिसामान्या निष्कला पारमेश्वरीम् ॥१७७॥
सन्तर्प्य मूलमन्त्राद्य शिलामन्त्रेण लाङ्गलिन् ! ।
अनन्यनाभावध्येकमन्त्रैर्णवायनैस्ततः ॥१७८॥
तादर्थ्येन तु होतव्यं मूलमन्त्रैस्तु तथैव हि ।

होतव्यमस्य याम्यीय गायत्रीभिरतोपरै ॥१७९॥
होतव्य ब्राह्मणै सम्यक्तद्यासेरपलक्षकै ।
दत्वा पूर्णां स्वय कृत्वा स्थलस्थस्यार्चन पुन ॥१८०
बलिदान च भूताना समाचम्य ततो व्रजेत् ।
प्रासादब्रह्मभूभाग न्यसेत्तत्र महाशिलाम् ॥१८१॥
ससरश्चकमन्त्र तु सानन्त प्रणवेन वै ।
बीजभूत तदन्त स्थमध्यपट्क स्मरन् यजेत् ॥१८२॥
निश्शेषमन्त्रवृन्देन तामर्घ्यादेरनन्तरम् ।
द्वारादिग्वीक्षमाण तु मध्ये मन्त्रघट न्यसेत् ॥१८३॥
स्वदिक्ष्वन्यान्यथावस्थान् स्वै स्वैर्मन्त्रैर्निवेशयेत् ।
तत स्वशक्तिपाषाणैरेकैक स्थगयेद्घटम् ॥१८४॥
पूरयेदस्त्रमन्त्रेण घटानामन्तर तत ।
मृदुमृद्वालुकाभिस्तु सुधयाऽचलसिद्धये ॥१८५॥
सवेष्ट्य नेत्रवस्त्रैस्तु ऋग्वेदान् पाठयेत्तत ।
आत्वा हार्षेति सूक्त तु प्रतिष्ठासाम सामगान् ॥१८६॥
द्वादशाक्षरसयुक्त बलमन्त्र पुन पुन ।
वक्तव्य ब्रह्मनिष्ठैस्तु प्रणवान्त सुभावितै ॥१८७॥
तदेकतनुता यात मस्तरेत्प्रणवेन तु ।
मूर्त्यादिशक्तिनिष्ठ यन्नामरूपक्रियात्मकम् ॥१८८॥
द्वादशाक्षरमन्त्रेण भूय सद्धृदयक्रमे ।
मन्त्राराध्य स्मूर्ति तु ससरेत्तेजसा निधिम् ॥१८९॥
ततस्त्वोम्भगवन्भोगी पाटयेत्पाञ्चरात्रिकान् ।
अर्चामिलिति ऋग्वेदान् अर्चासाम च तद्विद ॥१९०॥
तत परिगृहीते तु क्षेत्रे देवगृहीयके ।
द्वारमाहृत्मान तु त्रिविदिक्ष्वष्टक न्यसेत् ॥१९१॥

स्थापितं पूजितं सम्यक् शिष्याणां शुभलक्षणम् ।
तदन्तः सन्निरोद्धव्यो बुद्धिधर्मगुणः क्रमात् ॥१९२॥
धर्माद्याश्चाग्निकोणात्तु यावदीशपदं पुनः ।
प्रागादावुत्तरान्तं च अधर्माद्यं चतुष्टयम् ॥१९३॥
शिलानामन्तरे भूमौ षट्कं षट्कं क्रमेण तु ।
न्यस्तव्यं पूर्ववर्णाश्च वर्णानां सावसानकम् ॥१९४॥
शब्दब्रह्मानुविद्धां च कृत्वैवं बुद्धिवागुराम् ।
मूलभूतां न्यसेत्सम्यक् प्रासादतलसंस्थिताम् ॥१९५॥
न्यसेत्प्राङ्गणभित्त्यर्थं तथैव हि शिलाष्टकम् ।
तासु संरोधयेत्सम्यक् प्रागुक्तांस्तु दिगीश्वरान् ॥१९६॥
चक्रं तदन्तभूमीनां भ्रमद्वह्निस्फुलिङ्गवत् ।
क्षार्णेन चिन्तयेद्व्यासं भूभागं चाङ्कणीयकम् ॥१९७॥
आभोगं तदधः शेषं तदूर्ध्वं गगनेश्वरम् ।
बहिः प्राङ्गणभित्तीनां सार्धं सपरिवारकम् ॥१९८॥
प्रागादावीशकोणान्तमिन्द्राद्यं चाष्टकं न्यसेत् ।
तथाविधेषूपलेषु अन्तर्भूमिगतेषु च ॥१९९॥
तत्स्वनाम्नाऽर्चयित्वा तु ऋग्वेदान् पाठयेत्ततः ।
ऋीबो न विद्मानिति वै ये देवास्तु यजुर्मयान् ॥२००॥
देवव्रतं च सामज्ञान् प्रविश्याभ्यन्तरं ततः ।
स्थित्वाग्रतो मन्त्रमूर्तेरध्वन्यासिमनुस्मरेत् ॥२०१॥
बीजतश्चाङ्कुरीभूता पुरस्ताद्व्यक्तिमेति सा ।
प्रासादपीठपर्यन्तं कुम्भाधारोपलात्तु वै ॥२०२॥
भुवनाध्वा यथावस्थो भावनीयस्तु सर्वदा ।
गर्भाच्छूयावधिर्यावत्पदाध्वानं विलोकयेत् ॥२०३॥
मन्त्राध्वा शुकनासान्तं तत्त्वाध्वा वेदिकावधिः ।

कालाध्वा तु गळान्त च वर्णाध्वा तु तदूर्ध्वत
समीकृय पुरा सर्वं प्रासाद प्रारभेत्तत ।
प्रासादस्थैर्यसिध्यर्थं देवसान्निध्यसिद्धये ॥२०५॥
सर्वदोषप्रशान्त्यर्थं सर्वसम्पत्तिसिद्धये ।
गर्भन्यास पुरा कुर्याद्गर्भगेहे यथाविधि ॥२०६॥
रत्नैर्लोहैस्तथा बीजै कन्दैर्मुद्भैश्च पूरिताम् ।
सौवर्णी राजती वाऽथ ताम्रजा वा स्वशक्तित ॥२०७॥
नवगर्तसमायुक्ता मञ्जूषा सापिधानकाम् ।
सम्प्रोक्ष्य चास्त्रतोयेन वस्त्रयुग्मेन वेष्टयेत् ॥२०८॥
धान्यराशौ तु विन्यस्य मूलमन्त्रेण देशिक ।
अर्घ्यगन्धादिनाभ्यर्च्य कुण्डे वा स्थण्डिलेपि वा ॥२०९॥
देवमभ्यर्च्य विधिवत्समिद्भि सप्तभि क्रमात् ।
हुत्वा पूर्णाहुतिं पश्चादाचार्य समुपोषित ॥२१०॥
शुभ्रवस्त्रोत्तरीयश्च भूषणैरपि भूषित ।
गन्धमाल्यालङ्कृताङ्ग रात्रौ लग्ने सुशोभने ॥२११॥
भाजन तत्समादाय वेदघोषैश्च मङ्गलै ।
वाद्यघोषैश्च सहित कृत्वा गेह प्रदक्षिणम् ॥२१२॥
प्रविश्य गर्भभूभाग तत्र द्वारस्य दक्षिणे ।
कृत श्वभ्र पञ्चगव्यै सेचयित्वा समन्तत ॥२१३॥
तत्र भूमिं तु चार्घ्याद्यै समभ्यर्च्य ततस्तु ताम् ।
परिचिन्त्य ऋतुस्नातामात्मान च हरिं स्मरन् ॥२१४॥
सर्वभूतधरे ! कान्ते ! पर्वतस्तनमण्डिते ।
समुद्रपरिधानीये! देवि! गर्भं समाश्रय ॥२१५॥
इत्युक्त्वा भाजन श्वभ्रे निधाय सुधया तत ।
दृढीकृत्य तत श्वभ्र मृदापूर्य समन्तत ॥२१६॥

त्रिचतुः पञ्चरात्रं वा रक्षां कुर्यान्मुनीश्वरा ! ।
गर्भन्यासस्त्वयं विप्रा ! देवधाम्नोश्च वृद्धिदः ॥२१७॥
अकृते गर्भविन्यासे प्रत्यवायो महान् स्मृतः ।
तस्मात्सर्वप्रयत्नेन गर्भन्यासं समाचरेत् ॥२१८॥
मासादस्याथ वक्ष्यामि लक्षणं मुनिपुङ्गवा ! ।
तलादूनाधिकाश्चैव साङ्गुलैरुचितैः करैः ॥२१९॥
द्विह्रादशकरं यावत्तलेनोनाधिकेन तु ।
शुभाय सिद्धये वृद्धिर्गर्भं देवगृहस्य च ॥२२०॥
कृत्वा क्षेत्रागुळानां च कराणां वा घनं पुरा ।
त्यजेदष्टभिः सम्यग्यच्छेषं तद्विचार्य च ॥२२१॥
एकाद्यष्टपर्यन्ता ध्वजधूमृगेश्वराः ।
श्वा च गोखरमातङ्गवायसास्तु ततः शुभाः ॥२२२॥
एकत्रिपञ्चसप्ताख्याः सर्वत्रैव विधीयते ।
एवमन्तर्भ्रमेणैव सह भित्तिगणेन तु ॥२२३॥
गर्भद्विगुणविस्तीर्णं क्षेत्रं देवगृहस्य च ।
मन्दिरे त्वेकभित्तीये क्षेत्रमानं विधीयते ॥२२४॥
गर्भोक्तं तत्त्रिभागेन युक्तं युक्तेन वर्त्मना ।
तत्रापि ह्रासवृद्ध्या तु आयशुद्धिं विचारयेत् ॥२२५॥
एवं निर्जगतीकं च नागपीठं विवर्जितम् ।
प्रासादक्षेत्रमानं च तद्युक्तमवधार्यताम् ॥२२६॥
षड्भागेनाथ पादेन त्रिभागेनोभयात्मिका ।
अधिकार्धं चतुर्दिक्षु तत्पश्चांशैस्तु वै त्रिभिः ॥२२७॥
तृतीयांशेन वै मध्ये निर्गमस्तु विधीयते ।
कोणात्कोणात्तु वै शेषं भागं भागं प्रवेशयेत् ॥२२८॥
दृष्ट्वा गर्भसमं पीठं नर्तपीठेन दळेन वा ।

पीठोक्तालयपीठस्य लक्ष्मस्थित्यंशकल्पना ॥२२९॥
चतुर्दिक्षु विधेया वै बहुधानन्तपूर्विका ।
अथोच्छ्रायं तु वै क्षेत्रात् त्रिकोणं मन्दिरस्य च ॥२३०॥
कुर्याद्यर्धगुणं चैव द्विगुणं वा यथेच्छया ।
द्विरेकादशधा कुर्यात्तं च भागैः समं पुरा ॥२३१॥
विधेयं पीठवत्पश्चादेकांशेन मसूरकम् ।
तदूर्ध्वे विहिता जङ्घा गर्भमानेन चोन्नता ॥२३२॥
भवोपकरणीयाभिर्देवताभिरलङ्कृता ।
जङ्घायामंशयुग्मेन उपयूनाधिकेन वै ॥२३३॥
कार्यं शिखरपीठं तु पूर्वलक्षणलक्षितम् ।
किं तु प्रवेशनिर्यासौ तत्र चार्धांशसम्मितौ ॥२३४॥
शिखरं चात्र विहितं भूमिकानवकान्वितम् ।
सङ्कोच्य तत्पुरा सूत्रमादायोन्नतिसम्मितम् ॥२३५॥
एतस्मादेकवर्णात्तु जङ्घोर्ध्वायात्प्रसार्य च ।
संस्पृशेच्छिखर पीठमञ्जसा तन्निरोध्य च ॥२३६॥
प्रासादाद्बहिरायत्र भूभागे त्वमलेक्षण ! ।
कर्णादूर्ध्वं नयेत्सूत्रं लाञ्छयमानं क्रमेण तु ॥२३७॥
शिखरोन्नतिपर्यन्तं चतुर्दिक्ष्वेवमेवहि ।
पर्यटेल्लाञ्छयमानं तु कर्णात्कर्णं मुनीश्वरा. ! ॥२३८॥
यावत्तुमुदपनाभा सा स्याच्छिखरमञ्जरी ।
एवमालेख्यदृष्ट्या तु सम्पाद्यातन्तुपाततः ॥२३९॥
भूमिखण्डप्रसिध्यर्थं कार्या सा दशधा पुनः ।
उपरिष्टात्तु भागेन भवेदामलसारकम् ॥२४०॥
भूमयो भागमानात्तु तनश्चासां समाचरेत् ।
क्षयाद्वया विधानं तु तद्विग्रहांशसम्मितम् ॥२४१॥

विभिन्ना पीठरचना तासु कार्या यथास्थिता।
सचक्रैर्विविधै पद्मै प्रादुर्भावैस्तु चाखिलै ॥२४२॥
सर्वैर्वा लाञ्छनैर्मूर्तै नृत्तगीतरसास्थितै।
नवांशेनोर्ध्वभागात्तु सपादेन विनिर्गतम् ॥२४३॥
उष्णीषमूर्ध्वभूमेस्तु कार्यं वै रचनोज्झितम्।
शिष्टं कृत्वा त्रिधा पीठं मण्डलस्थेन पूर्ववत् ॥२४४॥
द्वितीयेन ततः कण्ठं तृतीयेनोर्ध्वगेन तु।
सुसमं ग्रीयुतं कुर्याद्दण्डं धात्रीफलाण्डवत् ॥२४५॥
नवधोष्णीषकं कृत्वा चतुर्भिर्वेदिकाक्रमम्।
त्रिभागपृथुभागेन सस्तम्भा ह्यथ केवला ॥२४६॥
उन्नता शिखरार्धेन साप्युत्पलदलोपमा।
कार्या शिखरपीठोर्ध्वे दिव्यकर्मविभूषिता ॥२४७॥
ततः शुभतरं कुर्यान्मण्टपं स्तम्भसंयुतम्।
भूषितं विहगेन्द्रेण बलिमण्डलगेन तु ॥२४८॥
चतुर्द्वारे तथा दिक्षु विधेयं मण्टपत्रयम्।
प्रवेशत्रितयोपेतं मण्टपे मण्टपं भवेत् ॥२४९॥
कुर्यान्मण्टपमुक्तं वा यथाभिमतनिर्गमम्।
रथोपरथकाद्य तु तेषां गर्भाद्विधीयते ॥२५०॥
निर्यासो दशमांशेन द्वादशांशेन लाङ्गलिन्!।
अथ वा षोडशांशेन ते कार्या नेमिवत्पुनः ॥२५१॥
चतुर्दिक्पद्मसंलिप्ता पीठकर्मविभूषिता।
शिखरस्य चतुर्दिक्षु पीठोपरि समापयेत् ॥२५२॥
सम रथपयुक्त्या तु नासिकामजरांगणम्।
मध्यदेशचतुर्दिक्षु कुर्याद्वारगण्समम् ॥२५३॥
त्रिचतुःपञ्चषड्भागे ततो गर्भाद्विधीयते।

द्विगुणं चोन्नतत्वेन त्रिपञ्चनवशाखिकम् ॥२५४॥
युक्तं द्वारर्धद्वयेनैव कुम्भिमदशनैस्तु वा ।
विधिवत् स्थापनं तस्य मन्त्रपूर्वं समाचरेत् ॥२५५॥
सस्थाप्य मूलमन्त्रेण सम्पूज्यार्घ्यादिना हृदा ।
शाखामूलगता कुर्याद्धातुरत्नमयीं क्षितिम् ॥२५६॥
सर्वाधारमयं मन्त्र सन्निरोध्य हि तत्र च ।
ज्ञानक्रियात्मकं ध्यात्वा शिखामन्त्रेण शाश्वतम् ॥२५७॥
दक्षिणोत्तरभागाभ्यां शाखायुग्मं तु विन्यसेत् ।
हृन्मन्त्रेण तदूर्ध्वे तु रुध्वाद्य परमेश्वरम् ॥२५८॥
सन्निधीकृत्य सम्पूज्य गगनस्थे ह्युदुम्बरे ।
द्विविधं धातुजालं तु रत्न सिद्धार्थकान् तिलान् ॥२५९॥
चन्दनाद्या हि गन्धा ये क्षीरं दधि घृतं मधु ।
शालय सर्वबीजानि सर्वौषध्य सविद्रुमा ॥२६०॥
कृत्वा नेत्रेण नेत्रस्थान् द्वारोर्ध्वे विनिवेश्य तान् ।
द्दश्यं भोगाश्रये चैव त्वदृश्य मोक्षसिद्धये ॥२६१॥
चतुष्पात्मकलो धर्म तदूर्ध्वे सन्निरोध्य च ।
चत्वारि शृङ्गा इति यत् पठेद्दृङ्मयात्मत ॥२६२॥
कर्महोमचयं कृत्वा पूर्णां मूलेन पातयेत् ।
एतद्बिम्बप्रतिष्ठानात्प्रमन्तरधात्मगाचरेत् ॥२६३॥
स्थित्यपेक्षावशेनैव शाल्यस्य तु वै विभो ।
अनन्तभुवनं नाम सर्वकामापवर्गदम् ॥२६४॥
चतुष्प्रकारमेवं हि प्रासादं विद्धि पीठवत् ।
रचनामन्त्रियोगोत्थभेदेनानेकधा तथा ॥२६५॥
भवद्भीशमृगेन्द्रैस्तु निधिभूतापवर्गदैः ।
शङ्खपद्माङ्कितागिस्तु सोपानपदपङ्क्तिभि. ॥२६६॥

युक्त द्वारवशेनैव तथा पीठवशात्तु वै ।
विस्तार प्रतिदिक्स्थस्य वरुणस्य विधीयते ॥२६७॥
गर्भोर्ध्वक्षेत्रसञ्ज्ञा च जगतीस्य लाङ्गलिन् ! ।
ज्ञेय सजगतीकस्य तन्मानेनापि सर्वदिग ॥२६८॥
पृष्ठ्य पादादिकं कुर्यात्पादाद्यशोज्झितं तु वै ।
मुख्या चायतनाना च सस्थितश्चाङ्गणे पुरा ॥२६९॥
चतुरायतन ह्येतत्प्रासादैः दिक्त्रयस्थितैः ।
आद्येन सह कोणस्थैः तत्पञ्चायतन स्मृतम् ॥२७०॥
विज्ञेयमष्टायतन त्रिभिरन्यैस्तु दिग्गतैः ।
विना मध्यस्थितेनैव दिग्गतैस्तु द्विभिर्द्विभि ॥२७१॥
तद्दशायतन तेन युक्तमेकाधिक भवेत् ।
प्रतोलीपक्षगेनैव प्रासादद्वितयेन तु ॥२७२॥
द्वादशायतन ह्येतत्सह मध्यस्थितेन तु ।
तदेवाधिक्त्सत्र तु अतोन्येऽनन्तसञ्ज्ञिकं ॥२७३॥
परस्परमुखौ कुर्यात्प्रासादौ द्वारदेशगौ ।
प्रासादाभिमुखाश्चैव दिक्त्रयेऽवस्थितास्तु ये ॥२७४॥
कोणस्थाभ्या च सम्मुख्य द्वाभ्या द्वाभ्या विधीयते ।
द्वाभ्या चाभिमनाभ्या तु कुर्यादुचितदिङ्मुखान् ॥२७५॥
द्वौ परस्परवक्त्रौ तु कोणदेशसमाश्रितौ ।
द्वाराण्यनन्तायतने प्रासादाना मुनीश्वरा ! ॥२७६॥
यथाभिमतदिक्स्थानि कर्तव्यान्यविशङ्कया ।
न तत्र तेषा भवति वेधदोष परस्परम् ॥२७७॥
अङ्गभावगतत्वाच्च प्रधानायतनस्य वै ।
अर्धेन च त्रिभागेन हित पादेन चाङ्गणात् ॥२७८॥
परण्दकस्य चोच्छ्रायस्तद्वित्तारस्तथोच्यते ।

तच्च पीठोपमं कुर्यात् श्लक्ष्णं सोष्णीषमेव वा ॥२७९॥
युक्तं कौटिगणेनाथ नानादेवान्तगेन तु ।
यदेकायतनं चैव लक्षणं तन्मुनीश्वरा ! ॥२८०॥
युक्तं लघुपरण्डेन केवलं वा परण्डकम् ।
यदा द्व्यायतनाद्य च द्वादशायतनान्तिमम् ॥२८१॥
एकदिग्वीक्षमाणं च चतुरश्रायतेऽङ्गणे ।
वृत्तायते वा वितते प्रासादे चोक्तलक्षणे ॥२८२॥
यस्माद्देवालयाना च अङ्गणाना विशेषतः ।
चतुरश्रादिपीठाना नित्यमेव मुनीश्वरा ! ॥२८३॥
अन्योन्यानुगतत्व तु हितं चापेक्षिकं तु वै ।
भूमिभागवशेनैव तथैवार्चावशेन तु ॥२८४॥
नानाफलवशेनापि तथा शोभावशेन च ।
मूलभश्चतुरश्रात्तु चतुरश्रायतादघनम् ॥२८५॥
वर्तुलात्सर्वकामाप्तिर्निर्वृतिस्तु तदायतात् ।
दृष्टादृष्टफलेप्सूना लोकास्तु महदादयः ॥२८६॥
यच्छन्ति वैष्णवं स्थानमारोग्यं भूतिमुत्तमाम् ।
वैष्णवानामकामाना च्युतेरन्ते परं पदम् ॥२८७॥

मुनयः ।

प्रासादलक्षणमिदं श्रुतं त्वत्तो मुनीश्वर ! ।
तस्य सम्स्थापनविधिं विस्तारेण प्रकाशय ॥२८८॥

नारदः ।

प्रासादादिप्रतिष्ठाना शृणुध्वं विधिमुत्तमम् ।
प्रासादस्याग्रतः कृत्वा पूर्ववद्यागमण्टपम् ॥२८९॥
सर्वोपकरणैर्युक्तं सर्वलक्षणसयुतम् ।
प्रासादस्यापि परितः कुर्यात्कुण्डाष्टकं गुरुः ॥२९०॥

सामग्र्यादेरभावे तु प्रासादाग्रप्रकल्पिते ।
यागमण्टपभूभागे कुण्डमेकं प्रकल्पयेत् ॥२९१॥
समस्तमूर्तिपीयं च होमं तत्रैव कल्पयेत् ।
प्रासादस्थापनारम्भात्तृतीये पञ्चमेपि वा ॥२९२॥
दिवसे त्वङ्कुरारोपं यथाविधि समाचरेत् ।
शैलोत्थं पूर्ववत्कुम्भं कृत्वा धातुमयं तु वा ॥२९३॥
तद्विगोळकमानेन मन्त्रबिम्बेन वै सह ।
शुभेऽन्यस्मिन् दिने यागमण्टपे ह्युक्तलक्षणे ॥२९४॥
अधिवास्य यथान्यायं सर्वोपकरणान्वितम् ।
स्नानाद्यमखिलं ताभ्यामापाद्य च यथाविधि ॥२९५॥
तस्मिन् रत्नादिसंयुक्ते बिम्बं कुम्भे निवेश्य च ।
वस्त्राभरणैः पुष्पैश्छन्नं कृत्वार्घ्यपुष्पवत् ॥२९६॥
शनैः प्रासादपर्यङ्कमारुहेन्मूर्तिपैः सह ।
तत्र प्राक्ताडनादीन्स्तु कुर्यात्सङ्क्षाळनादिकान् ॥२९७॥
आचरेद्दैलविन्यासं सर्वं वाऽऽवाहनोदितम् ।
निवेशनीयमित्येव बिम्बं कुम्भसमन्वितम् ॥२९८॥
हृदाद्यन्तनिरुद्धेन मूलमन्त्रेण लाङ्गलिन्[1] ।
तत्राद्यमनुसन्धानमेकं कृत्वा परान्वितम् ॥२९९॥
सामान्यलक्षणं पश्चात्पूर्वोक्तं वै कलात्मकम् ।
सम्पूज्य वाससाच्छाद्य सुधया व्यक्ततां नयेत् ॥३००॥
ततः पिण्डं तदूर्ध्वे तु साण्डं कुर्याद्यथोदितम् ।

१— हृदादि इति—(पा)
२— प्रागास-न्तिमान्– इति—(पा)
३— बीज-इति– (पा)

प्रासाद स्नापयेत्पश्चात् पञ्चभि सिद्धार्थकादिभि ॥२०१॥
सुधामय च प्रासाद दर्पणे स्नानमाचरेत् ।
समालभ्यार्चयित्वा च स्नग्वाद्यैर्मण्डयेत्तत ॥२०२॥
प्रासादपट्टिकाया तु पञ्चविंशतितन्तुभि ।
न वा तु कौतुक पश्चात्कुर्याच्छायाधिवासनम् ॥२०३॥
स्नपन दर्पणे कुर्यात्प्रागदेशिकसत्तम ।
प्रासादस्य चतुर्दिक्षु मूर्तय कल्पिता यदि ॥२०४॥
तेषा नेत्राणि चोन्मील्य यथाविधि मुनीश्वरा ! ।
सर्वमन्यद्यथायोग वक्ष्यमाणेन वर्त्मना ॥२०५॥
प्रासादस्यापि कुर्वीत कूर्चद्वाराधिवासनम् ।
प्रासादस्याग्रपर्यन्त कुम्भाधारोपलात्तु वै ॥२०६॥
लोकाध्वतत्त्वदेवाना न्यास प्राग्वत्समाचरेत् ।
दिङ्मूर्तिना तथाऽङ्गेषु मूलमन्त्रादिकान् न्यसेत् ॥२०७॥
कलशे मण्डले चैव प्रासादस्थान् समर्चयेत् ।
प्रासादपरित कलशकुण्डेष्वग्नि यथाविधि ॥२०८॥
सम्भृत्य वासुदेवादीन् प्रभवाप्यययोगत ।
सन्तर्पयेद्यथाशास्त्र यद्वा तत्पुरत स्थिते ॥२०९॥
कुण्डे तु सकल होममाचार्य स्वयमाचरेत ।
मन्त्राश्च पाठयेद्विप्रास्तत्प्रतिष्ठा नयेत्तु वै ॥२१०॥
संरोध्य वर्ममन्त्र तु तत्र ध्यानधिया स्वयम् ।
पूर्णान्तमखिल हुत्वा विधिनानेन वै पुन ॥२११॥
ध्रुवोद्देरेति वै साम पाठयेत्सामगास्तु वै ।
चक्रमामलसारस्य मध्यत सन्निवेशयेत् ॥२१२॥
यथाभिमतरूप तु दिग्वक्त्र वाम्बराननम् ।
सशक्तिमण्डलस्थ चन्द्रमार्तण्डभास्वरम् ॥२१३॥

चक्रमन्त्रं न्यसेत्तस्मिन् वर्णाध्वानं पुरोदितम् ।
गत्यागतिप्रयोगेण मासमेयञ्चलक्षणम् ॥३१४॥
नान्यथावत्पुरा ज्ञात्वा द्रव्यमूर्तिगते विभुम् ।
कुर्यात्ततोऽध्वसन्धानं नान्यथा तु मुनीश्वराः ! ॥३१५॥
अमलं शान्तसंज्ञं वै तथा शान्तोदितोदितम् ।
एकमेव हि तन्मूर्ति यश्चक्रेवेत्ति तत्त्वतः ॥३१६॥
सोऽस्मिन् संसारचक्रे तु सर्वाश्रमनिवासिनाम् ।
सर्वधर्मरतानां च चक्रवर्तित्वमाप्नुयात् ॥३१७॥
यच्छक्तिर्ब्रह्ममूर्त्यैव सिद्धा साक्षान्निराश्रया ।
अन्तर्बहिस्थं सर्वेषां मोक्षदं चामलं स्मृतम् ॥३१८॥
क्षीरोदार्णवतुल्यं यत्सहस्रादित्यसन्निभम् ।
निरङ्गं तीक्ष्णधारं वै तच्छान्ताख्यं हि योगतः ॥३१९॥
यत्तु नानाङ्गभावेन स्वातन्त्र्यात्स्वयमेव हि ।
सर्वदिक्प्रसृतं कृत्वा स्वात्मवृत्ति हि वर्तते ॥३२०॥
ईषद्वलयवज्रभिरराणामन्तरे स्ववत् ।
शान्तोदितं च तद्विद्धि चक्रमिच्छाफलप्रदम् ॥३२१॥
यच्छान्तमूर्तौ सम्बन्धं सर्वं कृत्वावतिष्ठते ।
प्रवृत्तं नाभिपूर्वं तु उदिताख्यं तु चक्रराट् ॥३२२॥
नाभिभागस्थितो मन्त्रकण्ठे सम्पूजितं स्मृतम् ।
जप्तं मन्त्रार्पितं भक्त्या सर्वेषां सर्वसृच्छेदति ॥३२३॥
एवं त्वाभिमतं चक्रं सर्वविघ्नक्षयङ्करम् ।
प्रतिष्ठाप्य समभ्यर्च्य तस्यैवं मननं त्विमम् ॥३२४॥
कर्मणा भिन्नपादुकं स्वकरादुरितनिरूपितम् ।
संस्कृत्य चक्रदण्डं च शिखाकल्पेन विन्यसेत् ॥३२५॥
ततो विशिष्टतं च त्रिविक्रमगणभूषितम् ।

ध्वजाग्रशिराग्रे तु यत्तद्दीर्घमकृत्रिमम् ॥३२६॥
दैर्घ्याद्द्वादशमांशेन द्विनवांशेन वा ततम् ।
कृत्वास्त्रसन्निधिं तस्मिन् लाञ्छनाख्ये पुरा पटे ॥३२७॥
निवेश्य ध्वजदण्डाग्रे गन्धाद्यैरर्चयेत्ततः ।
सुधामयादिबिम्बानां स्थापने मुनिपुङ्गवाः ! ॥३२८॥
बिम्बप्रासादयोर्विप्राः ! युगपत् स्थापनं भवेत् ।
प्रासादस्य प्रतिष्ठेत्थं समासात्कीर्तिता मया ॥३२९॥
मण्टपादि प्रतिष्ठां च शृणुध्वं मुनिपुङ्गवाः ! ।
प्रथमं मण्टपं चाग्र्यं तथैवास्थानमण्टपम् ॥३३०॥
प्राकारं पचनावासं कोशागाराम्बरास्पदे ।
पुष्पपानीयशाले च तथा वै यागमण्टपम् ॥३३१॥
धान्यागारादिकं सर्वं सद्क्षाल्य बहुभिर्जलैः ।
पर्यग्निकरणं चैव मार्जनोल्लेखनादिकम् ॥३३२॥
कारयित्वा द्विजवरैर्गव्यैः सम्प्रोक्ष्य पञ्चभिः ।
वितानाद्यैरलङ्कृत्य मण्टपादीन् विशेषतः ॥३३३॥
प्रधूपयित्वागरुभिर्दीपानारोप्य सर्वतः ।
सुधाचूर्णरलङ्कृत्य अक्षतान्विकिरेद्भुवि ॥३३४॥
पुण्याहं वाचयित्वा तु वास्तुपूरुषमर्चयेत् ।
धान्यपीठं प्रकल्प्याथ कुम्भं तत्र सलक्षणम् ॥३३५॥
सोपकुम्भं सकरकं न्यस्य प्राग्वत्सलक्षणम् ।
तत्र देवं समभ्यर्च्य साङ्गं सपरिवारकम् ॥३३६॥
कुण्डे वा स्थण्डिले वापि प्रतिष्ठाप्यानलं ततः ।
तत्र देवं तु सन्तर्प्य पूर्णान्तं देशिकोत्तमः ॥३३७॥
सुमुहूर्ते तु सम्प्राप्ते प्रोक्षयेत्कुम्भतोयतः ।
सर्वत्र मूलमन्त्रेण देशिको मन्त्रवित्तमः ॥३३८॥

इत्येव मण्टपादीनां प्रतिष्ठाविधिरीरित ।
मण्टपादिप्रतिष्ठाया गोपुरस्थापने तथा ॥३३९॥
क्ष्मापरिग्रहपूर्वं तु गर्भन्यास समाचरेत् ।
गर्भं तु मण्टपादीनामग्निकोणे तु वि यसेत् ॥३४०॥
गोपुरस्य भवेद्याम्ये गर्भन्यासो मुनीश्वरा ! ।
गोपुरस्य प्रतिष्ठा तु कुर्यात्प्रासादवद्बुध ॥३४१॥
तत्र वै देवतान्यासे विशेष कथ्यतेऽधुना ।
शाखामूलादिषु यजेच्चक्राद्यान् धर्मपश्चिमान् ॥३४२॥
कवाटद्वितये पूज्यौ कालाग्निर्वरुणस्तथा ।
न्यसेज्जङ्घासमूहे तु भवोपकरण महत् ॥३४३॥
मूर्तय केशवाद्यास्तु जङ्घाग्रोपरि संस्थिता ।
वि-न्यसेत्प्रस्तरोद्देशे चक्राद्यायुधसञ्चयम् ॥३४४॥
पूर्ववद्वेदिकाग्रीवाशिखरोद्देशभूमिषु ।
न्यस्या विभवदेवाश्च पद्मनाभान्तिम द्विजा ! ॥३४५॥
तले तले गोपुर-य दिङ्मूर्तीश्च यथापुरम् ।
प्रासादोक्तविधानेन कल्पयेन्मुनिपुङ्गवा ! ॥३४६॥
ततस्तु करुद्याधारवेदिकायास्तले द्विजा ! ।
सुदर्शन तु षडर यजेत्कुम्भचतुष्टये ॥३४७॥
वासुदेवादिका पूज्या कुम्भषट्के कृते सति ।
सम्पूज्य केशवादीनां षट्क कुम्भाष्टके कृते ॥३४८॥
केशवाद्यष्टक पूज्य द्विषट्के द्वादशार्चयेत् ।
युग्मयोगेन कुम्भाना स्थापन मोक्षकाङ्क्षिण ॥३४९॥
इतरस्यायुग्मयुक्त्या कुम्भस्थापनमाचरेत् ।
एकस्मिन् स्थापिते कुम्भे वासुदेव समर्चयेत् ॥३५०॥
तथादौ केशवादींश्च पूजयेद्द्विजसत्तमा ! ।

इत्येव देवतावृन्दं गोपुरे न्यस्य पूजयेत् ॥३५१॥
प्रासादादिप्रतिष्ठाया विधिरेव मुनीश्वराः ! ।

इति श्रीपाञ्चरात्रे ईश्वरसंहितायां
प्रासादादिप्रतिष्ठाविधिर्नाम
षोडशोऽध्यायः ।

अथ सप्तदशोऽध्यायः ।

नारदः ।

अथ बिम्बस्य पीठादेर्लक्षणं वक्ष्यते द्विजाः ! ।
चित्रमृत्काष्ठशैलोत्थं सलोहमयमेव वा ॥१॥
भेदभिन्नं द्विजातीनां हितं बिम्बं फलार्थिनाम् ।
तदभिन्नमकामानां प्राप्तं चाप्यविरोधकृत् ॥२॥
अत्र चित्रमयं विद्धि भित्तिकाष्ठाम्बराश्रितम् ।
पुनर्वर्णक्रमेणैव चतुर्धा चाम्बरोत्थितम् ॥३॥
तच्च कार्पासकौशेयक्षौमशाणमयं तु वै ।
मृज्जमेव सितायुत्थं वार्क्षं विविधमेव च ॥४॥
आश्वत्थं मधावृक्षोत्थं श्रीपर्णीसुरदारुजम् ।
सालतालमयं चैव शाकवल्लीन्दुसारजम् ॥५॥
एवं द्वयं द्वयं विद्धि द्विजातीनां यथाक्रमम् ।
अतोऽन्ये दृढमूलाश्च सारवन्तो हि याज्ञिकाः ॥६॥
साधारणाश्चतुर्णां तु प्रतिमाद्ये च कर्मणि ।
सामान्यं भुक्तिमुक्त्यर्थमश्मं मृण्मयवत्स्मृतम् ॥७॥

१— नैशुप ये इति-(पा)

तारहाटकताम्रोत्थमारकूटमयं तथा ।
एवं हि भूमयो वस्त्रपाषाणा धातवो द्रुमाः ॥८॥
वज्रादयोखिला रत्नाः सितरक्तादिलक्षणाः ।
असामान्याः फलेप्सूनां लाभालाभवशात्पुनः ॥९॥
सम्यक् स्वमूर्तिमन्त्रैस्तु जपहोमार्चनादिना ।
नयेत्सामान्यभासित्वं तथा तत्कारणार्चनात् ॥१०॥
यजेत्सेन्द्रां धरां शैलमृदापादनकर्मणि ।
एवं पटद्रुमार्थं तु वरुणं सवनस्पतिम् ॥११॥
सरत्नानां च धातूनां सम्बन्धेर्केन्दुपावकान् ।
रत्नाश्रयेण धात्वर्थे नार्च्योद्देशेन वै विना ॥१२॥
तथार्चनासनेनैव चक्रपद्ममयादिना ।
न रात्नी प्रतिमा शस्ता ध्यायिनां ध्यानसिद्धये ॥१३॥
केवला लघुमाना च प्रमाणावयवोज्झिता ।
वर्णाश्रमगुरुत्वाच्च स्वामित्वादखिलस्य च ॥१४॥
भूतादिदेवरूपत्वादुत्तमाद्येषु वस्तुषु ।
नृपश्चार्हति वै नित्यं सविशेषपदे स्थितः ॥१५॥
किं पुनर्योऽफलाकाङ्क्षी भक्तिश्रद्धापरः सदा ।
बुध्वैवं चित्रबिम्बार्थी यत्नेनेदं समाचरेत् ॥१६॥
गुह्यकान् गृहदेवांस्तु हृदार्च्यार्घ्यादिना पुरा ।
मलभस्मतुषाङ्गारकेशकीटनखास्तृणम् ॥१७॥
मूलकण्टकचर्मास्थिसामान्येऽह्यगाहि भित्तिका ।
भवत्यनर्थदावश्यमतः प्राक्चतुरङ्गुलम् ॥१८॥
विहाय मृद्दलं भित्तेरीषद्भिम्बात्तु वाधिकम् ।
उक्तदोषविमुक्ताथ पञ्चगव्येन साम्भसा ॥१९॥
मर्दितया मृदा भूयस्तद्भित्त्यर्शं मयूपं च ।

शालेन काष्ठफलके मृगचर्मसमा पुरा ॥२०॥
दर्वि विहाय शुद्धयर्थं तुरीमुक्त तु वै घटम् ।
प्रक्षाल्य सलिलैनैव त्वाम्रजसेन सप्तधा ॥२१॥
छन्मत्रेण तु सास्त्रेण मूर्तिमन्त्राभिर्चितेन च ।
तीर्थदेशान्नदीतीरात्पुण्यक्षेत्राच्च पर्वतात् ॥२२॥
अपाम्य दोषसङ्कीर्णामूर्ध्वादादाय मृत्तिकाम् ।
सावचूर्ण्याय सशोप्या मूपलिप्ते धरातले ॥२३॥
शाणचूर्णं च कार्पास समूत्र चापिह्न तथा ।
कृत्वा पाषाणभिन्न प्राग्योज्य तत्र सवालुकम् ॥२४॥
इंपद्गोमययुक्तेन भूरिक्षीरघृतादिना ।
भावयेत्पञ्चगव्येन खादिरेण कषेण च ॥२५॥
सिद्धार्थकान(ल)सीक्षेतिलैर्येन तु वै सह ।
छेदयेच्च त्रिसाह भाण्डे कृत्वायमात्मके ॥२६॥
मारुतानलसूर्येन्दुदर्शनेन विनैव हि ।
तया समाप्य तद्बिम्बं शुभकाष्ठान्तरीकृतम् ॥२७॥
वल्कलच्चैव तहानां कृत्वा प्रक्षाळनं ततः ।
मार्जनं मुनिना भूयस्तया तन्मन्त्रितेन च ॥२८॥
शक्त्या प्रवर्तमानस्तु बिम्बसाधनकर्मणि ।
सर्वत्र चास्त्रमन्त्रस्य कुर्यान्निर्विघ्नशान्तये ॥२९॥
पूजनं हवनं भूतबलिदानं सदक्षिणम् ।
सम्यक्प्रणवाढ्ये तु मन्त्रसामान्यमेव हि ॥३०॥
सङ्कल्पाग्रहणे विशेषस्तु तु उच्यते ।
मधुत्रामन्तकाले तु निमित्तमुपलक्ष्य च ॥३१॥

१— मन्त्रहरण इति—(पा)

विशेषार्चनयात्राया तच्छुभेन शुभोदय ।
अशुभेन निमित्तेन यात्रा विघ्नवती भवेत् ॥३२॥
विरामेण तु जप्येन शान्तिस्वस्त्ययनादिना ।
निवर्तनेन तद्धन्याद्दहने शुभवृ(द्)त्यत ॥३३॥
मन्त्रमभ्यर्च्य यात्रायामभ्यर्थ्याज्ञा विनम्य च ।
नैवेद्यशेषमुग्रामचारस्थ सयतेन्द्रिय ॥३४॥
प्राङ्मुख सम्मरेन्मन्त्र समुत्थायागतोदये ।
परिज्ञाय परा मूर्ति तन्मूर्त्यन्तरमेव वा ॥३५॥
यायात्तदीय दिग्भाग तदभावात्तु चान्यदिक् ।
सहायैरप्रमत्तैस्तु शिल्पिभि सह सवृत ॥३६॥
लाजदध्यक्षतै कुम्भै यायात्पुष्पपुरस्सरै ।
सौमनस्य महोत्साहस्त्वगम्पन्दस्तु दाक्षिण ॥३७॥
शुभा वाणी ध्वज शङ्खतन्त्रीवाद्यफलादय ।
गोगजाश्वद्विजा कन्या नरभाण्ड च मृद्धि ॥३८॥
आर्द्रमासान्यन्नद्वारो मदिरासिर्घृत पय ।
सिद्धान्न शालिर्नीजादि दर्भा सद्धुममञ्जरी ॥३९॥
छत्र वस्त्र ध्वजो यान रोचना कुङ्कुम मधु ।
दर्पण चामरो हारो धातव शस्त्रवर्जिता ॥४०॥
रत्नानि वैबुध बिम्ब मधुमत्तोद्यकातर ।
जीवन्मत्स्या निमित्त च मनसो यदखेददम् ॥४१॥
तन्मवे दर्शने श्रेष्ठ तन्स्वेददमशोभनम् ।
स्वगृहद्वारदेशाद्य पथि गमनदापि ॥४२॥
क्रममाणे निमित्त च यन्न यदृच्छति तेन हि ।
निर्गत्य नगरग्रामात्प्रेत्यार्थे सोमभेय वा ॥४३॥

१— उग इति—(T)

गृह्णीयाच्छाकुन चिह्न नकुलादिमय त्वत ।
पूर्णात्सार्धाधिकात्कोशात् हितकृन्मृगदर्शनम् ॥४४॥
दिङ्मुखे निर्मले सिद्धिर्ज्ञेयत्र विशेषत ।
सिद्धिकृच्चाम्बर स्वच्छ सुदीप्ता भास्करादय ॥४५॥
मरुत्सुखावह स्निग्धप्रदक्षिणगति स्थिर ।
दिव्याद्युत्पातनिर्मुक्त स काल सिद्धिसूचक ॥४६॥
हस शुको भरद्वाज कोकिल खञ्जरीटक ।
मयूरो भ्रमरश्चक्रवाकाद्या खेचरा शुभा ॥४७॥
भूचरा नकुला सौम्या सितोहिर्म्रहगोधिका ।
गन्धाखुर्जम्बुकश्चैव सर्वेषा दर्शन शुभम् ॥४८॥
मृगाणा हरिण सिंहो व्याघ्र शशकचित्रका ।
सिद्धिससूचना सर्वे सर्वेषा विहित तु वै ॥४९॥
प्रदक्षिण विशेषेण व्यत्यये जम्बुक शुभ ।
द्विजातिक(दीना)रुत स्निग्ध सिद्धिकृत्तचसौख्यदम् ॥५०॥
समुत्पन्ने निमित्ते तु धातुसङ्क्षेपकर्मणि ।
प्रतीक्षितु न युज्येत यदा शान्ति तदाचरेत् ॥५१॥
पूर्वोक्ता चित्तशुद्ध्यर्थं सविशेषा सदक्षिणाम् ।
प्रविश्य विधिवत्क्षेत्र निरीक्षेत स्वतेजसा ॥५२॥
पश्येच्छिला गुणवतीं तरु वा कर्मणि क्षमम् ।
वर्जयेदतिवृद्धा च परिक्षीणत्वच तथा ॥५३॥
सभग्ना दावदग्धा च निदशब्दा रूक्षविग्रहाम् ।
सवालुका च सच्छिद्रा बिन्दुयुक्ता पुटोद्वहाम् ॥५४॥
आखुदर्दुरमीनाहिमार्जारशशकोपमाम् ।
सवर्णपरवर्णास्थिसिराजालेन सन्तताम् ॥५५॥
प्रागुक्तरूपम्याभावादमीषा ग्रहण हितम् ।

पारावतशुकाब्जाभा मधुमाञ्जिष्ठमाषभा ॥५६॥
गुर्वी हृद्या शुभा स्निग्धा अतो वान्याभिशस्यते ।
सुहृद्ये भूतले मग्ना जलाशयतलस्थिता ॥५७॥
छन्ना तरुवरेणैव वनराजिष्ववस्थिता ।
वेष्टिता वल्लिवृन्देन तथैवौषधिभिर्वृता ॥५८॥
ऊर्ध्वगा जानुदेशाच्च एकपिण्डीकृता मृदुः ।
मोक्षदा च खवक्त्रा वै भोगदा सुतलानना ॥५९॥
दिङ्मुखी चोभयकरी प्राङ्मूर्धा भूतिरायुषे ।
अतोऽन्यमस्तका कीर्तियशोवृद्धिकरी मता ॥६०॥
वंशवृद्धिदमारोग्यशान्तिकृत्कं यदाप्यदिक् ।
पुष्टिमुन्नतिसन्मेधां यच्छत्युत्तरमस्तका ॥६१॥
एवं पुरा परिज्ञाय पृष्ठोरुचरणं शिरः ।
बलात्मना सवीर्येण प्रोद्धृत्य सह शिल्पिभिः ॥६२॥
प्राङ्मुखं चोत्तरस्यां वै प्राग्भागे चोत्तराननम् ।
स्थलेवतार्य मन्त्रेशमिष्ट्वा स्रवचन्दनादिना ॥६३॥
ध्यात्वा शिलान्तः संरुद्धं सम्पूज्य जुहुयात्ततः ।
उक्तदिग्द्वितयस्यैकदेशे कुण्डेथ वा स्थले ॥६४॥
दत्वा पूर्णाहुतिं ध्यानजपयुक्तः क्षिपेदहः ।
निशागमेर्चनं कुर्याद्बलिभिर्भूततर्पणम् ॥६५॥
नैवेद्यशेषमश्नीयान्मन्त्रविन्यस्तविग्रहः ।
तद्दक्षिणेन दर्भेषु प्राक्शिराः प्रस्वपेज्जपन् ॥६६॥
पूर्ववत्स्वप्नलाभार्थमुत्थाय रजनीक्षये ।
कुर्यात्स्वकृत्यं जुहुयादशुभस्वप्नशान्तये ॥६७॥
अभिनन्द्य शुभं स्वप्नं हृदयावर्जकं स्फुटम् ।
पर्वतं च समासाद्य स्थानं तदुपलस्थलम् ॥६८॥

स्फटिकामलसङ्काश पश्येद्वा तप्तहेमवत् ।
निर्धूमाङ्गारकूटाभ तदाशु लभते शुभम् ॥६९॥
सशस्त्रमथ चादाय मुद्गर चास्त्रमन्त्रितम् ।
प्राङ्मुखश्चतुरो वाराम्ताडयेन्मस्तकावधे ॥७०॥
पाददेशाच्च वा मध्यादवेक्ष्य च फल पुरा ।
चतुरश्रायता कृत्वा भित्त्वा पीठेन यन्त्रगाम् ॥७१॥
आनाय्य वा पृथक्पीठा छत्वा कर्मालय शुभम् ।
विन्यस्य वै पुरा तेन विधिना चोद्धरेच्छिलाम् ॥७२॥
पीठार्थे भिन्नवर्णा च तद्रूपा वा यथेच्छया ।
अङ्गाङ्गिभावगुणवद्दृष्टदा तु मुनीश्वरा ! ॥७३॥
काष्ठलोहमणीना चाप्यलाभे सति वै शुभम् ।
सति लाभे न वै कुर्याद्विपर्यय व्यत्यय च वा ॥७४॥
तत्कालमेव चाहृत्य रक्षाधारा शिला शुभाम् ।
पुस्त्रीनपुसका थाभि शिलाभिस्त्रितय हितम् ॥७५॥
बिम्बाख्य विद्धि चाभावात्सर्वै बिम्बोपलात्तु वै ।
निषिद्ध भगवद्बिम्ब रत्नपीठमयोपलात् ॥७६॥
लक्ष्म्याद्या देवताकारा स्वोपला सर्वसिद्धिदा ।
या हुतानलबिन्दूनवै सनादगभिमुञ्चति ॥७७॥
पुमानिति शिला सा वै विज्ञेया सलनाऽबला ।
आदिमध्यावसानेषु नाग्निर्यस्या न च ध्वनि ॥७८॥
नपुसकेति सा ज्ञेया स्वपदस्था फलप्रदा ।
ज्ञात्वैव देवदेवस्य लक्ष्म्यादीना तथैव च । ७९॥
सर्वेषा परिवाराणा पीठादीना तथैव च ।
प्रासादादे शिलाश्चैव तद्यन्मन्त्रैर्यथाक्रमम् ॥८०॥
समभ्यर्च्य शिला सर्वा सद्गृह्य शस्त्रादिषु ।

समारोप्य समानीय बिम्बादीन् कारयेद्गुरुः ॥८१॥
शिलाग्रहणमित्युक्तं दारुग्रहणमुच्यते ।
आपर्वलान्त-सञ्चारो निर्व्रणं सरलं बृहत् ॥८२॥
रोगमुक्तं न सिंहाद्यैः मानुषैः सक्षतीकृतम् ।
नानिलाशनिदावाग्निहतवीर्यं न वाह्यगम् ॥८३॥
सलक्षणे तु सुस्निग्धे भूभागे चोन्नते स्थितम् ।
प्राग्वत्तमधिवास्यादौ परेऽहन्यर्चयेत्ततः ॥८४॥
तदाश्रिताभिज्ञात्वस्वरूपां देवतां पठन् ।
इहाश्रितात्मने तुभ्यं नमः सर्वेश्वराय च ॥८५॥
क्षमस्वावतरान्यत्र सन्तिष्ठात्र चिदात्मना ।
अथास्त्रोदकसुद्धेन विलिसेन घृतादिना ॥८६॥
जपन्मन्त्रवरं वौषट् छिन्द्याद्वै क्रकचादिना ।
प्राच्यामुदीच्यामैशान्यां पतत्यभिमुखं यदि ॥८७॥
परिज्ञेयं शुभं कुर्यादन्यपातेऽर्चनादिकम् ।
आनाय्या देवभागं चाप्यनादेयेन वै विना ॥८८॥
बिम्बमिच्छति वै कर्तुं वार्क्षं चैवातिविस्तृतम् ।
अनेकभुजवक्त्रास्त्रभूषितं तत्तदाश्रितैः ॥८९॥
भिन्नैरवयवैर्मानयुक्तैः श्लिष्टैर्न दुष्यति ।
भक्तिश्रद्धावशाच्चैव सर्वं चार्णमयं यतः ॥९०॥
एवमेकतमस्यापि भक्तिपूर्वस्य वस्तुनः ।
ग्रहणं च पुरा कृत्वा कुर्यादाकारमीप्सितम् ॥९१॥
तादर्थ्येन तु सामान्यं सौम्यमानं पुरोच्यते ।
ऋज्वाद्यप्रमविकारं च व्यापकं त्वेकमूर्तिमत् ॥९२॥
भूभागं सुसमे श्लक्ष्णे मानसूत्रमीर्य तेन वै ।
निरूप्यावयवाना च लक्ष्म बिम्बाकृतिपूर्वकम्॥९३॥

अष्टाधिकशतांशो य शाक्तेरङ्गुलं च तत् ।
द्वे अङ्गुले कला नेत्रं गोळकं भाव एव च ॥९४॥
अङ्गुळादष्टभागो य स यव परिकीर्तित ।
षट्कल च परिज्ञेय तालं बिम्बादिकर्मणि ॥९५॥
मुखाज्ञनाभिमेढ्रूमात्तालमानान्यथोरयुक् ।
द्विकले च तथा जङ्घे गुल्फं जानुगळं च क्रम् ॥९६॥
त्र्यङ्गुळं त्र्यङ्गुळ ज्ञेयमित्युन्मानमुदाहृतम् ।
जटाधराणा बिम्बाना दीर्घङ्कत्ववशेन तु ॥९७॥
चतुष्कल च त्रिकल मान मानाद्बहि क्षिपेत् ।
त्रिपञ्चसप्तशिखरो मौळिरष्टकलोन्नत ॥९८॥
निर्जटाना ललाटोर्ध्वे मकुट वा सुशोभनम् ।
तालेन ह्रासवृद्धी तु कार्ये त्वत्र व्यपेक्षया ॥९९॥
यथोदितेषु भागेषु एकैकेनाङ्गुळेन तु ।
आस्यनासाललाटार्थं वदनार्ध भवेत्तिधा ॥१००॥
ततोऽग्रत कलामान घ्राण स्यात्तिलपुष्पवत ।
कलार्धेन तु विस्तार सतनिम्नत्पुटद्वये ॥१०१॥
नासाग्रमासनिर्मुक्त गोजीमान चतुर्यवम् ।
तच्चतुर्यवमानेन घ्राणाग्रमान्तरं कृतम् ॥१०२॥
अर्धाङ्गुळं चोत्तरोष्ठमधरोष्ठ तु चाङ्गुळम् ।
गोळक चिबुकं विद्यात् सृक्किणी चतुरङ्गुळे ॥१०३॥

कुर्यात्पद्मदलाकारं नेत्रार्धं वृत्ततारकम् ।
तारादैर्घ्यत्रिभागेन त्वाद्यम्यान्यस्य चाधिका ॥१०६॥
यवेनैकेन सार्धेन ज्योतिस्तत्पञ्चभागिकम् ।
त्रिभागेनापि विहितं तत्पद्मदललोचनं ॥१०७॥
द्विपञ्चयवं नेत्रकोशं विस्तारेण यवाधिकम् ।
सार्धांगुलद्वयं दैर्घ्याद्भूलते द्विकले स्मृते ॥१०८॥
मध्यतो द्वियवे बालचन्द्रतुल्ये क्रमक्षते ।
तदन्तरं कलार्धं च तत्कोटी समसूत्रके ॥१०९॥
श्रोत्रे त्र्यङ्गुलविस्तीर्णे आयामेन द्विगोळके ।
द्वियवं कण्ठपरिधिः पर्वणी द्वे चतुर्यवे ॥११०॥
मध्यं ताभ्यां तथा विद्धि द्रोणी सार्धांगुळा तु वै ।
कलार्धेन तु तच्छिद्रं पाशमानं यथारुचि ॥१११॥
अङ्गुलाद्विकलान्तं तु वैपम्यमपि तत्र तत् ।
अन्तश्छिद्रविनिर्मुक्तं तद्विज्ञेयं चतुर्यवम् ॥११२॥
सदलङ्करणोपेतमेवं श्रोत्रद्वयं स्मृतम् ।
चतुष्कळं ललाटं तु शिखरे द्वे द्विगोळके ॥११३॥
उच्छ्रायात् त्र्यङ्गुले चैव अग्रतोऽङ्गुलविस्तृते ।
केशभूमेः समुद्भूतं ललाटोपरि संस्थितम् ॥११४॥
कुर्यात्कलार्धमानं तु वक्त्रं चालकमध्यमम् ।
कपोलपरिधिं कुर्यात्कर्णात्कण्ठगतं समम् ॥११५॥
तन्मध्ये वर्तुलौ गण्डौ परिरिछिन्नौ पुरोदितैः ।
शिरसः परिणाहं तु विद्धि षट्त्रिंशदङ्गुलम् ॥११६॥
श्रोत्रकोटिद्वयाच्चैव मस्तकस्य यदन्तरम् ।
तत् षोडशाङ्गुलं विद्धि वर्तिभ्यां पृष्ठतस्तथा ॥११७॥
सार्धताळं पश्चिमं स्यात् ललाटात्कगुहान्तरम् ।

अष्टाधिकशतांशो य मोक्षतेरङ्गुळ च तत् ।
द्वे अङ्गुळे कला नेत्र गोळक भाव एव च ॥९४॥
अङ्गुळादष्टभागो य स यव परिकीर्तित ।
पट्कल च परिज्ञेय ताल बिम्बादिकर्मणि ॥९५॥
मुखाङ्गनाभिमेढ्रक्ष्मास्तालमानास्त्वथोरुयुक् ।
द्विकले च तथा जङ्घे गुल्फ जानुर्गळ च कम् ॥९६॥
त्र्यङ्गुळ त्र्यङ्गुळ ज्ञेयमित्युन्मानमुदाहृतम् ।
जटाधराणा बिम्बाना दीर्घह्रस्ववशेन तु ॥९७॥
चतुष्कळ च त्रिकल मान मानाद्बहि क्षिपेत् ।
त्रिपञ्चसप्तशिखरो मौळिरष्टकलोन्नत ॥९८॥
निर्जटाना ललाटोर्ध्वे मकुट वा सुशोभनम् ।
तालेन ह्रासवृद्धी तु कार्ये त्वत्र व्यपेक्षया ॥९९॥
यथोदितेषु भागेषु एकैकेनाङ्गुळेन तु ।
आस्यनासाललाटार्धे वदनाश त्रिधा ॥१००॥
ततोऽग्रत कलामान घ्राण स्यात्तिलपुष्पवत् ।
कलाधेन तु विस्तार सार्धतिलपुटद्वये ॥१०१॥
नासाग्रग्रामनिर्मुक्त गोणीमान चतुर्यवम् ।
तच्चतुर्यवमानेन घ्राणाग्रेणान्तरीकृतम् ॥१०२॥
अर्धाङ्गुळ चोत्तरोष्ठमधरोष्ठ तु चाङ्गुळम् ।
गोत्र चिबुक वित सृक्किण्यौ चतुरङ्गुळे ॥१०३॥
आरभ्य नासिकाग्रान्त मानभागसमाश्रिते ।
कुर्यान्नेत्रश्रुतिच्छिद्रे तत्र नेत्रे कलान्तरे ॥१०४॥
कलायामसम दैर्घ्यात्कलार्धेन तु विस्तृतम् ।
चतुरङ्गुळाकार क्रियतेनासिक तु तत ॥१०५॥

१ नासि दर्शि (पा)

कुर्यात्पद्मदलाकारं नेत्रार्धं वृत्ततारकम् ।
तारादैर्घ्यत्रिभागेन त्वाद्यम्यान्यस्य चाधिका ॥१०६॥
यवेनैकेन सार्धेन ज्योतिस्तत्पञ्चभागिकम् ।
त्रिभागेनापि विहितं तत्पद्मदळलोचनं ॥१०७॥
द्वियवश्च नेत्रकोशं विस्तारेण यवाधिकम् ।
सार्धांगुळद्वयं दैर्घ्याच्चूल्ले द्विस्के स्मृते ॥१०८॥
मध्यतो द्वियवे बालचन्द्रतुल्ये क्रमक्षते ।
तदन्तरं कलार्धं च तत्कोटी समसूत्रके ॥१०९॥
श्रोत्रे त्र्यङ्गुळविस्तीर्णे आयामेन द्विगोळके ।
द्वियवं कण्ठपरिधिं पर्वणी द्वे चतुर्यवे ॥११०॥
मध्यं ताभ्यां तथा विद्धि द्रोणी सार्धांगुळा तु वै ।
कलार्धेन तु तच्छिद्रं पाशमानं यथारुचि ॥१११॥
अङ्गुळाद्विकलान्तं तु वैषम्यमपि तत्र तत् ।
अन्तश्छिद्रविनिर्मुक्तं तद्विज्ञेयं चतुर्यवम् ॥११२॥
सद्लङ्करणोपेतमेव श्रोत्रद्वयं स्मृतम् ।
चतुष्कळं ललाटं तु शिखरे द्वे द्विगोळके ॥११३॥
उच्छ्रायात् त्र्यङ्गुळे चैव अग्रतोऽङ्गुळविस्तृते ।
केशभूमे समुद्भूत ललाटोपरि संस्थितम् ॥११४॥
कुर्यात्कलार्धमानं तु वक्त्रं चाल्कमस्त्रयम् ।
कपोलपरिधिं कुर्यात्कर्णात्कण्ठगतं समम् ॥११५॥
तन्मध्ये वर्तुलौ गण्डौ परिच्छिन्नौ पुरोदितैः ।
शिरसः परिणाहं तु विद्धि षट्त्रिंशदङ्गुलम् ॥११६॥
श्रोत्रकोटिद्वयाच्चैव मस्तकस्य यदन्तरम् ।
तत् षोडशाङ्गुळं विद्धि वर्तिभ्यां पृष्ठतस्तथा ॥११७॥
सार्धताळं पश्चिमं ललाटात्कगुहान्तरम् ।

सकम्बुसदृशी ग्रीवा मूलमध्याग्रतो हि सा ॥११८॥
परिधेर्द्वादशकला एकविंशाङ्गुळाग्रतः ।
अष्टादशाङ्गुळा चैव सांशात् त्र्यंशेन विस्तृता॥११९॥
तन्मूलं विस्तृतौ स्कन्धौ तुङ्गौ वृत्तायतौ समौ ।
षडङ्गुळं तद्बाहुल्यं बाहुमानं तथोच्यते ॥१२०॥
स्कन्धोत्तमाङ्गं त्रिकलं सन्ध्यन्तं षट्कलं स्मृतम् ।
सन्धेर्वै मणिबन्धान्तं मानं नवकलं स्मृतम् ॥१२१॥
मणेर्मध्यमशाखान्तो हस्तः सप्ताङ्गुळो मतः ।
परिज्ञेयं कलाहीनं तन्मानं मध्यमाङ्गुळे ॥१२२॥
तच्चतुर्यवहीनाच्च सनामा तु प्रदेशिनी ।
द्विकला च परिज्ञेया साङ्गुष्ठा तु कनीयसी ॥१२३॥
द्विपर्वो च स्मृतोऽङ्गुष्ठः सर्वाश्चाङ्गुळि विस्तृता ।
सर्वासां मूलपर्यन्ताद्ध्रासयेच्च यवं यवम् ॥१२४॥
अग्रपर्वार्धमानेन कार्या लिङ्गोपमा नखा ।
मानमङ्गुष्ठमूलस्य परिधेश्चतुरङ्गुळम् ॥१२५॥
तच्चतुर्यवहीनं च ज्ञेयं त्रिष्वङ्गुळीषु च ।
न्यूनाङ्गुळैः कला मार्गा प्राग्वद्ध्रासश्च वेष्टनात् ॥१२६॥
अङ्गुष्ठमद्गुळं चाग्रातिस्रोन्या पञ्चता स्मृता ।
अर्धाङ्गुळाग्रतोन्यूना वित्त मध्यं करास्तम् ॥१२७॥
न जलक्ष्मो(चलक्षा)चाग्रात्साङ्गुष्ठाद्द्विकलं करम् ।
ईषन्निम्नतलं चैव लक्ष्मरेखाविभूषितम् ॥१२८॥
शाखामूलावधे पाणौ बाहुल्य द्वे यवाङ्गुळम् ।
चतुर्यवाधिकं चैव मणिबन्धावधे स्मृतम् ॥१२९॥
मध्ये करार्धहीनं तु तद्बाहुल्यमुदाहृतम् ।

१— तुल्यम्— इति (पा)

मणिबन्धावधेर्बाहुवेष्टनं षट्कलं स्मृतम् ॥१३०॥
सन्धेः सप्तकलं वित्त साङ्गुलं त्र्यवमप्युत ।
हीनमर्धांगुळेनैव मूलाद्वै नवगोळकम् ॥१३१॥
तथैव सन्धेरूर्ध्वं तु विस्तारः प्राग्वदत्र च ।
अत्रापि पूर्ववद्दृष्ट्या कार्यान्तस्था क्षितिः स्वयम् ॥१३२॥
तालं गळावधेस्त्यक्त्वा तन्मानेनान्तरीकृते ।
स्तनद्वयं समं कुर्याच्चाद्वारा च समांसळा ॥१३३॥
निम्नं ह्यद्योळकार्धेन ऊर्ध्वतो रलराङ्ग्युतम् ।
स्तनाभ्यां त्रिकलौ पार्श्वौ त्रियवं स्तनमण्डलम् ॥१३४॥
यवोन्नतं तथाचाग्राद्विस्तृतं तेन चूचुकम् ।
लोचनं त्रियवं सार्धं कक्षमानमुदाहृतम् ॥१३५॥
स्कन्धमानविनिर्मुक्तं पृष्ठमंसावधेः समम् ।
द्रोणीनिकाशसदृशमध्वराशेः समांसळम् ॥१३६॥
कक्षान्तर्वेष्टनं वित्त पञ्चतालं सलोचनम् ।
विनांगुळद्वयेनैव द्वे ताले द्विगुणीकृते ॥१३७॥
यवत्रयसमायुक्ते वित्त तत्कुक्षिवेष्टनम् ।
त्रियवोनं कलामानं विज्ञेयं नाभिमण्डलम् ॥१३८॥
तन्मानं तु त्र्यवोनं तु तन्निम्नत्वं विधीयते ।
परिधिर्नाभिमध्ये तु त्रिताल सत्रिलोचनः ॥१३९॥
षड्गोळकं च तन्मानं परिध्यर्थं कटेः स्मृतम् ।
करिकुम्भोपमौ पीनौ परितः पञ्चगोळकौ ॥१४०॥
स्फिजौ कौपीनराजौ च द्व्यंगुळा मूलतः स्मृता ।
परितोंगुळमानासौ मेढ्रं तु त्रिकळं स्मृतम् ॥१४१॥
चतुर्यवं च तत्कोशं वेष्टनं तु षडंगुळम् ।

१– पञ्च–द्व्यमम्– इति–(पा)

व्यगुलौ वृषणौ दैर्घ्यान्मूलान्त समविस्तृतौ ॥१४२॥
परितो व्यगुळ वित्त वायुरन्ध्र सुवर्तुळम् ।
ऊरुमान परिज्ञेय मध्यभूमेर्नवाङ्गुळम् ॥१४३॥
षट्कल मूलदेशाच्च अग्रा त त्रिकळ स्मृतम् ।
हीनमेकाङ्गुळेनैव द्विकल जानुमण्डलम् ॥१४४॥
विस्तारेणोन्नतत्वेन चतुर्यवसम तु तत् ।
जङ्घामूले परिज्ञेये वेष्टन नवगोळकम् ॥१४५॥
द्विमत्राङ्गुळक मध्ये सार्धपञ्चकल तत ।
अत्रापि वेष्टनाद्वित तृतीयाशेन विस्तृतिम् ॥१४६॥
मध्यमूलाग्रसानेभ्यो विस्तारमनुगुण्यत ।
भुजाभ्या मध्यदेशस्य तथाङ्गुळिगणस्य च ॥१४७॥
ऊरुयुग्मस्य जङ्घाभ्यामापाद्य द्विपदस्तता ।
सताळभागमान च दैर्घ्य वै चरण स्मृतम् ॥१४८॥
पार्ष्णी द्विगोळकतले तन्मध्ये साङ्गुळ कले ।
त्रिकल चाग्रतश्चैव बाहुल्येन कलासमम् ॥१४९॥
पादगुष्ठनिकागाग्रियगोन प्रकीर्तितम् ।
बाहुल्य च कलामान गुल्फदेशाच्च साङ्गुळम् ॥१५०॥
कनीयोङ्गुळिमूलाच्च गुल्फान्त पिण्डिताङ्गुळम् ।
जङ्घान्तमानदेशाच्च वेष्टन सप्तकोवनम् ॥१५१॥
कलाहीन तदैवाग्रपरिणाहो विधीयते ।
चरण विधिना तेन पृष्ठपृष्ठ समाप्य त ॥१५२॥
व्यङ्गुळेन च तद्दैर्घ्यात्पुल्फस्य च दीर्घता ।
पञ्चाङ्गुळ परिणेय परिविन्नस्य लाञ्छनि ॥१५३॥
यवद्वयाधिका वार्या तद्दैर्घ्यात् प्रदेशिनी ।
अङ्गुष्ठायामतुल्याथ कर्णा वै पदमध्यगा ॥१५४॥

मध्यांगुळे द्विरष्टांशहीना तदनु या स्थिता ।
तद्वत्तदनुगा या च त्रिपर्वास्तास्तु पूर्ववत् ॥१५५॥
सयुक्ता नखजालेन कूर्मपृष्ठोपमेन च ।
द्विकलं तु यवार्धेन पादतर्जनिवेष्टनम् ॥१५६॥
चतुश्चतुर्यवोनं च तच्छेषाणां प्रकीर्तितम् ।
त्र्यंशेन वेष्टनाद्ज्ञेयं सर्वासां चैव विस्तृतम् ॥१५७॥
सर्वे समासळा सौम्या समास्त्ववयवा शुभा ।
दशनावलिराद्यस्ये दष्टे सप्तयवोन्नते ॥१५८॥
यवद्वयोन्नतं मानं मध्यदन्तचतुष्टये ।
तत्पक्षगानां सर्वेषां मानं वित्त चतुर्यवम् ॥१५९॥
त्रियवं द्विजविस्तारमग्रान्मूलाद्यवद्वयम् ।
तत्सार्धं मध्यदेशाच्च सर्वे दन्ता निरन्तरा ॥१६०॥
लोमप्रदक्षिणावर्तमयुग्जं मोत्थितं शुभम् ।
सुनिश्चितं हितं चैतन्मानमव्यभिचारि यत् ॥१६१॥
मनोहारित्वमेकत्र रूपलावण्यभूषितम् ।
सर्वदा चानयोर्वित्त अन्योन्यत्वेन संस्थितिः ॥१६२॥
सम्यक्सौन्दर्यं तु मानस्य क्वचिदाक्रम्य वर्तते ।
लावण्यस्य क्वचिन्मानं समाच्छाद्यावतिष्ठते ॥१६३॥
यथाभिरूपवान् लोके दरिद्रोऽप्येति मान्यताम् ।
विरूपोऽप्यतिवित्ताढ्यो चारूपो नैव निर्धनं ॥१६४॥
एष द्वयोज्झितं बिम्बमनादेयत्वमेति च ।
आदेयमेकयुक्तं च नित्यं यस्मान्मुनीश्वरा ॥१६५॥
सम्यङ्माने च सौन्दर्ये भक्तानुग्रहकाम्यया ।
मन्त्रसन्निधिशक्तिर्वै सकलाशक्तितिष्ठते ॥१६६॥
सा सम्यक्प्रतिपन्नस्य बिम्बे दृगोचरस्थिते ।

आमूर्ध्नाङ्घ्रिदयत्याशु ज्ञात्वैवं यत्नमाचरेत् ॥१६७॥
मानोन्मानप्रमाणानामथ सौन्दर्यसिद्धये ।
ऋजोः सुसमपादस्य द्व्यङ्गुलं चरणान्तरम् ॥१६८॥
तद्वै विषमपादस्य अग्रात्तालसमं स्मृतम् ।
तत्पार्ष्णिद्वयमध्यात्तु परिज्ञेयं द्विगोळकम् ॥१६९॥
स्थित्यर्थं ब्रह्मनाड्या वै तथा मार्गद्वयस्य च ।
सूत्रेण सुसमे कुर्याद्देहोत्थे दक्षिणोत्तरे ॥१७०॥
समपादस्य बिम्बस्य ललाटान्मेढ्रमस्तकम् ।
प्रसार्य सूत्रमाच्छाद्य तेन नाभिहृदन्तरम् ॥१७१॥
घ्राणाग्रमळकानां च सिद्धिर्यस्तिलकोर्ध्वगः ।
एवं विषमपादस्य दक्षांगुष्ठाग्रगं नयेत् ॥१७२॥
गात्रसाम्यं समापाद्य क्षेत्रात् क्षेत्रगतेन च ।
सूत्रेण सर्वबिम्बानां वैषम्यविनिवृत्तये ॥१७३॥
चतुस्त्रिद्व्यश्रिपरितः परिशुद्धः यतः शुभा ।
अशुभा परिशुद्धा तु बिम्बोत्थावयवी स्थितिः ॥१७४॥
ललाटमश्ववक्त्रस्य विस्ताराद्द्वादशाङ्गुळम् ।
अष्टलोचनमायामादमतश्चतुरङ्गुळम् ॥१७५॥
कलार्धसुषिरे घ्राणरन्ध्रे भागान्तरीकृते ।
अष्टाङ्गुळे तु हनुके सृक्विण्यौ द्वेऽथ तत्समे ॥१७६॥
मध्यतश्श्रोत्रशुक्ती द्वे द्व्यङ्गुळे द्विकलोन्नते ।
द्व्यङ्गुळं घ्राणवंशं तु तदूर्ध्वं द्विकलं स्मृतम् ॥१७७॥
वित्तं वक्त्रविकासं च द्वियवं चामतः क्रमात् ।
तमेव हि यवांशेन हन्वन्तं तनुतां नयेत् ॥१७८॥
घ्राणवंशस्य पक्षौ द्वौ मध्यानिम्नौ च सहतौ ।
यवद्वयेन सार्धेन दृग्घ्राणाभ्यां तु चान्तरे ॥१७९॥

अथो दळ तु दृग्द्रोणेर्यवमानेन सञ्चितम् ।
ललाट साळक प्राग्वद्द्वङ्मध्य सागुला कला ॥१८०॥
नृसिंहस्य मुखे वित्त परितश्चाग्रलोचनम् ।
ततोऽग्रखण्डदेशाच्च कुर्यात्कर्णद्वयोत्थितम् ॥१८१॥
तत्कर्णद्वयमानेन ललाटान्त 'नयेत्सुन ।
प्रमाणात्प्राक्प्रणीताच्च सरभाघ्राणलक्षण ॥१८२॥
प्रफुल्लविक्रमच्छिद्र घ्राणवशान्वित भवेत् ।
तच्छिद्रे पूर्वमानाच्चाप्यस्य वै त्रियवाधिकम् ॥१८३॥
सगोळमुत्तराङ्गेषु सकलाश च लोचनम् ।
अधरोष्ठ परिज्ञेय सचतुर्यवमगुळम् ॥१८४॥
सार्धं चतुष्कल वक्त्र शेषायामो हनो स्मृत ।
तद्विकास परिज्ञेय नेत्रमान यवाधिकम् ॥१८५॥
अग्रतो ह्रासमायाति सृक्किण्यन्त हि चागुळम् ।
तार्धवृत्त तदर्धेन नेत्रयुग्म सविस्मयम् ॥१८६॥
पूर्ववद्विस्तृत श्रोत्र कलार्धेन तदुन्नते ।
तुल्या चेन्द्रकलायुग्मयोगस्य भ्रूक्षिगोळका ॥१८७॥
तन्मध्य तु कलामान शङ्खावर्तोपम महत् ।
भागमान समावृत्त कार्यं तच्छिरसि स्फुटम् ॥१८८॥
दैर्घ्येण सार्धताल च क्ष्माधरस्यानन स्मृतम् ।
विस्तारेण ललाटाच्च तन्मान द्व्यगुळोज्झितम् ॥१८९॥
सौम्यरूपस्य च विभो मोघतस्य फलोज्झितम् ।
तच्चतुर्थांशमानेन पोत्रदेशस्य विस्तृति ॥१९०॥
तस्योपरिष्टाद्दाढ्यस्य तत्सम चागुळ त्वध ।
हनुद्वयस्य वै मान सार्धं सप्तागुळ स्मृतम् ॥१९१॥
शेषमाननरन्ध्र तु सृक्किणीभ्या यदन्तरम् ।

तद्विकामश्च सार्धेन कलार्धेनाग्रदेशत ॥१९२॥
स एवाङ्गुळमानेन विज्ञेय सृक्किणीद्वयात् ।
घ्राणरन्ध्रश्च वक्त्रोक्ते दृष्टे त्वर्धकलोन्नते ॥१९३॥
नासान्तश यथापूर्व कवळीनाडिपृष्ठवत् ।
श्रोत्रे वाजिमुखोक्ते तु को(कि)टे सप्तकलान्तरे ॥१९४॥
तत्तुल्ये लोचने किं तु प्रान्तनीक्षणे यवोज्झिते ।
एतया विहिता ग्रीवा ह्यङ्गुळद्वितयेन तु ॥१९५॥
ग्रन्थेस्तदेशात्मयुक्ता सौम्यमूर्त्युदिता च या ।
विनोच्छ्रयेण नूट्टरे यस्य गात्रस्य या प्रभा ॥१९६॥
सा सा सर्वेष्टनाद्यासात्कलार्धेनाधिका भवेत् ।
वक्ष कर्युदरासाम्फिचलामानाधिकानि च ॥१९७॥
तथैव नखपत्राणि देहश्चास्य मम।सत ।
सम्पूर्णो दक्षिणावर्तोमभिश्चानिरुचिरौ ॥१९८॥
त्रिचतु पञ्चवक्त्रस्य निनेवोर्ध्वमुखेन तु ।
दक्षिणोत्तरवक्त्राभ्या हाम कुर्याद्विगोळकम ॥१९९॥
विकाम सिंहवक्त्रोक्त उदग्वक्त्रस्य तत्र च ।
समो हक्पातिवेशस्तु चतुर्णो मोक्षसिद्धये ॥२००॥
भागेप्यभोगकैवल्यप्रातमेऽर्धाङ्गुळेन च ।
कुर्यात्सव्यापसव्याभ्यामधो हक्सन्निवेशनम ॥२०१॥
सत्पूर्वानिनैव सम्यक्प्रत्यङ्मुखस्य च ।
निष्क(ष्का)मायामविस्तारप्र।गटग्भूश्रुनिस्त्वथ ॥२०२॥
ईषत्तिर्यङ्दक्षिनित्यमत्टङ्मुख दक्षिण शुभम ।
तद्वच्च प्रोक्तदृग्वक्त्रमुत्तर सर्वसिद्धिदम् ॥२०३॥
सहार्येत्र्गाना नूत नत्सान्त्रस्य च गतिधि ।
अनोन्यथा समाश्रित्य शान्तिसम्ने च मन्त्रगद् ॥२०४॥
नित्य स गन्धिपाना च नूतनेनाद्रगानय। ।

आदर्शनात्पलायन्ते आविशन्ति च दर्शनम् ॥२०५॥
आदाय शिरसा मन्त्रिसमाज्ञा सम्प्रयान्ति ते ।
अत समाचरेद्यत्नेन स्याद्विम्बसन्निधि ॥२०६॥
न हि तत्सन्निधानाद्वै कश्चिदारभते शुभम् ।
वराहदंष्ट्र सिंहाक्ष तथा चिपिटनासिकम् ॥२०७॥
विधेय पश्चिम वक्त्र पञ्चवक्त्रस्य वै विभो ।
अस्याधरोत्तराभ्यामप्योष्ठाभ्या समता भवेत् ॥२०८॥
विभिन्नताङ्गुलार्धेन ताभ्या तन्मध्यगा स्फुटा ।
कार्या दशनपाळी वै मूलमध्याग्रत समा ॥२०९॥
कलार्धेनोल्बण वृत्त तद्गण्डद्वितय तत ।
द्विकल चाग्रत श्मश्रु कला चार्धकला क्रमात् ॥२१०॥
सम्बन्धवेणि पूर्वोक्तमानेन शुभकृद्भवेत् ।
सिंहसूकरवन्मुख्यवक्त्राणा सौम्यता नयेत् ॥२११॥
प्रमाण दृग्गताल्लक्षाद्व्यवहारमयात्तु वै ।
विकासश्चादिवक्त्रोक्त सौम्यरूपस्य भूभृत ॥२१२॥
तदाद्योक्तन्तु नृहरे भागुक्तो य समाचरेत् ।
तथा वक्त्राङ्गभाविते विभो शार्ङ्गिवरस्य च ॥२१३॥
हारनूपुरवन्तसकटकाङ्गदभूषिता ।
माल्योपवीतकेयूरमकुटाद्युपशोभिता ॥२१४॥
प्रतिमा मन्त्रमूर्तीना कृता भवति सिद्धिदा ।
यत्पुरा पञ्चधा प्रोक्त वाहन प्राणदैवतम् ॥२१५॥
तस्य बिम्बममुख्येन तालेन मुखमण्डलम् ।
व्यङ्गुळ तु ललाटोक्त नटात्तभो त्रिलोचन ॥२१६॥
द्व्यङ्गुळेनोन्नत वर्ण उर पञ्चकल स्मृतम् ।
अष्टाङ्गुळ तदुदर कटि पञ्चाङ्गुळोन्नता ॥२१७॥

नवाङ्गुळोन्नतावूरू जानुनी द्व्यङ्गुळे स्मृते ।
अष्टाङ्गुळोच्छ्रिते जङ्घे द्व्यङ्गुळे पदपिण्डके ॥२१८॥
शममेक कलाहीन तद्ग्रीवायाश्च वेष्टनम् ।
बिम्बतुल्या परिज्ञेया सर्वदा साङ्गविस्तृति ॥२१९॥
तद्विभागाधिक वित्त वेष्टन ह्युदरस्य च ।
परिधि कटिदेशस्य चतुर्नेत्राधिकस्तु वै ॥२२०॥
बिम्बोकसदृश वित्त तदूर्वोर्मूलवेष्टनम् ।
तदेव जङ्घामध्यस्य जङ्घान्तस्य तदेव हि ॥२२१॥
पाद पञ्चकलायाम चतुरङ्गुळविस्तृतम् ।
व्यङ्गुळ पार्ष्णिदेशाच्च अङ्गुष्ठोर्धकलासम ॥२२२॥
विज्ञेया अङ्घ्रिदेशाच्च यवेनाङ्गुळय क्रमात् ।
नाभिरन्ध्र सुविस्तीर्ण द्व्यर्धलोचनविस्तृतम् ॥२२३॥
मध्यमाङ्गुळिपर्यन्त मणिबन्धान्नवाङ्गुळम् ।
तिरल पाणिविस्तार तन्नखा निशितोन्नता ॥२२४॥
तद्बाहुमस्तक वित्त उच्छ्रायेण द्विलोचनम् ।
भुजोपभुजयुग्म यत्तत् द्वितालसम स्मृतम् ॥२२५॥
कलार्धेनाधिक बिम्बबाह्वोस्तद्बाहुवेष्टनम् ।
बिम्बोष्ठा सद्विर्धार्थेव स्तनमूलेंचनोल्बणा ॥२२६॥
वृत्तवैपुल्यमानेन लोचने पद्मपलवत् ।
भ्रुयुग्म नरसिंहोऽथ घ्राणाग्र शुकचञ्चुवत् ॥२२७॥
कलार्धमान दीर्घं च तद्वश गजपृष्ठवत् ।
सायामदीर्घं तत्पक्षयुगळ कुक्षिदेशगम् ॥२२८॥
तदेव दैर्घ्यादर्धेन विस्तृत हंसपक्षवत् ।
स्वपक्षमानाद्द्विगुण तत्पुच्छ [illegible] ॥२२९॥
तत्पक्षमिगमायाम [illegible] ।

सर्वेषां वित्त सामान्य विशेषाख्यमथोच्यते ॥२३०॥
ऊरुद्वयात्रयेद्ग्रासमङ्गुळानां त्रयं तथा।
जङ्घाकाण्डोच्छ्रिते कुर्याज्जङ्घाभ्यां चात्र वेष्टनम् ॥२३१॥
बिम्बाख्य मणिबन्धस्य सममूलान् महामते।
जालदेशात्तदर्धेन सह चार्धाङ्गुळेन तु ॥२३२॥
पादे जालं परिज्ञेयं विस्तारेण षडङ्गुळम्।
शेष सत्योदितं सर्वं सर्वेषां वित्त सर्वदा ॥२३३॥
किं तु पादोज्झितौ पक्षौ दैर्घ्यात्तद्दलविस्तृतौ।
एषां चोड्डीयमानानां स्वायामा पक्षविस्तृतिः ॥२३४॥
पञ्चानां च परिज्ञेया स्थितानामर्धलक्षणा।
एतदादाय मानं तु पुच्छभूपक्षवर्जितम् ॥२३५॥
विद्धि वामनरूपस्य लक्षणं किं तु लाङ्गलिन्।
ललाटनासावक्त्रेभ्य समादायाङ्गुळत्रयम् ॥२३६॥
मस्तकस्योपरिष्टात्तु जटाबन्धं प्रकल्पयेत्।
जटावसानमायामं यथा स्यात्पञ्चतालकम् ॥२३७॥
ततस्तु कर्मबिम्बेषु विशेषं कथ्यतेऽधुना।
कर्मार्चा चोत्सवार्चा च बल्यर्चा तीर्थकौतुकम् ॥२३८॥
निमित्तस्नपनार्चा च शयनार्चेति षड्विधा।
अर्चा कार्यास्त्विमा विप्रा! बहुबेरविधानके ॥२३९॥
एकबेरे तु कर्मार्चां विना पञ्च प्रकल्पयेत्।
एतैः सर्वैरङ्गबिम्बैर्युक्तं चेन्मूलकौतुकम् ॥२४०॥
उत्तमं स्यात्त्रिभिर्युक्तं मध्यमं परिकीर्तितम्।
एकेन युक्तमधमं तत्तन्मानमिहोच्यते ॥२४१॥
मूलबिम्बसमुच्छ्रायं द्विधा वापि त्रिधापि वा।
चतुर्धा वा सविभज्य एकभागेन कल्पयेत् ॥२४२॥

उत्सवार्चौ तदुच्छ्राय द्विधा वापि त्रिधापि वा ।
चतुर्धा वा विभज्यैकभागेन परिकल्पयेत् ॥२४३॥
कर्मार्चादीनि बिम्बानि पञ्चापि द्विजपुङ्गवा ! ।
बिम्बषट्क च देवीभ्या सहित परिकल्पयेत् ॥२४४॥
अथ वा चौत्सव बिम्ब तथा शयनकौतुकम् ।
श्रीपुष्टिसहित कार्यं मूलबिम्बे द्विजोत्तमा ! ॥२४५॥
स्थिते वा वाहनारूढे समासीनेपि वा द्विजा ! ।
कर्मबिम्बादिषट्क च तथैव स्यात् स्थित तु वा ॥२४६॥
मूलबिम्बे शयाने तु कर्मबिम्बादयो द्विजा ! ।
स्थितावपि समासीना विधातव्या मुनीश्वरा ! ॥२४७॥
नित्योत्सवार्थबिम्ब तु सर्वत्रैव स्थित भवेत् ।

मुनय ।

कैर्लोहैर्मुनिशार्दूल ! बेरैकत्वबहुत्वकम् ॥२४८॥
ज्ञातव्य तदशेषेण वदस्व वदता वर ! ।

नारद ।

शिलया मणिना वापि लोहैर्वापि कृता तु या ॥२४९॥
नित्यादिमङ्गलस्नानविषया रहिता सदा ।
कर्मार्चयापि देवीभि स्थिताप्यासीनता गता ॥२५०॥
स्थाप्यते केवला मूर्तिरेकबेर तु निश तत् ।
मृद्दारुज तु यद्बिम्ब कर्मार्चादिसमन्वितम् ॥२५१॥
नित्यादिस्नपनार्थं शक्तिभि सहित न वा ।
मणिवज्रादिसंभूत्व निमित्तस्नपनक्षमम् ॥२५२॥
सदा तु नित्यस्नानार्थं कर्मार्चासहित तु यत् ।
मृद्बिम्ब तु लक्ष्म्यादिसहित रहित तु वा ॥२५३॥
नित्यनैमित्तिकाद्युक्तसवस्नपनक्षमम् ।

लक्ष्म्यादिभिः समोपेतं यद्विम्बं शक्तिभिः सदा ॥२५४॥
तदेतत्त्रिविधं वित्त बहुबेरं मुनीश्वराः ।
यत्तु चित्रमयं बिम्बं भित्तिकाष्ठाम्बराश्रयम् ॥२५५॥
कर्मबिम्बसमोपेतं नित्यादिस्नानकर्माणि ।
यच्चापि मृण्मयं बिम्बं त्रिविधं चापि चित्रजम् ॥२५६॥
नित्यनैमित्तिकस्नाने दर्पणादिसमन्वितम् ।
कर्मबिम्बान्वये योग्यं विभवेच्छानुसारतः ॥२५७॥
एतच्चतुर्विधं वित्त बहुबेरं विशेषकम् ।
बहुबेरं यथायोगं स्थितमासीनमेव वा ॥२५८॥
शयानं यानगं वापि भवेदिच्छानुरूपतः ।
बहुबेरादिभेदास्तु पञ्चधा परिकीर्तिताः ॥२५९॥
अन्यानि कर्मबिम्बानि यात्राबिम्बपुरस्सरम् ।
तत्तत्कर्मविशेषार्थं बहुबेरैकबेरयोः ॥२६०॥
द्वयोश्च कल्पनीयानि विभवस्यानुरूपतः ।
इत्युक्तं लेशतो बिम्बलक्ष्म पीठमथोच्यते ॥२६१॥
बिम्बानामुपविष्टानां चतुरश्रं तु तद्भवेत् ।
चतुरश्रायतं चैव प्रोत्थितानां सनैव हि ॥२६२॥
वृत्तवृत्तायतत्वेन ह्यनयो रूपमन्यथा ।
यागुळैः परमाणुस्थैराराधकमयैस्तु वा ॥२६३॥
धत्तेर्वा तु समायामद्वाराद्वा मन्दिरोत्थितात् ।
तन्मानेन तु पीठस्य दैर्घ्यमर्धेन विस्तृतिः ॥२६४॥
द्वारोच्छ्रायं त्रिरन्तानि एकपूर्वाणि वै पुरा ।
सन्त्यज्य द्वादशांशाद्वै अथ पीठोन्नतिस्त्रिभिः ॥२६५॥
शेषेणाष्टांशमयेन प्रतिमा चोन्थिता भवेत् ।
अथ वा वाहनान्ता न्यूना वा मध्यमोत्तमा ॥२६६॥

चतुर्भिर्द्वादशांशैस्तदुपविष्टस्य चोन्नति ।
विहिता चास्य सर्वत्र प्रतिमार्धेन विस्तृति ॥२६७॥
तन्यशकविलुप्ता वा चतुर्थांशोज्झिताथ वा ।
परिवारवशेनैव चातुरात्म्यस्य वै पुन ॥२६८॥
अलुप्ताश च विहितपीठायाम च सर्वदिक् ।
चतुर्दिग्दृग्गतस्यैव एकदिग्दृग्गतस्य च ॥२६९॥
तदेव दैर्घ्यं द्विगुण लाञ्छनैरावृतस्य च ।
सार्धं चानावृतस्यैव तद्वाहुल्य पुरोदितम् ॥२७०॥
चतुष्कमेकपीठाना केवल लक्ष्मवर्जितम् ।
एकैक लक्ष्मभेदेन तत्सङ्ख्य विद्धि चे पुन ॥२७१॥
अनन्तासनमाद्य च द्वितीय पक्षमन्दिरम् ।
कमलाङ्क तृतीय तु चतुर्थं चक्रभूषितम् ॥२७२॥
एव हि सर्वसामान्य पीठाना हि द्विरष्टकम् ।
भेदभिन्न समासेन पुनरेव निबोधत ॥२७३॥
दिक्षु लक्ष्माणि पीठाना विद्या कण्ठगतानि च ।
अन्योन्यसन्निवेशाच्च तेषा बह्वात्मना पुन ॥२७४॥
चक्राम्बुजाभ्या तनभ्याभ्या लुप्ताभ्यामथ तत्स्थिते ।
ताभ्याम योन्ययोगाच्च दिक्ष्वनन्तखगाश्रयात् ॥२७५॥
द्विद्वयात्मना द्व्यात्मना वा बहुत्वमवधार्यताम् ।
पद्मेनोर्ध्वगतेनैव द्वय चक्रेण तद्वहि ॥२७६॥
एव ह्यधोगतेनैव परिज्ञेय द्वय द्वयम् ।
उपरिष्टात्तु पद्माभ्यामधश्चक्र द्वय द्वयम् ॥२७७॥
द्वितयव्यत्ययाच्चान्यत्परिज्ञेय मुनीश्वरा ।
अन्तर्गते स्थितिवशाच्चक्रपद्मद्वयस्य च ॥२७८॥
व्यत्ययादनयोर्विद्ध ऊर्ध्वभागाच्चतुष्टयम् ।

अधोभागादेवमेव चतुष्कमपरं तु वै ॥२७९॥
पीठानामष्टकमिदमधस्तादूर्ध्वतस्तु वा ।
शुक्तमेकेन वै कुर्याच्चक्रेण कमलेन वा ॥२८०
चक्राकारास्तु विहिता ह्येकभ्रमसमाश्रिता ।
बह्वोपि सलास्तद्वदीपद्वे कर्णिकान्विता ॥२८१॥
इति लाञ्छनसञ्चारो बहुधा तन्मयोदितम् ।
यस्मिन् प्रकृतिगते तु पीठे तदधुनोच्यते ॥२७२॥
कृत्वा द्विर्दशधा पीठं पुरायामात्समै पदै ।
एकेन चरणं जघाकलशौ च त्रिभिस्त्रिभिः ॥२८३॥
कण्ठवीथीमथैकेन षड्भि कण्ठं तदूर्ध्वतः ।
भागेन कण्ठसूत्रं तु शुक्तिकाशत्रयेण तु ॥२८४॥
उष्णीषं च तदूर्ध्वे तु कुर्यादंशद्वयेन वै ।
निर्गमं स्वदलेनैव विहितश्चरणस्य तु ॥२८५॥
चतुर्दिक्षु महात्मान ! क्षेत्रतो ह्यधिक स्मृतं ।
सर्ववृत्तं घट कुर्यात्पल्लवैर्वारकैर्युतम् ॥२८६॥
परितोंशद्वयेनैव कर्णपीठं प्रवेशयेत् ।
अन्तः प्रवेशमेकेन वीथ्यंशेन गळस्य च ॥२८७॥
कुर्याद्गळप्रवेशास्य समा सूत्रस्य निःसृतिम् ।
शुक्तेरथ कण्ठसूत्रभागात्पादेन निर्मितम् ॥२८८॥
वदनान्तं समासेन शक्तेः सङ्कोचमाचरेत् ।
उष्णीषपटजवानामाश्रिसाम्यं यथास्थितम् ॥२८९॥
पटवद्रूपयेच्छुक्तिमरकैर्वाऽन्नपल्लवै ।
तत्रोपरिष्टात्परिधिं चतुरंशकसंमितम् ॥२९०॥
सन्त्यज्य निखनेद्द्रोणीमशनिस्रां समन्ततः ।
विस्तृतेर्मध्यभागेथ स्वव्यंशेन च निर्गमम् ॥२९१॥

तन्मान चतुरश्र तु पीठक्षेत्राद्विनिर्गतम् ।
तच्चाग्रतस्त्रिधा कृत्वा पक्षभागौ क्षय नयेत् ॥१९२॥
अनुपादेन चामूलात्सम्यक् लाङ्गलवक्रवत् ।
अग्रतो मूलदेशाच्च कृत्वादौ वै त्रिधा त्रिधा ॥२९३॥
भूयस्तान्निखनेन्मध्याज्जल याति यथा द्रुतम् ।
सूकराननतुल्य तु भवत्येव मुनीश्वरा ! ॥२९४॥
कुर्याद्वै शङ्खसदृश मकरास्योपम तु वा ।
जलनिर्गममेतद्वै पीठेपूदितलक्षणम् ॥२९५॥
न कुर्यात्कर्मबिम्बानामाश्रमादिमितात्मनाम् ।
चित्रमृत्काष्ठजाना तु चलाना तु विशेषत ॥२९६॥
तथैव चतुरश्रस्य चतुर्मूर्तिगतस्य च ।
प्रणाळमग्रग मूर्तेर्यत सासिद्धिहानिकृत् ॥२९७॥
प्रयोजन विना का चित् न क्षतिस्तस्य तद्विना ।
सामान्यस्य तु वै यस्मादाधारस्य विशेषत ॥२९८॥
सप्रणाळ भवेत्पीठमासन च प्रणाळकम् ।
भूरि नीरादिना स्नान यत्र यच्छति साधक ॥२९९॥
प्रत्यह तद्विना तत्र प्रत्यवायो भवेत् स्फुटम् ।
एवमेव बृहद्बिम्ब भूषिताना विधीयते ॥३००॥
धातुशैलोत्थिताना च निमित्तस्नपनार्थत ।
भद्रासनगते कर्मबिम्बे तस्य समाचरेत् ॥३०१॥
सतत च यथालाभ दधिक्षीरघृतादिना ।
तोयेन तत्प्रयत्नाद्भूमाग या प्रतिग्रहम् ॥३०२॥
यथा नाक्रम्यते पादै जन्तुभिस्तन्महर्षिदम् ।
अत प्रणाळ विहित निषिद्धमत एव हि ॥३०३॥
जन्मान्त वा जगत्यन्त धैरवान्त गळान्तरम् ।

पद्मिमध्यन्तलं पञ्चभेदं सर्वेषु धामसु ॥२०४॥
तत्संस्थापनकाले तु देवानां दिग्द्वये हितम् ।
प्राक्प्रत्यगाननानां च तदुदग्दिग्गतं शुभम् ॥२०५॥
उदग्दक्षिणवक्त्राणां प्राग्भागे विहितं सदा ।
तत्पुनर्भद्रपीठीयदेवाद्यामेर्थसिद्धिकृत् ॥२०६॥
सदैवाराधकानां तु विलोमाद्विपरीतदम् ।
इत्येवं पीठलक्ष्मापि समासात्कथितं मया ॥२०७॥

इति श्रीपाञ्चरात्रे ईश्वरसंहितायाम्
प्रतिमादिलक्षणं नाम

सप्तदशोऽध्यायः ।

अथाष्टादशोऽध्यायः ।

अतः परं प्रवक्ष्यामि मन्त्रबिम्बनिवेशनम् ।
भोगेप्सूनां च वर्णानां साम्प्रतं यदभीष्टदम् ॥१॥
कैवल्यदं तथाचैव चातुराश्रम्यसेविनाम् ।
यज्ञकर्मरतानां च सहायं च फलेप्सु तत् ॥२॥
प्राग्वद्देवगृहस्याग्रे द्विभागे सति मण्टपम् ।
चतुरश्रं चतुर्द्वारं दर्भमालान्तर्गतकम् ॥३॥
अन्यत्र तदलाभे तु यथाभिमतदिङ्मुखम् ।
चतुर्दशकराद्यैव द्वात्रिंशत्करावधि ॥४॥
पद्करान्तं पुरलाभाद्बिम्बमानव्यपेक्षया ।
कार्या मध्ये स्थली तेषां द्विमहानीलतोष्टमि ॥५॥
समन्तभद्रा मुख्या विना पद्धपादिभिः ।

तालोन्नते समारभ्य सामान्येस्मिन् हि कर्मणि ॥६॥
उन्नतागुळवृद्ध्यातु नीता तदभ्रासत्ता क्रमात् ।
द्वित्रिरष्टाशकैर्मध्ये सनासा मण्डल भवेत् ॥७॥
चतुरश्र चतुर्द्वार चक्राबुरुहभूषितम् ।
दक्षिणे शयन सौम्ये कुण्डमग्नेस्तु पूर्ववत् ॥८॥
समेखल द्विहस्त तु चक्रपद्माङ्कित शुभम् ।
तदधश्चतुरश्र प्राग्दामेखलिकान्वितम् ॥९॥
अथ दक्षिणदिग्भागे कुर्याद्वै चक्रचिह्नितम् ।
वर्तुळ पश्चिमे सौम्ये कमलाङ्क मनोहरम् ॥१०॥
शङ्खाङ्क सर्वकोणेषु मानमेषा यथोर्ध्वगे ।
सर्वे दशान्तहस्ताना चतुर्णामेकमेखला ॥११॥
मण्टपाना तु किं त्वत्र ऊर्ध्वग सर्वमेखलम् ।
अतोधस्सस्थिता सर्वे एककुण्डास्तु मण्टपा ॥१२॥
तेषा समेखल चाद्य द्वाविंशत्यगुळैर्भवेत् ।
ह्रासादगुळयुग्मस्य यावद्वै षोडशागुळम् ॥१३॥
स्यात् षट्करे गृहे कुण्ड कार्या वा मेखलाधिका ।
अष्टहस्तोच्छ्रित पूर्वमथो नैकरवर्धिता ॥१४॥
न ह्रासप्पट्करानाना न्यूनानामुच्छ्रितेर्भवेत् ।
त्रयोदशकरादीना चतुर्णां पालयेत्तत ॥१५॥
अष्टक चागुळाना तु सप्तपञ्चचतु क्रमात् ।
एव स्नानगृहाणा तु विस्तारश्चोन्नतै सह ॥१६॥
किं तु वै वालुकापीठे मध्यतश्चोपशोभिता ।
द्विचतुर्भि द्विहस्तादीरैस्मृता प्रागुदुन्नता ॥१७॥
सानीया अग्रगेहाद्वै दिक्त्रयेभिमते शुभे ।
अर्धमानसम सुस्या स्नपीठनयनान्वितम् ॥१८॥

द्वग्दानभवनं कुर्यान्माङ्गल्यकलशैः सह ।
सर्वेषामपि भूभागे कोणस्तम्भैर्विभूषितम् ॥१९॥
मुनेत्रैर्वेष्टितं कुर्याच्चक्रार्थे पूर्वमग्रुतम् ।
सुस्थितं दृढपादं च स्नानाम्भोग्रहणक्षमम् ॥२०॥
अर्धेन बालुकापीठं दीर्घमायक्रमेण तु ।
वर्धितं चार्धहस्तेन ह्रासितं चतरङ्गुले ॥२१॥
स्वदैर्घ्यादर्धविस्तीर्णं कृत्वैव समणालकम् ।
तेन तद्वालुकापीठं भूषयेन्मध्यमेन तु ॥२२॥
यागागारस्य वै दिक्षु द्वारार्थं तत्र चान्तरे ।
शमार्धवृद्धियोगेन ह्रासोऽन्यत्र क्लादिकं ॥२३॥
तोरणानि वहिः कुर्यात् दृढे काष्ठे सुपूजिते ।
पञ्चहस्तानि चार्धेन वर्धितानि करेण तु ॥२४॥
न ह्रासमाचरत्तेषामन्यत्र करणे सति ।
न समात्पञ्चहस्तानामूर्ते भूमौ प्रवेशयेत् ॥२५॥
शमार्धं वर्धिताना च द्वे द्वे सवर्पयेत्कले ।
दैर्घ्यात्प्रवेशाशिष्टात्तु त्रिभागेन तदन्तरम् ॥२६॥
सर्वे चक्रध्वजा कार्या वस्त्रस्रग्मञ्जरीयुता ।
सुधावैर्वर्णकैः पीतैश्चन्दनाद्यैस्तु लेपिता ॥२७॥
भिन्नाङ्गमेतदखिलं यथैकस्मिन् हि युज्यते ।
कर्म यागगृहे यद्वद्विभूतेर्वाबनेर्विना ॥२८॥
पञ्चत्रिंशत्करक्षेत्रं स्वतुर्यांशेन विस्तृतम् ।
तन्मध्ये तु चतुर्हस्तस्त्वायाम स्थलसत्क्रम् ॥२९॥
स्थलाना व्यवधानं तु कुर्याद्वै ताळसंमितम् ।
एकायामं वै कुर्यात् द्विहस्तान्तं स्थलाङ्गणम् ॥३०॥
क्रमेणाष्टाङ्गुळान्मानात् द्व्यङ्गुळं द्व्यङ्गुळं विना ।

स्थलाना सङ्कटाना च व्यवधान द्विगोळकम् ॥३१॥
एवमेव समुच्छ्राय सर्वेषा परिकीर्तित ।
परितो विहित वीधे मानमत्र सपीठजम् ॥३२॥
एव वा सङ्कटे कुर्यादाद्योक्तान्मण्टपद्वयात ।
मध्यमण्डलपीठ तु तस्य दक्षिणदिग्भवेत् ॥३३॥
समीपे शयनस्थान कुम्भाना स्थापनायनम् ।
एव हि वामनिर्दिष्टे भोगाना मन्त्रतर्पणम् ॥३४॥
ऋग्यजुस्सामपूर्वाणा श्रुतीना हवन परे ।
दद्दान शयनस्थान ह्यन्यस्मिन् शयने हितम् ॥३५॥
प्रासादस्याष्टदिङ्मूर्तिपानामेव यथोदितम् ।
स्थण्डिलेष्वथ कुण्डेषु तादर्थ्येनाथ वा स्वयम् ॥३६॥
स्वकुण्डे हवन कुर्याच्चतुर्वेदमये परे ।
समस्तमूर्तिपीय वा स्वयमेव समाचरेत् ॥३७॥
सामग्रीविरहाद्योग्यमूर्तिपानामभावत ।
एव त्वभिनव कृत्वा यागार्थं मण्टप द्विजा ! ॥३८॥
पूर्वोदितैरलङ्कारैरलङ्कृत्य पृथग्विधै ।
सितरक्तादिभेदेन प्रागादौ तु ध्वजाष्टकम् ॥३९॥
निवेश्य मध्यवेद्या तु पुनरप्ययव तथा ।
तदर्थान् सर्वसम्भारान् सम्भृत्य सुसमाहित ॥४०॥
दिने धर्मदिनात्पूर्वे सप्तमे पञ्चमेपि वा ।
अङ्कुरानर्पयित्वा तु तत कर्म समारभेत् ॥४१॥
प्रधानदिवसात्पूर्वे दिने देशिकसत्तम ।
स्नात शुक्लाम्बर स्रग्वी कृतन्यासा सुशान्तधी ॥४२॥
कृताह्निकोधिवासार्थं सर्वालङ्कारभूषित ।
सर्वसाधनसयुक्तस्त्वर्घ्यपात्रसमन्वित ॥४३॥

माङ्गल्यकुम्भमादाय ध्यायमानोऽच्युतं हृदि ।
सह चैकायनैर्विप्रैः सदागमपरायणैः ॥४४॥
तथा ऋङ्मयपूर्वैस्तु आमूलाद्भगवन्मयैः ।
भेरीपटहवादित्रशङ्खशब्दादिकैः सह ॥४५॥
ऋग्यजुस्सामपूर्वैस्तु प्रशस्ताः सम्पठन् श्रुतीः ।
द्वारपालार्चनं कृत्वा यागागारं प्रविश्य च ॥४६॥
सम्मृत्य ह्यासने व्याप्तिमर्चयित्वोपविश्य च ।
मध्यपीठसमीपे तु प्राङ्मुखः पश्चिमे पदे ॥४७॥
अग्रे माङ्गल्यकलशमाधारस्योपरि न्यसेत् ।
विमानृङ्मयपूर्वांश्च उपवेश्य च पूर्ववत् ॥४८॥
पूर्वोक्तस्त्वधिकैर्युक्तो द्रव्यैर्द्रव्यगणं शुभं ।
यश्च यत्रोपयोज्यस्तु तत्र तं सम्प्रवेशयेत् ॥४९॥
मन्त्राणामुपदेष्टा च अनुकूलो महामतिः ।
योक्तव्यः कर्मदक्षस्तु सर्वेष्ववसरेषु च ॥५०॥
दक्षिणे ह्यात्मनो विप्र ! एकचित्तः समाहितः ।
स्वयं वस्त्वनुसन्धाय हवनार्चनकर्मणाम् ॥५१॥
आस्ते ह्युत्पत्तिपूर्वाणां न्यासान्तानामनन्यधीः ।
करशुध्यादि सर्वं तु चक्रादिन्यासपश्चिमम् ॥५२॥
सर्वं क्रमेण कृत्वा तु पुण्याहं वाचयेत्ततः ।
पूर्वोक्तविधिना कुर्यात्सहोमं कलशार्चनम् ॥५३॥
कुर्यात्सतोरणानां च ध्वजानां स्थापनं ततः ।
सत्यादिकं चतुष्कं तु मध्यवेद्यां ध्वजाष्टके ॥५४॥
प्रभवाप्ययमार्गेण यजेत्प्रागादियोगतः ।
उत देवा अवहिता ऋङ्मयान् पाठयेत्ततः ॥५५॥
प्रागादिदिक्चतुष्केषु तोरणानां चतुष्टये ।

सुशोभनं सुभद्रं च सुगंधं च मनेत्कमात् ॥५६॥
सुगोत्रं च ततश्चक्रं सिद्धेश्वरसंयुतम् ।
उपरिष्टान्मुनिश्रेष्ठा ! पूजयेत्प्रतितोरणम् ॥५७॥
एतेषामथ वा पूर्वं भवेद्द्वार्स्थं सहार्चनम् ।
पाठयेत् द्वारपालीयं साम सामविदन्ततः ॥५८॥
अथार्घ्यपुष्पभृन्मूर्तिधरैर्यायात्समावृतः ।
यत्र तिष्ठति विश्वेश पीठब्रह्मशिलान्वितः ॥५९॥
तत्रावलोकन तेषां कुर्यात्सन्ताडनादिकम् ।
चक्राम्त्रमन्त्रितैः स्नानकलशैः स्नापयेत्ततः ॥६०॥
सिद्धार्थकैः तथा पञ्चगव्यमृद्भूतिवारिणा ।
वल्मीकमृज्जलेनाथ चक्राङ्कापविवारिणा ॥६१॥
संक्षाल्याभ्यर्च्य चोद्धृत्य क्षालयेदस्त्रवारिणा ।
तमर्घ्येणार्चयित्वा च तनम्नन्मान्त्रितान् करे ॥६२॥
सिद्धार्थकान् दक्षिणे तु बध्वाग्रे पाठयेद्वचम् ।
प्ररोहण तथा सर्वान्नयेत्प्रतिसरे मणीन् ॥६३॥
सर्वत्र वेष्टितं कृत्वा समारोप्य रथोत्तमे ।
कर्मारम्भ च पटनस्तस्य दक्षिणदिङ् न्यसेत् ॥६४॥
ऋक्सामपूर्वान् वामे तु ब्राह्मणाश्च चतुश्चतु ।
पुरतोऽस्य स्मरन्यायात्स्वय विप्रास्तु सूदयन् ॥६५॥
सन्तपर्णनिचादिश्मन्तुतिमङ्गलपाठकैः ।
इदंविष्णुर्विचक्रम इति ऋङ्मये सहपाठकैः ॥६६॥
एकायनान्तदन्ते तु ओत्रमोत्रमणे तु यत् ।
तैथेव शाकुनं सूक्त श्रीसूक्तेन समन्वितम् ॥६७॥

स्वर्णादिनार्थिनः शक्त्या तर्पयंस्तान्निवेशयेत् ।
यागभूमिं ततो बिम्बमवरोप्य रथादिकात् ॥६८॥
निषण्णं दृढकाष्ठोत्थतोरणे सन्निवेश्य च ।
स्नानभूमौ ततः कुर्यादस्त्रेणाज्यतिलाहुतीः ॥ ६९ ॥
यद्वा पूर्वं समानीय पीठं ब्रह्मशिलान्वितम् ।
भूमिष्ठे गर्भपीठे तु वेदिकायां निवेश्य च ॥ ७० ॥
ततो बिम्बं समानीय स्थापयेत्पिण्डिकोपरि ।
स्थाप्यमाने बृहद्बिम्बे विशेषः कथ्यते द्विजः ! ॥७१॥
पूर्ववत्कर्मशालायां संस्थाप्याकारशुद्धये ।
संस्थाप्य विधिना कृत्वा नयनोन्मीलनं ततः ॥ ७२ ॥
स्नपनं बृहदापाद्य केवलं वा महदकैः ।
स्नानकर्म शिलादीनामीषत्कृत्वा तु सार्चनम् ॥७३॥
उत्थाप्य मूर्तिपायैस्तु बहुभिस्तु रथस्थितम् ।
समानीय ततो यत्नात्प्रासादाभ्यन्तरं तु वै ॥७४॥
यथावद्रत्नविन्यासपूर्वं पीठे निवेश्य च ।
बृहद्बिंबे ततः कुर्यात्कर्मबिंबेऽखिलं तु वै ॥ ७५ ॥
सन्निरोधस्तु मन्त्राणां तत्र स्यमोदये स्मृतः ।
आबृहत्स्नपनात्पूर्वं यत्किंचिदपि तत्र तत् ॥७६॥
निर्वर्तनीयं पूर्णान्तं बुध्वैवं माङ्मुनीश्वराः ! ।
तथा कार्यं शुभो येन मुहूर्तो नावसीदति ॥७७॥
एवं हि चित्रपूर्वाणामन्येषां मुनिसत्तमाः ! ।
सरत्नब्रह्मपाषाणवर्जितानां समाचरेत् ॥७८॥
स्नानार्चं कर्म चित्रे तु तत्समीपेऽथ दर्पणे ।
कर्मबिंबं विनान्येषां प्रम्वापार्यं हि विष्टरे ॥७९॥
कुर्यात्प्रवेशपूर्वं तु सर्वमुत्सवपश्चिमम् ।

सुशोभनं सुभद्रं च सुगधं च यजेत्क्रमात् ॥५६॥
सुगोत्रं च ततश्चक्रं विहगेश्वरसंयुतम् ।
उपरिष्टा मुनिश्रेष्ठा ! पूजयेत्प्रतितोरणम् ॥५७॥
एतेषामथ वा पूर्वं भवेद्वास्यै सहार्चनम् ।
पाठयेत् द्वारपालीयं साम सामविदस्ततः ॥५८॥
अथार्घ्यपुष्पभून्मूर्तिधरैर्भार्यारसमावृतः ।
यत्र तिष्ठति विश्वेशः पीठब्रह्मशिलान्वितः ॥५९॥
तत्रावलोकनं तेषां कुर्यात्संताडनादिकम् ।
चक्रास्त्रमन्त्रिते स्नानकलशैः स्नापयेत्ततः ॥६०॥
सिद्धार्थकैः तथा पञ्चगव्यमृद्भूतिवारिणा ।
वल्मीकमृज्जलेनाथ चक्राङ्कौपधिवारिणा ॥६१॥
सक्षाळ्याभ्यर्च्य चोद्धृत्य क्षाळयेदस्त्रवारिणा ।
समर्घ्येणार्चयित्वा च ततस्तन्मन्त्रितान् करे ॥६२॥
सिद्धार्थकान् दक्षिणे तु बध्वाग्रे पाठयेदृचम् ।
प्ररोहणं तथा सर्वान्नयेत्प्रतिसरे मणीन् ॥६३॥
सर्वत्र वेष्टितं कृत्वा समारोप्य रथोत्तमे ।
कर्मारम्भं च पठतस्तस्य दक्षिणदिङ् न्यसेत् ॥६४॥
ऋक्सामपूर्वान् वामे तु ब्राह्मणांश्च चतुश्चतु ।
पुरतोऽस्य स्मरन्थाथात्म्यं विप्रास्तु सुदयन् ॥६५॥
सर्वतूर्यगीतवादित्रस्तुतिमङ्गळपाठकैः ।
इदंविष्णुर्विचक्रम इति ऋड्मयैः सहपाठकैः ॥६६॥
एवामनास्तदन्ते तु ओन्नमोमन्त्रणे तु यत् ।
नैवं शाकुनं सूक्तं श्रीसूक्तेन समन्वितम् ॥६७॥

स्वर्णादिनार्थिनं शक्त्या तर्पयन्तान्निवेशयेत् ।
यागभूमिं ततो बिम्बमवरोप्य रथादिकात् ॥६८॥
निषण्णं दृढकाष्ठोत्थतोरणे सन्निवेश्य च ।
स्नानभूमौ ततः कुर्यादस्त्रेणाज्यतिलाहुती ॥ ६९ ॥
यद्वा पूर्वं समानीय पीठं ब्रह्मशिलान्वितम् ।
भूमिष्ठे भद्रपीठे तु वेदिकायां निवेश्य च ॥ ७० ॥
ततो बिम्बं समानीय स्थापयेत्पिण्डिकोपरि ।
स्थाप्यमाने बृहद्बिम्बे विशेषः कथ्यते द्विज ! ॥७१॥
पूर्ववत्कर्मशालायां सम्स्थाप्याकारशुद्धये ।
सन्स्नाप्य विधिना कृत्वा नयनोन्मीलनं ततः ॥ ७२ ॥
स्नपनं तृहदापाद्य केवलं वा बहूदकैः ।
स्नानकर्म शिलादीनामीपत्कृत्वा तु सार्चनम् ॥७३॥
उत्थाप्य मूर्तिपार्थैस्तु बहुभिस्तु रथस्थितम् ।
समानीत ततो यत्नात्प्रासादाभ्यन्तरं तु वै ॥७४॥
यथावद्रत्नविन्यासपूर्वं पीठे निवेश्य च ।
तृहद्बिम्बे ततः कुर्यात्कर्मबिम्बेऽखिलं तु वै ॥ ७५ ॥
सन्निरोधस्तु मन्त्राणां तत्र स्यादुदये स्मृतः ।
आतृहत्स्नपनात्पूर्वं यत्किंचिदपि तत्र तत् ॥७६॥
निर्वर्तनीयं पूर्णान्तं बुधैरेव महामुनीश्वराः ! ।
तथा कार्यं शुभो येन मुहूर्तो नावसीदति ॥७७॥
एवं हि चित्रपूर्वाणामन्येषां मुनिसत्तमाः ! ।
सरत्नन्यासपाषाणशर्कराणां समाचरेत् ॥७८॥
स्नानाद्यं कर्म बिम्बे तु तत्समीपेऽथ दर्पणे ।
कर्मबिम्बं विनान्येषां सत्त्वापाद्य हि विग्रहे ॥७९॥
कुर्यात्प्रवेशपूर्वं तु सर्वमुत्तानपश्चिमम् ।

शक्तिभि र्मर्बिनैश्च गरुडाद्यैर्यदा सह ॥८०॥
समाचेरत्प्रतिष्ठान मूलबिम्बस्य वै सह ।
तदानीं तानि बिम्बानि यागभूमौ प्रवेशयेत् ॥८१॥
एवं प्रवेश्य तद्विव स्नानार्थं स्थापयेद्घटान् ।
अथ वा कर्मदिवसात्पूर्वेद्युर्वासरे पुरा ॥८२॥
प्रागुक्तविधिना कृत्वा सहोम कलशार्चनम् ।
आचार्यो मूर्तिपै सार्धं कर्मशाला प्रविश्य च ॥८३॥
प्राप्तेऽपराह्णसमये बिम्बसंस्कारशुद्धये ।
सस्नाप्य विधिना पश्चाद्विम्बं तोयेऽधिवास्य च ॥८४॥
अपरस्मिन्दिने प्राप्ते देशिकस्तु कृताह्निकः ।
जलादुत्थाप्य तद्विव यागभूमौ प्रवेशयेत् ॥८५॥

मुनयः ।

तोयाधिवासनविधिः कथं कार्यो मुनीश्वर ! ।
तद्विधानं विस्तरेण वदस्व वदतां वर ! ॥८६॥

नारदः ।

जलाधिवासनविधिं शृणुध्वं मुनिपुङ्गवाः ।
ग्रामादेस्य विशुद्ध्यर्थं बिम्बशुद्ध्यर्थमेव च ॥८७॥
मानोन्मानप्रमाणानामूनाधिक्योपशान्तये ।
जगदाप्यायनार्थं च सर्वसम्पूर्णसिद्धये ॥८८॥
प्रतिष्ठार्थं त्वारम्भात्पूर्वमेव शुभे दिने ।
पञ्चगव्यादिना स्नानं पूर्णाहोमौ तथा जपम् ॥८९॥
समाचरेत्प्रयत्नेन यत्रैव न कृतं पुरा ।
हेतुना केन चित्तत्र जलवासं समाचरेत् ॥९०॥
नदीषु दीर्घिकायां वा तटाके निर्झरे ह्रदे ।
गम्भीरे गति कुर्यात्तत्स्नानं यथाविधि ॥९१॥

असम्भवे जलद्रोण्या कटाहे धातुनिर्मिते ।
यथासम्भवमन्यस्मिन् पात्रे वा मृण्मयादिके ॥९२॥

अल्पतोये श्मशानान्ते लवणोदादिप्लुते ।
कटुके च कषाये च तिक्ते पर्णैश्च दूषिते ॥९३॥
चैत्यवृक्षसमीपे च नीचावाससमीपके ।
वर्णान्तरयुते स्वल्पे ऊषरे शैवलान्विते ॥९४॥
एवमादिषु दुष्टेषु जलवासं न कारयेत् ।
एकत्रिपञ्चरात्रं वा जलमध्येऽधिवासयेत् ॥९५॥
देशकालानुसारेण सद्यो वा जलवासनम् ।
प्रतिष्ठादिवसात्पूर्वे तृतीये पञ्चसप्तमे ॥९६॥
दिनेऽपराह्णसमये कर्मशालां प्रविश्य च ।
अस्त्रमन्त्रेण सम्प्रोक्ष्य बिम्बं सन्ताडयेत्ततः ॥९७॥
सिद्धार्थकैस्तिलैर्दर्भैरस्त्रमन्त्राभिमन्त्रितैः ।
सम्प्राप्याकारशुद्ध्यर्थं षड्भिः सिद्धार्थकादिभिः ॥९८॥
वस्त्राभरणपुष्पाद्यैरलङ्कृत्य च भूषणैः ।
पूर्ववत्कौतुकं बध्वा समारोप्य रथादिके ॥९९॥
पूर्ववच्छ्रुतिघोषैश्च शङ्खभेर्यादिकैः सह ।
विविधैर्नृत्तगेयैश्च तथान्यैर्मङ्गलैः सह ॥१००॥
ग्रामं वा नगरं वापि प्रासादं च प्रदक्षिणम् ।
भ्रामयित्वा जलोद्देशमानयेन्मूर्तिपैः सह ॥१०१॥
प्रपायां तु जलाभ्यर्णे अवरोप्य रथादिकात् ।
विष्टरे विनिवेश्याथ प्राङ्मुखं वाप्युदङ्मुखम् ॥१०२॥
मण्टपं जलमध्ये तु वातवृष्टिक्षमं शुभम् ।
चतुस्तम्भसमायुक्तं चतुर्तोरणभूषितम् ॥१०३॥
वितानध्वजसंयुक्तं वेष्टितं दर्भमालया ।

विचित्रैश्च फलैर्युक्तं द्रुमाग्रैः पावनैस्तथा ॥१०४॥
मुक्तादामसमायुक्तं स्रग्दामभिरलङ्कृतम् ।
कोणे प्रदीपसंयुक्तं चामरैरुपशोभितम् ॥१०५॥
पुरैव कारयित्वा तु कुर्यात्पुण्याहघोषणम् ।
प्राग्वच्छुद्धिमपां कृत्वा तन्मध्ये विन्यसेत्ततः ॥१०६॥
प्रतिमानुगुणं भद्रपीठमास्तरणान्वितम् ।
सोपधानं तदूर्ध्वे तु कल्पयेन्मान्त्रमासनम् ॥१०७॥
अनन्तं कल्पयित्वोर्ध्वे अर्घ्यगन्धादिनार्चयेत् ।
मूलमन्त्रेण विन्यस्य अर्घ्यं पाद्यं तथैव च ।१०८॥
आचामं वासितं गन्धमुपवीतोत्तरीयके ।
भूषणानि च माल्यानि दीपं धूपं यथाक्रमम् ॥१०९॥
दत्त्वा कृत्वा धृतारोपं सम्मरेत्सहृतिक्रमम् ।
सहारम्य क्रमं वक्ष्ये समाकर्णयत द्विजाः ! ॥११०॥
आत्मानं सर्वगं ध्यात्वा सर्वज्ञं विष्णुमव्ययम् ।
दुर्गाद्यावाहितो मन्त्री तद्विष्णोरधिवासनम् ॥१११॥
प्रणवेन समारोप्य जीवमर्चाभिमानिनम् ।
उत्क्रम्यात्मैकतां कृत्वा स्वस्मिन् सर्वेश्वरे हरौ ।११२॥
संशोध्य मरुता पूर्वं दग्ध्वा बीजाग्निनाग्निना ।
अद्भिः सम्प्लाव्य तां वायुशुष्कां वह्नौ विलाप्य च ॥११३॥
संहृत्य वायुना वह्निं वायुमाकाशतां नयेत् ।
आत्माभिमानिभिर्देवैन्तु करणावयवैः सह ॥११४॥
तन्मात्रामस्थितान्येव क्रमात्संहृत्य देशिकः ।
मनो मनसि संहृत्य मनोऽहङ्कृति तत्पुनः ॥११५॥
गन्धप्यानि तु चापि नयेदव्याकृतेस्ततः ।
शान्तानन्ते परे व्योम्नि निष्कले ज्ञानविग्रहे ।११६॥

स ध्यायेत्परमानन्दे सस्थितं शान्तविग्रहम् ।
यस्मिन्नव्याकृत लीन सावस्थं यत्स्वरूपकम् ॥११७॥
वासुदेवोपि विज्ञेय सर्वात्मा सर्वकृत्प्रभु ।
तस्मिन्नेव तु सहृत्य पृथिव्यादीनि देशिक ॥११८॥
एव ध्यात्वा यथान्याय बिंब वस्त्रेण वेष्टयेत् ।
स्थगयित्वाशुकैर्दिव्यैर्दर्भै सर्वै स्रगादिभि ॥११९॥
आचार्यो मूर्तिपैर्मन्त्रान् व्यापकाश्चतुरोपि वा ।
पठद्भि शाकुन सूक्त तथा चान्यैस्त्रयीमयै ॥१२०॥
आम्नायोद्घोषणपरै सार्धमादाय तीरत ।
तद्बिंब जलमध्ये तु पीठोर्ध्वे शाययेत्स्वयम् ॥१२१॥
अम्भस्येति च मन्त्रेण प्राङ्मूर्धानमुदङ्मुखम् ।
दुन्दुभिर्विविधाकारा नादयित्वा दिशो दश ॥१२२॥
जयशब्दैश्च गीताद्यै सपुण्याहपुरस्सरम् ।
आत्मन्यास क्रमात्कृत्वा दिशोऽस्त्रेणावबध्नियात् ॥१२३॥
अवलोक्य च नेत्रेण कवचेनावकुण्ठयेत् ।
लोकपालान् बहिर्ध्यात्वा स्थानादस्मात्समन्तत ॥१२४॥
तीरदेशमनुप्राप्य कुम्भ सूत्रेण वेष्टितम् ।
वेष्टित नववस्त्राभ्या सपिधान सपल्लवम् ॥१२५॥
सस्थाप्य तद्दक्षिणत करक च तथैव हि ।
इन्द्रादीशानपर्यन्त कलशान् परितो न्यसेत् ॥१२६॥
सवस्त्रान् सापिधानाश्च सहिरण्यान् सकूर्चकान् ।
कुम्भे विशाखयूप तु करके च सुदर्शनम् ॥१२७॥
आवाह्यार्घ्यादिनाभ्यर्च्य इन्द्रादीन् कलशाष्टके ।
बिम्बस्य शिरसो देशे कुम्भ च करक न्यसेत् ॥१२८॥
अर्चित परितश्चाष्टौ कलशान्विन्यसेत्क्रमात् ।

प्राङ्मुख समवस्थाप्य वारिभि क्षाळयेत्तत ॥१५४॥
लोहजाश्चेद्विशुद्ध्यन्ति तिन्त्रिणीफलवारिभि ।
प्रागत्स्थिक्रम कृत्वा विधानेन मुनीश्वरा ! ॥१५५॥
वस्त्राभरणपुष्पाद्यैरलङ्कृत्य मनोहरै ।
यानमारोप्य तद्बिम्ब शङ्खभेर्यादिसयुतम् ॥१५६॥
ग्राम प्रदक्षिणीकृत्य ह्यालय वा समानयेत् ।
यागगेह तु यानादेरवरोप्य निवेशयेत् ॥१५७॥
स्थाने पूर्वोदिते पश्चादारभेत्स्नपन गुरु ।
लेख्यादौ सप्रविश्याथ प्रासाद मूर्तिपै सह ॥१५८॥
प्राक्चाधिवासित कूर्च जलात्तस्मात्समुद्धरेत् ।
बिम्बाच्च वस्त्राभरणमाल्यान्यपनयेत्तत ॥१५९॥
पीठे तु स्नानकुम्भाना स्थापनार्थं प्रकल्पिते ।
पूर्वोदित स्थूलपर स्नपन स्थापयेद्द्विजा ! ॥१६०॥
पूर्वादिपश्चिमाशान्त पृथक्स्नपनमण्टपम् ।
विहित यत्र तत्रैव देवदेवस्य वामत ॥१६१॥
यातुधानपदयानदमिकोणादितो न्यसेत् ।
स्नपन स्थूलपराख्य स्थूलसूक्ष्मतु पूर्ववत ॥१६२॥
ईशकोणात्समारभ्य यावद्यामयगोचरम् ।
देवस्य दक्षिणे पार्श्वे ईशानाद्वायुपश्चिमम् ॥१६३॥
स्थूलस्थूलाभिध स्नान स्थापयेत्क्रमयोगत ।
अधिवासदिने कुर्यात्स्नान स्थूलपराभिधम् ॥१६४॥
प्रतिष्ठादिवसे कुर्यात्स्नपन स्थूलसूक्ष्मकम् ।
चतुर्थे दिवसे स्नान स्थूलस्थूलाभिध भवेत् ॥१६५॥
[illegible] तद्दिने नवस्नपन स्थापयेद्गुरु ।
[illegible] स्नानस्थानात् समानस्थाप्य पूर्ववत् ॥१६६॥

तदर्पणावसानेथ शयनं कल्पयेत् द्विधा ।
नयनोन्मीलनार्थं तु शयनं कल्पयेत्पुरा ॥१६७॥
द्वादशाक्षरमन्त्रेण पीठं सम्प्रोक्षयेत्ततः ।
प्रागग्रानुदगग्रान्वा दर्भानास्तीर्य पुष्कलान् ॥१६८॥
पञ्चभारमितान् शालीनथ वा चार्धसमितान् ।
वृत्तं वा चतुरश्रं वा कबलानुपरि न्यसेत् ॥१६९॥
उपधानानि चित्राणि शयनाङ्गानि कल्पयेत् ।
मांगल्यकुम्भान् सम्स्थाप्य दिगष्टकसमाश्रितान् ॥१७०॥
ततो बिंबाधिवासार्थं शयनं परिकल्पयेत् ।
तदर्थं वेदिकोर्ध्वे तु कुर्यात्स्वस्तिकमण्डलम् ॥१७१॥
रजसा कुसुमैर्वाथ चतुर्वर्णैर्महोज्वलै ॥
प्रागग्रानुदगग्रांश्च दर्भानास्तीर्य तत्परम् ॥१७२॥
पञ्चभारप्रमाणेन शालींस्तत्र विनिक्षिपेत् ।
तदर्धं तण्डुलं शुद्धं तदर्धं तु तिलं तथा ॥१७३॥
उपर्युपरि निक्षिप्य लाजानूर्ध्वे तु विन्यसेत् ।
काष्ठजं सुदृढं स्निग्धं चतुर्गात्रसमन्वितम् ॥१७४॥
चतुष्पादसमायुक्तं चतुरश्रायतं ततम् ।
खट्वासंज्ञितपर्यंकं तदूर्ध्वे स्थापयेत्ततः ॥१७५॥
दुकूलं मृदुतल्पं च विन्यसेत्सोपरिच्छदम् ।
केवलं तल्पमात्रं वा विन्यसेदथ वा द्विजाः ॥१७६॥
खट्वातूले विसृज्याथ लाजोर्ध्वे रत्नकम्बलम् ।
न्यसेदभिनवं पश्चाद्वस्त्रं कार्पासजं नवम् ॥१७७॥
क्षौमवस्त्रं न्यसेन्मध्ये चित्रवस्त्रं ततोपरि ।
शिरोपधानसंयुक्तं पादगण्डूकसंयुतम् ॥१७८॥
सर्वानभिनवान् शुभान् सकपोलोपधानकान् ।

सुगन्धधूपितान् वस्त्रान् कुसुमामोदसम्मितान् ॥१७९॥
इन्द्रादीशानपर्यंत कलशान् सूत्रवेष्टितान् ।
तोयपूर्णान् समान् स्निग्धान् सापिधानान् सवस्त्रकान्॥१८०॥
सरत्नपल्लवैर्युक्तान् धान्यराशिषु निक्षिपेत् ।
शङ्खचक्रगदापद्मैर्ध्वजैश्चेन्द्रादिषु क्रमात् ॥१८१॥
श्रीवत्स गरुड कूर्मं सौवर्णं तेषु निक्षिपेत् ।
मध्ये मध्ये च कुम्भाना धान्योर्ध्वे मङ्गलान् न्यसेत् ॥१८२॥
शङ्ख चक्र तथा लक्ष्मीं कुम्भ श्रीवत्समेव च ।
दर्पण स्वस्तिक मत्स्ययुग्म वै मङ्गलाष्टकम् ॥१८३॥
वस्त्रैराच्छादितास्तद्वत् न्यसेत्कोणेषु पालिका ।
एव शयनयुग्म तु प्रकल्प्य तदधो यजेत् ॥१८४॥
सर्वाधारमनन्त तु तदूर्ध्वे सर्वग प्रभुम् ।
प्रभवाप्ययशयोगेन यजेत्प्रागादियोगत ॥१८५॥
पाठयेत्सर्पसामादि सज्ञा ज्ञानबलात्मिकाम् ।
हुत्वा शताष्टसख्य तु मूल तदनु कल्पयेत् ॥१८६॥
मण्डल पावनै रागै सिताद्यैर्मांगल्यकैः ।
तदूनाधिकशान्त्यर्थं हुत्वा कुण्डगण तत ॥१८७॥
सम्कुर्यात्प्रतिकुण्डस्य निकटे कुम्भमध्यगम् ।
प्रभवाप्ययशयोगेन चातुरात्म्य तु सयजेत् ॥१८८॥
इन्द्रादि यद्वा दिक्स्थेषु विदिक्स्थेषु तदस्त्रपम् ।
दत्वा तदर्धं पूर्णां तु पूर्णात्पूर्णं च पाठयेत् ॥१८९॥
एकायनान्यजुर्मयानाश्रावितमनन्तरम् ।
एव सर्वं समाप्याथ प्रयायाद्दिवसत्रिधिम् ॥१९०॥
विप्रमर्घ्यादिनाभ्यर्च्य गुरु आपनमारभेत् ।
अथाम्बमन्त्रेण पुरा मागल्यकलशाम्भसा ॥१९१॥
मगेन्द्य बिंब तदनु आर्पयेतन्मृदाम्भसा ।

पाठयेत्तत्र कूश्माण्डान् बलमन्त्रादनन्तरम् ॥१९२॥
ततो गोमयकुम्भेन इह गावः प्रपाठयेत् ।
भूतिस्त्वमिति मन्त्रेण पाठ्यमाने विभूतिना ॥१९३॥
पञ्चगव्येन तदनु पाठयेच्छाकरन्ततः ।
पूर्ववच्च ततोऽभ्यर्च्य विधिवच्चमसांबुना ॥१९४॥
क्षाळयित्वा जलैः शुद्धैरभिषिच्य ततोऽर्चयेत् ।
शिल्पिदोषविनाशार्थं स्नानमेतदुदाहृतम् ॥१९५॥
परिधाय ततो विप्रा वाससी अधरोत्तरे ।
नयनोन्मीलनार्थं तु शयनं यत्प्रकल्पितम् ॥१९६॥
तत्र पूर्वशिरस्कं च बिंबं प्रस्वापयेत् द्विजाः ! ।
ततः समन्ताद्बिंबं तु छादयेत्कम्बळादिभिः ॥१९७॥
सौवर्णं राजतं चैव पात्रमाढकपूरणम् ।
धान्यराशौ निधायाग्रे पूरयेत यथाक्रमम् ॥१९८॥
मधुना सर्पिषा चैव तत्तत्तु मधुपात्रके ।
अर्कमण्डलमध्यस्थं मार्ताण्डायुतसन्निभम् ॥१९९॥
ध्यात्वा मन्त्रेशमभ्यर्च्य तदन्यस्मिन् मुनीश्वराः ! ।
चन्द्रमण्डलमध्यस्थं धेनुमुद्रासमन्वितम् ॥२००॥
मन्त्रं वै सौरभीयं च स्फुरदिन्दुशतप्रभम् ।
तदन्तरस्थं मन्त्रेशं हिमाचलनिभं स्मरेत् ॥२०१॥
तत्स्तैरमृतौघैश्च शशिजैर्धेनुजैरपि ।
सुभावितं स्मरेद्बिंबं मधुवातेति मन्त्रतः ॥२०२॥
घृतादि मन्त्रयेत्पश्चाद्वस्त्रेणाच्छादयेत्तु तत् ।
अष्टांगुला च सौवर्णी शलाका राजती तथा ॥२०३॥
केवला वापि सौवर्णी शलाका स्यात् द्विजोत्तमाः ! ।
अष्ट धान्यानि परितः पात्रेषु विनिवेशयेत् ॥२०४॥

गाः कन्यकाः शुभाकारा भूषणैश्चापि भूषिताः ।
आनीय स्थापयेत्पार्श्वे ब्रह्मघोषेण घोषयेत् ॥२०५॥
स्वयं शलाकां सौवर्णीं कृत्वा नेत्राभिमन्त्रिताम् ।
मध्वाक्ता च तया नेत्रं दक्षिणं त्वीषदुल्लिखेत् ॥२०६॥
संस्मरन् परमं ज्योतिर्नेत्रमन्त्रेण देशिक ।
आज्याक्तया तया वापि राजत्या वाममुल्लिखेत् ॥२०७॥
तन्मन्त्रितेन शस्त्रेण शिल्पी स्थानोऽवलोकित ।
यथावत्स्फुटीकुर्यात् विधिदृष्टेन वर्त्मना ॥२०८॥
वारुणं पाठयेत्साम सह चान्द्रेण सामगान् ।
पूरयेन्मधुसर्पिर्भ्यां नेत्रयुग्मं क्रमेण तु ॥२०९॥
श्रौषडन्तेन मूलेन तेनैव जुहुयाद्धृत ।
सिञ्चन्नमृतौघं तु ह्रदाद्यन्तेन रोचयेत् ॥२१०॥
तन्मूर्ध्नि शशिबिम्बं तु ध्यायेत्तापादिशान्तये ।
व्यपोह्याच्छादनपटं दर्शयन्मधुसर्पिषी ॥२११॥
अष्ट धान्यानि गाश्चैव कन्यकाः पुस्त स्थिता ।
मध्वाज्ये च शलाके च प्रदद्याच्छिल्पिने द्विजा ॥२१२॥
अष्ट धान्यानि गाश्चैव शय्योपकरणं तथा ।
प्रदद्याद्देशिकेन्द्राय साधक सिद्धिलालस ॥२१३॥
यद्वा मध्वादि सकलमाचार्याय निवेदयेत् ।
यथाशक्ति तथान्येषां मूर्तिपानां च दक्षिणा ॥२१४॥
मृण्मये मूलबिम्बे तु निर्मिमथ प्रविश्य तु ।
प्रासाद सत्र कुर्वीत नयनोन्मीलनक्रियाम् ॥२१५॥
एवं क्रियादिमार्गेना नयनोन्मीलनं भवेत् ।
एवं नेत्रे समुन्मील्य बिम्बस्य तु तत. परम् ॥२१६॥
दत्त्वाप्यायनं कुर्यादस्त्रेण हृदयेन च ।

आमूर्ध्नो मूलमन्त्रं तु मूर्त्यर्थं पूर्ववत् न्यसेत् ॥२१७॥
स्नानार्थत- पुरा कलसे पीठे बिम्ब नयेत्तत ।
व्यासिसवासमायुक्ते सम्कृते प्रोक्षणादिना ॥२१८॥
आधारादिक्रमोपेते समालब्धे सुपूजिते ।
पीठेवतार्य सवेष्ट्य वाससी ह्यधरोत्तरे ॥२१९॥
अथ क्रमोदितै कुम्भैर्द्विष्पोडावर्तितैर्हृदा ।
स्नापयेत्पाठयेद्विप्रानोषधीनामिति श्रुतिम् ॥२२०॥
या ओषधय इत्यादि ऋग्वेदास्तदनन्तरम् ।
एव दशावशिष्टान्तै सेचिते कलशै- सति ॥२२१॥
तत कुम्भचतुष्केण चतुर्भिर्मूर्तिधारकै ।
ऋक्सामपूर्वैर्विधिवत् स्नपनीय च पाठयेत् ॥२२२॥
उदुत्तम हि ऋग्वेदान् पाठयेद्दक्षिण यजु ।
ततस्तु वारुण साम सामज्ञोऽथर्वणस्तत ॥२२३॥
अयन्ते वरुणश्चेति पवित्र ते ततो ऋचम् ।
वसो पवित्र हि यजु पाठयेत्तुनहास्तत ॥२२४॥
पवित्र ते हि यत्साम सयोज्यैकायनास्तत ।
मूर्तिपान् समुदायेन पावमानीचतुष्टयम् ॥२२५॥
तदन्ते तु पर मन्त्र व्यूहीय भगवानिति ।
पवित्रमन्त्र तदनु इदविष्णुर्विचक्रमे ॥२२६॥
ततो विभवमन्त्रैस्तु सर्वैस्सम्मन्त्रितेन च ।
कुम्भेन सेचयित्वा तु व्यूहमन्त्रै परेण तु ॥२२७॥
स्नापयित्वाऽर्चयित्वा च जुहुयात्साधिक शतम् ।
यथावत्प्रणवेनाथ व्याप्ति कृत्वा च पाठयेत् ॥२२८॥
मामगामेति ऋग्वेदान् अग्नेवायुर्यजुर्मयान् ।
प्राणापान हि यत्साम तत प्राणाय वै नमः ॥२२९॥

पुण्याहजयघोषेण वेदध्वनियुतेन च ।
शङ्खवादित्रनिर्घोषपटहैर्गीतिभिः सह ॥२५१॥
क्रमात्त्रिगतौ कृत्वा देवदेवस्य देशिकः ।
पाठयेद्वाङ्मयं मन्त्रमुत्तिष्ठेति ततस्सह ॥२५२॥
यात्रोपकरणैर्मन्त्रं कृत्वा ब्रह्मरथे स्थिरे ।
सुयन्त्रिते च सौगव्यदध्योदनसमन्विते ॥२५३॥
सुभिक्षक्षेमशान्त्यर्थं परमान्नफलैर्युते ।
पाठयेदन्यग्रामीयमृङ्मयं तदनन्तरम् ॥२५४॥
तन्मयान् बलमन्त्रं तु दशार्धेति मुनीश्वराः ! ।
स्वयमाद्यन्तसंरुद्धं हृदा तु कवचं जपेत् ॥२५५॥
भ्रामयेद्बलिदानं च क्रियमाणं तु सर्वदिक् ।
रक्षार्चनत्राणां पूर्ववत् क्षेपमाचरेत् ॥२५६॥
दिव्याद्यायतनानां च कार्या पूजा यथोचिता ।
पञ्चरात्रविदां चैव यतीनां ब्रह्मचारिणाम् ॥२५७॥
षट्कर्मनिरतानां च दानं दीनजनेष्वपि ।
रथस्थे मन्त्रबिम्बे तु यावत्तद्गतं नयेत् ॥२५८॥
तद्वत् तूर्यघोषेण तावत्क्रतुशतं फलम् ।
आप्नोत्यागमकृत् सत्यसत्कामो नियतव्रतः ॥२५९॥
ततस्तोरणदेशस्थं रथं कृत्वार्चयेत्प्रभुम् ।
पाद्यार्घ्यपुष्पधूपैश्च नमस्कृत्य च पाठयेत् ॥२६०॥
उत्तिष्ठेति द्विपदर्णं मानिनन्तं तु चाखिलम् ।
सम्पठन् पौरुषं सूक्तं यागवेश्म प्रवेशयेत् ॥२६१॥
शय्यायां प्राक्शिरो बिम्बं शाययेद्धृदयेन तु ।
देशिको मूर्तिपैः सार्धं धामहोमं समापयेत् ॥२६२॥
तन्मार्दिग्गो देशे चराधारस्थिते घटे ।
पूर्वनिस्सृतं नेत्रमन्त्रसम्पुटितं यजेत् ॥२६३॥

पूजयेन्मङ्गळान्यष्टौ प्रागादौ तु स्वनामभिः ।
अष्टासु तत्र कुम्भेषु पुरैव स्थापितेषु च ॥२६४॥
वासुदेवादयः पूज्या प्रभवाप्यययोगतः ।
हृदादि यद्वा दिक्स्थेषु विदिक्स्थेषु तदस्त्रपम् ॥२६५॥
यद्वा प्राच्या तु वाराहो नारसिंहस्तु दक्षिणे ।
प्रतीच्या श्रीपरो देवो हयवक्त्रस्तथोत्तरे ॥२६६॥
आग्नेय्यां भार्गवो रामो नैर्ऋते राम एव च ।
वायव्ये वामनश्चापि विष्णुरीशानगोचरे ॥२६७॥
स्वनाम्ना पूजयित्वैतानर्घ्यगन्धादिभिस्ततः ।
पूजयित्वार्घ्यगन्धाद्यैः शयनस्थं विभुं ततः ॥२६८॥
चर्मणाच्छादनपटं दत्वा धूपाधिवासितम् ।
मूलेन शयनस्थस्य कुर्यादाप्यायनं ततः ॥२६९॥
देवाग्निनिकटोद्देशे उपविष्टस्तु देशिकः ।
मन्त्रविद्देवबिम्बस्य मन्त्रन्यासं समाचरेत् ॥१७०॥
कौत्वादौ मन्त्रबिम्बे तु प्रासादस्थे द्विजोत्तमाः ! ।
उत्सवं कर्मबिम्बे तु विष्टरे वा प्रकल्प्य च ॥२७१॥
प्रस्थाप्य शयने प्राक्प्रासादं सम्प्रविश्य च ।
मन्त्रन्यासादिकं कुर्याद्वक्ष्यमाणविधानतः ॥२७२॥
सुविस्तृतं तद्विधानं शृणुध्वं मुनिपुङ्गवाः ! ।
पीठे पुष्पांजलिं कृत्वा गन्धयुक्तं च साक्षतम् ॥२७३॥
न्यसेदष्टाक्षरं प्राग्वदानुपूर्व्येश्वरणान्तिमम् ।
न्यसेद्धृदादिपणमन्त्रान् स्थानेषु हृदयादिषु ॥२७४॥
किरीटं शिरसो देशे श्रीवत्सं तु गळादधः ।
वक्षसो वामभागे तु विन्यसेत्तदनन्तरम् ॥२७५॥
कौस्तुभं हृदये न्यस्य वनमालां च कण्ठतः ।

देवस्य दक्षिणे हस्ते चक्रं शंखं तु वामतः ॥२७६॥
वामहस्ते गदाखड्गौ ह्यथ वा दक्षवामयोः ।
क्रमाल्लाञ्छनमन्त्रास्तु चक्रादीन् लाञ्छनान्न्यसेत् ॥२७७॥
श्रियं दक्षिणभागे तु पुष्टिमुत्तरतो न्यसेत् ।
ऊरुमूले वैनतेयमथेदानीं निबोधत ॥२७८॥
चतुर्भुजस्य देवस्य चक्रादेर्विनिवेशनम् ।
मुख्यदक्षिणहस्तेऽब्जं गदां वामकरे न्यसेत् ॥२७९॥
अपरे दक्षिणे चक्रं शङ्खं वामकरे परे ।
अन्यान् लाञ्छनमन्त्रांस्तु यथायोगं च विन्यसेत् ॥२८०॥
अन्येषु षड्भुजाद्येषु मुख्यदक्षादितः क्रमात् ।
सर्वान् लाञ्छनमन्त्रांस्तु यथास्थानगतान् न्यसेत् ॥२८१॥
संस्थाप्या भगवन्मूर्तिर्धत्ते चक्रादिलाञ्छनम् ।
हस्ते येन क्रमेणैव लाञ्छनानि न्यसेत्तथा ॥२८२॥
मन्त्रान् किरीटपूर्वांश्च प्राग्वत्सर्वत्र विन्यसेत् ।
पादादिद्वादशाङ्गेषु ततो दामोदरादिकान् ॥२८३॥
तच्छक्तिकास्तथा मन्त्रान् तद्वद्व्यापकलक्षणान् ।
ऐश्वरेणाथ बीजेन यथावस्थेन भावयेत् ॥२८४॥
पादादि तन्मयेनैव तद्वन्मन्त्रवरेण तु ।
प्राग्वदप्यययुक्त्या तु ध्यन्तज्योतिर्मयात्मना ॥२८५॥
विभुना भावस्वरूपेण तदेवाथ परं पदम् ।
मुखात् सर्वगं बुध्वा निस्तरङ्गमिवोदधिम् ॥२८६॥
विधा गदामित्याद्य यत्पाठयेत्पाञ्चरात्रिकान् ।
देहसान्यासिकं मन्त्रं धारणाख्यमनन्तरम् ॥२८७॥
जीमूतस्येति ऋग्वेदान् नासदासीत् पाठयेत् ।
क्रमेणानेन हुत्वा तु पदार्थशतसंख्यया ॥२८८॥
निम्ना च नभाज्यस्य मन्त्रैरेभिर्मुनीश्वर ' ।

दत्वा पूर्णाहुतिं प्राग्वदुपसंहारलक्षणाम ॥२८९॥
ततस्तत्परमं ब्रह्म ह्युदितं पूर्ववत् स्मरेत् ।
सर्वशक्तिमयेनैव स्वभावेन स्वकेन तु ॥२९०॥
ओजो नलात्मना यद्वद्गन्धो द्रव्यात्मना तु वै ।
बीजं तरुस्वरूपेण समुद्रो बुद्बुदात्मना ॥२९१॥
एवमन्यपदेस्था या शक्तिः स्वे शक्तिदर्पणे ।
स्थितमादाय विधेशं स्वातन्त्र्याच्च मुनीश्वराः । ॥२९२॥
मन्त्ररूपां तनुं धत्ते सम्यगाराधनाय च ।
नानात्वमुपयातस्य प्रसरं तस्य चं स्वयम् ॥२९३॥
निष्प्रभत्वं मयातस्य विह्नीजनियमस्य च ।
आविष्कृतस्य भेदे वाप्यमूर्तेन मलीमसा ॥२९४॥
अज्ञानगहनेनैव नित्यानित्यामलात्मना ।
स्मृत्वैवं मूलमन्त्रं तु विग्रहत्वग्गं स्मरेत् ॥२९५॥
षट्छक्तिकरणोपेतं तैस्तद्द्रव्यमयीं तनुम् ।
संस्मरेत्संहरन्तं च प्रागुक्तेनैव वर्त्मना ॥२९६॥
स्वरूपममलं भूयः स्मरेन्मूर्त्यात्मना तु तत् ।
नयन्तं पूर्वविधिनाप्येवं स परमेश्वरः ॥२९७॥
मन्त्रात्मना स्वतन्त्रत्वमुपयातो यदा तदा ।
सहस्रशिरसं देवमिति सर्वास्तु पाठयेत् ॥२९८॥
पाठयेद्ब्राह्मणान् धातर्यद्बक्षेति च मन्त्रपम् ।
योविश्वतश्चक्षुरिति ध्यातव्यो भवतीति च ॥२९९॥
द्वासुपर्णेति तदनु अनेोदेवेति वै ततः ।
ऋङ्मयं पौरुषं सूक्तं ततः परतमानिति ॥३००॥
शाश्वतावततः कालकलेति समुदाहरेत् ।
एषाबुद्धिः सप्तथेति अत्रेदानींच पाठयेत् ॥३०१॥

ततोऽर्चयित्वा मन्त्रैस्तं शयने विनिवर्तिकम् ।
सांस्पर्शिकैरासनाद्यैर्विविधैरौपचारिकैः ॥२०२॥
हृदयक्रमसंज्ञैश्च मधुपर्कादिभिर्द्विजाः ! ।
परमान्नादिभिश्चान्नैः पवित्रैः पावनैस्तथा ॥२०३॥
अन्यैश्च विविधैर्भोगैर्यथा चानुक्रमेण तु ।
सर्वं तु सम्प्रदानान्तं कृत्वा पश्चात्तु मण्डले ॥२०४॥

सन्निधीकृत्य सम्पूज्य महता विभवेन तु ।
अग्नौ सन्तर्पयेत्मान्त्र समिन्मन्त्रकपूर्वकम् ॥२०५॥
जुहुयुर्मूर्तिपाश्चापि स्वे स्वे कुण्डे यथाक्रमम् ।
प्रागादि दिक्षु कुण्डेषु क्रमेण समिधः स्मृताः ॥२०६॥
पलाशवृक्षखदिरबिल्वोदुम्बरसम्भवाः ।
आग्नेयादिविदिक्षु स्युः पिप्पलप्लक्षसम्भवाः ॥२०७॥
न्यग्रोधप्रभवाश्चैव कश्मर्यप्रभवास्तथा ।
पलाशसमिधोऽन्यत्र सूयसा परिकल्पने ॥२०८॥

उक्ताभावे तु सर्वत्र पालाश्यः समिधो मताः ।
चतस्रो धेनवः स्थाप्याः दक्षिणस्यामुदक्स्वसाः ॥२०९॥
गङ्गा सरस्वती गोदा यमुना रूपधारिणी ।
दुग्धैस्तदीयैश्श्रपणं चरूणामाहुतिस्तथा ॥२१०॥
श्रपयेन्नयसा पूर्वं शाल्यन्नं दुग्धमाढकम् ।
कृसरं दक्षिणाग्नौ तु पाश्चात्ये गुडमिश्रितम् ॥२११॥
उदीच्यामौ हरिद्रान्नं शुद्धान्नमितराग्निषु ।
प्रत्येकं शतमष्टौ च होमाः स्युः समिदादिभिः ॥२१२॥
तदर्धं वापि पादं वा देशकालानुरूपतः ।
नित्याग्निर्वर्धयेत्सौम्यसूक्तान्यनुस्मरन् ॥२१३॥
नित्याग्निकुण्डेषु तेषां मन्त्रैः कल्पयेत् ।

स्वमूर्तिकुम्भान्मन्त्रेण जलमुद्धृत्य भाजने ॥२१४॥
बिंबमूर्ध्नि क्रमाद्देय सर्वरेकायनादिकैः ।
चतुर्दर्भकृतेनैव कूर्चेन तदनन्तरम् ॥२१५॥
पलाशखदिराश्वत्थबिल्वशाखाभिरम्बुभिः ।
सिञ्चेद्युर्मूर्तिपाः सम्यक् वेदिकाकलशस्थितैः ॥२१६॥
आचार्यः कोणदेशस्थैर्मन्त्रैश्चैतसशाखया ।
सन्तर्पयित्वा तदनु मन्त्रं सपरिवारकम् ॥२१७॥
आज्यादिना प्रभूतेन दत्वा पूर्णाहुतिं ततः ।
बिंबात्मना प्रयातानां क्ष्मादीनामवरूपिणाम् ॥२१८॥
आपादनेपि प्राणार्थं पिण्डीभूतार्थमेव च ।
आरम्भादेव जातानां छिद्राणां शमने तु वै ॥२१९॥
आप्यायनार्थं मन्त्राणां द्रव्यैर्होमं समाचरेत् ।
द्विषट्केणाहुतीनां च एकैकेन चतुर्दश ॥२२०॥
आचाङ्घ्रेर्जानुपर्यन्तं स्पृष्ट्वाज्यं होमयेत्पुरा ।
आनाभि जानुदेशाच्च तथैव जुहुयाद्दधि ॥२२१॥
नाभेराकण्ठतः क्षीरमामूर्ध्नः कण्ठतो मधु ।
समिधं जुहुयात्सर्वं स्पृष्ट्वा देहन्तु चाखिलम् ॥२२२॥
दत्वा घृतेन वै पश्चात्पूर्णां मूलेन तत्परम् ।
सम्कृत्य बिम्बवत्पीठं भिन्न ब्रह्मशिला तथा ॥२२३॥
प्राणाभिमानदेवं वा यस्य यो निहितस्तु वै ।
चेष्टयित्वाम्बरीश्रिनै चक्रमन्त्रेण वै ततः ॥२२४॥
कार्यो ब्रह्मशिलाहोमः शताद्याधिकसङ्ख्यया ।
गायत्रीभिस्तदर्धं च तद्वृचाथै प्रथक् प्रथक् ॥२२५॥
अजस्यनाभावित्यादि मन्त्रैरेकायनैस्ततः ।
भम्बादिभूतमूर्ते तु भोग्य वापि पृथक् स्थितम् ॥२२६॥

देवतानां त्वधिष्ठानं पीठं कृत्वा तु बुद्धिगम् ।
होतव्यं प्रणवेनैव स्वयं व्याहृतिभिस्ततः ॥३२७॥
अपरैर्बलमन्त्रेण प्रणवान्तेन हावयेत् ।
ततो हवनमन्त्रेण तर्पणीयं तथैव हि ॥३२८॥
स्वनाम्ना प्रणवेनैव स्वाहान्तेनापरैस्तथा ।
संरोधस्तर्पितानां च कार्यः पूर्णान्तमेव हि ॥३२९॥
साम्भसा विष्टरेणैव भावेन सजपेन च ।
सर्वेश्वरस्य देवस्य स्वकीयासु च मूर्तिषु ॥३३०॥
शब्दात्मिकासु मूर्तासु तद्वच्छ्रुतिमयस्य च ।
कृत्वैवं च तदा दिक्षु मूर्तिपान् विनिवेश्य च ॥३३१॥
पार्श्वदेशे तु कुण्डानां तर्पयेत्पायसेन तु ।
दक्षिणां च यथाशक्ति दद्याद्धेमादिकां ततः ॥३३२॥
गृहीत्वा दक्षिणां मन्त्रः प्रीणनीयस्तु तैस्ततः ।
अथ निद्रायमाणं तु देवं स्तुत्वावकुण्ठ्य च ॥३३३॥
अर्चयित्वा नमस्कृत्य तत्र सर्वान् प्रवेशयेत् ।
विप्रानेकायनांश्चापि तथा वै बह्वृचादिकान् ॥३३४॥
स्वस्वशाखोदितान् मन्त्रान् पाठयेत्क्रमयोगतः ।
स्तुतिपाठकपूर्वांश्च नृत्तगीतपरायणान् ॥३३५॥
वीणावेणुमृदङ्गादिनितरांश्च प्रवेशयेत् ।
विदिक्स्थान् प्रणवे जापे मूर्तिपान् विनिवेशयेत् ॥३३६॥
दिक्स्थितान् मूर्तिपान् विप्रान् द्वादशार्णे नियोजयेत् ।
रक्षामुद्रां ततः कृत्वा दर्शयेत्सर्वदिक्ष्वथ ॥३३७॥
शाययेद्दर्भशय्यायां यजमानमुपोषितम् ।
स्थण्डिले स्वप्नसिद्ध्यर्थं प्राक्शिरस्कन्ततो द्विजाः ॥३३८॥
एवं कृत्वाधिवासं तु जागरेण नयेन्निशाम् ।
प्रभातायां तु शर्वर्यां कृत्वा स्नानादिकाः क्रियाः ॥३३९॥

प्रतिष्ठामारभेत्पश्चाद्देशिकः शास्त्रवित्तमः ।
प्रबुद्धं यजमानं तु स्वप्नं पृच्छेच्छुभाशुभम् ॥३४०॥
तत्राशुभोपशान्त्यर्थं तदानीं जुहुयाद्गुरुः ।
शतं सहस्रं साष्टं वा यथाशक्त्यथ वा द्विजाः ! ॥३४१॥
मध्वाज्यक्षीरसंमिश्रान् सफलांश्च तिलानपि ।
अस्त्रसम्पुटितेनैव नाम्ना स्वाहान्वितेन तु ॥३४२॥
दोष जहि जहीत्येवं पदं नामावसानकम् ।
केवलेनाथ वाक्येन सिंहमन्त्रेण होमयेत् ॥३४३॥
एवं दुःस्वप्नशान्तिं तु कृत्वा स्थापनमाचरेत् ।
प्रासादं दर्भशाखाभिर्बहिरन्तश्च मार्जयेत् ॥३४४॥
विकीर्य साक्षतं पुष्पं गुग्गुलुं धूपयेत्पुनः ।
सह मूर्तिधरैर्विप्रा ! शिल्पिभिश्चाथ देशिकः ॥३४५॥
सार्घ्यपुष्पाक्षतकरः प्रासादान्तः व्रजेत्ततः ।
हन्यात्सिद्धार्थकैस्तस्मात् विघ्नानस्त्राभिमन्त्रितैः ॥३४६॥
गर्भमध्ये विधिनानेन श्वभ्रं वा खातं खनेत् ।
तदर्थं गर्भगेहं तु सूत्रपातैर्विभाजयेत् ॥३४७॥
प्रासादे एकद्वारे तु गर्भमानं विनिश्चितम् ।
आपात्पश्चिमाभित्त्यन्तं दक्षिणोत्तरमायतम् ॥३४८॥
सप्तधा विभजेत्सम्यक् पैशाचः प्रथमः स्मृतः ।
द्वितीयो मानुषो भागस्तृतीयो दैवसंज्ञितः ॥३४९॥
ब्राह्मश्चतुर्थो विज्ञेयः क्रमादन्ये त्रयस्तथा ।
दैवमानुषपैशाचा विज्ञेया द्विजसत्तमाः ! ॥३५०॥
प्रासादे तु चतुर्द्वारे चतुर्दिक्षु समैः पदैः ।
विभजेत्सप्तधा मध्यो भागः स्याद्ब्राह्मसंज्ञितः ॥३५१॥
दिव्यमानुषपैशाचाः क्रमात्तद्विक्रमेण तु ।

चतुर्द्वारत्रिभवने ब्राह्मये मध्यमे पद ॥३५२॥
चतुर्दिग्वीक्षमाणस्य स्थापन चतुरात्मन ।
प्रासाद एकद्वारे तु देव सस्थापयेत् द्विजा ! ॥३५३॥
ब्राह्मदैविकभागाभ्या दैवमानुषयोस्तु वा ।
ब्राह्मे वा दैविके वाथ तस्मिन् दिव्याश्रिते तु वा ॥३५४॥
मानुषाश्रितदैवेन फलभेदवशात्तु वै ।
ब्राह्मभागेतु मोक्ष स्याद्दिव्य स्थानाभिवृद्धिकृत् ॥३५५॥
भोगमोक्षफलावाप्तिर्ब्राह्मे दिव्यसमाश्रिते ।
दिव्यभागफलावाप्तिर्मानुषाश्रितदैवके ॥३५६॥
दैवमानुषभागाच्च त्वैहिकामुष्मिक फलम् ।
विबुधब्रह्मभागाच्च सैहिक तु गुणाष्टकम् ॥३५७॥
अथदेशेथ बिम्बस्य वेदिर्भागद्वयोपरि ।
आराधनार्थतो विप्रा स्थापनीया शिलान्विता ॥३५८॥
पीठोपर्यथ वा देव यन्त्रागारयने सदा ।
मध्ये रत्नोदक पीठे न्यस्य गोर्भे स्थापयेत्तु तम् ॥३५९॥
देवीसमन्वित यत्र स्थापन भवति द्विजा ! ।
मूलबिम्बस्य पार्श्वेतु पीठदेश विभज्य च ॥३६०॥
सपीठाना तु देवीना स्थापन तु समाचरेत् ।
एका सव्ये दक्षिणे वा स्थाप्या द्वे दक्षवामयो ॥३६१॥
चतस्रस्तु क्रमेणैव स्थाप्या दक्षिणवामयो ।
प्रमादाद्बुद्धिपूर्वाद्वा तत्तत्स्थानविपर्ययम् ॥३६२॥
न कुर्याद्वाररान्नाद्विदितिनी देशिकोत्तम ।
भित्रप्रेषावशात्मात्ये सति भूय समाचरेत् ॥३६३॥
क्षाल्तिस्याम्बुना लिप्ते दृढा वै चन्दनादिना ।
श्वभ्रेषा पदच्छाला मन्त्राणा च निरोधनम् ॥३६४॥

पूर्वोक्तेन विधानेन धिया स्वे स्वेयने तथा ।
कृत्वार्चनं यथोद्दिष्टं पूर्णान्तं तत्र विन्यसेत् ॥३६५॥
बाहुल्येन तु षट् पञ्च चतुर्गोळकसंमिताम् ।
पीठाद्विनिर्गता किञ्चिद्भूतये सुस्थिरा शिलाम् ॥३६६॥
अस्ता पीठेन मुक्त्यर्थं नवरन्ध्रकृता पुरा ।
स्वमन्त्रेण तु तत्रापि प्रतिष्ठासीति पाठयेत् ॥३६७॥
प्रागादौ प्रभवेनाथ पञ्चकं पञ्चकं न्यसेत् ।
शिलावटेषु द्रव्याणां तत्र वज्रं च हाटकम् ॥३६८॥
हरितालमुशीरं च व्रीहयो दक्षिणेत्वथ ।
इन्द्रनीलमयश्चैव कासीसं चन्दनं तिलम् ॥३६९॥
मुक्ताफलं च रजतं पारदश्चाप्यदिक्तथा ।
सह्योशीराश्च वै मुद्गा पद्मरागमथोत्तरे ॥३७०॥
कांस्यं सराजपाषाणं राजेन्द्रं चणकैः सह ।
विंशकं विन्यसेन्मध्ये पूर्वमेव ततो यदि ॥३७१॥
विदिक्ष्वप्यययोगेन स्वेवमन्यत् पृथक् पृथक् ।
एवं वैडूर्यपूर्वन्तु चक्राकं चाभ्रकं तथा ॥३७२॥
षाष्टिका त्वीशदिग्वायो पुष्यरागो हरीतिका ।
गैरिकं शारिकात्रैव मसूराण्यथ यातु दिक् ॥३७३॥
महानीलश्च वङ्गश्च तथा पाषाणमाक्षिकम् ।
यवान्सागरुकाश्चैव आग्नेय्यां स्फटिकं तथा ॥३७४॥
ताम्रं मनःशिलाचैव गोधूमाद्दशङ्खपुष्पिका ।
मध्ये सर्वाणि तदनु ततो गर्तगणं तु तत् ॥३७५॥
लेपैराच्छादितं कृत्वा साम्रं मन्त्रं पदे पदे ।
पूजयित्वा यजुर्वेदाधमषट्काश्च पाठयेत् ॥३७६॥
तदूर्ध्वे विन्यसेत्पीठं तच्छ्वभ्रे विनिवेदयच ।

अष्टलोहमय चक्र तदूर्ध्वे तु महामते ॥३७७॥
द्वादशाख्या द्विशेषोत्थादाधारो यस्य च स्वक ।
हैमन्तदूर्ध्वे कमल तज्ज वा ताम्रमेव वा ॥३७८॥
यथाम्रमस्थित ह्येतत्पद्मक चतुरात्मनि ।
न्यसेदनन्त चक्रस्य मीनकूर्मौ तु तस्य वै ॥३७९॥
कूर्मानन्तौ तु मीनस्य मीनानन्तौ तु तस्य च ।
सर्वस्य विहित पद्म तस्यानन्त तु विन्यसेत् ॥३८०॥
लक्ष्म्यादीना च शक्तीना चक्रस्थापनकर्मणि ।
न्यस्य पूर्णान्तिक कृत्वा कर्माण्यत्र च तर्पणम् ॥३८१॥
मण्टपे तु खगेशस्य एवमेव समाचरेत् ।
सह मूर्तिधर प्राग्वत्कार्या दर्भोदकक्रिया ॥३८२॥
चतुर्गुणितसूत्रेण वेष्टयेद्देवमन्दिरम् ।
छादयेन्नववस्त्रेण तथा वै दर्भमालया ॥३८३॥
ततस्तु मूर्तिपै सार्धं प्रविशेद्यागमण्टपम् ।
प्रतीक्षेल्लग्नकाल तु यावत्काल न याति च ॥३८४॥
तावद्गीतादिर्होमैश्च हास्यै पाठैश्च सक्षिपेत् ।
प्राप्ते लग्नोदये विप्रा! शयनस्थ प्रबोधयेत् ॥३८५॥
अर्घ्यारम्भनमाल्याद्यैरर्चयित्वा त्विम पठेत् ।
मन्त्रात्मन् रूपमात्मीयमामेयमुपसहर ॥३८६॥
समाश्रयस्व सौम्यत्व स्थित्यर्थं परमेश्वर ।
नमस्तेऽस्तु हृषीकेश उत्तिष्ठ परमेश्वर ॥३८७॥
मदनुग्रहहेत्वर्थं पीठभूमि समाश्रय ।
उदभूय हृदयेनाथ त्यक्तनिद्र च मन्त्रपम् ॥३८८॥
उत्थाप्य मूर्तिमन्त्रेण सह मूर्तिधरैर्बलात् ।
तथा तच्छिरसो देवे चक्राधारगिरा पटम् ॥३८९॥

तदष्टदिक्स्थिताश्चापि कुम्भाल्लम्मङ्गळैः सह ।
उत्थाप्य मूर्तिपायैस्तु वाहयन् देशिकोत्तम ॥३९०॥
यायाल्लक्षिपमाणस्तु रत्नाश्च विविधान् बहून् ।
नानाविधैस्तु कुसुमैर्लाजाद्यान् मिश्रितान् बहून् ॥३९१॥
प्रतिमामुद्वहन्तो ये मूर्तिधारास्त्वनन्तरम् ।
अन्ये यथा न गच्छेयुरन्तराचार्यबिम्बयो ॥३९२॥
अष्टकुम्भधराश्चान्ये ये च मङ्गळपाठका ।
परितस्तेपि गच्छेयु पठन्त शाकुन तथा ॥३९३॥
वाग्यतो यजमानस्तु कुशपाणि प्रणामवान् ।
तेषा वै पृष्ठतस्त्वन्ये गच्छेयु परिचारका ॥३९४॥
तोरणेन च निष्क्रम्य प्रदक्षिणचतुष्टयम् ।
कुर्यात्प्रासादपीठस्य द्वाराग्रे सन्निरोध्य च ॥३९५॥
पाद्यार्घ्याचमन दत्वा हृन्मन्त्रेण प्रवेशयेत् ।
शाखाग्रमस्पृशन् त च पाठयेच्चाद्विदस्तत ॥३९६॥
चतुश्चक्रेति तदनु पुरमेकादशेति च ।
वर्माभिमन्त्रितेनाथ दुकूलेन सितेन च ॥३९७॥
पादाम्बुरुहनाळ प्राक् शिखामन्त्रेण वेष्टयेत ।
अग्नीषोमौ समीकृत्य प्रणवाद्यन्तकेन तु ॥३९८॥
मूलमन्त्रेण पीठोर्ध्वे बिंब सस्थापयेत्त स्थिरम् ।
द्वारमध्य न सन्त्याज्य देवस्थापनकर्मणि ॥३९९॥
न ततश्चाग्रत स्थाप्य न पार्श्वे न च पृष्ठत ।
नागतो मारुत पश्चात् सन्त्यजेद्देशिकोत्तम ॥४००॥
प्रतिष्ठालिङ्गशब्दौ च द्वौ मन्त्रौ पाठयेत्क्रमात् ।
शान्त ब्रह्ममय रूप स्वक समवलम्ब्य च ॥४०१॥
यत्रापि केवले ग्रामे स्थापन समुदीरितम् ।

तत्रापि वामत किंचिद्दिव्यभाग समाश्रयेत् ॥४०२॥
यतो हितार्थं सर्वेषा निर्गतप्वड्गुणात्मना ।
अतो ब्रह्मपदादीपद्देवभागे समानयेत् ॥४०३॥
मोक्षादिफलसिद्धीना प्राप्तये ह्यविचारत ।
करस्समथ मोक्तव्य कौतुक हृदयेन तु ॥४०४॥
सर्वाङ्गमध्येमन्त्रेण दत्वा मूलमनुम्मरेत् ।
हृदाख्यपरिजप्तेन वज्रलेपेन वै तत ॥४०५॥
बिंबपीठशिलाना चाप्येकत्वेनाचरेत् स्थितम् ।
ततस्तु नेत्रकुम्भस्थैस्तथा कुम्भाष्टकस्थितै ॥४०६॥
तोयै कूर्चाग्रसलग्नैर्बिंब समीक्ष्य मन्त्रत ।
तत्तत्कुम्भगतान् मन्त्रान् बिंबेन सह योजयेत ॥४०७॥
बालबिंबगता चापि शक्तिं मूले न्यसेत्तदा ।
मूलबिंबे मुनिश्रेष्ठा मृदादिद्रव्यनिर्मिते ॥४०८॥
कर्मार्चाया विष्टरे वा दर्भमज्ञाग्जे द्विजा ' ।
प्रबोधनच वै कर्म तथा प्रादक्षिणक्रियाम् ॥४०९॥
प्रासादे सप्रवेश च कृत्वान्यत्सर्वमाचरेत् ।
मूलबिंबे क्रमेणैव . देशिकेन्द्र समाहित ॥४०१॥
मूलमन्त्र ततो ध्यात्वा सशातब्रह्मलक्षणम् ।
आधारादिव्वनाग्रान्त व्याप्त तेनाखिल स्मरेत् ॥४११॥
इति सामान्यसन्धान प्रावङ्मा तद्विशिष्यते ।
स्थूलसूक्ष्मपरत्वेन स्थूल पोदा शि॰ लगम् ॥४१२॥
पिण्डकाया तथा सूक्ष्म तत्पर बिम्बनिग्रहे ।
विन्यास पीठमूले च देवताना समाचरेत् ॥४१३॥
भवोपकरणीयानामेतासा मुनिपुङ्गवा ।
विन्यास मन्त्रबिम्बे तु न कदाचित्समाचरेत् ॥४१४॥

पीठोर्ध्वे तु मुनिश्रेष्ठाः! प्रतिष्ठैवं विनैव तु ।
न्यसेद्विभवदेवांस्तु ह्युपर्युपरि पूर्ववत् ॥४१५॥
पटोद्देशात्समारभ्य परमर्चागतं ततः ।
एवं हि सर्वदेवानां विनिवेशवशात्तु वै ॥४१६॥
चिन्तामणीमयो न्यासः कृतो भवति सिद्धिदः ।
मन्त्रन्यासं ततः कुर्याद्बिम्बाङ्गेषु यथाविधि ॥४१७॥
सृष्टिसंस्थितिसंहारन्यासं कुर्यात् त्रयं विभोः ।
स्थितेपि च तथासीने शयाने यानगेपि च ॥४१८॥
एतेष्वपि च सर्वेषु कुर्यान्न्यासत्रयं द्विजाः! ।
मद्वा स्थिते स्थितिन्यासमासीने सृष्टिसंज्ञितम् ॥४१९॥
शयाने संहृतिन्यासमाचरेत् द्विजसत्तमाः! ।
अङ्गमन्त्रस्थितिं कुर्यात् स्थानेषु हृदयादिषु ॥४२०॥

अन्यानि भूषणादीनि विन्यस्य गरुडान्तिमम् ।
ततः सम्पूजयेत्तत्र लययागेन चाखिलम् ॥४२१॥
पीठस्थं भोगयागेन मन्त्रचक्रं यजेत्पुनः ।
स्वनाम्नि स्वामिशब्दं तु समारोप्य परं तु वा ॥४२२॥
हरिकेशवपूर्वं तु ततस्तारसमन्वितम् ।
प्रब्रूयुर्मूर्तिपाश्चा वै सुप्रतिष्ठितमस्त्विति ॥४२३॥
पुष्पाक्षताञ्जलिं पूर्णं क्षिपमाणाश्च सर्वतः ।
सर्वे वदेयुस्तत्रस्थाः सुप्रतिष्ठितमस्त्विति ॥४२४॥
आत्वाहार्षेति सह वै प्रतिष्ठास्तीति पाठयेत् ।
विश्वस्य मिषमित्यादि मन्त्रमेकायमा द्विजाः! ॥४२५॥
ओं नमोस्तु नमश्चान्तो ऋग्वेदाद्यैस्तु तैः सह ।
ओं नमो ब्रह्मणेभीक्ष्णं जितन्तेत्येवमेव हि ॥४२६॥
जयशब्दसमोपेतं स्तोत्रं श्रोतृमनोहरम् ।

देशिकैः सह सर्वैस्तु याभिरन्याभिरुच्चरेत् ॥४२७॥
जीवभूतेन चैतेन विभुना मन्त्रमूर्तिना ।
प्रतिष्ठितेन विप्रेन्द्रा वित्त सर्वं प्रतिष्ठितम् ॥४२८॥
एव कृत्वाधिवासादि मूलबिंबेन वै सह ।
स्थापयेत्कर्मबिंबादीन् मूलबिंबाग्रतो द्विजा ! ॥४२९॥
लक्ष्म्यादींश्च यथाशक्ति स्थापयेत्तु विधानत ।
अथ मण्टपमभ्येतु देवदेवस्य सम्मुखम् ॥४३०॥
स्थितेपि तन्मुहूर्तांशे स्थापनीयश्च पक्षिराट् ।
स्नातोनुलिप्तो मन्त्रेण स्वेन च संस्कृत पुरा ॥४३१॥
शक्त्या सह बिंबेन यस्माद्भिन्नेषु वस्तुषु ।
बिंबसन्निकटस्थेषु अथवान्यत्र सत्तमा ! ॥४३२॥
तत्कालमङ्गभावत्व व्रजमानेषु सर्वदा ।
हवनान्त च निश्शेष ध्यानार्चनपुरस्सरम् ॥४३३॥
स्वयमेवानुरूपेण कर्म सामान्यता व्रजेत् ।
तस्माद्यागभवनादुत्थाप्यादाय बिंबवत् ॥४३४॥
देव प्रदक्षिणीकृत्य प्रागवस्थस्थापनापदे ।
एकस्मिन् मध्यरन्ध्रे तु वज्राद्य पञ्चक न्यसेत् ॥४३५॥
एक एव तदूर्ध्वेत आधारो य उदीरित ।
प्रागवस्निवेशनीयश्च तत्पीठोर्ध्वेथ भावनम् ॥४३६॥
भावनीय शरीरे च शेष विजसिलक्षणम् ।
पाठयेद्ब्राह्मणास्तद्वत्सुपर्णोसीति मन्त्रराट् ॥४३७॥
तमेवाभ्यर्चित कृत्वा स्वयप्राग् शाङ्करे तत ।
सोमेशानान्तरे वापि अङ्गणे वापि तत्पदे ॥४३८॥
अथ वा मणिपीठस्थ भवनाभ्यन्तरेपि च ।
स्वर्गोक्तेन विधानेन विष्वक्सेन निवेश्य च ॥४३९॥

द्वारस्थानखिलान् देवान् तथा चावरणस्थितान् ।
पूर्वोदितान् क्रमेणैव स्नापयेद्देशिकोत्तम ॥२२०॥
सम्प्रोक्ष्य कुम्भतोयेन यायात्पाकगृहं ततः ।
चुल्ल्यामग्निं प्रतिष्ठाप्य अग्निमीळेति पाठयेत् ॥२२१॥
तत्र वै पायसादीनि हवींषि विविधानि च ।
पाचयेच्च ततो विप्रा यायाद्देवनिकेतनम् ॥२२२॥
कलशैः पृष्ठभागस्थैः स्नापनीयस्ततो विभुः ।
सह मूर्तिधरैः सर्वैः यथा चानुक्रमेण तु ॥२२३॥
सहाघमर्षणेनैव गायत्र्यावर्तितेन तु ।
प्राग्दृङ्मयस्तु तदनु चतुर्थावर्तितेन स्वयम् ॥२२४॥
हृदावर्तिते षड्भिर्यजुर्भिस्तेन सेचयेत् ।
भूय स्वयं तथा कुम्भैः सामभिः स्नापयेत्ततः ॥२२५॥
षड्भिरन्यैः स्वयं पश्चात्तेनैवाथर्वणैस्ततः ।
पवित्रावर्तितैरेव कलशैरन्तरान्तरा ॥२२६॥
सह चैकायनीयैस्तु स्नपनीयमनन्तरम् ।
चतुर्मूर्तिमयैर्मन्त्रैर्बहुशः परिभाविते ॥२२७॥
स्नापयेत्कलशेनाथ शेषमादाय वै घटम् ।
तच्छतावर्तितं कृत्वा समूलेनाद्यमूर्तिना ॥२२८॥
सार्घ्यं वै देवदेवस्य मूर्ध्नि चोत्क्षिप्य पाठयेत् ।
जितन्त इति वै सर्वांस्ततश्चाम्भोदकेन तु ॥२२९॥
प्रासादं शोधयित्वा तु गत्वा वै कुम्भमण्डपम् ।
तत्र सम्पूज्य देवेशं पूर्वोक्तेन क्रमेण तु ।
मण्डले पूजयित्वाथ प्रयायाद्बिम्बसन्निधौ ।
तत्र सम्पूजयेद्देवं स्नानवर्जं विशेषतः ।
स्पार्शिकैरासनाद्यैर्विविधैरुपचारिकैः ।

हृदमङ्गमसङ्गैश्च पायसाचैश्चतुर्विधै ॥४५२॥
अन्नै प्रभूतैरन्यैस्तु भक्ष्यभोज्यादिभिस्तथा ।
सम्प्रदानावसानान्त क्रमात्कृत्वा द्विजोत्तमा] ॥४५३॥
सदक्षिण विशेषेण गुरौ मूर्तिधरेषु च ।
समित्सप्तकपूर्वं तु वह्नौ सन्तर्प्य वै क्रमात् ॥४५४॥
महानसेपि नित्याग्निं प्रतिष्ठाप्य यथाविधि ।
हुत्वा नित्योक्तमार्गेण कृत्वा होमसमर्पणम् ॥४५५॥
देव प्रणम्य विज्ञाप्य कर्मणा मनसा गिरा ।
त्वमर्चान्तर्गतो देव मया यच्चानलादिषु ॥४५६॥
नीतोसि चाभिमुख्य तु क्षन्तव्य तन्ममाच्युत ।
एव प्रणम्य विज्ञाप्य कान्त्वा निष्क्रम्य समुखम् ॥४५७॥
आमूलात् ध्वजपर्यन्त प्रासादो य पुराकृत ।
देव प्रदक्षिणीकृत्य अष्टाङ्गेन प्रणम्य च ॥४५८॥
गृहीत्वा चार्घ्यपात्र तु यायाद्देवगृहाद्बहि ।
स्नानादिना समभ्यर्च्य वाहन भगवन्मयम् ॥४५९॥
पूर्वोदितानां द्वारस्थानां दिक्पतीनां तथैव च ।
पूर्ववत्तु बलिं दद्यात्क्रमेण च तत परम् ॥४६०॥
प्रभूताना च भूताना बलिदान समाचरेत् ।
गृह्णन्तु भगवद्भक्ता भूता प्रासादबाह्यगा ॥४६१॥
बलमन्त्रपवित्राश्च तेषामनुचराश्च ये ।
एव क्रमाद्बलिं दत्वा सर्वेषा पाठयेतत ॥४६२॥
ऋग्विग्धिरण्यगर्भेति या देवास्त्विति वै क्रमात् ।
सामज्ञाश्चाप्तसामानि सद्धेनुमयानि च ॥४६३॥
सर्वेष्वावरणेष्वेव बल्यर्थेतु प्रदक्षिणम ।
कृत्वा तु देशिक पश्चादाचम्य भवन विशेत् ॥४६४॥

न्यूनातिरेकशान्त्यर्थं पूर्णान्तं जुहुयाच्छतम् ।
हृन्मन्त्रेण तु साङ्गेन दद्यात्पूर्णाहुतिं ततः ॥४६५॥
एवं तद्दिनमारभ्य कुर्याद्दिनचतुष्टयम् ।
पूजनं देवदेवस्य चतुःस्थानेषु च क्रमात् ॥४६६॥
प्राप्ते ऽहनि चतुर्थे तु अपनीय स्रगादिकम् ।
कलशान् मण्डलाद्बिंबाचतो यागगृहेऽर्चनम् ॥४६७॥
होमावसान मन्त्रस्य कृत्वा पूर्वं यथा पुरा ।
आचम्य च बलिं दत्वा यागाद्देवगृहं ततः ॥४६८॥
तत्रासनादिकैरिष्ट्वा स्नानान्तैः पूर्ववत्प्रभुम् ।
अपनीताम्बरैः कुम्भैर्धान्यपीठोपरि स्थितैः ॥४६९॥
हृन्मन्त्रपूजितैर्भूयः सलिलेन सुपूरितैः ।
सह मूर्तिधरैः प्राग्वदन्तरान्तरयोगतः ॥४७०॥
कार्यं वै स्नानकर्माथ विधिदृष्टेन कर्मणा ।
निरोदकेऽथप्रासादे पुनराराध्य पूर्ववत् ॥४७१॥
भोगैरासनपूर्वैस्तु सम्प्रदानान्तमच्युतम् ।
मुद्रां बध्वा जपेन्मन्त्रं स्तुत्वा क्षान्त्वा बहिर्व्रजेत् ॥४७२॥
शतं सहस्रं सार्धं वा जुहुयान्मन्त्रराट् स्वयम् ।
साङ्गं सपरिवारं च संहितोच्चारयुक्तितः ॥४७३॥
मूर्तिपैः प्रणवाद्याभिर्गायत्रीभिः शतं शतम् ।
एकायनैरभिज्ञाभिस्स्वकीयाभिस्तु तत्समम् ॥४७४॥
प्रदापयेत्ततः पूर्णामृग्वेदाद्यांस्तु मूर्तिपान् ।
एकायनांस्तदन्ते तु क्रमात्तान् पाठयेत्ततः ॥४७५॥
पूर्णात्पूर्णेति वै मन्त्रमाद्यात्पूर्णमसीति यत् ।
सनमस्कन मन्त्रेण स्वयं साग्निन निक्षिपेत् ॥४७६॥
बलिभिस्तु ततः सर्वान् भूतपूर्वांस्तु तर्पयेत् ।
प्रविश्याचम्य तदनु क्षान्त्वा देवन्तु कुम्भगम् ॥४७७॥

पूर्ववन्मण्डलस्थं तु कुण्डस्थं तदनन्तरम् ।
विष्वक्सेनं यजेत्प्राग्वदिष्टशिष्टैस्तु वै क्रमात् ॥४७८॥
भूषयेद्गुरुपूर्वांस्तु मूर्तिपान् कटकादिकैः ।
गुरोर्वा गुरुपुत्रस्य यागद्रव्यं निवेदयेत् ॥४७९॥
सिद्धिमूर्त्योरभीप्सार्थं स्नायादवभृथेन च ।
इत्येतत्साधकस्योक्तं मन्त्राराधनकांक्षिणः ॥४८०॥
मन्त्रमूर्तिप्रतिष्ठानं यत्रस्थस्सिद्धिमाप्नुयात् ।
स्थापने यजमानस्य फलं वक्ष्ये समासतः ॥४८१॥
आ देवालयभूभागात् ध्वजान्ताद्वापि मण्टपात ।
सर्वोपकरणोपेतात्सर्वेष्वावरणेषु च ॥४८२॥
समन्तात्परमाणूनां सर्वेषां द्विजसत्तमाः ! ।
यावती जायते संख्या तावत्कर्ता समावसेत् ॥४८३॥
भोगभुग्विष्णुलोके च यात्यन्ते परमं पदम् ।
कर्ता वै ब्राह्मणो विप्रः सर्वविद्याधिपो भवेत् ॥४८४॥
क्षत्रियो यजमानस्तु सर्वदेशाधिपो भवेत् ।
वैश्यस्तु यजमानः स्याद्धनधान्यसमृद्धिमान् ॥४८५॥
शूद्रस्तु यजमानः स्यान्मोदते बन्धुभिः सह ।
सज्जन्मना च ज्ञानेन एवमेव भवेत्तु सः ॥४८६॥
पुत्रार्थी पुत्रमाप्नोति राज्यार्थी राज्यमाप्नुयात् ।
अकामानां तु भक्तानां भक्तिरव्यभिचारिणी ॥४८७॥
यथापि शाश्वतं ज्ञानं भवेत्तद्धर्मणा सह ।
स्वयं कृतानां बिम्बानां स्थापनं संप्रकीर्तितम् ॥४८८॥
एवं बिंबं प्रतिष्ठाप्य प्रासादे स्वगृहे तु वा ।
ततः प्रभृति कालाच्च पूजयेत्प्रतिवासरम् ॥४८९॥
जीर्णोद्धारविधिर्यावत्तावत्कालं विधानतः ।
प्रमादाद्बुद्धिपूर्वाद्वा पूजालोपं न कारयेत् ॥४९०॥

१— स्थियोपि च— पा—

एवं श्रियादिदेवीनां चक्रादीनां तथैव च ।
सर्वेषां विष्णुभक्तानां प्रतिष्ठां च समाचरेत् ॥४९१॥
प्रथमावरणादौ वा मण्टपे वारुणादिके ।
लक्ष्मीप्रतिष्ठया सर्वा समृद्धिर्जायते नृणाम् ॥४९२॥
चक्रसंस्थापनात् स्थानसंरक्षा भवति ध्रुवम् ।
विष्णुभक्तप्रतिष्ठानादैहिकामुष्मिकं फलम् ॥ ४९३ ॥
तस्मात्कार्यं श्रियादीनां स्थापनं देवमन्दिरे ।
देवप्रतिष्ठाकाले वा ह्यन्यकालेपि वा पृथक् ॥४९४॥
सह संस्थापने त्वेषां न पृथक्त्वङ्कुरादिकम् ।
न यागगेहनिर्माणं परिवारोक्तवद्भवेत् ॥४९५॥
सर्वं तत्रापि कर्तव्यं शृणुध्वं मुनिसत्तमाः ! ।
सिद्धार्थकादिभिः षड्भिः स्नानं कौतुकबन्धनम् ॥४९६॥
जलाधिवसनं चैव सूक्ष्मसूक्ष्मादिपञ्चसु ।
स्नानेष्वन्यतमस्नानं नयनोन्मीलनं तथा ॥४९७॥
शय्यायामधिवासं च तत्तन्मन्त्राधिकस्य च ।
तत्तल्लाञ्छनजालस्य न्यसनञ्च यथाविधि ॥४९८॥
तत्तन्मन्त्रैस्तथा होमं कुर्यात्कुण्डे पृथक्कृते ।
तत्तत्पीठादिसंस्कारं पीठसंस्थापनं तथा ॥४९९॥
यन्त्रादिपञ्चकन्यासं भावसंस्थापनं पदे ।
तदाधारनिवेशं च यस्य यः समुदीरितः ॥५००॥
बिंबसंस्थापनं चैव पीठोर्ध्वे तु यथाविधि ।
तत्तत्स्थापनकाले तु तत्तन्मन्त्रप्रपाठनम् ॥५०१॥
एतत्सर्वं समभ्यूह्य कुर्याद्देशिकसत्तमः ।
पृथक्संस्थापने कुर्यात्सर्वं कर्म यथाविधि ॥५०२॥
तत्तन्मन्त्रैस्तथा तत्तत्परिवारार्चनैः सह ।

चक्रसंस्थापने कश्चिद्विशेष श्रूयतां द्विजा[1] ॥५०३॥
अमूर्तं द्वादशारन्तु अष्टारं षडरं तु वा ।
चक्रं संस्थापयेत्तत्र प्रासादशिखरोपरि ॥५०४॥
मूर्तमङ्कणदेशे तु षोडशाष्टभुजं तु वा ।
तस्य स्थापनकाले तु तस्य सञ्ज्ञामनु जपेत् ॥५०५॥
विद्या गदामित्याद्य यत्पाठयेच्चद्विदो जनान् ।
चमूषच्छ्र्येन इति च प्रतद्विष्णो इति त्वृचौ ॥५०६॥
पाठयेद्बह्वृचान् पश्चाच्छाकुन सूक्तमेव च ।
धृतोर्ध्वपुण्ड्र कृतचक्रेति मन्त्रं ततः परम् ॥५०७॥
पवित्रन्ते विततमिति मन्त्रान्यजुर्मयान् ।
आरोहेति च सामज्ञान् पवित्रन्तेमिरित्यपि ॥५०८॥
एभिर्वयमुरुक्रमस्येत्याथर्वणिकान् द्विजान् ।
एवं संस्थाप्य विधिवन्नवभि कलशैस्ततः ॥५०९॥
स्नापयेद्ब्रह्मसूक्तस्थैर्मन्त्रैरष्टभिरेव च ।
विश्वस्य वशिनं देवमिति प्राक्स्थापितेन तु ॥५१०॥
बहिरावरणेनास्तीत्यग्निदिक्संस्थितेन तु ।
यन्नाभिपद्मादभवदिति याम्यस्थितेन तु ॥५११॥
धृतोर्ध्वपुण्ड्रइति च यातुधानगतेन तु ।
दक्षिणे तु भुजे विप्र इति पश्चिमगेन वै ॥५१२॥
विष्णुनात्तमश्नातीति वायुदेशस्थितेन च ।
पुमथानेश्वरो विष्णुरिति सोमगतेन वै ॥५१३॥
इमा महोपनिषदामितीशानगतेन तु ।
मन्त्रैरेतै समस्तैस्तु मध्यकुम्भेन सेचयेत् ॥५१४॥
प्रासादाग्रस्थिते चक्रे प्रोक्षणं तु समाचरेत् ।

१– धुतोद्गेति– पा–

महोपनिषदन्तस्थानष्टौ मन्त्रान् पुरोदितान् ॥५१५॥
यद्वा पुरुषसूक्तं तु सर्वशान्त्यै ततो जपेत् ।
अत्रानुक्तं तु सकलं पूर्वोक्तं तु समाचरेत् ॥५१६॥
इत्थं हि वीरलक्ष्म्यादि प्रतिष्ठा च प्रकीर्तिता ।
भूषोपकरणानां तु प्रतिष्ठा तूच्यतेऽधुना ॥५१७॥
तदर्थमिह सर्वेषां शृणुध्वं देवताक्रमम् ।
किरीटे कौस्तुभे चैव श्रीवत्सवनमालयोः ॥५१८॥
ता एव देवतास्तासां रूपं प्रागेव कीर्तितम् ।
प्रभायां तु प्रभा देवी पीठेनन्तादयस्तथा ॥५१९॥
पादुकायां वैनतेयो घण्टायां तु सरस्वती ।
शिबिकायां तथा याने हंसकेसरिणोस्तथा ॥५२०॥
गजाश्वयो रथेचैव गरुत्मानेव देवता ।
शेषपक्षीशयोश्चैव तथा चन्द्रार्कबिम्बयोः ॥५२१॥
वायुसूनौ ध्वजाः साक्षाच्छेषाद्या एव देवताः ।
एवं ज्ञात्वा पुरा तत्तद्देवताः क्रमशो द्विजाः! ॥५२२॥
तत्तत्संस्थापनं कुर्यात् तत्तन्मन्त्रेण देशिकः ।
अङ्कुरारोपणं कृत्वा सद्योङ्कुरमथापि वा ॥५२३॥
सिद्धार्थकादिभिः षड्भिः स्नाप्य कौतुकबन्धनम् ।
कृत्वा छायाधिवसनं जलाधिवसनं तु वा ॥५२४॥
कृत्वा मूर्तस्य नयने समुन्मील्य यथाविधि ।
कुम्भैः संस्नाप्य विधिवत्कृत्वा शय्याधिवासनम्॥५२५॥
कुम्भं संस्थाप्य तत्रेष्ट्वा तत्तद्देवास्तदङ्गके ।
तत्तन्मन्त्रादिकान्न्यस्य तत्तन्मन्त्रैः समर्चयेत् ॥५२६॥
कुण्डेषु वा स्थण्डिलेषु हुनेदेकत्र वा द्विजाः! ।
ततः शुभमुहूर्ते तु प्रोक्षयेत्कुम्भतोयतः ॥५२७॥

आचार्यदक्षिणादीनि यथाशक्ति प्रदापयेत्।
एवं सामान्यतः प्रोक्तः सर्वेषां स्थापनक्रमः ॥५२८॥
रथस्य स्थापने ज्ञेयो विशेषो मन्दिरोक्तवत्।
अन्यत्सर्वोपकरणं छत्रचामरपूर्वकम् ॥५२९॥
भूषणानि च दिव्यानि धूपपात्रादिकानि च।
अर्घ्यादिसर्वपात्राणि वाद्यानि विविधानि च ॥५३०॥
क्षालनार्हाणि प्रक्षाल्य कृत्वा पुण्याहवाचनम्।
सम्प्रोक्ष्य पञ्चगव्येन दहनाप्यायनादिकैः ॥५३१॥
संस्कृत्य देवदेवस्य पूजनादौ नियोजयेत्।
नानारत्नप्रभाढ्यानि लांछनान्यङ्गदानि च ॥५३२॥
निर्मितानि सुवर्णाद्यैः प्रभोः संयोजयन्ति ये।
ते धूतकल्मषाः सर्वे देहमासाद्य निष्कलम् ॥५३३॥
सम्यक् ज्ञानेन युज्यन्ते भावं नायान्ति येचन।
आत्मनश्चोपकाराय सर्वदुःखनिवृत्तये ॥५३४॥
अङ्गुष्ठामाच्च गुल्फान्तमाजान्वंसावधीह्वा।
मणिमुक्ताप्रवालाढ्यं कवचं कांचनादिकम् ॥५३५॥
यः क्षिपत्यतिभक्त्या वै स्वशक्त्या चागतेच्युते।
स याति परमं स्थानं सर्वत्र पशुबान्धवाः ॥५३६॥
लग्नं यद्भगवन् मुक्तावज्रदं नूपुरादिकम्।
वियोजयति यो मोहात्तस्य बौचौ स्थिता स्थितिः ॥५३७॥
यः पंचकालसक्तानां विप्राणामधिकारिणाम्।
पंचकालविदां चैव भक्तानां सिद्धिकाङ्क्षिणाम् ॥५३८॥
अथ योच्छिन्नशाखानां नारायणरतात्मनाम्।
तपस्विनां यतीनां वा स्नातकब्रह्मचारिणाम् ॥५३९॥
भक्तानामथवान्येषामर्चनानिरतात्मनाम्।
प्रीतये परमेशाय कृत्वा सम्यक्प्रयच्छति ॥५४०॥

शालाद्यायतनोपेतमश्मपक्वेष्टकान्वितम् ।
ग्राम्यैर्धान्यैस्तथारण्यैः पूर्णं सद्वृत्तिसङ्कुलम् ॥५४१॥
वणिक्कुटुम्बभृतकरक्षापालैः समन्वितम् ।
सोनन्तं फलमाप्नोति कालमाचन्द्रतारकम् ॥५४२॥
संस्थितिं शाश्वते लोके प्राप्नुयादक्षयं यशः ।
भोगोपयोगिनीं भद्रां रम्यां पूर्वोक्तलक्षणाम् ॥५४३॥
यागनिष्पत्तये कुर्याद्योग्रतः पीठसन्निधेः ।
बहिरावरणार्थे वा कर्मिणां ब्रह्मयोगिनाम् ॥॥५४४॥
ऋषिदेवपितृभ्यश्च मुच्यते स ऋणत्रयात् ।
मध्यतो गरुडाक्रान्तं सचक्राम्बुरुहाङ्कितम् ॥५४५॥
सुयोश्रमथवा वृत्तं कुण्डवत्पदवीयुतम् ।
बलिपीठं बहिः कुर्याद्दाता यस्त्वच्युतालये ॥५४६॥
स याति चाच्युतं स्थानं विमानैः सूर्यवर्चसैः ।
यस्तु प्राग्राममारामं सम्प्रयच्छति वै विभोः ॥५४७॥
नानापुष्पफलोपेतं वापीद्रुमसमाकुलम् ।
साब्जतोयाशयोपेतं मारखड्गसमन्वितम् ॥५४८॥
स नन्दनवने भोगान् भुक्त्वा यात्यच्युतालयम् ।
क्षोणिं यः सस्यसम्पूर्णां युक्तां सद्गन्धशालिना ॥५४९॥
केदारं जलपातैस्तु परिच्छन्नं समन्ततः ।
स गच्छति जगद्योनेः कालमासाद्य शाश्वतम् ॥५५०॥
स यायात्सुसितद्वीपं तत्रास्ते भगवानिव ।
स्नानोपभोगमन्त्रार्थसवृषेन्द्रन्तु गोगणम् ॥५५१॥
समर्चयित्वा योर्चां वै वैष्णवीं प्रतिपादयेत् ।
सोचिरान्मुक्तदोषस्तु विष्णुलोकं प्रयाति च ॥५५२॥
गर्जं रभं वराश्वं च दीपस्थालीं सुलक्षणाम् ।

व्यजनं चामरं छत्रं वादित्रं गणिकागणम् ॥५५३॥
शुभवस्त्राणि नेत्राणि दिव्यान्याभरणानि च ।
वितानं वैजयन्तीं च चित्रपत्रलतागणम् ॥५५४॥
सुस्वरामुपघण्टां च धूपस्थालीं सुलक्षणाम् ।
भृङ्गारं दर्पणं तोयकुम्भं गन्धोपलं महत् ॥५५५॥
पूर्वोद्दिष्टानि चान्यानि धान्यानि विविधानि च ।
यो ददाति हरेर्भक्त्या स तल्लोकमवाप्नुयात् ॥५५६॥
ईक्षमाणं विभोर्वक्त्रं वहन्तं दीपभाजनम् ।
महान्तं चाथवा दीपं यन्त्रं कूर्मादिरूपधृक् ॥५५ •
शास्त्रयज्ञासनस्थं च चित्तसम्पुटभूषितम् ।
सच्छास्त्रपीठं विविधं श्रद्धया यो मुनीश्वराः ! ॥५५८॥
ददाति देवदेवस्य परं स्थानं प्रयाति सः ।
पुरस्कृत्य जगद्योनिं यद्यद्भक्त्या प्रदीयते ॥५५९॥
तदाराधनसक्तानां तत्तदक्षय्यतामियात् ।
इत्येवं निपूर्वाणां प्रतिष्ठाविधिरीरितः ॥५६०॥
इतोन्यच्छ्रोतुमिच्छा चेत्कथ्यतां मुनिपुङ्गवाः ! ।

इति श्रीपाञ्चरात्रे ईश्वरसंहितायाम्
प्रतिष्ठाविधानं नाम
अष्टादशोऽध्यायः ।



अथ एकोनविंशोऽध्यायः ।



मुनयः ।
भगवन्नारदमुने! जीर्णोद्धारविधिं तथा ।
बिम्बस्याग्न्युदयस्पर्शे महोत्पातादिसम्भवे ॥१॥

नित्यपूजादिलोपे च प्रायश्चित्तं तु कृत्स्नशः ।
श्रोतुमिच्छामहे योगिन् तत्सर्वं सम्प्रकाशय ॥२॥

नारदः ।

शृणुतेह प्रवक्ष्यामि जीर्णोद्धारादिकं द्विजाः ।
यत्कृत्वा देशिकादीनां चतुर्णां सुखमेधते ॥३॥
मनुष्यनिर्मिते स्थाने वक्ष्ये जीर्णविधिं पुरा ।
धातुमृच्छैलदारूत्थो वस्त्रादिष्ववतारितः ॥४॥
यो यो भगवदाकारस्तस्य तस्य मुनीश्वराः ! ।
उपाङ्गभङ्गे सन्धानं कुर्याद्भङ्गे महाङ्गके ॥५॥
तद्बिम्बन्तु परित्यज्य सृजेद्बिम्बान्तरं पुनः ।
तत्र तावत्प्रवक्ष्यामि महाङ्गोपाङ्गकक्रमम् ॥६॥
शिरो वक्त्रं तथा कर्णौ पाणी वक्षस्तथोदरम् ।
नाभिमेढ्रपदं चैव महाङ्गानि द्विजोत्तमाः ! ॥७॥
चक्षुः श्रोत्रं तथा नासा तालुर्हस्तपदांगुलिः ।
केशश्मश्रु च रोमाणि नखदन्तास्तथैव हि ॥८॥
चक्राद्यायुधसंघश्च वनमालादिभूषणम् ।
उपाङ्गानि मुनिश्रेष्ठा मूर्द्धिवे शृणुताधिना ॥९॥
प्रधानशूलं यत्तत्त महाङ्गमिति कथ्यते ।
वक्षोदण्डः कटीदण्डो बाहुकूर्परकोष्ठकम् ॥१०॥
जंघोरुजानु चान्यानि उपाङ्गानि मुनीश्वराः ।
महांगभङ्गे जातेऽपि बिम्बस्य मुनिपुङ्गवाः ॥११॥
सति सन्धानयोग्यत्वे न कदाचित्परित्यजेत् ।
तस्य त्यागो विनाशश्च ह्युपर्युपरि बाधकृत् ॥१२॥
बिम्बादीनां तु दृढतां परित्यागो न युज्यते ।
वक्त्रभङ्गे तु बिम्बस्य सर्वथा त्यागमाचरेत् ॥१३॥

परित्यक्तानि बिम्बानि धातुद्रव्योद्भव विना ।
जलाशये ह्यगाधे वा समुद्रे विधिना क्षिपेत् ॥१४॥
भूमौ वा निखनेद्विप्रा देशकालानुसारत ।
उत्कृष्टाना हेमताराताम्रजाना विशेषत ॥१५॥
नोचित स्यात्परित्याग तस्मात्सन्धानमाचरेत् ।
प्रयत्नेनाप्ययोग्यत्वे परित्याग समाचरेत् ॥१६॥

परित्यक्त तु वा द्रव्य द्रवीकृत्य यथा विधि ।
तद्द्रव्येण यथापूर्वं बिंबकर्म समापयेत् ॥१७॥
अथवा हीनताम्रोत्थमारकूटमय तु यत् ।
सन्धानकरणायोग्य तद्द्य तु परित्यजेत् ॥१८॥
परित्यक्त तु तद्बिम्ब क्षिपेत्पूर्वोक्तवर्त्मना ।
ततो बिंबान्तर कुर्याद्राजत वा सुवर्णजम् ॥१९॥
उत्कृष्टतज्जातीयद्रव्यज वा मुनीश्वरा ! ।
कर्मबिंबेषु सर्वेषु ह्येवमेव समाचरेत् ॥२०॥
भग्नागस्य तु सन्धानप्रकार शृणुत द्विजा ! ।
लोहाश्मदारुबिम्बाना भग्नाग लोहपट्टकै ॥२१॥
बन्धयेदथ वा लोहबिनाग भग्नमेव तु ।
स्वर्णादिना द्रावितेन योज्य यत्नाद्विजोत्तमा ! ॥२२॥
चित्रमृण्मयबिंबाना भग्नाग मुनिसत्तमा ! ।
तत्तत्सजातिद्रव्येण सन्धेय यत्नगौरवात् ॥२३॥
सर्वेषा भग्नमग्न तु नष्ट चेत् तत् तथा पुन ।
तत्तत्सजातिद्रव्येण कृत्वा योज्य प्रयत्नत ॥२४॥
महाग्रे रत्नबिंबस्य भग्नेऽपि मुनिसत्तमा ! ।
सन्धेयमेव न त्याज्य स्वयव्यक्तादर्माबंबवत् ॥२५॥
सर्वत्राग्रसमाधाने पुन स्पर्शो नु वा द्विजा ! ।

जीर्णबिम्बगतां शक्तिं कुम्भे त्वावाह्य देशिकः ॥२६॥
कुर्वन्नभ्यर्चनं तत्र बिम्बसन्धानमाचरेत् ।
मासादर्वाक्समाधाने कुम्भे शक्तिं समर्चयेत् ॥२७॥
तदूर्ध्वे द्वादशाब्दान्तं समाधानविळम्बने ।
कृत्वा बालगृहं तत्र बालबिंबं यथाविधि ॥२८॥
संस्थाप्य तत्र तच्छक्तिं समावाह्य समर्चयेत् ।
अङ्गमात्रसमाधाने कुर्यात्संप्रोक्षणं द्विजाः ! ॥२९॥
बिंबान्तरस्य करणे प्रतिष्ठां पुनराचरेत् ।
मूलबिंबांगसन्धाने कुर्याद्बालगृहादिकम् ॥३०॥
कर्मबिंबांगभङ्गे तु तत्त्वाद्बिम्बगतं विभुम् ।
मूलबिम्बे समुद्वास्य सन्धानादि समाचरेत् ॥३१॥
बालालये तु प्रथमे जीर्णोद्धाराभिधेऽन्तिमे ।
प्रायश्चित्तं प्रवक्ष्यामि शृणुध्वं मुनिपुङ्गवाः ! ॥३२॥
भक्तिते प्रार्थिते काले कर्त्रा प्रासादबेरयोः ।
निर्माणे स्नपनं कुर्यादुत्तमं शास्त्रचोदितम् ॥३३॥
पश्चादभ्यर्थयेत्कालं वाञ्छितं तत्समापने ।
अकृत्वैवं गते पश्चात्काले द्वादशवार्षिके ॥३४॥
पुनः प्रतिष्ठां कुर्वीत मूले बालालये तु वा ।
बिम्बे चोरादिभिर्नष्टे बालगेहे प्रमादतः ॥३५॥
तदेवापाद्य तामर्चां प्रतिष्ठाप्य यथाविधि ।
उत्तमस्नपनं कृत्वा शान्तिहोमं समाचरेत् ॥३६॥
चोरैर्हृतं बिम्बं पुनःप्राप्तं यदि द्विजाः ! ।
पुनः प्रतिष्ठां कुर्वीत नयनोन्मीलनं विना ॥३७॥
स्वस्थानाद्यलिते तस्मिन् हेतुना येन केन चित् ।
यथापूर्वं प्रतिष्ठाप्य स्थापयेत् पुरुषोत्तमम् ॥३८॥

सर्वं बालगृहे कार्यं नित्यनैमित्तिकादिकम् ।
पूर्वं संस्थापितं बिम्बं लक्षणैरञ्जितं यदि ॥३९॥
जीर्णोद्धारस्य काले तु कुर्याल्लक्षणसंयुतम् ।
जीर्णाल्यस्य विधे पूर्वं न कदाचित्समाचरेत् ॥४०॥
रीत्तिजे ताम्रजे वापि आरकूटमयेऽपि वा ।
प्रणीते पूज्यमाने तु कर्मबिम्बादिके सति ॥४१॥
कालान्तरेण जीर्णेऽस्मिन् उत्कृष्टसमुपस्थिते ।
निकृष्टं सन्त्यजेद्विद्वान् न दोषस्तत्र विद्यते ॥४२॥
लोहपाषाणमृत्काष्ठे स्थापिते मूलकौतुके ।
न सम्पाद्यमतोन्येन कदाचिन्मुख्यवस्तुना ॥४३॥
पुरावज्जर्णिता यात कर्तव्यं मूलकौतुकम् ।
प्राक्स्थितं बहुबेरं वा एकबेरमथापि वा ॥४४॥
जीर्णोद्धारेऽपि कर्तव्यं पूर्ववन्मुनिपुङ्गवा ! ।
व्यत्यासं नैवकुर्वीत बहुबेरैकबेरयोः ॥४५॥
लक्ष्म्यादिरन्तराहिते बहुबेरपुरस्थिते ।
जीर्णोद्धारे तु देवीभ्यां कल्पयत्सहसा विना ॥४६॥
सर्वदा बहुबेरत्वहानिर्न स्याद्विपर्ययात् ।
शयनं वासनं यानं स्थानं वा प्राग्यथास्थितम् ॥४७॥
तथैव स्यात्पुनस्त्वष्टावन्यथा वेच्छयाभवेत् ।
जीर्णे देवे पुनस्त्वष्टे देव्यो यदि यथा स्थिता ॥४८॥
देवीभिस्ताभिरेवाय योज्यो देवो न चान्यथा ।
एवं मातुर्विरम्य जीर्णोद्धारं प्रकीर्तितं ॥४९॥
स्वयं व्यक्ते तथा दिव्ये सैद्धे चार्षाद्यमानुषे ।
जीर्णोद्धारविधिं वक्ष्ये शृणुत मुनिसत्तमाः ! ॥५०॥
स्वयंव्यक्तादिबिम्बानां महाङ्गे वाप्युपाङ्गके ।

भग्ने सन्धानमेव स्यात्त्यागस्तु न कदाचन ॥५१॥
सन्धानायोग्यमपि तन्न त्याज्यं मुनिसत्तमाः ।
सालिग्रामशिलाबिंबं भिन्नं भग्नं बृहत् क्षतम् ॥५२॥
अल्पक्षतं च सौवर्णैः पट्टैर्दृढतरं यथा ।
बन्धयेच्च तथैवैषु स्वयंव्यक्तादिकेष्वपि ॥५३॥
शिलामयेषु बिम्बेषु भिन्नं भग्नं च योजयेत् ।
सुवर्णनिर्मितैः पट्टैर्यथा दृढतरं भवेत् ॥५४॥
यद्वा तदङ्गं हैमेन कृत्वा सम्यङ्नियोजयेत् ।
दारुजे लोहजेष्वेवं स्वयंव्यक्तादिकेष्वपि ॥५५॥
भेदेष्वङ्गे समाधिः स्यात्स्वयंव्यक्ताश्मबिंबवत् ।
रत्नजेऽपि समाधानमेवमेव समाचरेत् ॥५६॥
मृण्मये मूलबिंबे तु जीर्णे वाथ जलादिभिः ।
हीनाङ्गे वा तथा कुर्यात्सन्धानन्तु प्रयत्नतः ॥५७॥
एवं वर्णविहीनेऽपि सन्धानन्तु समाचरेत् ।
मृत्तिकाशूलरज्वादीन्न कदाचित्परित्यजेत् ॥५८॥
तथैव चित्रबिंबांगे गलितं गन्धभावितैः ।
सितरक्तादिकै रागैः पावनैरस्त्रमन्त्रितैः ॥५९॥
चित्रयेत्तु यथापूर्वं शिल्पिभिः शास्त्रकोविदैः ।
अत्रायं हि विशेषः स्यात्स्वयंव्यक्तादिषु द्विजाः! ॥६०॥
न बालगेहबिम्बार्चां कुर्याच्चैव पूर्ववत् ।
पूजायां वर्तमानायां समाधानादिकं चरेत् ॥६१॥
सन्धानान्ते तु विधिवत्कुर्यात्संप्रोक्षणादिकम् ।
देवादिपूजिते चापि स्वयंव्यक्ते तु कौतुके ॥६२॥
मृद्दारुजे तु सञ्जीर्णे क्रिमिवह्निजलादिभिः ।
तत्तद्बालगृहं कृत्वा पूज्यमाने तु पूर्ववत् ॥६३॥

तमादर्चान्तरं कृत्वा स्थापयेच्च यथाविधि ।
बालबिम्बे तु जीर्णेऽस्त्र कुर्यादेव पुनः पुनः ॥६४॥
स्वयव्यक्तादिबिम्बानि यादृशानि भवन्ति हि ।
लक्षणैश्च प्रमाणैश्च युक्तानि रहितानि वा ॥६५॥
उत्कृष्टलोहजातानि अपकृष्टोत्थितानि वा ।
तादृशानि भवन्त्येव न कुर्यादन्यथा पुनः ॥६६॥
न लक्षणान्तरं कुर्यान्न प्रमाणान्तरं तथा ।
न तु द्रव्यान्तरं चैव न तु कुर्यात्क्रियान्तरम् ॥६७॥
मन्त्रान्तरं न कुर्वीत सर्वं कुर्याद्यथापुरम् ।
कुर्याच्चेल्लक्षणादीनां विपर्यासं मुनीश्वराः ॥६८॥
राज्ञो राष्ट्रस्य सर्वेषां प्रत्यवायो महान् भवेत् ।
तस्मात्पौराणिकस्थाने न विपर्यासमाचरेत् ॥६९॥
लक्षणादिष्वपि तथा न कुर्यादन्यथा पुनः ।
येषु व्यक्तेषु चिह्नानि नाभिव्यक्तानि वै द्विजाः ॥७०॥
तान्यपि स्थानि चिह्नानि ललाटे वासपट्टके ।
पृष्ठे वाप्यङ्गपट्टे वा पाणिपादतलेषु वा ॥७१॥
मूर्ध्नि वा दर्शते तस्मात्तत्र तत्र निरीक्षयेत् ।
तस्मादलक्षणा व्यक्तिर्विद्यते न कदाचन ॥७२॥
स्वयव्यक्तादिके चैव मानुषे च मुनीश्वराः ।
शिलामयादिबिम्बानां नासाद्यवयवेषु च ॥७३॥
यवद्वित्रियवा मात्रं न्यूनता सम्भवेद्यदि ।
पूर्ववत्कारयेत्तत्तल्लक्षणक्रमेण यत्नतः ॥७४॥
तत्र सम्प्रोक्षणं कुर्यादेवस्य मुनिपुङ्गवाः ।
एवं पीठादिभङ्गेऽपि सन्धानं सम्यगाचरेत् ॥७५॥
प्रतिमा चैव सर्पीठं प्रासादे गर्भमन्दिरम् ।

विग्रहं देवदेवस्य चतुष्टयमिद समम् ॥७६॥
समाधिश्च तथा शान्ति कार्या तत्र सदा समा ।
प्रमाभङ्गो यदि भवेद्बन्धयेल्लोहपट्टकै ॥७७॥
पीठभङ्गे तु त पीठ सर्वदा सन्त्यजेद्बुध ।
किञ्चिन्न्यून तु त पीठ बन्धयेल्लोहपट्टकै ॥७८॥
प्राकृतार्चाङ्गभग्नादिदोषैर्या चातिदूषिता ।
निर्दोषादासनात्तस्मात्तामुत्थाप्य विसृज्य च ॥७९॥
पूर्ववन्निर्मिता पीठे स्थापयेत्तु यथाविधि ।
पीठभङ्गे तथान्यस्मिन् कल्पिते योजयेद्दृढम् ॥८०॥
प्रतिमापीठयोरष्टबन्धविश्लेषणेपि च ।
अष्टबन्ध पुन कृत्वा सम्प्रोक्षणमथाचरेत् ॥८१॥
स्वयव्यक्तादिके वापि मानुषे वा मुनीश्वरा ।
बिम्बे चोराद्यपहृते तत्द्रव्येण पूर्ववत् ॥८२॥
निर्माय लक्षणोपेत प्रतिष्ठाप्य तदैव तु ।
पूर्ववत्पूजयेन्मन्त्री बिम्ब सर्वत्र सर्वदा ॥८३॥
द्रव्यान्तरेण वा कुर्यात् देशिको यागसिद्धये ।
चोरैरपहृत बिम्ब पुन प्राप्त यदि द्विजा ॥८४॥
कृत्वा सम्प्रोक्षण पूज्य मानुषे तु द्विजोत्तमा ।
पुन प्रतिष्ठा कुर्वीत नयनोन्मीलन विना ॥८५॥
मूलबिम्बेऽग्निना दग्धे मानुषे वाप्यमानुषे ।
सहस्रकलशस्नानमाचर्तव्य विधानत ॥८६॥
वह्निना कर्मबिम्बादौ वैवर्ण्ये समुपागते ।
तत्तद्बिम्बेषु कुर्वीत स्नपन चोत्तम क्रमात् ॥८७॥
वह्निदाहादिना मूलबिम्बे वा कर्मकौतुके ।
भिन्नाङ्गे सति सन्धेय प्राग्वत्तच्छिल्पिसत्तमै ॥८८॥

सन्धानान्त तु सर्वत्र कुर्यात्सम्प्रोक्षण विभो ।
प्रासादादे ततो विप्रा जीर्णोद्धारश्च वक्ष्यते ॥८९॥
तत्र पूर्व गानुपस्य विधान शृणुत द्विजा ! ।
भग्ने विमानैकदेशे शिखाकुम्भादिकेपि वा ॥९०॥
विमानसस्थितान् देवान् मूलबेरस्य पीठके ।
समावाह्यार्चयन् भग्न प्रासादावयव दृढम् ॥९१॥
सन्धाय पश्चाद्देवस्य सप्रासादस्य सत्तमा ! ।
सम्प्रोक्षणादिक कुर्याच्छास्त्रदृष्टेन वर्त्मना॥९२॥
विमाने सर्वतो भग्ने बालस्थान प्रकल्प्य च ।
प्रासादान्तर्गता यास्तु देवतास्ता मुनीश्वरा ! ॥९३॥
बालबिम्बस्य पीठस्था कृत्वा पूज्यास्तु पूर्ववत् ।
तथैव बालबिम्बेतु नित्यनैमित्तिकादिकम् ॥९४॥
पवित्रारोहणात च सर्वं कर्म समाचरेत् ।
प्रासाद तु पुन कृत्वा प्रतिष्ठाप्य यथा विधि ॥९५॥
सम्प्रोक्षणादिक कुर्यात् देवस्य मुनिपुङ्गवा ! ।
एव हि मण्टपे साले गोपुरे माळिकादिके ॥९६॥
जीर्णे तत्रस्थिता सर्वा नीत्वान्यत्र तु देवता ।
यथापूर्व नव कृत्वा प्रतिष्ठाप्य विधानत ॥९७॥
उत्तमस्नपनकुर्यात् तस्य दोषस्य शान्तये ।
प्रासादादि पुराक्लृप्त लक्षणैरुज्झित यदि ॥९८॥
जीर्णोद्धारमकृत्वा कुर्यात् सलक्षणान्वितम् ।
प्रासादादौ पुराक्लृप्ते मृण्मये चैष्टकेऽपिवा ॥९९॥
जीर्णे पुन समुद्धारे शिलाभिर्वा प्रकल्पयेत् ।
स्वयव्यक्तादिके धाम्नि जीर्णोद्धारस्तु वक्ष्यते ॥१००॥
प्रासादादेरेकदेशभङ्गश्चेत् तत्र सम्भिता ।
देवास्त्वन्यत्र नोद्वास्या पूजयेनैव तत्र ता ॥१०१॥

भग्नैकदेशं सन्धाय कुर्यात्सम्प्रोक्षणं द्विजाः ! ।
प्रासादे सर्वतो भग्ने प्रासादस्थास्तु देवताः ! ॥१०१॥
मूलविम्बस्य पीठे तु समावाह्य समर्चयन् ।
प्राक्तनैरेवेष्टकाद्यैस्तत्सजातीयवस्तुभिः ॥१०३॥
नूतनैश्चापि मिलितैः प्रासादं कल्पयेत्पुनः ।
पूर्वं विमानं यद्द्रव्यं यादृग्लक्षणसंयुतम् ॥१०४॥
तादृगेव पुनः कुर्यान्न कुर्यादन्यथा पुनः ।
पुनः कृतं विमानाद्यं प्रतिष्ठाप्य यथाविधि ॥१०५॥
सम्प्रोक्षणादिकं कुर्याद्विम्बस्य मुनिपुङ्गवाः ! ।
स्वयंव्यक्तादिके वापि देवसिद्धादिकल्पिते ॥१०६॥
बिम्बे विमाने प्राकारे गोपुरे द्वारि मण्टपे ।
पीठे वा पचनावासे कोशागारादिकेपि वा ॥१०७॥
लक्षणैरन्विते वापि लक्षणैरुज्झितेपि वा ।
जीर्णे पुनस्तथा कुर्यात्पूर्वरूपानुसारतः ॥१०८॥
अन्यथा करणे विप्रा ! प्रत्यवायो महान् भवेत् ।
स्वयंव्यक्तादिके धाम्नि तथा देवादिकल्पिते ॥१०९॥
चिरकालवशात्किञ्चिच्छैथिल्य समुपागते ।
निर्वाहकाणां भक्तानां शास्त्रज्ञानामनुज्ञया ॥११०॥
बाह्ये वाभ्यन्तरे धाम्नो रक्षणार्थं शिलादिभिः ।
निपुणै शिल्पिभिः कार्या भित्तिबन्धः समन्ततः ॥१११॥
विमाने बहिदग्धे तु मानुषे वाप्यमानुषे ।
तद्दोषशान्तये कुर्याद्दग्धमपमर्न विभोः ॥११२॥
बहिदाहादिना भग्ने प्रासादे पूर्ववत्तु तत् ।
सन्धाय शिल्पनिपुणैः कुर्यात्संप्रोक्षणादिकम् ॥११३॥
क्ष्माभेदजलवेगाद्यैः पतितं भगवद्गृहम् ।

प्राग्बिम्बसहितं तस्माद्देशादन्यत्र कल्पयेत् ॥११४॥
नष्टे सबिम्बे सदने दिव्यादा प्राग्वदाचरेत् ।
चोरनद्यादिवेगाद्यैरतिनष्टे तु मानुषे ॥११५॥
बिम्बे पश्चात्प्रकुर्वीत पूर्ववद्वान्यथा तु वा ।
न शून्यमूलबिम्बं स्याद्बालालयावाहनादिकम् ॥११६॥
न कुर्याद्देशिकेन्द्रस्तु पूर्ववत् स्थाप्य पूजयेत् ।
एवं हि सर्वदेवानां परव्यूहादिरूपिणाम् ॥११७॥
विष्वक्सेनगणेशादि परिवारगणस्य च ।
कलशानां गोपुराद्येषु विभवव्यूहरूपिणाम् ॥११८॥
सान्निध्यातिशयाद्येषु पूजितानां दिनं प्रति ।
जीर्णोद्धारविधिं प्रोक्तं सर्वेषां मुनिपुङ्गवाः ! ॥११९॥
सद्यस्सान्निध्यानुगुणं प्रतिष्ठादिकमाचरेत् ।
प्रायश्चित्तं समभ्यूह्य साधकस्तु समाचरेत् ॥१२०॥
बिम्बादीनां च धामादेरङ्गभङ्गादिके सति ।
आचार्यस्त्वनुतापार्तः स्वमन्त्रमयुतं जपेत् ॥१२१॥
तदारभ्य ब्रह्मचर्यव्रतस्थः साधकैः सह ।
यावद्बिम्बसमापत्ति जपेन्मन्त्रमतन्द्रितः ॥१२२॥
चतुस्स्थानार्चनं कुर्यात् सर्वदोषप्रशान्तये ।
त्रिरात्रं वा सप्तरात्रं पात्रेभ्यो दानमाचरेत् ॥१२३॥
गोभूहेमादिकानां तु यथाशक्ति मुनीश्वराः ! ।
ब्राह्मणान् भोजयेन्नित्यं शतं वापि सहस्रकम् ॥१२४॥
यावद्बिम्बस्य सन्धानं विशेषेणार्चयेद्विभुम् ।
सन्धानान्ते तु देवस्य कृत्वा सम्प्रोक्षणादिकम् ॥१२५॥
शान्तिहोमं तथा दानं ब्राह्मणानां च भोजनम् ।
कारयेद्यजमानस्तु आचार्यं दक्षिणादिभिः ॥१२६॥
तोषयेदुक्तमनुगुणं तेन तुष्यति केशवः ।

अपूर्वकरणाज्जीर्णसमुद्धारेऽधिकं फलम् ॥१२७॥
लभते यजमानस्तु नात्र कार्या विचारणा ।
इत्येवं मुनिशार्दूला जीर्णोद्धारो मयोदितः ॥१२८॥
सतन्तु बिम्बस्यास्पृश्यस्पर्शादौ मुनिपुङ्गवाः ! ।
प्रायश्चित्तं प्रवक्ष्यामि शृणुध्वमवधानतः ॥१२९॥
अस्नातो दैविकश्चैव चण्डालाद्युपघातितः ।
केशास्थ्याद्यशुचिस्पृष्टश्चैव गत्वा ह्यनाप्लुतः ॥१३०॥
स्पृशेच्चेद्भगवद्बिम्बं स्नापयेत्कलशैर्वरैः ।
आचरेच्छान्तिहोमं च शतवारं जपेन्मनुम् ॥१३१॥
एतेषां गर्भगेहान्तः प्रवेशश्चेत्तदा विभुम् ।
संस्नाप्य पञ्चभिर्गव्यैः शान्तिहोमादिकं चरेत् १३२॥
अदीक्षितैरन्यतन्त्रदीक्षितैरचकैर्वरैः ।
स्पृष्टे बिम्बे तदा कुर्यात्स्नानं त्वधमाधमम् ॥१३३॥
शान्तिहोमं जपं चापि तद्दोषस्य प्रशान्तये ।
एतेषां गर्भगेहान्तः प्रवेशे नवभिर्घटैः ॥१३४॥
संस्नाप्य देवदेवेशं शान्तिहोमादिकं चरेत् ।
स्त्रीभिर्वाऽनुपनीतैर्वा तथा वैखानसैर्द्विजैः ॥१३५॥
अवैष्णवैर्वा संस्पृष्टे बिम्बे त्वधममध्यमम् ।
स्नपनं विधिवत्कृत्वा शान्तिहोमादिकं चरेत् ॥१३६॥
एतैः प्रविष्टे गेहे तु त्वधमाधममार्गतः ।
संस्नाप्य विधिवद्देवं शान्तिहोमं समाचरेत् ॥१३७॥
पतितः पालण्डी चापि कुष्ठरुग्णापस्मारोऽपि वा ।
काणो वाऽन्धश्च मूको वा बधिरो वाऽङ्गहीनकः ॥१३८॥
सर्पाभिगमनासक्तः कुण्डो वा गोलकोऽपि वा ।
रजस्वलान्त्यजाद्यैश्च संस्पृष्टो गर्दभादिभिः ॥१३९॥

स्पृशेच्चेद्गर्भगृहे बिम्बमधमोत्तममार्गतः ।
सस्नाप्य देवं विधिवच्छान्तिहोमं तथाचरेत् ॥१४०॥
एतैः प्रविष्टे धामान्तः कुर्यात्स्नपनमध्यमम् ।
स्नपनं देवदेवस्य शान्तिहोमं तथाचरेत् ॥१४१॥
क्षत्रैर्वैश्यैस्तथा शूद्रैः तत्तत्स्त्रीभिस्तु वा द्विजाः ! ।
बिम्बे स्पृष्टे क्रमात्कुर्यात्स्नपनं त्वधमोत्तमम् ॥१४२॥
मध्यमाधमसञ्ज्ञं च तथा मध्यममध्यमम् ।
एतैर्गर्भगृहाभ्यन्तः प्रवेशे मुनिपुङ्गवाः ! ॥१४३॥
अधमाधमसञ्ज्ञं च तथा ह्यधममध्यमम् ।
अधमोत्तमसञ्ज्ञं च क्रमात्स्नपनमाचरेत् ॥१४४॥
सर्वत्र शान्तिहोमं च सहस्रं जपमाचरेत् ।
अनुलोमजसंस्पर्शे बिम्बस्य स्नपनं भवेत् ॥१४५॥
मध्यमोत्तमसञ्ज्ञं तु प्रविष्टे तैर्गृहान्तरे ।
विमाने वापि संस्पृष्टे स्नपनं मध्यमाधमम् ॥१४६॥
प्रतिलोमजसंस्पृष्टे बिम्बे तूत्तममध्यमम् ।
स्नपनं त्वाचरेत्तेषां प्रवेशे गर्भमन्दिरे ॥१४७॥
प्रासादे वापि तैः स्पृष्टे स्नपनं तूत्तमाधमम् ।
कुर्यात्सर्वत्र होमं च जपं प्रागन्मुनीश्वराः ! ॥१४८॥
चोरभूतो ब्राह्मणो वा क्षत्रियो वैश्य एव वा ।
शूद्रोऽनुलोमजो वापि प्रतिलोमज एव वा ॥१४९॥
स्पृशेच्चेद्देवबिम्बं तु क्रमेण स्नपनं भवेत् ।
मध्यमाधमसञ्ज्ञं च तत्र मध्यममध्यमम् ॥१५०॥
मध्यमोत्तमसञ्ज्ञं च त्वथोत्तमाधमसञ्ज्ञकम् ।
तत्र गर्भे च स्नानं तथाप्युत्तममोत्तमम् ॥१५१॥
एतैस्तु गर्भगेहान्तः प्रवेशे त्वधमोत्तमम् ।

स्पृशेच्चेद्गर्भगृहं बिम्बमधमोत्तममार्गतः ।
संस्थाप्य देवं विधिवच्छान्तिहोमं तथाचरेत् ॥१४०॥
एतैः प्रविष्टे धामान्तः कुर्यादधममध्यमम् ।
स्नपनं देवदेवस्य शान्तिहोमं तथाचरेत् ॥१४१॥
क्षत्रैर्वैश्यैस्तथा शूद्रैः तत्तत्स्त्रीभिस्तु वा द्विजाः ! ।
बिम्बे स्पृष्टे क्रमात्कुर्यात्स्नपनं त्वधमोत्तमम् ॥१४२॥
मध्यमाधमसंज्ञं च तथा मध्यममध्यमम् ।
एतैर्गर्भगृहाभ्यन्तः प्रवेशे मुनिपुङ्गवाः ! ॥१४३॥
अधमाधमसंज्ञं च तथा ह्यधममध्यमम् ।
अधमोत्तमसंज्ञं च क्रमात्स्नपनमाचरेत् ॥१४४॥
सर्वत्र शान्तिहोमं च सहस्रं जपमाचरेत् ।
अनुलोमजसंस्पर्शे बिम्बस्य स्नपनं भवेत् ॥१४५॥
मध्यमोत्तमसंज्ञं तु प्रविष्टे तैर्गृहान्तरे ।
विमाने वापि संस्पृष्टे स्नपनं मध्यमाधमम् ॥१४६॥
प्रतिलोमजसंस्पृष्टे बिम्बे तूत्तममध्यमम् ।
स्नपनं त्वाचरेत्तेषां प्रवेशे गर्भमन्दिरे ॥१४७॥
प्रासादे वापि तैः स्पृष्टे स्नपनं तूत्तमाधमम् ।
कुर्यात्सर्वत्र होमं च जपं प्राग्वन्मुनीश्वराः ! ॥१४८॥
चोरभूतो ब्राह्मणो वा क्षत्रियो वैश्य एव वा ।
शूद्रोऽनुलोमजो वापि प्रतिलोमज एव वा ॥१४९॥
स्पृशेच्चेद्देवबिम्बं तु क्रमेण स्नपनं भवेत् ।
मध्यमाधमसंज्ञं च तथा मध्यममध्यमम् ॥१५०॥
मध्यमोत्तमसंज्ञं च त्वुत्तमाधमसंज्ञकम् ।
तन्मध्यमं च स्नपनं तथा स्यादुत्तमोत्तमम् ॥१५१॥
एतैस्तु गर्भगेहान्तः प्रवेशे ह्यधमोत्तमम् ।

सम्प्रोक्षणं प्रकुर्वीत सहस्रकलशाप्लवम् ॥१७८॥
शान्तिहोमं च कुर्वीत जपं चायुतसङ्ख्यया ।
मानुषं चित्रबिम्बाद्यं नवीकृत्य यथाविधि ॥१७९॥
पुनः प्रतिष्ठां कुर्वीत सहस्रकलशाप्लवम् ।
तैश्शवैर्गर्भगेहान्तर्विमाने वापि दूषिते ॥१८०॥
कुर्यात्सम्प्रोक्षणं चापि स्नपनं चोत्तमोत्तमम् ।
प्रतिलोमजचण्डालसूतिकाशवदूषिते ॥१८१॥
बिम्बे प्रतिष्ठां कुर्वीत नयनोन्मीलनं विना ।
सहस्रकलशैश्चापि स्नापयेत्पुरुषोत्तमम् ॥१८२॥
प्रासादे दूषिते तैस्तु शवैः सम्प्रोक्षणं चरेत् ।
सहस्रकलशैश्चापि स्नापयेद्विधिपूर्वकम् ॥१८३॥
प्रथमावृतिमारभ्य रथ्यावरणपश्चिमे ।
ब्राह्मणादिशवैर्वापि प्रतिलोमशवादिकैः ॥१८४॥
दूषिते प्राङ्गणक्षेत्रे चतुर्हस्तमितां क्षितिम् ।
खात्वा मृदं समुद्धृत्य बहिः प्रक्षिप्य शुद्धया॥१८५॥
सम्पूर्य च समीकृत्य कारयेन्मार्जनादिकम् ।
शिलातलं चेत्ता भूमिं दाहयेत्खननं विना ॥१८६॥
गोमयेनोपलिप्याथ पुण्याहप्रोक्षणादिकम् ।
पञ्चगव्येन चाभ्युक्ष्य गोगणं तत्र वासयेत् ॥१८७॥
वाचयित्वा महाशान्तिं भोजयेत्तत्र वै द्विजान् ।
कृत्वैव स्थूलसंशुद्धिं शान्तिं कुर्यादतः परम् ॥१८८॥
मुख्योत्तमात्तु स्नपनात् नीचान्तिममनुक्रमात् ।
स्नापयित्वा विशेषेण शान्तिहोमादिकं चरेत् ॥१८९॥
आलये ज्वलने चापि प्रमादान्मुनिपुङ्गवाः ।
प्रायश्चित्तं भवेदेवं तत्तदाचरणक्रमात् ॥१९०॥

अधमाधममार्गेण देवं संस्नापयेत् द्विजाः ! ॥१६५॥
सर्वत्र शान्तिहोमं च कुर्याद्ब्राह्मणभोजनम् ।
चण्डालैश्श्वपचैर्वापि प्रमादाद्विष्णुमन्दिरे ॥१६६॥
निरन्तरं कृते वासे मासमेकं मुनीश्वराः ।
मृत्पात्राणि परित्यज्य सम्मार्ज्य भगवद्गृहम् ॥१६७॥
गोमयेनोपलिप्याथ पर्यग्निकरणं चरेत् ।
पुण्याहं वाचयित्वाथ प्रोक्षयेत्पञ्चगव्यकैः ॥१६८॥
गोगणं वासयेत्तत्र सर्वदोषप्रशान्तये ।
वाचयित्वा महाशान्तिं ब्राह्मणैर्वेदपारगैः ॥१६९॥
भोजयित्वा द्विजांस्तत्र तेभ्यो दद्यात्तु दक्षिणाम् ।
एवं मासं तु मासार्द्धं सप्तपञ्चत्र्यहन्तु वा ॥१७०॥
कृत्वा शुद्धिं मन्दिरस्य बिम्बानां गोघृतैः पुरा ।
कृत्वाभिषेचनं प्राग्वत्सप्रोक्षणमथाचरेत् ॥१७१॥
मानुषं मृण्मयं बिम्बं तथा चित्रमयं द्विजाः ! ।
नवीकृत्य यथापूर्वं प्रतिष्ठां पुनरारभेत् ॥१७२॥
चण्डालश्वपचाद्यास्तु प्रमादाद्भगवद्गृहे ।
कर्मण्यधिकृताश्चैते सहवासेऽपि च द्विजाः ! ॥१७३॥
स्नात्वा सर्वे कुशाम्भश्च पीत्वा चान्द्रायणादिकम् ।
कृत्वा चालयसंशुद्धिं द्विजभोजनपश्चिमम् ॥१७४॥
संप्रोक्षणादिकं सर्वं प्राग्वदेव समाचरेत् ।
अन्ते महोत्सवं कुर्यात्सर्वदोषप्रशान्तये ॥१७५॥
तथैव प्रतिलोमाद्या कर्मण्यधिकृता यदि ।
प्राग्वदालयशुद्ध्यन्तं सर्वं कृत्वा यथाविधि ॥१७६॥
सहभक्तैः स्नानमुख्यं च समाचरेत् ।
अत्र प्रतिपत्तिरहितैः सर्वैश्चानुलोमजैः ॥१७७॥
सर्वैः स्पृष्टे त्वालये तु गोमूत्रेणाभिषिच्य तत् ।

सम्प्रोक्षणं प्रकुर्वीत सहस्रकलशाप्लवम् ॥१७८॥
शान्तिहोमं च कुर्वीत जपं चायुतसङ्ख्यया ।
मानुषं चित्रबिम्बाद्यं नवीकृत्य यथाविधि ॥१७९॥
पुनः प्रतिष्ठां कुर्वीत सहस्रकलशाप्लवम् ।
सैरन्ध्रैर्गर्भगेहान्तर्विमाने वापि दूषिते ॥१८०॥
कुर्यात्सम्प्रोक्षणं चापि स्नपनं चोत्तमोत्तमम् ।
प्रतिलोमजचण्डालसूतिकाशवदूषिते ॥१८१॥
बिम्बे प्रतिष्ठां कुर्वीत नयनोन्मीलनं विना ।
सहस्रकलशैश्चापि स्नापयेत्पुरुषोत्तमम् ॥१८२॥
प्रासादे दूषिते तैस्तु शवे सम्प्रोक्षणं चरेत् ।
सहस्रकलशैश्चापि स्नापयेद्विधिपूर्वकम् ॥१८३॥
प्रथमावृतिमारभ्य रथ्यावरणपश्चिमे ।
ब्राह्मणादिशवैर्वापि प्रतिलोमशवादिकैः ॥१८४॥
दूषिते प्राङ्गणक्षेत्रे चतुर्हस्तमिता क्षितिम् ।
खात्वा मृदं समुद्धृत्य बहिः प्रक्षिप्य शुद्धया॥१८५॥
सम्पूर्य च समीकृत्य कारयेन्मार्जनादिकम् ।
शिलातलं चेत्तां भूमिं दाहयेत्खननं विना ॥१८६॥
गोमयेनोपलिप्याथ पुण्याहप्रोक्षणादिकम् ।
पञ्चगव्येन चाभ्युक्ष्य गोगणं तत्र वासयेत् ॥१८७॥
वाचयित्वा महाशान्तिं भोजयेत्तत्र वै द्विजान् ।
कृत्वैवं स्थूलसंशुद्धिं शान्तिं कुर्यादतः परम् ॥१८८॥
मुख्योत्तमात्तु स्नपनात् नीचान्तिममनुक्रमात् ।
स्नापयित्वा विशेषेण शान्तिहोमादिकं चरेत् ॥१८९॥
आलये ऽनने वापि प्रमादान्मुनिपुङ्गवाः ।
प्रायश्चित्तं भवेदेवं तत्तदावरणक्रमात् ॥१९०॥

सालमण्टपपीठेषु गोपुरे मन्दिरेषु वा ।
विमानाद्वाह्यतो वापि परिवारालयादिषु ॥१९१॥
वर्णानां ब्राह्मणादीनामनुलोमादिकस्य च ।
मरणे जनने वापि तत्तद्वावरणोक्तवत् ॥१९२॥
प्रायश्चित्त प्रकुर्वीत निम्नस्पर्शादिकेऽपि च ।
तत्तत्संविध्यानुगुणं प्रायश्चित्तं समाचरेत् ॥१९३॥
एव महानसे वापि यागमण्टप एव वा ।
चण्डालादिप्रवेशे वा शवाद्यैर्वापि दूषिते ॥१९४॥
मृत्पात्राणि परित्यज्य खननाद्यैर्महीतलम् ।
संशोध्य कुण्डचुल्लीस्थमग्निं त्यक्त्वा यथा विधि ॥१९५॥
पुनरग्निं प्रतिष्ठाप्य शान्तिहोमादिकं चरेत् ।
स्वयव्यक्ताद्यालयानामङ्गत्वेन प्रकल्पिते ॥१९६॥
ग्रामादौ ब्रह्मवर्णस्य मरणं सम्भवेद्यदि ।
ग्राममध्ये गतो यावच्छवस्तिष्ठति वै द्विजाः ॥१९७॥
ग्रामस्य तावदाशौच तदा देवस्य पूजनम् ।
न कुर्यात्तच्छवे ग्रामाद्वहिर्नीते मुनीश्वराः ! ॥१९८॥
सप्रोक्ष्य सर्वतो ग्रामं पुण्याहोद्घोषपूर्वकम् ।
ततस्तु देवदेवस्य प्रकुर्यात्पूजनादिकम् ॥१९९॥
आरब्धे पूजने विप्रा ! ग्रामश्चेच्छवदूषितः ।
आरब्धपूजनं शीघ्रं कुर्यात्तन्त्रेण देशिकः ॥२००॥
मागवद्ग्रामप्रोक्षणान्ते पुनः पूजनमाचरेत् ।
ग्रामे शूद्रादिमरणं सम्भवेद्यदि वै तदा ॥२०१॥
आशौचं गृहमात्रस्य ग्रामाशौचं न विद्यते ।
तत्रापि भगवद्गेहसमीपे द्विजसत्तमाः ! ॥२०२॥
एकादशधनुर्म्यान्ते शूद्रादिशवदूषिते ।
निष्क्राम्य तच्छवं पश्चात्कुर्याद्देवस्य पूजनम् ॥२०३॥

पुरग्रामाद्यङ्गतया कल्पितेपि भगवद्गृहे ।
अन्तश्शवं चेद्ग्रामाद्यं न कुर्याद्देवपूजनम् ॥२०४॥
चतुश्शतब्राह्मणैस्तु युक्ते ग्रामपुरादिके ।
अन्तश्शवेपि नैवास्ति ग्रामाशौचं मुनीश्वराः! ॥२०५॥
तत्रापि भगवद्गेहसमीपे चैकवीथिषु ।
शवस्तिष्ठति चेद्देवं नार्चयेत्प्रोक्षणात्पुरा ॥२०६॥
उत्सवाङ्गतया कल्पग्रामादौ राष्ट्रसंकुलात् ।
चण्डाळपतितोदक्यासूतिकाशबरादिभिः ॥२०७॥
अधिष्ठिते च श्वानाद्यैर्मद्यमांसादिभिस्तथा ।
शवास्थिभिश्च संदुष्टे सर्वत्रैकत्र वा क्षितिम् ॥२०८॥
खात्वा मृदं समुद्धृत्य बहिः प्रक्षिप्य शुद्धया ।
समापूर्य समीकृत्य पञ्चगव्योक्षणादिभिः ॥२०९॥
शुद्धिं कृत्वा ग्रामशान्तिं कुर्यात्तद्दोषशान्तये ।
रेतोमूत्रपुरीषाद्यैः रुधिरापेयवान्तिभिः ॥२१०॥
निष्ठीवनास्थिमांसाद्यैर्भिन्नैः स्पृष्टे मुनीश्वराः ।
उत्तमोत्तममार्गेण स्नापयेच्छान्तिमाचरेत् ॥२११॥
एतैः प्रासादसंस्पर्शे मध्यमोत्तममार्गतः ।
संस्नाप्य देवदेवेशं शान्तिहोमं समाचरेत् ॥२१२॥
प्रथमावरणे तैस्तु संस्पृष्टे मुनिपुङ्गवाः! ।
अधमोत्तममार्गेण स्नापयेत्पुरुषोत्तमम् ॥२१३॥
द्वितीयावरणादौ तु शकृन्मूत्रादिदूषिते ।
तत्क्षणात्तद्बहिर्नीत्वा मार्जनोलेपनादिभिः ॥२१४॥
शोधयित्वा भुवं पश्चात्पञ्चगव्यैस्तु सेचयेत् ।
शान्तिहोमं ततः कुर्यात्सर्वदोषप्रशान्तये ॥२१५॥
तथैव भगवद्गेहे प्रथमावरणादिषु ।

रजसा दूषिते स्त्रीणां तद्धुव जानुमात्रकम् ॥२१६॥
खात्वा तु मृद्भिर्नव्याभिरापूर्य धरणीतलम् ।
गोमयाम्भोभिरालिप्य पर्यग्निकरण तथा ॥२१७॥
पुण्याहवाचन पञ्चगव्यैरभ्युक्षण तथा ।
कृत्वा रजस्वलाभिस्तु स्पृष्ट द्वारकवाटकम् ॥२१८॥
सङ्क्षाल्य वारिणा भूयस्तासा मार्गं च मार्जनै ।
गोमयालेपनैश्चैव शोधयित्वालयस्थितान् ॥२१९॥
मृद्भाण्डांश्च परित्यज्य प्रासादान्त स्थित विभुम् ।
अधमोत्तममार्गेण स्नापयित्वा तथैव हि ॥२२०॥
रजस्वलासन्निकृष्ट बिम्ब च स्नाप्य शाश्वत ।
शान्तिहोम जप चापि कुर्याद्देशिकसत्तम ॥२२१॥
मार्जालमूषिकासर्पमण्डूकमरटादिभि ।
गोधिभिश्चापि रथोत्ते बिम्बसस्पर्शने सति ॥२२२॥
स्नापयेन्नवभि कुम्भैर्देवदेव मुनीश्वरा ! ।
पिपीलिकाद्यैर्बिम्बस्य स्पर्शे दोषो न विद्यते ॥२२३॥
बिम्बे गोमुखसस्पृष्टे तथा वै वर्षबिन्दुभि ।
अधमाधममार्गेण स्नाप्य शान्ति समाचरेत् ॥२२४॥
श्वानैश्च गर्दभैश्चैव वराहैश्च शिवाशवै ।
बिम्बे स्पृष्टे स्नापयेत्तूत्तमोत्तममार्गत ॥२२५॥
सहस्रसङ्ख्यया शान्तिहोम च जपमाचरेत् ।
अन्तर्गर्भगृहाभ्यन्त प्रवेशे स्पर्शनेपि वा ॥२२६॥
मध्यमोत्तममार्गेण स्नापयेत्पुरुषोत्तमम् ।
प्रथमावरणाभ्यन्त प्रवेशे त्वधमोत्तमम् ॥२२७॥
स्नपन कारयेदेषा द्वितीयावरणादिषु ।
प्रवेशश्चेद्देवदेवमधमाधममार्गत ॥२२८॥

संस्नाप्य शान्तिहोमं च सहस्रं जपमाचरेत् ।
मार्जालादिशवैर्बिम्बस्पर्शने स्वधमोत्तमम् ॥२२९॥
स्नपनं शान्तिहोमं च कुर्याद्देशिकसत्तमः ।
तैस्तु गर्भगृहाभ्यन्तर्दूषिते नवभिर्घटैः ॥२३०॥
स्नापयेद्देवदेवं तु शान्तिहोमं तथा चरेत् ।
प्रथमावरणादौ तैर्दूषिते तद्बहिर्नयेत् ॥२३१॥
मार्जनैर्गोमयालेपैः पञ्चगव्यैश्च शोधयेत् ।
गोमहिष्यव्यजाद्यैस्तु वानरादिशवैस्तथा ॥२३२॥
बिम्बस्पर्शे स्नापयेत्तमुत्तमोत्तममार्गतः ।
एतैस्तु गर्भगेहान्तर्दूषिते मध्यमोत्तमम् ॥२३३॥
स्नपनं शान्तिहोमं च कुर्याद्देशिकसत्तमः ।
पूर्वोक्तानां गवादीनां प्रथमावरणादिषु ॥२३४॥
जनने मरणे चैव तद्द्रव्यं खननादिभिः ।
संशोध्य स्नापयेद्देवमधमोत्तममार्गतः ॥२३५॥
श्वगर्दभवराहादिशवैः स्पृष्टे तु कौतुके ।
सम्प्रोक्षणं तथा शान्तिहोमादींश्च समाचरेत् ॥२३६॥
एतैः प्रासादसम्पर्शे उत्तमोत्तममार्गतः ।
स्नापयेद्देवदेवं तु प्रथमावरणादिषु ॥२३७॥
तैर्दूषिते देवदेवं मध्यमोत्तममार्गतः ।
सम्स्नाप्य शान्तिहोमादीन् कुर्याद्देशिकसत्तमः ॥२३८॥
तथा महानसे यागगेहे श्वादिप्रवेशने ।
तच्छवैर्दूषिते वापि मृत्पात्राणि परित्यजेत् ॥२३९॥
लोहपात्राणि संशोध्य कृत्वा सम्मार्जनादिकम् ।
पञ्चगव्यैश्च सम्प्रोक्ष्य शान्तिहोमं समाचरेत् ॥२४०॥
वायु कुक्कुटादिशवस्पर्शे कुर्मादिस्पर्शे तथा द्विज ।

त्यक्त्वा तमभिमन्यन्तु स्नापयेद्विधिवद्द्विजा ! ॥२४१॥
काकैर्गृध्रैस्तथा घूकै कुक्कुटैश्च कपोतकै ।
श्येनादिभिश्च गोधाभिर्बिम्बस्पर्शे मुनीश्वरा ! ॥२४२॥
मध्यमोत्तममार्गेण स्नापयेच्छान्तिमाचरेत् ।
एतेषा गर्भगेहान्त प्रवेशे मुनिपुङ्गवा ! ॥२४३॥
अधमोत्तममार्गेण स्नाप्य शान्ति समाचरेत् ।
प्रथमावरणादेषु ह्यप्रवेश्यस्थले द्विजा ! ॥२४४॥

एषा प्रवेशे तत्स्थान प्रोक्षयेत्पञ्चगव्यकै ।
शान्तिहोमादिक कुर्यात्सर्वदोषप्रशान्तये ॥२४५॥
काकादीना शवै स्पृष्टे बिम्बे चैवोत्तमोत्तमम् ।
स्नपन शान्तिहोम च कुर्यात्तद्दोषशान्तये ॥२४६॥
तैस्तु प्रासादसस्पर्शे मध्यमोत्तममार्गत ।
स्नापयेद्देवदेव तु प्रथमावरणादिषु ॥२४७॥
तैर्दूषिते स्थले तत्तु मार्जनोलेपनादिभि ।
सशोध्य पञ्चगव्यैश्च प्रोक्षण शान्तिमाचरेत् ॥२४८॥
महानसादौ तैर्दुष्टे प्रागुक्तसर्व समाचरेत् ।
शिथिलीसरघातुम्भीवल्मीकादौ तु वा द्विजा ! ॥२४९॥
बिम्बोपरि समुत्पन्ने तत्समुद्धृत्य तत्क्षणात् ।
बिम्बाभिषेचन कृत्वा पञ्चगव्यैर्यथाविधि ॥२५०॥
कृत्वा सम्प्रोक्षण पश्चाच्छान्तिहोम समाचरेत् ।
गोभूतिलादिक दद्यात्तद्दोषस्य प्रशान्तये ॥२५१॥
सहस्र ब्राह्मणांश्चैव भोजयेन्मुनिपुङ्गवा ! ।
प्रासादे गर्भगेहे वा शिथिल्यादिसमुद्भवे ॥२५२॥
उत्तमोत्तममार्गेण स्नापयेत्पुरुषोत्तमम् ।
शान्तिहोमादिक सर्व प्रागुक्तवत्समाचरेत् ॥२५३॥

प्राकारे मण्टपे वापि गोपुरे वाहनादिके ।
शिथिलीसरघादीनां वल्मीकादेस्समुद्भवे ॥२५४॥
छत्राकाणः समुत्पत्तौ ब्रह्मदण्डसमुत्थितौ ।
तत्क्षणात्तत्समुद्धृत्य प्रोक्षयेत्पञ्चगव्यकैः ॥२५५॥
अथमोत्तममार्गेण संस्नाप्य पुरुषोत्तमम् ।
शान्तिहोमादिकं सर्वं प्राग्वदेव समाचरेत् ॥२५६॥
भगवन्मन्दिरे विप्रा ! कृतं चेत्पूजकेतरैः ।
आसनेप्वासनं चैव शयनं भोजनादिकम् ॥२५७॥
तत् स्थानं पञ्चगव्येन प्रोक्ष्य शान्तिं समाचरेत् ।
बिम्बोपर्यशने पाते भग्नमङ्गं यथाविधि ॥२५८॥
सन्धाय प्रोक्षणं कृत्वा सहस्रकलशैस्तथा ।
संस्नाप्य देवं शान्त्यर्थं हुत्वा ब्राह्मणभोजनम् ॥ ५९॥
सहस्रसंख्यया कृत्वा कुर्यादन्ते महोत्सवम् ।
प्रासादे त्वशने पाते भग्नं सन्धाय पूर्ववत् ॥२६०॥
सम्प्रोक्षणादिकं कृत्वा उत्तमोत्तममार्गतः ।
संस्नाप्य देवं तदनु शान्तिहोमादिकं चरेत् ॥२६१॥
प्रथमावरणाद्येषु गोपुरे मण्टपे तु वा ।
भवेदशनिपातश्चेदधमोत्तममार्गतः ॥२६२॥
स्नपनं शान्तिहोमं च ब्राह्मणानां च भोजनम् ।
अथोत्पातस्य शान्तिं तु वक्ष्यामि शृणुत द्विजाः ! ॥२६३॥
उल्काशन्यादिपाते च नक्षत्रे पतिते च खात् ।
सधूमे च दिशां दाहे भूताद्यावेशिते नृपे ॥२६४॥
दुर्भिक्षे व्याधिते राष्ट्रे तथा वै शत्रुसङ्कटे ।
सूर्येन्द्वयस्य व्यत्यासे भूकम्पे तद्विदारणे ॥२६५॥
अतिवृष्ट्यवनावृष्टौ दिव्यदुन्दुभिनिस्वने ।

रात्राविन्द्रधनुर्दर्शे जलेऽग्निजनने तथा ॥२६६॥
चन्द्रोदयेऽन्धकारे च विनाग्निं धूमदर्शने ।
प्रतिसूर्यप्रदर्शे च दिवा नक्षत्रदर्शने ॥२६७॥
दर्शने बालमीनस्य रात्रौ सूर्यप्रदर्शने ।
स्वप्न तु चन्द्रपतने भूमौ ज्वलनदर्शने ॥२६८॥
भूतादिदर्शने चैव व्योम्नि नेमिस्वने तथा ।
आकाशे ग्रहयुद्धे च निमित्त तु विना द्विजा ! ॥२६९॥
आर्द्रवृक्षस्य पतने तथैव पतिते गिरौ ।
वृक्षे त्वन्यफले दृष्टे शिलायामङ्कुरे तथा ॥२७०॥
शिलावर्षे तटाकादौ रक्तशैवालदर्शने ।
द्विशीर्षजन्तुप्रसवे द्रुमे शोणितसम्भवे ॥२७१॥
विभिन्नजन्तुप्रसवे मनुष्यपशुपक्षिषु ।
एवमन्येष्वद्भुतेषु महोत्पातेषु सत्स्वपि ॥२७२॥
तद्दोषशान्ति विप्रेन्द्रा ! कारयेदचिरान्नृप ।
स्थापनोक्तविधानेन कल्पिते मण्टपे शुभे ॥२७३॥
चतुरश्रादिपूर्वेषु यथावत्कल्पितेषु च ।
कुण्डेषु दशसङ्ख्येषु अक्षवृक्षादिसम्भवैः ॥२७४॥
समिद्गणैस्तिलैराज्ये सेचितैः प्रागुदीरितैः ।
पञ्चभिर्मधुराद्यैश्च मिश्रीभूतैः क्रमेण तु ॥२७५॥
महत्तराणां दोषाणां शान्तये मन्त्रवित्तमैः ।
अयुतं नियुतं लक्षं कोटिमिष्टं यथाबलम् ॥२७६॥
होतव्यं पूर्णया सार्धं दशभिर्मन्त्रवित्तमैः ।
कुण्डेषु मध्यपूर्वेषु मन्त्राणां नियतिः क्रमात् ॥२७७॥
चक्राब्जे द्वादशार्णेन वस्त्रश्रेऽष्टाक्षरेण तु ।
षडर्णेन षडश्रेषु सद्मभे प्रणवेन तु ॥२७८॥

जितन्तया चतुरश्रे विश्वत्रात्रा त्रिकोणके ।
द्वात्रिंशद्दळपद्माख्ये नृसिंहानुष्टुभेन तु ॥२७९॥
सुदर्शननृसिंहेन चक्रकुण्डाक्षरके ।
वाराहेणार्धचन्द्राख्ये वृत्ते सौदर्शनेन तु ॥२८०॥
धिष्ण्यद्वय मध्यवेद्या प्रागुक्त दक्षिणोत्तरे ।
शेषाणि परित कुर्याद्दिक्षु चैव विदिक्षु च ॥२८१॥
सिद्धमन्त्रा नियोक्तव्या होतार शान्तिकर्मणि ।
सर्वकुण्डानि सर्वेषा मन्त्राणामिच्छया गुरो ॥२८२॥
कल्पनीयानि या मन्त्रा यत सर्वफलप्रदा ।
न्यस्तमन्त्रैर्यथान्याय जप्यास्ते सख्यया तथा ॥२८३॥
गोभूहेमतिलाद्याना दानैर्योग्यजनस्य च ।
तृप्ति कार्या विशेषेण दिव्याद्यायतनस्य च ॥२८४॥
प्रजापालनशीलेन भूपेनात्महितेच्छुना ।
शान्तिरेवविधा कार्या शास्त्राङ्गैर्बहुभिर्धनै ॥२८५॥
मुख्यकल्पे विधिरयमनुकल्पे द्विजोत्तमा ! ।
पूर्ववद्यागगेहे तु पञ्चकुण्डेष्वनुक्रमात् ॥२८६॥
व्यापकै पञ्चभिर्मन्त्रैरष्टाक्षरपुरस्सरै ।
मधुक्षीरादिभिर्द्रव्यै पञ्चभिर्नियुताख्यया ॥२८७॥
सख्यया जुहुयान्मन्त्री लक्षसख्या यथा भवेत् ।
गोभूतिलादिक दद्यात्पूर्ववदेव मुनीश्वरा ! ॥२८८॥
सर्वत्रान्ते ध्वजारोहपूर्वक तूत्सव चरेत् ।
तथा बिम्बस्य हसने चलने रोदने तथा ॥२८९॥
पतने भ्रमणे स्वेदसम्भवे रक्तसम्भवे ।
सम्प्रोक्षण तु कृत्वाथ पूर्वोक्ता शान्तिमाचरेत् ॥२९०॥
महोत्सवान्त देवस्य सर्वदोषप्रशान्तये ।

प्रासादान्त स्थिते बिम्बे अकस्माद्ध्वंससम्भवे ॥२९१॥
पयोमधुघृतैश्चैव नाळिकेरजलैस्तथा ।
पृथक्प्रस्थसहस्रैस्तु स्नापयेत्सप्त वासरान् ॥२९२॥
ततः पूर्वोदिता शान्तिमुत्सवान्त समाचरेत् ।
रक्तवर्षेतु सजाते प्रासादादीन् मुनीश्वरा ! ॥२९३॥
शुद्धोदकैः क्षाळयित्वा गोमयाल्पेपन तथा ।
पर्यग्निकरण पचगव्यैः सम्प्रोक्षण तथा ॥२९४॥
कृत्वा देवस्य विधिवत्सम्प्रोक्षणमथाचरेत् ।
सस्नाप्य मधुसर्पिर्भ्यां देव प्रस्थसहस्रकैः ॥२९५॥
कुर्यात्पूर्वोदिता शान्तिमुत्सवान्त यथाविधि ।
मधुवर्षे क्षीरवर्षे तत्तत्प्रस्थसहस्रकैः ॥२९६॥
सस्नाप्य देव सप्ताह प्राग्वच्छान्ति समाचरेत् ।
अकस्माद्धामपतने तदूर्ध्वे पतिते द्रुमे ॥२९७॥
सन्धाय पूर्ववच्छीघ्र कृत्वा सम्प्रोक्षण विभो ।
कुर्यात्पूर्वोदिता शान्तिमन्ते कुर्यान्महोत्सवम् ॥२९८॥
एव महोत्पातदोषशान्तिर्विप्रा ! प्रकीर्तिता ।
अथ नित्यार्चनादीना प्रायश्चित्त तु वक्ष्यते ॥२९९॥
अस्नातोनूर्ध्वपुण्ड्रश्चापवित्रोनुपवीतक ।
नग्नो वा ह्येकवस्त्रो वा जीर्णवस्त्रधरस्तु वा ॥३००॥
तथा पर्युषित वासो दधानो नीलवस्त्रधृक् ।
दग्धवस्त्रधरो वापि ह्यार्द्रवस्त्रधरस्तु वा ॥३०१॥
धनाचान्तो ध्यानहीनो मुक्तकेशस्तथा द्विजा ! ।
निवसन्थ हसन् कुप्यन् श्वसश्च प्रल्पन् द्विजा ! ॥३०२॥
निष्ठीवादियुतश्चापि देव सम्पूजयेद्यदि ।
तद्दोषनाशाय विप्रा सप्ताक्षरमनुत्तमम् ॥३० ॥

जपेत्सहस्रवारं तु शतवारं तु वा द्विजाः ।
पुनः सम्पूजनं कुर्याद्देवस्य विधिपूर्वकम् ॥२०४॥
केशास्थिलोष्टचीरासृगस्पृश्यस्पर्शदूषितः ।
तथा मूत्रपुरीषादीन् समाक्रम्य ह्यनाप्लुतः ॥२०५॥
आशौचवद्भिः संस्पृष्टश्चण्डालाद्युपघातकः ।
रुधिराद्यन्विताङ्गश्च पूजयेद्यदि केशवम् ॥२०६॥
पञ्चगव्यैः स्नापयित्वा पुनः पूजनमाचरेत् ।
काकगृद्ध्रादिभिः स्पृष्टः श्वभिर्वा गर्दभादिभिः ॥२०७॥
पाषण्डप्रतिलोमाद्यैः पतितैर्हीनसूत्रिभिः ।
चैत्यवृक्षादिभिश्चापि संस्पृष्टः पूजयेद्यदि ॥२०८॥
अधमाधममार्गेण स्नापयेत्पुरुषोत्तमम् ।
चण्डालैर्वा तथा म्लेच्छैरुदक्यासूतिकादिभिः ॥२०९॥
महापातकिभिः स्पृष्टः स्त्रियं गत्वा ह्यनाप्लुतः ।
पूजयेद्यदि देवेशं नीचमध्यममार्गतः ॥२१०॥
संस्नाप्य देवं तदनु पुनः पूजनमाचरेत् ।
परस्त्रीगमनासक्तः कुष्ठी वाप्यङ्गहीनकः ॥२११॥
काणो वान्धोपि मूको वा बधिरः पंगुरेव वा ।
अपस्मारी तथोन्मत्तो देवं, सम्पूजयेद्यदि ॥२१२॥
अधमोत्तममार्गेण देवं संस्नापयेत् द्विजाः ! ।
आशौचवान्वा पतितः गुण्डो वा गोळकोपि वा ॥२१३॥
महापातकवांश्चापि देवं सम्पूजयेद्यदि ।
उत्तमोत्तममार्गेण संस्नाप्य पुरुषोत्तमम् ॥२१४॥
शान्तिहोमं मूलमन्त्रजपं चापि समाचरेत् ।
किमिकीटादिभिर्दुष्टधान्यपुष्पफलादिभिः ॥२१५॥
माष्यकुलुत्थमस्रास्थिकेशदन्तनखादिभिः ।

स्पृष्टैर्द्रव्यैस्तथा ऽस्पृश्यपाणिस्पृष्टै फलादिभि ॥३१
तथा पर्युषितैरन्यै पत्रपुष्पफलादिभि ।
पूजने सति देवस्य मूलमन्त्र शत जपेत् ॥३१७॥
चण्डालपतितोदक्यासूतिकाप्रतिलोमकै ।
शवरांश्च सस्पृष्टैर्द्रव्यैश्शास्त्रविनिन्दितै ॥३१८॥
पत्रपुष्पादिभिश्चैव स्पृष्टैर्वा गोमुखादिभि ।
मनुष्यैर्लंघितद्रव्यैस्तथा ऽस्पृश्यमृगादिभि ॥३१९॥
क्रिमिकीटपतङ्गास्थिदन्तकेशनखादिभि ।
तुषैश्च भस्मलोष्टाद्यैर्युक्तैर्द्रव्यैस्तथा द्विजा ! ॥३२०॥
पूर्व समर्पितैर्द्रव्यैस्तथा पर्युषितोदकै ।
पूजने सति देवस्य पुसूक्तेन कुशोदकै ॥३२१॥
स्नापयित्वा मूलमन्त्रमष्टोत्तरशत जपेत् ।
शान्तिहोम तु वा कुर्यात्सर्वदोषप्रशान्तये ॥३२२॥
जन्तुभक्षितपुष्पाद्यैर्नीचावासमसीपगै ।
अन्यागमोद्भवै पुष्पैर्ग्रथितैर्दाषितैनरै ॥३२३॥
शूद्रानीतै पुष्पगेहाद्वर्हिर्वद्धैश्च रोगिभि ।
भुग्नै पत्रपुष्पाद्यै फलैश्चैर्नार्चने हरे ॥३२४॥
क्षीरेण स्नाप्य देवेशमष्टोत्तरशत जपेत् ।
मूलमन्त्र पुन शुद्धपत्रपुष्पादिभिर्यजेत् ॥३२५॥
जीर्णवस्त्रैरधौतैश्च जीर्णछत्रादिभिस्तथा ।
अशोधितार्घ्यपात्राद्यै कृते देवस्य पूजने ॥३२६॥
अष्टोत्तरशत जप्त्वा पुन पूजनमाचरेत् ।
देशान्यवायशुचिस्पृष्टे स्पृष्टश्शूद्रादिभिस्तथा ॥३२७॥
श्वानादिभिर्वा सस्पृष्टश्चण्डालाद्युपघातकै ।
वर्मीस्सपूजिते देवे अयमोचममार्गत ॥३२८॥

संस्नाप्य देवदेवं तु शान्तिहोमं समाचरेत्।
चण्डालसूतिकोदक्यास्पृष्टैर्वस्त्रैः प्रपूजने ॥३२९॥
उत्तमोत्तममार्गेण स्नाप्य शान्तिं समाचरेत्।
केशास्थिधादिभिश्शूद्रैः स्पृष्टं कार्पासवस्त्रकम् ॥३३०॥
पुनस्संशोध्य देवाय दद्याच्चण्डालपूर्वकैः।
स्पृष्टं कार्पासवस्त्रं तु सन्त्यजेन्मुनिपुङ्गवाः! ॥३३१॥
पट्टवस्त्रं तु शूद्राद्यैः स्पृष्टं संप्रोक्षयेद्द्विजाः!।
चण्डालपूर्वैः स्पृष्टं तु जलैः संक्षाळयेद्गुरुः ॥३३२॥
अजाविमहिषोष्ट्राज्यैस्तैलैरेरण्डजैस्तथा।
प्राण्यङ्गसम्भवैस्तैलैः फलजैर्वापि दीपने ॥३३३॥
अजादिक्षीरदध्याज्यहोमे वा मुनिपुङ्गवाः!।
शान्तिहोमं प्रकुर्वीत तद्दोषस्य प्रशान्तये ॥३३४॥
पूर्वोक्ताज्यादिभिर्देवस्नपने वा निवेदने।
अधमोत्तममार्गेण स्नपनं शान्तिमाचरेत् ॥३३५॥
नरभुक्तैर्वस्त्रखण्डैर्दीपवर्त्यादिके कृते।
शान्तिहोमं प्रकुर्वीत सहस्रं जपमाचरेत् ॥३३६॥
धूपैः प्राण्यङ्गसंमिश्रैस्तैलजैः स्नुहिजैरपि।
अन्यैर्दुर्गन्धजैश्चैव पूजयेद्यदि मोहतः ॥३३७॥
कपिलागोघृतेनैव हुत्वाहुतिसहस्रकम्।
जातिपुष्पसहस्रेण देवमभ्यर्च्य देशिकः ॥३३८॥
पुनः शुद्धं मुनिश्रेष्ठाः! कर्पूरागरु धूपयेत्।
देवतान्तरनिर्माल्यदुष्टद्रव्यैः प्रपूजने ॥३३९॥
अधमाधममार्गेण स्नाप्य शान्तिं समाचरेत्।
चण्डालसूतिकोदक्यास्पृष्टाद्वा शवदूषितात् ॥३४०॥
कूपात्समुद्धृतैस्तोयैः कृते देवस्य पूजने।

उत्तमोत्तममार्गेण स्नापयेत्पुरुषोत्तमम् ॥३४१॥
अन्तस्तिर्यक्छवात्कूपात्स्पृष्टाद्वा प्रतिलोमजै ।
समुद्धृतैर्जलैर्देवमर्चयेद्यदि मोहत ॥३४२॥
तद्दोषशान्तये कुर्यात्स्नानमुत्तममध्यमम् ।
अन्तर्जन्तुशवात्कूपाद्विण्मूत्रापेयदूषितात् ॥३४३॥
देवतान्तरनिर्माल्यदुष्टाद्वोद्धृतवारिभि ।
पूजने देवदेवस्य स्नान स्यादुत्तमाधमम् ॥३४४॥
अन्तरशवोषिताद्वापि स्पृष्टाचण्डाळपूर्वकै ।
सरस प्रोद्धृतैस्तोयै पूजने मध्यमोत्तमम् ॥३४५॥
स्नान कुर्यात्तु देवस्य अन्तस्तिर्यक्छवोषितात् ।
स्पृष्टाद्वा प्रतिलोमाद्यै सरस प्रोद्धृतैर्जलै ॥३४६॥
पूजने सति देवस्य स्नान मध्यममध्यमम् ।
स्पृष्टाचण्डालपूर्वैर्वा मनुष्यशवदूषितात् ॥३४७॥
तटाकादुद्धृतैस्तोयै पूजने त्वधमोत्तमम् ।
स्नपन देवदेवस्य कुर्याद्देशिकसत्तम ॥३४८॥
अन्तश्शवोषिते कूपे स्पृष्टे चण्डालपूर्वकै ।
सर्वमुद्धृत्य तत्तोय तदर्धं वा मुनीश्वरा ॥३४९॥
पुण्याह वाचयित्वाथ प्रोक्षयेत्पञ्चगव्यकै ।
तिर्यक्छवादिभिर्दुष्टे जलस्यार्धं समुद्धरेत् ॥३५०॥
पाद वापि समुद्धृत्य प्रोक्षयेत्पञ्चगव्यकै ।
छुछुन्दर्यादिजन्तूना शवैर्मूत्रपुरीषकै ॥३५१॥
दुष्टे वा शिवनिर्माल्यै कूपे तज्जलमुद्धरेत् ।
पाद वापि तदर्धं वा सेचयेत्पञ्चगव्यत ॥३५२॥
चण्डालाद्यशुचिस्पर्शमनुष्यशवदूषिते ।
प्रतिलोमजसंस्पर्शतिर्यक्छवविदूषिते ॥३५३॥

कुर्यात्सरसि कूपोक्तप्रायश्चित्तार्धमेव च ।
तटाके शवचण्डालस्पर्शनाद्यैर्विदूषिते ॥३५४॥
आचरेत्सरसि प्रोक्तप्रायश्चित्तार्धमेवच ।
यद्वा सरसि विस्तीर्णे तटाके च महत्तरे ॥३५५॥
कुम्भानां तु सहस्रं वा शतं वा जलमुद्धरेत् ।
दिवा समुद्धरेत्तोयं रात्रौ चेदग्निसन्निधौ ॥३५६॥

चण्डालसूतिकोदक्याशबरैर्मद्यपादिभिः ।
श्वसृगालवराहाद्यैः काकगृध्रादिभिस्तथा ॥३५७॥
स्पृष्टान्नपानभक्ष्याद्यैर्देवाय विनिवेदने ।
तथा रुधिरमांसास्थिस्पृष्टान्नविनिवेदने ॥३५८॥
शवादिदूषिते गेहे पक्वान्नस्य निवेदने ।
मृत्पात्राणि परित्यज्य लोहपात्राणि शोधयेत् ॥३५९॥

कृत्वा चालयसंशुद्धिं सर्वे स्नात्वा यथाविधि ।
कुर्युः कुशोदपानं च स्नपनं चोत्तमोत्तमम् ॥३६०॥
कृत्वा देवस्य विधिवच्छान्तिहोमं समाचरेत् ।
परस्त्रीगमनासक्तैर्भक्ष्याभक्ष्याविवेकिभिः ॥३६१॥
अवैष्णवैश्च संस्पृष्टहविषो विनिवेदने ।
त्यक्तं पर्युषितं वापि दृष्टं वाऽयोग्यमानुषैः ॥३६२॥

मण्डूकमूषिकासर्पैर्विडालैः स्पृष्टमेव वा ।
क्रिमिकीटपतङ्गाद्यैः स्पृष्टं केशादिदूषितम् ॥३६३॥
श्वासाहतं तथाघ्रातं तथा पूर्वं निवेदितम् ।
निवेदयेच्चेदन्नाद्यं कुम्भैर्द्वादशभिः क्रमात् ॥३६४॥
संस्नाप्य देवदेवेशं शान्तिहोमं समाचरेत् ।
श्वगृध्रादिस्पृष्टचुल्ल्यां पक्वान्नविनिवेदने ॥३६५॥
साग्र्यष्टादशभिः कुम्भैः स्नापयेत्पुरुषोत्तमम् ।

उत्तमोत्तममार्गेण स्नापयेत्पुरुषोत्तमम् ॥३४१॥
अन्तस्तिर्यक्छवात्कूपात्स्पृष्टाद्वा प्रतिलोमजै ।
समुद्धृतैर्जलैर्देवमर्चयेद्यदि मोहत ॥३४२॥
तद्दोषशान्तये कुर्यात्स्नानमुत्तममध्यमम् ।
अन्तर्जन्तुशवात्कूपाद्विण्मूत्राद्येयदूषितात् ॥३४३॥
देवतान्तरनिर्माल्यदुष्टाद्वोद्धृतवारिभि ।
पूजने देवदेवस्य स्नान स्यादुत्तमाधमम् ॥३४४॥
अन्तश्शवोषितादृपि स्पृष्टाच्चण्डालपूर्वकै ।
सरस प्रोद्धृतैस्तोयै पूजने मध्यमोत्तमम् ॥३४५॥
स्नान कुर्यात्तु देवस्य अन्तस्तिर्यक्छवोषितात् ।
स्पृष्टाद्वा प्रतिलोमाद्यै सरस प्रोद्धृतैर्जलै ॥३४६॥
पूजने सति देवस्य स्नान मध्यममध्यमम् ।
स्पृष्टाच्चण्डालपूर्वैर्वा मनुष्यशवदूषितात् ॥३४७॥
तटाकादुद्धृतैस्तोयै पूजने त्वधमोत्तमम् ।
स्नपन देवदेवस्य कुर्याद्देशिकसत्तम ॥३४८॥
अन्तश्शवोषिते कूपे स्पृष्टे चण्डालपूर्वकै ।
सर्वमुद्धृत्य तत्तोय तदर्धं वा मुनीश्वरा ॥३४९॥
पुण्याह वाचयित्वाथ प्रोक्षयेत्पञ्चगव्यकै ।
तिर्यक्छवादिभिर्दुष्टे जलस्यार्धं समुद्धरेत् ॥३५०॥
पाद वापि समुद्धृत्य प्रोक्षयेत्पञ्चगव्यकै ।
छुछुन्दर्यादिजन्तूना शवैर्मूत्रपुरीषकै ॥३५१॥
दुष्टे या शिवनिर्माल्यै कूपे तज्जलमुद्धरेत् ।
पाद वापि तदर्धं वा सेचयेत्पञ्चगव्यत ॥३५२॥
चण्डालाद्यशुचिस्पर्शमनुष्यशवदूषिते ।
प्रतिलोमजसम्पर्शतिर्यक्छवविदूषिते ॥३५३॥

कुर्यात्सरसि कूपोक्तप्रायश्चित्तार्धमेव च ।
तटाके शवचण्डालस्पर्शनाद्यैर्विदूषिते ॥३५४॥
आचरेत्सरसि प्रोक्तप्रायश्चित्तार्धमेवच ।
यद्वा सरसि विस्तीर्णे तटाके च महत्तरे ॥३५५॥
कुम्भानां तु सहस्रं वा शतं वा जलमुद्धरेत् ।
दिवा समुद्धरेत्तोयं रात्रौ चेदग्निसन्निधौ ॥३५६॥
चण्डालसूतिकोदक्याशवरैर्यवनादिभिः ।
श्वसृगालवराहाद्यैः काकगृध्रादिभिस्तथा ॥३५७॥
स्पृष्टान्नपानभक्ष्यादेर्देवाय विनिवेदने ।
तथा रुधिरमांसास्थिस्पृष्टान्नविनिवेदने ॥३५८॥
शवादिदूषिते गेहे पक्वान्नस्य निवेदने ।
मृत्पात्राणि परित्यज्य लोहपात्राणि शोधयेत् ॥३५९॥
कृत्वा चालयसंशुद्धिं सर्वे स्नात्वा यथाविधि ।
कुर्युः कुशोदपानं च स्नपनं चोत्तमोत्तमम् ॥३६०॥
कृत्वा देवस्य विधिवच्छान्तिहोमं समाचरेत् ।
परस्त्रीगमनासक्तैर्भक्ष्याभक्ष्याविवेकिभिः ॥३६१॥
अवैष्णवैश्च संस्पृष्टहविषो विनिवेदने ।
त्यक्तं पर्युषितं वापि दुष्टं वाऽथोन्नवमानुषैः ॥३६२॥

चण्डालाद्यैः स्पृष्टचुल्लया पक्वान्नविनिवेदने॥३६६॥
पञ्चविंशतिभिः कुम्भैः स्नापयेत्पुरुषोत्तमम् ।
अत्युष्णं चातिशीतं च रजस्तुपकणान्वितम् ॥३६७॥
मृत्पाषाणैर्दूषितं वा हविश्चेद्विनिवेदयेत् ।
जपेत्सहस्रवारं तु मूलमन्त्रं द्विजोत्तमाः ! ॥३६८॥
अयाज्ञीयैः कोद्रवाद्यैः कृतस्य हविषोऽर्पणे ।
निषिद्धशाकमूलानां फलानां वा निवेदने ॥३६९॥
गोघृतेन स्नाप्य देवं शान्तिहोमं समाचरेत् ।
महाहविर्विधाने तु विशेषः श्रूयतां द्विजाः ! ॥३७०॥
पचनालयतोऽन्यत्र साधितं दीक्षितेतरैः ।
अमन्त्रसंस्कृतं चान्नमविभक्तमलक्षणम् ॥३७१॥
निरीक्षितमयोग्यैश्च संस्पृष्टं मक्षिकादिभिः ।
सम्प्रोक्ष्य चाम्रतोयेन निवेद्य यत्नगौरवात् ॥३७२॥
अन्यत्रैव दुष्टहविःकल्पने शान्तिमाचरेत् ।
मक्षिकाघुणभृङ्गाद्यैर्दष्टं दुष्टं पुरीषकैः ॥३७३॥
पत्रपुष्पफलाद्यन्नं त्यक्तव्यं तदधिष्ठितम् ।
अम्बोदकेन सम्प्रोक्ष्य दद्याद्देवाय भक्तितः ॥३७४॥
अकृत्वा भूतसंशुद्धिं मन्त्रन्यासादिकं तु वा ।
हृदि देवमनभ्यर्च्य निर्माल्योद्वासनादिकम् ॥३७५॥
बिम्बसंशोधनं वापि स्थानसंशोधनं तथा ।
अकृत्वा देवयजनं कुर्याच्चेन्मोहतो द्विजाः ! ॥३७६॥
तद्दोषशान्तये मूलमन्त्रं जप्त्वा सहस्रकम् ।
लुप्तं कर्म ततः कृत्वा पुनः पूजनमाचरेत् ॥३७७॥
अर्घ्यादीनां द्रव्यलोपे दहनाप्यायनादिके ।
लुप्ते वा विष्णुगायत्रीं शतं जप्त्वा यथाविधि ॥३७८॥
द्रव्यन्यासादिसंस्कारं कृत्वार्घ्यादीन् समर्चयेत् ।

प्रासादद्वारदेवानां तथाऽऽवरणवासिनाम् ॥३७९॥
लुप्तेऽर्चने तत्पुरतस्तत्तन्मन्त्रान्यथाक्रमम्।
अष्टोत्तरशतं जप्त्वा पुनरर्चनमाचरेत्॥३८०॥
प्रासादद्वारदेवानां परिवारगणस्य वा ।
विपर्यासे मूलमन्त्रं शतं जप्त्वा क्रमाद्यजेत् ॥३८१॥
पीठार्चनमकृत्वैव देवसम्पूजने कृते ।
पीठादिदेवतामन्त्रं शतं जप्त्वा यथोदितम् ॥३८२॥
पुनः पीठार्चनं कृत्वा देवमभ्यर्चयेद्गुरुः ।
कर्मार्चायङ्गबिम्बेषु विनाऽऽवाहनमर्चने ॥३८३॥
लययागं भोगयागं विना वाभ्यर्चने कृते ।
सहस्रवारं संजप्त्वा मूलमन्त्रं यजेत्पुनः ॥३८४॥
मन्त्रहानौ क्रियाहानौ मुद्राहानौ तथैव च ।
भोगमन्त्रक्रियादीनां विपर्यासेपि च द्विजाः ॥३८५॥
तद्दोषशान्तये मन्त्रमष्टोत्तरशतं जपेत् ।
पूजाकाले तु घण्टायाश्चालने तु विवर्जिते ॥३८६॥
वेदघोषविहीने वा शान्तिहोमं समाचरेत् ।
पूर्वक्लृप्तोपचारे तु न्यूने द्विगुणवस्तुभिः ॥३८७॥
पुनरभ्यर्चनं कृत्वा अष्टोत्तरशतं जपेत् ।
औपचारिकसांस्पर्शहृदयङ्गमरूपिणाम् ॥३८८॥
परिच्युतौ च भोगानां त्रयाणां क्रमशो द्विजाः ।
पूजने सर्वबीजानि मात्रावित्तं घृतोदनम् ॥३८९॥
निवेदनीयं देवस्य विशेषेज्यापुरस्सरम् ।
मात्रादानादिहानौ तु देवं मङ्गळवारिभिः ॥३९०॥
संस्नाप्य शान्तिहोमं च कुर्यात्तद्दोषशान्तये ।
अकस्माद्दीपनिर्वाणे पूजामध्ये मुनीश्वराः ॥३९१॥

पुनः प्रदीप्य शान्त्यर्थं हुत्वा नेत्रमनु जपत् ।
अनिर्वाणस्य दीपस्य नाशे तु मुनिपुङ्गवा ! ॥३९२॥
क्षीरेण स्नाप्य देवेशं शान्तिहोमं समाचरेत् ।
पुनरारोप्य तद्दीपं जपेन्मूलसहस्रकम् ॥३९३॥
पाकस्थानादाहृतेषु देवनीराजनार्थतः ।
दीपेष्वेकतमो दीपो यायादुपरतिं यदि ॥३९४॥
प्रमादाद्वातवेगाद्वै पुरस्ताद्विनिवेदनात् ।
श्रीभङ्गो जायते पश्चाद्यदि व्याध्यादिपीडनम् ॥३९५
तस्मात्प्रदीप्य सहसा मूलमष्टोत्तरं जपेत् ।
तथा नीराजने नष्टे प्राक्पश्चाद्वा समर्पणात् ॥३९६॥
पुनः प्रदीप्य सहसा जपेन्मन्त्रं सहस्रधा ।
अयोग्यजनसंस्पृष्टे तत्कुम्भे तं विहाय तु ॥३९७॥
कुम्भान्तरं समापाद्य तेन तत्तु समाचरेत् ।
पूजाकाले धूपपात्रे दीपपात्रे तु वा द्विजा ! ॥३९८॥
नीराजनार्थकुम्भे वा प्रमादात्पतिते सति ।
घण्टायाश्चार्घ्यपात्रादेश्छत्रदीना तु वा द्विजा ! ॥३९९॥
पतने प्रजपेन्मन्त्रमष्टोत्तरसहस्रकम् ।
धूपपात्रादिके भग्ने पुनः सन्धाय पूर्ववत् ॥४००॥
पञ्चगव्यैस्तु सम्प्रोक्ष्य पूजनादौ नियोजयेत् ।
कल्पेषु पूजाकालेषु लुप्ते कस्मिंश्चिदर्चने ॥४०१॥
तदनन्तरकाले तु देवं द्विगुणवस्तुभिः ।
पूजयेद्विस्त्रिकालेषु लुप्तेषु मुनिसत्तमा ! ॥४०२॥
त्रिचतुर्गुणितैर्द्रव्यैः पूजयेत्पुरुषोत्तमम् ।
एकाहमर्चनाहीने त्वधमाधममार्गतः ॥४०३॥
देवं सम्स्नाप्य विधिवच्छान्तिहोमं समाचरेत् ।

यजेत् द्विगुणितैर्द्रव्यैर्ब्राह्मणान् भोजयेत्तथा ॥४०४॥
द्विदिनादौ च पक्षान्ते पूजाहीने मुनीश्वरा ! ।
अधमोत्तममार्गेण स्नाप्य शान्तिं समाचरेत् ॥४०५॥
तान्द्विगुणितैर्द्रव्यैर्दिनसंख्यावशेन तु ।
देवमाराध्य विधिवद्ब्राह्मणान् भोजयेद्बहून् ॥४०६॥
एकमासेऽर्चनाहीने तूत्तमोत्तममार्गत ।
संस्नाप्य देवं विधिवत्प्रायश्चित्तादिकं चरेत् ॥४०७॥
संवत्सरत्रयादर्वाद्मासादूर्ध्वं द्विजोत्तमा ! ।
पूजालोपे तु देवस्य कुर्यात्सम्प्रोक्षणं तथा ॥४०८॥
तत्र द्विगुणितैर्द्रव्यैर्माससंख्यावशेन तु ।
देवमभ्यर्च्य विधिवत्सहस्रं भोजयेद् द्विजान् ॥४०९॥
संवत्सरत्रयादूर्ध्वं पूजालोपे तु मानुषे ।
पुनः प्रतिष्ठा कुर्वीत स्वयंव्यक्तादिकेषु तु ॥४१०॥
कुर्यात्सम्प्रोक्षणं चापि सहस्रकलशाप्लवम् ।
मनुष्यनिर्मिते स्थाने पूजालोपादिके द्विजा ! ॥४११॥
प्रायश्चित्तं तु कृत्वैव नित्यपूजादिकं चरेत् ।
स्वयंव्यक्तादिके स्थाने पूजालोपादिके सति ॥४१२॥
पूजायां वर्तमानायां प्रायश्चित्तं समाचरेत् ।
समित्परिधिदर्भाणां कूर्चानां हविषामपि ॥४१३॥
आज्यस्थाल्यादिपात्राणामपि स्थण्डिलकुण्डयोः ।
स्रुक्स्रुवस्य प्रणीताया अभावे लक्षणोज्झिते ॥४१४॥
शान्त्यर्थं जुहुयान्मन्त्री मास्वद्व्यापकपञ्चकैः ।
एतेषां भेदने छेदे वह्निदाहादिके सति ॥४१५॥
पुनरन्यं समापाद्य शान्तिहोमं समाचरेत् ।
अभावे काष्ठसमिधामाज्येन चरुणा हुनेत् ॥४१६॥

समिद्भिराज्याभावे तु तिलैर्वा होममाचरेत् ।
अलाभे हविषान्येषामाज्येन जुहुयात्सुधीः ॥४१७॥
सर्वथा होमकर्मार्थं तिलमाज्य न लोपयेत् ।
तिलाज्ययोरभावे तु हवनं स्यान्निरर्थकम् ॥४१८॥
शान्तिहोमं प्रकुर्वीत तद्दोषस्यापनुत्तये ।
वह्नौ कुण्डे स्थले चुल्यां संस्कृतेऽनुगतिं गते ॥४१९॥
पुनराधाय संस्कृत्य शान्तिहोमादिकं हुनेत् ।
अग्निप्रतिष्ठाकर्मादौ मोहादविधिवत्कृते ॥४२०॥
पुनर्विधिवदाधाय शान्तिहोमं समाचरेत् ।
वह्नौ स्पृष्टे तथाऽस्पृश्यैः केशास्थिनखैरपि ॥४२१॥
यथावन्मूलमन्त्रेण जुहुयात्सर्पिषा शतम् ।
उदक्यासूतिकाभिश्च सन्निकृष्टेऽयुतं हुनेत् ॥४२२॥
संस्पृष्टेऽन्यं समाधाय जुहुयाच्चायुतं जपेत् ।
असमिद्धे हुतेऽग्नौ तु पुनर्होमं समाचरेत् ॥४२३॥
नैमित्तिकेषु काम्येषु चोत्सवेषु विशेषतः ।
तदङ्गहुतभुग्याग कुण्डेऽन्यस्मिन् समाचरेत् ॥४२४॥
विपर्यासे कृते मोहाच्छान्तिहोमं समाचरेत् ।
हुतशेषद्रविदशेषे भुक्ते योग्यजनैर्विना ॥४२५॥
जपेन्मूलायुतं मन्त्री दाता किल्बिषशान्तये ।
एकद्वित्रिचतुःपञ्चषट्कालेषु यथाक्रमम् ॥४२६॥
सङ्कल्प्य यागं होमान्तं हवनं न कृतं यदि ।
द्विगुणं हवनं कुर्यात्पूर्णान्तं मन्त्रवित्तमः ॥४२७॥
एकं दिनं समारभ्य मासान्तं होमलोपने ।
अघमोषमर्षणं सम्प्राप्य पुरुषोत्तमम् ॥४२८॥
तद्द्विगुणैर्द्रव्यैर्होमकर्म समाचरेत् ।

मासोर्ध्वं वत्सरादर्वाक् होमलोपेऽधमोत्तमम् ॥४२९॥
स्नपनं शान्तिहोमं च सहस्राहुतिभिश्चरेत् ।
वर्षोर्ध्वं होमलोपे तु स्नपनं मध्यमोत्तमम् ॥४३०॥
शान्तिहोमं च गोदानं कुर्याद्ब्राह्मणभोजनम् ।
पतने बलिवस्तूनां तत्त्यक्त्वान्येन देशिकः ॥४३१॥
बलिं दत्वाथ तच्छान्त्यै शान्तिहोमं समाचरेत् ।
तथैव बलिवस्तूनामस्पृश्यस्पर्शने द्विजा ! ॥४३२॥
तथैव पात्रेऽभिमते केशलोष्टादिदूषिते ।
तत्त्यक्त्वान्येन निर्वर्त्य मूलमष्टोत्तरं जपेत् ॥४३३॥
बलिं दुष्टेन दद्याच्चेच्छान्तिहोमपुरस्सरम् ।
बलिं दत्वा विशेषेण परिवारमनु जपेत् ॥४३४॥
मुद्रामन्त्रक्रियाध्यानद्रव्याणां भोगरूपिणाम् ।
तदङ्गानम्बराणां च ताळनृत्तादिकस्य च ॥४३५॥
विशेषाद्बलिकाले तु हानिरुत्पद्यते यदि ।
जपेन्मूलसहस्रं तु मन्त्री ध्यानसमन्वितः ॥४३६॥
यानस्थे बलिबिम्बे तु व्यूढेऽयोग्यजने सति ।
कुशोदकेन सम्प्रोक्ष्य शान्तिहोमं समाचरेत् ॥४३७॥
अस्पृश्यैर्यदि सम्पृष्टा बलिबिम्बस्य वाहकाः ।
पञ्चगव्येन सम्प्रोक्ष्य शुचिनान्येन वाहयेत् ॥४३८॥
बलिकाले दीपनाशे पुनरारोप्य दीपकम् ।
कृत्वा चोत्सवशेषं तु शान्तिहोमं समाचरेत् ॥४३९॥
बलिबिम्बे निपतिते शिबिकादौ मुनीश्वराः ! ।
स्थापयित्वा यथापूर्वं बलिशेषं नयेत्ततः ॥४४०॥
तद्दोषशान्तये कुर्भेनबिम्बस्नापयेद्विभुम् ।
सबिम्बयानपतनेऽप्येवं शान्तिं समाचरेत् ॥४४१॥

नित्योत्सवार्थबिम्बे तु यानान्निपतिते भुवि ।
तदैवोद्धृत्य तद्बिम्बमक्षतं स्नाप्य मन्त्रवित् ॥४४२॥
अधमाधममार्गेण शान्त्यर्थं जुहुयादनु ।
तथैव च क्षतं बिम्बं समाधाय यथापुरम् ॥४४३॥
कृत्वा प्रातिष्ठिकं कर्म स्वस्थाने स्थापयेदनु ।
यावत्समाधिकालं तु तावद्बिम्बान्तरेण वा ॥४४४॥
कूर्चेन वाऽन्यबिम्बेन कुर्यान्नित्योत्सवं हरेः ।
बलिबिम्बस्य मूर्द्धस्थपुष्पादिपतने तु वा ॥४४५॥
किरीटपतनेचापि तद्दोषस्य प्रशान्तये ।
स्नपनं नवभिः कुम्भैश्शान्तिहोमं समाचरेत् ॥४४६॥
बलिकाले तु नृत्यन्त्याः पतने वारयोषितः ।
तद्दोषशान्तये कुर्याच्छान्तिहोमं द्विजोत्तमाः ! ॥४४७॥
बलिदानविहीने तु एककालार्चनादिके ।
बलिं द्विगुणितं दद्यात्तथा त्वेकदिने द्विजाः ! ॥४४८॥
बलिप्रदानहीने तु हुत्वा मूलशतं ततः ।
तत्तदावरणद्वारदेवानां स्वस्वसञ्ज्ञया ॥४४९॥
जुहुयात्तिलमिश्रेण घृतेनैव शतं शतम् ।
द्विदिनादौ च मासान्तं तदूर्ध्वं वत्सरान्तिमम् ॥४५०॥
वर्षादूर्ध्वं च रहिते बलिदानेऽधमाधमम् ।
तदुत्तमं च स्नपनं क्रमाद्वै मध्यमोत्तमम् ॥४५१॥
शान्तिहोमं च कुर्वीत द्रव्यैर्द्विगुणितैर्नलिम् ।
सूतकं वा मृताशौचं पूजाकाले श्रुतं यदि ॥४५२॥
आशौचमाचरेद्विप्राः ! पूजान्ते देशिकोत्तमः ।
देवस्य नित्यपूजादौ मोहात्सिद्धान्तसङ्करे ॥४५३॥
संहितासङ्करे वापि जाते तद्दोषशान्तये ।

संप्रोक्षणं पुरा कृत्वा सहस्रकलशाप्लवम् ॥४५४॥
महोत्सवं च कुर्वीत नान्यथा शान्तिरिष्यते ।
एकत्र दीक्षितस्तन्त्रे सिद्धान्ते वा मुनीश्वराः! ॥४५५॥
न कुर्याद्देशिकोऽन्यत्र पूजनादीनपि द्विजाः! ।
तन्त्रभेदे च सिद्धान्तभेदे वाप्युत्सवादिषु ॥४५६॥
आचार्यत्वं तथार्त्विज्यं न कार्यं मोहतः कृते ।
दोषाय कल्पते राजराष्ट्रग्रामक्षयात्मने ॥४५७॥

पञ्चरात्रोक्तमार्गेण पूज्यमाने प्रतिष्ठिते ।
वैखानसैः पूजिते तु प्रतिष्ठां पुनराचरेत् ॥४५८॥
तथैव कर्मबिम्बानां साङ्कर्यमपि नाचरेत् ।
कर्मणां स्नपनादीनां यत्कर्म विहितं द्विजाः! ॥४५९॥
यस्मिन्वै कर्मबिम्बे तु तत्रैव च समाचरेत् ।
तत्तत्कर्मार्थबिम्बे तु तत्र सन्निहिते सति ॥४६०॥

तत्तत्कर्मविशेषाणां व्यत्ययं न समाचरेत् ।
असान्निधाने तेषां तु राष्ट्रभङ्गादिदोषतः ॥४६१॥
तद्देशकालानुगुणं तत्र सन्निहितं भवेत् ।
यद्यत्कर्मार्थबिम्बं तु तत्र सर्वं समाचरेत् ॥४६२॥
स्नपनद्वितयस्यैव नित्यनैमित्तिकात्मकम् ।
नित्योत्सवविधानं न तथा नैमित्तिकोत्सवम् ॥४६३॥
तीर्थयात्राविधानं चेत्येवं कर्माणि पंच वै ।
शयनोत्थापनं कर्म यदा कूर्चे समाचरेत्॥४६४॥
यद्वा कौमार्थबिम्बे तु पूज्यमाने प्रतिष्ठिते ।
एवं कश्चिनमेकस्मिन् बिम्बे सन्निहिते सति ॥४६५॥
बिम्बद्वये सन्निहिते तत्तत्कर्मविभेदतः ।
कृत्वा तदन्यत्सर्वं यथायोग समाचरेत् ॥४६६॥

एवमभ्यूह्य कर्तव्यं तद्वद्भिम्बे प्रकाशिते ।
सर्वेषु कर्मबिम्बेषु तत्र सन्निहितेषु वै ॥४६७॥
तदा तेषां तु बिम्बानां व्यत्ययं न समाचरेत् ।
प्रमादाद्व्यत्यये जाते कुर्यात्स्नपनमुत्तमम् ॥४६८॥
अतः परं प्रवक्ष्यामि प्रायश्चित्तं तु चोत्सवे ।
पुरस्तात्सर्वकर्मार्थमर्पितेष्वङ्कुरेष्वनु ॥४६९॥
रक्तेषु श्यामवर्णेषु तथा तिर्यग्गतेषु च ।
वक्रेषु चाप्ररूढेषु दक्षिणाभिमुखेषु च ॥४७०॥
विधिहीनेषु चास्पृश्यस्पृष्टेष्वधिकृतैर्विना ।
पालिकादिषु भिन्नेषु नष्टेषु पतितेषु च ॥४७१॥
मूषिकाद्यैश्च दष्टेषु मूलमन्त्रायुतं जपेत् ।
पुनः कृत्वाङ्कुरारोपं शान्तिहोमं समाचरेत् ॥४७२॥
सङ्कल्पियुक्तपात्रेषु मृण्मयेषु पुनर्द्विजाः ।
बीजावापे कृते विप्राः ! महान् दोषः प्रजायते ॥४७३॥
तच्छान्त्यै शान्तिहोमं तु कृत्वा भूयोऽङ्कुरार्पणम् ।
समाचरेत्पालिकादौ वल्मीकादिसमुद्भवे ॥४७४॥
तान् त्यक्त्वान्येषु पात्रेषु बीजावापं समाचरेत् ।
शान्तिहोमं तथा कृत्वा भोजयेद्ब्राह्मणान् शतम् ॥४७५॥
कर्मार्थमङ्कुरं कृत्वा तत्कर्माकरणे द्विजाः ! ।
अङ्कुरानपि तान् त्यक्त्वा शान्तिहोमं समाचरेत् ॥४७६॥
अनर्प्ये त्वङ्कुरं मोहादारब्धे तु महोत्सवे ।
सद्यः कृत्वा तदन्येषुर्बीजावापं यथाविधि ॥४७७॥
शान्तिहोमं प्रकुर्वीत तद्दोषस्यापनुत्तये ।
देवतान्यत्यये जाते पालिकादौ मुनीश्वराः ! ॥४७८॥
अष्टोत्तरशतं जप्त्वा शान्तिहोमं समाचरेत् ।

तथैव पालिकादीनां स्थानव्यत्ययसम्भवे ॥४७९॥
अष्टोत्तरशतं जप्त्वा क्रमेण स्थापयेत्पुनः ।
पात्राणां पालिकादीनां विहीने लक्षणादिके ॥४८०॥
जपेदष्टाक्षरमन्त्रमष्टोत्तरसहस्रकम् ।
करस्थे देशिकादीनां देवदेवस्य वा द्विजाः ! ॥४८१॥
नष्टे कौतुकसूत्रे तु छिन्ने वा मुनिपुङ्गवाः ! ।
सूत्रान्तरं पुनर्बध्वा शान्तिहोमं समाचरेत् ॥४८२॥
रक्षाबन्धं विना कर्मप्रारम्भे मुनिसत्तमाः ! ।
सद्यो बध्वा प्रतिसरं शान्तिहोमं समाचरेत् ॥४८३॥
महोत्सवाद्युत्सवेषु प्रतिष्ठाप्रोक्षणादिके ।
कर्मणि स्नपनादौ वा बद्धप्रतिसरो गुरुः ॥४८४॥
ऋत्विजश्च तथाभूता मध्येप्याशौचसम्भवे ।
भवन्ति नैवाशुचयस्तत्तत्कर्मावसानकम् ॥४८५॥
शावं वा सूतकाशौचं कर्मानन्तरमाचरेत् ।
कर्ममध्ये स्नानमात्रं कार्यं शावस्य सम्भवे ॥४८६॥
कर्ममध्येपि वाशौचं भवेदात्मान्विते मृते ।
पिता माता ज्येष्ठपुत्रो भार्या चात्मान्विताः स्मृताः ॥४८७॥
तदा गुरोरभ्यनुज्ञां लब्ध्वान्यो देशिकोत्तमः ।
तद्दोषस्य प्रशान्त्यर्थमुत्तमोत्तममार्गतः ॥४८८॥
देवं सन्नाप्य शान्त्यर्थं हुत्वाहुतिसहस्रकम् ।
गोभूतिलादिकं दत्वा ब्राह्मणान् भोजयेद्बहून् ॥४८९॥
ततः समापयेत्कर्मशेषं भक्तसमन्वितः ।
एवं गुरौ व्याधिते वा मृते वान्यः समाचरेत् ॥४९०॥
कर्मशेषं द्विजश्रेष्ठाः प्रायश्चित्तपुरस्सरम् ।
प्रमाणरहिते वंशे पृष्ठे वालुध्वंसेपि च ॥४९१॥

वर्णभूषणनामाद्ये दण्डयष्टौ तु वैणवे ।
फेणके चावटे पीठे प्रपाया ध्वजरज्जुषु ॥४९२॥
आचरेच्छान्तिहोमं च अष्टोत्तरशतं जपम् ।
छिन्ने भिन्नेऽग्निना दग्धे नष्टे मूषकदर्शिते ॥४९३॥
विण्मूत्ररुधिरापेयरेतोनिष्ठीवनादिभिः ।
दूषिते ध्वजमुत्सृज्य प्राग्वदन्यं समाचरेत् ॥४९४॥
प्रतिष्ठाप्याथ दण्डाग्रमानायित्वाधमेन तु ।
सन्नाप्य दोषशान्त्यर्थं जुहुयात्सर्पिषा शतम् ॥४९५॥
स्तम्भाग्रे ध्वजवस्त्रस्य रक्षा कार्याथ दीक्षितैः ।
आरोहणे न दोषोऽत्र रक्षाहेतोर्द्विजातिभिः ॥४९६॥
ध्वजस्य रज्जुविच्छेदे किंचिच्छिन्ने तु वा ध्वजे ।
यष्टिघण्टाविहीने वा शान्तिहोमं समाचरेत् ॥४९७॥
सुजीर्णान् फेणदण्डादीन् परित्यज्य ततोपरान् ।
संस्कृत्य योजयेत्तत्र बध्वा तु ध्वजमञ्जसा ॥४९८॥
मध्यमस्नपनान्ते तु शान्तिहोमं समाचरेत् ।
वर्षवातातपस्पर्शैर्लुप्तवर्णे खगध्वजे ॥४९९॥
न किंचिदप्यनिष्टं स्यात् स्तम्भाग्रे यावदुत्सवम् ।
बद्धध्वजपटे स्तम्भे वातवेगादिहेतुभिः ॥५००॥
मूलदेशे तु विच्छिन्ने सध्वजे पतिते सति ।
अहृत्वा ध्वजविश्लेषं स्थापयेच्छेषमञ्जसा ॥५०१॥
स्नपनं चोत्तमं कुर्यात् चतुः स्थानार्चनादिकम् ।
गोभूहेमतिलादीनां दानं शक्त्या समाचरेत् ॥५०२॥
उत्सवध्वजभङ्गेन राज्याद्भ्रष्टो भवेन्नृपः ।
तस्मात्तत्परिहारार्थं त्वरया शान्तिमाचरेत् ॥५०३॥
हेतुभिर्वातवेगाद्यैर्ध्वजे निपतिते भुवि ।

क्षिप्रमुद्धृत्य तद्बध्वा स्नपनं चाधमेन तु ॥५०४॥
शान्त्यर्थं जुहुयादाज्यं तिलेन शतसंख्यया।
ध्वजे निपतिते छिन्ने कुर्यात्स्नपनमुत्तमम् ॥५०५॥
पुनरन्यं समुत्पाद्य बध्नीयात्संस्कृतं तथा।
अन्यथा यदि दोषः स्याद्राज्ञो राष्ट्रस्य मन्त्रिणः ॥५०६॥
ग्रामप्रदक्षिणे काले ध्वजे वातादिना भुवि।
पतिते तत्पुनर्याने स्थाप्य नीत्वालयं ततः ॥५०७॥
स्नाप्याधमाधमेनाथ शान्तिहोमं समाचरेत्।
सक्तनियुक्तस्तम्भादौ पुनश्चापि नियोजिते ॥५०८॥
अधमोत्तममार्गेण स्नपनं शान्तिमाचरेत्।
विपरीतध्वजपटं बन्धयेद्यदि मोहतः ॥५०९॥
तं मोचयित्वा बध्वान्यमधमाधममार्गतः।
स्नपनं शान्तिहोमं च कुर्याद्दोषापनुत्तये ॥५१०॥
पक्षीशाधिष्ठिते कुम्भे नष्टे वा पतिते भुवि।
स्पृष्टेऽस्पृश्यैस्तथा केशलोष्टास्थिशकृदादिभिः ॥५११॥
कुम्भेऽन्यस्मिन् समारोप्य तां शक्तिं कुम्भमध्यगाम्।
हुत्वा मूलायुतं जप्त्वा शेषं कर्म समाचरेत् ॥५१२॥
ध्वजारोहणकाले तु अतिक्रान्ते द्विजोत्तमाः!।
शान्तिहोमं तु वा कुर्यात्सहस्रं जपमेव वा ॥५१३॥
ध्वजस्तम्भेऽग्निना किञ्चिद्दग्धे सन्धाय पूर्ववत्।
शान्तिहोमं प्रकुर्वीत तद्दोषस्यापनुत्तये ॥५१४॥
स्तम्भस्य तु महद्दाहे छेदे भेदे तु वा द्विजाः!।
स्तम्भान्तरं प्रतिष्ठाप्य देवस्योत्तममार्गतः ॥५१५॥
स्नपनं शान्तिहोमं च कुर्याद्देशिकसत्तमः।
ध्वजस्तम्भे तु चण्डालोदक्यादिस्पर्शदूषिते ॥५१६॥

तं त्यक्त्वान्यं प्रतिष्ठाप्य प्रागवच्छान्तिं समाचरेत् ।
सूतकप्रेतकस्पृष्टे स्पृष्टे वा प्रतिलोमजै ॥५१७॥
पञ्चगव्यैस्तु संप्रोक्ष्य शान्तिहोमं समाचरेत् ।
ध्वजस्तम्भे खगेशस्य पूजालोपे मुनीश्वरा. ! ॥५१८॥
पूजालोपोदितं प्रागवत्प्रायश्चित्त समाचरेत् ।
देवतावाहनार्थं तु भेरीताडनकर्मणि ॥५१९॥
वाद्यजालेषु सर्वेषु मृदङ्गपणवादिषु ।
न स्थापितेषु स्वस्थाने तत्तत्पूजाविलोपने ॥५२०॥
पुण्याहपाठरहिते जप्त्वा मनुसहस्रकम् ।
तत्तत्कुर्याद्यथाशास्त्रं भेरीताडनलोपने ॥५२१॥
अधमाधममार्गेण देवं स्थाप्य यथाविधि ।
पुनस्तत्ताडनं कुर्याच्छान्तिहोमपुरस्सरम् ॥५२२॥
भेरीताडनकाले तु गोणच्छेदे द्विजोत्तमा ! ।
चर्मविच्छेदने चैव शान्तिहोमपुरस्सरम् ॥५२३॥
जप्त्वा गारुत्मतं मन्त्रं पुनरन्यं समाचरेत् ।
ताडयेद्विधिवद्भेरीं तथाऽऽवाहनगाथया ॥५२४॥
सगणेषु च भूतेषु सगृहेषूत्कटादिषु ।
स्वासु दिक्षु यथान्यायमनाहूतेषु सत्सु च ॥५२५॥
द्वारावरणरथ्यासु ग्रामवास्तुष्वनुक्रमात् ।
बलिप्रदानहीने तु तथा ताळम्बरादिषु ॥५२६॥
गेयनृत्तेषु हीनेषु शान्तिहोमपुरस्सरम् ।
प्रत्येकं देवनामन्त्रमष्टधावर्तयेद्बुध ॥५२७॥
पुनरापादयेत्सर्वं देवतावाहनादिकम् ।
आरम्भस्नपने हीने शान्तिहोमपुरस्सरम् ॥५२८॥
देवं संस्नापयेत्तुभ्रे महाहविषि सत्तमा ! ।

शान्तिहोमपुरस्कं तु द्विगुणं हविराचरेत् ॥५२९॥
द्वाःस्थानां यागगेहस्य पूजालोपे प्रमादतः ।
तत्तन्मन्त्रानष्टवारं जप्त्वा भूयः समर्चयेत् ॥५३०॥
चतुःस्थानार्चनाहीने त्वेककालं द्विजोत्तमाः ! ।
शान्तिहोमपुरस्कं तु यजेद्द्विगुणवस्तुभिः ॥५३१॥
एकाहमर्चनाहीने चतुःस्थानस्थितस्य तु ।
अधमाधममार्गेण देवं स्नाप्य यथाविधि ॥५३२॥
शान्तिहोमपुरस्कन्तु यजेद्द्विगुणवस्तुभिः ।
भेदे च्छेदे तु वा जाते महाकुम्भस्य सत्तमाः ! ॥५३३॥
तथा चास्पृश्यसंस्पर्शे तच्छक्तिं मण्डलावनौ ।
समावाह्य तु तत्कुम्भं त्यक्त्वान्यस्मिन् सलक्षणे ॥५३४॥
कुम्भे प्राग्वत्समावाह्य यजेच्छान्तिं समाचरेत् ।
मण्डलेप्येवमादीनां दोषाणां सम्भवे द्विजाः! ॥५३५॥
कुम्भे देवं समावाह्य प्राग्वत्सर्वं समाचरेत् ।
वल्मीकशिथिलीदुष्टे मण्डले तन्स्थदेवताः ॥५३६॥
कुम्भे विसृज्य तद्वेदी खात्वापूर्य च सैकतैः ।
पुनर्मण्डलमालिख्य प्राग्वत्तत्र समर्चयेत् ॥५३७॥
तद्दोषशान्तये देवमधमाधममार्गतः ।
संस्नाप्य शान्तिहोमं च कुर्याद्देशिकसत्तमः ॥५३८॥
ध्वजतोरणकुम्भानां कूर्चपल्लववाससाम् ।
प्रतिमाद्यन्यपीठादेर्लोपे शान्तिं समाचरेत् ॥५३९॥
अष्टोत्तरशतं जप्त्वा यथाशास्त्रं प्रकल्पयेत् ।
ध्वजतोरणपूर्वाणां पीठानामङ्गरूपिणाम् ॥५४०॥
प्रपामण्टपपात्राणामन्येषां वा मुनीश्वराः ! ।
अग्निदाहे समुत्पन्ने पुनरुत्पाद्य तानपि ॥५४१॥

शान्तिहोमं प्रकुर्वीत मूलमन्त्रजपं तथा ।
प्रमादादुत्सवाग्नेस्तु नाशे जाते मुनीश्वराः ॥५४२॥
पुनरग्निं प्रतिष्ठाप्य देवमावाह्य पूर्ववत् ।
शान्तिहोमं प्रकुर्वीत शतब्राह्मणभोजनम् ॥५४३॥
यागशालाकुम्भदीपनिर्वाणे मुनिपुङ्गवाः ! ।
शान्तिहोमपुरस्कन्तु दीपमुद्दीप्य पूर्ववत् ॥५४४॥
जपेदष्टोत्तरशतं नेत्रमन्त्रं द्विजोत्तमाः ! ।
चण्डालसूतिकोदक्यागर्दभश्वानसूकरैः ॥५४५॥
ऊष्ट्रादिभिः सूतकिभिस्तथैव प्रतिलोमजैः ।
प्रविष्टे यागगेहान्तः कुम्भमण्डलवह्निषु ॥५४६॥
स्थितान् देवान् स्वहृदये समावाह्य यथाविधि ।
कुम्भमण्डलवह्न्यादीन् त्यक्त्वा लोहमयानि चेत् ॥५४७॥
पात्राणि तानि संशोध्य मार्जनोल्लेखनादिभिः ।
यागगेहं शोधयित्वा सेचयेत्पञ्चगव्यकैः ॥५४८॥
पुनः कुम्भादिकान् स्थाप्य हृदयस्थास्तु देवताः ।
यथापूर्वं समावाह्य शान्तिहोमं समाचरेत् ॥५४९॥
मूलमन्त्रायुतं जप्त्वा भोजयेद्ब्राह्मणान् शतम् ।
प्रतिरात्रं बलिद्रव्यव्यत्यासे सर्पिषा शतम् ॥५५०॥
हुत्वाग्नौ मूलमन्त्रेण जपेदष्टोत्तरं शतम् ।
काले तस्मिन् बलिं दद्यात्तत्काले प्राप्तमप्यमाः ॥५५१॥
व्यत्यासे बलिदेवानां जपो होमश्च तादृशः ।
अभ्यस्तन्त्रान्तरे ग्रामनरदिनेऽकृते द्विजाः ! ॥५५२॥
शान्तिहोमं प्रकुर्वीत तद्दोषस्य प्रशान्तये ।
सायं प्रातस्तु कर्तव्यमुत्सवेषु बलिद्वयम् ॥५५३॥
तन्न्यूनाधिक्यदोषे तु अघमोचनमार्गतः ।

संस्थाप्य देवं विधिवत् शान्तिहोमं समाचरेत् ॥५५४॥
बिम्बाधिष्ठितयानस्य पतने भुवि सत्तमाः ! ।
उद्वृत्स्योत्सवशेषं तु कृत्वा नवकलशैर्विभुम् ॥५५५॥
संस्थाप्य शान्तिहोमं च कुर्याद्देशिकसत्तमः ।
अधिष्ठितेषु बिम्बेन यानेषु पतनादिना ॥५५६॥
भिन्नेष्वपि च वाहेषु प्रमादाद्यत्र कुत्र चित् ।
यानान्तरे समारोप्य वाहने वाथ कौतुकम् ॥५५७॥
शान्तिहोमं पुरा कृत्वा जपेन्मूलसहस्रकम् ।
गोभूहेमादिकं दद्याद्वैष्णवेभ्यो गुरोरपि ॥५५८॥
यानाद्वा वाहनाद्वापि बिम्बे तु पतिते सति ।
उत्तमं स्नपनं कृत्वा शान्तिहोमं समाचरेत् ॥५५९॥
यानमारोप्य तद्बिम्बं पुनरुत्सवमाचरेत् ।
तथैव च क्षतं बिम्बं समाधाय यथापुरम् ॥५६०॥
कृत्वा सम्प्रोक्षणं पश्चादुत्सवं शेषमाचरेत् ।
समाधौ दीर्घकालीने कुर्याच्छोमार्थकौतुके ॥५६१॥
शेषकर्म महार्चायां निर्वृत्ते सन्धिकर्मणि ।
पूर्ववत्तां प्रतिष्ठाप्य यथावच्छान्तिमाचरेत् ॥५६२॥
बिम्बेनाधिष्ठिते याने व्यूढेऽस्पृश्यजनैस्तदा ।
यानादीन् क्षालयेद्देवमधमाधममार्गतः ॥५६३॥
स्नापयेत्केवलं याने व्यूढे तैः शुद्धवारिणा ।
सङ्क्षाल्य यानं विधिवत्प्रोक्षयेत्पञ्चगव्यकैः ॥५६४॥
देवस्योत्सवकाले तु जातायां दीपनिर्वृतौ ।
पतने वापि दीपस्य मूलमन्त्रेण मन्त्रवित् ॥५६५॥
अष्टोत्तरसहस्रं तु हुत्वा तत्संख्यया जपेत् ।
छत्रचामरपूर्वाणां पतने तु शतं जपेत् ॥५६६॥

वह्निदाहे समुत्पन्ने पुनरुत्पाद्य तानपि ।
सजपं शान्तिहोमं तु कुर्यादष्टोत्तरं शतम् ॥५६७॥
देवस्योत्सवकाले तु ग्रामे मरणसम्भवे ।
पश्चाद्ग्रामं तु सम्प्रोक्ष्य अधमाधममार्गतः ॥५६८॥
देवं संस्नापयेत्पश्चाच्छान्तिहोमं समाचरेत् ।
देवस्योत्सवकाले तु ग्रामादौ वह्निदाहतः ॥५६९॥
दूषिते पञ्चगव्यैस्तु प्रोक्ष्य ग्रामादिकं बुधः ।
शान्तिहोमं च कृत्वाथ पुनरुत्सवमाचरेत् ॥५७०॥
ग्रामादावग्निना दग्धे वात्यासारादिदूषिते ।
शान्तिहोमं पुरा कृत्वा पश्चादुत्सवमाचरेत् ॥५७१॥
अन्यथा चोत्सवे कलसे त्वधमोत्तममार्गतः ।
देवं संस्नाप्य विधिवच्छान्तिहोमं समाचरेत् ॥५७२॥
शून्येषु ग्रामनगरपत्तनादिषु चोत्सवम् ।
बलिदानं न कुर्वीत कृते तत्रापि निष्फलम् ॥५७३॥
धामन्येवोत्सवं कुर्याद्बलिदानं च देशिकः ।
अन्यथा करणे देवमुत्तमोत्तममार्गतः ॥५७४॥
संस्नाप्य शान्तिहोमं च कुर्यात्तद्दोषशान्तये ।
समाहिते तु ग्रामादौ ग्रामशान्तिपुरस्सरम् ॥५७५॥
पुनरप्युत्सवं कुर्याद्ब्राह्मणानामनुज्ञया ।
रिपुचोराग्निवृष्ट्यादिभयात्कर्म्मिश्चिदुत्सवे ॥५७६॥
विघ्निते मुनिशार्दूलाः! केवलं बलिमाचरेत् ।
अतिक्रान्तोत्सवं कुर्यादन्येद्युः शान्तिपूर्वकम् ॥५७७॥
विघ्निते बलिदानेपि ह्यन्येद्युरधमोत्तमम् ।
स्नपनं शान्तिहोमं च कृत्वातिक्रान्तमुत्सवम् ॥५७८॥
बलिदानं च कुर्वीत द्विदिनं त्रिदिनं तु वा ।

चतुष्पञ्चदिनं वापि उत्सवे विहिते सति ॥५७९॥
तत्तद्दोषानुरूपेण प्रायश्चित्तं विधाय च ।
अतिक्रान्तोत्सवान् कुर्याद्बलिदानानि च क्रमात् ॥५८०॥
देवस्योत्सवकाले तु महावातैस्तथाऽऽतपैः ।
पांसुभिर्वर्षनीहारैः स्पृष्टे बिम्बेऽधमोत्तमम् ॥५८१॥
स्नपनं शान्तिहोमं च कुर्यात्तद्दोषशान्तये ।
बिम्बे चोरादिभिर्नष्टे वर्तमाने महोत्सवे ॥५८२॥
बिम्बान्तरं समापाद्य प्रतिष्ठाप्य यथापुरम् ।
महाभिषेकं हवनं जपं चैव यथाविधि ॥५८३॥
कुर्यादुत्सवशेषं तु कर्मार्चादिषु नाचरेत् ।
रथस्य यात्राकाले तु चक्रच्छेदेऽक्षभेदने ॥५८४॥
रज्जुच्छेदेपि वा ह्यन्यं संयोज्य च यथापुरम् ।
यात्रान्ते शान्तिहोमं तु कुर्यात्तद्दोषशान्तये ॥५८५॥
शिखाकुम्भस्य पतने सारथेः पतने तु वा ।
पुनर्यथापुरं स्थाप्य कृत्वा पुण्याहवाचनम् ॥५८६॥
रथं सम्प्रोक्ष्य यात्रान्ते शान्तिहोमं समाचरेत् ।
रथोपरि त्वयोग्यानामारोहे पंचगव्यकैः ॥५८७॥
रथं सम्प्रोक्ष्य यात्रान्ते स्वयमाधममार्गतः ।
स्नापयेद्देवदेवेशं रथे वै किंचिदग्निना ॥५८८॥
दग्धे पुनर्नवीकृत्य सेचयेत्पंचगव्यकैः ।
यात्रान्ते स्नपनं कुर्यादघमोघमसंज्ञकम् ॥५८९॥
रथस्य तु महद्दाहे रथादेव खगोपरि ।
समारोप्यालयं नीत्वा उत्तमोत्तममार्गतः ॥५९०॥
स्नपनं शान्तिहोमं च कुर्याद्ब्राह्मणभोजनम् ।
रथाद्बिम्बस्य पतने रथोपरि खगे तु वा ॥५९१॥

पुनर्देवं समारोप्य नीत्वा वै मन्दिरं ततः ।
उत्तमोत्तममार्गेण स्नपनं हवनं तथा ॥५९२॥
मूलमन्त्रायुतजपं कृत्वा गोभूतिलादिभिः ।
दत्वा तद्दोषशान्त्यर्थं सहस्रं भोजयेद्द्विजान् ॥५९३॥
संविम्बस्य रथस्यैव पतने प्राग्वदाचरेत् ।
प्रायश्चित्तं द्विजश्रेष्ठा ! रथभङ्गे तु तं पुनः ॥५९४॥
सन्धायोत्सवशेषं तु कृत्वा शान्त्यै हुनेद्गुरुः ।
असन्धेये रथे देवमारोप्य च खगोपरि॥५९५॥
नीत्वालयं तत्र देवमधमोत्तममार्गतः ।
सस्नाप्य शान्तिहोमादि कुर्यात्तद्दोषशान्तये ॥५९६॥
रथचक्रादिघातैस्तु मनुष्यमरणे सति ।
शवं बहिर्विनिष्कास्य तद्देशखननादिकाम् ॥५९७॥
पञ्चशुद्धिं क्रमात्कृत्वा यात्रान्ते त्वधमोत्तमम् ।
स्नपनं शान्तिहोमं च कुर्याद्ब्राह्मणभोजनम् ॥५९८॥
चक्रघातादिना तिर्यङ्मरणे प्राग्वदाचरेत् ।
भूमिशुध्यादिकं सर्वं स्नपनं त्वधमाधमम् ॥५९९॥
यात्राकाले तथान्योन्यविरोधादायुधादिना ।
रथान्तिके जनमृतौ प्राग्वन्निष्कृतिरीरिता ॥६००॥
तद्रक्ताद्यै रथे स्पृष्टे रथं संक्षाल्य वारिभिः ।
पञ्चगव्येन संप्रोक्ष्य यात्रान्ते त्वधमाधमम् ॥६०१॥
स्नपनं शान्तिहोमं च कुर्याद्देशिकसत्तमः ।
रथोत्सवस्य काले तु तद्ग्रामे यत्र कुत्र वा ॥६०२॥
मरणे ब्राह्मणादीनां तच्छवं ग्रामतो बहिः ।
निष्कास्य ग्रामवीथीस्तु मार्जनोल्लेखनादिभिः ॥६०३॥
संशोध्य पञ्चगव्येन प्रोक्ष्य यात्रां समाचरेत् ।
ततोऽधमाधमं स्नानं शान्तिहोमं समाचरेत् ॥६०४॥

एकद्वित्रिदिनान्ते तु रथे स्वस्थानसंस्थिते ।
अधमोत्तममार्गेण स्नपनं हवनं तथा ॥६०५॥
कृत्वा ततस्त्वतिक्रान्तमुत्सवं बलिमाचरेत् ।
तथा तीर्थदिने वापि ग्रामविष्टे रथे स्थलम् ॥६०६॥
अवरोप्य रथाद्देवं समारोप्य खगेश्वरे ।
ग्रामप्रदक्षिणं नीत्वा उत्तमोत्तममार्गतः ॥६०७॥
स्नपनं शान्तिहोमं च कृत्वातिक्रान्तमुत्सवम् ।
बलिदानं च कुर्वीत ततस्तीर्थादिकं चरेत् ॥६०८॥
एकद्वित्रिदिनान्तं तु रथारोहे तु विघ्निते ।
अधमोत्तममार्गेण स्नपनं हवनं तथा ॥६०९॥
द्विजानां भोजनं कृत्वा सद्यः कुर्याद्रथोत्सवम् ।
एकद्वित्रिचतुर्वर्षे विघ्निते तु रथोत्सवे ॥६१०॥
उत्तमस्नपनं होमं सहस्रद्विजभोजनम् ।
गोभूदानादिकं कृत्वा रथप्रोक्षणमाचरेत् ॥६११॥
रथस्था देवताः पूज्य खगेशमनुना ततः ।
अष्टोत्तरशतं हुत्वा तिलैराज्यैश्च तण्डुलैः ॥६१२॥
रथस्थदेवतामन्त्रैः पृथगष्टाहुतीर्हुनेत् ।
एवं कृत्वाथ देवस्य रथयात्रां समाचरेत् ॥६१३॥
महोत्सवाङ्गभूते तु वसन्तोत्सवकर्मणि ।
डोलोत्सवे च मृगयाद्युत्सवे च मुनीश्वराः ! ॥६१४॥
युद्धारम्भे च देवीभ्यां तथा चूर्णाभिषेचने ।
लुप्ते कुर्यात् शान्तिहोमं तद्दोषोपशान्तये ॥६१५॥
मुहूर्तातिक्रमेष्वेवमुत्सवे सर्वकर्मणाम् ।
शान्तिहोमं प्रकुर्वीत अष्टोत्तरजपं तथा ॥६१६॥
दिवारात्र्युत्सवं कुर्यादासूर्यास्तमयोदयात् ।

पुनरप्युत्सवं कुर्यात्सर्वदोषप्रशान्तये ॥६४२॥
तस्मिन् मासेऽप्यतिक्रान्ते मासि स्यात्तदनन्तरे ।
एवं संवत्सरान्तं स्यादतिक्रान्तेऽपि वत्सरे ॥६४३॥
सहस्रकलशस्नानं शान्तिहोमोऽयुतं जपः ।
सहस्रब्राह्मणानां च भोजनं कारयेद्द्विजाः ! ॥६४४॥
तेनैव शान्तिर्भवति न गतोत्सवमाचरेत् ।
नवाहोत्सवपूर्वेषु पूर्वं यावद्दिनोत्सवम् ॥६४५॥
सङ्कल्पितं तथैव स्यात्प्रतिसंवत्सरं द्विजाः ! ।
तावन्न्यूनाधिकदिनं नोत्सवं परिकल्पयेत् ॥६४६॥
अमत्या यदि कुर्वीत पुनरुत्सवमाचरेत् ।
वैशेषिकेषु मासेषु वर्तमाने महोत्सवे ॥६४७॥
द्वादश्यादिषु तत्सर्वं यथान्यायं समाचरेत् ।
न लोपयेत्प्रयत्नेन मासं वैशेषिकं सुधीः ॥६४८॥
जपेदष्टायुतं मन्त्री त्वकृतेषु च शान्तये ।
एवमादिषु चान्येषु दोषेषु मुनिसत्तमाः ! ॥६४९॥
उत्सवान्तौ यथाशास्त्रं शान्तिहोमं समाचरेत् ।
पर्वोत्सवेषु लुप्तेषु स्नपनं त्वधमाधमम् ॥६५०॥
हविर्निवेदनं चापि विशेषेण समाचरेत् ।
श्रवणाद्युत्सवे लुप्ते स्नपनं त्वधमोत्तमम् ॥६५१॥
लुप्ते तु कृत्तिकादीपे तदनन्तरमासि वा ।
कुर्वीत वह्निनक्षत्रे स्नपनं त्वधमोत्तमम् ॥६५२॥
दीपोत्सवं प्रकुर्वीत शान्तिहोमपुरस्सरम् ।
अन्येष्वप्युत्सवेष्वेवं लुप्तेषु मुनिपुङ्गवाः ! ॥६५३॥
तदनन्तरमासे वा तत्तदुत्सववासरे ।
आचरेदुत्सवं प्रायश्चित्तहोमपुरस्सरम् ॥६५४॥

प्रायश्चित्तमथो वक्ष्ये पवित्रारोपणे द्विजा! ।
अप्रमाणे पवित्रे तु अस्त्रमन्त्रायुतं जपेत् ॥६५५॥
अतीते उक्तकाले तु चातुर्मास्यस्य मध्यतः ।
मध्यमं स्नपनं कृत्वा काले ऽन्यस्मिंस्तदाचरेत् ॥६५६॥
पवित्रे केशपाषाणचर्माङ्गारनखादिभिः ।
दूषिते वाग्निना दग्धे छिन्ने दष्टेऽतिभक्षिते ॥६५७॥
मूषिकाद्यैश्च काकाद्यैस्स्पृष्टे त्यक्त्वा तु तत्पुनः ।
सूत्रैस्तथाविधं कृत्वा विधिवच्चाधिवासयेत् ॥६५८॥
एवं दुष्टपवित्राणां मोहादारोपणे कृते ।
तत्परित्यज्य देवेशमथ मोत्तममार्गतः ॥६५९॥
संस्नाप्य हुत्वा शान्त्यर्थं दद्याच्छुद्धपवित्रकम् ।
अक्रमेण तु देवस्य पवित्रारोपणे कृते ॥६६०॥
शान्तिहोमं तदा कृत्वा सहस्रं जपमाचरेत् ।
मुहूर्ते समतिक्रान्ते शुद्धे यजनविस्तरात् ॥६६१॥
तदन्यस्मिन् विभोर्दद्यात्पवित्रं शान्तिपूर्वकम् ।
पावित्रिकी तीर्थयात्रा न कृता चेन्मुनीश्वराः! ॥६६२॥
उत्तमं स्नपनं कृत्वा पुनरुत्सवमाचरेत् ।
पवित्रे देवदेवस्य अयोग्यानां नियोजिते ॥६६३॥
शान्तिहोमं तदा कृत्वा सहस्रं जपमाचरेत् ।
चातुर्मास्ये तु देवस्य कुर्वीत शयनोत्सवम् ॥६६४॥
तद्व्यत्यये विलोपे च चतुः स्नानार्चनादिकम् ।
जप्त्वा मूलायुतं मन्त्री शान्त्यर्थं जुहुयात्तथा ॥६६५॥
कलशस्थापनार्थं चेन्न कुर्यादङ्कुरार्पणम् ।
तथा प्रतिसरं बन्धं मूलमन्त्रायुतं जपेत् ॥६६६॥
पुरस्तादङ्कुरानर्प्य बध्वा बिम्बे तु कौतुकम् ।

अमत्वा वा समत्वा वा स्नपनं नाचरेद्यदि ॥६६७॥
शान्तिहोमं पुरा कृत्वा जपेदष्टाक्षरायुतम् ।
कौतुकांकुरपूर्वं तु पुनरेवाभिषेचयेत् ॥६६८॥
अकृत्वांकुरयागं तु तथा कौतुकबन्धनम् ।
स्नापितो यदि देवेश स्नपनं निष्फलं भवेत् ॥६६९॥
विधिवच्चांकुरावापं कृत्वा कौतुकबन्धनम् ।
स्नापयेद्विधिवन्मन्त्री शान्तिहोमपुरस्सरम् ॥६७०॥
सङ्कल्पिते तु स्नपने त्वकृते द्विगुणं चरेत् ।
नासादितैर्द्रव्यहीनैः स्नापितेऽप्येवमाचरेत् ॥६७१॥
स्थापितेष्वथ कुम्भेषु हीनेषु स्थाप्य पूर्ववत् ।
जपेत्कलशदैवत्यं मन्त्रमष्टोत्तरं शतम् ॥६७२॥
समुद्धृतेषु कुम्भेषु रिक्तेषु सुषिरादिना ।
प्राग्वदन्यं प्रतिष्ठाप्य जपेदष्टोत्तरं शतम् ॥६७३॥
मार्जालमूषिकाद्यैस्तु स्पृष्टे वा लङ्घिते घटे ।
केशास्थिलोष्टसम्पृक्ते भेदच्छेदादिदूषिते ॥६७४॥
पिपीलिकादेर्गव्यादौ पतने सूत्रवस्त्रयोः ।
अग्निदाहे तथा कुम्भे काळमण्डलदूषिते ॥६७५॥
तं तं कुम्भं परित्यज्य स्थाप्य कुम्भान्तरं पुनः ।
सम्पूज्य कुम्भदैवत्यं मन्त्रमष्टोत्तरं जपेत् ॥६७६॥
स्थापिते स्नानकलशे श्वानकुक्कुटवायसैः ।
अस्पृश्यैश्चापि सम्पृष्टे उदक्यासूतिकादिभिः ॥६७७॥
चण्डालैर्वा मलिदृष्टे स्पृष्टे सूतकिभिर्नरैः ।
सर्वान् कुम्भान् परित्यज्य शुद्धान् संस्थाप्य पूर्ववत् ॥६७८॥
पुण्याहपूर्वं चेष्ट्वा तत्त्वा गृहसम्भवम् ।
मन्त्रं कलशदैवत्यमष्टवारं जपेत्पृथक् ॥६७९॥

दुष्टैस्संस्नापिते देवे पुनरप्यभिषेचयेत्।
मार्दिपात्रोपद्रसम्भूतदधिक्षीरघृतादिभिः ॥६८०॥
मासातीतघृतैर्वापि पयोभिर्दधिसंयुतैः।
क्षीरयुक्तैश्च दधिभिर्गुडमिश्रैश्च माक्षिके ॥६८१॥
अन्यैश्च सङ्करद्रव्यैस्तथा पर्युषितोदकैः।
अगालितैश्च सलिलैस्तथा वै पल्वलोदकैः ॥६८२॥
संस्नापिते तु देवेशे पुनरप्यभिषेचयेत्।
शान्तिहोमं च कुर्वीत तत्तद्दोषप्रशान्तये ॥६८३॥
अधिवासितकुम्भस्थतोयाना पूर्वमेव तु।
न पर्युषितदोषोऽस्ति अधिवासैस्तथार्चनैः ॥६८४॥
अनर्चने च कुम्भानामक्रमेण समर्चने।
अक्रमेण समुद्धारे स्थापने द्रव्ययोजने ॥६८५॥
द्रव्ये न्यूनेऽधिकेवापि शरावे कलशे तथा।
कूर्चे वस्त्रे तथा कोष्ठे पीठादौ तोरणादिके ॥६८६॥
प्रमाणरहिते धान्यपीठाभावे मुनीश्वराः!।
सूत्रवस्त्राद्यभावे च शतवारं जपेन्मनुम् ॥६८७॥
गेयमङ्गळवादित्रस्तोत्रनृत्तादिभिर्विना।
वीणावेणुनिनादैश्च तथा पुण्याहवाचनैः ॥६८८॥
विनाभिषेचने मूलमन्त्रोत्तरशतं जपेत्।
मोक्षार्थी स्नापयेद्देवं सर्वकालं यथाविधि ॥६८९॥
रिपूणां निग्रहार्थी तु दिवा कुर्यात्तु सर्वदा।
स्वर्गकामस्तु पूर्वाह्णे धर्मार्थी दिनमध्यमे ॥६९०॥
दिनान्ते सर्वभोगार्थी प्रायश्चित्तेषु सर्वदा।
चन्द्रसूर्योपरागे च तत्काले स्नापयेत्प्रभुम् ॥६९१॥
सङ्क्रान्तिषु च सूर्यस्य प्रागपश्चात्तथैव च।

सन्क्रान्तिकाला विज्ञेया नाड्य षोडश षोडश॥६९२॥
तदानीं स्नापयेद्देवमतिक्रान्ते हुनेन्मनुम् ।
सहस्रकृत्वस्तदनु तत्समञ्जसमाचरेत् ॥६९३॥
बद्धप्रतिसरे बिम्बे स्नपनार्थं तु मन्त्रिणा ।
सम्प्राप्ते स्नपनेऽन्यस्मिन् प्रायश्चित्तनिमित्तत ॥६९४॥
तदर्थं कौतुकं बध्वा स्नानकर्म समाप्य च ।
पूर्वारब्धं प्रकुर्वीत प्रायश्चित्तादनन्तरम् ॥६९५॥
अन्यत्र क्रमश कुर्यात्पूर्वारब्धं समाप्य च ।
अन्यथा चेदिदं कर्म निष्फलं भवति द्विजा ! ॥६९६॥
तद्दोषपरिहारार्थं शान्तिहोमो जपस्तथा ।
सहस्रसंख्यया युक्तो मूलमन्त्रेण मन्त्रवित् ॥६९७॥
विनावभृथकालं तु देवमालयतो बहि ।
स्नापयेद्यदि समोहाच्छान्तिहोमं समाचरेत् ॥६९८॥
बहुबेरेऽभिषेकार्थं ता गृहीत्वाग्रमण्टपात् ।
न गच्छेद्वाह्यतो मन्त्री स्नपनार्थं बहिर्गते ॥६९९॥
शान्तिहोमं प्रकुर्वीत तस्य दोषस्य शान्तये ।
बिम्बेऽभिषिच्यमाने तु पतिते स्नानविष्टरात् ॥७००॥
प्रतिष्ठास्नपनं कृत्वा शान्तिहोमं समाचरेत् ।
स्नानकाले विशेषेण बिम्बस्य चलने द्विजा ॥७०१॥
चलने स्नानवेद्याश्च शान्तिहोमं समाचरेत् ।
प्रभापीठाम्बरस्वाङ्गभेदगङ्गादिदूषिते ॥७०२॥
तद्विम्बगतां शक्तिं नियोज्य धृतकौतुके ।
सन्धानं शिल्पिभि कृत्वा समभ्यर्च्य तदैव तु ॥७०३॥
शेषकर्मणि निर्वृत्ते स्नापयेदुत्तमक्रमात् ।
तिलेन चरणाद्येन प्रत्येकं च सहस्रश ॥७०४॥

जुहुयान्मूलमन्त्रेण तेन शान्तिर्भविष्यति ।
तदा न घटितुं शक्तिर्यदि स्याद्यागगौरवात् ॥७०५॥
शोभार्थबिम्बे पुरतः स्थापिते शेषमाचरेत् ।
एवमुत्सवतीर्थार्थशयनादिषु मूर्तिषु ॥७०६॥
तत्तदङ्गादिसन्धानं स्थापनं योजनं पुनः ।
क्ष्मापरिग्रहकाले तु दुर्निमित्तोदये द्विजाः! ॥७०७॥
शान्तिहोमं पुरा कृत्वा सहस्रं जपमाचरेत् ।
तथैव क्षेत्रमानार्थं सूत्रं यत्संप्रसारितम् ॥७०८॥
विच्छेदे तस्य सूत्रस्य शङ्कूनां वा विदारणे ।
भूतानां बलिकाले तु पतिते बलिपात्रके ॥७०९॥
भूतले खन्यमाने तु भस्माङ्गारतुषादिके ।
क्रिमिकीटादिके वापि दृष्टे तच्छान्तये द्विजाः! ॥७१०॥
नारसिंहेन मन्त्रेण तिलैराज्यैः सहस्रशः ।
हुनेदाचार्यवरणमकृत्वा क्ष्मापरिग्रहम् ॥७११॥
मन्दिरे निर्मिते विप्रा ब्राह्मणानामनुज्ञया ।
शान्तिहोमपुरस्कन्तु क्ष्मापरिग्रहमाचरेत् ॥७१२॥
बालस्थानमकृत्वैव मन्दिरे निर्मिते द्विजाः! ।
मूलार्चास्थापनात्पूर्वं यजमानान्वितो गुरुः ॥७१३॥
रविमण्डलमध्यस्थं देवं सम्पूज्य भक्तितः ।
ओं नमः पुण्डरीकाक्ष भक्तानुग्रहकारक ॥७१४॥
क्षन्तुमर्हसि देवेश यन्मयाप्यकृतं कृतम् ।
इति प्रणम्य देवेशं वासस्थानं यथाविधि ॥७१५॥
निर्माय तत्र देवं तु प्रतिष्ठाप्य समर्चयेत् ।
खातप्रदेशे प्रासादभूमध्ये मुनिसत्तमाः! ॥७१६॥
विना प्रासादनिर्माणे कुम्भसंस्थापनादिकम् ।

ब्राह्मणान् समनुज्ञाप्य स्नात्वा प्रासादमध्यत ॥७१७॥
तत्र कुम्भस्थापनादि यथासम्भवमाचरेत् ।
शान्तिहोम च कुर्वीत सर्वदोषप्रशान्तये ॥७१८॥
गर्भन्यासेपि न कृते तथा गर्भं च विन्यसेत् ।
आयशुद्ध्यादिहीने वा प्रासादे लक्षणोज्झिते ॥७१९॥
यथाशास्त्र पुन कृत्वा शान्तिहोम समाचरेत् ।
न स्थापिते शिखाकुम्भे प्रासादे चाप्रतिष्ठिते ॥७२०॥
तत्तत्कर्म पुन कुर्याच्छान्तिहोमपुरस्सरम् ।
प्राकारमण्टपादीना गोपुरादेस्तथा द्विजा ! ॥७२१॥
अकृते स्थापने शान्तिपूर्वं तत्तत्समाचरेत् ।
दारुलोहशिलादीना सम्रहावसरे द्विजा ! ॥७२२॥
दुर्निमित्तोदये चैव तथा दुस्स्वप्नदर्शने ।
नारसिंहेन मन्त्रेण तिलाज्यैस्तु सहस्रश ॥७२३॥
शान्तिहोम प्रकुर्वीत सर्वदोषप्रशान्तये ।
दारुलोहशिलामृत्स्नावस्त्रादीना परिग्रहे ॥७२४॥
तत्तदङ्गतयोदीर्णद्रव्यमन्त्रक्रियादिषु ।
परिच्युतेषु तत्कुर्याच्छान्तिहोमजपादिकम् ॥७२५॥
अकृते पर्वतादौ तु दार्वादीना परिग्रहे ।
आनीतस्यालयक्षेत्रे निक्षिप्ति सत्क्रिया विना ॥७२६॥
यथावदाचरेद्विद्वानर्चाद्रव्यस्य सङ्ग्रहम् ।
विनैव सम्यक् कर्मबिम्बादौ निर्मिते सति ॥७२७॥
पश्चादपि च तत्कुर्याच्छान्तिहोमपुरस्सरम् ।
बिम्बपीठशिलादीना मानोन्मानादिलक्षणे ॥७२८॥
रहिते शान्तिहोम तु कुर्यात्तद्दोषशान्तये ।
बिम्बपीठशिलाना तु व्यत्यासे पुलिकादिके ॥७२९॥

तत्तत्त्यक्त्वा पुनः कुर्याद्यथोक्तशिलया द्विजाः! ।
निर्मिता प्रतिमा शीघ्रं स्वगृहे न निवेशिता ॥७३०॥
राज्ञो राष्ट्रस्य तत्कर्तुरनिष्टमुपपादयेत् ।
एकविंशद्दिनादूर्ध्वमासुरी सा भवेद्ध्रुवम् ॥७३१॥
कृत्वा महाभिषेकाद्यं स्थापयेदन्यथा त्यजेत् ।
जलाधिवासे स्नपने तथा नयनमोक्षणे ॥७३२॥
शयने वेदिकायां च मन्त्रन्यासादिकर्मसु ।
कुम्भमण्डलपूजायां द्वारतोरणकुम्भयोः ॥७३३॥
होमे पीठादिसंस्कारे अकृते वान्यथा कृते ।
शान्तिहोमं प्रकुर्वीत सहस्राहुतिसंख्यया ॥७३४॥
मूलमन्त्रायुतजपं शतब्राह्मणभोजनम् ।
अस्थाने स्थापिते बिम्बे पादाधारशिलान्वितम् ॥७३५॥
तदानीमेव चोद्धृत्य स्थापयेत्तं स्वके पदे ।
उत्तमस्नपनं कृत्वा शान्तिहोमं समाचरेत् ॥७३६॥
न स्थापिते मुहूर्तेऽस्मिन् न तदा बिम्बमुद्धरेत् ।
पूर्ववत्स्नपने होमे कृते शान्तिर्भविष्यति ॥७३७॥
स्थापनेऽधिकृते मुख्ये देशिके व्याधितेसति ।
न्यस्तदेहे ऽथवा मध्ये वर्तमाने क्रियाक्रमे ॥७३८॥
क्रियामन्त्रोपदेष्टा च प्रतिष्ठाकर्मणि स्थितः ।
पुत्रो वा देशिकेन्द्रस्य स्थापने शेषमाचरेत् ॥७३९॥
अन्ते सहस्रकलशैरभिषिच्य सुरेश्वरम् ।
चक्राब्जुरुहकुण्डे तु मधुक्षीरादिभिः क्रमात् ॥७४०॥
शान्त्यर्थं मधुना हुत्वा तत्संख्यं जपमाचरेत् ।
प्रतिष्ठाकर्मकालादावाचार्ययजमानयोः ॥७४१॥
ऋत्विगाचार्ययोर्वापि संजाते फलदे द्विजाः! ।

कर्म निष्फलतां याति शान्तिहोमं समाचरेत् ॥७४२॥
नमस्कृत्याभ्यर्च्य गुरुं क्षम्यतामिति चोच्चरेत् ।
दोषाणामेवमादीनां सम्भवेपि मुनीश्वराः ! ॥७४३॥
तत्तच्छान्तिं प्रकुर्वीत शान्तिहोमजपादिभिः ।

मुनयः ।

प्रायश्चित्तान्यशेषाणि श्रुतानि मुनिपुङ्गव ! ॥७४४॥
तत्र तत्र त्वया प्रोक्तं कर्म सम्प्रोक्षणाभिधम् ।
ग्रामशान्तिविधिश्चापि शान्तिहोमश्च भूयश ॥७४५॥
तद्विधानादिकं सर्वं ज्ञातुमिच्छामहे मुने ! ।

नारदः ।

सम्प्रोक्षणविधानादीन् वक्ष्यामि मुनिसत्तमाः ! ॥७४६॥
शृणुध्वमधुना सर्वे सावधानेन चेतसा ।
बिम्बपीठविमानानां भग्नाङ्गे तु समाहिते ॥७४७॥
प्रतिमापीठयोरष्टबन्धने तु पुनः कृते ।
आशौचवद्भिर्मनुजैर्महापातकभिर्नरैः ॥७४८॥
चण्डालोदक्यादिभिश्च म्लेच्छैर्वा पुल्कसादिभिः ।
देवबिम्बे तु संस्पृष्टे चण्डालश्वपचादिभिः ॥७४९॥
निरन्तरं त्वेकमासमालये समधिष्ठिते ।
चण्डालश्वपचादीनां प्रमादाद्भगवद्गृहे ॥७५०॥
कर्मण्यधिकृतौ तैस्तु सहवासेपि च द्विजाः ! ।
बिम्बे प्रासादभागे वा शवे स्पृष्टे द्विजोत्तमाः ! ॥७५१॥
बिम्बे वल्मीकशिखिभिर्विसरपाणां समुद्भवे ।
बिम्बेत्वशनिसंस्पृष्टे प्रासादे वा मुनीश्वराः ! ॥७५२॥
बिम्बस्य हसने चैव चलने रोदने तथा ।
पतने भ्रमणे चैव स्वेदरक्तादिसम्भवे ॥७५३॥

कम्पने च तथा विप्राः! रक्तवर्षादिसम्भवे।
आराधने च विच्छिन्ने मासादूर्ध्वं मुनीश्वराः! ॥७५४॥
संहितासङ्करे चैव तथा सिद्धान्तसङ्करे।
मृगुसे चोद्धृते बिम्बे मासादूर्ध्वं द्विजोत्तमाः! ॥७५५॥
सम्प्रोक्षणं प्रकुर्वीत तत्तद्दोषप्रशान्तये।
दोषैरुपहतं ज्ञात्वा प्रासादप्रतिमादिकम् ॥७५६॥
असम्प्रोक्ष्यार्चनं कुर्वन् राजानं राष्ट्रमञ्जसा।
देवतायतनं ग्रामं नाशयेन्नात्र संशयः ॥७५७॥
तस्मात्सम्प्रोक्षणं कार्यं प्रासादप्रतिमादिषु।
पुरा सम्प्रोक्षणदिनं राजराष्ट्राभिवृद्धिदम् ॥७५८॥
निश्चयीकृत्य कालज्ञैः पुरस्तादुक्तवासरे।
अङ्कुरानर्प्य विधिवत्पश्चात्तच्छोधिते गृहे ॥७५९॥
सर्वत्र गोमयाम्भोभिः पुण्याहोक्तिपुरस्सरम्।
सम्प्रोक्ष्य पञ्चगिर्गव्यैः कुशोदकसमन्वितैः ॥७६०॥
मूलबेरादिबिम्बानां षड्भिस्सिद्धार्थकादिभिः।
पवित्रावर्तितैरद्भिर्बहुशः क्षालने कृते ॥७६१॥
प्रधानदिनपूर्वस्यां रात्रौ यागादिमण्टपे।
तोरणद्वारकलशैर्वितानध्वजशोभिते ॥७६२॥
दीक्षाधिवासवत्कृत्वा कुम्भे वै मण्टपस्थले।
पूजनं विभवेनैव जपान्तं मूलमन्दिरे ॥७६३॥
हरिद्राद्यैः पञ्चविंशद्भिः स्नापयेद्ध्रुवकौतुकम्।
लेपभित्तिपटस्थस्य पुरस्ताद्द्रविहरे ॥७६४॥
कर्मार्चामथवा कुर्वन्दर्पणे प्रतिबिम्बितम्।
संस्नाप्य विधिवत्कुम्भैः स्थापितैर्मण्टपे ॥७६५॥
उत्सवार्चादिबिम्बानामत्रानानाभयात्मनाम्।

पूजन स्नपन कार्यं पाश्चात्ये यागमण्टपे ॥७६६॥
तत्रस्थे हवन कुण्डे शङ्खचक्रादिलक्षणे ।
मधुक्षीरादिभि कार्यं सहस्रशतसख्यया ॥७६७॥
कर्मबिम्ब विनान्येषा बिम्बानामङ्गरूपिणाम् ।
दक्षिणे मण्टपस्याथ शयने कल्पयेन्महत् ॥७६८॥
तिलतण्डुलशालीना भारैर्वस्त्रादिभि सह ।
तदूर्ध्वे शाययेदर्चां विधिवद्बद्धकौतुकाम् ॥७६९॥
सम्पूज्य कबळाद्यैश्च छादयेत्ता सितादिभि ।
वर्णकैर्मण्डल कुर्याच्चक्राम्बुरुहभूषितम् ॥७७०॥
यावत्प्रभातसमय बिम्बस्थस्य समीपत ।
देशिको मूलमन्त्रस्य जपेनैव नयेन्निशाम् ॥७७१॥
प्रभाताया तु शर्वर्यां कृतसन्ध्याविधिर्गुरु ।
चतु स्थानार्चन कृत्वा पूर्ववत्स्नपनान्वितम् ॥७७२॥
पूर्णाहुत्यादिक सर्वं विधाय तु यथाविधि ।
कुण्डस्थ मण्डलस्थञ्च देव हृदि विसृज्य च ॥७७३॥
उद्वास्य द्वारदेवाश्च बलिदानपुरस्सरम् ।
मुहूर्ते शोभने प्राप्ते नववस्त्रपरिष्कृतम् ॥७७४॥
सोत्तरीयोपवीत च कृतकौतुकबन्धनम् ।
समस्ततत्वनिन्यस्तमभ्यर्च्यार्घ्यादिभि क्रमात् ॥७७५॥
तासु स्वहृदयाम्भोजात्पुष्पाञ्जलिपुरस्सरम् ।
अप्रमेयमपरिच्छेद्यममूर्तममल महत् ॥७७६॥
नित्यशुद्धमनौपम्य सुसूक्ष्ममचल स्फुटम् ।
सच्चिद्रूप त्वमामान्य भास्वर सुदृढ महत् ॥७७७॥
तेजस्तु सन्नभ्याय दण्डवत्प्रणिपत्य तु ।
विनिवेद्य विभो सं कृत कर्म द्विजोत्तमा ! ॥७७८॥

उत्थाप्योत्सवबिम्बादीन् पूर्ववन्मङ्गळैः सह ।
महाकुम्भं च पुरतो वाहयन् मूर्तिपादिभिः ॥७७९॥
करकास्त्रं समादाय त्वाचार्यः पुरतो व्रजेत् ।
शलाकामात्रयाऽच्छिन्नधारया सेचयन् भुवम् ॥७८०॥
प्रादक्षिण्येन धामान्तः प्रविश्य मुनिपुङ्गवाः ! ।
महोत्सवोक्तमार्गेण कुम्भप्रोक्षणमाचरेत् ॥७८१॥
द्वारावरणदेवांश्च आलयाश्रयवर्तिनः ।
खगेशविष्वक्सेनादीन् परिवारांश्च सर्वशः ॥७८२॥
कुम्भावशिष्टतोयेन प्रोक्षयेत्सर्वतः क्रमात् ।
अवशिष्टं कुम्भतोयं बलिपीठेऽभिषेचयेत् ॥७८३॥
एवं संप्रोक्ष्य विधिवत्प्रासादान्तः प्रविश्य च ।
करस्थं कौतुकं चाथ हृदयेन विसृज्य तु ॥७८४॥
गोभूहेमादिकं दत्वा सर्वदोषप्रशान्तये ।
देवमर्घ्यादिनाभ्यर्च्य हविरन्तं विशेषतः ॥७८५॥
ब्राह्मणान् भोजयेत्पश्चात्सहस्रं शतमेव वा ।
सद्यो वा सकलं त्वेवं कुर्यात्सम्प्रोक्षणं विभोः ॥७८६॥
पुष्पाङ्कुरपुरस्कन्तु तत्तद्दोषप्रशान्तये ।
न तिथिर्न च नक्षत्रं कालवेळा न विद्यते ॥७८७॥
सद्यः सम्प्रोक्षणं विप्राः ! निशि वा दिवसेपि वा ।
प्रायश्चित्तविलम्बे तु कुर्यात्कालनिरीक्षणम् ॥७८८॥
इति सम्प्रोक्षणं प्रोक्तं सर्वं चापि द्विजोत्तमाः ! ।
प्रायश्चित्तं तु वै कुर्यात्सञ्जाते तन्निमित्तके ॥७८९॥
तत्तद्दैवाथ कर्मान्ते त्रिदिनाभ्यन्तरेपि वा ।
तद्गुरुत्वानुगुण्येन पञ्चसप्तदिनान्तरे ॥७९०॥
तदारम्भसमाप्तिर्वा ह्यन्यथा द्विगुणं चरेत् ।

प्रायश्चित्तं तु सर्वत्र स्वयव्यक्तादिके स्थले ॥७९१॥
अथातः सम्प्रवक्ष्यामि ग्रामशान्तिविधिं द्विजाः ! ।
राज्यक्षोभावसाने च शून्ये ग्रामे च हेतुना ॥७९२॥
ग्रामे च वह्निना दग्धे वात्यासारादिदूषिते ।
पुनः समाहिते रक्तमधुवर्षादिसम्भवे ॥७९३॥
ग्रामे वहुब्रह्मवधे तथा गोवधसम्भवे ।
चण्डालशवराद्यैस्तु ग्रामे बहुदिनोषिते ॥७९४॥
महामार्यादिरोगेण सघातमरणादिके ।
ग्रामशान्तिं प्रकुर्वीत सर्वदोषप्रशान्तये ॥७९५॥
तद्ग्रामे मुनिशार्दूला ! सर्वत्रैकत्र वा क्षितिम् ।
खात्वा मृद समुद्धृत्य वहिः प्रक्षिप्य शुद्धया ॥७९६॥
सम्पूर्य च समीकृत्य कुशाद्भिः परिमृज्य च ।
पर्यग्निकरणं विप्रैः कारयित्वा समन्ततः ॥७९७॥
ससिच्य गोमयाम्भोभिः पुण्याहोद्घोषपूर्वकम् ।
पञ्चगव्येन चाभ्युक्ष्य गोगण तत्र वासयेत् ॥७९८॥
वाचयित्वा महाशान्तिं ब्राह्मणैर्वेदपारगैः ।
भोजयित्वा द्विजास्तत्र तेभ्यो दद्यात्तु दक्षिणाम् ॥७९९॥
कृत्वैव स्थलसशुद्धिं शान्तिं कुर्यादनुक्रमात् ।
देवगेहपुरोभागे बहिर्द्वारस्य सन्निधौ ॥८००॥
मण्टप कारयेत्पूर्वं चतुर्द्वारादिसयुतम् ।
तन्मध्ये वेदिकां कुर्यादूर्ध्वकुण्डसमन्विताम् ॥८०१॥
परितः कल्पयेत्कुण्डानष्टौ वा चतुरोपि वा ।
मध्यकुण्डेपि वा सर्वं होमं कुर्याद्द्विजोत्तमाः ॥८०२॥
सर्वांश्च यागसम्भारान् सम्भृत्य सुसमाहितः ।
निशान्ते प्रथमे तु कृतस्नानः कृताह्निकः ॥८०३॥

देवगेह समासाद्य ऋत्विग्भि सह देशिक ।
देवदेव समभ्यर्च्य तदनुज्ञापुरस्सरम् ॥८०४॥
सर्वे परिजनै सार्धं यागगेह प्रविश्य तु ।
द्वारकुम्भादिकास्तत्र परिकल्प्य यथाविधि ॥८०५॥
वेदिकोर्ध्वे तु कुण्डस्य दक्षिणे करकान्वितम् ।
महाकुम्भ च विन्यस्य वामे शान्तिघट न्यसेत् ॥८०६॥
करशुद्ध्यादिक सर्वं कृत्वा ह्यागपश्चिमम् ।
पुण्याह वाचयित्वा तु सम्भारान् प्रोक्ष्य कृत्स्नश ॥८०७॥
द्वारार्चनपुरस्कन्तु महाकुम्भे यथाविधि ।
अभ्यर्च्य देवमर्घ्याद्यैर्हविरन्तैस्तथास्नपम् ॥८०८॥
परितो वासुदेवादीन् तत शान्तिघटे द्विजा ! ।
शान्ति पुष्टिं च तुष्टिं च समभ्यर्च्य यथाविधि ॥८०९॥
वास्तुदेवगणाश्चापि तत्रैव परिपूजयेत् ।
तदष्टदिक्षु कुम्भेषु कुमुदादीन् समर्चयेत् ॥८१०॥
अथोर्ध्वकुण्डे विधिवत्प्रतिष्ठाप्य हुताशनम् ।
तत्र देव तु सन्तर्प्य समिद्भि सप्तभि क्रमात् ॥८११॥
अष्टोत्तरसहस्राख्यसख्यया सघृतैस्तिलै ।
तर्पयित्वा तु शान्त्यर्थमुद्धृत्याग्निगण तत ॥८१२॥
दिक्कुण्डेषु विनिक्षिप्य विदिक्कुण्डेषु च क्रमात् ।
प्रागादिदिक्षु चतुरो ऋत्विज सन्निवेश्य तु ॥८१३॥
वासुदेवादिभिर्मन्त्रै [illegible] ।
सहस्रसख्यया देवान् तर्पयेत्सघृतैस्तिलै ॥८१४॥
एवमप्ययोगेन वाय्वादीशावसानकम् ।
ऋग्वेदाद्याश्च चतुर सन्निवेश्य यथाक्रमम् ॥८१५॥
तैश्चापि वैष्णवै सूक्तै शान्तिसूक्तैश्च पावनै ।

सहस्रसंख्यया साज्यतिलहोमं तु कारयेत् ॥८१६॥
शान्तिं पुष्टिं च तुष्टिं च वास्तुदेवगणास्तथा ।
कुमुदादिगणाश्चापि मध्यकुण्डे यथाक्रमम् ॥८१७॥
प्रत्येकमष्टाहुतिभिस्तर्पयेद्घृतधारया ।
ब्रह्मा मरीचिरत्रिश्च विवस्वान् पृथिवीश्वरः ॥८१८॥
चित्रश्चैवापवत्सश्च सन्धिता च सविलकः ।
रुद्रो रुद्रजयश्चैव इन्द्र इन्द्रजयस्तथा ॥८१९॥
ईशश्चैवाथ पर्जन्यो जयन्तश्च महेन्द्रकः ।
भानुः सत्यो भृगुश्चैव अन्तरिक्षश्च पूर्वकः ॥८२०॥
अग्निः पूषा कृशो मानुर्गुह क्षेत्राधिपस्तथा ।
गन्धर्वो भृङ्गराजश्च मृत्युश्चैव तथान्तकः ॥८२१॥
पितृदौवारिकश्चैव सुग्रीवः पुष्पदन्तकः ।
वरुणश्च भृशश्चापो यक्ष्मासमनोज्ञ ॥८२२॥
योगो नागश्च मृत्यन्तो भल्लाटः सोम एव च ।
अदितिर्वास्तुनाथश्च ग्रामवास्तुगणाः स्मृताः ॥८२३॥
एतांस्तु स्वस्वनाम्नैव स्वाहान्तेन हुनेत्क्रमात् ।
ग्रामाश्रितांस्तथा देवान् नगराश्रितदेवताः ॥८२४॥
भूपालाश्रितदेवांश्च चैत्यप्रासाददेवताः ।
उद्यानोपवनस्थांश्च पर्वतद्रुमसंस्थितान् ॥८२५॥
सर्वानभ्यागतान् देवान् तर्पयेद्घृतधारया ।
सम्पाताज्यं तु सगृह्य शान्तिकुम्भे तु सेचयेत् ॥८२६॥
कुम्भस्थ देवदेवं तु पुनरभ्यर्च्य देशिकः ।
गेहादिमागमभ्यान्तं बलिदानं समाचरेत् ॥८२७॥
रात्रिशेषं समाप्याथ प्रभाते दैनिकोत्तमम् ।
नित्यकर्माणि निर्वर्त्य गत्वा वै यागमन्दिरम् ॥८२८॥

द्वारार्चनपुरस्कन्तु महाकुम्भादिषु स्थितान् ।
देवानर्घ्यादिभिर्भोगैर्हविरन्तं यजेत्क्रमात् ॥८२९॥
ततस्तु मूर्तिपैः सार्धं मध्यकुण्डादिषु क्रमात् ।
देवं सन्तर्प्य विधिना पूर्वोक्तेन मुनीश्वराः ! ॥८३०॥
पूर्णाहुत्यादिकं सर्वं विधाय च यथाविधि ।
अग्निमध्यस्थितं देवं विसृज्य स्वहृदि क्रमात् ॥८३१॥

द्वारदेवान् विसृज्याथ बलिदानपुरस्सरम् ।
महाकुम्भादिकान् सर्वान् वाहयन्मूर्तिपादिभिः ॥८३२॥
पठद्भिः शान्तिसूक्तानि ब्राह्मणैः सह देशिकः ।
शङ्खादिमङ्गळरवैर्घण्टारवसमन्वितैः ॥८३३॥
देवगेहं समासाद्य देवमर्घ्यादिभिर्यजेत् ।
पुंसूक्तेन प्रोक्षयेच्च महाकुम्भस्थतोयतः ॥७३४॥

प्रासादद्वारमारभ्य बलिपीठान्तिमं क्रमात् ।
कुम्भावशिष्टतोयेन प्रोक्षयेत्पूर्ववद्द्विजाः ! ॥७३५॥
शान्तिकुम्भजलेनाथ शान्तिसूक्तैः समन्ततः ।
ग्रामं सम्प्रोक्षयेद्विप्राः ! सर्वदोषप्रशान्तये ॥८३६॥
ततो गेहं समासाद्य सम्पूज्य पुरुषोत्तमम् ।
महाहविर्निवेद्याथ होमान्तं सर्वमाचरेत् ॥८३७॥

ततस्तु बलिबिम्बं तु यानमारोप्य देशिकः ।
नित्योत्सवविधानेन यात्रोपकरणैः सह ॥८३८॥
द्वारावरणदेवानां बलिं दत्वा विशेषतः ।
कुमुदादिचार्षै दद्याद्ग्रामेऽपि च यथाविधि॥८३९॥
बलिबिम्बं ततोऽभ्यर्च्य स्वस्थाने सन्निवेश्य तु ।
मूलबिम्बं समभ्यर्च्य प्रणिपत्य क्षमापयेत् ॥८४०॥
गोभूहेमादिकं दद्यात्तत्काले सर्वशान्तये ।

आचार्यऋत्विगादींश्च दक्षिणाभिः प्रतोषयेत् ॥८४१॥
ब्राह्मणान् भोजयेत्पश्चात्सहस्रं शतमेव वा ।
तेभ्यश्च दक्षिणां दद्याद्राजराष्ट्रसुखावहः ॥८४२॥
ग्रामशान्तिविधिस्त्वेष कथितो मुनिपुङ्गवाः ।
अथातः संप्रवक्ष्यामि शान्तिहोमविधिक्रमम् ॥८४३॥
सर्वदोषप्रशमनं सर्वच्छिद्रप्रपूरणम् ।
सर्वैश्वर्यप्रदं नृणां सर्वारिष्टविनाशनम् ॥८४४॥
कर्तुः कारयितुश्चैव प्रजानां वाञ्छितप्रदम् ।
अतिवृष्ट्यावनावृष्टौ दुर्भिक्षे रोगसम्भवे ॥८४५॥
दुस्स्वप्नादौ दुर्निमित्ते महोत्पातेषु सत्सु च ।
आराधनाङ्गवैकल्ये गळिते चोत्सवाङ्गके ॥८४६॥
प्रतिष्ठास्नपनादीनामङ्गवैकल्यसम्भवे ।
बिम्बोपकरणादीनामस्पृश्यस्पर्शनादिके ॥८४७॥
पूर्वोक्तेषु निमित्तेषु सर्वेषु मुनिपुङ्गवाः ।
शान्तिहोमं प्रकुर्वीत तत्तद्दोषप्रशान्तये ॥८४८॥
प्रासादस्याग्रतो वापि प्रथमावरणादिके ।
तदर्थं मण्टपं कुर्याच्चतुर्द्वारसमन्वितम् ॥८४९॥
यद्वा पूर्वं कृते विप्राः कुत्रचिन्मण्टपादिके ।
यागार्थमन्दिरे वापि पचनालय एव वा ॥८५०॥
गोष्ठागारादिके वापि उद्यानोपवनादिषु ।
द्विहस्तमेकहस्तं वा वृत्तं वा चतुरश्रकम् ॥८५१॥
कुण्डं प्रकल्पयेद्यद्वा स्थण्डिले होममाचरेत् ।
कुण्डस्य दक्षिणे पार्श्वे धान्यपीठे सलक्षणम् ॥८५२॥
सोपकुम्भं सकरकं महाकुम्भं तु विन्यसेत् ।
शान्तिकुम्भं च तत्पार्श्वे विन्यस्य तु सलक्षणम् ॥८५३॥

कृत्वा मानसयागान्तं करशुध्यादिकं द्विजाः!।
पुण्याहं वाचयित्वाथ सम्भारान्प्रोक्ष्य कृत्स्नशः ॥८५४॥
अर्घ्यादीन् परिकल्प्याथ द्वारार्चनपुरस्सरम् ।
महाकुम्भे योगपीठं परिकल्प्य यथाविधि ॥८५५॥
तत्रावाह्य नृसिंहं तु सर्वदोषप्रशान्तिदम् ।
सकळीकृत्य विधिवल्लयभोगादिकं क्रमात् ॥८५६॥
कृत्वासनादिभिर्भोगैर्हविरन्तं समर्चयेत् ।
सुदर्शनं च करके प्रागादिकलशेषु च ॥७५७॥
वासुदेवादिकां चेष्ट्वा प्रभवाप्यययोगतः ।
शान्तिं पुष्टिं च तुष्टिं च शान्तिकुम्भे समर्चयेत् ॥८५८॥
कुण्डं संस्कृत्य तत्राग्निं प्रतिष्ठाप्य यथाविधि ।
तत्रापि नृहरिं देवं समावाह्य यथाविधि ॥८५९॥
समिद्भिः सप्तभिश्चापि सन्तर्प्याथ स्वमन्त्रतः ।
विशेषेण हुनेद्दोषप्रशान्त्यर्थं मुनिपुङ्गवाः! ॥८६०॥
ओं क्ष्रौं नमश्चेतिमन्त्रसंयुक्तेनादितो द्विजाः! ।
ओंनमोभगवतेनारसिंहायेत्यनेन तु ॥८६१॥
एतद्दोषं अहिजहि स्वाहेत्यन्तेन देशिकः ।
मध्वाज्यक्षीरसंमिश्रान् सफलांस्तु तिलान् द्विजाः! ॥८६२॥
शतं सहस्रं सार्धं वा यथाशक्त्यथवा हुनेत्।
पालाशं खादिरं चैव बिल्वमौदुम्बरं तथा ॥८६३॥
अश्वत्थप्लक्षन्यग्रोधमपामार्गमिति द्विजाः! ।
समिधामष्टकं स्सरसं मधुक्षीराज्यसिक्तैर्नृतैः ॥८६४॥
अष्टाक्षरेण जुहुयात्प्रथमष्टोत्तरं शतम् ।
द्वादशाक्षरमन्त्रेण केवलाज्यं हुनेत्तथा ॥८६५॥
षडक्षरेण मन्त्रेण तिलं साज्यं हुनेच्छतम् ।

बीजानि विष्णुगायत्र्या हुत्वा चाष्टोत्तरं शतम् ॥८६६॥
चरुं पुरुषसूक्तेन जुहुयाद्देशिकोत्तम ।
कृत्वाथ स्विष्टकृद्धोमं प्रायश्चित्ताहुतीस्तथा ॥८६७॥
नारसिंहेन मन्त्रेण दद्यात्पूर्णाहुतिं ततः ।
सम्पाताज्यं समादाय सेचयेत्कुम्भमध्यतः ॥८६८॥
पुनः कुम्भे स्थितं देवं समभ्यर्च्य यथाविधि ।
शान्तिकुम्भं तु संस्पृष्ट्वा ब्राह्मणैः सह देशिकः ॥८६९॥
नारसिंहेन मन्त्रेण शान्तिसूक्तैश्च मन्त्रयेत् ।
ततश्च द्वारदेवेभ्यो बलिं दद्याद्यथाविधि ॥८७०॥
एवं पूर्वदिने रात्रौ कृत्वा देशिकसत्तमः ।
परेद्युः प्रातरुत्थाय कृतस्नानः कृताह्निकः ॥८७१॥
इष्ट्वा कुम्भस्थितं देवं सन्तर्प्याग्नौ यथाविधि ।
द्रव्यैः पूर्वोदितैश्चापि अष्टाविंशतिसंख्यया ॥८७२॥
पूर्णाहुतिं च कृत्वाथ विसृज्याग्निस्थितं विभुम् ।
विसृज्य द्वारदेवांश्च बलिदानपुरस्सरम् ॥८७३॥
महाकुम्भं शान्तिकुम्भं वाहयन् ब्राह्मणैः सह ।
वेदघोषैर्वाद्यघोषैर्घण्टारवसमन्वितैः ॥८७४॥
आसाद्य देवसदनं समभ्यर्च्य जगत्प्रभुम् ।
पुंसूक्तेन महाकुम्भतोयेन प्रोक्षयेद्विभुम् ॥८७५॥
शान्तिकुम्भजलेनाथ देवं वा मन्दिरादिकम् ।
सर्वोपकरणं वापि दूषितं दोषशान्तये ॥८७६॥
प्रोक्षयेच्छान्तिसूक्तेन दोषशान्तिर्भविष्यति ।
यजमानो गुरुं पश्चात्तोषयेद्दक्षिणादिभिः ॥८७७॥
यद्वा कार्येऽपि वा रोगे नवदोषानुसारतः ।
शान्तिहोमं प्रकुर्वीत सर्वदोषप्रशान्तये ॥८७८॥

कुम्भार्चनं विना वापि केवलं होममाचरेत् ।
महोत्सवाद्युत्सवेषु प्रतिष्ठास्नपनादिके ॥८७९॥
तत्तत्कर्माङ्गभूतेऽग्नौ शान्तिहोमं समाचरेत् ।
इति सर्वं समाख्यातं किमन्यच्छ्रोतुमिच्छथ ॥८८०॥

इति श्रीपाञ्चरात्रे ईश्वरसंहितायां
प्रायश्चित्तविधिर्नाम
एकोनविंशोऽध्यायः ।

अथ विंशोऽध्यायः ।

मुनयः ।

भगवन्मुनिशार्दूल सर्वशास्त्रविशारद ।
भवता तत्र तत्रेह स्वयंव्यक्तादिभेदतः ॥१॥
विशेषः कीर्तितः पूर्वं जीर्णोद्धारादिकर्मसु ।
किं किं भुवि स्वयंव्यक्तं महत्त्वं तस्य कीदृशम् ॥२॥
तत्सर्वं विस्तरेणैव प्रकाशय दयानिधे! ।

नारदः ।

स्वयंव्यक्तादिभेदं च तन्माहात्म्यं च कृत्स्नशः ।
प्रवक्ष्यामि शृणुध्वं तत्सावधानेन चेतसा ॥३॥
क्षेत्रेषु पुष्करादयेषु वासुदेवो जगत्पतिः ।
स्वयं व्यक्तिं समभ्येत्य भक्तानां हितकाम्यया ॥४॥
स्थितः सन्निहितो देवः स्वयंव्यक्तो मुनीश्वराः ! ।
क्षेत्रेषु केषुचिद्देवः स्थापितो देवपोचरैः ॥५॥
तथैव केषुचित्सिद्धैः केषुचिदपि पूर्वजैः ।
गन्धर्वैश्चापि यक्षैश्च तथाविद्याधरोत्तमैः ॥६॥

असुरै राक्षसैश्चैव मनुजेन्द्रैश्च केषु चित् ।
स्थापितो विधिवद्देव सन्निधत्ते जगत्प्रभु ॥७॥
एव भगवदाकारैर्नानासस्थानलक्षणै ।
नानाविशेषरूपैश्च नानाकार्यवशेन तु ॥८॥
विश्वमापूरित सर्व सर्वानुग्रहकाम्यया ।
भगवद्भक्तिनिरतैर्मनुजेन्द्रै प्रतिष्ठितात् ॥९॥
माहात्म्य स्याद्दशगुण राक्षसेन्द्रप्रतिष्ठिते ।
तत शतगुण प्रोक्तमसुरै स्थापिते विभौ ॥१०॥
सहस्रगुणित प्रोक्त विद्याधरकृते द्विजा ।
ततो दशगुण विप्रा । माहात्म्य यक्षकल्पिते ॥११॥
ततो दशगुण प्रोक्त गन्धर्वैश्च प्रतिष्ठिते ।
आर्ये कोटिगुण प्रोक्त सैद्धे दशगुण तत ॥१२॥
कोटिकोटिगुण दिव्ये स्वयव्यक्ते मुनीश्वरा । ।
माहात्म्य स्यादसङ्ख्यातमिति शास्त्रेषु निश्चितम् ॥१३॥
तस्माद्देधा स्वयव्यक्तबिम्ब भगवतो विभो । ।
सालग्रामशिलारूपैरितरैस्तु शिलादिभि ॥१४॥
उभयत्र समान स्याद्धरे सान्निध्यमुत्तमम् ।
साळग्रामशिलाबिम्बे तत्तन्मूर्तिविनिर्णयम् ॥१५॥
तत्तद्व्रवस्थितैश्चिह्नै ज्ञात्वा कार्य समर्चनम् ।
क्षेत्रेषु पुष्करायेषु स्वयमेव जगत्पति ॥१६॥
अर्चारूपेणावतीर्य व्यक्तैश्चक्रादिलाञ्छनै ।
समन्वित सन्निधत्ते भक्ताना हितकाम्यया ॥१७॥
तत्र क्षेत्रस्थितान् देवान् प्रवक्ष्यामि मुनीश्वरा । ।
यन् ज्ञात्वा मनुजो लोके सर्वपापै प्रमुच्यते ॥१८॥
पुष्कर क्षेत्रमाश्रित्य पुण्डरीकाक्षसज्ञया ।
वासुदेवस्तु भगवान् नित्य सन्निहित स्थित ॥१९॥

एवं क्षेत्रवरे दिव्ये श्रीरङ्गे नैमिशाह्वये ।
क्षेत्रेष्वन्येषु च तथा वासुदेवादिसंज्ञया ॥२०॥
चतुर्मूर्तिस्थितो देवो लोकरक्षणहेतुना ।
केशवः केशिहा लोके कुरुक्षेत्रादिषु स्थितः ॥२१॥
नारायणो मुनिश्रेष्ठाः स्थितो नारायणाचले ।
माधवो वेङ्कटगिरौ गोविन्दः पुरुषोत्तमः ॥२२॥
भूभागपद्ममाश्रित्य संस्थितो नाभसाह्वये ।
स्थाने वृन्दावनाख्येपि स्थितैव कमलोद्भव ! ॥२३॥
विष्णुर्लोभापहे विप्राः स्थितो विष्णुपदेपि च ।
मन्दराख्यं गिरिं चैव आसाद्य मधुसूदनः ॥२४॥
भूतानामनुकम्पार्थमवतीर्य च संस्थितः ।
यामुनं जलमाश्रित्य देवदेवस्त्रिविक्रमः ॥२५॥
स्थितः कमलसम्भूत ! तरणं सुगतिप्रदम् ।
मूर्त्यन्तरं वामनाख्यं सिंहाद्रौ कमलोद्भव ! ॥२६॥
स्वसत्वादेत्य विश्रान्तं भविना लोकशान्तये ।
नर्मदाख्यं हि चाक्रम्य जलं पापक्षयङ्करम् ॥२७॥
श्रीधरः संस्थितो देवः कौण्डलेपि श्रिया सह ।
हृषीकेशस्तु भगवान् संस्थितोप्यात्मना भुवि ॥२८॥
धरावरे ध्वनाख्ये तु क्षेत्रे कुब्जाम्रकेऽब्जज ! ।
पद्मनाभस्तु देवेशस्त्ववतीर्य च संस्थितः ॥२९॥
दक्षिणां दिशमाश्रित्य समीपे जलधिक्षितेः ।
गिरौ रैवतके विप्राः स्वसत्वादेत्य वर्तते ॥३०॥
दामोदरस्तु भगवान् हितार्थं भावितात्मनाम् ।
एभिर्मूर्त्यन्तरैः सार्धं मूर्तिभिर्विभवान्विताम् ॥३१॥
समाराध्य द्विजश्रेष्ठाः अतोन्येषां च सत्स्थितिम् ।

निबोधस्तु महाबुद्धे! सावधानेन चेतसा ॥३२॥
सिद्धामराश्रितं विद्धि श्वेतद्वीपे तु हंसराट् ।
मत्स्यात्मा भगवानप्सु अश्वात्मा वडवामुखे ॥३३॥
रसातले तु कूर्मात्मा विन्ध्यारण्ये तु पौष्कर ! ।
विज्ञातव्यो मृगेन्द्रात्मा पापहा सर्वदेहिनाम् ॥३४॥
सौकरीयेण रूपेण क्षेत्रे तत्स्वशके तु वै ।
गाङ्गे शुभजले कूले सुरसिद्धनिषेविते ॥३५॥
हेमोत्तमागधृग्देवो हेमशैलमहान्तरे ।
नौबन्धनगिरावेव मीनवक्त्र स्थित प्रभु ॥३६॥
कृष्णाश्वेऽश्वशिरा देव शितिक्षेत्रे च मार्चिते ।
लवणोदधिपर्यन्ते भूभागे सिद्धसेविते ॥३७॥
कूर्मवक्त्रश्च भगवान् सस्थित शङ्खचक्रधृक् ।
नृहरि कृतशौचे तु उज्जयिन्यामपि द्विज ! ॥३८॥
विशाखमूलमध्ये तु स्थाने तेन स्थितस्त्रिधा ।
कोकामुखे वराहन्तु वारंडे तु नगोत्तमे ॥३९॥
मन्दमाले विवितस्ते कुरुक्षेत्रे हिमाचले ।
वामन सर्वमूर्तिश्च वै रूपेण सस्थित ॥४०॥
मध्यदेशे तु गङ्गाया कुरुक्षेत्रे तु पौष्कर ।
यामुन कूलमाश्रित्य प्रादुर्भावान्तर महत् ॥४१॥
स्थित त्रिविक्रमाख्य यत् त्रैलोक्याकान्तविग्रहम् ।
नगोत्तमे महेन्द्राख्ये परशुधकर द्विज ॥४२॥
राममत्तश्च भगवान् सस्थित क्षत्रियान्तक ।
धराधरे चित्रकूटे रक्षःक्षयनगे महान् ॥४३॥
सस्थितश्चापरो राम पद्मपत्रनिभेक्षण ।
रामोऽन्य गोवर्धनगिर्वे यामुन आमयन् जलम् ॥४४॥

संस्थितो मानुषीयेषु भूभागेषु शुभेषु च ।
सामुद्रेपि तथा द्वीपे द्वारकाख्येऽमरार्चिते ॥४५॥
वर्तते भगवान् कृष्ण सर्वात्मा परमेश्वर ।
कल्की विष्णुश्च भगवान् स्तूयमानो द्विजै स्थित ॥४६॥
समासाद्य विपाशा च नदीं नियतमानस ।
धर्ममूर्तिर्महात्मा वै धर्मारण्ये सुरार्चिते ॥४७॥
अनुग्रहपरस्त्वास्ते लोकाना लोकपूजित ।
नरसज्ञो जगन्नाथ सिद्धै सम्पूजितेषु च ॥४८॥
भूभागेषु च रम्येषु नित्यसंनिहितस्थिति ।
गिरौ गोवर्धनाख्ये तु देव सर्वेश्वरो हरि ॥४९॥
संस्थित पूजिते स्थाने गया निष्क्रमणेषु च ।
सालग्रामे च भगवान् रानेन्द्राख्ये वने द्विज ! ॥५०॥
तथैव वसुधाशे च स्थितो देवनताभिधे ।
कृष्णोपरश्चतुर्मूर्तिरवतीर्य धरातले ॥५१॥
स्थित पिण्डारके विप्र मोचयन् दुष्कृताज्जनान् ।
श्वेतद्वीपे कुरुक्षेत्रे हिमवन्ताचलेऽच्युत ! ॥५२॥
वेदिकायामपि तटे विश्वरूप स्थित प्रभु ।
क्षीरोदधौ पद्मनाभ शेषाहिशयनो हरि ॥५३॥
स्थितो नन्दवनसम्भूत ! यस्माच्चेद पितामह ! ।
चतुर्थो रूपमाश्रित्य विश्वेस्मिन् सेव वर्तते ॥५४॥
हिताय सर्वलोकाना यथावदवधारय ।
आसाद्य शयन ब्रह्मन् पातालतलसंस्थित ॥५५॥
वटमादाय चाप्मेय योन्ते संहरते जगत् ।
वटमूल समाश्रित्य प्रयागे सुरपूजिते ॥५६॥
जगदेकार्णव कृत्वा दिव्यमासाद्य पादपम् ।
सन्तिष्ठते स भगवान् तस्मिन् तीरे स्थितो द्विजा ! ॥५७॥

न्यग्रोधशायिन चैव ध्यायेद्दिव्यगतिप्रदम् ।
हिमाचलेकदेशे तु तुङ्गे वै भृगुसङ्गके ॥५८॥
मधुकैटभमाथी च सम्स्थित सोवनीतले ।
क्षीरोदकुक्षितिक्षेत्रे सुरासुरनिषेविते ॥५९॥
मन्दराद्रिकरो देवो वर्तते देवपूजित ।
तत्रैवामृतचिद्देव सम्स्थित सिद्धसेवित ॥६०॥
कान्तारूपधरश्चैव सुधाकलशधृक्प्रभु ।
सिद्धाना च मुनीना च देवाना मृत्युजित् स्थित ॥६१॥
द्विधा कर्ता गणोपेतो देवो गरडवाहन ।
सालवृक्षभुजोद्देशे सालग्रामे स्थितो विभु ॥६२॥
त्रिकूटगिरिपृष्ठे तु रम्ये गगनचारिणाम् ।
गजोद्धृतिच्छलेनैव अप्रमेयाख्यया स्थित ॥६३॥
श्वेतद्वीपपतिर्देव अवतीर्य च सस्थित ।
गङ्गासमुद्रसयोगे क्षिरयुद्देशे मनोरमे ॥६४॥
यनसुभगनान् देवो नैमिशे सिद्धपूजिते ।
सैन्धवारण्यमाश्रित्य अनन्तो भगवान् स्थित ॥६५॥
शार्ङ्गपाणिस्तु देवेशो दण्डकारण्यसज्ञके ।
उत्पलावर्तके देशे शौरिसज्ञोऽच्युत स्थित ॥६६॥
भितौ समुद्रनन्द्येऽधे सङ्गमे सिद्धसेविते ।
ज्ञानोपदेष्टा भगवान् सस्थितो तु सशान्तये ॥६७॥
आसाद्य सूकरक्षेत्र देवो गरडवाहन ।
सस्थितो गरडारूढ पारिजातकराङ्कित ॥६८॥
सिद्धे सुरगणै सार्धं गगने चापि पौष्कर ।
देवदेव जगन्नाथ हस्तिपर्वतमस्तके ॥६९॥
एकदेश समासाद्य सस्थ्य वरद स्थित ।
माल्योदपानि वैकुण्ठो मागवाया मदामने ॥७०॥

उड्डीय पुण्यभूभागे संस्थितः पुरुषोत्तमः ।
अचिन्त्यात्माथ भगवान् पर्वते गन्धमादने ॥७१॥
शिपिविष्टाख्यया देशे शिपिविष्टावृतः स्थितः ।
प्राक्समुद्रायपाने तु भूभागे शुभलक्षणे ॥७२॥
कापिलीं मूर्तिमासाद्य वासुदेवः स्थितः प्रभुः ।
अवतीर्य स्वसत्वाच्च ब्रह्मसंज्ञः प्रजापतिः ॥७३॥
मणिबन्धं समासाद्य नित्यं सन्निहितः स्थितः ।
मगधामण्डले विप्र महाबोधधराश्रयः ॥७४॥
संस्थितो लोकनाथात्मा देवदेवो जनार्दनः ।
देवदक्षिणगाक्ष्णो वै यो ऽभिमानतनुर्द्विज ॥७५॥
सूर्यसंज्ञस्तु भगवान् हेमशैलोपरि स्थितः ।
आच्युते वामनेत्रे तु योऽभिमानतनुर्विभुः ॥७६॥
भगवान् सोमसंज्ञस्तु सोमतीर्थाश्रमेपि च ।
अग्निस्वरूपमजितं संस्थितं वाडवानले ॥७७॥
वस्वात्मा भगवान् विप्र ! भासते त्वसुरान्तकृत् ।
विष्णुनाम्ना पुनर्देवस्त्वनेकायुधमण्डितः ॥७८॥
जयाख्ययोजयिन्यां वै स्थितः पापजयो नृणाम् ।
काश्मीरमण्डले पुण्ये क्षेत्रे चक्रधराभिधे ॥७९॥
चक्रपाणिस्तु भगवान् भक्तानां मोक्षदः स्थितः ।
सुरोत्तमाभिधानं च गदापाणिं तु पौष्करे ॥८०॥
सदासान्निहितं विद्धि गङ्गाद्वारे सुरैः सह ।
चतुर्भुजश्चतुर्मूर्तिश्चतुर्वक्त्रश्चतुर्गतिः ॥८१॥
स्थितः पिण्डारके देवो विष्वक्सेनः सनातनः ।
शुभमासाद्य भूभागं प्राग्ज्योतिषपुरे तथा ॥८२॥
देवं विश्वेश्वराख्यं च स्थितिमेत्य स्वगोचरात् ।

सातजनाभिधक्षेत्रे सिद्धविद्याधरान्विते ॥८३॥
स्वामिनजो जगन्नाथ स्थितो मन्दाकिनीतटे ।
भद्राताके महायोगे ध्यायिनामपवर्गद ॥८४॥
धरातले नृसिंहाख्ये देविकायास्तटाश्रिते ।
रिपुक्षयाख्यया विप्र ! देव सर्वेश्वर स्थित ॥८५॥
शङ्करालये तु भूभागे सर्वदेवनिषेविते ।
ज्ञानमूर्तिर्जगन्नाथ संस्थित शुभकृन्नृणाम् ॥८६॥
पृथिव्या तु पितृक्षेत्र मोचयन्नृणत्रयात् ।
जनार्दनाख्यया ब्रह्मन् ! विश्वात्मा भगवान् स्थित ॥८७॥
एतेऽवतारा कथिता लेशत कमलोद्भव ।
एभि क्षितितल व्याप्त पौन पुन्येन च स्वयम् ॥८८॥
ससारिणा जनाना तु अनुग्रहधियाऽनज ।
सङ्कीर्तनमगम्याना निसन्य नित्यमाचरेत् ॥८९॥
मतिं चक्रे च गम्याना सेवने दर्शनेपि च ।
म्लेच्छाना तेषु देशेषु क्षितौ क्षेत्रादयो हि ये ॥९०॥
साङ्कर्यपरिहारेण ब्रह्मन्वासो सदैव हि ।
ऋषिभि सामरे सिद्धै स्वाश्रमेषु महत्सु च ॥९१॥
जलाशयेषु पुण्येषु पृथिव्या विविधेषु च ।
सर्वे भगवदाकारा विभवव्यूहलक्षणा ॥९२॥
उक्ता गताश्च मे चान्ये समुत्प्रेक्ष्य धिया स्वयम् ।
प्रतिष्ठिताश्च विधिवत्समन्त्रा सत्यविक्रमा ॥९३॥
स्थित्या नानाप्रकारा ये भूतभव्यादिकाख्यया ।
सौम्याग्नेयोभयाख्येन सन्निवेशवशेन वै ॥९४॥
शिलारचिमयेनैव चित्रसौरथ्यभेदेन च ।
भुजायायुधसन्धानकेतुभेदेन वै सह ॥९५॥

अलंकृतं च भूभागं मनुजैस्त्वेवमेव हि ।
भक्तैरनुगृहीतैश्च सिद्धाद्यैश्च यथोदितम् ॥९६॥
आदिदेवादयश्चैते तत्वेशाः समुदीरिताः ।
परस्मिन् भगवत्तत्त्वे त्वभेदेन व्यवस्थिताः ॥९७॥
सूर्यस्य रश्मयो यद्वद्वह्नेरर्चिर्गणा यथा ।
जलधेरूर्मयो यद्वद्यद्वद्देवाब्जसम्भव ! ॥९८॥
चित्सामान्या नित्यशुद्धा व्यापका परमेश्वरा ।
तत्वसत्ता समाश्रित्य ज्ञानाद्यैः समलङ्कृता ॥९९॥
अणिमाद्यष्टकोपेता. संस्थिता स्वात्मना तु वै ।
अध्वावनिषु सर्वासुनित्यं कुर्वन्ति सन्निधिम् ॥१००॥
मुक्तये सर्वभूतानां विशेषेण तु वै मुने ।
आविश्वप्रभवात्कालादारभ्य प्रलयावधि ॥१०१॥
क्षेत्रेषु तीर्थतीरेषु शब्दब्रह्ममयात्मना ।
सामान्येनापि मन्त्रेण तद्विवर्तेन भात्मना ॥१०२॥
ततो व्यक्तेतर रूपमाश्रयन्ति च पार्थिवम् ।
हितार्थं सर्वलोकानामवतीर्णमनश्वरम् ॥१०३॥
जगत्यायतनास्त्वाद्यामत्र सिध्यन्ति योगिनः ।
कालान्तरेण व्यक्तीनां मज्जनं जायते यदि ॥१०४॥
सान्निध्यं शक्तिभावेन नित्यं कुर्वन्ति तत्र च ।
योगेश्वरामरा सिद्धा स्मृत्वाकारं तदात्मकम् ॥१०५॥
शैलमृद्दारुधातूत्थां व्यक्तिं संस्थापयन्ति च ।
यत्रानुवेदं कुरुते मन्त्रशक्तिधरास्तु ये ॥१०६॥
येनाच्युतीयनाम्ना वै वचत् स्थानान्तरं स्मृतम् ।
सान्निध्यस्त्र वैरूप्यं शब्दमूर्तिधरस्य च ॥१०७॥
भिन्नात्मना स्वयव्यक्तरूपेऽन्यरूपेषु च ।

वेदशास्त्रार्थतत्त्वज्ञं कृत्वा तं पुरुषोत्तमः ॥१२०॥
सृष्टौ नियोज्य ब्रह्माणं ततस्त्वन्तर्हितोऽभवत् ।
तस्मिन्नन्तर्हिते देवे विपर्यस्तमतिर्विधिः ॥१२१॥
इतिकर्तव्यतामुग्धो बभूवोद्विग्नमानसः ।
तदासौ तप आतिष्ठद्द्रष्टुकामो जगत्पतिम् ॥१२२॥
बहुकालेष्वतीतेषु तप्यमाने पितामहे ।
आविरास जगन्नाथो ब्रह्मणः पुरतो द्विजा ! ॥१२३॥
तं दृष्ट्वा कमलाकान्तं परमाश्चर्यसंयुतः ।
तुष्टाव विविधैः स्तोत्रैः श्रुतिसिद्धैश्चतुर्मुखः ॥१२४॥
तेन स्तुतो जगद्धाता करुणापूर्णमानसः ।
ब्रह्माणं समुवाचेदं मेघगम्भीरया गिरा ॥१२५॥
त्वया वत्स कृतस्त्वेव तपस्तप्तं सुदुस्तरम् ।
तुष्टोऽहं तपसा तेऽद्य किं तवाभीप्सितं वद ॥१२६॥

ब्रह्मा ।

नान्यदस्ति फलं देव भवतो दर्शनादृते ।
त्वया नियोजितोऽहं हि जगत्सृष्टौ पुरा विभो ! ॥१२७॥
स्रष्टुं जगदिदं सर्वं का शक्तिर्मम माधव ! ।
अत्रोपायं समाचक्ष्व करुणामृतवारिधे ॥१२८॥
इत्युक्तो ब्रह्मणा देवो मन्त्रमष्टाक्षरं परम् ।
तस्योपदिश्य भगवान् तदर्थांश्च विशेषतः ॥१२९॥
अष्टाक्षरमिमं मन्त्रं सन्ततं हृदि चिन्तयन् ।
मन्त्रस्यास्य प्रभावेण जगत्स्रष्टुं त्वमर्हसि ॥१३०॥
सर्गकर्मणि संवृत्ते एतन्मन्त्रसमाहितः ।
आविर्भविष्यति पुरः साक्षान्नारायणो विभुः ॥१
तमभ्यर्च्य देवेश मन्त्रेणानेन पद्मज ! ।

ततस्त्वदधिकारान्ते मत्पदं प्राप्स्यसि ध्रुवम्॥१३२॥

इत्युक्त्वान्तर्दधे देवः ततस्तुष्टश्चतुर्मुखः ।
जपमानो मूलमन्त्रं चेतनाचेतनात्मकम् ॥१३३॥

सृष्ट्वा जगदिदं सर्वं विरिञ्चिर्मुनिपुङ्गवा ! ।
नारायणं द्रष्टुकामस्तपस्तेपे सुदुस्तरम् ॥१३४॥

आविरासीत्ततो दिव्यं विमानं शुभलक्षणम् ।
श्रीवैकुण्ठाच्चतुर्वक्त्रं तपःफलमिवाद्भुतम् ॥१३५॥

अनेककोटिमार्ताण्डविलसत्तेजसावृतम् ।
अनन्तविहगेशानविष्वक्सेनपुरोगमम् ॥१३६॥

श्रिया सुदर्शनेनापि पार्श्वयोः समनुद्रुतम् ।
कुमुदाद्यैः परिवृतं सर्वावयवशोभितम् ॥१३७॥

वृत्ताकारं शुभकरं सर्वालङ्कारशोभितम् ।
तं दृष्ट्वा सहसोत्थाय सन्तुष्टः कमलासनः ॥१३८॥

पुलकाञ्चितसर्वाङ्गः सन्तोषोत्फुल्ललोचनः ।
प्रणम्य प्राञ्जलिः स्थित्वा विमानमवलोकयत् ॥१३९॥

पीठाद्येषु शिरान्तेषु विमानावयवेषु च ।
भूराद्यं सत्यपर्यन्तं लोकानां सप्तकं क्रमात् ॥१४०॥

अध्वना भुवनाध्वादिषट्कं वर्णात्यपश्चिमम् ।
धरादिपुम्पर्यन्तं च तत्त्ववृन्दं मुनीश्वराः ! ॥१४१॥

सत्यादिपमवस्थाय गुम्फितं सन्ददर्श ह ।
ततस्तु देवतावृन्दं क्रमेण समलोकयत् ॥१४२॥

पद्माधारशिलाधस्तादनन्तममितद्युतिम् ।
धरां तदूर्ध्वे सामर्थ्यशक्तिं चापि शिलान्तरे ॥१४३॥

मञ्जनाः मध्यकुम्भे प्रागादिकमशाष्टकेः ।
वासुदेवादिदिक्शान्तः प्रभवाव्ययवेगा ॥१४४॥

सस्थितान् तत्त्विधानेषु मध्यादीशदिगन्तिमम् ।
ज्ञानभासादिकाना च शक्तीना नवक क्रमात् ॥१४५॥
धर्मादीनामष्टक च तथा पादशिलाष्टके ।
अकारादिक्षकारान्त वर्णचक्र तदन्तरे ॥१४६॥
सर्वाधारमय चक्र शाखामूल समाश्रितम् ।
ज्ञानक्रियात्मके तत्वे शाखयो परमेश्वरम् ॥१४७॥
आद्य ह्युदुम्बरस्योर्ध्वे तत्पृष्ठे धर्ममेव च ।
कवाटयोस्तु कालाग्नि वरुण च मुनीश्वरा ! ॥१४८॥
शङ्खपद्मनिधी चैव तदग्रद्वारपार्श्वयो ।
ततो जघासमूहे तु तथैवान्तरभूमिषु ॥१४९॥
कालादिवसुधान्ताश्च भावोपकरणामरान् ।
जघाग्रे केशवादीना द्विषट्क प्रस्तरस्थले ॥१५०॥
चक्राद्यायुधसघ च सत्तारूपेण सस्थितम् ।
नासाचतुष्कस्थानेषु वराहादि चतुष्टयम् ॥१५१॥
सशक्तिक तु पत्राद्यैर्भूषिते वेदिकातले ।
सुदर्शन शिखाकुम्भे वासुदेव परात्परम् ॥१५२॥
तदग्रदेशे हेतीश सूर्यकोटिसमप्रभम् ।
सर्वलोकमय विप्रा ! सकलाध्वमय तथा ॥१५३॥
सर्वतत्त्वमय चैव सर्वदेवमय तथा ।
आनन्दमयसज्ञ तद्विमान कमलासन ॥१५४॥
एव क्रमेणावलोक्य प्रणिपत्य पुन पुन ।
तथा प्रदक्षिणीकृत्य विष्वक्सेनाभ्यनुज्ञया ॥१५५॥
विमानान्त सम्प्रविश्य जपन्नष्टाक्षर मनुम् ।
अभ्यन्तरे विमानस्य गर्भभूमौ तु गम्यत ॥१५६॥
सत्पीठमाम्नाय सस्थित पुरुषोत्तमम् ।

प्रावृड्जलदसन्दोहविलसद्दिव्यविग्रहम् ॥१५७॥
सर्वदेवमय देव सर्वेषा तेजसान्निधिम् ।
सर्वलक्षणसम्पूर्णं सार्वज्ञ्यादिगुणैर्युतम् ॥१५८॥
वपुषा सुन्दरेणैव दिव्येनानिष्कृतेन च ।
मुञ्चन्तमनिश देहादालोक ज्ञानलक्षणम् ॥१५९॥
प्रयत्नेन विना ज्ञानशक्त्युदयायिना महत् ।
घनकुञ्चितनीलालिदलिताञ्जनसन्निभैः ॥१६०॥
कर्पूरधूसरैर्दिव्यै पुष्पसवलितान्तरै ।
किरीटमकुटाक्रान्तै शोभित स्वशिरोरुहै ॥१६१॥
बालचन्द्रप्रतीकाशफालोद्यत्तिलकोज्ज्वलम् ।
सुभ्रु सुनस शान्त सविलासस्मिताधरम् ॥१६२॥
किंचिदारक्तगोक्षीरशुद्धनीलाब्जलोचनम् ।
शीतलैर्दृष्टिपातैस्तु जगदाप्यायकारिणम् ॥१६३॥
विलसद्गण्डफलक श्रवणोज्ज्वलकुण्डलम् ।
मुखसौन्दर्यनिष्यन्दचुबुकस्थलशोभितम् ॥१६४॥
निष्कळङ्कशरच्चन्द्रनिभसन्मुखमण्डलम् ।
कम्बुग्रीव पीनांस दीर्घबाहु महोरसम् ॥१६५॥
चतुर्भुजमुदाराङ्ग विलसत्पाणिपङ्कजम् ।
पीतकौशेयवसन निम्ननाभि तनूदरम् ॥१६६॥
चारूरुयुगळ चारुजङ्घाद्वितयमुज्ज्वलै ।
मणिनूपुरसंघर्षविलसत्पदपङ्कजम् ॥१६७॥
दिव्यगन्धानुलिप्ताङ्ग दिव्यास्रग्धर तथा ।
दिव्याभरणोपेत दिव्यालङ्कारमण्डितम् ॥१६८॥
अनेकरत्नखचितकिरीटमकुटोज्ज्वलम् ।
कौस्तुभेनोपभिन्नेन श्रीवत्सेनाप्यलङ्कृतम् ॥१६९॥

रक्तकाञ्चनसन्मुक्तायुक्तया वनमालया ।
सन्नह्मसूत्रया चैव शोभितं परमेश्वरम् ॥१७०॥
मुख्यदक्षिणहस्तेन भीतानामभयप्रदम् ।
श्रोणीतटनिविष्टेन वामहस्तेन लीलया ॥१७१॥
ध्रियमाणं गदां गुर्वीं निषण्णां धरणीतले ।
पश्चाद्दक्षिणहस्तेन चक्रं कालानलद्युति ॥१७२॥
प्रणवध्वनिगर्भं तु हिमाद्रिशतशोधिकम् ।
शङ्खं वामकरेणापि दधानमतुलप्रभम् ॥१७३॥
स्वदेहतेजस्सम्भूतज्वालामण्डलमध्यगम् ।
करुणापूर्णहृदयं जगदुद्धरणोद्यतम् ॥१७४॥
अखिलपूर्णषाड्गुण्यविभवेनोपबृंहितम् ।
योगिध्येयमजं नित्यं जगज्जन्मादिकारणम् ॥१७५॥
साक्षाल्लक्ष्मीपतिं देवं नारायणमनामयम् ।
दृष्ट्वा प्रहृष्टहृदयः प्रणिपत्य मुहुर्मुहुः ॥१७६॥
तुष्टाव कमलाकान्तं स्तोत्रैर्नानाविधैर्विधिः ।
ततस्तत्स्तोत्रसन्तुष्टो नारायण उदारधीः ॥१७७॥
पितामहमुवाचेदं मेघगम्भीरया गिरा ।
सन्तुष्टस्तपसा तेऽहमष्टाक्षरपरायण ! ॥१७८॥
समभ्यर्च्य मामत्र युगानामयुतं विधे ।
ततो भुवं गमिष्यामि केन चित्कारणेन तु ॥१७९॥
इत्युक्तः स चतुर्वक्त्रो हर्षेण महतान्वितः ।
विमानं तत्समादाय स्थापयित्वा निजे गृहे ॥१८०॥
सात्वतोक्तविधानेन मनुनाष्टाक्षरेण तु ।
पूजयामास विधिवद्भोगैर्नानाविधैर्विभुम् ॥१८१॥
एवं बहुषु कालेषु व्यतीतेषु मुनीश्वराः ! ।

सनत्कुमारो योगीन्द्र कदाचित्क्षीरसागरात् ॥१८२॥
सत्यलोकं समासाद्य तत्र नारायणं प्रभुम् ।
दृष्ट्वा श्रिया समोपेतं सर्वचिन्तापहारिणम् ॥१८३॥
प्रणम्य प्राञ्जलिस्तिष्ठन्ननुवाचेदं चतुर्मुखम् ।
भवान् गुरुः पिता चापि मम वात्सल्यवारिधे ॥१८४॥
त्वत्तोऽन्यो नास्ति मे लोके गतिः सर्वार्थदायकः ।
दृश्यन्तं कालमीशोऽयं श्रीमान्नारायणो विभुः ॥१८५॥
भवताराधितः सम्यग्भोगैर्नानाविधैरपि ।
अद्याहं द्रष्टुमिच्छामि भवदाराधितं विभुम् ॥१८६॥
नारायणं जगन्नाथं दातुमर्हसि मे पितः ! ।
इति सम्प्रार्थितो ब्रह्मा पुत्रवात्सल्यवानपि ॥१८७।
विप्रयोगभिया विष्णोश्च तापवशोऽभवत् ।
तदा नारायणः श्रीमान् चिन्ताव्याकुलमानसम् ॥१८८॥
दृष्ट्वाब्जसम्भवं प्रीत्या वाक्यमेतदुवाच ह ।
चिन्तां जहि महाबुद्धे! विश्लेषान्मम पद्मज! ॥१८९॥
अर्चान्तरमिदं मेऽपि ददामि तव सम्प्रति ।
मामादाय मुनीन्द्राय सम्प्राप्य धरणीतलम् ॥१९०॥
संस्थाप्य पूजयेन्नित्यं पद्मकूटाभिधे गिरौ ।
यत्र मां द्रष्टुमनिशं तपस्यन्ति मुनीश्वराः ॥१९१॥
इत्युक्त्वा भगवान् देवो रूपं स्वं हृदयोद्भवम् ।
श्रिया पुष्ट्या च सहितं प्रायच्छद्ब्रह्मणे तदा ॥१९२॥
पितामहस्तदादाय रूपं श्रीपुष्टिसंयुतम् ।
अभ्यार्चयद्विशेषेण भोगैर्विस्मितमानसः ॥१९३॥
ततः सनत्कुमारं तमाहूय कमलोद्भवः ।
सन्तोषोत्फुल्लनयनः प्रोवाचेत्थं मुनीश्वरः! ॥१९४॥
मा खेदमागे हे तात! मत्पुत्रेऽसि भवान्मम ।

साक्षान्नारायणो देवो यत सानुग्रहस्त्वयि ॥१९५॥
इत्युक्त्वाथ मुनीन्द्राय दिव्यमष्टाक्षर मनुम् ।
उपदिश्य तदर्थश्च तथा सात्वतसञ्ज्ञकम् ॥१९६॥
महोपनिषद तन्त्र ग्राहयामास योगिनम् ।
यो मूलवेदो विख्यातस्तादृक्षम्मात्ररसितम् ॥१९७॥
सिद्धिमोक्षप्रद विप्रा । सर्वशास्त्रार्थगर्भितम् ।
यत्र शान्ततर व्यूह शान्तोदितमनन्तरम् ॥१९८॥
सुषुप्तिसञ्ज्ञ स्वप्नाख्य जाग्रद्व्यूह यथोदितम् ।
मूर्त्यन्तर केशवाद्य प्रादुर्भावान्तर तथा ॥१९९॥
हृत्पद्मपद्मपीठादौ लक्ष्मीपुष्ट्यादिशक्तिभि ।
लाञ्छनै शङ्खचक्राद्यैर्गरुडप्रमुखैरपि ॥२००॥
भूतसिद्धादिभि शास्त्रपर्यन्तै पूजन हितम् ।
विश्वत्रातृनृसिंहस्य दीक्षापूर्वं तथा परम् ॥२०१॥
विभवव्यूहसूक्ष्माख्यमधिकार यथाक्रमम् ।
समयीपुत्रकादीना चतुर्णामभिषेचनम् ॥२०२॥
तथैव समयाचार मूर्तीना स्थापनक्रम ।
मन्त्रमण्डलमुद्राणा कुण्डादीना च लक्षणम् ॥२०३॥
यत्र प्रोक्त भगवता लोकोज्जीवनहेतुना ।
तदर्थश्चोपदिश्याथ तत्प्राप्ति च न्यदर्शयत् ॥२०४॥
इद हि सात्वत तन्त्र व सुदेवाज्जगत्प्रभो ।
सङ्कर्षणेन सम्प्राप्त तस्मात्सङ्कर्षणात्मन ॥२०५॥
प्रद्युम्नाख्येन सम्प्राप्तमनिरुद्धेन वै तत ।
अनिरुद्धात्मना प्राप्त मया रुद्रादिभिस्तथा ॥२०६॥
सर्वेषु दिव्यशास्त्रेषु सात्वतन्त्र्यधिक मुने ।
यथा सर्वेषु मन्त्रेषु नास्ति चाष्टाक्षरात्परम् ॥२०७॥

एतदुक्तविधानेन नारायणमसु मुने ।
समभ्यर्चय लोकेश भोगैः सास्पर्शिकादिभिः ॥२०८॥
वैकुण्ठवर्धनं नाम क्षेत्रमस्ति महीतले ।
तत्रास्ति पञ्चकूटाख्यः कश्चिद्गिरिवरो महान् ॥२०९॥
कावेर्या उत्तरे भागे मुने योजनमात्रतः ।
अप्राकृतं हि तत्स्थानं भूवैकुण्ठमिति श्रुतम् ॥२१०॥
पुरा भगवदाज्ञप्तः साक्षाच्छेषो हि शैलताम् ।
सम्प्राप्यागमनं विष्णोः प्रतीक्षन् वर्तते धुना ॥२११॥
विरजाप्यंशभागेन तद्गिरेरुत्तरेतटे ।
प्रवहत्यमला नित्यं सर्वदोषप्रणाशिनी ॥२१२॥
तथैवानेकतीर्थानि क्षेत्राणि विविधानि च ।
सन्ति तत्र गिरिश्रेष्ठे मेरवाणि विबुधोत्तमैः ॥२१३॥
कलौ युगेपि तत्रत्या न दूष्यन्ति कदा चन ।
तस्य प्रलयकालेपि नाशो नास्ति गिरेर्मुने ॥२१४॥
तत्सदृशं स्थानं ब्रह्माण्डान्तर्न किञ्चन ।
तस्मिन् गिरौ मुनिवरा बहवः सन्ति सत्तमाः ॥२१५॥
नारायणमसु द्रष्टुं तपस्यन्त्यमलाशयाः ।
तेष्वप्यनुग्रहो जातो देवस्यास्य कृपानिधेः ॥२१६॥
तस्माद्विमानमेतत्त्वं समादाय समाहितः ।
तस्मिन् गिरिवरे स्थाप्य यज नारायणं प्रभुम् ॥२१७॥
एवमुक्तो मुनिवरः सन्तुष्टहृदयस्ततः ।
पितामहं देवदेवं दृष्ट्वा नारायणं प्रभुम् ॥२१८॥
परा गुन्या वैष्णमाप्या हि हस्तार्थं मुनिसत्तमः ।
समानीय गिरिश्रेष्ठे तन्मूर्ध्नि मुनिसेविते ॥२१९॥
तेन तं धेयम्यैन विमानममितप्रभम् ।

संस्थापयामास तदा तत्रत्या मुनिपुङ्गवाः ॥२२०॥
दृष्ट्वा नारायणं देवं हर्षेण महतान्विताः ।
अस्माकमिह कल्याणं कल्याणमिति चोचिरे ॥२२१॥
ततः कल्याणतीर्थं तत्प्रवदन्ति मनीषिणः ।
ततः सनत्कुमारस्तु सात्वतोक्तविधानतः ॥२२२॥
समर्चयन् जगन्नाथं सन्तुष्टहृदयोऽभवत् ।
यतो नारायणस्तत्र गिरौ वसति सन्ततम् ॥२२३॥
नारायणाचल इति ततःप्रभृति कथ्यते ।
तत्र नारायणस्यैवमवतारः समीरितः ॥२२४॥
अर्चान्तरन्तु यत्प्रोक्तं नारायणहृदुद्भवम् ।
तच्चापि तं गिरिं प्राप कुतश्चित्कारणात्पुरा ॥२२५॥
तद्वृत्तमिह वक्ष्यामि शृणुध्वं मुनिपुङ्गवाः ! ।
पुरा नारायणः श्रीमान् लोकरक्षणहेतुना ॥२२६॥
अवतीर्य रघोर्वंशे रामो रक्षःकुलान्तकः ।
पितृवाक्यापदेशेन दण्डकारण्यवासिनाम् ॥२२७॥
मुनीनां रक्षणार्थाय तत्र तत्राश्रमे वसन् ।
लक्ष्मणेन च लावण्यपूर्णया सीतयान्वितः ॥२२८॥
नारायणगिरिं प्राप्य कदाचिन्मुनिसेवितम् ।
कृतातिथ्यो मुनिगणैः कौतूहलसमन्वितैः ॥२२९॥
अधित्यकायां तस्याद्रेस्तुङ्गशृङ्गेऽतिमञ्जुळे ।
सीतावारिविहारार्थं सुमित्रासूनुना क्षणात् ॥२३०॥
धनुष्कोट्या कृते खाते सपरसञ्जातवारिणि ।
विहृत्य सीतयासार्धं निमज्यान्तर्जले जपन् ॥२३१॥
ऋचोऽघमर्षणीस्तत्र ददर्श परमाद्भुतम् ।
रूपं भगवतः पश्चादुन्मज्यालोच्य राघवः ॥२३२॥

पर्यटन् परितश्शैलं विस्मयाविष्टमानसः ।
पारे कल्याणतीर्थस्य पद्मपत्रायतेक्षणम् ॥२३३॥
पश्यन्नारायणं देवं प्रणम्य शिरसाऽसकृत् ।
पूजयन् कतिचिन्मासाननुमासं तदनन्तरम् ॥२३४॥
उवाच भगवान् रामं परितुष्टोस्मि पूजया ।
दत्ताभयो मुनीनां त्वं जित्वा राक्षसपुङ्गवान् ॥२३५॥
सर्वैः परिजनैः सार्धं साकेतपुरमाविश ।
तत्राहमागमिष्यामि तदा मां यष्टुमर्हसि ॥२३६॥
इत्युक्तो रघुशार्दूल इन्दिरारमणाज्ञया ।
कृत्वा निष्कण्टकां पृथ्वीं साकेतनगरे वरे ॥२३७॥
अभिषिक्तः स्वभक्ताय राक्षसेन्द्राय धीमते ।
स्वयमाराधितं देवं दत्वा रङ्गेश्वरं विभुम् ॥२३८॥
नीते रङ्गाधिपे तेन चिन्ताविष्टोभवत्तदा ।
तद्विदित्वा चतुर्वक्त्रः श्रीभूमिसहितं विभुम् ॥२३९॥
नारायणाख्यमादाय साकेतनगरीं जवात् ।
समभ्येत्य च रामाय ददौ स्वाराधितं हरिम् ॥२४०॥
ततो रामः समहृष्टः श्रीभूमिसहितं विभुम् ।
अर्चयामास विधिवच्चिरं निजगृहे द्विजाः ॥२४१॥
अतो रामप्रिय इति तस्य नामाभवद्द्विजाः ।
ततः कुशो रामपुत्रः स्वपिताराधितं विभुम् ॥२४२॥
पूजयन् स्वसुतां कांचिद्यदुराजाय भूभृते ।
दत्वा तया प्रार्थितः सन् प्रादात्तस्यै तमच्युतम् ॥२४३॥

ततस्तु तत्क्रमाल्लब्ध्वा यदुवंशसमुद्भवः ॥२४५॥
कृष्णः श्रियःपतिं देवं पूजयन् विनतासुतात् ।
प्राप्तं किरीटमतुलं कलशार्णवशायिनः ॥२४६॥
समर्प्य तस्मै देवाय विविधोत्सवमातनोत् ।
ततः कदाचिन्मुसली तीर्थयात्रानिमित्ततः ॥२४७॥
गत्वा नारायणगिरिं तत्र कल्याणनामके ।
तीर्थे तथाष्टतीर्थेषु स्नात्वा तच्छैलमूर्धनि ॥२४८॥
योगासनसमासीनं योगानन्दं जगत्प्रभुम् ।
सर्वदेवमयं देवं सर्वेषां तेजसां निधिम् ॥२४९॥
सर्वलक्षणसम्पूर्णं सार्वज्ञ्यादिगुणैर्युतम् ।
निष्टप्तकनकाभंच सम्पूर्णाङ्गं महातनुम् ॥२५०॥
घोरशार्दूलवदनं चण्डमार्ताण्डलोचनम् ।
सौदामिनीचयप्रख्यैर्लोमभिःपरिपूरितम् ॥२५१॥
अरुणाम्भोजपत्राभवक्त्राधिककरेरुहम् ।
चलत्फणीश्वरसटं चन्द्रकोटितटिद्द्युतिम् ॥२५२॥
प्रळयाम्बुधिनिर्घोषमुद्गिरन्तं स्ववाचकम् ।
युगान्तहुतभुग्ज्वालामण्डलान्तर्व्यवस्थितम् ॥२५३॥
जान्वासक्तभुजद्वन्द्वं योगपट्टविभूषितम् ।
रथाङ्गशंखधर्तारं पश्चाद्बाहुद्वयेन च ॥२५४॥
मार्ताण्डकोटिसदृशकिरीटमकुटोज्वलम् ।
कौस्तुभेनोरसिस्थेन श्रीवत्सेनाप्यलंकृतम् ॥२५५॥
रत्नकाञ्चनसन्मुक्तायुक्तया वनमालया ।
सब्रह्मसूत्रया चैव शोभितं परमेश्वरम् ॥२५६॥
दिव्यगन्धानुलिप्ताङ्गं दिव्याम्बरधरं तथा ।
दिव्यमाल्यावेष्टनोपेतं दिव्याल्ङ्कारमण्डितम् ॥२५७॥

सुभीषण सौम्यरूप स्वाश्रिताभीष्टसिद्धिदम् ।
देव नरहरिं दृष्ट्वा नत्वा तत्पादपङ्कजे ॥२५८॥
स्तोत्रैर्नानाविधै स्तुत्वा सन्तुष्टहृदयो हली ।
तस्मिन् गिरिवरे विश्रान्तस्तत्र च सचरन् ॥२५९॥
आनन्दमयमध्यस्थ सौन्दर्यामृतवारिधिम् ।
दृष्ट्वा नारायण देव निमग्नो विस्मयाम्बुधौ ॥२६०॥
नत्वा तत्पादकमले तुष्टावेत्थ जगत्पतिम् ।
जितन्ते पुण्डरीकाक्ष जितन्ते भक्तवत्सल ॥२६१॥
जितन्ते कमलाकात जितन्ते पुरुषोत्तम ।
नारायण नमस्तेऽस्तु वासुदेव नमोऽस्तु ते ॥२६२॥
नमोऽस्तु विष्णवे तुभ्य नमस्ते सर्वशेषिणे ।
नमस्ते पररूपाय नमस्ते व्यूहरूपिणे ॥२६३॥
नमो विभवरूपाय नमस्तेऽन्वन्तरात्मने ।
नमस्तेऽर्चावताराय नानाकाराय ते नम ॥२६४॥
भवान् हि लोकरक्षार्थं लक्ष्म्या कारुण्यरूपया ।
सुदर्शनेनापि युक्तो विहरस्यत्र भूधरे ॥२६५॥
अद्य मे सफला दृष्टि सौन्दर्यामृतवारिधि ।
यद्भवान् सर्वलोकेशो मम दृष्टिपथ गत ॥२६६॥
पुण्यक्षेत्रेषु सर्वेषु सर्वेष्वायतनेषु च ।
न पश्यामि जगन्नाथ भगवन्त भवादृशम् ॥२६७॥
शरण त्वा प्रपन्नोस्मि शरणागतवत्सल ।
कटाक्षै करुणापूर्णै समालोक्य मा विभो ॥२६८॥
एव नानाविधै स्तोत्रै स्तुतो नारायणो हरि ।
उवाच बलभद्र त करुणापूर्णमानस ॥२६९॥
बलभद्र भवान्भक्त दासोसि मम किङ्कर ।

अभीप्सितं किं भवतो ब्रूहि तत्प्रददामि ते ॥२७०॥
इत्युक्तो बलभद्रोयं प्रत्युवाच जगत्प्रभुम् ।
नारायण दयाम्भोधे तव कैङ्कर्यतो विना ॥२७१॥
किमस्त्यभीप्सितं नाथ त्वामिहार्चयितुं विभो ।
अभीप्सामि रमाकान्त पूरयास्य मनोरथम् ॥२७२॥
इति सम्प्रार्थितो देवः प्रत्युवाच बलं तदा ।

श्रीनारायणः ।

अस्ति ते विमलाभक्तिः मयि यादवनन्दन॥२७३॥
प्रथमं शेषरूपो मे कैङ्कर्यमकरोद्भवान् ।
ततस्तु लक्ष्मणो भूत्वा मामाराधितवानिह ॥२७४॥
इदानीमपि मां यष्टुं बलभद्र त्वमर्हसि ।
कलावपि युगेभूयः कश्चिद्भूत्वा द्विजोत्तमः ॥२७५॥
नानाविधैर्भोगजालैरर्चनं मे करिष्यसि ।
इत्युक्तो देवदेवेन बलभद्रः प्रहृष्टधीः ॥२७६॥
पूजयामास विधिवद्भोगैर्नानाविधैर्हरिम् ।
तदर्चनेनातितुष्टः श्रीमान्नारायणो विभुः ॥२७७॥
उत्सवादीन् कर्तुकामं बलमेवमुवाचह ।
श्रिया भूम्या च सहितं रूपं मम हृदुद्भवम् ॥२७८॥
मधुरायां भवद्गेहे पूज्यते किल यादव ।
तदानीयोत्सवार्चां मे कृत्वा नानाविधोत्सवान् ॥२७९॥
कर्तुमर्हसि भक्त्या त्वं तेन तुष्याम्यहं हलिन् ।
एवमुक्तो रौहिणेयः त्वरया मधुरां पुरीम् ॥२८०॥
एत्य कृष्णाय तद्वृत्तं विस्तरेण न्यवेदयत् ।
तच्छ्रुत्वा भगवान् कृष्णो बभूवातीव विस्मितः ॥२८१॥
ततो यदूद्वहौ कृष्णबलरामौ श्रियःपतिम् ।

शिबिकाया समारोप्य सर्वाभरणभूषितम् ॥२८२॥
यात्रोपकरणे सर्वैश्चतुरङ्गबले सह ।
माघमासे तु चित्रर्क्षे सुमुहूर्ते मनोहरे ॥२८३॥
नीत्वा गिरिवरं तत्र नारायणपुरोभुवि ।
संस्थाप्य च महाऽऽनन्दात्पूजयामासतुर्हरिम् ॥२८४॥
ततस्तु देवदेवस्य कर्तुकामौ महोत्सवम् ।
बल्यर्चां स्नपनार्चां च प्रतिष्ठाप्याजयां हरे ॥२८५॥
महोत्सवं तु विधिवत्कृत्वा देवस्य शार्ङ्गिणः ।
फाल्गुने मासि हस्तर्क्षे सर्वतीर्थसमाश्रिते ॥२८६॥
तस्मिन् कल्याणसरसि चक्रातेऽवभृथोत्सवम् ।
यतस्तत्रार्चितो देवो यादवाभ्यां रमासखः ॥२८७॥
तदाप्रभृति तच्छैलो यादवाद्रिरितीर्यते ।
इति नारायणस्याख्यं महात्म्यं कीर्तितं मया ॥२८८॥
इतः परं यच्छ्रोतव्यं कथ्यतां तन्मुनीश्वराः ।

मुनयः ।

सर्वज्ञ मुनिशार्दूल तत्र यादवभूधरे ॥२८९॥
अस्ति कल्याणतीर्थं यत्तदुत्पत्तिं तथैव हि ।
तच्छैलाग्रे सुस्थितस्य नृहरेर्वैभवं वयम् ॥२९०॥
आकर्णयितुमिच्छामस्तदपि त्वं प्रकाशय ।

नारदः ।

साधु पृष्टं महाभागा भवद्भिः सात्त्विकैरपि ॥२९१॥
कल्याणतीर्थमहात्म्यं वक्ष्यामि शृणुताधुना ।
पुरा वराहो भगवान् समागत्य रसान्तरम् ॥२९२॥
समुद्धृत्य यथापूर्वं संस्थाप्याथ महीधरे ।
तस्मिन् शेषाचले देव्या भूम्या सह समाश्रितः ॥२९३॥

तदा देवाङ्गसंलग्ना समुद्रजलबिन्दव ।
गळितास्तत्रतत्तीर्थे कल्याणमभवद्विजा ॥२९४॥
तदा देवा पुष्पवर्षे समाकीर्य जगत्पतिम् ।
तुष्टुवुर्विविधै स्तोत्रै ननृतुश्चाप्सरोगणा ॥२९५॥
दिव्यदुन्दुभयो नेदु बभूव मुदित जगत् ।
ततो ब्रह्मादयो देवा सर्वे देवर्षिपुङ्गवा ॥२९६॥
तत्रागत्य वराहन्त प्रार्थयामासुरच्युतम् ।

देवा ।

देवदेव जगन्नाथ सर्वलोकैकरक्षक ॥२९७॥
त्वया हतो महादैत्यो वसुधापि समुद्धृता ।
वय च रक्षिता देव करुणामृतवारिधे ॥२९८॥
इहानेनैव रूपेण भवान् भूम्या समन्वित ।
स्थातुमर्हसि लोकेश भक्तानुग्रहकाम्यया ॥२९९॥
इति देवै प्रार्थितोय वराहो भगवान् हरि ।
स्वाङ्के वसुन्धरा न्यस्य तस्या उपदिशन् मनुम् ॥३००॥
प्राग्भागे तस्य तीर्थस्य ह्यद्याप्यास्ते मुनीश्वरा ।
तत्र तेन वराहेण स्वाङ्गस पतगेश्वर ॥३०१॥
श्वेतद्वीपाच्छुद्धमृद समाहृत्य सरस्तटे ।
पुरा निक्षिप्तवान् सा हि मृत्तिका लोकपूजिता ॥३०२॥
फाल्गुने मासि कल्याणसञ्ज्ञे तस्मिन् सरोवरे ।
गङ्गाद्या सकला नद्यो भजन्ते सन्निधिं द्विजा ॥३०३॥
तन्मासि पौर्णमास्या हि ब्रह्माद्या देवतोत्तमा ।
स्नातु कल्याणसरसि समागच्छन्ति भक्तित ॥३०४॥
दिव्य कल्याणतीर्थे तद्ये पश्यन्ति स्मरन्ति वा ।
प्रदक्षिण वा कुर्वन्ति प्रणमन्ति भजन्ति वा ॥३०५॥

ये वा तत्तीर्थमाहात्म्य भक्त्या शृण्वन्ति मानवा ।
स्नान वा तत्र कुर्वन्ति तत्तीर्थन्तु पिबन्ति वा ॥२०६॥
ये वार्चयन्ति पुष्पाद्यैस्ते जना लोकपावना ।
आयुरारोग्यमैश्वर्यं विद्या तेजो जय यश ॥२०७॥
सत्सुताश्चापि सन्तोष यद्यदिष्टमिह द्विजा ।
तत्सर्वमचिरादेव लभन्ते नात्र सशय ॥२०८॥
तस्य तीर्थस्य माहात्म्य ब्रह्माद्यैरपि दैवतै ।
सम्यङ्न शक्यते ज्ञातु किं पुन खलु मादृशै ॥२०९॥
इत्युक्त लेशतस्तीर्थमाहात्म्य मुनिपुङ्गवा ।
अथ श्रीनरसिंहस्य माहात्म्य वक्ष्यते द्विजा । ॥२१०॥
प्रह्लादो नृहरेर्भक्त पुरा वैष्णवसत्तम ।
तपसाराधितु देव नृसिंह भक्तिसयुत ॥२११॥
अन्वेषमाणो विमल तप स्थान धरातले ।
नारायणाचल प्राप्य दृष्ट्वा तद्रामणीयकम् ॥२१२॥
नास्त्यस्मादधिक स्थान भुवीति कृतनिश्चय ।
तत्र कल्याणसरसि स्नात्वा तत्तीरगा शुभाम् ॥२१३॥
श्वेतमृत्स्ना समादाय धृत्वा चैवोर्ध्वपुण्ड्रकान् ।
तच्छैलशिखर प्राप्य विविक्तमतिनिर्मलम् ॥२१४॥
यमादिनियमैर्युक्तो नृसिंहैकाक्षर शुभम् ।
तथैवानुष्टुभ मन्त्र जपमानस्तदेकधी ॥२१५॥
द्रष्टु नरहरिं भूयस्तपस्तेपे सुदुस्तपम् ।
ततस्तत्तपसा तुष्टो नृहरिर्भक्तवत्सल ॥२१६॥
प्रादुरासीज्जगन्नाथ तस्य शैलस्य मूर्धनि ।
प्रह्लादस्तत्र फल नरहरिं वात्सल्यवारानिधिं
श्रीवत्साङ्कितवक्षस शुभगुण चक्राब्जभास्वत्करम् ।

एवं नारायणगिरेर्माहात्म्यं लेशतो मया ।
एकीर्तितं मुनिवरा ! किमन्यच्छ्रोतुमिच्छथ ॥३२९॥
इति श्रीपाञ्चरात्रे ईश्वरसंहितायाम्
यादवाद्रिमाहात्म्यं नाम
विंशोऽध्यायः ।

अथ एकविंशोऽध्यायः ।

मुनयः ।
भगवन्मुनिशार्दूल सर्वज्ञ वदतां वर ! ।
अदीक्षितानां पूजादौ प्रागुक्तानधिकारिता ॥१॥
तस्माद्दीक्षाविधिं सम्यग्वदस्व मुनिपुङ्गव ! ।
नारद ।
शृणुध्वं मुनयः ! सर्वे भवन्ति भगवन्मया ॥२॥
ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वा मुनिपुङ्गवाः ! ।
पूर्वोक्तलक्षणो ज्ञाता कश्चिदद्दृश्यत पुमान् ॥३॥
संसारभयभीतस्तु निर्वाणमभिवाञ्छति ।
वैराग्यधीरचपलश्चिरकालं गुरोर्गृहे ॥४॥
सम्यितो दास्यभावेन स्वदेहादिगविवर्जितः ।
शरणं तस्याश्रितः कृष्णस्यारण्ये निवेश्य च ॥५॥
कृतार्थस्तु च द्रष्टव्य अजनेर्गा णावधि ।
ज्ञात्वा दापकं सम्यक्मायाभिरेवेथो दिते ॥६॥
शृण्वान्निहत्पुंसि छेदनाय प्रयत्नतः ।
कृत्वा परिपीडानामसमर्थानु स्यान्ति ! ॥७॥
का प्रमादाय तस्य कार्यं वा द्वादशाक्षिरम् ।
निर्दोषतरो मिनं पूर्वे याचितं मन्त्रभोजने ॥८॥

स्तुतिसम्मार्जनस्नानपुष्पाद्याहरणोद्यमे ।
आश्रमे वैष्णवानां तु दिव्याद्यायतने विभोः ॥९॥
अनिशं भगवद्बिम्बस्यापीठादवलोकने ।
अभिजाततनुर्यः प्राग्दुष्कृतैर्मलिनीकृतः ॥१०॥
सांप्रतं भगवद्भक्त्या पवित्रीकृतमानसः ।
अहोरात्रोषितो भूत्वा नखकेशादिलुण्ठितः ॥११॥
पञ्चगव्यमथापाद्य हृदाद्यैः सकुशोदकम् ।
मन्त्रैस्तद्वासुदेवाद्यैः समावर्त्य चतुश्शतम् ॥१२॥
एवं दिनचतुष्कं तु स्नापयेत्तेन तं सुधीः ।
प्रत्यहं चतुरो वारानाप्रभातान्निशागमम् ॥१३॥
ब्रह्मतीर्थचतुष्कं त्वापूर्यापूर्य समं पिबेत् ।
क्रमात्सद्योदितैर्मन्त्रैः समाचम्यान्तरान्तरा ॥१४॥
अतृप्तमशनं कुर्यादन्ते क्षीराज्यभावितम् ।
सेवयेत्फलमूलैर्वा अहोरात्रचतुष्टयम् ॥१५॥
इति भक्त्या प्रपन्नानामाजीवमपि दुष्कृतान् ।
कथितं विरतानां च देहशुद्धिकरं परम् ॥१६॥
ब्रह्मकूर्चसमेतं तु प्रायश्चित्तं मयाद्य ते ।
ज्ञात्वा महत्त्वं दोषाणां त्रिविधानां तु वै पुनः ॥१७॥
सम्भवे सति हेमादिदानं सततमाचरेत् ।
पूर्वोक्ताद्विहितात्कालाल्लघुदुष्कृतिनां क्रमात् ॥१८॥
चतुर्थांशेन ह्रासस्तु ब्रह्मकूर्चं पिबेत्ततः ।
कालेन वर्णोत्कर्षेण सह सामान्यमुच्यते ॥१९॥
प्रायश्चित्तं हि सर्वेषां सर्वकल्मषनाशनम् ।
उत्तरोत्तरतां बुध्वा प्रथमं दुष्कृतस्य च ॥२०॥
क्षपयेद्वा द्विजेन्द्रस्तु मासैर्द्वित्रिचतुर्भिः ।

नृपविट्छूद्रजातीय एकैकं वर्धयेत्क्रमात् ॥२१॥
मासमेकादिकान् कालान् समारभ्य यथाक्रमात् ।
दुराचारोऽपि सर्वाशी कृतघ्नो नास्तिकः पुरा ॥२२॥
समाश्रयेदादिदेवं श्रद्धया शरणं यदि ।
निर्दोषं विद्धि तं जन्तुं प्रभावात्परमात्मनः ॥२३॥
किं पुनर्योऽनुतापार्तः शासनेऽस्मिन् हि संस्थितः ।
विरतः कुकृताच्चैव भक्तिच्छायां समाश्रितः ॥२४॥
एवं संशुद्धदोषाणां बहुजन्मार्जितस्य च ।
कल्मषस्य विघातार्थं नारसिंहीं महामते! ॥२५॥
कृत्वा वै साम्प्रतं दीक्षां दद्याद्वै मन्त्रपूर्वकम् ।
अराधनं हि तस्यैव वैभवीयस्य वै विभो ॥२६॥
सबाह्याभ्यन्तरं चैव सम्यङ्मासचतुष्टयम् ।
मासाष्टकं वत्सरं वा बुध्या भावबलं पुरा ॥२७॥
ज्ञात्वा भव्याशयानां च प्रसादं पारमेश्वरम् ।
विभवव्यूहसूक्ष्माख्यां दीक्षां कुर्यात्तदन्तरम् ॥२८॥
अथ दीक्षाविधिं वक्ष्ये शृणुध्वं मुनिसत्तमा! ।
सम्प्राप्तप्रत्ययानां च द्विजादीनां च साम्प्रतम् ॥२९॥
सम्यक्प्रक्षीणपापानामारूढानामिह कर्मे ।
शुभेऽनुकूले नक्षत्रे तिथौ लग्ने शुभे क्षणे ॥३०॥
भक्तानामधिवासार्थं क्ष्मापरिग्रहमाचरेत् ।
पुण्यदेशेऽनुकूले च मनोज्ञे साधुसेविते ॥३१॥
गृद्धारिफलपुष्पाढ्यैकशब्देनसमन्विते ।
गोसस्यशालिसुभगे क्षुद्रप्राणिविवर्जिते ॥३२॥
तत्र वर्णानुरूपां क्ष्मां भजेत्पूर्वोक्तलक्षणाम् ।
सर्वदोषविनिर्मुक्तां सत्पक्षिमृगसेविताम् ॥३३॥

या शुभायतनोद्देशे मठगोष्ठापणैर्गृहैः ।
तोयाशयाश्रमक्षेत्रैः सद्वृतैरन्तरीकृता ॥३४॥
जलाद्रमविनिर्मुक्ता बलाद्रुक्ता च सज्जनैः ।
वनैरुपवनैर्ग्रामैः नगराद्यैः समावृता ॥३५॥
अलाभे सति लाभे वा स्वभूमेर्ब्राह्मणादिषु ।
स्वमन्त्रेणार्चनात्स्वत्वं कुर्याद्वर्णव्यपेक्षया ॥३६॥
उद्धृतां कृतखाता च ज्ञात्वा दोषान्वितां पुरा ।
शुभमृत्पूरितां कृत्वा लब्धस्थंभिरथान्तरात् ॥३७॥
ततश्च कुट्टयेत्पश्चात्पञ्चगव्येन सेचयेत् ।
युक्तां हेमादिसद्रत्नैः समीकृत्योपलिप्य च ॥३८॥
तत्रार्चनं विभोः कुर्याद्धवनान्तं च पूर्ववत् ।
भूतानां बलिदानं च सुरभीणां च तर्पणम् ॥३९॥
द्विजानां दक्षिणान्तं वै ततस्तत्र समापयेत् ।
प्राग्दिक्षु सिद्धिपूर्वं तु मण्टपं मण्डनान्वितम् ॥४०॥
स्तम्भद्विद्वितयेनैव कोणकेनोपशोभितम् ।
पार्थिवेन च पीठेन मध्यगेन विराजितम् ॥४१॥
विस्तारात्तु द्विजादीनां शूद्रान्तानां समं स्मृतम् ।
अष्टाश्रमथ वा वृत्तं तुर्याश्रं सोपपीठकम् ॥४२॥
अष्टाङ्गुलात्समुत्सेधादेकापायेन लक्षितम् ।
स्वोन्नत्यर्धेनोपपीठं सर्वेषां परिकल्पयेत् ॥४३॥
विस्तारमुपपीठानामुच्छ्रायाद्द्विगुणं समम् ।
उपपीठस्य संलग्नाचन्मानेन तु चोन्नता ॥४४॥
आप्यदिक्स्थागृहस्था च सम्पाद्यासनपिण्डिका ।
नैवेद्यमुपपीठे तु विनिवेश्य निधाय च ॥४५॥
तस्य दक्षिणदिग्भागे त्वन्तर्गमनसंयुतम् ।

विविक्ते लोचनोपेतपिण्डिकाकुण्डभूषितम् ॥४६॥
सकवाटार्गलोपेतं कुर्याद्भवनमण्टपम् ।
उपलिप्यान्नजसेन वारिणा गोमयेन तु ॥४७॥
विधिवच्छोभनं कुर्यादित्येव मण्टपद्वयम् ।
विहितो वित्तविरहादधिवासो द्विजालये ॥४८॥
शैष्ये वाचार्यभवने तत्र कुर्यात्परिग्रहम् ।
प्राग्वदर्चनपूर्वं तु भूततर्पणपश्चिमम् ॥४९॥
ओदनं दधिलाजाज्यमधुतोयपरिप्लुतम् ।
भूततर्पणमित्युक्तं तद्विना तत्र तेऽनिशम् ॥५०॥
सन्तिष्ठन्ते बहिः क्रुद्धा काङ्क्षमाणा परं पदम् ।
अथश्च विहितं यत्नात् स्थाने क्षेत्रीकृते सति ॥५१॥
निर्विघ्नसिद्धये दद्याद्बलिं सर्वत्र सर्वदा।
कृत्वैव मङ्गलार्थं तु दीर्घघण्टारवोपमम् ॥५२॥
स्वपदात्प्राग्वदुत्थाप्य प्रोच्चार्य प्रणवं महत् ।
प्रवेशयेत्ततस्तस्माल्लाजान् सिद्धार्थकान् शुभान् ॥५३॥
फलानि श्रीफलादीनि चन्दनादीनि रोचनाम् ।
श्वेतपूर्वाः सुमनसस्तन्महीरुहमञ्जरीम् ॥५४॥
सामान् हरितदर्भांश्च सर्वरत्नानि काञ्चनम् ।
सर्वौषधीस्तथैवात्र सुगन्धनिचयं शुभम् ॥५५॥
पद्मकं शङ्खपुष्पं च विष्णुक्रान्तां च कुन्दरुम् ।
सप्त सप्त च धान्यानि बीजानि च समानि षट् ॥५६॥
शालिश्यामाकनीवारतण्डुलं भूरि सम्भृतम् ।
गोमयभस्मानि वै पञ्च पञ्चौदुम्बरेषु च ॥५७॥
तथावर्षादितान्यानि तान्येव गुरुहृन्यपि ।
मणिगणांस्वर्णगर्भं भाण्डेष्वभिनवेषु च ॥५८॥

पाद्याचमनमर्घ्यार्थं दध्यन्तं विनिवेदने ।
हेमाद्युत्थानि पात्राणि मृदुपर्णपुटानि वा ॥५९॥
पाण्डुराणि दुकूलानि वस्त्रयुग्मद्वयं नवम् ।
उपवीतं सोत्तरीयं सुसिते धौतवाससी ॥६०॥
कौशेयानि पवित्राणि कङ्कणं साङ्गुलीयकम् ।
स्फाटिकं चाक्षसूत्रं तु पद्माक्षन्तु गणित्रकम् ॥६१॥
पञ्चलोहमयं चक्रं सशङ्खं द्वादशारकम् ।
कुतपं योगपट्टं च नेत्रवस्त्रं मृगाजिनम् ॥६२॥
बृसिकां शाटकं पट्टं पादुके च उपानहौ ।
दण्डं प्रतिग्रहच्छत्रं चूर्णं गोधूममाषजे ॥६३॥
चतुर्वर्णानि माल्यानि सुन्दरं पावनं लघु ।
नीलशाड्वलसम्मिश्रं हरितं पत्रसञ्चयम् ॥६४॥
गुग्गुलुं मृद्धूपं च दीपतैलं च वर्तयः ।
दर्पणं धूपपात्रं च घण्टा कूर्चं च दर्भजम् ॥६५॥
रजांसि कर्णायुग्मं पालिका घटिकां सिताम् ।
पंचाङ्गुलं तु ऋद्धदं, हेमाद्यं कुशपंचकम् ॥६६॥
अलक्तरंजितं सूत्रं सुसितं कर्तरीक्षुरम् ।
काण्डान्यष्टौ तु साग्राणि बर्हिपक्षान्वितानि च ॥६७॥
मोन्नतानि स्थिरार्चानि लोहमृत्काष्ठजानि वा ।
रंजितानि सुधाँधस्तु सदाधाराणि यानि च ॥६८॥
मल्लकान्यम्बुकुम्भानि भृङ्गारकरवीं शुभाम् ।
अफानमूलं निर्दाहं साभारं कन्दरं तथा ॥६९॥
स्थालीकमण्डलुं दर्वीं तन्निधानं तु चुल्लिकाम् ।
भद्रपीठं चतुष्पादं चतुरश्रायतं नवम् ॥७०॥
मात्रावित्तं गन्धाम्बु दन्तधावनमव्ययम् ।

शुष्कगोमयसंयुक्तामरणीं चाग्निदं मणिम् ॥७१॥
पालाशपूर्वाः समिधः साग्राः परिधयस्तु वै ।
प्रभूतमिन्धनं शुष्कमाज्याक्तं तिलतण्डुलम् ॥७२॥
प्रागुक्तं स्रुक्स्रुवाद्यं च होमोपकरणं च यत् ।
सर्वं पक्ष्मकपर्यन्तं बृहत्पात्रद्वयान्वितम् ॥७३॥
पूर्वोक्तानां च भोगानां मध्याग्निस्थण्डिलार्चने ।
सयाति चाङ्गभावं तत् ज्ञात्वा सर्वं प्रवेशयेत् ॥७४॥
अधिवासदिनात्पूर्वदिने कृत्वाङ्कुरार्पणम् ।
अधिवासदिने पूर्वं कृत्वा वै कौतुकं शिशोः ॥७५॥
अनुग्रहधियाचार्यो भक्तानां भाविनां विभोः ।
दिव्यभोगफलेप्सूनां निश्रेयसपदार्थिनाम् ॥७६॥
प्रत्येकैकं हि यागाङ्गं वर्धयेद्दिव्यमूर्तिना ।
नित्येनाव्यक्ततत्त्वेन सन्मन्त्रब्रह्मणा सह ॥७७॥
स्वात्मकर्मद्रुमद्रव्यं मन्त्रव्यूहं यथागमम् ।
फलदं स्यात्सकामानामकामानां हि मोक्षदम् ॥७८॥
सहसा मखतस्तत्र भागवत्स्नात्वा कृताह्निकः ।
सम्यग्विद्याप्यदिवसस्य प्राङ्मुखः प्रविशेत्ततः ॥७९॥
पद्मासनादिना मार्गे चर्मण्याम्यात्मपूर्वकम् ।
कुर्यात्पदभिकारेण मन्त्रेणानुग्रहं शिशोः ॥८०॥
तेनाश्रमदिनेनैव सर्वकर्म समाचरेत् ।
समस्तैश्चपरैर्मन्त्रैः कार्यो ह्यनुग्रहो यदि ॥८१॥
मर्वाराधनदानार्थं द्विषट्कावासये तदा ।
दिनाभ्यन्तरेण कुर्यात्पदारणद्वयम् ॥८२॥
वर्द्धनेन तु स्थाप्य मात्स्यदभिमन्त्रिते ।
पुण्डरीकमथाच्छि मण्डलं च समाचरेत् ॥८३॥

प्रावसमालम्भनैर्वस्त्रैः कटकाद्यङ्गुळीयकैः ।
सितोष्णीषेण महता सितमाल्येन वै सह ॥८४॥
मुखवासैस्सम्मताम्बूलैर्ललाटतिलकेन च ।
कृत्वा शुभेन शारीरं योगपट्टेन संस्थितम् ॥८५॥
हृत्पुण्डरीकमध्ये तु सन्न्यसेद्बीजमैश्वरम् ।
करयोः पद्मनाभीयं प्रवाख्यमथ विग्रहे ॥८६॥
शेषैरालभ्य पादान्तमामूर्ध्नश्चापि पूर्ववत् ।
हस्तयोर्विग्रहे साङ्गं विन्यसेद्बीजमैश्वरम् ॥८७॥
मुद्रावसाने कृत्वैवं सम्यक्तदनु चाहरेत् ।
पाणिभ्यां शङ्खचक्रे द्वे स्वमन्त्रेणाभिमन्त्रिते ॥८८॥
भूत्वा तदात्मना पश्चात्तौ निधाय धरातले ।
अवलोक्याखिलं तत्स्थं प्रवर्तेताथ कर्मणि ॥८९॥
अस्त्राभिमन्त्रितं कृत्वा कर्मागारान्तरे स्थितः ।
तेनोपलिप्य सम्मार्ज्य यागस्थानं निरूप्य च ॥९०॥
तदन्तराभ्यवयोभयस्तेजसो अभिवृद्धये ।
हेमपूर्वाणि रत्नानि बीजानि विनिवेश्य च ॥९१॥
माग्वदर्घ्यादिपात्राणि परिकल्प्य यथाविधि ।
मुख्यार्घ्यवारिणा प्रोक्ष्य पृथग्भाण्डस्थितं पुनः ॥९२॥
पञ्चगव्यं ततः प्राग्वत्कल्पनीयं हृदादिभिः ।

विघ्नोपशान्तये योगाद्दशदिक्षु विनिक्षिपेत् ॥९६॥
संहृत्य वर्हिकूर्चेन प्राच्यां दिशि निधाय वै ।
तद्भ्रमाकृत्य सन्निरुध्य हेतिराट् चन्दनादिना ॥९७॥
वस्त्र कुम्भमयुक्तमरकृत्य यथापुरा ।
भोगे प्रावरणांश्च मूर्तिभृतौ विचिन्त्य च ॥९८॥
अस्त्रमन्त्र तु तन्मध्ये ध्यात्वाभ्यर्च्य यथाविधि ।
ध्यसयन्त च विशाना काल कर्णावमानकम् ॥९९॥
इदमभ्यर्थ्य भगवान् साम्बो बद्धाञ्जलि स्थित ।
यागालय हि विश्वेश गृहाण रचित मया ॥१००॥
आसमाप्तेर्भज विभो क्रियाज्ञाना च सन्निधिम् ।
तदस्त्रोदकधारा चाप्यच्छिन्ना भिविगा नयेत् ॥१०१॥
प्रादक्षिण्येन प्राग्भागात्तत्पदान्त च सम्मरेत् ।
तन्निधायाथ कुम्भेन सह कुर्यात्प्रदक्षिणम् ॥१०२॥
अर्घ्यदान तयो दत्त्वा प्राग्भागे विकिरोर्घ्यगर्भं ।
पूजित वामसा चन्द्र वस्त्रमन्त्राभिमन्त्रितम् ॥१०३॥
निदध्याद्धद्रपीठ तु तत्राधारगन न्यसेत् ।
सम्म हि मन्त्र कलशमर्चयित्वा प्रणम्य च ॥१०४॥
दिगीश्वरगण दिक्षु पूर्वोक्त विन्यसेत्तत ।
निरोध साचन तेषा कृतास्त्रेण हृता सह ॥१०५॥
प्रणवेन स्वनाम्ना च नमस्कारानुगेन वै ।
तोरणध्वजपूर्वाणा कार्यमर्घ्यादिनार्चनम् ॥१०६॥
स्तो हवनकुण्डे ध्यात्वा पीठ पुरो दितम् ।
तत्र ति विभो कुर्यात्पूर्वक्तिन क्रमेण तु ॥१०७॥
पूर्णान्त तत्र कुर्याद्यागकुण्डे तु पूजिते ।
ततस्तु भगवद्धाम क्षेत्रनाथमनिन्दितम् ॥१०८॥

अर्घ्यपुष्पादिनाभ्यर्च्य बलिमादाय पात्रगम् ।
इदमुक्त्वा च तदनु क्षिपेद्यागगृहाद्बहिः ॥१०९॥
ये विष्णुभाविनो भूता ये च तेष्वनुयायिनः ।
आददन्तु बलिं तुष्टाः प्रयच्छन्तु शुभं मम ॥११०॥
प्रक्षालिताभिस्त्वाचान्तस्सविशेद्यागमन्दिरम् ।
अग्निगेहेथ संस्कृत्य चुल्लीं प्राग्दिश्यवस्थिताम् ॥१११॥
पचनालयमुत्सृज्य स्वदेशात्कुण्डमध्यगाम् ।
स्थालीं चास्त्रेण संक्षाल्य बाह्यतो गोमयादिना ॥११२॥
विलिप्यान्तस्सुगन्धैस्तु प्रताप्य ज्वलितैः कुशैः ।
सन्ताड्य कुसुमास्त्रेण सितसूत्रेण कण्ठतः ॥११३॥
चतुर्थ्या वर्मजप्तेन संवेष्ट्यार्घ्यादिनार्च्य च ।
चुल्ल्यां कृत्वा समारोप्य तस्यां मधु घृतं पयः ॥११४॥
परिशुद्धे शृते क्षीरे त्वस्त्रेणारोप्य तण्डुलान् ।
पाचयेन्मूलमन्त्रेण दृष्ट्वा नेत्रेण संस्कृतम् ॥११५॥
हृदावतार्याभिघार्य शिखामन्त्रेण घट्टयेत् ।
शिरसालिप्य संक्षाल्य सुप्रसन्नेन वारिणा ॥११६॥
भूतिना चन्दनाद्येन भूषयेदूर्ध्वपुण्ड्रकैः ।
विष्टरोपरि चान्यत्र निदध्यान्मण्डलान्तरे ॥११७॥
होमं च सिद्धये कृत्वा पूर्णान्तमथ वै चरौ ।
आधारदानमाज्येन कुर्याच्चेनोमृतात्मकम् ॥११८॥
ईशाञ्जनाभरुद्धेन हसार्णेन सबिन्दुना ।
तद्धद्दौषद्वषट्कारप्रणवद्धिस्थेन च ॥११९॥
यतो विना भावितोत्र स्थितिर्द्वाभ्यां च साम्प्रतम् ।
अतः पुरोदितेनैव तदन्तः सम्पुटेन च ॥१२०॥
अत ऊर्ध्वं च सञ्छन्नं स्मरेदादाय वै हृदि ।

द्रव्यसम्पातहोमेथ पूर्णान्ते तु कृते सति ॥१२१॥
उद्धृत्याहुतियोगेन पात्रत्रयगतं तु यत् ।
स्थण्डिले कलशेऽग्नौ च विनियुज्य यथाविधि ॥१२२॥
तदाज्यभावितं शेषं कुशाकान्तं दिक्ष्वथ च ।
क्रमान्मूलास्त्रमन्त्रेण जुहुयाच्च शतत्रयम् ॥१२३॥
नीत्वा सम्पूर्णभावं च पूर्णया पुनरेव हि ।
ततश्चोत्तरदिक्कुर्यान्मण्डलं गोमयादिना ॥१२४॥
प्राक्सान्तं विष्टरं तत्र दद्याद्दर्भैं हृदन्तरे ।
तन्मध्ये विन्यसेच्छिष्यं समाधिं स्तब्धविग्रहम् ॥१२५॥
प्राङ्मुखं यतवाक्चित्तवृत्तिरूपं धृताञ्जलिम् ।
अस्त्रेण पूर्वंवत्कुर्यात्प्रोक्षणं तस्य चाम्भसा ॥१२६॥
तेनैव ताडयेन्मूर्ध्नि दीप्ते सिद्धार्थकैस्तिलैः ।
अनादिवासनोत्थानां बन्धानां चालनाय च ॥१२७॥
फडन्तेनाथ चास्त्रेण कुशाग्रेणाग्निगोचरात् ।
समुल्लिख्य शिखान्तं च ऋज्वर्थं मार्गसन्ततेः ॥१२८॥
जालवन्मन्त्रजालेन व्याप्तं स्मृत्वा च साम्प्रतम् ।
बध्नीयाद्धेममन्त्रेण तस्य नेत्रे च वाससा ॥१२९॥
दत्त्वार्घ्यकुसुमैर्गन्धैः कृत्वा पूर्णाञ्जलिं पुरा ।
पाणिनादाय चास्त्रेति निधायाग्रे स्थितं वटुम् ॥१३०॥
प्रक्षेपयेद्देवधाम्नि नतमूर्ध्नाञ्जलित्रयम् ।

यदा तदाच्युताख्या यानुगृहीतो श्रिया तया ।
स्मरेद्दक्षिणपाणौ तु चक्राम्बुरुहमध्यगम् ॥१३४॥
प्रधानदेवतावृन्द स्वे स्वे धाम्नि परे स्थितम् ।
स्वमरीचिगणेनैव द्योतयन्त तु चाखिलम् ॥१३५॥
तेनाच्युतकरेणैव सोदकेनालभेत तम् ।
पुष्पपूर्णाञ्जलौ पृष्ठे तस्य तन्नितमाश्रितम् ॥१३६॥
कृत्वा मन्त्रगणान्त वै मोक्षविघ्नोपशान्तये ।
पुनरभ्यर्चयेन्नीत्वा मन्त्रेण परमेश्वरम् ॥१३७॥
आधाराधेयभावेन ब्रुम्बान्तस्सस्थित पुरा ।
क्ष्मादीना बुद्धिनिष्ठाना वासनाना तथात्मनाम् ॥१३८॥
तत कुर्याच्च विश्लेष तेषा ध्यानार्चनादिना ।
आत्मसत्य समाश्रित्य कर्मचक्र हि वर्तते ॥१३९॥
तच्चक्रमवलम्ब्यास्ते बुद्धिनिष्ठ हि सक्रमम् ।
अज्ञानव्यापकत्व च सुखदु खनिवेदनम् ॥१४०॥
सर्वज्ञस्यात्मतत्त्वस्य कर्मचक्रावलम्बना ।
चपल कर्मचक्र तद्वर्धमान सदैव हि ॥१४१॥
क्ष्माद्यमाधारमाश्रित्य तावदेवावतिष्ठते ।
यावत्स सर्व शक्त्या वै कर्मात्मा न प्रबोधित ॥१४२॥
प्रबुद्धस्तस्य सरोध कर्तुं शक्नोति सर्वदा ।
मन्त्राराधनरूपेण ज्ञाननिष्ठेन कर्मणा ॥१४३॥
अतो य आश्रय क्ष्माद्यस्त्वसाधारो हि पौरुषम् ।
नीरसचोरिणि भूत कुर्यात्सम्भाव्य साम्प्रतम् ॥१४४॥
निर्मुक्ताचित्फलो येन कर्मवृक्षो विनश्यति।
शुध्यर्थमात्मनस्तस्मात्सर्वजन्मामत स्थले ॥१४५॥
सुतादिदेवमन्त्राणा कुर्याद्वै पूजन क्रमात् ।

चिद्घनं विद्धि सामान्यं मन्त्रनाथैरधिष्ठितम् ॥१४६॥
क्ष्माद्यध्वानं तु बुध्यन्तं ध्यात्वा षट्पत्रवत्पुरा ।
तत्र मध्ये ऽब्जनाभं च प्राग्भागे केसरोर्ध्वगम् ॥१४७॥
पत्रं तु विश्वरूपाद्यं क्ष्माधरान्तं तु विन्यसेत् ।
नीत्वा स्वनाम आद्यर्णं क्ष्मान्ताना बीजतां गतम् ॥१४८॥
तेन तेषा दलान्तं प्राग्विन्यासं संस्मरेत्क्रमात् ।
क्ष्माबीजं च दलाग्रेषु मूलनिष्ठेषु सप्सु च ॥१४९॥
सर्वं सर्वेन्द्रियाधारमित्यभिन्नं पुरा तन. ।
विन्यात स्कन्दवृन्देन समन्तेनान्तर्गकृतम् ॥१५०॥
उपर्युपरि योगेन बुध्यन्तं समुपाश्रितम् ।
भेदरूप्या यजेन्मध्यग्मूय महारबर्त्मना ॥१५१॥
सपर्दं स्वेन बीजेन पीतं तुर्याश्रलक्षणम् ।
हेमाब्जभूषितं ध्यात्वा क्ष्मातत्त्वं तत्र मध्यतः ॥१५२॥

तत्र वागीश्वरं देवमभ्यर्च्य विधिवत्ततः ।
तत्कर्णिकोदराकाशे नानारत्नरुचिं ततः ॥१५९॥
संस्मरेत्कमलाकारं चित्तवृत्तिमयं तु यत् ।
यजेत्तन्मध्यगं विश्वरूपं तु मनसस्पतिम् ॥१६०॥
तदूर्ध्वेऽमृतगर्भं तु शीतांशुकरकोटिवत् ।
पद्मं स्वेनात्मनात्मान धारयन्तं विभाव्य च ॥१६१॥
समभ्यर्च्यस्तदन्तस्थो ह्यब्जनाभो धियां पतिः ।
एवं गन्धरसरूपस्पर्शशब्दमनोधियाम् ॥१६२॥
क्रमेणाधीशसंघं तु अवतार्य परायजेत् ।
अर्चयित्वार्चयित्वा च न्यसेत्तत्रैव तं पुनः ॥१६३॥
ये वर्णा भूतयोनीनां रश्मयः कमलोपमाः ।
संस्थितिं संस्मरेत्तेषामस्मिन् शक्तौ तथागतम् ॥१६४॥
अनादिवासनारूपां त्वभेदेनात्मनि स्थिताम् ।
निश्शेषबीजैरभ्युत्थां पद्मनाभविधारिणीम् ॥१६५॥
निर्गतां वैषयात्मवीद्धियुक्तां स्वामिना कृताम् ।
स्फुरद्रूपां परिभ्रष्टां निराधारां च संस्मरेत् ॥१६६॥
प्रणयेन समभ्यर्च्य दीक्षाकाले ह्युपस्थिते ।
साधिभूताधिदैवं च इत्थं भूतसप्तकम् ॥१६७॥
स्वयमभ्यर्चयेत्पश्चाच्छिष्यमञ्जलिना च तम् ।
ततोऽग्नेः सन्निधिं गत्वा ध्यात्वा धामत्रयोपरि ॥१६८॥
दक्षिणेनात्मनो दार्भविष्टरे चक्रमंतिते ।
सकुशेन स्वहस्तेन दक्षिणं चरणं गुरोः ॥१६९॥
अवलम्ब्य समास्ते वै स्पर्शनाद्येकतात्मना ।
बीजेनाग्निशिखान्तं च स्मरेत्तेजोमयं विभुम् ॥१७०॥
विश्लेषयन्तं सहसा घनाद्युत्थमविग्रहम् ।

ससारचक्र विविध प्रेरक तु स्ववर्त्मनि ॥१७१॥
नाड्येकयमनिसन्धानमभिमन्धाय चेतसा ।
विश्लेष मार्गेण तन्तर्पालेण श्रमगेत् ॥१७२॥
क्रमेण सूत्रना। च दिव्याना द्वादशाहुतिम् ।
अनुस धाय सम्पाद्यो मयाय वै परात्मनि ॥१७३॥
दद्यादाहुतिश्चाष्टौ मूलेन सयुता पुरा ।
तदुत्तमाङ्ग सरष्ट्वा स्रुवेणाज्यान्वितेन च ॥१७४॥
हुत्वा ज्ञानाय तेनैव मूयस्सर्वगुणात्मना ।
मात्सरुयमाचरेद्धोममन्तारान्तरयोगत ॥१७५॥
अग्नेरुपादयात्मैव तेनान्त होममेव हि ।
इति मम्पातहोम वै सम्पन्ने सति जायते ॥१७६॥
कर्तव्यो मन्त्रमाहात्म्यात्सम्स्कारैर्निखिलैर्युत ।
साम्प्रत शक्तिरादीना गुणानामुत्तरत्र तु ॥१७७॥
विभोराराधनारतम्यार्थ।म्याम्ना।साध भावाम ।

अथादायारुणं सूत्रं कृत्वा नैकगुणं पुरा ।
निरीक्ष्य तं दृशा चास्त्रवारिणा परिशोधितम् ॥१८४॥
तदङ्गुष्ठावधिं यावच्छिखायाः सम्प्रसार्य च ।
संस्मरेत्सर्वदुःखानां सबन्धानां तदास्पदम् ॥१८५॥
संविश्य देवयानेन शिशुचैतन्यसन्निधिम् ।
हुंफडन्तं च शिष्यस्य नाम च प्रणवादिकम् ॥१८६॥
हृन्मन्त्रसम्पुटस्थं च कृत्वा वै पितृवर्त्मना ।
आनीय सह सूत्रेण नयेन्नेत्रेण साम्यताम् ॥१८७॥
अभ्यर्च्यार्घ्यादिनावेष्ट्य कवचेन महात्मना ।
ओं हुं अग्न्यैहुंस्वाहेत्यनेनाहुतिसप्तकम् ॥१८८॥
हुत्वास्त्रमन्त्रजप्तेन सितेन रजसा ततः ।
सन्ताड्य शैशवं कायं विशेत्पादावधिं तथा ॥१८९॥
विश्लेषयामुकं ब्रूयात्पदं वीर्यपदानुगम् ।
तं ज्ञानवाचकेनाथ स्वायन्तेन विकृष्य च ॥१९०॥
स्वबुध्यानुगतं कृत्वा ध्यात्वा नक्षत्रगोळवत् ।
सन्धायाभ्यन्तरे सूत्रे हंसार्णेन सबिन्दुना ॥१९१॥
नतिप्रणवगर्भेण रुद्धशक्तिं चँ विग्रहे ।
वासनामयमित्येवमातिवाहिकसंज्ञकम् ॥१९२॥
सूत्रात्मकं वपुः स्मृत्वा आत्मशक्त्या विभावितम् ।
बलमन्त्रेण संरुद्धं तदर्थं जुहुयात्ततः ॥१९३॥
उक्त्वा ओमात्मनेस्वाहा द्विषट्कपरिसंख्यया ।
आदाय भाविनो बन्धान्व्यापकान् शुद्धभोगदान् ॥१९४॥
ज्ञानादयः समाश्रित्य येत्र तिष्ठंति सर्वदा ।
स्वस्थानेषु स्वमन्त्रेभ्यस्तांस्तु तत्रैव योजयेत् ॥१९५॥
यथाक्रमेणोचितानां कृत्वा तेषां च तर्पणम् ।

अथ सप्तारचक्रस्य तत्तद्वृन्दाश्रितस्य च ॥१९६॥
सर्वगम्यापि वै विद्धि स्थितिं नियतलक्षणाम् ।
तन्वन्याप्तिश्च तेनैव शरीरे पाञ्चभौतिके ॥१९७॥
गुल्फजानुकटीवक्ष कण्ठभ्रूकापटावधि ।
बुध्यन्ताना धरादीना क्रमादवनिसप्तकम् ॥१९८॥
जटद्वारसदुत्थास्तु ये भेदा विविधा अपि ।
चित्तजा अपि ये चान्ये तिष्ठन्ति मनसा सह ॥१९९॥
सकालोन्यासथाबोधान्तरूर्ध्वेस्तपरे च ये ।
अनेकभेदभिन्नास्तु स्थिता आश्रित्यते श्रियम् ॥२००॥
द्विसप्तभुवन चित्रमनेकरचनान्वितम् ।
शतकोटिप्रविस्तीर्णमण्डयोन्यार्थमेमितम् ॥२०१॥
स्थित धराश्रित भूयो बोद्धव्य सर्वदैव हि ।

मधुसूदनपर्यन्त पाताळशयनादथ ।
सप्तक सप्तक षट्क सपश्येत् क्ष्मादिपञ्चके ॥२०९॥
मनस्यवस्थित ह्येव शक्तीशात्रितय हि यत् ।
बुद्धौ कमलनाभात्मा देव सर्वेश्वर प्रभु ॥२१०॥
पुन स्वसिद्धैर्युक्ताना सर्वेषा पार्थिवे पदे ।
द्विसप्तभेदभिन्ने तु बोद्धव्या संस्थिति शुभा ॥२११॥
तीव्रमन्दादिक बुध्वा भाव भक्तिसमन्वितम् ।
आलम्भनवशात्कुर्यात्सर्वेषा स्वपदे स्थितिम् ॥२१२॥
एष वैभवदीक्षायामधिवासनकर्मणि ।
क्रम उक्तस्त्वथेदानीमपराया निबोध तु ॥२१३॥
आपादान्नाभिदेशान्त मह।भूतैर्धरादिकै ।
व्याप्त चतुर्भा वाय्वन्तैस्तदूर्ध्वं नभसा पुन ॥२१४॥
पूरित हृदयात च तदुद्देशाच्छिखावधि ।
विभाव्य मनसा व्याप्तमनेनैव क्रमेण तु ॥२१५॥
स्थितास्सङ्कर्षणान्ताश्चाप्यनिरुद्धादयस्तु वै ।
समाक्रम्याध्वषट्कन्तु अध्वातीतन्तु बुद्धिग ॥२१६॥
समना आत्मतत्व च मात्वदभ्येत्य मूर्तताम् ।
व्यापिका मूर्तयस्त्वेता पृथक्प्रुक्तपरायणै ॥२१७॥
तदाकारैरसङ्ख्यैस्तु सवृता क्ष्मावनीषु च ।
प्राक्सख्यासु च तिष्ठन्ति सर्वास्सर्वासु सर्वदा ॥२१८॥
स्मृत्वा ह्यभेदभावेन षट्क मोदकवत्पुरा ।
शिखान्त क्ष्मादिना तेन सर्वं व्याप्त विचिन्तयेत् ॥२१९॥
चतुरात्मानमव्यक्त शब्दमूर्ति निराकृतिम् ।
गुणमात्रैर्विभिन्न च ख च तत्रैव भावयेत् ॥२२०॥
अभाव्रणाथ वपुषा स्वस्वभावमयेन च ।

संक्रान्तेन तु वै बुद्धौ सर्वं समुदितेन तु ॥२२१॥
स्वशक्त्या वै ह्यनिच्छातो जीवमादाय सोर्ध्वगम् ।
स्वसामर्थ्यं स्वशक्त्या तच्छान्तरमान्ते विलाप्य च ॥२२२॥
शुद्धाशयानां भक्तानां तत्पदैकाभिलाषिणाम् ।
तत्सामर्थ्यानुविद्धानां सर्वत्र व्यक्तिमेति च ॥२२३॥
अतस्तु यद्यत्सवेद्यं हेयं परिमितन्त्वपि ।
तत्तदाश्रमनाभ्येति सर्वदा भावितात्मनाम् ॥२२४॥
इत्याद्यैः सर्वसामान्यो नित्यो विद्याख्य आश्रमः ।
बोद्धव्यः सोपि तदनु ह्यसामान्यतया गतः ॥२२५॥
आमोक्षादक्रमाच्च जीवानां स्वयमेव हि ।
वज्रवत्सूक्ष्मरूपेण सम्पूज्येन महामते ॥२२६॥
दीक्षाकाले तु शिष्याणां परिज्ञेयं यथोदितम् ।

सौम्यवारुणईशाने यदि पूर्वदिगाननम् ।
तत्सिद्धिसूचकं विद्धि विपरीतमतोन्यथा ॥२३४॥
तत् ध्वंसनाय जुहुयाद्वीर्यमन्त्रेण वै शतम् ।
धूपानुलेपनादीनि रजांसि घटिकादयः ॥२३५॥
साज्यानि च तिलादीनि योग्यान्यन्यानि लाङ्गलिन् ।
उद्धृत्योत्तरतः कृत्वा वर्मजप्तेन वाससा ॥२३६॥
अस्पृक्तेनाहतेनैव स्वाच्छाद्य सुसितेन च ।
समभ्यर्च्यास्त्रमन्त्रेण पुष्पधूपानुलेपनैः ॥२३७॥
क्षान्त्वा स्थलस्थितं देवमग्नौ वा कलशे न्यसेत् ।
अथ शुद्धे तु भूभागे ह्न्मन्त्रितकुशास्तरे ॥२३८॥
कृत्वा प्राङ्मस्तकं शिष्यं बलजप्तांशुकेन तु ।
ह्रदावकुण्ठिततनुं मुख्यमन्त्रमनुस्मरन् ॥२३९॥
स्वापयेत्स्वप्नलाभाय ततो ह्न्मन्त्रितैस्तिलैः ।
सिद्धार्थकयुतैः तस्य निरुध्यात्परितो बहिः ॥२४०॥
सबर्हिपक्षं मन्त्रेण प्राग्वद्दिग्पष्टकं न्यसेत् ।
प्रदक्षिणेन तच्चापि सितसूत्रेण वर्मणा ॥२४१॥
चतुर्धा वेष्टयित्वा तु मण्टपान्निष्क्रमेद्बहिः ।
दन्तकाष्ठादिकं कर्म विनिष्पाद्य स्वयं स्वपेत् ॥२४२॥
कुतपे दर्भशय्यायां कृत्वा दक्षिणतश्शिरः ।
संस्पृशेत्स्वाङ्घ्रियुग्मेन शिशुं शयनसंस्थितम् ॥२४३॥
भगवन्तं हि मनसा प्रार्थयन्नपवर्गदम् ।
ओमादीश जगन्नाथ सर्वज्ञ ह्रदयेशय ॥२४४॥
तत्राहं योजयाम्येनं सत्कर्म त्वत्परायणम् ।
प्रासानुज्ञस्तु शिष्याणां कुर्याद्वै तत्र योजनम् ॥२४५॥
यत्र यत्र च तत्तेषामवश्यं शाश्वतं भवेत् ।

इत्थं दीक्षाधिवासस्य विधानं सम्प्रकीर्तितम् ॥२४६॥
एकानेकस्वरूपा तु दीक्षेदानीं प्रकीर्त्यते ।
आसाद्य याः समायान्ति देहान्तेऽभिमतं पदम् ॥२४७॥
कैवल्यफलदा ह्येका भोगकैवल्यदा परा ।
भोगदैव तृतीया च प्रबुद्धानां सदैव हि ॥२४८॥
आचार्यानुमता सर्वाः कार्याः सम्यक् फलाप्तये ।
भक्तिभावानुविद्धानां शिष्याणां भविनां तु वै ॥२४९॥
वृद्धानामङ्गनानां च बालानां भावितात्मनाम् ।
विनाचारसमूहेन तु शक्तेन च ता हिताः ॥२५०॥
पुरा धिया विचार्यैवमुपसन्नेन वै सह ।
तदीयमाशयं ज्ञात्वा सम्पाद्येषा महामते ॥२५१॥
यथार्तातिर्विगमे तु उत्थाय शयनाद्गुरुः ।
कमण्डलुं समादाय बहिराचम्य सविशेत् ॥२५२॥
तम्मोदमतधाम्म हुतभुग्राशिसन्निभम् ।
तदन्तस्याविशेदेव स्नानं मानं कृतं भवेत् ॥२५३॥
निद्रामोहमलं येन शधदायानि सद्क्षयम् ।
शद्वन्ते परिधायाथ स्वाम्बरवरेण तु ॥२५४॥
समादाय च सन्तृप्य निर्मिष्यार्घमंदितले ।
शुद्धगोमयसम्पृष्टे मण्डलं चतुरोदितम् ॥२५५॥
गन्धपरिशार्थे स्नाग्या कोण शस्य ।

शिष्यमादाय सञ्चोद्य स्वप्नप्राप्तिं शुभाशुभाम् ।
चतुर्मूर्तिसमूहं तु यथादिक्संस्थितं तु वै ॥२५९॥
पश्येत्पङ्क्तिनिविष्टं च उपविष्टं तु चोत्थितम् ।
तन्मध्याद्भगवत्तत्त्वमेकं वा भिन्नलक्षणम् ॥२६०॥
प्रादुर्भावसमूहं च तल्लाञ्छनगणश्च यः ।
दैवीयं वनितावृन्दं सर्वमेकत्तमाथ वा ॥२६१॥
भवोपकरणव्रातमशेषं वा पृथक्स्थितम् ।
रुद्रेन्द्रचन्द्रसूर्याम्बुहुतभुग्वातलक्षणम् ॥२६२॥
पञ्चरात्रविदो विप्रा आराधनपरायणाः ।
त्रयीमुद्घोषयन्तश्च निगदन्तश्च वा द्विजाः ॥२६३॥
यतयः शुद्धसत्त्वाश्च सद्ब्रह्मपदसंस्थिताः ।
नगस्रक्चन्दनाद्यानि सुगन्धानि तरूत्तमः ॥२६४॥
उद्यानवनितारामवापीहर्म्यं महालयाः ।
फलबीजौषधीसाम्बुकुम्भो वा पाकनिर्गतः ॥२६५॥
गोगजाश्वनदीयानं कन्या सालङ्कृता शिशुः ।
मङ्गल्यगीतिमधुरा भेरी वंशश्च वल्लरी ॥२६६॥
समारसं सरः पद्मैः पूर्णं छत्रं सितं ततम् ।
हेमादिधातवो रत्नजालं गोसम्भवानि च ॥२६७॥
नवो नेत्रचयश्शुक्रं वस्त्रवृन्दमनाहतम् ।
राजापुरोधा सामन्तो राजपत्नी च दर्पणम् ॥२६८॥
तुषारपातमद्वृष्टिमहामेघोदयो दिवि ।
शोणितं चार्द्रमांसानि स्वस्तुतिर्मण्डिगद्य ॥२६९॥
सत्पक्षिमृगसम्पातसुरार्चा चामरं सितम् ।
एवमादीनि चान्यानि विद्धि सिद्धिप्रदानि च ॥२७०॥
स्वप्नानि यान्यनिष्टानि तानि मे रेशतश्शृणु ।

म्लानता क्षितिकम्पश्च उपरागोतिभीषणः ॥२७१॥
नीहार उल्कापातश्च निर्घातश्चिवभङ्गकृत् ।
गर्तप्रवेशो दग्धत्वं स्विन्नमांसस्य भक्षणम् ॥२७२॥
नर्तनं रथविध्वम आज्य म्याङ्ग॰द्विजच्युतिः ।
खरोष्ट्रं चोत्कटं हाम्य कपिकृक्षाकुलं वनम् ॥२७३॥
स्थानं धूमाकुलं दग्धमसितांबरवेष्टितम् ।
शुष्कत्व सरिदादीना प्रतिस्रोतस्त्वमेव च ॥२७४॥
पोतयान ध्वजच्छत्रतरुभङ्गोप्यसिद्धिकृत् ।
अवतारो नगाद्वृक्षाल्लभत्वं प्रेतदर्शनम् ॥२७५॥
वचारुज्जलनेत्राज्यलेपोसरकर्दमे स्थितिः ।
महिषोहिर्नर कृष्णो दक्षिणाशागमः क्षुधा ॥२७६॥
लुण्टनं नखकेशानामस्थिभङ्गाधिकाद्रतम् ।
एवमादीनि चान्यानि अशुभानि महागते ॥२७७॥
मासे शुभाशुभे स्वप्नेव्यभिमन्धाय वै हृदि ।
औत्सुक्यादशिवन्यासि पूजाहोम समाचरेत् ॥२७८॥
यथोक्तविधिना देवमवतार्य क्रमाद्यजेत् ।

ताप पुण्ड्रस्तथा नाम मन्त्रो यागश्च पचम ।
तत्र तापविधान तु शृणुध्व मुनिपुङ्गवा ॥२८४॥
आचार्यो वैष्णवान् सभ्यान् पूज्य तेषामनुज्ञया ।
गत्वा कुण्डसमीप तु शिष्येण सहितो गुरु ॥२८५॥
चक्रशङ्खौ समभ्यर्च्य तत्तन्मन्त्रै प्रतिष्ठितौ ।
पूर्वं स्वगुरुणा दत्तौ स्वदीक्षावसरे द्विजा ॥२८६॥
मूलमन्त्रेण जुहुयाच्छतमष्टोत्तर घृतै ।
वैष्णव्या चापि गायत्र्या तद्विष्णोरिति वै ऋचा ॥२८७॥
तत कुण्डानले चक्रशङ्खौ निक्षिप्य पूजयेत् ।
ततस्तु चक्रमन्त्रेण शङ्खमन्त्रेण च द्विजा ॥२८८॥
हुत्वा चाष्टोत्तरशत अष्टाविंशतिमेव वा ।
पवित्रन्तेति मन्त्रेण प्र ते विष्णो इति ऋचा ॥२८९॥
हुत्वा ततस्तु देवेश ध्यात्वा गुरुपरम्पराम् ।
शिष्यस्य दक्षिण बाहुमूल चक्रेण चाङ्कयेत् ॥२९०॥
शङ्खेन प्रतपेत्सव्यबाहुमूल मुनीश्वरा ॥
ततश्चक्र च शङ्ख च अभिषिच्य स्वमन्त्रत ॥२९१॥
सपूज्य मूलमन्त्रेण हुनेत्पूर्णाहुतिं द्विजा ॥
ततस्तु चोर्ध्वपुण्ड्राणि धारयेन्मुनिपुङ्गवा ॥२९२॥
तद्विधान प्रवक्ष्यामि शृणुध्व सावधानत ।
गृहीत्वा वैष्णवक्षेत्राद्विमला श्वेतमृत्तिकाम् ॥२९३॥
हस्तौ प्रक्षाल्य चाचम्य प्राङ्मुख वाप्युदङ्मुखम् ।
उपविश्यासने शुद्धे वामहस्ततले द्विजा ॥२९४॥
सक्षाल्य पाद्यमन्त्रेण तत्र वै श्वेतमृत्तिकाम् ।
प्रणवेन तु विन्यस्य गन्धद्वारेति ता मृदम् ॥२९५॥
जलेन सेचयित्वाथ कृत्वा दिग्बन्धन द्विजा ॥

मूलमन्त्रेणाभिमन्त्र्य वामहस्तस्थितां मृदम् ॥२९६॥
तन्मध्ये नारसिंहस्य बीजमालिख्य मन्त्रवित् ।
अङ्गुल्या मृदमादाय ललाटादिषु धारयेत् ॥२९७॥
पुष्टिप्रदेनाङ्गुष्ठेन तर्जिन्या मुक्तिसिद्धये ।
वाञ्छितार्थप्रदायिन्या तथा नामिकयाथ वा ॥२९८॥
आयुष्कामी मध्यमया चांगुल्या च मुनीश्वरा ! ।
एताभिरंगुलीभिस्तु धारयेन्न नखैः स्पृशेत् ॥२९९॥
ऊर्ध्वपुण्ड्रमृजुं रम्यं विष्णोः पादद्वयाकृतिम् ।
सान्तरालं सुपार्श्वं च द्व्यङ्गुलं त्र्यङ्गुलं वा ॥३००॥
विस्तीर्णमथ चायामे चतुरङ्गुलसम्मितम् ।
ललाटेधारयेत्कुक्षौ चतुरङ्गुलविस्तृतम् ॥३०१॥
अष्टाङ्गुलायतं यद्वा प्रादेशपरिसम्मितम् ।
धारयेदूर्ध्वपुण्ड्रं तु तावन्मानसमन्वितम् ॥३०२॥
ऊर्ध्वपुण्ड्रं तु हृदये धारयेल्लक्षणान्वितम् ।
ततस्त्र्यगुलविस्तीर्णं चतुरंगुलमायतम् ॥३०३॥
ऊर्ध्वपुण्ड्रं कण्ठदेशे ततो वै दक्षिणोदरे ।
ऊर्ध्वपुण्ड्रं तु पूर्वोक्तकुक्षिपुण्ड्रसमं द्विजा ! ॥३०४॥
ततस्तु दक्षिणे बाहुमध्ये त्वष्टागुळायतम् ।
चतुरंगुळविस्तीर्णमूर्ध्वपुण्ड्रं तु धारयेत् ॥३०५॥
ततस्तु दक्षिणांसे तु कण्ठपुण्ड्रसमं भवेत् ।
वामकुक्षौ तूर्ध्वपुण्ड्रं कुक्षिपुण्ड्रसमं भवेत् ॥३०६॥
वामबाहौ भवेत्पुण्ड्रं दक्षबाहूक्तलक्षणम् ।
वामांसे तु ततः पुण्ड्रं कण्ठपुण्ड्रसमं भवेत् ॥३०७॥
पृष्ठे त्वष्टांगुळायामं चतुरगुळविस्तृतम् ।
ऊर्ध्वपुण्ड्रं ककुद्देशे चतुरगुळमायतम् ॥३०८॥

तथा ऽङ्गुलविस्तारं धारयेन्मुनिपुङ्गवाः ।
एवं द्वादश पुण्ड्राणि धृत्वा चैव यथाक्रमम् ॥३०९॥
हस्तक्षालनतोयं तु मूर्ध्नि समोक्षयेत् द्विजाः ।
ततस्तु चोर्ध्वपुण्ड्राणां मध्ये विष्णुसमर्पितम् ॥३१०॥
धारयेद्रजनीचूर्णं लक्ष्मीसान्निध्यसिद्धये ।
वर्तिदीपाकृतिं चैव वेणुपत्राकृतिं तु वा ॥३११॥
एवं धृते ह्यूर्ध्वपुण्ड्रे लक्ष्म्या सार्धं जगत्पतिः ।
क्रीडते सततं तत्र ततो बद्धाञ्जलिर्द्विजाः ॥३१२॥
नामभिः केशवादीनां तदर्थध्यानपूर्वकम् ।
तत्तच्छक्तिसमेतांस्तु केशवादीन् स्मरेद्बुधः ॥३१३॥
ललाटे केशवं ध्यायेन्नारायणमथोदरे ।
माधवं हृदये चैव गोविन्दं कण्ठकूबरे ॥३१४॥
उदरे दक्षिणे पार्श्वे विष्णुं ध्यायेन्मुनीश्वराः ।
तत्पार्श्वे बाहुमध्ये तु चिन्तयेन्मधुसूदनम् ॥३१५॥
त्रिविक्रमन्तु तत्स्कन्धे वामकुक्षौ तु वामनम् ।
श्रीधरं वामबाहौ तु हृषीकेशं तदंसके ॥३१६॥
अपरे पद्मनाभं तु त्रिके दामोदरं स्मरेत् ।
इत्येवमूर्ध्वपुण्ड्रस्य विधानं सुसमर्कीर्तितम् ॥३१७॥
एवं शिष्यस्योर्ध्वपुण्ड्रं धारयित्वा यथा विधि ।
नाम कुर्याच्च शिष्यस्य तद्विधानमिहोच्यते ॥३१८॥
तमादाय करादेवधामसन्निकटं ममैनं ।
कृत्वात्मनो वामभागे भूयः सन्दाय लोचने ॥३१९॥
प्रक्षेपयेत्पुष्पमञ्जलिं मुकुलोचन ।
सम्पदयेत्परमं धाम मान्समिच्छाफलप्रदम् ॥३२०॥
तस्मिन्नवसरे कुर्यान्नाम सम्यं यथोचितम् ।

रहस्यसंज्ञं मुख्य च गौण वाम्य यथास्थितम् ॥३२१॥
सामान्य वासुदेवाय नाम स्वाद्धाश्चतुर्ष्वपि ।
सर्वेषा सविशेष वा यथाचानुक्रमेण तु ॥३२२॥
द्विपद्कमूर्त्यङ्कित च स्वाम्यन्त ब्राह्मणेषु च ।
देवान्त क्षत्रियाणा च कुर्याद्द्वादशधा पुन ॥३२३॥
पाण्यन्त धरनिष्ठ वा लान्छनास्त्रपुरस्सरम् ।
ध्वजलान्छनसंज्ञ च यथावस्त्र नृपेषु च ॥३२४॥
एव वर्धननिष्ठ च मूर्तिलान्छनपूर्वकम् ।
विहित चापि वैश्याना दासान्त शूद्रजन्मनाम् ॥३२५॥
अथोत्थाय नमस्कृत्य मण्डल कलश गुरुम् ।
यायात्कुण्डसमीप तु शिशुना सह देशिक ॥३२६॥
कृतस्य कर्मणोच्छिद्रसिद्धये च हुते सति ।
सन्तान्यात्मात्मको भूत्वा मात्वशद्भृदय विशेत् ॥३२७॥
प्राणशक्तिवियुक्त च कृत्वाऽऽनीय समस्त ।
सम्प्रवेश्य स्वक स्थान तत्राभिरणवञ्च तत् ॥३२८॥
नीत्वा सम्यक्पृथग्भाव विरेच्य सह वायुना ।
स्वभूमौ वाममार्गेण ह्रदावत्त निरोधिनम् ॥३२९॥
जन्मसहमनेनैव मन्त्रयुक्तेन कर्मणा ।
भावध्यानानुविद्धेन विगृग्तान्मय स्यनेत् ॥३३०॥

चोषट्स्वाहावषट्कारनिष्ठाना तु प्रतिक्रिया ।
नमस्कारेण मन्त्राणां कार्ये पात्रे ह्यनुगते ॥३३४॥
तदीयमर्घ्यपुष्पाद्यं यत्किञ्चिद्यागसाधनम् ।
सुसंस्कृतमसिद्धं वा भक्त्या कर्मण्यतां व्रजेत् ॥३३५॥
अतोऽन्येषां तु भक्तानां विहिता यागसाधने ।
सम्यक्सत्त्वनिवृत्ति प्राग्दर्शनप्रोक्षणान्वितम् ॥३३६॥
मूर्तौ वा मण्डलाग्रे तु पुष्पक्षेपं महामते ।
नक्तं वा परिपीडं च भूतार्थं चैवमेव हि ॥३३७॥
एवं संस्कारसंशुद्धं कृत्वा वर्णगणं पुरा ।
साङ्गेन विभुना कुर्यात्प्रायश्चित्ततर्पणम् ॥३३८॥
सदशांश सहस्रं तु यथा चानुक्रमेण तु ।
गत्वा चाभ्यर्घ्यकुम्भेशं सूत्रमादाय तत स्थितम् ॥३३९॥
ऋजुभूतं शिशुं कृत्वा तद्वत्सूत्रं प्रसार्य च ।
व्यक्तरूपं च मन्त्रेशं संस्मरेदभिमध्यगम् ॥३४०॥
पश्येद्विभौ शिशुं सूत्रे स्वात्मन्यध्यानमञ्जसा ।
तत्राध्यात्मस्वरूपं च सम्मरेन्मन्त्रदेहगम् ॥३४१॥
अधिदैवस्वभावं च तत्स्वात्मन्यवतार्य च ।
अधिभूतमयं सूत्रे त्रिविधं शिष्यविग्रहे ॥३४२॥
मूलमन्त्रावसाने तु सनमस्कं परात्मने ।
पदं कृत्वा तु जुहुयादाहुतीनां चतुष्टयम् ॥३४३॥
तथा सूक्ष्मात्मने चोक्त्वा तत स्थूलात्मने तु वै ।
सर्वात्मने च तदनु ततोऽध्वनिचयं हितम् ॥३४४॥
आ पादाग्राच्छिरोन्तं च सर्वं ध्यात्वा स्वदेहगम् ।
यथोद्दिष्टक्रमेणैव विभिन्नं त्रिविधं त्वपि ॥३४५॥
रचना सन्निवेशो यः क्ष्मादीनां चाधिभूतता ।

भूय संसृष्टियोगेन द्विषट्कपरिसंख्यया ।
पूरकेन समाकृष्य शिष्य हृत्कमलाद्धृदि ॥३५९॥
अथ व्यक्तिनिरस्तच क्ष्माबीज वरलक्षणम् ।
भूशक्त्या ज्ञानसरुद्ध कृत्वाद्यानलाद्धृदि ॥३६०॥
प्रणवासनविश्रान्त विरेच्याब्जे तु शैशवे ।
स्मृत्वाथ शिष्यचैतन्यमेकमेव द्विरूपधृत् ॥३६१॥
शक्तिमच्छक्तिभावेन शक्तित्वेन तु सस्मरेत् ।
क्ष्मातत्वान्तर्गत कुण्डे शक्तिमत्त्वेन तत्पुन ॥३६२॥
रचयित्वा स्वसाम्ना च विग्रहे मध्यवर्मना ।
नियोज्य तत्समाधौ तु जपध्यानैकलक्षणे ॥३६३॥
तदेव पार्थिव बीज हृदा वै होमकर्मणा ।
सम्यक्तस्योपकारार्थं नेतव्य सूक्ष्मदेहताम् ॥३६४॥
स्वाहान्त भोगसिध्यर्थं नमोन्त मोक्षसिद्धये ।
भोगमोक्षाप्तये वापि तदेवोभयलक्षणम् ॥३६५॥
कर्मणामवसाने तु सपाद्यमपद न्यसेत् ।
एव तद्विग्रहे सूक्ष्मे तद्धृदयाग्रतस्य च ॥३६६॥
शिरसा चाधिकार तु तस्यापाद्य यथास्थितम् ।
शिखामन्त्रेण तद्भोग निर्वर्त्य शतसख्यया ॥३६७॥
चर्मणा तत्फलप्राप्ति तल्लयत्वमपि स्मरेत् ।
स्वतृप्तिमयनेत्रेण कुर्यात्तेनैव तत्स्थितम् ॥३६८॥
तत्त्यागश्चास्त्रमन्त्रेण विश्लेषेण यतो भवेत् ।
मूलेनाथ गृहीत्वा तत्कुर्याच्चैवात्मसात्पुन ॥३६९॥
तद्वच्छक्ति तदीया च कुण्डाद्व्यापकलक्षणाम् ।
क्ष्मातत्वस्याथ सान्यस्य ह्याधारस्य शान्तये ॥३७०॥
पूर्वसख्य तु चास्त्रेण कृत्वा होम महामते ! ।

स्रुवमाज्येन सम्पूर्य स्कन्दसूत्रात्तु पार्थिवम् ॥२७१॥
विसर्ज्य पूर्णया सार्धं विलाप्याग्नौ स्वके पदे ।
मूलमन्त्रेण सहसा हृत्पद्मे प्रेरितेन तु ॥२७२॥
स्वदेहाद्रेचकेनाथ प्रेर्य शक्तिं च शैश्वरीम् ।
तयाक्रान्तमथस्य च सस्मरेद्व्यतिरिक्तया ॥२७३॥
कामिन्दुनो बाब्जपत्रमाधाध्वान च भौवनम् ।
शिष्यदेहे निरुद्धस्य व्यक्तिक्रोडीकृतस्य च ॥२७४॥
स्वशक्तिपरिपूर्णस्य क्ष्माबीजस्य तथोपरि ।
विरेच्यशक्तिमन्त च व्यस्तधर्मेण पूर्ववत् ॥२७५॥
तत्क्षणेबीजसस्य तु अध्वान तु यथास्थितम् ।
प्रकाशयन्त कृपया तन्नाथन्तस्य सिद्धये ॥२७६॥
विरक्त भावयेच्छिष्य चिन्मयन्तमिद धिया ।
इद तत्पार्थिव तत्त्व मुधा वै दु खपञ्जरम् ॥२७७॥
भावतत्त्वगत चास्य सुसहत्व च साम्प्रतम् ।
कथमत्र त्वह चास मस्य मे न तता इमा ॥२७८॥
विमुक्त पजराधद्दखुखमासे विहङ्गम ।
उर्ध्वगाती तदारूढस्त्वेव मन्त्रबलाच्छिशु ॥२७९॥
सम्भ्रमथ दिज्ञाप्य तत्प्रभुन्वेन यत्स्थित ।
सन्निग्द्धो भवेत्तस्य सति सर्वदेव हि ॥२८०॥
युष्मत्प्रसादसामर्थ्याद्यथावत्ताभिवो गुण ।
देहान्त गम्यतन्मात्र भवेदासीनमस्य वै ॥२८१॥
सम्यक्सम्प्रतिपन्नस्य शासने पारमेश्वरे ।
इ परापिते नाथ ' अस्माघमभृति त्वया ॥२८२॥
भगाय मोक्षविघ्नाना भवितव्यम कर्मण ।
इति विज्ञाप्य चाज्ञाप्य आराधाद्गनय क्रमात् ॥२८३॥

सह शक्त्या समाकृष्य भूयस्तत्पूरकेण तु ।
तद्देहे चाम्मय बीज साधार पूर्ववन्न्यसेत् ॥३८४॥
कुण्डमध्ये तु सन्धाय जीवशक्तिं च पूर्ववत् ।
विरेच्य शक्तिमास्तत्र नियोज्य तदनन्तरम् ॥३८५॥
तत्समाधौ यथापूर्वं कुम्भकेन महामते ! ।
अथाप्य देहमासाद्य होमध्यानादिना परम् ॥३८६॥
तत्राधिकारपूर्वं तु सर्वं निर्वर्त्य तस्य वै ।
आप्येन सूत्रस्कन्धेन सह पूर्णां निपात्य च ॥३८७॥
अप्तत्व पदसयुक्त तेनाक्रान्त स्मरेत्तथा ।
तत्स्थ मन्त्रसमूह तु सह तत्पतिना तु वै ॥३८८॥
पूर्ववच्छ्रावयित्वा च रसमग्राप्य गन्धवत् ।
मनोवसान नीत्वैव त वर्णाध्वोर्ध्वगोचरम् ॥३८९॥
निष्ठाङ्गेन महाबुद्धे ! तेजसास्त्रेण चेच्छया ।
समुद्धृत्याथ वै प्राग्वचोक्त्य बुद्धिगोचरे ॥३९०॥
षडध्वमुक्त मूलेन प्राप्तसज्ञ च त शिशुम् ।
तत्वकञ्चुकनिर्मुक्त शान्तात्मन्येकता गतम् ॥३९१॥
स्मृत्वा शक्त्यात्मनाग्नौ तु लब्धलक्ष परे पदे ।
ऐश्वरेण तु बीजेन प्रोक्तसत्वान्वितेन च ॥३९२॥
तत सवेद्य निर्मुक्ते समाधौ विनियोज्य च ।
न वेत्ति यत्र सलीन स्वानन्द द्वैतमात्रकम् ॥३९३॥
आहुतीना शत हुत्वा तदापादनकर्मणि ।
नीत्वा समानता सर्वं तेनैव स्वधियाखिलम् ॥३९४॥
सह सवेद्यजालेन वाक्प्रबन्ध यथास्थितम् ।
निस्तरङ्गमयो भूत्वा दद्यात्पूर्णाहुतिं पराम् ॥३९५॥
अथाग्निता प्राप्य गुरु प्रदद्यादाहुतिं पुन ।

बीजनाथेन शिष्यस्य त्वपमोक्षनिवृत्तये ॥३९६॥
पदेरोङ्कारसरुद्धै पदावस्थितमानस ।
सर्वज्ञो भव चोक्त्वैव जुहुयाद्द्वादशाहुतिम् ॥३९७॥
मर्वैवमेवमगाग्निरवद्यो निराश्रय ।
सर्वेश्वर सर्वशक्ति सुसम्पूर्णोऽच्युतो हरि ॥३९८॥
व्यापी निरद्धषाड्गुण्यो निर्विकारो निरजन ।
नित्यो नित्यादितोनूतो नित्यानन्द सुनिष्कळ ॥३९९॥
अनाधन्तो ह्यनिमनो वासुदेवो विमूतिमान् ।
हुत्वैव न तत कुर्यात्पूर्णया पुनरेव हि ॥४००॥
स्थिता वैभवदीक्षाया मुमुक्षोरैश्वरे पदे ।
यशसो धाम चाभ्येति ह्यचिरात्परमेश्वरम् ॥४०१॥
ईश्वरेच्छावशेनैव देहपातान्महामते ! ।
भोगेच्छो पद्मनाभीय उभयेष्मो पदद्वये ॥४०२॥
शक्तिमच्छ क्रियोगेन त्वथ बुद्धिमयेऽध्वनि ।
निर्वेदयो देहपातन्त कालमुद्धृत्य तत्पदात् ॥४०३॥
अन्तर्गूढो यथा काष्ठान्तावरश्च पृथक्कृत ।
न भूय सह काष्ठेन साम्यमेति तथा पुमान् ॥४०४॥
ये नितोध्वान्तेर भूयो नेति तन्मयता तत ।
ममाश्रितचतुर्नि [illegible] निर्निवेश्यात्मनोमन ॥४०५॥
यथाद्दुरस्त्यमन्याया न [illegible] ।
सम्मिनो यम्बोदन [illegible] परात्मनि ॥४०६॥
[illegible]निर्मुक्तमा[illegible] ब्रम गतास्म् ।
[illegible] स्वयमेव हि ॥४०७॥
[illegible]
[illegible]

पृथग्वर्णात्मना याति स्थितये न तथा स्वयम् ।
नो यान्ति निश्चय यत्र चातुरात्म्यादनुग्रहात् ॥४०९॥
ऋते वेदविदो विप्रास्त्वेतस्मिन् प्रथमेक्षरे ।
स शब्दमूर्तिर्भगवानभ्येति च कलात्मना ॥४१०॥
तद्गृहो युज्यते येन तन्निष्ठाना हि कर्मणा ।
न षाड्गुण्यकलोत्था च यावन्मूर्तिर्निरञ्जना ॥४११॥
त्वद् केनान्यथा मूर्तं तद्गृहीतु नियुज्यते ।
तत्वा· कलामया सर्वे प्रभवाप्ययलक्षणा ॥४१२॥
पूर्वोक्ता वासुदेवाद्या अच्युतान्ता यथोदिता ।
तत्वेभ्यो निर्गता मन्त्रास्त्वणिमादिगुणैर्युता ॥४१३॥
षट्कलागलैर्युक्ता येषु सख्या न विद्यते ।
व्यञ्जिता तैस्त्वनिर्माण तुर्याद्य पदसञ्ज्ञकम् ॥४१४॥
कर्मणामात्मलाभार्थं मोहार्थं तत्क्षयाय च ।
द्विसप्तभुवन विश्व गुणत्रयमय हि यत ॥४१५॥
तदशुद्ध जड नित्य भोग्ये व्याप्य पृथक्स्थितम् ।
इत्यध्वषट्कमुद्दिष्ट हेयोपादेयलक्षणम् ॥४१६॥
भुवनाध्वा पदाध्वा च विना तुर्यपदेन तु ।
हेयशेषमुपादेय कर्मणा तदपेक्षया ॥४१७॥
व्यपेक्षयाप्युपेयश्च हेयपक्षे प्रयाति च ।
किं तु तत्राप्युपाय वै निस्तरङ्गे परे पदे ॥४१८॥
विवेकपदसस्थस्य दीक्षया सस्कृतस्य च ।
विचार्यमाण एव हि विश्रमो यत्र वै स्फुटम् ॥४१९॥
जायते तत्पर ब्रह्म वासुदेवाख्यमव्ययम् ।
अम्बर परमाणूना जुहूनामास्पद यथा ॥४२०॥
तथा चाद्य प्रबुद्धाना जीवाना हि निकेतनम् ।

विज्ञेय भुवनाना च पदानामन्तर हि यत् ॥४२१॥
येनेश्वरेच्छया तेषा मन्त्रा वै क्रीडयन्ति च ।
मायीयेऽध्वद्वये तस्मिन् सुखदु खमये फले ॥४२२॥
ईश्वरेच्छानुविद्धाना भक्ताना परमेश्वरे ।
गुरूणा दीक्षिताना चाप्याराधनरतात्मनाम् ॥४२३॥
भवन्त्यध्वद्वयोर्ध्वस्था मन्त्राश्चाज्ञाप्रतीक्षका ।
नयन्ति कर्मिण सम्यङ्मायायोध्वद्वयाद्बलात् ॥४२४॥
स्वस्थानमणिमादीना भोगाना प्राप्तये तु वै ।
विरक्तस्य च तद्भोगात्स्वशक्त्या प्रेरयन्ति च ॥४२५॥
स्वव्यापारवशेनापि तत्त्वाध्वन्यमृतोपमे ।
यत्राणिमादिर्मन्येत तृणानीव च सस्थित ॥४२६॥
अनुग्रहपरास्तस्य तत्त्वाध्यक्षादयोमला ।
नयन्त्यप्ययता सम्यक्सकलाध्वनि शाश्वते ॥४२७॥
स षाड्गुण्यमयो ब्रह्म वासुदेवोऽध्वमूर्तिभृत् ।
नित्ये स्वात्मनि सम्बन्धे शब्दब्रह्माभिधेऽध्वनि ॥४२८॥
करोति योजनान्तस्य यत्रस्थ स्वयमेव हि ।
प्राप्नोति तत्परिज्ञानात्सुशान्त भगवत्पदम् ॥४२९॥

सङ्कर्षण ।

देव वर्णाध्वविज्ञान वद विलक्षण मम ।
प्राप्नोति यत्परिज्ञानादध्वी सद्वासुदेवताम् ॥४३०॥

श्रीभगवान् ।

पद्माध्वशोधभुवनस्य लब्धमन्त्रस्य चात्मन ।
सोऽनुभूतिपद याति परामन्त्रानरूपधृक् ॥४३१॥
भिन्नवर्णमय शब्द पूर्वलक्षणलक्षित ।
स च गुणात्मनिचये विज्ञेयो हि नरात्मना ॥४३२॥

प्रभवाप्ययोगेन शब्दभास्वरलक्षण ।
सकारान्तस्त्वकाराच्च हकारादान्त एव हि ॥४३३॥
प्रभवेद्द्वादशान्तस्तु हकाराश्चतुरत्मनाम् ।
अकारस्त्वप्यये चैव तुल्यतातोनयो स्मृता ॥४३४॥
वर्णव्यूहसमूहेस्मिन् ज्ञेय ज्ञानसमाधिना ।
विश्राम उदयो व्याप्तिर्व्यक्तिराड्वासुदेवता ॥४३५॥
अत्रैकैका परिज्ञेया मूर्तिर्वै त्वेवमेव हि ।
युक्ता विश्रमपूर्वेण चतुष्केण समासत ॥४३६॥
दण्डवत्सान्निवेशेन संस्थिता ह्येवमेव हि ।
द्विषट्क धारणाना च द्वादशाद्यात्मलक्षणम् ॥४३७॥
सोपानभूत यत्क्रान्ता द्वादशान्त विशेत्परम् ।
नीत्वैव व्यक्तिभावेन हृत्पद्मोदरसंस्थितम् ॥४३८॥
वर्णाध्वान दीक्षितस्य शब्दब्रह्मेति य स्थित ।
ससैन्य हुतभुग्भूमिं प्रणीतेनोदकेन तु ॥४३९॥
सह शिष्येण चात्मान तेनैवाच्छिद्रसिद्धये ।
पूर्ववद्धूतिना कृत्वा लक्ष्म चाग्निं प्रणम्य च ॥४४०॥
समुत्थाय ततो यायाच्च गृहीत्वाच्युतालयम् ।
पूजयित्वा जगन्नाथ निवेद्य नियमाच्छिशो ॥४४१॥
सविशेषात्समासेन सान्तरान्योग्यतावशात् ।
यथावदुपदेष्टव्य ततस्तम्यार्चन हृदि ॥४४२॥
मुद्रासमन्वितो मन्त्रो न्यासध्यानपुरस्सर ।
इतिकर्तव्यता शास्त्रसङ्क्षिप्ता च सविस्तरा ॥४४३॥
तत्सम सन्ततत्वेन सर्वं कार्यं यथा स्थितम् ।
गुर्वर्चन तत कुर्यादात्मना च धनादिना ॥४४४॥
पूरयित्वाम्भसा पाणिमर्घ्यपात्रात्तु दक्षिणम् ।

पडङ्गमन्त्रसजस क्षेत्रस्य तस्य मस्तके ॥४४५॥
मण्डल प्रणवेनाथ पाणौ सूर्यमम स्मरेत् ।
तत्राभिन्न न्यसेत्सम्यग्ध्येव देवतागणम् ॥४४६॥
कृत्वा विमार्जित दद्यात्साशिष तस्य मूर्धनि ।
यथोक्ता च यथाभीष्टा त्वचिरादेव पुत्रक ! ॥४४७॥
तवास्तु वैभवी सिद्धि मोक्षलक्ष्मीसमन्विता ।
इति वैभवदीक्षाया लक्षण समुदाहृतम् ॥४४८॥
तत्प्रयुक्तस्य सामान्य सर्वमन्त्रगणस्य च ।
येन येन हि मन्त्रेण दीक्षा कार्याथ कस्यचित् ॥४४९॥
तस्य तस्य तदीयाना पूर्वोद्दिष्टेन वर्त्मना ।
कार्योऽत्रावयवाना तु विनियोगो यथोदित ॥४५०॥
समहृदद्युदादीना मूलान्ताना समाचरेत् ।
सह तत्त्वगणेनैव सर्वदाध्यात्मरूपताम् ॥४५१॥
सम्यग्गृह्य तत कुर्यात्सम्यगभ्यर्चन तु वै ।
नेत्रकर्माणि हृद्बीज पश्चाङ्गाना विधीयते ॥४५२॥
निरङ्गाना तु मन्त्राणामङ्गमन्त्रोक्तकर्मणाम् ।
प्रणवो विनियोक्तव्य सह कर्मपदेन ॥४५३॥
सम्पाद्या विधिनानेन व्यूहदीक्षार्थिना तु सा ।
किंतु वै तत्र योक्तव्य प्रत्येकस्मिन् हि कर्मणि ॥४५४॥
चतुष्क वासुदेवाद्य बीजाना तत्पुरोदितम् ।
एवमेवाद्यमन्त्रस्तु निश्शेष कर्मसग्रहे ॥४५५॥
योक्तव्यो ब्रह्मदीक्षाया षोढा भक्त्या च पूर्ववत् ।
स्वरूपेण यथावस्थमुक्तेष्ववसरेषु च ॥४५६॥
किं त्वेकवचनेनात्र देवाना प्रार्थना मता ।
योजना त्वधिवासोक्ता विज्ञातव्या समासत ॥४५७॥

नित्यदीक्षाद्वयस्यास्य नान्यन्मोक्षादृते फलम् ।
तत्रापि चातुरात्मीया दीक्षा प्राक्कमलेक्षण ! ॥४५८॥
बलाद्ददाति षाड्गुण्यभोगार्शि भावितात्मनाम् ।
फल सक्चन्दनादीना होमद्रव्यस्य चापि यत् ॥४५९॥
प्रकृत्या सहसाभ्येति विलय मन्त्रदीक्षया ।
एव दीक्षात्रय चापि दद्यादेकम्य वा क्रमात् ॥४६०॥
सर्वाराधनयोग्यत्वसिद्ध्यै मुनिपुङ्गवा ! ।
यद्वाष्टाक्षरमन्त्रादौ व्यापकत्रितये द्विजा ! ॥४६१॥
एकेन सर्वसामान्य दीक्षा कुर्याद्यथाविधि ।
तेनाङ्गसहितेनैव सर्वकर्म समाचरेत् ॥४६२॥
तदापि विभवव्यूह परमन्त्रास्तथा द्विजा ! ।
शक्तिभूषणवाहास्त्रमन्त्राश्चोपदिशेद्गुरु ॥४६३॥
इत्थ दीक्षाविधि सम्यक्कीर्तितो मुनिपुङ्गवा ! ।
अथ मण्डलदृष्टस्य शास्त्रज्ञस्य यथार्थत ॥४६४॥
समाराधनसक्तस्य पुत्रकत्व गतस्य च ।
सिद्ध्यर्थं सर्वमन्त्राणामधिकाराप्तये तु वा ॥४६५॥
तत्काल गुरुणा कार्यं यच्छिष्यस्याभिषेचनम् ।
भगवत्तन्त्रवेत्तृणा पञ्चकालरतात्मनाम् ॥४६६॥
संहितापारगाणा च आचार्याणा च सन्निधौ ।
यतीना चक्रलक्ष्माणा बोधकाना महात्मनाम् ॥४६७॥
देवस्य पुरत कुर्याच्चतुरश्र च मण्डपम् ।
सर्वोपकरणोपेत मध्ये भद्रासनान्वितम् ॥४६८॥
तस्मिन् पुर्यादनन्ताद्य सन्धानधाममोहितम् ।
पूजयित्वार्घ्यपुष्पाद्यै ततो देवस्य सम्मुखम् ॥४६९॥
बद्धपद्मासन शिष्य तत्रारोप्य कृताञ्जलिम् ।

कान्ताभिर्गीयमानं तु स्तूयमानं च वन्दिभिः ॥४७०॥
शङ्खाद्यैर्ध्मायमानं तु पठ्यमानं तु मङ्गलैः ।
जप्यमानं परं मन्त्रं ध्यायमानमिवाच्युतम् ॥४७१॥
अष्टाङ्गेनार्चयित्वा तु कुम्भमादाय वैष्णवम् ।
स तन्त्रसेन मन्त्रेण सम्यक्सिद्धिव्यपेक्षया ॥४७२॥
सहस्रावर्तितं कृत्वा शतावर्तितमेव वा ।
सिद्धये द्रुतहेमाभं स्मृत्वा तमभिषिच्य च ॥४७३॥
स्वाहान्तं मन्त्रमुच्चार्य प्लुतं हृत्कमलोदरात् ।
एवमुक्त्वा नमोऽन्तस्तु ध्यात्वा तं स्फटिकामलम् ॥४७४॥
समुत्कीर्य स्वरम्भेण तस्य हृत्पद्मगं स्मरेत् ।
अशक्तिविग्रहं ब्रह्म स्वाह्लादानन्दलक्षणम् ॥४७५॥
समारोप्य धिया सम्यक् स्वाधिकारं तु चाखिलम् ।
समासाद्यार्चितशुद्धं दिव्यमागमसञ्चयम् ॥४७६॥
शुभमाराधनाधारमक्षसूत्रं च किङ्किणीम् ।
स्रुक्स्रुवौ योगपट्टं च शङ्खचक्रं कमण्डलुम् ॥४७७॥
चमसं कुसुमञ्चार्घ्यपात्रं कृष्णाजिनं ततः ।
पादुके पादपीठं च छत्रमासनदर्पणम् ॥४७८॥
मयूरव्यजनं शुक्लं चामरं भगवद्ध्वजम् ।
यथार्हदण्डसहितं काषाये क्षौमवाससी ॥४७९॥
समुत्थाप्यासनात्सर्वमाहृत्य स्नानं जलम् ।
विनिक्षिप्य शुचौ स्थाने देवमभ्यर्च्य वै ततः ॥४८०॥
तादर्थ्येन तु सन्तर्प्य पूर्णान्तं चाग्निमध्यगम् ।
क्षान्त्वा पूर्वोक्तविधिना सकुण्डान् मण्डलान्तरात् ॥४८१॥
अर्घ्यपात्रसमूहाच्च बलिदानं समाचरेत् ।
सोदकेन च भूतानामोदनेनास्त्रमुच्चरन् ॥४८२॥

बलिमण्डलकं कृत्वा यागागारस्य बाह्यत ।
कृत्वान्तर्बलिदानं तु प्रादक्षिण्येन वै पुरा ॥४८३॥
अथ ऊर्ध्वं इदं बावन्धा शेषं तन्मण्डले ददि ।
नमोऽस्त्वच्युतभूतेभ्य सर्वेभ्य सर्वदैव हि ॥४८४॥
सदिक्पतिभ्य सास्त्रेभ्य शान्तये स्वस्य वै शिशो ।
पूजायमुपसंहृत्य दत्तशिष्टेण पूर्ववत् ॥४८५॥
वृत्तमण्डलमध्ये तु सितपद्मोदरे तत ।
दत्तशिष्टैर्यजेद्देव सर्वदेवगुरु प्रभुम् ॥४८६॥
तर्पयित्वाग्निमध्ये तु कुर्याचम्य विसर्जनम् ।
तदीयमथ निक्षिप्य स्वापटे नवा जलान्तरे ॥४८७॥
यागावनौ च तच्चक्रं द्वादशारं विचिन्त्य च ।
न्यस्यास्त्रमन्त्यवर्गपुष्पाद्यैः समभ्यर्च्य तदन्तरे ॥४८८॥
करकं वारिसम्पूर्णमादाय विनिवेश्य च ।
तत्रेष्ट्वा वीर्यमन्त्रेण मध्ये मन्त्रास्त्रमुत्तमम् ॥४८९॥
मन्त्राम्बुपयसा पूर्णमपरं शुभलक्षणम् ।
तदग्रतोऽर्घ्यकलशं तन्मार्गेण च बाह्यगम् ॥४९०॥
तदभ्यर्च्य यथान्याय दूरदाष्टशतमन्त्रितम् ।
वषट्पदनिरुद्धेन मूलमन्त्रेण तं पुन ॥४९१॥
दद्यात्तदन्तं सास्त्रेण प्राग्वद्वीयूषधारणाम् ।
निर्वर्त्मीकरणं कुर्यात्सर्वेषां मन्त्रवारिणा ॥४९२॥
तदम्बुधारादानेन ध्यानोच्चारयुतेन च ।
सविभज्याथ चैतेषां मन्त्रपानं सुधामयम् ॥४९३॥
सम्पाद्यास्त्रपरं पश्चात्ममन्त्राधकरं न्यसेत् ।
आदाय तत्तोयकुम्भमस्त्रमन्त्रमुदारमर् ॥४९४॥
धारयेत्पूर्ववद्धारामथ मध्ये निधाय तम् ।

सुपूर्णमुदकेनैव कृत्वा फलसमन्वितम् ॥४९५॥
गुर्वागमने कुर्याच्छिष्य प्रयतमानस ।
भगवद्यागवद्भक्त्या कर्मणा मनसा गिरा ॥४९६॥
यागोपयुक्तसम्भार तस्मै सर्वं निवेद्य च ।
सशिर पाणियुग्म तु कृत्वा चैव तदग्रिगम् ॥४९७॥
शान्तव्य सुप्रसन्नेन श्रद्धापूतेन चेतसा ।
पञ्चरात्रविदस्तद्वद्यतीश्च स्नातकादय ॥४९८॥
सम्पूज्य विधिवद्द्याच्चेषाशक्त्या च दक्षिणाम् ।
सवाहनपरात्कालाल्लब्ध्वानुज्ञा तु गौरवीम् ॥४९९॥
भ्रातृभि सह चाश्नीयाद्बहुभि पूर्वदीक्षितै ।
तथान्यैर्भगवद्भक्तै सुहृत्सम्बन्धिबान्धवै ॥५००॥
श्रान्त सह शिष्यैस्तु काले ह्यन्यत्र तत्र वा ।
तदिच्छयाप्यनुव्रज्य निवर्तेताथ वै यदा ॥५०१॥
कृत्वा तु पादपतन बहुधा समदक्षिणम् ।
श्रामोक्षात्सर्वसिद्धीना भक्ताना भावितात्मनाम् ॥५०२॥
परा गतिर्गुरुर्यस्मात्प्रसादस्तत एव स ।
इत्येवमभिषिक्तस्तु भवेन्मुख्याधिकारिणाम् ॥५०३॥
स्वार्थे परार्थयजने उभयत्राधिकारिणाम् ।
अन्ये तु दीक्षामात्रेण सत्कार्यो मुनिपुङ्गवा ! ॥५०४॥

मुनय ।

किं स्वार्थं च परार्थं किं के च तत्राधिकारिण ।
नंदेन्मुनिशार्दूल वदस्व वदता वर ॥५०५॥

नारद ।

स्वगृहे स्थापितो देव स्वार्थ इत्यभिधीयते ।
पर्वनामे नगरे[illegible] [illegible] ग्रामादिके ॥५०६॥

ग्रामे वा नगरे वापि स्वयव्यक्तादिभेदतः ।
संस्थितो भगवान् विप्राः! परार्थ इति कथ्यते ॥५०७॥
परार्थस्सूर्यसदृशः स्वार्थस्तु गृहदीपवत् ।
उत्कृष्टः परशब्दोयमर्थो मोक्षादिलक्षणः ॥५०८॥
यस्मात्तल्लभ्यते सोयं परार्थः परिकीर्तितः ।
स एव सर्वफलदः सर्वेषामपि यत् द्विजाः! ॥५०९॥
तस्मात्सर्वजनैः सेव्यः परार्थपुरुषोत्तमः ।
स्वार्थः स्वस्वगृहे पूज्यः स्वस्वाभीष्टफलप्रदः ॥५१०॥
स्वार्थस्यापि परार्थस्य पूजायामधिकारिणः ।
शाण्डिल्या ह्यन्वये जाता गुरोर्लब्धाभिषेचनाः ॥५११॥
अन्ये तु केवलं स्वार्थपूजने ह्यधिकारिणः ।

मुनयः ।

शाण्डिल्याद्यास्तु के योगिन् तद्वंश्या एव केवलम् ।
कथं परार्थयजने भवन्ति ह्यधिकारिणः ॥५१२॥
तत्सर्वं विस्तरेणैव ब्रूहि नो मुनिपुङ्गव! ।

नारदः ।

शाण्डिल्यादिमुनीन्द्राणां शृणुध्वं वैभवं द्विजाः! ।
पुरा कृतयुगस्यादौ वासुदेवः परः पुमान् ॥५१३॥
स्वाराधनार्थं भूलोके सद्धर्माणां प्रवृत्तये ।
लोकसंरक्षणार्थं च स्वस्य पद्मायुधाधिपान् ॥५१४॥
समालोक्य भवन्तोद्य ह्यवतीर्य धरातले ।
आद्यमेकायनं वेदं मोक्षैकफललक्षणम् ॥५१५॥
प्रकाशयध्वं सर्वेषां सद्धर्मांश्च विशेषतः ।
तत्र तत्रावतीर्णं मां स्वयंव्यक्तादिभेदतः ॥५१६॥
संपूजयध्वं सर्वेषां मोक्षलाभाय भूतले ।

इत्यादिगणनस्ते वै निष्णोराज्ञानुवर्तिन ॥५१७॥
सुदर्शनाम्ना देवीशा पञ्च मर्त्त्यपिरूपत ।
समुत्पन्ना भितितले पौण्ड्रूर्धसगादिषु ॥५१८॥
पञ्चायुधाशास्ते पञ्च शाण्डिल्यश्चोपगायन ।
मौञ्जयायन कौशिकश्च भारद्वाजश्च योगिन ॥५१९॥
ते मिळित्वा समालोच्य विष्णोराराधनेच्छया ।
अभिसगम्य तोताद्रौ तपश्चक्रुस्सुदुस्तरम् ॥५२०॥
तेषा तु तपसा तुष्टो वासुदेवो जगत्पति ।
लक्ष्म्या सार्धं खगेशानमधिरुह्य कृपानिधि ॥५२१॥
आजगाम गिरिश्रेष्ठ यत्र सन्ति मुनीश्वरा ।
ततस्ते मुनिशार्दूला दृष्ट्वागान्त जगत्पतिम् ॥५२२॥
शङ्खचक्राङ्कितकर कोटिसूर्यसमप्रभम् ।
पुळकाङ्कितसर्वांगा आनन्दाश्रुसमन्विता ॥५२३॥
प्रणर्तन्तस्तुवन्तश्च गायन्तश्च परस्परम् ।
प्रदक्षिण च कुर्वन्त प्रणेमु पुरुषोत्तमम् ॥५२४॥
आनन्दाम्बुधिसम्मग्नानेनान्वीक्ष्य श्रिय पति ।
उवाच करुण वाक्य मेघगम्भीरयागिरा ॥५२५॥

श्रीभगवान् ।

ऋषयस्तपसायुष्मत्त्तेनानन्यचेतसा ।
सतुष्टोऽस्मि प्रसन्नोस्मि वृणीध्वमभिवाञ्छितम् ॥५२६॥
इति तद्वचन श्रुत्वा ऋषयो हृष्टमानसा ।
बद्धाञ्जलिपुटा सर्व प्रत्यूचुर्विनयान्विता ॥५२७॥
अधीता सकला वेदा शास्त्राणि विविधानि च ।
मोक्षोपाय न जानीमस्त्वतस्त्वा शरण गता ॥५२८॥
इदैवानुग्रह कर्तुमर्हसि त्व दयानिधे ।

इति संप्रार्थितो देवः करुणामृतवारिधिः ॥५२९॥
तदानीमेव योगीन्द्रान् शाण्डिल्यादींस्तु दीक्षया ।
संस्कृत्य चाभिषिच्याथ स्वयमेव जगत्पतिः ॥५३०॥
आद्यमेकायनं वेदं रहस्याम्नायसंज्ञितम् ।
दिव्यमन्त्रक्रियोपेतं मोक्षैकफललक्षणम् ॥५३१॥
पञ्चापि पृथगेकैकं दिवारात्रं जगत्प्रभुः ।
अध्यापयामास यतस्ततस्तु मुनिपुङ्गवाः ॥५३२॥
शास्त्रं सर्वजनैर्लोके पञ्चरात्रमितीर्यते ।
तदर्थांश्चोपदिश्याथ तानुवाचेदमच्युतः ॥५३३॥
एष एकायनो वेदः उपदिष्टो मया द्विजाः ! ।
मोक्षायनाय वै पन्था एतदन्यो न विद्यते ॥५३४॥
तस्मादेकायनं चैनं प्रवदन्ति मनीषिणः ।
एतदुक्तविधानेन दिव्यक्षेत्रादिषु स्थितम् ॥५३५॥
स्वयव्यक्तादिरूपेण यजध्वं मुनिपुङ्गवाः ! ।
स्वार्थे परार्थयजने यूयं मुख्याधिकारिणः ॥५३६॥
युष्मद्वंश्याश्च ये विप्राः ! तेऽभिषिच्य यथाविधि ।
तेऽपि स्वार्थे परार्थे च भवेयुरधिकारिणः ॥५३७॥
एष कार्तयुगो धर्मः प्रतिबुद्धैर्निषेवितः ।
त्रेतादौ मन्दसञ्चारो भविष्यति मुनीश्वराः ! ॥५३८॥
त्रेतायुगादौ सर्वेऽपि नानाकामसमन्विताः ।
व्यामिश्रयाजिनो भूत्वा त्यक्ष्यन्त्याद्यं सनातनम् ॥५३९॥
अन्तर्दधाति सर्वोऽयं वेद एकायनाभिधः ।
ततो योग्याय भगवान् प्रादुर्भावयति स्वयम् ॥५४०॥
इत्युक्त्वान्तर्दधे देवो वासुदेवः सनातनः ।
तदा प्रभृति ते सर्वे शाण्डिल्याद्या मुनीश्वराः ॥५४१॥

आद्य भागवत धर्ममादिभूते कृते युगे ।
अनुतिष्ठन्ति सर्वेऽपि मानवाश्च मुनीश्वरा ! ॥५४२॥
ततस्त्रेतायुगे जाते नानाकामयशाञ्जना ।
त्यक्त्वा भागवत धर्म बभूवुर्मिश्रयाजिन ॥५४३॥
ततश्चैकायनो वेदो मन्दचारो बभूव च ।
तदा मुनीन्द्र शाण्डिल्यो दृष्ट्वा कामरतान् जनान् ॥५४४॥
लोकसरक्षणार्थाय तपस्तेपे सुदुस्तरम् ।
अनेकानि सहस्राणि वर्षाणा तपसोन्तत ॥५४५॥
द्वापरस्य युगस्यान्ते आदौ कलियुगस्य च ।
साक्षात्सङ्कर्षणो देव प्राप्य प्रत्यक्षता मुने ॥५४६॥
परित्यज्य पर धर्म मिश्रधर्ममुपेयुषाम् ।
मूयस्तत्पदमाद्क्षाणा श्रद्धाभक्ती उपेयुषाम् ॥५४७॥
अनुग्रहार्थं वर्णाना योग्यतापादनाय च ।
तथा जनाना सर्वेषामभीष्टफलसिद्धये ॥५४८॥
मूलवेदानुसारेण सार सगृह्य सर्वत ।
अनुष्टुप्छन्दोबन्धेन प्रोक्तानि हरिणा स्वयम् ॥५४९॥
सात्वतादीनि शास्त्राणि भोगमोक्षप्रदानि च ।
उपदिश्याथ मुसली तत्रैवान्तरधीयत ॥५५०॥
लब्ध्वैव सात्वतादीनि शास्त्राणि मुनिपुङ्गवा ! ।
शाण्डिल्योऽध्यापयामास मुनिश्चैवौपगायनम् ॥५५१॥
तथा मौञ्ज्यायनादींश्च सनकाद्यांश्च योगिन ।
तत प्रभृति ते सर्वे शाण्डिल्याद्या मुनीश्वरा ॥५५२॥
सात्वताद्युक्तमार्गेण हरेराराधनादिकम् ।
कुर्वन्त स्वम्ववश्याश्च शिष्यांश्चापि सहस्रश ॥५५३॥
काण्वी शाखामधीयानान् वेदवेदान्तपारगान् ।

संस्कृत्य दीक्षया सम्यक्सात्वताद्युक्तमार्गतः ॥५५४॥
अभिषिच्य च तान् सर्वान् कृत्वा स्वार्थपरार्थयोः ।
पूजाधिकारिणो विप्रा ! तैरेतत्सात्वतादिकम् ॥५५५॥
शास्त्रं प्रवर्तयामासुस्ते हि मुख्याधिकारिणः ।
इत्युक्त्वा मुनिशार्दूलाः शाण्डिल्यादिमहात्मनाम् ॥५५६॥
माहात्म्यं लेशतो ह्यत्र ह्यधिकारप्रसङ्गतः ।
एवं दीक्षा चाभिषेको यत्सिद्धान्तेन पूर्वतः ॥५५७॥
प्राप्तस्तेनैव मार्गेण कार्यौ नान्योक्तमार्गतः ।
सिद्धान्तसङ्करं नैव कुर्याच्छास्त्रविशारदः ॥५५८॥

मुनयः ।

सिद्धान्तं नाम किं को वा भेदस्तस्य मुनीश्वर ! ।
तत्सर्वं विस्तरेणैव वदस्व वदतांवर ॥५५९॥

नारदः ।

चतुर्धा भेदभिन्नोयं पाञ्चरात्रस्य आगमः ।
पूर्वमागमसिद्धान्तं द्वितीयं मन्त्रसंज्ञितम् ॥५६०॥
तृतीयं तन्त्रमित्युक्तमन्यत्तन्त्रान्तरं भवेत् ।
आद्यं नित्योदितव्यूहस्थापनादिप्रकाशकम् ॥५६१॥
अपौरुषेयं सद्ब्रह्मवासुदेवाख्ययाजिनाम् ।
लक्ष्यभूतं द्विजेन्द्राणां हृदिस्थमधिकारिणाम् ॥५६२॥
ब्रह्मोपनिषदाख्यं च दिव्यमन्त्रक्रियान्वितम् ।
विवेकदं परं ज्ञानमनिच्छतोपवर्गदम् ॥५६३॥
एवं नित्योदिताख्यस्य नित्याकारस्य च प्रभोः ।
वासुदेवाभिधानस्य षाड्गुण्यादिगुणोदधेः ॥५६४॥
प्रथमं लक्षणं विद्धि हृदयाब्जगह्वरत् ।
एतदागमसिद्धान्तं मुनिरूपं तु विद्धि तत् ॥५६५॥

एष कार्तयुगो धर्मस्सर्वधर्मोत्तम स्मृत ।
ततस्त्रेतायुगस्यादौ भोगमोक्षप्रसिद्धये ॥५६६॥
तत्र आगमसिद्धान्तात्रिस्सृत बहुभेदकम् ।
मन्त्रसिद्धान्तमत्र तज्जाग्रद्व्यूहादिमूर्तिना ॥५६७॥
समुदीर्णं द्वितीयस्य सात्वतस्य महात्मन ।
तेन प्रद्युम्नसञ्ज्ञस्य तेन तुर्यात्मनो विभो ॥५६८॥
तेन वागीश्वराख्यस्य तस्माद्दीपाख्यविग्रहे ।
सङ्क्रान्त च तत पश्चादुपेन्द्रादित्यवदिपु ॥५६९॥
तथैव नारदाद्येषु देवताना गणेष्वपि ।
सङ्क्रान्त मन्त्रसिद्धान्त भेदभिन्नमनेकधा ॥५७०॥
यत्र शान्ततर व्यूह शान्तोदितमनन्तरम् ।
सुषुप्तिसञ्ज्ञ स्वप्नाख्य जाग्रद्व्यूह यथोदितम् ॥५७१॥
मूर्त्यन्तर केशवाद्य प्रादुर्भाव तथान्तरम् ।
हृत्पद्मपद्मपीठादौ लक्ष्मीपुष्ट्यादिशक्तिभि ॥५७२॥
लाञ्छनैश्शङ्खचक्राद्यैर्गरुडप्रमुखैरपि ।
भूतसिद्धादिभि शास्तृपर्यन्तैर्यजन हितम् ॥५७३॥
विश्वरूपनृसिंहस्य दीक्षा पूर्व तथापरम् ।
विभवव्यूहसूक्ष्माख्यमधिकार यथाक्रमम् ॥५७४॥
सामर्थ्यपुत्रिकादीना चतुर्णामभिषेचनम् ।
तथैव समयाचार मूर्तीना स्थापनक्रमम् ॥५७५॥
मन्त्रमण्डलमुद्राणा कुण्डादीना च लक्षणम् ।
कर्मणामेवमादीना विधान यत्र पुष्कलम् ॥५७६॥
मन्त्रसिद्धान्तसञ्ज्ञ तद्बहुभेदसमन्वितम् ।
परव्यूहादिभेदेन विनैकैकेन मूर्तिना ॥५७७॥
साङ्गेन केवलेनाथ नानाव्यूहेन मुख्यणे ।

तथास्त्रैर्विग्रहोपेतैरावृत तन्त्रसञ्जितम् ॥५७८
नृसिंहकपिलक्रोडहंसवागीश्वरादय ।
मुख्यानुवृत्तिभेदेन केवलापाङ्गसंयुता ॥५७९॥
चक्राद्यस्त्रवरैश्चाथ मूर्धजैर्मकुटादिभि ।
कान्तागणैश्च लक्ष्म्याद्यै परिवारै खगादिकै ॥५८०॥
पूजिता विधिना यत्र तत्तन्त्रान्तरमीरितम् ।
ये जन्मकोटिभि सिद्धास्तेषामन्तोत्र संस्थिति ॥५८१॥
यस्मात्तस्माद्विवेदैष सिद्धान्ताख्यो यथार्थत ।
शास्त्रमन्त्रक्रियादीना मूनीना नवनस्य च ॥५८२॥
देशिकस्याभिजातस्य यथापूर्वं परिग्रह ।
तथैव यावत्काल तु नाचर्तव्य तदन्यथा ॥५८३॥
विपरीतकृते चात्र राजराष्ट्राद्यनर्थकृत् ।
ततस्सिद्धान्तसाङ्कर्यं नाचर्तव्य कृतात्मभि ॥५८४॥
यद्यदिष्टतम लोके पूर्वसिद्धाविरोधि तत ।
प्रतिग्राह्यमतोन्योन्यविरुद्ध सन्त्यजेद् बुध ॥५८५॥
वैखानसेषु तन्त्रेषु शैवपाशुपतेषु च ।
विहितान्यत्र जातानि विरुद्धानीति किं पुन ॥५८६॥
एव सिद्धान्तभेदश्च कीर्तितोय यथाश्रुतम् ।
इतोन्यच्छ्रोतुमिच्छा चेत्कथ्यता मुनिपुङ्गवा ! ॥५८७॥

इति श्रीपाञ्चरात्रे ईश्वरसंहिताया

दीक्षाविधिर्नाम

एकविंशोध्यायः।

—o—

अथ द्वात्रिंशोऽध्यायः ।

मुनयः ।

नियमा उपदेष्टव्या शिष्यस्येति पुरा त्वया ।
प्रोक्तं हि मुनिशार्दूल! नियमांस्तान् प्रकाशय ॥१॥

नारद ।

एतदेव पुरा पृष्टो देवः सङ्कर्षणेन हि ।
प्रोवाच नियमांस्तांस्तु प्रवक्ष्यामि मुनीश्वराः ! ॥२॥

श्रीभगवान् ।

प्रत्येकस्मिन् हि नियमे निगते तु गुरोर्मुखात् ।
ब्रूयाद्वै बाढमित्येव शिष्यः शोकाभिशान्तये ॥३॥
नाक्रम्या गौरवी च्छाया दैवं यानगता त्वपि ।
गुरुवद्गुरुवर्गश्च द्रष्टव्यो नित्यमेव हि ॥४॥
शयनासनयानाद्य तदीयमभिनन्दयेत् ।
अतन्द्रितः सदा कुर्याद् व्यापारं तद्गृहेऽखिलम् ॥५॥
नासने तल्पमञ्च च योगाभ्यासश्च धारणा ।
सुयन्त्रितः सदा वाक्कायचित्तसमीक्षकः ॥६॥
तत्सन्निधौ तु नान्येषां प्रत्युत्थानं समाचरेत् ।
कुर्यात्संशयविच्छित्तिं न तदादेशतो विना ॥७॥
व्याख्यानमागमानां च योगाभ्यासश्च धारणा ।
अवश्यकार्याण्येतानि स्वगृहे न गुरोर्गृहे ॥८॥
न शङ्खचक्रपद्माङ्के भोक्तव्यं भाजने तु वै ।
तल्लक्ष्म चोपलं काष्ठं लोष्टं वा फलकादिकम् ॥९॥
क्रमणीयं न पादेन कल्प्यं नैवासनार्थतः ।
भगवच्छासनज्ञानामागधनरतात्मनाम् ॥१०॥
यथोचिता यथाशक्ति पूजा कार्या सदैव हि ।

प्रासादं देवदेवीयमाचार्यं पाद्यगन्धिकम् ॥११॥
अश्वत्थं च वटं धेनुं सत्तमं च गुरोर्गृहम् ।
दूरात्प्रदक्षिणीकुर्यान्निकटे प्रतिमां विभो ॥१२॥
दण्डवत्प्रणिपातैस्तु नमस्कुर्याच्च यादिशन् ।
न यानपादुकारूढो न सोपानत्पादभृत् ॥१३॥
न विक्षिप्तमना भूत्वा सविशेद्भगवद्गृहम् ।
न व्याख्यावसरे कुर्यात्प्रत्युत्थानाभिवादने ॥१४॥
नाभक्तानां न मूर्खाणां नास्तिकानां विशेषतः ।
दातव्यं सम्प्रदेयश्च नोपहासरतात्मनाम् ॥१५॥
नापृच्छितं समुद्घाट्य शासनं पारमेश्वरम् ।
समक्षं नान्यभक्तानां न तत्सन्देहशान्तये ॥१६॥
प्रकाशनीयं तल्लोभात्र चान्यायेन नोभयात् ।
सुगन्धफलपुष्पाद्यमपूर्वमुचितं च यत् ॥१७॥
अभोज्यं गुरुदेव विधिविदितवर्जितम् ।
तस्करात्पतिताच्चण्डाद्दम्भलोभमदान्वितात् ॥१८॥
मात्राविरं न गृह्णीयाद्यस्मादुपचारतः ।
गृहीत्वा भगवद्विम्बं वृत्त्यर्थमटतीति यः ॥१९॥
नगरापणवीथीनां तस्य देवलकस्य च ।
दर्शनं स्पर्शनं नैव कुर्यात्सम्भाषणं तथा ॥२०॥
गायेत्तु भगवद्गाथा यो ग्रामे नगरान्तरे ।
तं प्रभुस्तावकं चैव पूजयेच्चैव सर्वदा ॥२१॥
विष्णुव्रतपरं चैव विष्ण्वायतनवासिनम् ।
विष्ण्वालापकथासक्तं विष्ण्वायतनमार्जकम् ॥२२॥
श्रावकं वैष्णवानां च विष्णुधर्मपरायणम् ।
पर्येष्टिकृद्वैष्णवानां मान्यो वै विष्णुवत्सदा ॥२३॥

आतस्थाय चिन्तयात्मारामात्स्वयमेव हि ।
पूजार्थमत्तमन्त्रेण पुष्पादीन् प्रगृह्य सदा ॥२४॥
मायादरम्यमथ वा निर्गंधं हि तदार्जने ।
अकण्टकद्रुमोत्थाश्च कण्टकद्रुमजा अपि ॥२५॥
द्रव्याः सुगन्धा कर्मण्या प्राद्याः सर्वे सितादयः ।
उग्रगन्धा ह्यकर्मण्यास्त्वप्रसिद्धास्तथैव च ॥२६॥
चतुष्पथशिलावाम्यश्मशानावनिमध्यगाः ।
हता अशनिपाताद्यैः कृमिकीटसमावृताः ॥२७॥
वर्जनीया प्रयत्नेन पर्युष्पफलादयः ।
अम्बुजानि सुगन्धीनि सितरक्तादिकानि च ॥२८॥
योक्त्यानि पवित्राणि नित्यमाराधने तु वै ।
साङ्कुराणि च पत्राणि सुगतान्येवमेव हि ॥२९॥
विहितान्यर्चने नित्य यदृतुप्रभवानि च ।
न गृह्य कर्त्तयेन्थै कुसुमैरर्चनं हितम् ॥३०॥
विशेषतः महामस्य सिद्धिमुक्तियुतस्य च ।
अतोऽन्यथा न दोषोऽस्ति दोषः उन्मत्तकादिभिः ॥३१॥
सद्यो हृतानि विहितं स्वम्लानानि यथाक्रय. ।
भजतामम्बुसिक्तानां तथा कुर्वन्ति चान्यथा ॥३२॥
निर्दोषता प्रयान्त्याशु मन्त्रिणामवलोकनात् ।
भवन्ति भक्तिपूतानि हृन्मन्त्रनिरतात्मनाम् ॥३३॥
न कांस्यपात्रे संस्थाप्य न तत्र विनिवेदयेत् ।
देवाय मधुपर्कादि तथा वै सति सम्भवे ॥३४॥
मृण्मयायसपात्राणां न धूपमपि निर्दहेत् ।
धूपार्थं गुग्गुलुं मन्त्री देयश्चाभावतोऽपरः ॥३५॥
सह घण्टारवेणैव दीपार्थं परिवर्जयेत् ।

मेषो मज्जातसीतैलं घृतं तैलविमिश्रितम् ॥३६॥
नारिकं मधुपर्कार्थे दधिर्क्षीरादिकं शुभम्।
कौलत्थः कोद्रवः कृष्णः शाल्युत्थो नोदनो हितः ॥३७॥
नापक्वान्नं न मांसं च आरनालविभावितम्।
न चाराधनकाले तु समुत्तिष्ठेत्त्वरान्वितः ॥३८॥
आसमाप्तिक्रियां चैव उपरोधेन केनचित्।
आधाराद्भगवद्बिम्बाद्भद्रपीठान्मलच्युतिः ॥३९॥
न कार्या कण्टकैर्लोहैर्मृदुकूर्चादिना विना।
न सायान्न स्वपेन्नमो न मौनश्चाचरेद्गुरौ ॥४०॥
नोच्छिष्टं संस्पृशेत्किञ्चिन्नाश्नीयाद्भगवद्गृहे।
सन्निकर्षेण चाग्नेस्तु न गृहे मधसङ्करे ॥४१॥
भक्तानां कृतदीक्षाणां व्यङ्गचः शास्त्रार्थ एव हि।
अन्येषां धर्मशास्त्रे च लोभनिर्मुक्तया धिया ॥४२॥
शिष्याणां विष्णुभक्तानां नित्यं कुर्याच्च संग्रहम्।
मानमात्सर्यकार्पण्यलोभमोहादयो गुणाः ॥४३॥
नेतव्यास्तानव सर्वे यावज्जीवावधि क्रमात्।
अकस्मादुपपन्नानां देशान्तरनिवासिनाम् ॥४४॥
इष्टोपदेशः कर्तव्यो नारायणरतात्मनाम्।
यो न वेत्त्यच्युतं तत्त्वं पञ्चरात्रार्थमेव च ॥४५॥
तथा स वैष्णवीं दीक्षां नानाशास्त्रोक्तलक्षणाम्।
ानेन सह सम्बन्धः कार्यो भिन्नक्रमेण तु ॥४६॥
। शास्त्रार्थस्य शास्त्राणां बुद्धिपूर्वं उपप्लवः।
आचर्तव्य इहाज्ञानात्पारम्पर्यक्रमं विना ॥४७॥
प्रष्टव्यो भगवद्भक्त आप्तो लक्षणकोविदः।
प्रसिद्ध आर्जवे दृढो नष्टं शास्त्रार्थलक्षणम् ॥४८॥

मुद्राभण्डरमन्त्राणां निष्फलदेहपरेण च ।
भवितव्यं गुरूणाञ्च सकाशात्सर्वदैव हि ॥४९॥
न च सर्वतमन्त्राणां विना मायाशकेन तु ।
आनुकूल्यं गवेषव्यं मुक्त्वा मण्डलदर्शनात् ॥५०॥
नाभिचक्रे तु हृदये कन्दमूले गळान्तरे ।
भ्रमध्ये ब्रह्मरन्ध्रे च स्थानेष्वेतेषु मन्त्रराट् ॥५१॥
स्मर्तव्यस्तूर्य शङ्खाश प्रवासे शयनेष्वपि ।
मृगस्तुरगामतानि नायान्मीनोत्थितानि च ॥५२॥
नाहसकच्छपीयानि न शृङ्गाटफलानि च ।
न तथा पद्मबीजानि न वटाम्रं समारुहेत् ॥५३॥
छेद्यमान न त दहयेत्तद्दलं वाङ्मिणा स्पृशेत् ।
पुण्यक्षेत्रे महातीर्थे सिद्धाश्रममनुत्तमम् ॥५४॥
वैष्णवीं पदं यापि व्यक्तिस्थान तथाच्युतम् ।
आमाद्य मण्डलं कृत्वा चक्रं वा द्वादशारकम् ॥५५॥
निर्वर्णाय विधिवच्चातुर्मास्य महामते ! ।
गृहे स्वयमपूर्वं वा चक्रं कृत्वा तु कुब्जगम् ॥५६॥
चतुर्विधेन रजसा प्रतिमाया अथामत ।
सयुक्तानपि पूर्वोक्तैरेताश्च समयान् सदा ॥५७॥
निर्वाहकाणां भक्तानां प्रयच्छेत्सततगुरुः ।
ज्ञात्वा निर्वाहकं भक्तं तस्यादौ देशिकेन तु ॥५८॥
समुद्दिश्याश्च ते सर्वे निर्वहत्यथ येषु च ।
तेषु तेषु नियोक्तव्यो यथा न च्यवते पुनः ॥५९॥
भावन्ति समयस्थस्य सविघ्नाः सविनाशकाः ।
विमुखा सिद्धयो यान्ति ह्यापदो हि भवन्तिव ॥६०॥
ज्ञात्वैव सावधानेन भवितव्यं हि तां प्रति ।

सारमादाय वै बुध्या निर्मथ्य नियमोदधिम् ॥६१॥
कृपया गुरुणा देयमशठानां च पावकम् ।
भक्तिरस्मै गुरौ मन्त्रे शास्त्रे तदधिकारिणि ॥६२॥
नियते पञ्चकस्यास्य यथावत्परिपालनात् ।
अनुष्ठानात्तु नान्येषां स्वतन्त्रेण यथेच्छया ॥६३॥
भक्तानां मनसोऽभीष्टाः प्रवर्तन्ते हि सिद्धयः ।
येऽनिर्मलेन मनसा उपरोधात्तु कुर्वते ॥६४॥
पालनं समयानाञ्च ते मज्जत्यसितेष्वनि ।
सुप्रसन्नेन मनसा यथैतत्परिपाल्यते ॥६५॥
तथा प्रसादमभ्येति स्व आत्मा तु हितैषिणाम् ।
नूनं कालुष्यमुक्तानां सितानामिह सत्पथे ॥६६॥
समयी साधकाचार्य पुत्राणां च भवेच्छुभम् ।
इत्येवमुक्ता नियमा इतः किं श्रोतुमिच्छथ ॥६७॥

इति श्रीपाद्मरात्रे ईश्वरसंहितायाम्
नियमविधानं नाम
द्वाविंशोऽध्यायः ।

अथ त्रयोविंशोऽध्यायः।

मुनयः ।

भगवन्नारदमुने सर्वज्ञ वदतां वर ! ।
स्वरूपं दिव्यशास्त्रादेर्मन्त्राणां लक्षणं तथा ॥१॥
मुद्राणां लक्षणं मूर्तिध्यानं कुण्डादिलक्षणम् ।
देविरादिविधानं च यच्चदन्यदुच्यते ॥२॥
तत्सर्वं विस्तरेणैव वदस्वानुग्रहादिना ॥

नारद ।

शास्त्रं दिव्यं च मन्युक्तं पौरुषं चेति वै त्रिधा ।
प्रोक्तं तल्लक्षणं तु प्रवक्ष्यामि मुनीश्वरा ! ॥३॥
मदर्थोपमसादिघ स्वच्छमक्षराक्षर सिरम् ।
चातुरात्म्यस्वरूपेण संस्थितस्य विभो सदा ॥४॥
स्वाभाविकं परत्वं तु यत्र यत्र समीरितम् ।
अन्यासां मन्त्रमूर्तीनां यत्र चौपाधिकं तु यत् ॥५॥
तुर्यादिजाग्रत्पर्यन्तं पदभेदं प्रकाशितं ।
भक्तानामनुकम्पार्थं यत्र वै चतुरात्मन ॥६॥
शक्तीशस्यभिभोग्यत्वं विभवं समप्रकाशितं ।
आच्छादनमुषाणां शक्तीनां विहगेश्वितु ॥७॥
लयादिभेदभिन्नं तु स्वरूपं यत्र भावितम् ।
बीजपिण्डपदाद्येन चातुर्विध्येन सत्तमा ॥८॥
मन्त्राः प्रवर्तिता यत्र यत्र स्थापनकर्मणि ।
अनुवेधक्रियाप्रोक्ता यत्र वै नित्यपूजनम् ॥९॥
मूलमूर्तौ तु सम्पूर्णं प्रोक्तं प्राधान्यतो द्विजा ! ।
तत्र कर्तुमशक्यं यत्स्नानाद्यं तावदेव तु ॥१०॥
बिम्बान्तरे तदर्थं तु कर्मबिम्बपुरस्सरे ।
विहितं दर्पणाद्येषु तदभावान्महामते ! ॥११॥
क्ष्माजकानलवाय्वाख्यनाभसीयेन वै द्विजा ! ।
धारणापञ्चकेनैव धारणाद्वितयेन च ॥१२॥
दहनाप्यायनाख्येन यत्र शुद्धिश्च भौतिकी ।
आगमश्रुतिमूलत्वं स्वस्य यद्युपपादकम् ॥१३॥
सत्वारमेश्वरं वाक्यमाज्ञासिद्धं हि मोक्षदम् ।
एकमादेयवाक्यार्थं आगमो यो महामते! ॥१४॥

सन्मार्गदर्शनं कृत्स्नं विधिवाद च विद्धि तम् ।
तत्प्रामाण्यात्तु यत्किञ्चित्तसमभ्यूह्य यथार्थत ॥१५॥
पूर्वापराविरोधेन निर्वाहमविचारत ।
सर्वेषां रञ्जकं गूढं निश्चयीकरणक्षमम् ॥१६॥
पारमेश्वरवाक्योक्तमर्थजालं यथास्थितम् ।
सत्यगीतापयस्य तात्त्विकं मुनिभाषितम् ॥१७॥
प्रशस्तं यस्मिन्द्धीना सम्प्रवर्तकमप्यथ ।
मूलमूर्तिमनादृत्य कर्मार्चायां तु पुष्कलम् ॥१८॥
नित्याराधनं प्रोक्तं प्राधान्येन तु यत्र वै ।
जपचन्द्रादिबिम्बाना प्रमाण लक्षण तथा ॥१९॥
स्थापन यत्र निर्दिष्टं मन्त्रं वै जगतां पते ।
पूजनं तु समुद्दिष्टं भाक्तानां जडात्मनाम् ॥२०॥
तन्त्राणामपि विप्रेन्द्र ! दिशां कालस्य वाचके ।
परमेष्ठ्यादिभिर्मन्त्रैः पञ्चभिर्यत्र वै क्रमात् ॥२१॥
स्थापनादिनिष्ठान्त पञ्चकं समुदीरितम् ।
यागपूर्वा हरिस्तोमपर्यन्ता सप्त कीर्तिता ॥२२॥
यागा यत्र तथा सप्त तत्क्रमादधिकारिण ।
उक्तं यत्र प्रतिष्ठायां षोडशन्यासकल्पनम् ॥२३॥
एतज्जानीहि तत्सर्वं राजसं मुनिभाषितम् ।
भगवन्तं समुद्दिश्य यन्त्रभाव विनैव तु ॥२४॥
ब्रह्मरुद्रमुखानां तु विबुधानां तथैव च ।
मातृणामपि दुर्गाया स्वतन्त्रेण तु यत्र वै ॥२५॥
मन्त्रध्यानं प्रमाणं च लक्षणं स्थापनं तथा ।
निर्दिष्ट तामसं नाम मुनिवाक्यं तु विद्धि तत् ॥२६॥
अनर्थकमसम्बद्धमल्पार्थं सकदम्बरम् ।

अनिर्वाह्कमायोपनेर्वाक्य तत्पौरुष स्मृतम् ॥२७॥
देय चानर्थभिर्द्धीनामाकर नरकावहम् ।
पारमेश्वरवाक्यार्थैर्यद्विरोधि न तत् द्विजा ॥२८॥
समाद्य सात्विकार्येषु मुनिवाक्येषु यत्नत ।
यदप्यपेदेत्त विप्र' समाद्यमविरोधि तत् ॥२९॥
सात्विकादिममाधेषु समभ्यूत्र महामते! ।
प्रसिद्धार्थमुपादाय सङ्गतार्थं विलक्षणम् ॥३०॥
अपि चेत्पौरुष वाक्य ग्राह्य तन्मुनिवाक्यवत् ।
एव दिव्यादिशास्त्राणा भेद ज्ञात्वा यजेद्धरिम् ॥३१॥
यो न ज्ञात्वा तु साङ्कर्यं पूजायमनुतिष्ठति ।
स हि सर्वस्य जगत साङ्कर्यं कुरुते सदा ॥३२॥
विदोषात्स्वस्य यशस्य तस्मादापद्यपि द्विजा ! ।
न कुर्याच्छास्त्रसाङ्कर्यं हितैषी शास्त्रकोविद ॥३३॥
स्वयव्यक्त तथा सैद्ध विबुधैश्च प्रतिष्ठितम् ।
मुनिमुख्यैस्तु गन्धर्वैर्यक्षैर्विद्याधरैरपि ॥३४॥
रक्षोभिरसुरैर्मुख्यै स्थापित मन्त्रविग्रहम् ।
दिव्यशास्त्रोक्तविधिना पूजयेच्छास्त्रकोविद ॥३५॥
स्थापित मनुजैर्देव मुनिवाक्योक्तमार्गत ।
पूजयेद्द्विज ! तत्रापि ज्ञानिमिस्तत्त्वदर्शिमि ॥३६॥
वासुदेवैकनिष्ठैस्तु देवतान्तरवर्जितै ।
व्यामिश्रयागमुक्तै तु तीव्रभक्तिसमान्वितै ॥३७॥
स्थापित मनुजेन्द्रैस्तु अनुवेषादिकोविदै ।
अर्चयेद्देवदेवेश दिव्यशास्त्रोक्तवर्त्मना ॥३८॥
मुनिवाक्योक्तमार्गेण पूजन यत्र वर्तते ।
तत्रापि दिव्यमार्गेण चेत्पूजन कर्तुमिच्छति ॥३९॥

मुनिमार्गं परित्यज्य दिव्यमार्गेण पूजयेत्।
भवेत्सान्निध्यमाहात्म्यं कालं कल्पक्षयावधि ॥४०॥
दिव्यमार्गेण पूजाद्यं वर्तते यत्र नित्यशः।
तत्र दिव्यं परित्याज्य न कदाचिन्महामते! ॥४१॥
मुनिवाक्योक्तमार्गेण न कुर्यात्पूजनादिकम्।
कुर्याद्वा यदि सम्मोहाद्द्विज. सम्मूढचेतनः ॥४२॥
सम्प्रयात्यचिरात्तस्य भवितर्वीजेन वै सह।
समन्त्रं कर्मतन्त्रं च सिद्धयश्च पराङ्मुखा ॥४३॥
इहैव शीघ्रं विप्रेन्द्र! देहान्ते गतसन्तति.।
घोरं प्रयाति नरकं राजा राष्ट्रं च नश्यति ॥४४॥
तस्मात्सर्वप्रयत्नेन दिव्यमार्गं तु न त्यजेत्।
तामसेन तु मार्गेण पूजनं यत्र वर्तते ॥४५॥
तत्रापि राजसेनैव पूजनं सिद्धिदं भवेत्।
राजसेन तु पूजाद्यं वर्तते यत्र नित्यश.॥४६॥
तत्रापि सात्त्विकेनैव पूजनं शुभदं सदा।
सात्त्विकेन तु पूजाद्यं वर्तते यत्र चान्वहम् ॥४७॥
तत्र राजसमार्गेण न कुर्यात्पूजनादिकम्।
यत्र राजसमार्गेण मन्त्रपूर्वं त्वर्चनादिकम् ॥४८॥
तत्र तामसमार्गेण न कुर्यादर्चनादिकम्।
त्रिविधानां [?]गजमार्गानामन्योन्यं स्यात्तु सङ्करः ॥४९॥
सर्वत्र पौरुषे वाक्ये तद्भागमविरोधि यत्।
केवलं तद्विधानेन न कुर्यात् स्थापनादिकम् ॥५०॥
एवं दिव्यादिशास्त्रस्य स्वरूपं कथितं मया।
मन्त्रस्वरूपमधुना कथ्यते मुनिपुङ्गवा! ॥५१॥
सर्वेषु विष्णुमन्त्रेषु मन्त्राः स्युर्यात्रकामयः।

आद्य नारायणाष्टार्णं द्वितीयं द्वादशाक्षरम् ॥५२॥
वासुदेवस्य योगीन्द्रास्ततो विष्णुः षडक्षरम् ।
साधारणास्त्विमे मन्त्रास्त्रयः सर्वासु मूर्तिषु ॥५३॥
अन्ये तु मनवस्तत्तन्मूर्तिमात्रपरा मताः ।
व्यापकत्रितयेनार्च्याः सर्वा अपि च मूर्तयः ॥५४॥
मन्त्रैरन्यैस्तु संपूज्यास्तत्तन्मूर्तय एव हि ।
तस्मात्सर्वेषु मन्त्रेषु व्यापकत्रितयं वरम् ॥५५॥

त्रिष्वप्येषु व्यापकेषु मन्त्रोऽष्टाक्षरोऽधिकः ।
अष्टाक्षरादिमन्त्राणामुद्धारं शृणुतादरात् ॥५६॥
उद्धरेत्प्रणवं पूर्वं नमःशब्दमनन्तरम् ।
ततो नारायणायेति ह्येवमष्टाक्षरो मनुः ॥५७॥
प्रणवान्ते नमःशब्दं कुर्यान्ते भगवत्पदम् ।
वासुदेवाय वै दद्यात्पदं पश्चाक्षरं ततः ॥५८॥
वासुदेवस्य देवस्य मन्त्रोऽयं द्वादशाक्षरः ।
चतुर्थ्यन्तं विष्णुपदं तारेण नमसान्वितम् ॥५९॥

आद्यन्तेऽपि च तन्मन्त्रः षडक्षर उदीरितः ।
ज्ञानादिगुणसंयुक्तैरक्षरैर्बिन्दुभूषितैः ॥६०॥
हृदयाद्यस्त्रलासि स्याच्छिष्टवर्णान्यपि द्विजाः ।
नेत्रं च योजयेदेवमङ्गलासि प्रकीर्तिता ॥६१॥
ततस्तु मूर्तिमन्त्राणामुद्धारक्रम उच्यते ।
प्रशस्ते विजने गुप्ते गन्धलिप्ते धरातले ॥६२॥
सुधूपितेऽर्घ्यपुष्पाढ्ये वर्णचक्रं प्रसार्य च ।
यस्मिन् प्रतिष्ठितं विश्वमाब्रह्मभुवनादिकम् ॥६३॥
येनोदितेन जगतः प्रभवः समनन्तरम् ।
स्वात्मन्युपरते तस्मिन् प्रलयः सम्प्रजायते ॥६४॥

प्रेरक चन्द्रसूर्याभ्या सबाह्याभ्यन्तर तु य्त् ।
नित्योदित मधाक्षस्य वर्णमीश्वरवाचकम् ॥६५॥
यत्र स्थानविभागेन वर्णात्मा भगवान् स्थित ।
अकाराद्यो विसर्गान्त सौरचान्द्रकलागण ॥६६॥
ह्रस्वदीर्घविभागेन नाभौ यत्र द्विरष्टक ।
कादिमान्तोप्यराशस्य प्राकृतस्तत्त्वसचय ॥६७॥
पृथिव्यादिप्रकृत्य तो युगयोगेन लाङ्गलिन् ! ।
कलनादेहमृत्कालो नेमिगो नवलक्षण ॥६८॥
मकाराद्यो हवर्गान्तो यत्र प्रधिगणे स्वयम् ।
कालवैश्वानर साक्षान्मार्ताण्डायुतदीधिति ॥६९॥
ज्वालायुतसहस्राढ्यो वर्णान्तो भगवान् स्थित ।
आमध्यात्प्रधिपर्यन्तान्नमो ता वर्णस तति ॥७०॥
उच्चार्यार्घ्यादिनाभ्यर्च्य विद्याबीज हि चक्रराट् ।
तत समुद्धरेन्मन्त्र परमात्मनि वाचकम् ॥७१॥
गळ तममृतप्रख्यमचिरान्मोक्षसिद्धिदम ।
अक्षसमुद्धरेत्पूर्वं नेमिषष्ठमनन्तरम् ॥७२॥
नाभिद्वितीयेनाक्रान्त द्वितीयमिदमक्षरम् ।
द्वितीय दशसख्याच तदधश्चाष्टमात्परम् ॥७३॥
नाभेस्त्रयोदशेनेत तृतीयमिदमक्षरम् ।
अथ द्वितीय नवमान्नाभितुर्यादिनान्वितम् ॥७४॥
द्वितीयमष्टमाद्वर्णं केवल विद्धि पञ्चमम् ।
विज्ञानपदमादाय त्र्यक्षर तदनन्तरम् ॥७५॥
आद्यमेकादशाद्वर्णं भिन्न नाभ्यपरेण तु ।
नेमेस्तृतीयवर्णस्य ततस्तदुपरि न्यसेत् ॥७६॥
मन्त्रार्णं नवम ह्येतद्गम मे निबोध तु ।

नाभिर्द्वितीयं तत्रानु ... ॥७७॥
नेमिर्द्वितीयं तदनु नवमादाय चात्मनम् ।
तदुद्देशात्तृतीयं च ... ॥७८॥
त्रयोदशमिदं विद्धि नवमादपरं ततः ।
षष्ठस्य नेमिवर्णस्य ऊर्ध्वे तत्त्रितयं न्यसेत् ॥७९॥
युक्तं नाभेस्तृतीयेन अथ षोडशमुच्यते ।
द्विधीमं दशमाद्वर्णान्नान्येकादशमगुनम् ॥८०॥
चैतन्यात्मपदं दद्यात्मनमन्यमतः परम् ।
द्वाविंशार्णो ह्ययं मन्त्रः पदैः षड्भिरलङ्कृतः ॥८१॥
तत्रैकार्णं पदं ज्ञानं चतुर्वर्णं पदं बलम् ।
षडक्षरैश्चाप्यैश्वर्यं वीर्यं पञ्चाक्षरं परम् ॥८२॥
चतुर्वर्णं पदं तेजः शाक्तं स्याद्व्यक्षरं च यत् ।
तेजो वीर्यं बलं शक्तिरैश्वर्यं ज्ञानमेव च ॥८३॥
दृगस्त्रं कवचं शैखं शिरो हृत्पद्व्ययथाक्रमम् ।
मन्त्रं समाधिविषये नानाभूमिजयेषु च ॥८४॥
निराकारो निरङ्गश्च स्मर्तव्यो ब्रह्मलक्षणः ।
तत्प्राप्त्युपाये प्रथमे यागहोमादिके तु वै ॥८५॥
साकारं सम्स्मरेत्साङ्गं परिवारेण चावृतम् ।
आनीता व्यक्तता येन स्वयं ज्ञानादयो गुणाः ॥८६॥
शश्वद्यागसमाप्त्यर्थं कर्मणामनुकम्पया ।
सोनन्तः संस्मृतो मन्त्रो भक्तिश्रद्धावशेन तु ॥८७॥
फलं यच्छति वै नूनं नित्यं तद्भावितात्मनाम् ।
प्राधान्येन त्वथैश्वर्यं मोक्षो यत्रानुषङ्गतः ॥८८॥
तत्र तद्विघ्नशान्त्यर्थमस्वान्तं विद्धि मन्त्रपम् ।
विपर्ययेतु नेशान्तो मन्त्रो यस्मान्महामते ॥८९॥

दृग्दृष्टिशुद्धिमार्गेण क विमा शान्तवेरसम् ।
स्वकगन्तर्गत तेज स्वान्तस्थाक्ष बहिष्कृतम् ॥९०॥
येन येन हि मन्त्रेण स च नेत्रान्वित स्मृत ।
स्वमन्त्राशस्त्वनुपमो येन येन हृदन्तरे ॥९१॥
सितासित ममाकृष्य स स तद्वाचकोन्वित ।
अथ मन्त्रचतुष्क तु भिन्नषाड्गुण्यवाचकम् ॥९२॥
कर्मणा मोक्षद शश्वत्पूर्वोद्दिष्ट निबोध तु ।
आदायाक्षगत बीज नामिपूर्वमत परम् ॥९३॥
अरादेकादशात्पूर्व तस्याधो विनिवेशयेत् ।
वर्ण नेमेन्तृतीय यत्तृतीयमिदमक्षरम् ॥९४॥
द्वितीयमष्टमाद्वर्ण नाभेस्तुर्यादिनान्वितम् ।
ततस्तु नवम नेमे केवल विद्धि पञ्चमम् ॥९५॥
अष्टमादपर वर्ण द्वितीयस्वरसयुतम् ।
षष्ठमेतद्विजानीयात्सप्तम दशमात्परम् ॥९६॥
अथ द्वितीय दशमादादायोर्ध्वे तु विन्यसेत् ।
अष्टमात्तु द्वितीयस्य मन्त्रार्णमिदमष्टकम् ॥९७॥
द्वितीयात्प्रथम वर्णमष्टमादपर तत ।
नाभ्येकादशमोपेत द्वितीय नेमिमण्डलात् ॥९८॥
पूर्वमेकादशाच्छुद्ध ताडद्नेमेस्तृतीयकम् ।
नेमिपूर्व च तदनु नाभेरेकादशाङ्कितम् ॥९९॥
नेमे पञ्चमथादाय स्थित तत्पञ्चमोपरि ।
ततो नाभिद्वितीयेन युक्त नेमेस्तृतीयकम् ॥१००॥
द्वितीय केवल नेमेरादाय च महामते ।
कर्तेनम पद पश्चाद्योजयेच्चतुरक्षरम् ॥१०१॥
एकविंशतिभिर्वर्णेरय मन्त्र उदाहृत ।

अभिन्न पदभेदेन भवेदेकाधिकस्तु वै ॥१०२॥
मार्गर्णेन पद पूर्वं पञ्चार्ण द्वितय भवेत् ।
षडक्षर तृतीय तु चतुर्थं तद्वदेव तु ॥१०३॥
त्र्यक्षर पञ्चम विद्धि तद्वत् षष्ठ महामते ।
अथापर महामन्त्र द्वितीयमवधारय ॥१०४॥
यत् ज्ञात्वा न पुनर्जन्म भवत्याराधकस्य च ।
आदायाक्षम्क मध्यस्थ नाभिपूर्वमत परम् ॥१०५॥
पूर्वं नेमेन्तु तस्यैव योज्य नाभित्रयोदशम् ।
द्विनेमादपर वर्णं सर्वशक्त्यात्मनेपदम् ॥१०६
द्वितीय द्वादशार्णं द्वितीयात्प्रथम तत ।
पञ्चम च बहिर्हेम्यस्त्रीनेतान्विद्धि केवलान् ॥१०७॥
नाभ्येकादशसभिन्न द्वितीय चाष्टमात्तत ।
नमोनम पदयुतो मन्त्रश्चाष्टादशाक्षर ॥१०८॥
अस्यैकार्णं पद पूर्वं त्र्यक्षर तदनन्तरम् ।
षडक्षर तृतीय तु चतुर्थं चतुरक्षरम् ॥१०९॥
द्वितीय द्व्यक्षरचान्यत्पदयो सप्रकीर्तितम् ।
तृतीयमथ वक्ष्यामि मन्त्र मन्त्रविदा वर ॥११०॥
यत् ज्ञात्वा मानस शुद्धिं परमा याति कर्मिणाम् ।
बीजमादाय मध्यस्थमाद्यमेकादशात्तत ॥१११॥
नमेस्तृतीय तदध ऊर्ध्वं नाभ्यपर तु वै ।
अथाद्यमष्टमाद्यं द्वितीयस्वरसयुतम् ॥११२॥
बहिरेकादशाद्यं वर्णमन्य समाहरेत् ।
दशमादपरवर्णं नेमेरष्टकमन्तत ॥११३॥
युक्त नाभिद्वितीयेन चाद्य नेम्यक्षर तु यत् ।
नाभित्रयोदशोपेतमादाय दशमात्परम् ॥११४॥

द्वितीय नवमाद्वर्णे युक्त नाभ्यपरेण तु ।
तत्सस्य दशमाच्छुद्ध ततो बाह्यात्तु पञ्चमम् ॥११५॥
नेमेर्द्वितीय तदधो युक्त नाभे परेण तु ।
द्वितीय दशमाद्वर्णं प्राणाख्यक्षर पदम् ॥११६॥
ततस्त्वेकादशादाद्य केवल च समाहरेत् ।
अथ नाभिद्वितीयेन युक्त नेमेस्तृतीयकम् ॥११७॥
नाभित्रयोदशोपेत बहिष्ठेप्यपर तत ।
नेमेस्तृतीयस्योर्द्धे तु नवमादपर न्यसेत् ॥११८॥
ततो नाभिद्वितीयेन युक्त प्राङ्नेमिमण्डलात् ।
द्वितीयमथ वै बाह्यात्सप्तमम्क हि केवलम् ॥११९॥
त्रयोविंशतिभिर्वर्णैरुपेतोप्येष मन्त्रराट् ।
पदै पूर्वोक्तसख्यैस्तु तेषा भेदोप्यथोच्यते ॥१२०॥
पूर्वमेकाक्षर विद्धि द्वितीय तु नवाक्षरम् ।
तृतीय द्व्यक्षर चैव चतुर्थं त्र्यक्षर स्मृतम् ॥१२१॥
षडक्षरमथोर्ध्वं श द्व्यक्षर तदनन्तरम् ।
चतुर्थमधुना मन्त्र निबोध गदतो मम॥१२२॥
येन विज्ञातमात्रेण सविदुत्पद्यते परा ।
आदायादौ यदक्षस्य नाभिपूर्वमनन्तरम् ॥१२३॥
ततस्तृतीयादपर वर्णमादाय लाङ्गलिन् । ।
नेमेर्द्वितीय तस्याधस्तदधो नाभिपञ्चमम् ॥१२४॥
द्वितीयमष्टमाद्वर्णं तत्सस्य नेमिमण्डलात् ।
आदायैतद्द्वय कुर्याद्युक्त नाभ्यपरेण तु ॥१२५॥
अथ नाभितृतीयेन युक्त बाह्यात्तु पचमम् ।
आद्यात्पूर्वमथादाय नाभिसप्तमसयुतम् ॥१२६॥
द्वितीयमष्टमाद्वर्णं द्वितीय नेमिमण्डलात् ।

आदायाभ्या नियोक्त्वा द्वितीय नाभिगोचरात् ॥१२७॥
अथ द्वितीय दशमात्केवल वर्णमाहरेत् ।
द्वितीयमष्टमाद्वर्णं तदूर्ध्वे दशमात्परम् ॥१२८॥
नाभिद्वितीयमस्यैव योजयेत्तदनन्तरम् ।
ततो नेमिद्वितीय तु केवल वर्णमाहरेत् ॥१२९॥
अथ नाभेर्यदादिस्थ प्राग्वर्णं दशमादरात् ।
तदधो द्वितय वाक्षात्मथिवर्णमनन्तरम् ॥१३०॥
युक्त नाभिद्वितीयेन त्वादाय तदनन्तरम् ।
नेमिद्वितीयसज्ञ्य यन्नमस्कारवद् तत ॥१३१॥
अष्टादशाक्षरो ह्येष द्वयधिक पदसख्यया ।
एकार्णं पदमाद्य तु द्वितीय चतुरक्षरम् ॥१३२॥
पचाक्षर तृतीय तु चतुर्थं चतुरक्षरम् ।
तथैव पचम विद्धि ह्यन्तस्थ द्वयक्षर स्मृतम् ॥१३३॥
यत्र यत्र पदाना च वर्णाधिक्यमुदाहृतम् ।
तत्रादौ नाभिपूर्वं तु व्याहृत्याद्य पद न्यसेत् ॥१३४॥
अथाभिक्ततनोर्मन्त्र देवस्यास्य महात्मन ।
पिनाक्यपूपसज्ञस्य वक्ष्ये विद्याविवेकत्रम् ॥१३५॥
वर्णमक्षरगणादाय त्वाद्यमेकादशाद्यत
मिश्र नाभिद्वितीयेन तृतीय नेमिमण्डलात् ॥१३६॥
द्वितीय केवल चापाथेजोऽन्याय वै पदम् ।
ततन्येकादशान्पूर्वं केवल तु समाहरेत् ॥१३७॥
तृतीयमक्षर चाद्यायुक्त नाभिपरेण तु ।
दशमादपर वर्णं पूर्वमेकादशाद्यत ॥१३८॥
एकादशान्यगम्‌।न्युक्तेऽनन्तरम् ।
ततो नाभिद्वितीयेन युक्त मन्त्रमा दियत् ॥१३९॥

केवलं द्वितयं वाद्यादाद्यमेकादशात्तथा ।
नेमेस्तृतीयं तदनु द्वितीयस्वरसंयुतम् ॥१४०॥
दशमाद्दपरं शुद्धं पूर्वमेकादशात्ततः ।
नाभ्येकादशसंयुक्तं तदन्तेऽमललोचन! ॥१४१॥
नाभेस्तृतीयसंयुक्तं अभिवर्णं समाहरेत ।
अथ नाभिद्वितीयेन युक्तं यत्परमष्टमात् ॥१४२॥
नेमेर्द्वितीयं तदनु नमस्कारसमन्वितम् ।
चतुर्विंशतिभिर्वर्णैर्युक्तो मन्त्रोऽयं महान् ॥१४३॥
प्रणवेन पदं चास्य पूर्वमेकाक्षरं स्मृतम् ।
द्वितीयं त्र्यक्षरं प्रोक्तं पंचार्णं तदनन्तरम् ॥१४४॥
षडक्षरं चतुर्थं तु सप्तार्णं चात्र पंचमम् ।
पदं तु द्व्यक्षरं षष्ठं मन्त्रस्यास्य महामते! ॥१४५॥
नानामन्त्रस्वरूपेण ह्यादिदेवः परः प्रभुः ।
आदिमध्यावसानेषु स्थितः सर्वस्य सर्वदा ॥१४६॥
चतुर्व्यूहचतुष्के स्वे शान्तादिव्यक्तलक्षणे ।
प्राधान्येन त्रयाणां च देवानामवतिष्ठते ॥१४७॥
यथाम्बरस्थः सविता लोक एव महामते! ।
जलाश्रयाणि चाश्रित्य बाहुल्यं सम्प्रदर्शयेत् ॥१४८॥
एवमेकोपि भगवान् नानामन्त्राश्रयेषु च ।
तुर्यादिपदसंस्थेषु बहुत्वमुपयाति च ॥१४९॥
अनुग्रहार्थं भक्तानां नानाश्रद्धावशेन तु ।
चतुष्कमथ मन्त्राणां निबोध गदतो मम ॥१५०॥
सितादिवर्णव्यक्तीनां वाचकत्वेन वै क्रमात् ।
अक्षरं नाभिपूर्वं च वर्णं यद्दशमात्परम् ॥१५१॥
नेमिपूर्वमथो नाभेस्त्रयोदशसमन्वितम् ।

द्वितीयं द्वादशाद्वर्णं द्विशोयात्प्रथमं ततः ॥१५२॥
पञ्चमं च वह्निरेभ्यस्त्वेतान्विद्धि केवलान् ।
ततोऽष्टमाद्वितीयं तु नाभ्येकादशभेदिनम् ॥१५३॥
पञ्चार्णं वासुदेवाय पदं च तदनन्तरम् ।
त्रयोदशाक्षरो ह्येष प्रथमं परिकीर्तितः ॥१५४॥
क्रमेण वक्ष्याम्यन्येषामुद्धारं तु यथास्थितम् ।
अक्षरसमक्षरं नाभेर्द्वितीयं तदनन्तरम् ॥१५५॥
पूर्वमन्त्रानुसारेण ततो दद्यात्पदत्रयम् ।
अथात्र पञ्चदशमं नाभेरोङ्कारपूर्वकम् ॥१५६॥
पदत्रयेण तेनैव संयुक्तं विद्धि मन्त्रपम् ।
अथ षोडशसंख्यं यन्नाभे प्रणवपूर्वकम् ॥१५७॥
पूर्वोक्तलक्षणानां तु पदानां प्राङ्निवेशयेत् ।
अस्मान्मन्त्रत्रयाद्विद्धि द्वयं प्राङ्मन्त्रसंख्यया ॥१५८॥
एकं एकार्णरहितं पदभेदमतः शृणु ।
पदद्वयं तु सर्वेषामाद्यमेकाक्षरं स्मृतम् ॥१५९॥
द्व्यक्षरं च तृतीयं तु चतुर्थं चतुरक्षरम् ।
पञ्चाक्षरं पञ्चमं वै त्रयाणां समुदाहृतम् ॥१६०॥
तदेकस्य चतुर्वर्णं प्रद्युम्नास्यस्य लाङ्गलिन् ।
एवं स्वप्नपदस्यास्य समासात्परिकीर्तितम् ॥१६१॥
क्रमशोऽथ चतुर्णां वै वक्ष्ये मन्त्रगणं शृणु ।
अक्षान्तर्गतमादाय नाभे पूर्वगतं परम् ॥१६२॥
भिन्नं नाभिद्वितीयेन नेमिपूर्वमनन्तरम् ।
नाभिपञ्चमसंयुक्तं दशमात्प्रथमं ततः ॥१६३॥
तृतीयं च द्वितीयं च नेमेराद्यं चाहरेत् ।
नाभिद्वितीयबीजेन नवमादपरं ततः ॥१६४॥

तदधो विनियोक्तव्य द्वितीय द्वादशात्तु यत् ।
पञ्चमेनाथ वै नाभेर्युक्त कुर्यादनन्तरम् ॥१६५॥
अष्टमादपर शुद्ध नेमिपूर्वं तथाविधम् ।
युक्त नाभिद्वितीयेन द्वितीय नेमिमण्डलात् ॥१६६॥
भूयस्तत्केवल दद्यात्पद योगेश्वराय वै ।
तदन्ते चक्रिणे शब्दमथ नेमेर्यदष्टमम् ॥१६७॥
पञ्चमेनान्वित नाभेस्तदन्ते विनिवेश्य च ।
शुद्धमेकादशात्पूर्वमाद्य तदनु चाष्टमात् ॥१६८॥
नेमेस्तृतीयेनाक्रान्त ध्वजायेति पद न्यसेत् ।
भिन्नमेकादशात्पूर्वं नाभितुर्येण वै तत ॥१६९॥
अष्टमादपर शुद्ध पञ्चम नेमिमण्डलात् ।
द्वितीयस्वरसयुक्त ससेतिव्यक्षर पदम् ॥१७०॥
वासुदेवाय तदनु सनमस्क पद भवेत् ।
षट्त्रिंशदक्षरो मन्त्रो भेदस्तस्याधुनोच्यते ॥१७१॥
पदमेकादशार्णंतु प्रथम परिकीर्तितम् ।
पञ्चाक्षर द्वितीय तु तृतीय त्र्यक्षर स्मृतम् ॥१७२॥
षडक्षर चतुर्थं तु पञ्चार्णं पञ्चम तु वै ।
षष्ठ सप्ताक्षर विद्धि पद पदविदा वर ! ॥१७३॥
प्रणवान्ते त्वथादाय द्वितीय नाभिमण्डलात् ।
चतुर्दशेन वै नाभेर्युक्त नेम्यष्टक तत ॥१७४॥
द्वितीय दशमाच्छुद्धमथ भूय समाहरेत् ।
तदधो नवमादन्त्य नाभेस्तुर्यादिनान्वितम् ॥१७५॥
एकादशस्वराक्रान्त द्वितीय दशमात्तत ।
बाह्यादथाष्टम नाभेर्युक्त पञ्चदशेन तु ॥१७६॥
केवल पञ्चम नेमेर्द्वितीयचाष्टमात्तत ।

नेमेस्तृतीयेनाक्रान्तं वर्णमेतत्समाहरेत् ॥१७७॥
युक्तं नाभेस्तृतीयेन प्रागरात्प्रथमं तु वै ।
द्वितीयं दशमाद्वर्णं नामेरेकादशाङ्कितम् ॥१७८॥
पञ्चाक्षरं पदं दद्यात्पदन्ते तालकेतवे ।
मूयस्तदवमाने तु पञ्चार्णं नीलवाससे ॥१७९॥

प्रथमात्प्रथमं चाथ द्वितीयम्वरसंयुतम् ।
केवलं नेमिपूर्वं तु आद्यमेकादशाच्चतः ॥१८०॥
वह्निष्टेभ्यश्चतुर्थं तु द्वाभ्यां नाभे परं न्यसेत् ।
केवलं द्वितीयं चाद्यात्सङ्कर्षणाय वै पदम् ॥१८१॥
तृतीयं प्रथमं नेमेरादायाग्नारसंयुतम् ।
द्वितीयमपि वै चाद्याच्छुद्धं तदनु वै नमः ॥१८२॥

षट्त्रिंशाक्षरसंयुक्तम्न्वयः मन्त्रो महामते ! ।
षड्वर्णं पदमस्याद्य पञ्चार्णं तदनन्तरम् ॥१८३॥
दशाक्षरं तृतीयं तु त्रीणि पञ्चाक्षराण्यतः ।
अथादायाक्षरं बीजं नाभेः पञ्चदशं ततः ॥१८४॥
शार्ङ्गपूर्वं पदं दद्याद्धनुर्वर्णमतः परम् ।
नेमिपूर्वमथादाय प्रागराग्प्रथमं ततः ॥१८५॥
तृतीयं च वह्निष्टेभ्यः पदं स्यार्णं ध्वजाय वै ।
अथो तृतीयं दद्यात्तु प्रथमात्प्रथमं ततः ॥१८६॥
तदधो [illegible] द्वितीयं वर्णमष्टमात् ।
द्वितीयं [illegible] पञ्चमम् ॥१८७॥
अष्टमं तु [illegible] पुनरेव त्वम् ।
[illegible] ॥१८८॥
[illegible] ।
[illegible] ॥१८९॥

चतुस्त्रिंशाक्षरः सोयं मन्त्रः शृणु पदान्यपि ।
आद्यं षडक्षरं ज्ञेयं द्वितीयं तद्वदेव हि ॥१९०॥
पंचाक्षरं तृतीयं तु चतुर्थं तु षडक्षरम् ।
पंचार्णं पंचमं विद्धि षड्वर्णं षष्ठमेव हि ॥१९१॥
अक्षस्थं षोडशं नाभेर्द्वितीयं दशमात्तु वै ।
केवलं ह्यभ तेनैव आक्रांतं नवमात्परम् ॥१९२॥
अथादाय च तस्यान्ते प्रथमात्प्रथमं परात् ।
युक्तं नाभिद्वितीयेन वर्णमेतन्महामते ! ॥१९३॥
वर्णद्वयं पदस्यादौ तदेवास्तेस्य वै पुनः ।
अथ द्वितीयं नवमात्प्रथमात्प्रथमं ततः ॥१९४॥
तृतीयमथ वै नेमेर्द्वितीयस्वरसंयुतम् ।
द्वितीयं केवलं चाद्यात्सप्तमं नाभिमण्डलात् ॥१९५॥
अथ षष्ठेन वै नेमेराक्रान्तं द्वितयं न्यसेत् ।
प्राग्वर्णं दशमान्नेमेः पञ्चमस्योर्ध्वगं तथा ॥१९६॥
चतुर्थादपरं वर्णं द्वितीयं नेमिमण्डलात् ।
द्वाभ्यां नाभिद्वितीयं तु योजयेत्तदनन्तरम् ॥१९७॥
दशमादपरं वर्णं तृतीयस्वरसंयुतम् ।
तृतीयमथ वै नेमेर्नाभिपञ्चमसंयुतम् ॥१९८॥
द्वितीयस्वरसंयुक्तं द्वितीयं नवमादरात् ।
अस्यैवाथो नियोक्तव्यं दशमात्प्रथमं हि यत् ॥१९९॥
शुद्धं नेमेर्द्वितीयं तु पदं स्वसितवामसे ।
विष्वक्सेनाय तदनु नमस्कारसमन्वितम् ॥२००॥
द्वात्रिंशार्णो ह्ययं मन्त्रः पदभेदेन वै पुनः ।
एकाधिकस्तु भवति पदान्यथ निबोध मे ॥२०१॥
त्र्यक्षरं तु पदं पूर्वं द्वितीयं त्वष्टवर्णकम् ।

त्रीणि पञ्चाक्षराण्यन्यत्सप्त सप्ताक्षरं स्मृतम् ॥२०२॥
अन्ययवसरे पाते स्मरणे चार्चने विभो. ।
शृणु मन्त्रचतुष्कं तु पुनरन्यत्समासतः ॥२०३॥
नाथमन्त्रादशाद्वर्णं पञ्चमस्वरसयुतम् ।
युक्त स्वरेण तेनैव तृतीय नेमिमण्डलात् ॥२०४॥
द्वितीयस्वरसयुक्तमथ बाह्यात्तु सप्तमम् ।
द्वितीय केवल नेमेराद्यन्ते प्रणवो नम ॥२०५॥
शुद्ध तथाष्टम बाह्याद्वितीयमथ चाष्टमात् ।
अथो नेमेर्द्वितीयेन युक्तं नाभ्यष्टमेण तु ॥२०६॥
केवल द्वितयं बाह्यान्नमस्कारं तत परम् ।
अथाक्षर नाभिपूर्वं द्वितीय त्रिसयादरात् ॥२०७॥
तदथो द्वितय बाह्यान्नाभिपचमसयुतम् ।
अथ नाभिद्वितीयेन युक्त यरसप्तमात ॥२०८॥
केवल द्वितम बाह्यान्नमस्कारमत परम् ।
अथ सर्वाज तदनु द्वितीय द्वादशादरात् ॥२०९॥
द्वितीयात्प्रथम चाथ पंचम नेमिमण्डलात् ।
केवल द्वितय द्वितीय च तथाष्टमात् ॥२१०॥
एकादशस्वरान्ते वासुदेवाय वै नम ।
सप्ताक्षरस्तु षाड्मन्त्रो द्विस्त्रिस्त षडक्षर ॥२११॥

द्वितीयस्वरसंयुक्तं सङ्कर्षणस्य बीजराट् ।
उभयोरन्तरे रेफमाथर्वीजस्य योजयेत् ॥२१५॥
बीजं प्रद्युम्ननाथस्य तृतीयं सर्वकामदम् ।
जीवारूढं हकारं तु लान्तस्योपरि विन्यसेत् ॥२१६॥
विसर्गसहितं बीजमनिरुद्धस्य वाचकम् ।
हकारं च सकारस्य कृत्वा षोढा निवेश्य च ॥२१७॥
द्वितीयतुर्यषष्ठाष्टद्विषट्कदशकैः क्रमात् ।
सर्वं नियोजयेद्विद्धि हृदाद्यास्त्रेत्यपश्चिमान् ॥२१८॥
चातुरात्मीयमन्त्राणां साधनत्वेन सर्वदा ।
ततस्तु केशवादीनां मन्त्रांश्च शृणुतादरात् ॥२१९॥
त्रिधा हकारं कृत्वादौ जीवबीजं तथैव च ।
ककारं च क्षकारं च लिखेत्तद्वत्त्रिधा त्रिधा ॥२२०॥
द्विषट्कमेव बीजानां क्रमेणादौ निवेश्य च ।
ततो वारिधरावारिसन्तु यथाक्षरत्रयम् ॥२२१॥
पौनःपुन्येन सर्वेषामधोभागे नियोजयेत् ।
सर्वे षष्ठस्वरारूढा अनुस्वारविभूषिताः ॥२२२॥
बोद्धव्या केशवादीनां बीजास्त्वेते पृथक् पृथक् ।
प्रणवाद्यैर्नमोन्तैस्तैस्तुर्यान्तैर्नामभिः सह ॥२२३॥
केशवः प्रथमो वाच्यस्ततो नारायणः परः ।
माधवश्चैव गोविन्दो विष्णुश्च मधुसूदनः ॥२२४॥
त्रिविक्रमो वामनाख्यः श्रीधरः पद्मलोचनः ।
हृषीकेशः पद्मनाभो दामोदर इति श्रुतः ॥२२५॥
बीजैर्दीर्घस्वरोपेतैः मासवदङ्गानि कल्पयेत् ।
अथ मन्त्रान् केशवादि देवीनां शृणुत द्विजाः ! ॥२२६॥
क्षान्तसत्तिनय शतधतुर्थां विनिर्भेत्क्रमात् ।

ततो द्विषट्क बीजाना तस्याथो विनिवेश्य च ॥२२७॥
क्रमेण सप्तमाद्वर्गाद्द्वितीय च चतुर्थकम् ।
पुनस्तृतीय तुर्यं च द्वितीय च तृतीयकम् ॥२२८॥
द्वितीय च चतुर्थ च चतुर्थ तदनन्तरम् ।
तृतीयमष्टमाच्चाथ तृतीय सप्तमात्पुन ॥२२९॥
नवमद्वादशाभ्या तु विशेषमिममाचरेत् ।
अथो निमोजयेद्रेफ तत्तूयाणा तु मूर्धनि ॥२३०॥
षट्सप्तमाष्टसङ्ख्यानामीकारमुपरि न्यसेत् ।
सानुस्वार च सर्वेषामिति देवीगणस्य च ॥२३१॥
बीजद्वादशक प्रोक्त यथा चानुक्रमेण तु ।
तारबीजनमोयुक्तैर्वाच्यास्तत्तत्स्वनामभि ॥२३२॥

श्रीश्च वागीश्वरी कान्ति क्रियाशान्तिविभूतय ।
इच्छा प्रीती रतिश्चैव माया धर्महिमेति च ॥२३३॥
स्वरजात्यादियुक्तानि बीजानि हृदयादय ।
इत्येव केशवाग्नीना देवीमन्त्रा सकीर्तिता ॥२३४॥
ततश्चक्रादायुधाना च मन्त्रान् वक्ष्ये मुनीश्वरा ।
समुद्रमूर्तयेस्वाहा पदस्य प्रणवादिक ॥२३५॥
सर्वान्तश्चारिणे कृत्वा ततो गगनमूर्तये ।
स्वाहान्त प्रणवादेष मन्त्र शङ्खस्य कीर्तित ॥२३६॥
ओङ्कारो वेदगोप्त्रे विधे स्वाहापद तु वै ।
गदामन्त्रस्त्वय प्रोक्तश्चक्रस्याथ निगद्यते ॥२३७॥
ओङ्कारान्ते पदद्वा पद्याणे मर्गविष्णवे ।
तदन्ते कालचक्र तु मूर्तये तु तनस्तु फट् ॥२३८॥
पद्मादीनां चतुर्णां तु [illegible] ।
[illegible] ॥२३९॥

आराधनार्थं विहितो वाचको हि चतुर्विध॰ ।
संज्ञानानापदमयः पिण्डाख्यो बीजलक्षणः ॥२४०॥
एभ्यो मध्यात्तदर्थैकेन वाच्यमामन्त्रच भक्तितः ।
यत्रैकपिण्डबाक्योत्थमन्त्रेणार्थमयात्मना ॥२४१॥
तत्र वै विधिनानेन कुर्यात्ताभ्यां हि कल्पनाम् ।
अभिन्नलक्षणो वाच्यमेक एवोपचर्यते ॥२४२॥
कृत्वादौ नाममन्त्रस्य बीजं पिण्डाक्षरं तु वा ।
नयेत्तेनाभिमुख्यं च वाच्यमाद्यन्तगेन वा ॥२४३॥
स तत्र पदमन्त्रं तु विधिनानेन वै ततः ।
कुर्यात्प्रणवपीठस्थं नमस्कारध्वजान्वितम् ॥२४४॥
आभ्यां शान्तस्वरूपत्वादेकत्वमत एव हि ।
संज्ञाख्यं पदमन्त्रं च विधिसंसिद्धिलक्षणम ॥२४५॥
स्वरोत्थं व्यञ्जनोत्थं वा बीजमेकाक्षरं स्मृतम् ।
स्वरव्यञ्जनसंयोगाद्द्वर्णः पिण्डमन्त्रराट् ॥२४६॥
द्वाभ्यामाद्यात्तथान्ताच्च स्वरवर्गान्महामते! ।
स्वरूपेण हि मन्त्रत्वमन्येषां सह बिन्दुना ॥२४७॥
स्वरेणैकेन युक्तस्य स्वरयुग्मान्वितस्य वा ।
सानुस्वारस्य बीजत्वं व्यञ्जनस्यापि लाङ्गलिन्! ॥२४८॥
सत्संकाराख्यशब्दस्य विवर्तो दीधितिप्रभः ।
सल्लक्षणस्त्वनाकारो विद्धि तद्वाचकं त्रिधा ॥२४९॥
क्वचित्पिण्डं क्वचिद्बीजं क्वचिच्छब्दमनाहतम् ।
तस्य योद्गीयमानस्य परिमाण॰ स्फुटोहि यः ॥२५०॥
बह्वक्षरो बहुपदः स्तुतिर्मंत्रोपभञ्जन. ।
अविनाशी सत्संकारो बीजादीनां महर्षिद॰ ॥२५१॥
प्राग्दयान्मनवेनाव सत्यास्त्वेनामनं महत् ।

विदधाति फलं स्वे स्वे किं त्वाद्यं भावयेत्पदम् ।
मन्त्रक्षेत्रज्ञरूपत्वाद्यस्मात्सर्वेश्वरोऽच्युत. ॥२६५॥
व्याप्यव्यापकरूपेण वर्ततेऽनुग्रहेच्छया ।
व्याप्यरूपेण भूलोकाद्योगादारभ्य चाखिलान् ॥२६६॥
षाड्गुण्यमहिमानं च ददाति फलमुत्तमम् ।
स्वपदं भोगखिन्नस्य दिव्यदेहस्य कर्मिणः ॥२६७॥
क्षेत्रज्ञबीजपिण्डात्मा निरावरणलक्षण· ।
ज्ञानं यदमलं शुद्धं सयच्छत्यात्मलाभदम् ॥२६८॥
शक्तिव्यक्तिमयत्वं च जाग्रद्वृत्तोपदात्मनः ।
एवं संज्ञात्मनः स्वप्नवृत्तेरेकत्वमस्ति च ॥२६९॥
सुषुप्तिवृत्तेः पिण्डाख्यमन्त्रस्यैव महात्मनो ।
बीजात्मनस्तुर्यवृत्तेः शक्तिव्यक्तित्वमस्ति वै ॥२७०॥
व्यक्तिज्ञानफलोपेता नियता यद्यपि स्मृता ।
भगवन्मन्त्रमूर्तीना तथापि परमात्मन. ॥२७१॥
आद्यस्य चातुरात्म्यस्य केवलस्याथ वा विभोः ।
चतुष्प्रकारं यन्मन्त्र विद्धि तन्मोक्षभूतिदम् ॥२७२॥
अतोऽन्यथा यदुद्दिष्टममिश्र मिश्रमेव हि ।
फलं भाववशाच्चैव तत्तथा विद्धि नान्यथा ॥२७३॥
शृणुध्वमथ बीजानि सावधानेन चेतसा ।
शुचौ देशे मनोज्ञे च सुलिप्ते पुष्पभूषिते ॥२७४॥
चन्दनक्षोदसंयुक्ते सुधूपेनाधिवासिते ।
विलिख्य मातृकाचक्रं भेदनोनेन वै पुनः ॥२७५॥
येन सन्दृष्टमात्रेण शतधा याति कल्मषम् ।
प्रागादौ पञ्चवर्गान् मध्यान्तं मध्यतो लिखेत् ॥२७६॥
यादयो नव नाभिस्था आदयः षोडशारगा. ।

कादयो नेमिगाः सर्वे पूर्वचक्रे यदक्षरम् ॥२७७॥
तदस्मिन् प्रथिमूत तु पूजयेद्विधिना तत ।
शब्दब्रह्ममय चक्रमर्घ्यपुष्पादिकैः क्रमात् ॥२७८॥
सन्मव्यादुद्धरेदादौ सर्वेषा कारण हि यत् ।
उदकृस्थमक्षर चाक्षादरान्तावेनमूषितम् ॥२७९॥
विद्धि सर्वेश्वरस्येद बीज निर्बीजकारणम् ।
तदेवाञ्जनमस्य विसर्गसहित स्मृतम् ॥२८०॥
नेमिवर्गाद्द्वितीय वै तनोरात्सप्तमक्षरम् ।
अष्टम नाभिदेशाच्च तत्सग्य नेमिमण्डलात् ॥२८१॥
नेमिपूर्वमतो नाभे सप्तम पञ्चमारगम् ।
अराश्चतुर्दश त्वक्षात्पश्चिमाशागत हि यत् ॥२८२॥
नेमेरेकादश चाथ षोडश च त्रयोदशम् ।
पञ्चम नाभिदेशाच्च नेमेरेकोनविंशकम् ॥२८३॥
तदन्त सप्तम चैव नवम हि महामते ।
नाभेस्तृतीय तदनु नेमेस्तत्सप्तमेव च ॥२८४॥
द्वादशश्च बहिष्ठेभ्यो दशम षोडशात्परम् ।
नाभिपूर्व ततो वर्णं नेमे पञ्चदश हि यत् ॥२८५॥
तुर्यसत्यमराद्बीज ततो नाभिचतुर्थकम् ।
षष्ठ नेमेश्चतुर्थं च मध्यमक्षात्तथा हरेत् ॥२८६॥
तत्रैव पूर्वदिक्स्थ यद्वाद्याद्वै पञ्चम तत ।
अक्षाद्दक्षिणदिक्स्थ नेमेरष्टादश तत ॥२८७॥
द्वितीय नाभिदेशाच्च तदन्ते सप्तमारगम् ।
चतुर्दशमतो नेमे षष्ठ नाभेस्थाहरेत् ॥२८८॥
सर्वे कारणभूमौ योजनीया समासत ।
भगवाचा नमान्ताश्च वेजसात्मैव निर्भरा ॥२८९॥

पद्मनाभादयो देवा वाच्यास्तेषां क्रमेण तु ।
ध्रुवनामो ध्रुवोऽनन्तः शक्त्यात्मा मधुसूदनः ॥२९०॥
विद्याधिदेवः कपिलो विश्वरूपो विहङ्गमः ।
क्रोडात्मा वडवावक्त्रो धर्मो वागीश्वरस्तथा ॥२९१॥
देव एकार्णवशयः कूर्मः पाताळधारकः ।
वराहो नारसिंहश्चाप्यमृताहरणस्तु वै ॥२९२॥
श्रीपतिर्दिव्यदेहोथ कान्तात्माऽमृतधारकः ।
राहुजित्कालनेमिघ्नः पारिजातहरो महान् ॥२९३॥
लोकानाथस्तु शान्तात्मा दत्तात्रेयो महाप्रभुः ।
न्यग्रोधशायी भगवानेकशृङ्गतनुस्ततः ॥२९४॥
देवो वामनदेहस्तु सर्वव्यापी त्रिविक्रमः ।
नरो नारायणश्चैव हरिः कृष्णस्तथैव च ॥२९५॥
ज्वलत्परशुधृग्रामो रामश्चान्यो धनुर्धरः ।
वेदविद्भगवान् कल्की पाताळशयनः प्रभुः ॥२९६॥
प्रादुर्भावगणो मुख्य इत्युक्तस्ते समासतः ।
यथाक्रमोदितानां च देवानां विनियोग तु ॥२९७॥
पिण्डमन्त्रगणे भक्तः सावधानेन चेतसा ।
नाभेरष्टमबीजं यत् स्थितं तत्सप्तमोपरि ॥२९८॥
तदधश्चोत्तरं चाक्षादरान्तेन विभूषयेत् ।
अधोत्तरं चाक्षदेशादादाय तदधो न्यसेत् ॥२९९॥
बीजं नेमिद्वितीयं यन्मध्यान्मध्यं सदासने ।
आधारपद्मसंरुद्धं कुर्याद्वै नाभि सप्तमम् ॥३००॥
अष्टमं च तदूर्ध्वे तु एतद्विद्धि तृतीयकम् ।
नाभ्यष्टममथादाय अरात् षष्ठासनस्थितम् ॥३०१॥
ततो नाभिद्वितीयस्य क्रमेणाधो निवेश्य च ।

तदुद्देशात् तृतीयं च सप्तमं तुर्यमेव च ॥३०२॥
अधादाय च नेमे प्राक् तदधो नाभिसप्तमम् ।
तस्याप्यधस्तदुद्देशात् तृतीयं विनिवेश्य च ॥३०३॥
ततस्तु नवमं नाभेस्तस्योर्ध्वाधोगतं न्यसेत् ।
तत्रैव यद्द्वितीयं तु तत्पिण्डं विद्धि सप्तमम् ॥३०४॥
अरात् षष्ठस्य चोर्ध्वे तु नाभिपूर्वं तु विन्यसेत् ।
सप्तमं चाष्टमं चापि त्वयुपर्युपरि वै क्रमात् ॥३०५॥
अथाष्टमं नाभिदेशादारूढं सप्तमोपरि ।
तदधो मध्यगं चाक्षान्नवमं परिकीर्तितम् ॥३०६॥

भूयोरात्पञ्चमस्योर्ध्वे दद्यान्नाभितृतीयकम् ।
चाष्टात्तृतीयं तन्मूर्ध्नि पिण्डोऽयं दशमं स्मृतं ॥३०७॥
द्वितीयं नाभिदेशाच्च तत्तृतीयं तदूर्ध्वगम् ।
नेमेराद्यन्तमूर्ध्वे तु स्मृतमेकादशं त्विदम् ॥३०८॥
अधो नाभिचतुर्थस्य सप्तमं विनिवेश्य च ।
तदधो नेमिपूर्वं तु एतद्द्वादशमं स्मृतम् ॥३०९॥
नेमेस्त्रिदशमादाय तदधो योजयेत्क्रमात् ।
सप्तमं च चतुर्थं च पूर्वं नाभेर्महामते ॥३१०॥

अरषष्ठामना सर्वं पिण्डमेतत् त्रयोदशम् ।
नाभेश्चतुर्थमादाय तदूर्ध्वे सप्तमं न्यसेत् ॥३११॥
नवमं चापि तन्मूर्ध्नि एतद्विद्धि चतुर्दशम् ।
नेमेश्चतुर्थसत्रन्य ऊर्ध्वाधोभ्यां निवेश्य च ॥३१२॥
वर्णं नाभिद्वितीयं यत्पञ्चदशमं स्मृतम् ।
यद्विगसप्तक धाधादादामागम्यमण्डलात् ॥३१३॥
सान्निमेन च षष्ठेन युक्तं कुर्यादनन्तरम् ।
नेमे सप्तमवर्णस्य ऊर्ध्वाधोभ्यां निवेश्य च ॥३१४॥

नाभिदेशाद्वितीय यद्विद्धि सप्तदश तु तत् ।
नवमं नाभिदेशाच्च सप्तमस्योपरि न्यसेत् ॥३१५॥
अथाष्टमं नाभिदेशात्कुर्यात्सप्तमूर्ध्वगम् ।
द्वितीयमपि तस्याधस्तस्माद्वै नाभिमण्डलात् ॥३१६॥
अरात्त्रयोदशं चोर्ध्वे न्यूनविंशतिमं हि तत् ।
नाभेश्चतुर्थं तस्योर्ध्वे तत्तृतीयं तदूर्ध्वगम् ॥३१७॥
तत्रैव सप्तमं यद्वै विद्धि विंशतिमं त्विदम् ।
द्वितीयस्याष्टमं नाभेर्वर्णस्योर्ध्वे नियोज्य च ॥३१८॥
अरात् षष्ठं च तस्याधः कुर्यात्तदनु लाङ्गलिन् ।
नवमं नाभिदेशाच्च तृतीयस्योपरि न्यसेत् ॥३१९॥
द्वितीयं तदध. कुर्या त्रयोविंशतिमं शृणु ।
अष्टमं सप्तमं नाभेर्द्वितीयं प्रथमं ततः ॥३२०॥
क्रमेण योजयेच्चैव अरात् पञ्चस्य मूर्धनि ।
नेमेस्सप्तममादाय तदधो नाभिसप्तमम् ॥३२१॥
तत्तृतीयं च तस्याधश्चतुर्विंशतिमं स्मृतम् ।
नाभेस्तृतीयं तस्योर्ध्वे द्वितीयं तस्य चोपरि ॥३२२॥
निवेश्य नेमिपूर्वं तु षड्विंशमधुनोच्यते ।
अरात् षष्ठासनं कुर्याद्वर्णं नाभितृतीयकम् ॥३२३॥
तदूर्ध्वे सप्तमं चैव अतोन्यमवधारय ।
न्यून विंशतिनेमेस्तु तस्योर्ध्वाधोगतं न्यसेत् ॥३२४॥
सप्तमं नाभिवर्णेभ्यस्त्वरवर्णाच्च पञ्चमम् ।
नेमेराद्यं द्वितीयं च आदाय तदधो न्यसेत् ॥३२५॥
मध्यमक्षान्महाबुद्धे अष्टाविंशतिमं स्मृतम् ।
नवम सप्तमं नाभेस्तृतीयं च द्वितीयकम् ॥३२६॥
अथोत्तरस्वमक्षाच्च आदाय तदधो न्यसेत् ।

सर्वं साधारमुद्दिष्टं सैहमन्त्रोदितं मया ।
दीक्षापूर्वं हि मन्त्राणां चतुर्वर्गं हि साधनम् ॥२४०॥
लक्षणं पदमन्त्राणामथेदानीं निबोधतु ।
यैर्विना लब्धसत्तानामर्चनं हि न जायते ॥२४१॥
विश्वातीताय विमलपदं विद्याविधायिने ।
पद्मनाभाय विश्वव्यापिने च तदनन्तरम् ॥२४२॥
चतुर्विंशाक्षरं विद्धि एतत्संख्यं परंशृणु ।
ज्योतीरूपाय पद्मार्णं पदं गगनमूर्तये ॥२४३॥
ध्रुवाय दद्यात्तदनु परमं त्र्यक्षरं ततः ।
पद्मामिचतुर्वर्णं हेतवे त्र्यक्षरंत्विति ॥२४४॥
अनन्तायपदंदद्याच्चतोपरिमिताय च ।
सर्वाश्रयाय तदनु तदन्ते धृतशक्तये ॥२४५॥
एतद्विंशतिसंख्यं च द्वाविंशार्णमतः शृणु ।
नमो भगवते कृत्वा वासुदेवाय वै ततः ॥२४६॥
सर्वशक्त्यात्मनेऽनन्तमूर्तये तु पदंन्विति ।
वीर्यात्मनो महाशब्दं पुरुषाय पदं तु तत् ॥२४७॥
मोहमायापदं चैव ततो विध्वंसिने तु वै ।
शदोदितायशब्दं तु सर्वशक्ते पदं ततः ॥२४८॥
नियोक्तव्यश्चतुर्वर्णः शतविंशाक्षरःस्मृतः ।
पदं वेदविदे विश्वरूपाय ततो भवेत् ॥२४९॥
तदन्ते विश्वपतये ततो वै परमात्मने ।
एष विंशतिभिर्वर्णैः शृणु सप्तदशाक्षरम् ॥२५०॥
ज्ञानात्मनेपदंपुर्यात्मविच्छन्दमनःपरम् ।
पद प्रकाशादायाय शान्तरूपाय वै नमः ॥२५१॥
अनन्तशक्तये सर्वव्यापिने तदनन्तरम् ।

तृतीय च द्वितीय च नाभिदेशादनन्तरम् ॥३२७॥
नाभिर्द्वितीयमादाय सप्तम तुर्यमेव च ।
तृतीयस्याथ वै नाभेर्वामादाद्यन्तमूर्ध्वगम् ॥३२८॥
ततस्तु नवम नाभेरक्षमध्यस्थमूर्ध्वगम् ।
अष्टमस्याथ वै नाभेरध ऊर्ध्वे द्वितीयकम् ॥३२९॥
दद्यात्तदन्तरात्यष्ट तस्यैवायोगत तु वै ।
अरात् षष्ठस्य चोर्ध्वेथ नाभिपूर्वं तु तत्परम् ॥३३०॥
विनिवेश्याष्टम चापि षट्त्रिंशमवधारय ।
सप्तम च तृतीय च चतुर्थ नाभिमण्डलात् ॥३३१॥
योजयित्वा तदूर्ध्वे त्वप्यराणि त्रिदश न्यसेत् ।
अथ यन्नवम नाभेस्तृतीय च द्वितीयकम् ॥३३२॥
तत्सप्तत्रिंशक विद्धि नाभिदेशादथाहरेत् ।
अरात् षष्ठासन पूर्वं द्वितीय च तदूर्ध्वत ॥३३३॥
नवम चापि तस्योर्ध्वे पिण्डाम्बित्यादिम विना ।
अरान्ताद्येन वै मूर्ध्ना सर्वे कार्या ह्यलकृता ॥३३४॥
नमोन्ता प्रणवाद्याश्च युक्तास्मन्त्रापदैस्स्वकै ।
अरान्ताद्य विना यस्य यदूर्ध्वे वर्तते स्वर ॥३३५॥
अधो वा नाभिपूर्वेण सह वा केवल हितम्।
अपास्य च तत कुर्यात्सर्वेषा पूजनाय च ॥३३६॥
स्वेन स्वेन तु पिण्डेन सिद्धवच्चाङ्गकल्पनाम् ।
नम प्रणवसज्ञाख्या जाति कर्मवशात्पुन ॥३३७॥
आतद्युक्तानुषजनान्मोक्षनिष्ठस्समाचरेत् ।
बीजपिण्डपदोत्थाना विनियोग तु चाखिलम् ॥३३८॥
किन्त्वेषा वैभवी मुद्रा देवाराधनकर्मणि ।
तदङ्गमुद्राश्चाङ्गाना योज्या मन्त्रैस्स्वकैस्सह ॥३३९॥

सर्वं साधारमुद्दिष्टं सोऽहमन्त्रोदितं मया ।
दीक्षापूर्वं हि मन्त्राणां चतुर्वर्गं हि साधनम् ॥३४०॥
लक्षणं पदमन्त्राणामथेदानीं निबोधतु ।
यैर्विना लब्धसत्तानामर्चनं हि न जायते ॥३४१॥
विश्वातीताय विमलपदं विद्याविधायिने ।
पद्मनाभाय विश्वव्यापिने च तदनन्तरम् ॥३४२॥
चतुर्विंशाक्षरं विद्धि एतत्सख्यं परं शृणु ।
ज्योतीरूपाय पञ्चार्णं पदं गगनमूर्तये ॥३४३॥
ध्रुवाय दद्याचदनु परमं त्र्यक्षरं ततः ।
पद्मासिचतुर्वर्णं हेतवे त्र्यक्षरस्त्विति ॥३४४॥
अनन्तायपदंदद्याचतोपरिमिताय च ।
सर्वाश्रयाय तदनु तदन्ते धृतशक्तये ॥३४५॥
एतद्विंशतिसंख्यं च द्वाविंशार्णमतः शृणु ।
नमो भगवते कृत्वा वासुदेवाय वै ततः ॥३४६॥
सर्वशक्त्यात्मनेऽनन्तमूर्तये तु पदन्त्विति ।
वीर्यात्मनो महाशब्दं पुरुषाय पदं तु तत् ॥३४७॥
मोहमायापदं चैव ततो बिम्बसिने तु वै ।
सादोदितायशब्दं तु सर्वशक्ते पदं ततः ॥३४८॥
नियोक्तव्यश्चतुर्वर्णः सप्तविंशाक्षरः स्मृतः ।
पदं वेदविदे विश्वरञ्जकाय ततो भवेत् ॥३४९॥
तदन्ते विश्वपतये नमो वै परमात्मने ।
एष विंशतिभिर्वर्णैः शृणु सप्तदशाक्षरम् ॥३५०॥
अनात्मनेपदयुर्यात्मविच्छब्दमतः परम् ।
परं प्रकाशाशयाय शान्तरूपाय वै ततः ॥३५१॥
अनन्ताय ततः सर्वव्यापिने तदनन्तरम् ।

तृतीय च द्वितीय च नाभिदेशादनन्तरम् ॥२२७॥
नाभिद्वितीयमादाय सप्तम तुर्यमेव च ।
तृतीयस्याथ वै नाभेर्योह्यादाद्यन्तमूर्ध्वगम् ॥२२८॥
ततस्तु नवम नाभेरक्षमध्यस्थमूर्ध्वगम् ।
अष्टमस्याथ वै नाभेरध ऊर्ध्वे द्वितीयकम् ॥२२९॥
दद्यात्तदन्वरात्षष्ठ तस्यैवाधोगत तु वै ।
अरात् षष्ठस्य चोर्ध्वेथ नाभिपूर्वंतु तत्परम् ॥२३०॥
विनिवेश्याष्टम चापि षट्त्रिंशमवधारय ।
सप्तम च तृतीय च चतुर्थं नाभिमण्डलात् ॥२३१॥
योजयित्वा तदूर्ध्वे त्वप्यरार्णं त्रिदश न्यसेत् ।
अथ यन्नवम नाभेस्तृतीय च द्वितीयकम् ॥२३२॥
तत्सप्तत्रिंशक विद्धि नाभिदेशादथाहरेत् ।
अरात् षष्ठासन पूर्वं द्वितीय च तदूर्ध्वत ॥२३३॥
नवम चापि तस्योर्ध्वे पिण्डास्त्वित्यादिम विना ।
अरान्ताद्येन वै मूर्धा सर्वे कार्या सुकल्पना ॥२३४॥
नमोन्ता प्रणवाद्याश्च युक्तास्सज्ञापदैस्स्वकै ।
अरान्ताद्य विना यस्य यदूर्ध्वे वर्तते स्वर ॥२३५॥
अधो वा नाभिपूर्वेण सह वा केवल हितम्।
अपास्य च तत कुर्यात्सर्वेषा पूजनाय च ॥२३६॥
स्वेन स्वेन तु पिण्डेन सिसवच्चाङ्गकल्पनाम् ।
नम प्रणवमज्ञात्वा जाति कर्मवशात्पुन. ॥२३७॥
आनदुत्कानुयजनान्मोक्षनिष्ठस्समाचरेत् ।
बीजपिण्डपदोत्थाना विनियोग तु चाभिवन्म् ॥२३८॥
किन्त्वेषा वैभवी मुद्रा देयागमनकर्मणि ।
स्वश्रमुद्राश्चावाहना योज्या मन्त्रैस्स्वकैस्सह ॥२३९॥

सर्वं साधारमुद्दिष्टं सैंहमन्त्रोदितं मया ।
दीक्षापूर्वं हि मन्त्राणां चतुर्वर्गं हि साधनम् ॥३४०॥
लक्षणं पदमन्त्राणामथेदानीं निबोधतु ।
यैर्विना लब्धसत्तानामर्चनं हि न जायते ॥३४१॥
विश्वातीताय विमलपदं विद्याविधायिने ।
पद्मनाभाय विश्वव्यापिने च तदनन्तरम् ॥३४२॥
चतुर्विंशाक्षरं विद्धि एतत्संख्यं परंशृणु ।
ज्योतीरूपाय पञ्चार्णं पदं गगनमूर्तये ॥३४३॥
ध्रुवाय दद्यात्तदनु परमं त्र्यक्षरं ततः ।
पद्मासिचतुर्वर्णं हेतवे त्र्यक्षरंत्विति ॥३४४॥
अनन्तायपदंदद्यात्ततोपरिमिताय च ।
सर्वाश्रयाय तदनु तदन्ते धूलशक्तये ॥३४५॥
एतद्द्विशतिसंख्यं च द्वाविंशार्णमतः शृणु ।
नमो भगवते कृत्वा वासुदेवाय वै ततः ॥३४६॥
सर्वशक्त्यात्मनेऽनन्तमूर्तये तु पदंत्विति ।
वीर्यात्मनो महाशब्दं पुरुषाय पदं तु तत् ॥३४७॥
मोहमायापदं चैव ततो विध्वंसिने तु वै ।
सदोदितायशब्दं तु सर्वशक्ते पदं ततः ॥३४८॥
नियोक्तव्यश्चतुर्वर्णः सप्तविंशाक्षरःस्मृतः ।
पदं वेदविदे विश्वरअकाय ततो भवेत् ॥३४९॥
तदन्ते विश्वपतये ततो वै परमात्मने ।
एष विंशतिभिर्वर्णैः शृणु सप्तदशाक्षरम् ॥३५०॥
ज्ञानात्मनेपदंकुर्यात्संविच्छब्दमतःपरम् ।
पद प्रकाशाशयाय शान्तरूपाय वै ततः ॥३५१॥
अनन्तशक्तये सर्वव्यापिने तदनन्तरम् ।

जगन्मयाय तदनु विश्वरूपाय वै पदम् ॥३५२॥
एकविंशतिभिर्वर्णैरयमुक्तोपरश्शृणु ।
सत्त्वसत्त्वपदमादाय गुहाशयपदं ततः ॥३५३॥
ततः परमहंसाय ततो मानसचारिणे ।
न्यूनविंशत्यक्षरश्चैव ततो यज्ञमूर्तये ॥३५४॥
पदमादाय तदनु विश्वान्तर्यामिने तु वै ।
ततो भुवनशब्दं तु वराहाय पदं तथा ३५५॥
विभूनिम्वामिने चेति चतुर्विंशाक्षरस्त्वयम् ।
नमो भगवते दद्यात्ततो वै वटधामवे ॥३५६॥
जगज्ज्वलेन्धनपदं प्रदीप्त पदमेव तु ।
वीर्यायफट् तदन्ते तु एतत्मन्त्रयमस्त्वयं स्मृतः ॥३५७॥
सर्वान्तश्चारिणे दद्यात्प्रसन्नपदमेव च ।
मूर्तयेव पदं चैव दद्याद्धर्मात्मने पदम्॥३५८॥
षोडशाक्षरमेतद्धि अतो गुह्यमनश्शृणु ।
सर्वविद्येश्वरायाथ दद्याद्वाक्पतये ततः ॥३५९॥
पदपदवन्यादाय ततो वाग्विभवे त्विति ।
मनुर्विंशाक्षरो ह्येष त्वपरं कथयामि ते॥३६०॥
योगैश्वर्यप्रदायाथ योगनिद्रारसाय च ।
नीरदाय पदं दद्याद्भगवन् जलशायिने ॥३६१॥
त्रिरष्टवर्णसंख्यश्च अयमेकाधिकस्तु वै ।
भगवपदमादाय अनन्तशक्तये ॥३६२॥
ॐ नोमयाय भुवनधृतेश्च व्यक्षरं पदम् ।
तदन्ते विनियोक्तव्यं पदं वै स्वच्छपात्मने ॥३६३॥
षड्विंशार्णकम् विद्धि मन्त्रं मन्त्रविदां वर ।
यज्ञाग्रदेहमादाय महापुरुषतः परम् ॥३६४॥

वराहाय ततो दद्यात्पुराणपुरुषाय वै ।
दद्यात्तत प्रजाशब्द तदन्ते पतयेपदम् ॥३६५॥
चतुर्दिशाक्षर मन्त्रमेतन्मन्त्रविदा वर ।
नमो भगवते कृत्वा नारसिंहाय वै तत ॥३६६॥
तेजोनिधे पद दद्यात्पद हन हनेति च ।
ततो विकर्मजात्य वै शब्दपञ्चाक्षर भवेत् ॥३६७॥
दुष्कृत हि तदन्ते वै सप्तविंशाक्षरस्त्वयम् ।
आदायामृतमूर्ते वै ततो ज्ञानपरात्मने ॥३६८॥
सर्वेश्वराय भगवन्न्यूनविंशाक्षरस्त्वयम् ।
आदायपुण्डरीकाक्ष पद वै परमेश्वर ॥३६९॥
ततस्सकलशब्दतु सुखसौभाग्य वै पदम् ।
निधे वाञ्छितशब्द तु ततस्सिद्धिप्रदेति वै ॥३७०॥
पदं चाखिलदु खेति ततस्तु शमनाग्रये ।
आनन्दसुन्दरपद ततो लक्ष्मीपद न्यसेत ॥३७१॥
पतये शब्दमुच्चार्य पञ्चाशार्णं त्रिरुज्झितम् ।
सदसत्पदमादाय मूर्तये तदनन्तरम् ॥३७२॥
विश्वोत्तमाय सदनु ततोऽमृतनिधे तु वै ।
षोडशार्णस्त्वयमन्त उक्त कान्तात्मने विभो ॥३७३॥
पुरुषोत्तमाय शब्दतु ततो ऽप्रतिहतेति च ।
शक्तयेथ पद दद्यात्सर्वेश्वरपद तत ॥ ७४॥
समस्तेप्रहर्येत्यत्र निवारण तत परम् ।
सप्तविंशाक्षरो मन्त उक्तश्चात पर शृणु ॥३७५॥
नियन्तेपदमुद्धृत्य तदन्ते विश्वरेतसे ।
परब्रह्मसमेत च सेतवे ओमनन्तरम् ॥३७६॥
स नो द्विरष्टवर्णश्च कथितोय तत परम् ।

पदमप्रतिमेत्यादौ प्रभाव तदनन्तरम् ॥३७७॥
महाविभूते तदनु महामायापद तत ।
अथ दर्शकशब्द तु तदन्ते तालकेतवे ॥३७८॥
चतुर्दिशाक्षरो मन्त्रस्त्वयमुक्तस्समासत ।
शान्तात्मने पद दद्यात्तदन्तेयमविन्यसेत ॥३७९॥
नियमाश्रयाय तद्दद्यात्परमप्रदयाय च ।
नारायणाय शब्द तु पूर्वसत्यासम स्मृतम् ॥३८०॥
भवभङ्गपद चैव कारिणे तदनन्तरम् ।
ततो भगवते शब्द दत्तात्रेयाय वै तत ॥३८१॥
वर्णाश्रमपद नाथ धर्मशब्दमत परम् ।
परिग्रहाय प्रणवमष्टाविंशाक्षर स्मृत ॥३८२॥
सलोम्मायामायेति सर्वज्ञाय पद तत ।
(शब्द विश्वात्मने चाथ विमलेतिपद तत ॥३८३॥
सर्वेश्वराय न्यग्रोधशयनाय पद त्वथ ।
त्रयोविंशत्यक्षरश्च त्वथचान्य निबोधतु ॥३८४॥
भूतशब्दमथादाय भावनाय पद तत ।)
शब्द विश्वात्मने चाथ विमलेतिपद तत- ॥३८५॥
निकेतनाय तदनु कन्धरायपद तत ।
अय विंशतिभिर्वर्णैर्द्धाधिकैर्मन्त्रराट्स्मृत ॥३८६॥
विष्णवे पदमादाय निरस्थाय वै तत ।
पद प्रपन्नवाचाय जटिने दौण्डदे तत ॥३८७॥
मधाद्रिदिनशब्द वै तदन्ते विभवाय च ।
षड्विंशार्णस्त्वयमन्त्र पञ्चम्माभिबोधतु ॥३८८॥
सर्वान्मथादाय व्यापिने तदनन्तरम् ।
पद सहस्रार्चिषे च दद्यात्पाक्षर शुभम् ॥३८९॥

त्रिविक्रमायाथ पदं ततोपरिमिताय वै ।
प्रभावायपदं दद्यात्तूयोविंशाक्षरः स्मृतः ॥३९०॥
नरनाथाय शब्दं तु पुरुषप्रवराय वै ।
आत्मध्यानपरायेति णाय वै द्व्यक्षरं ततः॥३९१॥
एकविंशाक्षरो मन्त्रस्त्वतोन्यमवधारय ।
नारायणाय शब्दं तु दद्यान्निरति वै पदम् ॥३९२॥
शयानन्दमयायेति पदं निरभिमान वै ।
पदसत्त्काय तदनु पञ्चविंशाक्षरस्त्वयम् ॥३९३॥
पराय पदमादाय ततो वै परमात्मने ।
योगेश्वराय हरये मन्त्रोयं षोडशाक्षरः ॥३९४॥
सप्तार्ण पदमादाय प्राङ्नमः परमात्मने ।
कृष्णाय शब्दं तदनु कमलं त्र्यक्षरं ततः ॥३९५॥
दळशब्दं तु विततं नेत्राय तदनन्तरम् ।
नृसिंहाय ब्रह्मणे वै अष्टाविंशाक्षरस्त्वयम् ॥३९६॥
भगवत्पदमादाय युगान्तदहनेति च ।
ह्रस्येथ पद दद्यात्संसारपदमेव हि ॥३९७॥
बन्धविच्छेदकर्त्रे वै द्वाविंशार्णस्त्वयं स्मृतः ।
दद्याद्विशदशब्दं वै परमार्थपदं ततः ॥३९८॥
पदं चतुर्मूर्तये वै चतुर्गतिमयाय च ।
शरशार्ङ्गभृते दद्याच्छरादिन्दीवरत्विषे ॥३९९॥
ततो भगवते दद्यादभिरामपदं ततः ।
शरीरायपदं चैव त्वष्टत्रिंशाक्षरं स्मृतम् ॥४००॥
दद्याद्विशदशब्दंवै परमार्थपदं ततः ।
ततो वेदविदे शब्दं विदुषे व्यापकाय च ॥४०१॥
स्वामिंस्तदनु वै दद्याद्यक्षरं चापरं पदम् ।

अथ विंशतिभिर्वर्णैरुक्तस्त्वन्यमतश्शृणु ॥४०२॥
दद्याद्गरुडशब्दं तु तदन्ते वाहनेति च।
सर्वशत्रुक्षोभयेति शम्याशुभमेव च ॥४०३॥
ततोधुनधुनादाय कर्मबन्धांस्तथोद्धरेत्।
धर्मं पाहि ततोदद्याज्जह्यधर्मं ततोद्धरेत् ॥४०४॥
चतुस्त्रिंशाक्षरो मन्त्र एष वक्ष्याम्यतः परम्।
सहारमूर्तये शब्दं कालवैश्वानरार्चिषे ॥४०५॥
पातालशयनायेति त्वज्ञाननिगळेतिवै।
निचय हन वीप्सातः प्रणवं तदनन्तरम् ॥४०६॥
पञ्चत्रिंशाक्षरो ह्येष सर्वसिद्धिकरः स्मृतः।
प्रणवालङ्कृतास्सर्वे नमस्कारविभूषिताः ॥४०७॥
सम्कृता पूजिताश्चैव ध्यानजप्ता विशेषतः।
तस्मात्ति यत्र यच्छन्ति भक्त्यासत्कर्मणाभुवि ॥४०८॥
अथ लाञ्छनमन्त्राणां शास्त्राणां लक्षणं शृणु।
सहस्रदीधितिपदं दद्याच्चुरितं वै ततः ॥४०९॥
विग्रहाय दशार्णं च त्र्यधिकं मकुटस्य च।
आदाय वाञ्छितपदं तदसिध्यप्रदाय वै ॥४१०॥
महाचिन्तापददद्यान्मणये तदनन्तरम्।
विद्धि पञ्चदशार्णं च दशार्णमपरं शृणु ॥४११॥
सर्वलक्षणशब्दं तु तन्सम्पत्प्रदायवै।
सौभाग्यशब्दमादाय जननि त्र्यक्षरं ततः ॥४१२॥
सर्वमेतत्तु तद्वनु अथमेव दशाक्षरम्।
प्राणात्मनेथ सत्याय विद्धि सप्ताक्षरं त्विदम् ॥४१३॥
कान्त्यर्थ नमाय षडक्षर्णं प्रदर्शितम्।
विश्वा मने पदं दद्यात्तनो विश्वदाय च ॥४१४॥

नवाक्षरमिदं विद्धि परमष्टाक्षरं शृणु ।
समादाय पदं विघ्ने ततो विघ्नेश्वरार्चिते॥४१५॥
प्राग्ब्रह्मर्ब्दमूर्तये कुर्याच्छष्टाक्षरः स्मृतः ।
पदं रमनिधे त्वर्थाद्रीमन्नब्दमतःपरम् ॥४१६॥
श्रीपणाय तदन्ते वै दशाक्षरमिदं स्मृतम् ।
प्राग्भुवनाधिपतये स्वम्भूताय वै पदम् ॥४१७॥
त्रयोदशाक्षरं विद्धि ततोन्यमवधारय ।
पदमिन्द्रियकोशाय ड्प्स्त्राय दशाक्षरम् ॥४१८॥
कल्पान्तानिलघोषाय विद्युल्लसित वै पदम् ।
प्रभाय षोडशार्णं तु नवाक्षरमतश्शृणु ॥४१९॥
महामायापदं दद्याद्धःधर्मणद्वयं ततः ।
ध्वंसिने पदमादाय एतत्लक्ष्यं परं शृणु ॥४२०॥
सर्वाखिप्रसनादाय पराय तदनन्तरम् ।
सन्तापकाय शब्दं तु दर्पविध्वंसिने ततः ॥४२१॥
एकादशाक्षरंविद्धि नवाक्षरमथोच्यते ।
अज्ञानखण्डनपदं पराय तदनन्तरम् ॥४२२॥
त्रैलोक्यमोहनपदं मूर्तये तु नवाक्षरम् ।
सर्वाकर्षणकरपदं महामायामयेति वै ॥४२३॥
द्वादशाक्षरसंख्यस्तु नवाक्षरमथोद्धरेत् ।
प्रागखण्डितशब्दतु तदन्ते विनियोज्य च ॥४२४॥
पराक्रमाय शब्दं तु सप्ताक्षरमतश्शृणु ।
दर्पप्रशमकर्त्रे तु पश्चार्णं विनियोध वै ॥४२५॥
तेजोगालिनि चेत्येते द्वार्विंशत्यनुकीर्तिताः ।
प्राग्दद्यादन्तसंरुद्धा स्वनामपदभूषिता. ॥४२६॥
सेव्यानिष्टाश्रम्यान्ने दद्यात्संज्ञापदं सदा ।

चन्द्रवचास्त्रमन्त्राणां कुर्यात्तामावसानकम् ॥४२७॥
क्रमाच्चतुर्दशानान्तु शक्त्यन्तानां च पद्पदम् ।
अथ वक्ष्ये नृसिंहस्य विश्वत्रातुर्मनूत्तमम् ॥४२८॥
वर्णचक्रं तु पूर्वोक्तं सुगुप्ते वसुधातले ।
उपरिष्टात् तु सलिख्य पूजयित्वा यथाविधि ॥४२९॥
समुद्धरेत्ततो मन्त्रमनेकाद्भुतविक्रमम् ।
प्रणवं पूर्वमादाय तदन्ते विनियोज्य च ॥४३०॥
नवमं नाभिवर्णेभ्यस्तदूर्ध्वेराच्चतुर्दशम् ।
तस्योपरि तदन्तस्थवर्णं गोऽऽस्वन्न्यसेत् ॥४३१॥
नमोऽन्तवर्णमेतद्वै वाचकं परमात्मनः ।
ज्ञानादयो गुणाप्यड्भ्यः प्रागुक्ता हृदयादयः ॥४३२॥
तदर्धमेव वर्णं तु पोढा सलिख्य केवलम् ।
द्वितीयतुर्यषष्ठैश्च द्वादशेनाग्निमेन च ॥४३३॥
चतुर्दशेनाराद्वर्गात्त्माद्वै विनियोजयेत् ।
बीजवच्छिरसा सर्वान् लाञ्छयेत्पञ्चमं विना ॥४३४॥
सर्वेषां प्रणवं पूर्वं स्वसज्ञान्ते नियोज्य च ।
स्वकीया जातयश्चान्ते वोपडन्ताः क्रमेण तु ॥४३५॥
ओं नमो भगवते नारसिंहायेत्यनेन तु ।
द्वादशाक्षरमन्त्रेण स्मृतः विग्रहवत्पुरा ॥४३६॥
समाधाय्यन्तरस्थेन साङ्गेनाचेन पूजयेत् ॥

इति श्रीपाञ्चरात्रे ईश्वरसंहितायां
मन्त्रोद्धारविधिर्नाम
त्रयोविंशोऽध्यायः ।

—○—

अथ चतुर्विंशोऽध्यायः।

नारद ।

अथ मुद्राविधिं वक्ष्ये शृणुध्वं मुनिपुङ्गवाः!।
मुदं कर्मात्मतत्त्वानां ददात्यमलयाजिनाम् ॥१॥
द्रावयन्तिच दोषाणां बाह्याभ्यन्तरचारिणाम्।
तेन मुद्रा समाख्याता कृतस्यापि च मुद्रणात् ॥२॥
तस्मात्स्वाभाविकीं कृत्वा बन्धं वा मानसं पुरा।
स्वेन स्वेन तु मन्त्रेण स्मरेद्यात् सदैव हि ॥३॥
चैतन्येनानुविद्धो यश्शाखासयश्च यद्यपि।
तत्रापि मन्त्रोत्राध्यक्षस्तत्कार्यं सम्प्रयच्छति ॥४॥
गन्धदिग्धौ करौ कृत्वा मुद्राबन्धं समाचरेत्।
मध्यमानामिकाभ्यातु द्वन्द्वयुक्तः करद्वयात् ॥५॥
पराङ्मुखं च सुम्पष्टं कृत्वायोज्य परस्परम्।
आमूलाग्रपर्यन्तं नैरन्तर्येण यत्नत ॥६॥
समुत्ताने करतले शेषाश्चांगुलयस्तथा।
अधरोत्तरयोगेन वामदक्षिणतस्तथा ॥७॥
तर्जन्यामूर्ध्वगोंगुष्ठे सम्मुखे सम्प्रसार्य च।
निविष्टा हृदये कार्या मुद्रेयं मुनिपुङ्गवाः! ॥८॥
चातुरात्म्यार्चने योज्या सर्वसिद्धिप्रदायिनी।
शिष्टौ निरक्षितौ हस्तौ योज्यौ च मणिबन्धनात् ॥९॥
तद्वाहुकूर्परौ द्वौ च नाभौ संरोध्य दण्डवत्।
ईषद्दे टोऽर्धेस्तथादप ऊर्ध्वे तु तौ करौ॥१०॥
मुष्टि कृत्वा तु योज्यैषा मुद्राराधनकर्मणि।
मूर्तीनां केशवादीनां ततोऽन्यां शृणुत द्विजाः! ॥११॥

श्लेष्य पाणितले द्वे प्राङ्गतश्च कुर्याल्लतागणम ।
निमुक्तमन्तरीकृत्य सन्तागुष्ठद्वयेन तु ॥१२॥
मणिबन्धद्वय कुर्यात्मुल्यमतिनिश्चलम् ।
करयुग्म सगर्भं तु सन्यार्थ स्वधियाचलम् ॥१३॥
ऊरुमध्ये निषण्णे तु कुर्याद्वे बाहुकूर्परे ।
गुप्ता कृत्वा प्रयत्नेन बन्धमन्या समाचरेत् ॥१४॥
एषा विभवदेवाना मुद्रैका वैभवी द्विजा ।
प्रणवेन प्रयोज्येय सद्माशुसमप्रभा ॥१५॥
विश्वत्रातुर्नृसिंहस्य मुद्राद्वयमथोच्यते ।
ध्यात्वा लेतामिरूपं तु दक्षिणाङ्गुलन्वगम् ॥१६॥
स्पष्टमूर्ध्वमुख सैव ज्येष्ठाक्रान्ता कनीयसी ।
अथारिलाघवरूपा चाप्यध्वातीतामिरूपवृत् ॥१७॥
देवो गुणत्रयातीतस्तथा मार्गत्रयातिग ।
धर्मस्थूलनरैर्मुक्तो योय व्यक्तो धिणार्चित ॥१८॥
परम्परमुखौ श्लिष्टौ शाखाक्रान्तौ परस्परम् ।
किन्तु वै दक्षिण हस्तमूर्ध्न चाप्यधरेपरम् ॥१९॥
अविद्यादलनीलेप्या मुद्रा पूर्वमुदाहृता ।
ततो हृदादिगन्त्राणा मुद्राषट्कन्तु कथ्यते ॥२०॥
सम्पुट हृदयोद्देशे बध्वा हस्तद्वयेन तु ।
निरन्तराभ्या शाखाभ्या मुद्रैषा हार्दधर्मिणी ॥२१॥
अङ्गुष्ठादि कनिष्ठान्त शाखायुग्म पृथक् पृथक् ।
मान्तर सम्पुटादस्मात्कनिष्ठायॆ तथा भवेत् ॥२२॥
शिरशिखातनुत्राणनेत्रमुद्रा यथा क्रमम् ।
हस्तौ मुकुलितौ कृत्वा न्यसेच्छिरसि मन्त्रन ॥२३॥
इत्या किरीटमुद्रेयं मार्तण्डायुतसन्निभा ।

ततः श्रीवत्समुद्रा तु पद्ममुद्रैव कीर्तिता ॥२४॥
मध्यमानामिकान्यूना मुष्टिवत्पाणिमध्यगा ।
उभयोर्हस्तयोर्विप्र पश्चान्मुष्टिद्वय तु यत् ॥२५॥
श्लेषयेत्समरन्ध्रेण तर्जन्यौ द्वे प्रसार्य च ।
तत. संश्लेषयेदग्रादङ्गुष्ठाग्रे नियोजयेत् ॥२६॥
मध्यतस्तर्जनीभ्या तु अन्योन्येन क्रमेण तु ।
मुद्रैषा कौस्तुभस्योक्ता मालामुद्रामथो शृणु ॥२७॥
शाखाष्टक कराभ्या बद्ध्वास्तमग्रादपूरत. ।
संश्लिष्टं लम्बमान च उपविष्टोथ वा स्थितः ॥२८॥
कुर्याद्वाहुद्वय विप्र ऊरुम यावलम्बितम् ।
मणिबन्धावधौ सम्यङ्मालामुद्रा प्रकीर्तिता ॥२९॥
अङ्गुष्ठौ सङ्गतौ लग्नौ अङ्गुल्यो विरलास्थिना ।
प.श्री ज्ञेया भवेन्मुद्रा पुष्टिसौभाग्यदायिका ॥३०॥
मुष्टिना ग्राहयेद्वाममंगुष्ठं दक्षिणेन तु ।
अंगुलीर्वामहस्तात्तु दक्षिणस्योपरि न्यसेत ॥३१॥
वामतर्जनिकाग्रं तु अगुष्ठाग्रं च दक्षिणात् ।
परस्पर सम्मुख तु सुश्लिष्ट विनियोजयेत् ॥३२॥
शङ्खस्यैषा भवेन्मुद्रा उत्तानातु यथा स्थिता ।
स्पष्टौ प्रसारिता हस्तौ परस्परनियोजितौ ॥३३॥
भ्रमणाच्चक्रवत्तौ तु चक्रमुद्रेति कीर्तिता ।
नागिनी सर्वदु खाना मुद्राणा मेदिनीधर ॥३४॥
बध्वा मुष्टिं दक्षिणेन वामागुष्ठस्य मूर्धनि ।
कृत्वैवं दर्शयेदेषा कौमोदक्याम्मुखोगना ॥३५॥
गदामुद्रेति विख्याता दोषसैन्यप्रमर्दिनी ।
प्रसार्या वाममुखाना अङ्गुल्यो विरलाश्रिताः ॥३६॥

कार्यास्त्वाकुञ्चिता प्रान्तादङ्गुष्ठ सेतुवद्भवेत् ।
समुख तासु सल्ग्न करशाखासु मध्यत ॥३७॥
हृत्सम्मुखातु बध्नीयाच्छक्तिमुद्रा सुखप्रदाम् ।
प्रादिशिन्यादितो विद्धि कनिष्ठान्त त्रियादिषु ॥३८॥
प्रसार्य सहित कृत्वा पुरा पाणिद्वय द्विज ।
अनामामूलदेशाभ्यामगुष्ठाग्रद्वय न्यसेत् ॥३९॥
अधोमुख तु पतित मणिबन्धस्य सम्मुखम् ।
सुस्पष्टमुन्नि(?)कृत लग्न पुच्छवत्कन्यसायुगम् ॥४०॥
पक्षिराजस्य मुद्रेषा केचत्तस्य महात्मन ।
सामान्या सर्वमन्त्राणामेषा मुद्राञ्जलि स्मृता ॥४१॥
स्वेन स्वेन तु मन्त्रेण सयुक्ता ता प्रयोजयेत् ।
दक्षे करतले रक्तपङ्कज भास्कर स्मरन् ॥३२॥
द्रव्याणि सस्पृशेत्तेन मुद्रैषा दहनात्मिका ।
वामहस्ततले श्वेतपङ्कजे शशिन स्मरन् ॥४३॥
द्रव्याणि सम्पृशेत्तेन मुद्रैषाप्यायनात्मिका ।
ग्रथितौ द्वौ करौ कृत्वा मुष्टितौ चाप्यधोमुखौ ॥४४॥
कनीयसौ तदगुष्ठौ मुक्तेवेण नियोज्य च ।
मध्यमाङ्गुलियुग्म तु अन्योन्यकरपृष्ठगम् ॥४५॥
निक्षिप्तानामिकायुग्म तर्जनीयुगळ तथा ।
मुद्रैषा कामधेन्वाख्या सर्वेच्छा परिपूरिणी ॥४६॥
अथ चासनमन्त्राणा मुद्रालक्षणमुच्यते ।
आत्मेशुरस्य वामस्य अनामा तर्जनी उभे ॥४७॥
आ[illegible] [illegible]मे तु [illegible] या तु मध्यिते ।
त[illegible] [illegible] ॥४८॥
कनिष्ठिका तु साङ्गुष्ठा कार्या सुमुखला मुने ।

अनन्तासनमुद्रेयं मन्त्रेणास्यायतो द्विज! ॥४९॥
सर्वं जगदिदं ह्येषा क्रोटीकृत्य च वर्तते ।
करद्वयमसंलग्नं कृत्वा तदनु योजयेत् ॥५०॥
मुखे मुखं तर्जनीभ्यां न मुञ्चेदथ मध्ययोः ।
कुर्यात्ताद्विधं बन्धं तं त्यक्त्वानामिकाद्वये ॥५१॥
उपसंहृत्य तं चापि द्वे कनिष्ठे नियोजयेत् ।
प्रत्येकबन्धे संलग्नमंगुष्ठयुगळं न्यसेत् ॥५२॥
धर्मादेश्चाप्यधर्मादेरिद मुद्राचतुष्टयम् ।
तदूर्ध्वस्थस्य पद्मस्य प्रागुक्ता मन्त्रयोगतः ॥५३॥
दक्षिणस्य तु हस्तस्य तर्जन्यङ्गुष्ठमेळनम् ।
कृत्वा तदनु तद्बन्धं विकास्य च शनैश्शनैः ॥५४॥
समुत्थानं पृथक्कुर्याच्छाखासंघं पृथक् स्थितम् ।
धामलयस्य मुद्रैषा गणेशादेस्तथोच्यते ॥५५॥
वामहस्तकनिष्ठाद्यास्तिस्रस्स्वतलमध्यगाः ।
तासामंगुष्ठतः पृष्ठे तर्जनी प्रोन्नता भवेत् ॥५६॥
नासावंशप्रदेशस्था ततो दक्षिणपाणिना ।
अंगुळी त्रितयेनैव मुष्टिं बध्वा तु पूर्ववत् ॥५७॥
तर्जनीं द्विगुणीं कृत्य अंगुष्ठाग्रे नियोजयेत् ।
प्रोचलो दक्षिणोबाहुश्चक्रक्षेपे यथोचितः ॥५८॥
विष्वक्सेनस्य मुद्रैषा विघ्नसन्धनिकृन्तनी ।
संमुखौ सम्पुटीकृत्य द्वौ हस्तौ सम्प्रसारितौ ॥५९॥
विनियोज्यौ ललाटाग्रे शिरसावनतेन तु ।
गुर्वादित्रितयस्यैषा मुद्रा चेन्प्रसादिनी ॥६०॥
करद्वयं समुत्तानं नाभिदेशे नियोजयेत् ।
वामस्य दक्षिणं पृष्ठे मुद्रैषा सिद्धसन्ततेः ॥६१

त्रैलोक्योद्धृतिदक्षेण युक्तः पाणिद्वयेन तु ॥७४॥
शान्तः सच्चित्स्वरूपस्तु भक्तानुग्रहकाम्यया ।
अनौपम्येन वपुषा ह्यमूर्तो मूर्ततां गतः ॥७५॥
विश्वमाप्याययन्कान्त्या पूर्णेन्दुद्युतितुल्यया ।
रश्मिभिर्भास्करो यद्वत्समुद्र इव वीचिभिः ॥७६॥
स्वमूर्तिभिरमुक्ताभिरच्युतादिभिरन्वितः ।
दीप्तिमद्भिरमूर्तैस्तु सुधाकल्लोलसङ्कुलः ॥७७॥
पूर्ण आभरणैः सर्वैर्निर्विकाराभिविग्रहः ।
ततः सुषुप्तिव्यूहस्य वक्ष्ये ध्यानमनुत्तमम् ॥७८॥
वेदकत्वेन भगवान् ब्रह्मसंवलिताकृतिः ।
स्तम्भवत्कर्णिकामध्ये स्थित्वा वेद्यत्वमेति च ॥७९॥
स्वयमेवोपकाराय कर्मिणां ब्रह्मयाजिनाम् ।
प्राग्भागादुत्तरं यावद्गुणभेदेन लाङ्गलिन् ! ॥८०॥
विभजत्यात्मनात्मानं वासुदेवः परः प्रभुः ।
अनुज्झितस्वरूपस्तु प्राग्भागे षड्गुणात्मना ॥८१॥
बलसंवलितेनैव ज्ञानेनास्तेऽथ दक्षिणे ।
ऐश्वर्येण च वीर्येण प्रत्यग्भागे प्रतिष्ठितः ॥८२॥
तेजश्शक्त्यात्मना सौम्ये संस्थितः परमेश्वरः ।
यद्यप्यरूपो भगवान् व्यूहात्मा गुणलक्षणः ॥८३॥
अत्रापि पूर्वमेवोक्तं रूपमस्योपचर्यते ।
किं तु द्वितीयमूर्तेर्वै शुभे पाणितलद्वये ॥८४॥
स्फुटो रेखामयः शलः सुव्यक्तं लाङ्गलं महत् ।
रम्येषुणा तृतीयस्य दक्षिणाश्चिह्नितः करः ॥८५॥
तुर्यस्यासिवरेणैव शङ्ख आभ्यां करद्वये ।
अवाङ्मुखं करयुगादूर्ध्ववक्त्रं स्वभावतः ॥८६॥

घर्मांशुरश्मिसन्तप्तशतधामाधिकेन तु ॥९९॥
रूपेण पश्चिमस्यां च व्यक्तं प्रद्युम्नसञ्ज्ञया ।
शरद्गगनसङ्काशवर्णेन परमेश्वरः ॥१००॥
समास्ते उत्तरस्यां चाप्यनिरुद्धात्मना ततः ।
सस्थानं आदिमूर्तिर्वै सर्वेषां तु समं स्मृतम् ॥१०१॥
सूर्यकोटिप्रभाः सर्वे तेजसा कमलेक्षणाः ।
दन्तज्योत्स्नावितानैस्तु प्रकटीकृतदिङ्मुखाः ॥१०२॥
पूर्णचन्द्रायुताकारा मुक्ताहाराद्यलङ्कृताः ।
लसत्पीयूषसङ्काशैः स्वाम्बरैः स्रग्वरैर्युताः ॥१०३॥
वरायुधोद्यतकराः स्वकैश्चिह्नैरनुज्झिताः ।
लेखोत्थितैस्तु कह्लारैः पादपातलाङ्किताः ॥१०४॥
निमग्नजनसन्तापशमनव्यापृताननाः ।
करुणापूर्णहृदयाः जगदुद्धरणोद्यताः ॥१०५॥
स्वदेहतेजस्सम्भूतज्वालामण्डलमध्यगाः ।
एवमेवैष भगवान् सन्तर्प्य प्राक्प्रयोगतः ॥१०६॥
एकैकेन तु भागेन प्रभवेन क्रमेण तु ।
पुनरेवानिरुद्धादि प्राङ्मूर्त्यन्तं महामते ! ॥१०७॥
क्रमान्निरन्तरैर्भोगैरभ्यर्च्य परमेश्वरः ।
प्रणवाद्वितयेनैव बुद्ध्या तु सुविशुद्धया ॥१०८॥
अप्ययाख्येन विधिना ह्यागनिरतैर्बुधैः ।
ततस्तु जाग्रद्व्यूहस्य वक्ष्ये ध्यानक्रमं द्विजाः ! ॥१०९॥
अनन्तसरसि क्षार्णे विश्रान्तं यन्महामते ! ।
अकाराक्षरमूलं तु नित्यं सर्वाश्रयाम्बुजम् ॥११०॥
अकाराक्षरनालं तु शेषसर्वार्णपल्लवम् ।
दिगष्टकं समाश्रित्य यत्तु तिष्ठति चक्रवत् ॥१११॥

नागवमध्ये भगवान् आसनेऽस्मिन् परे न्यसेत् ।
सहलक्ष्म्या भावनीयश्च यथा तदधुनोच्यते ॥११२॥
पर प्रणवर्णेन सम्पूर्ण स्वेन तेजसा ।
स्थितमन्यावर्णैर्युगं देशमन्तर्निरीक्ष्य च ॥११३॥
ततः प्रणवपूर्वं तु ब्रह्मबीजचतुष्टयम् ।
कदम्बपुष्पसदृशानमशेषितनमस्कृतम् ॥११४॥
त्रिकर्मणोदितं ध्यायेद्विमार्गिणिचतुष्टयम् ।
सुव्यक्तान्क्षण मात्र त्रिभेदेनापूर्ण बहिः ॥११५॥
स्फुलिङ्गकणतुल्येन समुद्भूतेन वै परात् ।
वाचकान्वीनिविष्टेन व्यक्ततामागतेन च ॥११६॥
ततोऽयं भगवद्रूपं हिमकुन्देन्दुकान्तिमत् ।
चतुर्भुजं सौम्यवक्त्रं पुण्डरीकनिभेक्षणम् ॥११७॥
पीतकौशेयवसनं सुपर्णध्वजशोभितम् ।
शुम्भद्दक्षिणहस्तेन भीतानामभयप्रदम् ॥११८॥
विद्याकोशस्तु वामेन सगृहीतश्च शङ्करात् ।
पृष्ठगे ह्यपरस्मिंस्तु प्रोद्यन् दक्षिणो त्वरि ॥११९॥
तथाविधे गदा वामे निषण्णा वसुधातले ।
सिन्दूरशिखराकारमेकवक्त्रं चतुर्भुजम् ॥१२०॥
अतसीपुष्पसङ्काशवासोभृत्ताललाञ्छितम् ।
सव्येन पाणियुग्मेन तुल्यमाद्यस्य वै विभोः ॥१२१॥
सीरं तथान्यहस्तेऽस्य मुसलं तु गदाकरे ।
प्रावृण्णिशासमुदितखद्योतचयदीधिति ॥१२२॥
रक्तकौशेयवसनं मकरध्वजशोभितम् ।
गरुडवक्त्रं चतुर्बाहुं तृतीयं परमेश्वरम् ॥१२३॥
शरत्सहस्र

वामे परस्मिन् शार्ङ्गं च दक्षिणे बाणपञ्चकम् ॥१२४॥
अञ्जनाद्रिप्रतीकाश सुसिताम्बरवेष्टितम् ।
चतुर्भुज विशालाक्ष मृगलाञ्छनभूषितम् ॥१२५॥
आदिक्पाणियुगळमाद्यमस्यापि कीर्तितम् ।
दक्षिणादिक्रमेणाथ द्वाभ्यां वै खड्गखेटकौ ॥१२६॥
वनमालाधरा सर्वे श्रीवत्सकृतलक्षणाः ।
शोभिता कौस्तुभेनैव रत्नराजेन वक्षसि ॥१२७॥
किरीटमकुटै रम्यैर्हारकेयूरनूपुरैः ।
ललाटतिलकैश्चित्रै स्फुरन्मकरकुण्डलै ॥१२८॥
स्रग्वैर्विविधैर्माल्यै कर्पूराद्यैर्विलेपनै ।
रम्यैरलङ्कृताश्चैव भावनीया सदैव हि ॥१२९॥
पुनरप्ययथयोगेन प्रागुदङ्मध्यमे दळे ।
सितकृष्णेन वपुषा अनिरुद्ध स्मरेत्प्रभुम् ॥१३०॥
उदक्पश्चिममध्यस्थे प्रद्युम्नं भावयेच्छदे ।
रूपेण कृष्णपीतेन अप्ययावसरे तु वै ॥१३१॥
प्रत्यग्दक्षिणमध्यस्थे पीतरक्तवपुर्धरम् ।
स्मरेत्सङ्कर्षणं देव प्रतिलोम क्रियाविधौ ॥१३२॥
मध्ये प्राग्दक्षिणस्या च सितरक्तेन तेजसा ।
वासुदेवो जगन्नाथो भावनीयो महामते ! ॥१३३॥
अथ शुद्धाश्रयत्वेन स्फटिकोपलसन्निभम् ।
स्थानभेदं समासाद्य सचकान्तिद्वयात्तु वै ॥१३४॥
गृह्णाति सकलं रूपमुपसंहारलक्षणम् ।
अभेदेनादिमूर्तेर्वं संस्थितं वटबीजवत् ॥१३५॥
सर्वक्रियाविनिर्मुक्तममूर्तं परमार्थत ।
चातुरात्म्य तदाद्य वै शुद्धसंविन्मय महत् ॥१३६॥

वह्न्यर्केन्दुसहस्राभमानन्दस्पन्दलक्षणम् ।
बीजं सर्वक्रियाणां यद्विरूपाणां यदास्पदम् ॥१३७॥
चातुरात्म्यं तु तद्विद्धि द्वितीयममलेक्षणा ।
नित्यं नित्याकृतिधरं तेजसा सूर्यवर्चसम् ॥१३८॥
भिन्नं सितादिभेदेन ऊर्ध्वाधः संस्थितेन च ।
कैवल्यभोगफलदं भवबीजक्षयङ्करम् ॥१३९॥
चातुरात्म्यं तृतीयं तु सुधासन्दोहसुन्दरम् ।
स्थित्युत्पत्तिप्रळयकृत्सर्वोपकरणान्वितम् ॥१४०॥
प्रकृतिं स्वामधिष्ठाय समुदेत्यस्तमेति च ।
चतुर्थं विद्धि तद्यस्य विश्वं तिष्ठति शासनात् ॥१४१॥
यच्चस्मितादिकं रूपं चतुर्थो यत्कृते युगे ।
रक्ताद्यं सितनिष्ठं च त्रैताया हि महामते ! ॥१४२॥
पीतं कृष्णं सितं रक्तं सम्प्राप्ते द्वापरे युगे ।
कलौ कृष्णं सितं रक्तं पीतं चानुक्रमेण तु ॥१४३॥
युगमन्याचतुष्के तु निर्वर्ति परमेश्वरः ।
विभिन्नमूर्तिसामान्यं रूपं यत्तन्निबोध मे ॥१४४॥
पीतरक्तं कृतान्ते तु रक्तपीतमनः परम् ।
पीतकृष्णं च तदनु कृष्णशुक्लमनन्तरम् ॥१४५॥
भेदः प्रागुदितैर्ज्ञेय आयुधाम्बरलाञ्छनैः ।
समत्वादन्यथा केन विभागोऽत्रावधार्यते ॥१४६॥
ततस्तु केशवादीनां ध्यानं वक्ष्ये मुनीश्वराः ! ।
सर्वगं परमं ज्योतिस्मूर्तममलं हि यत् ॥१४७॥
स एव वासुदेवेति मत्वा सम्यग्यजेत्ततः ।
चेतसामृतसङ्काशैः पुष्पाद्यैरखिलैः प्रभुम् ॥१४८॥
ध्यातममलन्धाम ध्यायेन्मूर्तमनश्वरम् ।

श्रोणीतटार्पितकरं सानुकम्पमनूपमम् ॥१४९॥
दक्षिणेन तु हस्तेन भक्तानामभयप्रदम् ।
पुष्पाभरणवस्त्राढ्यं शङ्खचक्रद्वयान्वितम् ॥१५०॥
ततः तस्मात्तु वै धाम्नो युगपच्चि सृत स्मरेत् ।
महत् स्फुलिङ्गसङ्काश समूह सततोदितम् ॥१५१॥
तेन चाक्रमरवृन्द समाक्रान्त च भावयेत् ।
अथ प्रत्येकतेजोंशादुद्धृत भावयेत्क्रमात् ॥१५२॥
त्रय त्रय सिताद्य च केशवाद्य चतुर्भुजम् ।
दक्षिणोत्तरपाणिभ्या पृष्ठत केशवादिषु ॥१५३॥
युग्म युग्म परिज्ञेय क्रमेणोर्ध्वगत त्विदम् ।
शङ्खचक्रे कज विद्या सा च शङ्खो गदाम्बुजम्॥१५४॥
तच्छङ्ख स कज विद्या चक्रचक्र गदागदा ।
शङ्खश्चक्र कज पद्म चक्र शखस्ततो गदा ॥१५५॥
तद्वद्द्वयोश्च हस्ताभ्यामधरस्थ द्वय द्वयम् ।
ज्ञेय दामोदरान्ताना द्वादशानामिद शृणु ॥१५६॥
पद्म गदा ध्वनिश्चक्र तत्पद्मो हेतिराट्ध्वनी ।
गदाचक्र च तद्विद्या पद्म दरश्च सोम्बुजम् ॥१५७॥
गदापद्म गदा शङ्ख स विद्याम्बुरुह त्वरि ।
भूयोधामगणात्तस्मात्सम्मरेन्निस्सृत महत् ॥१५८॥
केशवादिविभागेन श्रियाद्य च त्रयं त्रयम् ।
कमलादित्रयेणैव त्वन्योन्यत्वेन लाञ्छितम् ॥१५९॥
पद्मपद्मासनस्थ च दिग्विदिक्षु च समुत्थम् ।
सवीजयत्तु विनयाद्यालयेन सितेन च ॥१६०॥
देवीद्वादशक चैव तासा रूपमथोच्यते ।
पूर्णचन्द्राननना सर्वा सर्वर्तुकुसुमान्विता ॥१६१॥

मर्नल्क्षणसम्पूर्णा सर्वाभरणभूषिता ।
विद्रुमाभ त्रय त्वायमपर चम्पकप्रभम् ॥१६२॥
प्रियङ्गुमञ्जरीश्याम तृतीय देवतात्रयम् ।
चतुर्थं त्रितय ध्यायेज्जातिपुष्पसमप्रभम् ॥१६३॥
आद्याया कमल पाणावन्यस्या हेतिराट्करे ।
शख ध्याये तृतीयस्यामेव ध्यायेत्त्रिषु त्रिषु ॥१६४॥
ततो बिभर्त्र्यत्वाना ध्यान वक्ष्ये द्विजोत्तमा ! ।
वैभवीयो महाबुद्धे ! देवतानिचयो महान् ॥१६५॥
य उक्तस्ते मया पूर्वमेकैक विद्धि त त्रिधा ।
चतुर्णां युगमन्धीना युगाना च तथैव हि ॥१६६॥
विश्वविप्लवदोषाणा विनाशाय समुद्यतम् ।
सितरक्तादिरूपेण ज्वलदस्त्रकराङ्कितम् ॥१६७॥
कार्यारम्भे तथा मध्ये ह्यवसाने तु सर्वदा ।
सन्धत्ते रूपमात्मीयमेक एव त्वनेकधा ॥१६८॥
श्रेयसे सर्वलोकाना स्थूल तत्कामरूपधृक् ।
अनुवनेन वपुषा कुन्देन्दुधवलेन च ॥१६९॥
वीरासनादिना चैव स्थित मुदितमानसम ।
लीलाविधृतमर्त्याभ्र सौम्यवक्त्रमनाकुलम् ॥१७०॥
धिया दोषगण सर्वं ध्वसयन्त च मोक्षिणाम् ।
तद्व्यक्त शान्तसज्ञ च रूप रूपवता वर! ॥१७१॥
प्रकाशयति सन्मार्गं समाधिनिरतात्मनाम् ।
तेजोमय यत्तद्रूप वैभव शान्तसज्ञकम् ॥१७२॥
उपासकाना भक्ताना सर्व सर्वफलप्रदा ।
विशाखयूपो भगवान् ! स्वय विश्वसिसृक्षया ॥१७३॥

अध्यक्षेण स्वरूपेण समुदेत्येक एव हि ।
महिमानं तु निश्शेषं शुद्धं संवित्पुरस्सरम् ॥१७४॥
आदायाऽऽश्रपदस्यस्य चातुरात्म्यस्य वै विभोः ।
तथा चाधारभूयिष्ठं देवानां चेष्टितं हि यत् ॥१७५॥
सितादयः कान्तयो याः श्रचादिकं च महामते ! ।
सलाञ्छनं वैभवीयं सायुधं बीजमेव तु ॥१७६॥
ज्ञानाद्यं गुणषट्कं च तदुक्ताः शक्तयोऽखिलाः ।
अणिमाद्यष्टकं चैव स्थित्युत्पत्तिलयोदयाः ॥१७७॥
शक्तिः सा चातुरात्मीया त्वैश्वरीत्यभिधीयते ।
यथार्ककिरणव्रातं त्यक्त्वा तेजःकणो महान् ॥१७८॥
स्वकारणं विना सर्वमापूरयति गोचरम् ।
स्वातन्त्र्यात्परिपूर्णत्वात्तद्वत्स परमेश्वरः ॥१७९॥
विहाय वासुदेवाद्यं मूर्तिशाखाचतुष्टयम् ।
वैभवीयस्य यूथस्य पतित्वेनावतिष्ठते ॥१८०॥
सम्भूतिस्थितिसंहारभोगकैवल्यलक्षणम् ।
प्रेरयन्वै धिया चक्रं पञ्चारमिदमुत्तमम् ॥१८१॥
स्मर्तव्यस्वपदस्थः स स्वबीजेनामलात्मना ।
आमूर्धतोऽङ्घ्रिपर्यन्तं तदीयं गात्रमण्डलम् ॥१८२॥
रत्नवद्वैभवीयैस्तु बीजैर्भाव्यमलंकृतम् ।
क्रमादुच्चार्यमाणैस्तैरमृतौघेन पूर्ववत् ॥१८३॥
पूजनात्परमेशत्वमचिरादेव यच्छति ।
इत्येवमादिः सर्वेषां भाविनां परमेश्वरः ॥१८४॥
स्थितोऽन्तर्यामिभावेन रूपमासाद्य निष्कलम् ।
आप्तकामः स भगवान् स्वव्यापारवशेन तु ॥१८५॥
स्वां शक्तिमवलम्ब्यास्ते पद्मनाभात्मना पुनः ।

धराम्बुहुतभुग्वातमूलनाळदळोदरे ॥१८६॥
चतुस्तत्त्वमये पद्मे गगनेकार्णवोदरे ।
मानसेऽनन्तशयने दिव्यबोधतनुर्विभु ॥१८७॥
सहस्रांशुसहस्राभ उत्तानस्थो हि लीलया ।
ततो विविधरत्नाग्रे मायीये नाभिपुष्करे ॥१८८॥
प्रोद्भूतस्तु स्ववीर्येण विद्या सामर्थ्यविग्रहाम् ।
मूर्तैर्ध्वजादिकै सर्वैरावृतस्तत्परायणै ॥१८९॥
अनन्तचेष्टस्य विभोरित्येव स्वीश्वरात्मन ।
भोगापवर्गद रूप शान्त व्यक्त च वैभवम् ॥१९०॥
प्राग्वत्तुर्यपदावस्थ स्मरेद्धृत्कमलाम्बरे ।
दिशो दश द्योतयन्त नानागात्ररुहेश्रितम् ॥१९१॥
सौम्य द्विरष्टवर्ष च राजीवदळलोचनम् ।
भवक्रचक्रधृग्देव गदादेह तथैव च ॥१९२॥
शक्तिमाधारसज्ञा च प्रोद्वहन्त स्मरेद्ध्रुवम् ।
स्थितो य स्तम्भभूतस्तु अस्मिन्वै विश्वमन्दिरे ॥१९३॥
नभोऽनिलात्मनाचैव भूमिकामित्रलक्षणे ।
इत्येव मुख्यपूर्वाणा ध्रुवान्ताना प्रकीर्तितम् ॥१९४॥
शेषादीना च शेषाणामिदानीमवधारय ।
ध्यान पाताळनिलयपर्यन्ताना यथास्थितम् ॥१९५॥
एक एव जगन्नाथ स्वरूपाद्यैस्तु शक्तिभि ।
नानात्वेनाप्यनन्तो यो भक्तानुग्रहकाम्यया ॥१९६॥
तस्याभिमानिक रूप शृणु सर्वेश्वरस्य तु ।
तुहिनाचलसङ्काश पूर्णचन्द्रसमाननम् ॥१९७॥
स्वमणिव्यञ्जितेनैव युक्त फणगणेन तु ।
प्रोद्वहन्त हल चक्रमपसव्यद्वयेन तु ॥१९८॥

वामहस्तद्वयेनैव शङ्खं मुसलमेव च ।
नित्यसन्निहितं शेषशर्वितं सर्वज्ञमच्युतम् ॥१९९॥
मनस्यन्तर्मुखानां यत्कार्मिणां पूरयेच्च तत् ।
शक्तीशोऽप्यथ सञ्चिन्त्यः पुण्डरीकनिभेक्षणः ॥२००॥
इच्छारूपधरैश्चैव सौम्यः प्रहसिताननः ।
व्यक्तये च फलादीनां भक्तानामनुकम्पया ॥२०१॥
पिण्टयन् स्वांघ्रियुग्मेन वसुधां च करद्वयम् ।
युगानुसारिकान्तिश्च चतुर्वक्त्रश्चतुर्भुजः ॥२०२॥
मूर्तचक्रगदाहस्तस्वमूर्त्याम्बुजाङ्कितः ।
शमं नयति सन्तापं कमलेनेन्दुकान्तिना ॥२०३॥
नानामन्त्रमयीं विद्यां व्यञ्जयत्यमलात्मनाम् ।
सम्यग्वाक्पतिना चैव कम्बुना शब्दमूर्तिना ॥२०४॥
आज्ञाप्रतीक्षकेनैव गदाचक्रद्वयेन तु ।
प्रेरितेन हिनस्त्याशु साधुसन्तापकारिणम् ॥२०५॥
नारसिंहेन वक्त्रेण भवभीतिविघातकृत् ।
पुष्णाति सर्वभूतानि वाराहेणाऽमृतात्मना ॥२०६॥
कुरुते पश्चिमस्थेन कापिलेनोपमद्युतिम् ।
भक्तिश्रद्धापराणां च स्मृतमात्रे सदैव हि ॥२०७॥
हृन्मध्ये गगने भूमौ वह्निमध्ये जलान्तरे ।
चतुर्णां ब्राह्मणादीनां स्वयमेवाऽनुकम्पया ॥२०८॥
चातुरात्म्येन रूपेण चतुर्धा व्यक्तिमेति च ।
आत्मतुल्येन देहेन शङ्खपद्माङ्कितेन तु ॥२०९॥
मूर्तिमद्भिर्दलाद्यैस्तु युक्तेन वदनैर्विना ।
पर्णानुरूपवर्णेन समेनाप्यसमेन तु ॥२१०॥
अन्योन्यानुगतेनैव पूर्वोद्दिष्टेन नान्यथा ।

प्रत्यानदसूर्याभः स्मर्तव्यो मधुसूदनः ॥२११॥
अष्टबाहुर्विशालांसोप्यभिष्टोमकराङ्कितः ।
शंखचक्रधरश्चैव बाणकार्मुकधृक्तथा ॥२१२॥
ग्जस्तमोभ्यां मूर्ताभ्यां सम्प्रवृत्तिनिवृत्तये ।
फणिपीठनिविष्टं च ध्येयं पाणियुगं विभोः ॥२१३॥
विद्याधिदेवं भगवन् ! चतुर्वक्त्रं चतुर्भुजम् ।
लम्बकूर्चं जटादण्डकमण्डल्वक्षमालिनम् ॥२१४॥
फुल्लरक्ताम्बुजाभासं श्वेतपद्मकराङ्कितम् ।
श्रुतीः अगाधा वक्त्रेभ्यः प्रोद्गिरन्तमतः स्मरेत्॥२१५॥
निर्धूमाङ्गारवर्णाभं शंखपद्माक्षसूत्रिणम् ।
फुल्लरक्तांशुविभवं देवताध्यात्मसूत्रकम् ॥२१६॥
ध्यायेदभयपाणिन्तं कपिलं तेजसां निधिम् ।
योऽन्तः सर्वेश्वरो देवः साक्षीभूतो व्यवस्थितः ॥२१७॥
स्फटिकोपलवच्छावान् स्वशक्त्याऽर्थान् बिभर्ति च ।
अविद्याविकृतानां तु भक्तानां सत्पदाप्तये ॥२१८॥
तमनादिं जगन्नाथं बहिःस्थूलतरात्मना ।
द्यावापृथिव्योरन्तस्थं विश्वरूपमतः स्मरेत् ॥२१९॥
अनेकवक्त्राभिनयनमनेकितकराङ्कितम् ।
यद्यप्यनेकवदनमनेकभुजभूषितम् ॥२२०॥
तथापि वै त्रयस्त्रिंशद्वदनैर्विविधैर्युतम् ।
चतुरभ्यधिकैर्दिव्यैश्चत्वारिंशन्महाभुजैः ॥२२१॥
ब्रह्मरुद्रेन्द्रदक्षार्कचन्द्रसिद्धास्तथा श्रुतिः ।
पौरुषस्य तु वदनस्य चोर्ध्ववक्त्रास्थितास्त्वमी ॥२२२॥
पिशाचाभिमतच्छेमद्वीपगम्भवारिभिः ।
वराहेस्व वैष्णिस्यापद्दिशां वदनं विभोः ॥२२३॥

पाताळदिङ्महामेघलोकराशिगृहोत्थितैः ।
वक्त्रैस्तारसमैस्तु ध्यायेद्वक्त्रं तु पश्चिमम् ॥२२४॥
यक्षान्तकाम्बुनागाद्यैर्वसुनक्षत्रगोगणैः ।
वक्त्रैर्वाराहवक्त्रोर्ध्वं ध्यायेच्चैवमतद्भुभैः ॥२२५॥
पश्चाद्यं चातुरात्मीयमन्त्राणां दशकं महत् ।
प्रोच्छितं हि सुवर्णाद्यं तल्लाञ्छनचतुष्टयम् ॥२२६॥
लोके शास्त्राष्टकं चैव पुस्तकं चाक्षसूत्रकम् ।
दर्वीकमण्डलू हैममभयं हि वरान्वितम् ॥२२७॥
दर्भाजिनं ततश्छत्रं सुशुभं चामरं सितम् ।
सुवस्रुवौ चापि कलशौ वेदिर्वह्निसमन्विता ॥२२८॥
चन्द्रार्कमण्डले पूर्णे नागेन्द्रो मणिदर्पणः ।
पुष्पस्रग्व्यजनं दिव्यं बिल्वपत्रलता तथा ॥२२९॥
स्मर्तव्यास्तु भुजेष्वस्य विभोः संस्थानकैः समैः ।
यथोदितक्रमेणैव व्यत्ययो न भवेद्यथा ॥२३०॥
भाभिर्नानाप्रकाराभिर्देहोत्थाभिरिदं जगत् ।
भासयन्तं जगन्नाथं स्मरेद्धृत्कमलादिषु ॥२३१॥
हंसमूर्तिमथात्मानं ज्ञानयज्ञभुजं स्मरेत् ।
कुन्देन्दुस्रग्वकान्तिं च हेमतुण्डं महातनुम् ॥२३२॥
रजस्तमोघ्नि सत्त्वस्थं विग्रहं परमेश्वरम् ।
धर्माधर्मेक्षणे ध्यायेदग्नीषोमात्मकेन तु ॥२३३॥
दक्षिणोत्तरसंस्थेन पक्षयुग्मेन राजितम् ।
बहिःस्थमेवोदकस्थं काञ्चनाचलसन्निभम् ॥२३४॥
ध्यात्वार्चयेत्तु विधिवद्धंसविग्रहमच्युतम् ।
बहिर्द्रव्यमयस्त्वेकः सामान्यैनैकलक्षणम् ॥२३५॥
सम्यङ्निर्वर्तितं स्वर्गं पूर्वमिच्छन्ति चार्थिनाम् ।

अ तर्वेद्या चतुर्धा यस्त्वेक एव महामखम् ॥२३६॥
तयोयागजपध्यानस्वरूप शश्वदेव हि ।
गाजिनामपवर्गं तु विदधाति समापनात् ॥२३७॥
त यज्ञपुम्प ब्रह्म वासुदेवमज हरिम् ।
ध्यायेद्वै सूत्रात्मानमज्ञनाद्रिसमप्रभम् ॥२३८॥
यज्ञाङ्गचिह्निताङ्गि च महाव्याहृतिदक्षिणम् ।
भूर्भुवस्स्वश्शरीर च शब्दब्रह्मक्रमानसम् ॥२३९॥

निर्णुदन्त प्रपन्नानामविद्यापङ्कमञ्जसा ।
वेधेन पोलप्रान्तेन त्वक्षयेनाऽमलेन च ॥२४०॥
वासनावासिताना च जीवाना भवशान्तये ।
महाविभूतिर्भगवान् पूर्णषाड्गुण्यविग्रह ॥२४१॥
स्वनाच्छान्ततराद्ब्रह्मतत्त्वादादाय चाऽञ्जलिम् ।
करोति सेचन दोषदग्धाना च स्वतेजसा ॥२४२॥
स्थूलरूपेण तमज बहिराराधनाद्विधौ ।
आध्मात वायुना वह्निर्धूमाङ्गारपर्वतम् ॥२४३॥
ध्यायेद्वह्निमहादीप्त वाजिवक्त्रमलाञ्छनम् ।

वह्नज्वालाङ्गलीरूप्य ट्ववत्कनकलोचनम् ॥२४४॥
घोणाग्रेणाहरन्त च त्रैलोक्योत्थ जलेन्धनम् ।
कृत्वा तद्भस्मसात्सम्यक् फूत्कुर्वन्त मुखेन तु ॥२४५॥
धर्मं सामान्यममलमनादिनिधन विभुम् ।
दुर्लभ यत्प्रबुद्धाना तत्प्रसादधिया विना ॥२४६॥
तस्य स्थूलतर रूप शृणु तत्प्राप्तये परम् ।
तुहिनाचलसङ्काश सौम्यवक्त्र चतुर्भुजम् ॥२४७॥
कामार्थावुद्वहन्त च शङ्खपद्मच्छलेन तु ।
साधुमार्गे स्थिताना तु सम्यच्छन्त धिया च तौ॥२४८॥

सिलाक्षमालागर्भं तु वरपाणिमतः स्मरेत् ।
वाङ्मयं निखिलं यस्य वस्तुजातमनश्वरम् ॥२४९॥
शक्तित्वेन स्वभावस्थश्चिद्रूपस्यामितद्युतेः ।
वरवाजिमुखं ध्यायेदथ वागीश्वरं प्रभुम् ॥२५०॥
सूर्यकान्तादिसङ्काशमनेकभुजभूषितम् ।
कमलं चाक्षसूत्रं च वेदिं तेनामि भूषितम् ॥२५१॥
साज्यधारौ स्रुक्स्रुवौ तु विष्टरं सोमसंयुतम् ।
दर्भाजिनं मेखलांश्चाप्यपसव्येषु षट्सभी ॥२५२॥
स्मरेद्वामकरेष्वस्य पुस्तकं शंखमेव च ।
दण्डं कमण्डलुं दर्वीमेकस्मिंस्त्रितयं करे ॥२५३॥
पूर्णं ग्राम्यैस्तथाऽऽरण्यैश्चरुबीजैस्तु पञ्चमे ।
सद्मूलफलपत्रैस्तु यज्ञद्रव्यैः सदक्षिणैः ॥२५४॥
सर्वाश्रमोपकरणैर्युक्तं च समभाजनम् ।
ध्येयमस्य भुजे षष्ठे धृतं मूर्तं ऋगादिभिः ॥२५५॥
वेदाङ्गैरुपवेदैस्तु संस्कारैः समखैस्तथा ।
विकारवसुधाधारे स्वभावे तु गुणोदधौ ॥२५६॥
स्वशक्तिभावितं कृत्वा मन.पूर्वं चतुष्टयम् ।
प्रकृत्यन्तः समास्ते यः सर्वज्ञः पुरुषात्मना ॥२५७॥
निषण्णं भोगिशय्यायां तपनीयरुचिं स्मरेत् ।
देवमर्णवशाय्याख्यं मूर्तैश्चक्रादिकैर्वृतम् ॥२५८॥
लक्ष्म्या संवाह्यमानं च समाक्रान्तं च निद्रया ।
वीज्यमानं हि वै प्रीत्या गीयमानं हि विद्यया ॥२५९॥
कूर्मात्मा कूर्मवद्देवो ध्यातव्यस्त्वथ लाङ्गलिन् ।
द्रवत्कनकवर्णाभस्वसामर्थ्यजलाश्रयः ॥२६०॥
शक्त्यादिकफलादन्द्वद्वितयांघ्रिः सनातनः ।

अ तर्वेद्या चतुर्धा यस्त्वेक एव महामखम् ॥२३६॥
तपोयागजपध्यानस्वरूपः शश्वदेव हि ।
याजिनामपवर्गं तु विदधाति समापनात् ॥२३७॥
तं यज्ञपुरुषं ब्रह्म वासुदेवमजं हरिम् ।
ध्यायेद्वै मूर्तरात्मानमज्ञानादिममप्रमम् ॥२३८॥
यज्ञाङ्गचिह्निताङ्गं च महाव्याहृतिदक्षिणम् ।
भूर्भुवस्स्वश्शरीरं च शब्दब्रह्मैकमानसम् ॥२३९॥

निर्णुदन्तं प्रपन्नानामविद्यापङ्कमञ्जसा ।
वैद्येन पोलमान्तेन स्वक्षयेणाऽमलेन च ॥२४०॥
वासनावासितानां च जीवानां भवशान्तये ।
महाविभूतिर्भगवान् पूर्णषाड्गुण्यविग्रहः ॥२४१॥
स्वकाच्छान्तनराङ्कलतत्त्वादादाय चाऽञ्जलिम् ।
करोति सेचनं दोषदग्धानां च स्वतेजसा ॥२४२॥
स्थूलरूपेण तमज बहिराराधनाविधौ ।
आध्मातं वायुना यद्वन्निर्धूमाङ्गारपर्वतम् ॥२४३॥
ध्यायेच्चद्व-महादीप्तं वाजिवक्त्रमलाञ्छनम् ।

वद्धनखाञ्जलीकम्थ द्रवत्कनकलोचनम् ॥२४४॥
घोणाग्रेणाहरन्तं च त्रैलोक्योत्थं जलेन्धनम् ।
कृत्वा तद्भस्मसात्सम्यक् पूत्कुर्वन्तं मुखेन तु ॥२४५॥
धर्मं सामान्यममलमनादिनिधनं विभुम् ।
दुर्लभं यत्प्रतुदानां तत्प्रसादधिया विना ॥२४६॥
तस्य स्थूलतरं रूपं शृणु तत्प्राप्तये परम् ।
तुहिनाचलसङ्काशं सौम्यवक्त्रं चतुर्भुजम् ॥२४७॥
कामार्थावुद्वहन्तं च शङ्खपद्मच्छलेन तु ।
साधुमार्गं शिवानां तु सयच्छन्तं धिया च तौ ॥२४८॥

सिताक्षमालागर्भं तु वरपाणिमतः स्मरेत्।
वाङ्मयं निखिलं यस्य वस्तुजातमनश्वरम् ॥२४९॥
शक्तित्वेन स्वभावस्थचिद्रूपस्यामितद्युते।
वरवाजिमुखं ध्यायेदथ वागीश्वरं प्रभुम् ॥२५०॥
सूर्यकान्तादिसङ्काशमनेकभुजभूषितम्।
कमलं चाक्षसूत्रं च वेदिं लेतापि भूषितम् ॥२५१॥
साज्यधारौ स्रुक्स्रुवौ तु विष्टरं सोमसंयुतम्।
दर्भाजिनं मेखलाश्चाप्यपसव्येषु षट्स्वमी ॥२५२॥
स्मरेद्वामकरेष्वस्य पुस्तकं शस्त्रमेव च।
दण्डं कमण्डलुं दर्वामेकस्मिंस्त्रितयं करे ॥२५३॥
पूर्णं ग्राम्यैस्तथाऽऽरण्यैश्चरुबीजैस्तु पञ्चमे।
सङ्मूलफलपात्रैस्तु यज्ञद्रव्यैः सदक्षिणैः ॥२५४॥
सर्वाश्रमोपकरणैर्युक्तं च सममाजनम्।
ध्येयमस्य भुजे षष्ठे वृतं मूर्तैः ऋगादिभिः ॥२५५॥
वेदाङ्गैरुपवेदैस्तु सस्कारैः समखैस्तथा।
विकारवसुधाधारे ह्यभावे तु गुणोदधौ ॥२५६॥
स्वशक्तिभावितं कृत्वा मनः पूर्वं चतुष्टयम्।
प्रकृत्यन्तं समास्ते यः सर्वज्ञः पुरुषात्मना ॥२५७॥
निषण्णं भोगिशय्यायां तपनीयरुचिं स्मरेत्।
देवमर्णवशाय्याख्यं मूर्तैश्चक्रादिकैर्वृतम् ॥२५८॥
लक्ष्म्या संवाह्यमानं च समाक्रान्तं च निद्रया।
वीज्यमानं हि वै प्रीत्या गीयमानं हि विद्यया ॥२५९॥
कूर्मात्मा कूर्मवद्देवो ध्यातव्यस्त्वथ लाङ्गलिन्।
द्रवत्कनकवर्णाभस्वसामर्थ्यजलाश्रय ॥२६०॥
शक्त्यादिकलाद्वन्द्वाद्वितयादि सनातन।

मात्स्यादिककलाव्यश्च श्रोद्धिरस्तु श्रुतिलयम् ॥२६१॥
अतसीपुष्पसङ्काश शङ्खचक्रगदाधर ।
मन्त्रोपकरणाङ्गश्च निमग्नोद्धारणक्षम ॥२६२॥
स्वशक्तिविभवाधारमिच्छाज्ञानक्रियाचितम् ।
नानाविशेषविज्ञानस्फुलिङ्गोर्मिमदोटितम् ॥२६३॥
दारयन्त स्थित हार्दमनूनं मोहमुल्बणम् ।
नदन्नादमनाद्येय तमन्त परमेश्वरम् ॥२६४॥
सन्तप्तकनकाभ च ध्यायेद्देव नृकेसरिम् ।
ज्वलदग्निस्फुलिङ्गाभि स्वदेहोत्थाभिरावृतम् ॥२६५॥
रथाङ्गशङ्खधातार त्रासमूर्तमुभीषणम् ।
सत्सरत्नकरजश्रेणीदीप्तेनोभयपाणिना ॥२६६॥
सयच्छन्त धिया सम्यग्भविना साभयम्परम् ।
अमृताध्मातमेवाममृताहरण विभुम् ॥२६७॥
पीनाम्बरधर ध्यायेदेकवक्त्र चतुर्भुजम् ।
श्रोणीतटार्पितकर शङ्खचक्रविभूषितम् ॥२६८॥
गच्छतो दक्षिणेनैव वहन्त गिरिरूपधृक् ।
शुद्धज्ञानानुविद्ध च कर्मसम्भवभीतिहम् ॥२६९॥
दिशन्त स्वधिया सम्यग्भक्तानां भक्तवत्सलम् ।
मायामथितदुग्धाब्धिं क्षोभयित्वा प्रकाशितम् ॥२७०॥
अमृत क्षुत्पिपासादीनां प्रतिपक्षमनामयम् ।
एव चाध्वर भाव्य मायाम्भोर्णवमध्यगम् ॥२७१॥
आत्मामृतमनौपम्यमहरत्स्वसकर्मणा ।
ध्यायेत्कमलगर्भाभ देवदेव श्रिय पतिम् ॥२७२॥
पमलाम्बरदेहाविभूषितकरद्वयम् ।
द्रष्ट देवीपरिणये लक्ष्म्यैव समर्पयन् ॥२७३॥

ध्यायेदात्मस्वरूपं च देवं राजोपलद्युतिम् ॥२८६॥
विज्ञानरश्मिभिर्दीप्तं सत्त्वस्थगरुडासनम् ।
नानाकाररूपभूतात्मा सद्विद्यासुमनर्पितम् ॥२८७॥
चक्रं खड्गं गदां बाणमङ्कुशं कुन्तमेव च ।
षट्सु दक्षिणहस्तेषु शक्तिं चापं च कार्मुकम् ॥२८८॥
मुसलं मुद्गरं भीमं खेटकं वामबाहुषु ।
देवं आमन्दलाभश्च रक्षार्थं पारिजातजित् ॥२८९॥
आक्लिष्टकर्मा देवेशः स्वकेकाद्भुतविक्रमः ।
भवबन्धप्रतिरक्षाना भक्तानामपि देहिनाम् ॥२९०॥
यो ब्रवगर्भो सरूपो ह्यनित्यश्चानुरञ्जनः ।
न्यग्रोधविटपाकारोऽप्यविद्याबन्धलक्षणः ॥२९१॥
कर्मवृक्षस्सुविततो मोहमायाफलावृतः ।
तदुत्पाटनसिद्ध्यर्थं मनुमात्म जग सदा ॥२९२॥
आविद्याऽऽत्तिशमानेन दृढया तु जगत्प्रभुः ।
स विवेकात्मना भूत्वा ज्ञानबाहुविनाशकृत् ॥२९३॥
ऐश्वर्यधर्मवैराग्यशमस्य स्थितिशक्तिधृक् ।
आदाय संयमास्त्रैव नियमाङ्गगं तथा ॥२९४॥
इन्द्रियारिगणं जित्वा कामिणा दोषदो हि च ।
यदस्य सुरजिद्रूपं तद्द्वादशभुजं स्मरेत् ॥२९५॥
दिव्यमाल्याम्बरधरं दिव्याभरणभूषितम् ।
चतुर्वेदनं सुनयनं वागोत्तमनितिप्रियम् ॥२९६॥
खड्गं चक्रगदाबाणमुसलं च तरूपमम् ।
षट्सु दक्षिणहस्तेषु शङ्खमङ्कुशकार्मुकम् ॥२९७॥
छत्रं च फणभृत्पाशं विनेर्दामभुजेष्वथो ।
पीताम्बिरं देवं नागस्थेन च तुना ॥२९८॥

तद्वत्सलमनस्था देव्या ताञ्चिन्तयाऽनिशम् ।
सवीज्यमानं विनयाच्चामरेण सितेन तम् ॥२९९॥
लोकनाथं विशालाक्षं सर्वदेवनमस्कृतम् ।
वरसिंहासनारूढं ध्यानोन्मीलितलोचनम् ॥३००॥
पद्मासनेनोपविष्टं पद्मगर्भोपमद्युतिम् ।
करुणाविष्टबुद्धिं च बद्धपद्मकराहितम् ॥३०१॥
ज्ञानवैराग्यसद्धर्ममार्गत्रयनिदर्शकम् ।
सम्मरेदथ दत्ताख्यं ज्ञानमूर्तिमलेपकम् ॥३०२॥
सनन्यमुनिं देवानां समाधिनिरतात्मनाम् ।
ईपल्लकारसानां च ब्रह्ममार्गानुसारिणाम् ॥३०३॥
स्वप्रभानिकरेणैव भासयन्तं च सत्पथम् ।
मनसा सह वायूनां मार्गातिप्रतिषेधकृत् ॥३०४॥
श्रुतीनामागमानां च व्यापाराणां तथैव च ।
वर्णानामाश्रमाणां चाऽप्याचाराणां तथैव च ३०५
चर्याणामाश्रमाणां च परिरक्षक एव हि ।
सामसैकार्णवान्तस्थे निष्कम्पे बुद्धिरूपे ॥३०६॥
अभिधानलताख्ये त्वप्युपरिस्थमनुस्मरेत् ।
प्रावृड्गिरिमिव श्यामं तेजसा ज्वलनोपमम् ॥ ३०७ ॥
श्यामकुञ्चितजालस्य शिखाऽऽकल्पचयस्य च ।
उत्कृष्टद्विजरूपेण विकसत्पद्मरूपिणा ॥ ३०८ ॥
स एव द्विभुजो ध्येयः दण्डकृष्णाजिनधृक् ।
चन्द्रज्योत्स्नाजिताकारं स्वमोपशयनं विभुम् ॥ ३०९ ॥
निषण्णमीषदुत्तानं द्विभुजं शिशुरूपिणम् ।
एवमेव निरस्तान्तं शान्तानिद्रासमाश्रितम् ॥ ३१० ॥

मिष्टराविष्टपाणिश्च क्रियाकाण्डप्रदर्शकम् ।
पठन्तमनिशं शास्त्रं पञ्चरात्रपुरस्सरम् ॥३३६॥
कृष्णमिन्दीवरश्यामम् चतुर्बाहुं जटाधरम् ।
पादेनैकेन तिष्ठन्तमाहरन्तञ्च मारुतम् ॥३३७॥
एकत्रिपड्द्वियडात्राद्यतिकृच्छ्रपरायणम् ।
पक्षमासेरवासाश्च दिशन्तमनुचिन्तयेत् ॥३३८॥
कृष्णाजिनोत्तरीयाश्च सर्वे कापायधारिणः ।
ब्रह्मलिङ्गधरास्सर्वे सर्वे ब्रह्मपरायणाः ॥३३९॥
मुख्यकर्मपरिक्रान्तास्साधूनां प्रेरणाय च ।
कालानुकूलमाश्रित्य सर्वे सर्वे परायणाः ॥३४०॥
असङ्गशक्त्या भगवान् सकुठाराभिधानया ।
छिनत्ति बन्धमूलान् य कर्मवृक्षांस्तु कर्मिणाम् ॥३४१॥
तमेव द्विभुजं ध्यायेत् उदयादित्यवर्चसम् ।
कृष्णेणचर्मवसनं सत्कुठारकराङ्कितम् ॥३४२॥
दशेन्द्रियाननं घोरं यो मनोरजनोचरम् ।
विवेकदारुजालेन शमं नयति योगिनाम् ॥३४३॥
ध्येयस्स एव विश्वात्मा गतोयजलदप्रभः ।
रक्तराजीवनयनः धनुश्शरकराङ्कितः ॥३४४॥
याग्वेदं मण्डलं यो वै स्वरूपद्युतिलक्षणम् ।
स्वयं स्वोऽयं विसृजति त्रिधा पश्यन्ति पूर्वकम् ॥३४५॥
बोधमारनङ्कारपूर्वेरयानेष्वभ्युदितं क्रमात् ।
स्मर्तव्यस्सोऽपि भगवानतसीकुसुमद्युतिः ॥३४६॥
पद्मं वै वामहस्तेन सर्वशास्त्रार्थपुस्तकम् ।
दक्षिणेन तु शास्त्रार्थमादिशश्च यथास्थितम् ॥३४७॥

युगानुसारिमेदानामखेदजननाय च ।
विभजस्तु चतुर्धा वै वेदमेकं त्रिकालवित् ॥३४८॥
दानधर्मरतानाञ्च यागयज्ञानुयाजिनाम् ।
तपस्स्वाध्यायसक्तानां मुक्तानामपुनर्भवात् ॥३४९॥
संरक्षणाय योग्यस्वविज्ञानव्यक्तयेपि च ।
समुदेति जगन्नाथस्तेषां हृत्कमलावनेः ॥३५०॥
मनोवाजिनमाक्रम्य स्वादायास्तगुणायुधान् ।
नूनमुत्पाटयत्याशु जन्मान्तरशतोत्थितम् ॥३५१॥
वैषयं वासनाजालं शुद्धविज्ञानसिद्धये ।
ध्यायेद्वराश्वगं तं वै तनुत्राद्वृतविग्रहम् ॥३५२॥
सितोष्णीषललाटञ्च नातिदीर्घजटाधरम् ।
द्रवत्कनकवर्णाभामिषुधिद्वयमध्यगम् ॥३५३॥
शरचापकरं व्यग्रखड्गं कुन्तकुठारिणम् ।
यज्ञाध्ययनदानादि परिरक्षन्तमेव हि ॥३५४॥
शान्तयन्तमवर्णानामधर्मनिरतात्मनाम् ।
सर्वतत्त्वाश्रयं तत्त्वं सर्वशक्तिमयं विभुम् ॥३५५॥
सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् ।
निश्शेषभुवनानाथ ध्यातव्यं तदधः स्थितम् ॥३५६॥
अनन्तशयनारूढं कल्पान्तहुतभुक्प्रभम् ।
ज्वलज्ज्वालावळीयुक्तं ज्वलनाशुचिनेष्टितम् ॥३५७॥
चक्राद्यायुध *वृन्देन मूर्तेन परिवारितम् ।
सितादिदेशतो लक्ष्मीस्थिता दक्षिणतो विभोः ॥३५८॥
पूर्वदेशगता निद्रा पृष्ठिस्तद्वामतस्स्थिता ।
प्रधानदेवताध्यानमिदमुक्तं समासतः ॥३५९॥

---

* पा॥ बृन्दैः

सुपर्णः पद्मरागाभः निर्मल स्स्वर्णलोचन ।
गरुडः काञ्चनाभस्तु कुटिलभ्रूरुणेक्षण ॥२७२॥
केकराक्षस्तु तार्क्ष्यो वै प्रावृड्जलदसन्निभः ।
द्विरक्तकनकनेत्रस्तु शबलाभस्तु पञ्चम ॥२७३॥
चतुर्भुजा स्सुपर्णाद्या स्सौम्यरूपा स्त्वनाकुला ।
पतत्रिचरणा स्सर्वे पक्षमण्डलमण्डिताः ॥२७४॥
लम्बोदरा स्सुपीनाङ्गाः कुण्डलाद्यैस्तु भूषिताः ।
कुटिलभ्रुसुवृत्ताक्षा वक्रतुण्डा स्मिताननाः ॥२७५॥
अपानादिसमीराणामाधिपत्येन संस्थिताः ।
महाबला महाकाया रक्ततुण्डोऽत्र पञ्चमः ॥२७६॥
आधेयचरणाधस्स्थसव्य आद्यस्य वै करः ।
दक्षिण श्चाक्षसूत्रेण सुसितेन च भासितः ॥२७७॥
एवमेव सुवर्णस्य परिज्ञेयं भुजद्वयम् ।
नाम्युद्देशे परो वाम उत्तानस्तु सविस्मयः ॥२७८॥
पुष्पस्तबकसम्पूर्ण ऊर्ध्ववक्त्रस्तु दक्षिणः ।
गरुडस्य द्वयं विद्धि हृद्देशेऽञ्जलिरूपिणम् ॥२७९॥
तथैव सम्पुटाकार चतुर्थस्य करद्वयम् ।
दक्षिणेऽमृतकुम्भस्तु वामे तु विषमं फणी ॥२८०॥
पञ्चमस्य द्वयं शेषं त्रयाणां च द्वयोस्समम् ।
आधेयचरणाक्रान्तो यदि वै दक्षिणः करः ॥२८१॥
सधारो विहितो वामे त्वक्षसूत्रस्य वै तदा ।
आधेयचरणाधस्स्थं यस्य पाणितलद्वयम् ॥२८२॥
निरस्तधुरं तं विद्धि वाहनं भगवन्मयम् ।
अनुग्रहपरस्त्वास्ते पक्षिपक्षाब्जविष्टरे ॥२८३॥
स्वतेजोनिजसामर्थ्यमम्बरव्यजनान्विते ।

पद्मासनादिना चैव केवलं वा क्रियाऽन्वित ॥२८४॥
सुव्यक्तावयवस्थित्या विद्धि तं गरुडासनम् ।
मेढ्रमुष्कोदरस्यैव गोपिताद्वेगगामिना ॥२८५॥
वीर्यपातात्स्वशिरसा गच्छतश्चाण्डजेन तु ।
लोकान्तराणां कार्यार्थं वात्सल्याध्यायिनामपि ॥२८६॥
प्रत्यक्षदर्शनार्थं तु स्मृतो गरुडवाहनः ।
तस्माद्भगवतो विष्णोरेव रूपधरस्य तु ॥२८७॥
समाहृतस्य सिद्ध्यर्थमासीनं संस्मरेत् स्थितम् ।
उपसंहृतवामाङ्घ्रि पङ्कस्थो वा नगस्थित. ॥२८८॥
यामपिच्छाफलाना फल् ध्वसयत्यन्यचिन्तितम् ।
आजानोर्दक्षिणस्यैवमविक्षिप्ते स्मृतोऽच्युत ॥२८९॥
आमोक्षात्सर्वसिद्धीनां दक्षिणोध्यायिनां भवेत् ।
सर्वमेव ऋजुस्थित्या सुस्थितश्चार्थिनां स्मृतम् ॥२९०॥
स्वस्तिकाद्यैर्मनस्येव किं तु तं वाहनं विना ।
निहितापीठकल्हारसिंहासनगतस्य च ॥२९१॥
विहगाधिपतिश्चात्र योगैश्वर्याद्विगर्ति च ।
स्वयं तु भुजगेन्द्रं तु नागेन्द्रासवरान्वितम् ॥२९२॥
विभोरात्र दर्शनेव तुष्ट्यर्थं वा स्वयं विभो ।
जगज्जयोदयार्थं तु शान्त्ये शार्ङ्गिणाम् ॥२९३॥
विभिन्नेन च रूपेण नानालोकान्तरेषु च ।
अनिरुद्धगतिर्वीरो विचरत्येक एव हि ॥२९४॥
तदारूढस्य यद्रूपं प्रकाशस्य च साम्प्रतम् ।
अनेकभेदभिन्नं तु निबोध गदतो मम ॥२९५॥
संपत्त्यन्त्य सदा शान्त्य नविनां दाक्षिणेन तु ।
मोहनन्त्य च वामे तु सार्धं पूर्वोक्तलक्षणम् ॥२९६॥

द्विभुजस्य विद्धि रूपं शक्तीशस्य तु केवलम् ।
रूपेणानेन च पुनर्योद्धा समुपयाति च ॥३९७॥
सह कान्तागणैर्वा त्वेकाधेन पृथक् पृथक् ।
प्राग्वल्लक्ष्म्या समेतं यत्तदेकं रूपमेश्वरम् ॥३९८॥
श्रीपुष्ट्योरथ मध्यस्थं द्वितीयं परिकीर्तितम् ।
श्रियादिमायानिष्ठेन चतुष्केणावृतं परम् ॥३९९॥
शुद्ध्यादिकेन षट्केण चतुर्थं विद्धि साम्प्रतम् ।
पुष्ट्यन्तेन श्रियाद्येन त्वष्टकेन तु पञ्चमम् ॥४००॥
लक्ष्म्याद्येन द्विषट्केण षष्ठं विद्धि समन्वितम् ।
श्रियादिर्विमला कान्तिर्जया लक्ष्मी र्हलायुधा ॥४०१॥
चतुर्थी भगवन्माया विश्वव्यापिनी निरन्धिनी ।
शुद्धिर्निरञ्जना नित्या ज्ञानशक्त्यपराजिते ॥४०२॥
प्रकृतिः सुन्दरी षट्कमित्युक्तं सर्वसिद्धिदम् ।
लक्ष्मीशब्दनिधिः सर्वकामदा प्रीतिवर्धिनी ॥४०३॥
यशस्करी शान्तिदा च तुष्टिदा पुष्टिदाष्टकम् ।
द्विषट्कवैभवे योगे देवीनां कीर्तितं हि यत् ॥४०४॥
लक्ष्म्याद्यन्तं च बोद्धव्यं भेदेऽस्मिन्नाम्बुजेक्षणे ।
पुनश्चतुर्भुजस्यैव विज्ञेयं भेदसप्तकम् ॥४०५॥
किं तु ये शङ्खचक्रे द्वे वामहस्तद्वये तु ।
जगत्यस्मिन् हि यच्छन्ति शान्तिभावेन शाश्वतीम् ॥४०६॥
प्रोद्वहन्न द्वितीयेन त्वपसव्येन वै गदाम् ।
भूय [illegible] पूर्वोक्तेन क्रमेण तु ॥४०७॥
चतुर्णामप्यनुर्दाणामन्योन्यत्वेन धारणात् ।
यत्ते द्वादशधा रूपं निद्रशक्तीश च केवलम् ॥४०८॥
पुनर्हीमणुर [illegible] लिङ्गेन तु ।

स्थितमेकाधिकेनैव षोढा कमललोचन ॥४०९॥

एवं चतुर्भुजेनैव वपुषा बहुधा स्थितम् ।
सप्तधा षड्भुजाद्येन भुजाधिक्येन वा पुनः ॥४१०॥
स्थितस्त्वनेकधा देवो यथा तदवधारय ।

षड्बाहुरष्टबाहुश्च दश द्वादशबाहुधृक् ॥४११॥
द्विसप्तषोडशकरस्तथाष्टादशभूषित ।
केवलादिश्च सर्वेषां प्राग्भेदस्तु सप्तधा ॥४१२॥
तन्मे शृणु यथावस्थमस्त्रविन्यासचिह्नितम् ।

षड्भुजो दक्षिणैर्धत्ते निस्त्रिंश कमलं गदाम् ॥४१३॥
सशरं कार्मुकं शङ्ख वामैरब्जोत्तम त्रिभिः ।
गदामुसलचक्रासीनष्टबाहुस्तु दक्षिणे ॥४१४॥
शङ्खमङ्कुशपाशश्च वामैस्तु सशरं धनुः ।
खड्गबाणगदापद्मशक्तियुक्तास्तु दक्षिणाः ॥४१५॥
दश बाहोर्धनुःशङ्खचक्रखेटाश्च वामगाः ।
षण्णां दक्षिणहस्तानां द्विषट्कभुजभूषित ॥४१६॥
सन्धत्ते कमलं खड्गचक्रबाणगदाङ्कुशान् ।
शङ्खपाशाभयं शक्तिं सव्यानां मुसलं धनुः ॥४१७॥
चतुर्दशभुजो धत्ते वामे तु भुजसप्तके ।
शङ्खं गदाङ्कुशं पाशं मुसलं मुद्गरं हलम् ॥४१८॥
दण्डाब्जकुलिशं चक्रं खड्गशक्तिपरश्वधान् ।
बिभृयात्षोडशभुजो मुख्यस्त्वस्त्रमुद्गरान् ॥४१९॥
अभयं कमलं खड्गं शक्तिदण्डशराङ्कुशान् ।
शङ्खचक्रगदापाशशलाकाचक्रकार्मुकान् ॥४२०॥
धरं कराष्टकेनैव धत्ते सव्येन विश्वजित् ।
पद्मखड्गगदापाशरत्नाभपराङ्कुशान् ॥४२१॥

दण्डदक्षिणहस्तैस्तु धत्तेऽष्टादशबाहुधृक् ।
शङ्खमयं हलं शक्तिं मुद्गरं मुसलं धनुः ॥४२२॥
कुठारमतुलं पाशं बिभुर्वामभुजैरमून् ।
बिभर्ति दुष्टशान्त्यर्थं साधूनां पालनाय च ॥४२३॥
भूयो विशेषरूपाणि एतान्येव विशेषत. ।
सद्वक्त्रद्वयमात्रेण नयत्यमितविक्रमम् ॥४२४॥
संहतेजोसहिष्णूनां पितृयाणरतात्मनाम् ।
अञ्जनादिकसंचारभीतानां वै हिताय च ॥४२५॥
अमृते वै गृहे भागे तेजसे नित्यदक्षिणे ।
वामदक्षिणवक्त्राभ्यां कुर्याद्वै व्यत्यय प्रभु. ॥४२६॥
वृद्धयेऽपि च शान्त्यर्थं तेजसः पद्मलोचनः ।
हेतुना तेन भगवान् बहिरन्तर्गतेन वै ॥४२७॥
अग्नीषोमौ समीकृत्य त्वास्ते साधारणात्मना ।
व्यक्तिं वागीशवक्त्रं तु नीत्वैव शिरसोपरि ॥४२८॥
पञ्चवक्त्रेण वपुषा त्वामूलाधात्मनेकधा ।
शब्दब्रह्मरतानां च ध्यायिनामात्मसिद्धये ॥४२९॥
आपातालाच्च सर्वेषां लोकानां पूरणाय च ।
नानावपुर्धरो भूयस्त्वेकैकेनैव याति च ॥४३०॥
भेदेन रूपमाश्रित्य दशधा च सितादिकम् ।
विना वक्त्रैर्नृसिंहाद्यैस्सर्वब्रह्मादिगान्वितम् ॥४३१॥
बिभर्ति रूपाण्येतानि अनिरुद्धस्तु तार्क्ष्यकः ।
एवमाक्रम्य गरुडं प्रद्युम्नो विभृयाद्वपुम् ॥४३२॥
नानात्वमपि चाप्येति सङ्कर्षणस्सुपर्णगः ।
देवस्सत्यो गरुत्मान् भिन्ना विधात्मा यात्यनेकधा ॥४३३॥
कुरङ्गदन्तुप्र्यादिमतानां तु समागमे ।

चतुर्णां ये निजा वर्णास्ते तु मूर्त्यन्तरेषु च ॥४३४॥
चतुर्भुजस्यादिमूर्तेर्विष्णोर्मूर्त्यन्तरस्य च ।
बलाञ्छनतुल्यत्वे भेदकृत्सध्वजद्वयम् ॥४३५॥
अपसव्यस्थितेनैव तत्तालाख्यध्वजेन तु ।
स्वरूपभेदमाप्नोति स्वमूर्त्या सह सर्वदा ॥४३६॥
यस्मात्कार्यवशेनैव मूर्तीनामपि पाणिगा ।
नु पद्मादयश्शान्तामूर्तामूर्तास्तथोद्यता. ॥४३७॥
इत्येव भगवद्ध्यान सर्वमूर्ते मुनीश्वरा ।
दिव्यायुधानाकेषा चिद्ध्यानमुक्त पुरैव तु ॥४३८॥
शेषाणामायुधाना तु ध्यान वक्ष्येऽधुना द्विजा ।
सन्ध्याजलदसङ्काश लाङ्गल भीमलोचनम् ॥४३९॥
क्षमाङ्कमुद्वहतास च वज्रकाय बलोत्कटम् ।
स्वरश्मिखचित ध्यायेन्नृत्यमान च नन्दकम् ॥४४०॥
शरदाकाशसङ्काश दर्शन्त दशनावलिम् ।
सूर्यमण्डलसङ्काश खेटक सौम्यमूर्तिकम् ॥४४१॥
ग्रसन्तमसपूगानि स्ववक्त्रेणानिश बलात् ।
बलमुष्टि स्मरेद्दण्ड रक्ताङ्ग रक्तलोचनम् ॥४४२॥
क्रोधमूर्ति स्वदशनैर्दशन्तमधर स्वरम् ।
शक्रकार्मुकवर्ण त्व परशु भीमविग्रहम् ॥४४३॥
द्रवत्कनकनेत्र च ज्वलज्ज्वालाजटाधरम् ।
मुद्गर शतधामाभ पीनास पृथुविग्रहम् ॥४४४॥
जटाकलापपृक्सौम्य पुण्डरीकनिभेक्षणम् ।
पश्च यज्ञोपलाभ तु स्थित दीर्घनखाङ्कितम् ॥४४५॥
दंष्ट्राकरालवदन ज्वलत्कनकलोचनम् ।
शीताशिनीप्रभा शक्ति शान्तानिगलेक्षणाम ॥४४६॥

घनघर्घरनिर्घोषमुद्गिरन्त मुहुर्मुहु ।
अन्यत्सर्वं तु पूर्वोक्त ध्यानमेषा मुनीश्वरा. ॥४४७॥
अधिष्ठातृक्रमस्त्वेषामोषध्यो लाङ्गल द्विजा ।
नन्दक सर्वशास्त्राणि खेटक वसुधा स्मृता ॥४४८॥
ज्ञेयो हि दण्डो नियतिर्वैराग्य परशुस्स्मृत ।
मुद्गरस्तु परिज्ञेयो ह्यहङ्कारो मुनीश्वरा ॥४४९॥
विज्ञानमण्डल वज्र समाधिश्शक्तिरुच्यते ।
भिन्नरूपस्य च विभोर्ये उक्तस्सुन्दरीगण ॥४५०॥
साधारश्चाप्यसाधारस्तासा ध्यान क्रमाच्छृणु ।
चिन्ताखण्डलचापाभा लक्ष्मी रक्ताम्बुजप्रभा ॥४५१॥
पुष्टि कनकगौरा च कीर्ति कुमुदपाण्डरा ।
जयार्ककान्तिसदृशी मायाञ्जननिभा स्मृता ॥४५२॥
शुद्धि किंशुकसङ्काशा कुन्दाभा तु निरञ्जना ।
बन्धुजीवोज्वला नित्या ज्ञानशक्तिस्सितारुणा ॥४५३॥
फुल्लेन्दीवरवर्णा च परिज्ञेया पराजिता ।
रक्तोत्पलाभा प्रकृति स्सितपीता सरस्वती ॥४५४॥
सर्वकामप्रदा सिद्धिस्त्विन्द्रनीलसमप्रभा ।
सिन्दूरपुञ्जवर्णाभा विज्ञेया प्रीतिवर्धिनी ॥४५५॥
यशस्करी च दुग्धाभा शान्तिदा विद्रुमोज्वला ।
तुष्टिस्तुहिनसङ्काशा दया वैडूर्यसन्निभा ॥४५६॥
निद्रायस्कान्तसदृशी क्षमा पीतारुणप्रभा ।
कान्तिर्दर्पणसङ्काशा धृतिर्गोरोचनोज्वला ॥४५७॥
मैत्री बन्धूकपुष्पाभा रतिर्गैरिकसन्निभा ।
मतिर्मरतकाभा वै सर्वा *प्रमुदिता गुणा· ॥४५८॥
दिव्यमाल्याम्बरधरा नानालङ्कारभूषिता ।

*पा ॥ प्रमुदितानना ।

दिव्यस्रग्वेष्टनोपेता वीक्षमाणास्स्वकं पतिम् ॥४५९॥
चतस्रश्शक्तयो यास्तु विभोश्शयनगस्य तु ।
प्रागुक्तास्तत्र पूर्वाशावस्थिता वीजयन्त्यजम् ॥४६०॥
अयं यदि स्त्रयस्थं तु तत्संवाहनतत्परम् ।
यद्वैका श्रीर्विभोस्तत्र सन्निवेश पुरोधितः ॥४६१॥
यद्वैका श्रीर्विभोस्तत्र वामे वा दक्षिणेपि वा ।
श्रीपुष्ट्याख्यद्वयं यत्र तत्र तद्दक्षिणोत्तरे ॥४६२॥
पद्मासनेनोपविष्टं पक्षिपक्षद्वयेन ते ।
नळिनीनाळहस्ताद्याऽमृतकुम्भकरा परा ॥४६३॥
अग्नीषोममयो देह आद्यो यस्सर्वगस्य च ।
तस्य शक्तिद्वयं तादृगमिश्रं मिन्नलक्षणम् ॥४६४॥
भोक्तृशक्तिस्स्मृता लक्ष्मी पुष्टिर्वै कर्तृसंज्ञिता ।
भोगार्थमवतीर्णस्य तस्य लोकानुकम्पया ॥४६५॥
उदितं सह तेनैव शक्तिद्वितयमव्ययम् ।
नानात्वेन हि वै यस्य परिणामः प्रकाशित ॥४६६॥
दिक्पत्रचतुरन्तस्थं यद्वै देवीचतुष्टयम् ।
शक्तिः परशुपाशास्त्रमङ्कुशं तत्करे क्रमात् ॥४६७॥
षट्कं केसरजालस्थं तत्र प्राक्पश्चिमे-द्वयम् ।
द्वयंद्वयं सौम्ययाम्ये तासां वामकरेषु च ॥४६८॥
शङ्खचक्रगदासीरमिष्वस्त्रं नन्दकं सितम् ।
पत्रमध्यनिविष्टं तु यत्कान्ताष्टकमुत्तमम् ॥४६९॥
तस्य वामकराणां च विज्ञेयं त्वादितोऽष्टकम् ।
श्रीफलं चाक्षसूत्रं सन्दर्पणं पुष्पमञ्जरीम् ॥४७०॥
विष्टरं किङ्किणीं शम्सचयः कमलेक्षण ।
विशेषरनच्छिदः पाणिद्वादशानां तु सामगः ॥४७१॥

अन्तरान्तरयोगेन सर्वाश्चामरलाञ्छिता ।
स्वस्तिकेनोपविष्टाश्चाप्यन्तर्मुदितमानसा ॥४७२॥
द्वयादिकस्याम्य सर्वस्य द्वादशान्तस्य लाञ्छिन् ।
मितादिकेन वर्णेन लाञ्छनव्यत्ययेन तु ॥४७३॥
तुल्यलाञ्छनयोगेन तन्निरासे च वै सति ।
वराभयाभ्यामन्योन्यपाणित्वादथ केवलात् ॥४७४॥
बहुधा भेदवृन्दं तु परिज्ञेयं तु पूर्ववत् ।
शेषं भवोपकरणं देवानां निचयो हि यः ॥४७५॥
सुप्रसिद्धो महाबुद्धे किं त्वब्जाद्यैस्तु पूर्ववत् ।
ध्यातव्या लाञ्छनास्सर्वे पाणिपादतलादिषु ॥४७६॥
भक्तिश्रद्धान्वितपरः स्सर्वदा यस्सदैव हि ।
ध्यात्वैवं मर्चनं कुर्याद्भोगैस्संस्पर्शपूर्वकैः ॥४७७॥
सोऽचिरान्मोक्षनिष्ठं तु फलमाप्नोत्यमीप्सितम् ।
किरीटाद्यस्त्रनिष्ठेन परिवारेण चावृतम् ॥४७८॥
भक्त्या वाभीप्सितं रूपमर्चनीयमथापि वा ।
निर्मुक्तपरिवारं वा स्वेन ध्यानेन लक्षितम् ॥४७९॥
विदधात्यर्चनां नूनं स्वं पदं फलसंयुतम् ।
ज्ञात्वैवं साधकः कुर्याद्यथाभिमतमर्चनम् ॥४८०॥
आत्मशक्तिसमैर्भोगैरखिलैश्शुद्धविग्रह ।
हृदि वेद्यां बहिर्मूर्तौ प्रासादे स्वगृहे तु वा ॥४८१॥
बहुप्रकारनिर्मुक्ते धूमदाहादिनोज्झिते ।
शरणे रमणीये च निम्नस्पर्शे तु भाविते ॥४८२॥

इति श्रीपाञ्चरात्रे ईश्वरसंहितायाम्
मुद्रालक्षणभगवद्ध्यानादिप्रकारो नाम
चतुर्विंशोऽध्यायः ॥

—○—

अथ पञ्चविंशोऽध्यायः ॥

नारदः ।

अत. परं प्रवक्ष्यामि कुण्डादीनां च लक्षणम् ।
शृणुध्वमवधानेन चेतसा मुनिपुङ्गवा ॥१॥
(पुरामण्डलसिद्ध्यर्थं यथाक्षेत्रं विभाजितम् ।
तथैव भाजितात् क्षेत्राच्चतुरस्रान्महामते ॥
पूर्वोद्दिष्टानि धिष्ण्यानि यथाकार्याणि तच्छृणु ॥)
पञ्चम ब्रह्मकर्माद्यं मर्मभाग्द्वियवस्थितम् ।
अंशदर्धेन तत्स्थेन कुर्यात्सूत्रेण लाञ्छनम् ॥२॥
अर्धचन्द्रसमाकारं भागयुग्मस्य चान्तरे ।
दक्षिणोत्तरभागाभ्यां तदधस्तत्समं तथा ॥३॥
लाञ्छनद्वितयं कुर्यात्तिर्यक्तद्ध्यानसंस्थितम् ।
भागद्वादशकस्यैवयं स्यात्तदुतिद्वितयाद्यथा ॥४॥
ब्रह्मकर्मचतुर्थं यत्तद्व्यामानं च पूर्ववत् ।
मर्म तस्य च पक्षस्थाचेक मर्मान्तर्गाद्गतौ ।५॥
ताभ्यामवस्थितेनैव सूत्रेणनत्सलायेन ।
पुनर्मत्स्याद्विनाप यत्कर्म चोर्ध्वे प्रवर्तते ॥६॥
तस्माद्धि ब्रह्मन्तर्गतम् चतुर्थं पक्षकाद्वये ।
मर्म तत्स्थेन सूत्रेण वृत्तार्धं *पूर्ववल्लिखेत् ॥७॥
ब्रह्मकर्माणि षष्ठस्य मत्स्यद्वयसंस्थितस्य च ।
मर्मणोऽन्यद्वयं सूत्र कृत्वा तत्समभागं च ॥८॥
यावद्वृत्तार्धयुग्मं स्यात् शुक्लकोटेस्तु भिलिखेत् ।
एवं सुभ्रुवे दर्शे धिष्ण्यद्वन्द्वाकृतिर्भवेत् ॥९॥

* दृश्यविलिखेत् ॥

तस्य भागसमा कार्या लाञ्छनैर्मेखला बहिः ।
पूर्वोक्तमर्मगैस्सूत्रैर्यथावदवधारय ॥१०॥
द्व्यंशदीर्घेण सूत्रेण नवचन्द्रकलासमम् ।
चतुर्णामन्तरंशानां प्राग्दिक्कुर्याच्च लाञ्छनम् ॥११॥
ईशवह्निपदाभ्यां तु वृत्तात्तुर्यांशसम्मिते ।
द्वे लाञ्छने समे कुर्यादेकभागाधिके ततः ॥१२॥
तत्समे ह्यपरे द्वे वै यत्तदा लाञ्छयलाञ्छने ।
दक्षिणोत्तरभागाभ्यां पश्चात्सूत्रद्वयं क्षिपेत् ॥१३॥
कृत्वा सप्तकमर्मस्थं पूर्वोद्दिष्टक्रमेण तु ।
जीवसूत्रस्य पाश्चात्ये भागे पार्श्वद्वये स्थितम् ॥१४॥
भागद्वये द्वयं लाञ्छ्यं योऽन्यथं चार्धवृत्तवत् ।
तच्छृङ्गकोटिके सूत्रे कृत्वा ते सम्प्रसार्य च ॥१५॥
खातभूभागपर्यन्तं तत्पादाद्वटपत्रवत् ।
जायते सर्वकुण्डानां योनिरेवंविधा शुभा ॥१६॥
भागार्धमानमूलेन योनेरभ्यन्तरे पुनः ।
अर्धवृत्तद्वयं दद्याद्वत्सूलद्वयान्वितम् ॥१७॥
खातस्यान्तर्गतो वर्ज्यश्चतुर्थांशस्तु कोष्ठकात् ।
ओष्ठार्थं निम्ननेच्छेषं तत्समं वा पुरोदितम् ॥१८॥
दैर्घ्यात्पादाधिका कार्या योनिर्वै पृष्ठतोन्नता ।
गजोष्ठसदृशी चाग्रात् स्पृशन्ति दशनच्छदम् ॥१९॥
पुरोभागश्चतुर्थांशं योनेरग्राद्विसृज्य तु ।
दद्यात्प्राक्सूत्रसम्बन्धं सूत्राणां द्वितयं परम् ॥२०॥
अनुपातेन वै ताभ्यामग्रात्सङ्कोचमाचरेत् ।
भागपङ्क्तित्रयेणैव मेखलात्रितयं बहिः ॥२१॥
सम्पाद्य चतुरश्रं तु शङ्ख तत्त्रितयोपरि ।

अथ पञ्चविंशोऽध्यायः ॥

नारद ।

अतः परं प्रवक्ष्यामि कुण्डादीनां च लक्षणम् ।
शृणुध्वमवधानेन चेतसा मुनिपुङ्गवाः ॥१॥
(पुरामण्डलसिद्ध्यर्थं यथाक्षेत्र विभाजितम् ।
तथैव भाजितान् क्षेत्राच्चतुरश्रान्महामते ॥
पूर्वोद्दिष्टानि धिष्ण्यानि यथाकार्याणि तच्छृणु ॥)
पञ्चम ब्रह्मकर्माद्य मर्मप्राग्दिश्यवस्थितम् ।
अंशदैर्घेण तत्स्थेन कुर्यात्सूत्रेण लाञ्छनम् ॥२॥
अर्धचन्द्रसमाकारं भागयुग्मस्य चान्तरे ।
दक्षिणोत्तरभागाभ्यां तदधस्तत्समं तथा ॥३॥
लाञ्छनद्वितय कुर्यात्तिर्यक्तुस्थानसंस्थितम् ।
भागद्वादशकस्यैक्यं स्यात्तद्वृत्तिद्वितयाद्यथा ॥४॥
ब्रह्मकर्मचतुर्थं यत्सद्व्यामान च पूर्वतः ।
मर्म तस्य च पक्षस्थावेक मर्मान्तर्गतौ ॥५॥
ताभ्यामवस्थितेनैव सूत्रेणतत्प्रजायते ।
पुनर्मध्यादिनीय यत्कर्म चोर्ध्वं प्रवर्तते ॥६॥
तस्माद्धि प्रथमन्तर्गमूल चतुर्थं पदकोष्ठये ।
गर्भ तत्स्थेन सूत्रेण वृत्तार्धं *पूर्ववद्विनेत् ॥७॥
ब्रह्मकर्मणि पदस्य प्रत्यग्दिक्समस्थितस्य च ।
मर्मणोप्यथ वै सूत्र कृत्वा तत्समप्रमार्य च ॥८॥
यावत्पूर्वार्धकुम्भस्य शङ्कोटिस्तु संस्थितम् ।
एव पृथगेव दत्तं धिष्ण्यदत्तद्वारार्धमंदत् ॥९॥

* तस्थपतिस्मिन् ॥

तस्य भागसमा कार्या लान्छनैर्मेखला बहिः ।
पूर्वोक्तमर्मगैस्सूत्रैर्यथावदवधारय ॥१०॥
द्व्यङ्गदीर्घेण सूत्रेण नवचन्द्रकलासमम् ।
चतुर्णामन्तरेंऽशानां प्राग्दिक्कुर्याच्च लान्छनम् ॥११॥
ईशवह्निपदाभ्यां तु वृत्ततुर्यांशसंस्थिते ।
द्वे लान्छने समे कुर्यादेकभागादिके सत ॥१२॥
तत्समे ह्यपरे द्वे वै यत्तदा लान्छलान्छने ।
दक्षिणोत्तरभागाभ्यां पश्चाल्लूनद्वयं क्षिपेत् ॥१३॥
कृत्वा सप्तकमर्मस्थ पूर्वोद्दिष्टक्रमेण तु ।
जीवसूत्रस्य पाश्चात्ये भागे पार्श्वद्वये स्थितम् ॥१४॥
भागद्वयं द्वयं लान्छ्य योऽन्यस्य चार्धवृत्तवत् ।
तच्चतुष्कोटिके सूत्रे कृत्वा ते सम्प्रसार्य च ॥१५॥
खातभूभागपर्यन्तं तत्पादाद्धटपल्लवत् ।
जायते सर्वकुण्डानां योनिरेवंविधा शुभा ॥१६॥
भागार्धमानसूत्रेण योनेरभ्यन्तरे पुनः ।
अर्धवृत्तद्वयं दद्याद्धस्तपुलद्वयान्वितम् ॥१७॥
खातस्यान्तर्गतो वर्ज्यश्चतुर्थांशस्तु कोष्ठकात् ।
ओष्ठार्थं निम्ननेच्छेण तत्सम वा पुरोदितम् ॥१८॥
दैर्घ्यात्पादादिका कार्या योनिर्वै पृष्ठतोन्नता ।
गजोष्ठसदृशी चाग्रात् स्पृशन्ति दशनच्छदम् ॥१९॥
पुरोभागचतुर्थांशं योनेराक्रम्य सृज्य तु ।
दद्यात्प्राक्सूत्रसम्बन्ध सूत्राणां द्वितयं परम् ॥२०॥
अनुपातेन वै ताभ्यामग्रात्सङ्कोचमाचरेत् ।
भागपङ्क्तित्रयेणैव मेखलात्रितयं बहिः ॥२१॥
सम्पाद्य चतुरश्र तु ग्रहं तत्रिन्तपेथ ।

आशङ्कानेमिसलग्ना तु प्रोक्तत्र सविस्तृते ॥२२॥
नेमिलग्ना तु शङ्खस्य तन्मध्येऽश्रचतुष्टयम् ।
तच्चक्रचिह्नितं कुर्यात्तल्लक्षणमथोच्यते ॥२३॥
प्रधानर्मनिरुद्धेन चतुर्भागसमेन तु ।
स्नानार्थं आश्रम दद्यात् क्षेत्रस्य महामते ॥२४॥
षड्भिर्भागसमानाभिस्तद्बहिर्द्वयंशविस्तृतम् ।
अन्तर्क्षेत्रं च तस्यापि नेमिर्भागसमा बहिः ॥२५॥
भागेन तद्बहिस्त्वेका चतुरश्रा च मेखला ।
आस्यमध्यादरक्षेत्र वृत्तेनैकेन वै पुनः ॥२६॥
तत्र सूत्राष्टकं दद्याद्दिग्विदिक्संस्थितं पुरा ।
तस्य चान्तर्गतं पश्चादष्टकं पातयेत्परम् ॥२७॥
तत्स्नेहा समापाद्यमरत्नसमलक्षणं ।
अन्तर्वृत्तं निरुद्धेन प्रतिसूत्रस्य पक्षयोः ॥२८॥
सूत्रेण लाञ्छनं कुर्यान्नाभिनेमिभ्रमावधेः ।
एकांशादर्धमानं च नेमिवृत्तस्य चान्तरे ॥२९॥
द्वाभ्यां द्वाभ्यामराभ्यां तु मध्ये कुर्यात्प्रधिं प्रधिम् ।
विस्तारप्रोन्नता नाभिः कूर्मपृष्ठोपमाकर ॥३०॥
नेमिर्दर्पणवत्कार्या रवीपनिभावसाना ।
शिष्टं पुरोदितं सर्वमथ पद्माकृतिं शृणु ॥३१॥
भागार्धं भ्रामयेन्नाभेर्बहिः केसरसिद्धये ।
भ्रामयेदपरं चार्धमक्षेत्रस्य साधने ॥३२॥
नीत्वा गोपमनैनत्र विधिना नेमिमण्डलम् ।
वग्मुत्रभ्रम कुर्वीत पद्मदलाष्टकम् ॥३३॥
केसराभ्रमरुद्धेन सूत्रेणार्धेन्दुलक्षणम् ।
तन्मध्यास्थितेन पत्राग्राणि तु ॥३४॥

सूत्रद्वयेन पत्राग्रं कुर्याद्वाह्यभ्रमावने ।
निरन्तराणामामूलात्केसराणां महामते ॥३५॥
कर्णिकोच्छ्रायतुल्यानां विभागं जनयेत् स्फुटम् ।
शङ्खकोणचतुष्के तु शेषं पूर्ववदाचरेत् ॥३६॥
योनिरेकेन भागेन चतुर्भिर्मेखलागणम् ।
खातं पूर्वसमं किं तु वृत्ते वृत्तास्तु मेखला ॥३७॥
चतुरश्रे तदाकारा इत्युक्तं कुण्डपञ्चकम् ।
बाल्नाहुतिसङ्ख्या च होमद्रव्यप्रमूलताम् ॥३८॥
ज्ञात्वैवमेकहस्तात्तु कुर्यादष्टकरावधि ।
ततस्स्रुवस्रुचयोरत्र लक्षणं प्रोच्यते द्विजाः ॥३९॥
स्वनाहुदण्डमानेन मन्त्रज्ञः कल्पयेत्पुरा ।
दैवीखङ्गिद्वये काष्ठविस्ताराच्च षडङ्गुलम् ॥ ४० ॥
दैर्घ्याद्भागद्वयेनाथ दण्डमष्टाश्रमुच्यते ।
सार्धद्व्यङ्गुलमानं तु कृत्वा शेषं तु शोधयेत् ॥ ४१ ॥
अमलं दण्डमूले तु कुर्यात्सद्यानन शुभम् ।
कर्णिकास्थो यथा दण्डो भवेद्वै मुनिसत्तम ॥४२॥
त्रिवलिं त्वथ वा शङ्खं यथादण्डस्तदाग्रग ।
कृत्वाग्रस्थं द्विधा भागं समांशेन प्रयत्नतः ॥४३॥
द्व्यङ्गुलं चाथ भागस्य नैपुण्यं चाग्रतः क्रमात् ।
दण्डाग्रस्थस्य भागस्य त्र्यङ्गुलं परितस्समम् ॥४४॥
दत्वा भ्रमं ततः कुर्यान्निम्नं खातं सुलक्षणम् ।
तन्मध्ये पङ्कजं कुर्यात्स्फुटं चोर्ध्वपत्रकम् ॥४५॥
आज्यकोशं तु तं विद्धि सप्तपत्रपलोपमम् ।
पद्मं यं निम्नगा च कर्णिका वै सकेसरा ॥४६॥
द्वादशारं बहिश्चैव पत्रन्यासाष्टकं च ।

पद्माद्ये तु कर्तव्य शङ्ख कोणचतुष्टये ॥४७॥
ततोऽग्रभागम्य मुने पार्श्वयोरुभयोरपि ।
एकैकमङ्गळ शोध्य सविभज्य त्रिधा तत ॥४८॥
कर्णमेकेन भागेन मध्ये त्वाम्यो द्वयेन तु ।
विच्छिन्न वकूश्रमसाभ्या मध्यमेकाङ्गुळेन तु ॥४९॥
विम्तार कर्णतुल्य तु वर्जयित्वा तत पुरा ।
कर्णद्वारसमारभ्य शेष तु परिशोधयेत् ॥५०॥
क्रमागतेन सूत्रेण स्याद्वाराहाननं यथा ।
तत पुष्करपर्णान्तु मुखाग्र यावदेव हि ॥५१॥
कुर्याद्राज्यप्रणाळ तु समन्यूनाङ्गुळे मुने ।
ईषद्वै क्रमसूक्ष्म च नाज्य याति यथाद्रुतम् ॥५२॥
हस्तमात्र तत कुर्यात्स्रुव विप्र मनोरमम् ।
विम्तार द्व्यङ्गुळ कार्य वैपुल्याच तदर्धत ॥५३॥
विम्तारमानादग्रे स्याद्वृत्त कुर्यात् द्विरङ्गुळम् ।
क्रम.च निम्नरवात च गोळकेनैव मुष्टिमत् ॥५४॥
मध्ये मृगपदाकाराविहेन तु विराजितम् ।
विस्तारस्य त्रिभागेन ग्रीवा साग्रा त्रिरङ्गुळा ॥५५॥
मूले चोभयत कुर्यात्स्वास्तिक द्व्यङ्गुळायतम् ।
विचित्ररचनायुक्तदण्ड श्लक्ष्ण तु वा भवेत् ॥५६॥
स्रुवमेवविध कुर्याद्धोमकर्मणि साधक ।
ततस्तु प्रापणादीना साधन शृणुत द्विजा ॥५७॥
शालिमुद्गयवा माषा गोधूमाश्च प्रियङ्गव ।
तिलास्सप्त त्विमे ग्राह्या ग्राम्या वै चरुकर्मणि ॥५८॥
वेणुस्यामाकनीवारा जर्तिलाश्च गवीधुकाः ।
[illegible] ॥५९॥

शालयस्तेषु मुख्यास्स्युस्तदन्यास्तदभावत ।
रक्तशाल्यो महाशाल्य कळमा गन्धशालय ॥६०॥
श्वेतशाल्यस्सशूकाश्च हेमाभा गर्भशालय ।
सुकुमाराश्च सूक्ष्माश्च दशैते शालय स्मृता ॥६१॥
अन्तर्भेदाश्च बहवस्सन्त मुद्गा उदाहृता ।
मुद्गा कृष्णाश्च हैमाश्च श्वेता पीता महत्तरा ॥६२॥
अञ्जनाभाश्च सप्तैते अन्तर्भेदा उदाहृता ।
श्वेता कृष्णाश्च पीताश्च वन्याश्चैव महातिला ॥६३॥
तिलाना पञ्च भेदास्तु ग्राह्यास्तु परिकीर्तिता ।
उपाहृतानि केदाराद्देशीयाच्च कृषीवलै ॥६४॥
शालिमुद्गादिभेदानि कर्मण्यान्यर्चने हरे ।
अवपातादिभिर्दोषैरष्टाभिर्वर्जितानि च ॥६५॥
आनयेदवघातार्थमवघातगृहे पुरा ।
गोमयेन समालिप्ते सुधाद्यै परिमण्डिते ॥६६॥
शोधिते शतधारेण पवित्रेण कुशाम्बुभि ।
स्थले प्रवणमुखार्थ प्राङ्मुखो वाप्युदङ्मुख ॥६७॥
दीक्षितैर्नियतैर्विप्रैर्धृतचक्रादिलक्षणै ।
सुधातैर्लोहदार्वश्ममृन्मयानि समन्तत ॥६८॥
स्थापयित्वोलूखलानि क्षालिते खादिरैर्दृढै ।
मुसलैरवहन्यात्ते द्वादशाक्षरविद्यया ॥६९॥
निस्तुषान्निष्कणान् कृत्वा तण्डुलान् शूर्पकोटरै ।
तैस्तावदवहन्तव्या यावन्मुक्ताफलप्रभा ॥७०॥
अखण्डिताश्चानघाश्च कृष्णबिन्दुविवर्जिता ।
मुद्गभेदास्तथा कार्यास्सारवन्तश्च निस्तुषा ॥७१॥
साध्वीभिर्ब्राह्मणीभिर्वा दीक्षितानामभावत ।
शूद्रैर्वा दीक्षितैर्देवदासीभिर्हरिसद्मनि ॥७२॥

इत्येवं पाकादिकर्मार्थं कार्यावहननक्रिया ।
वैष्णवानां गृहे शुद्धे दीक्षितानां गृहेऽपि वा ॥७३॥
तण्डुलांस्तु प्रगृह्णीयाद्विधिक्षुण्णांस्तु देशिकः ।
अकणानतुषांश्चैव क्रिमिहीनानपि क्रमात् ॥७४॥
केशपाषाणहीनांस्तु प्राण्यङ्गरहितांस्तथा ।
भस्माङ्गारविहीनांस्तु अभग्नानलघूनपि ॥७५॥
कणैस्तु भवति व्याधिस्तुषैर्दारिद्र्यकं भवेत् ।
क्रिमिभिः पुत्रनाशः स्यात्केशैर्दारविनाशनम् ॥७६॥
पाषाणैर्मरणं विद्धि अशन्या वह्निना जलैः ।
प्राण्यङ्गैर्व्याधयः प्रोक्ता भस्मना कलहो ध्रुवम् ॥७७॥
अङ्गारैर्वह्निना बाधो भग्नैर्भङ्गस्तु विग्रहे ।
प्रवासो लघुभिश्चैव तस्मात्तान्परिवर्जयेत् ॥७८॥
सम्भारानखिलानेव प्राक्सङ्कल्पितसम्मतान् ।
सम्भृत्य देशिकस्स्वार्थं साधकैः पाचकैरपि ॥७९॥
अवघातगृहं प्राप्य तत्रस्थं तण्डुलादिकम् ।
"ब्रह्मशुक्र मिवे" त्युक्त्वा नेत्रेणैवावलोकयेत् ॥८०॥
प्राग्वत्संशोधयेत्तानि दहनाप्यायनादिभिः ।
*वैदलादिष्वशुद्धेषु पात्रेषु विततेष्वपि ॥८१॥
पचनार्थं समुद्धृत्य तत्सर्वं तण्डुलादिकम् ।
तत्पात्रसमुद्धारे निपुणैः परिचारकैः ॥ ८२ ॥
सुस्नातैश्च सुवेषैश्च वस्त्रेणाच्छादिताऽऽननैः ।
आनयेत्पचनागारं शङ्खतूर्यादिमङ्गलैः ॥ ८३ ॥
द्वारस्योत्तरपार्श्वे तु गोमयेनोपलेपिते ।
प्रदेशे निक्षिपेत्तानि भाजनानि यथाक्रमम् ॥ ८४ ॥

---

* वैदलादिषु शुद्धेषु ॥

गुळोपदंशपूर्वाणि लवणादिरसानि च ।
विन्यसेत् द्वारदिग्भागे दधिक्षीरघृतानि च ॥८५॥
निदध्यान्नैर्ऋते भागे होमोपकरणान्यपि ।
चतुर्भिर्व्यापकैर्मन्त्रैर्वस्त्रपूतेन वारिणा ॥८६॥
क्षाळयित्वा चतुर्था वै यथा स्यात्तण्डुलादिषु ।
शिलाशकलनिर्मुक्तं निस्तुषं निष्कणं यथा ॥८७॥
अपक्वव्रीहिविहिततण्डुलेनैव साधितम् ।
अन्यदुग्धाज्यसंसिक्तं गुडखण्डफलान्वितम् ॥८८॥
अक्षारलवणोपेतं देवानां हविरुच्यते ।
तदेव परमान्नं स्यात् क्षीराज्यगुळपाचितम् ॥८९॥
घृतसिक्तं तु सिद्धान्नमभावे हविरुच्यते ।
अक्षारलवणं सिद्धं गुळक्षीरफलान्वितम् ॥९०॥
शान्तये व्रतयज्ञे च संसाध्य हविरुत्तमम् ।
पायसान्नं गुडान्नं च मुद्गान्नं केवलोदनम् ॥९१॥
दध्यन्नं च तिळान्नं च निशान्नं सर्वमिश्रितम् ।
इत्यष्टधा समुद्दिष्टं हविर्देवस्य सम्मतम् ॥९२॥
प्रारभेत हविः पाकं वक्ष्यमाणेन वर्त्मना ।
आहृत्योदनपाकाग्निं कुण्डादौपासनानलात् ॥९३॥
चुल्ल्यां निधाय तारेण " सप्ततेऽग्न" इतीरयन् ।
इन्धनानि विनिक्षिप्य यज्ञदारुमयानि च ॥९४॥
निर्गिरीशादिहीनानि " ज्योतीरात्रीति " मन्त्रतः ।
प्रज्वाल्य व्यजनेनैव ततः स्थालीश्च ताम्रजाः ॥९५॥
प्रक्षाळ्य त्रिस्त्रिणीतोये केवलैर्मृन्मयास्ततः ।
प्रक्षाळ्य द्वादशार्णेन वीर्यमन्त्रेण मन्त्रवित् ॥९६॥
घृतेन लापयेत्तासामन्तः व्यूहविद्यया ।
तण्डुलान्प्रक्षिपेत्तासु गायत्र्या विष्णुपूर्वया ॥९७॥

' अम्भस्यपार '' इति च मन्त्रेण सहृदा पुनः ।
जलेन पूरयेदूर्ध्वं तण्डुलान्प्रतिपात्रकान् ॥९८॥
तण्डुलाधिकमानस्य षट्प्रस्थमुदकं भवेत् ।
कर्मारम्भेण तास्स्थालीश्चुल्ल्यामारोपयेत्ततः ॥९९॥
चक्रमन्त्रेणापिधानैस्तास्समाछाद्य यथाक्रमम् ।
पाककाले समुद्धार्य वीर्यमन्त्रेण तद् नेमिम् ॥१००॥
निरीक्ष्य नेत्रमन्त्रेण दर्व्यामूलं समुद्धरन् ।
चतुर्धावर्तयेच्चैव चक्रेणाच्छादयेत्पुनः ॥१०१॥
पक्के जलमपि साध्य द्वादशार्णं समुच्चरन् ।
विद्राविते गव्येन हविषा चाभिघार्य च ॥१०२॥
शुचौ सत्कृतयतेत्यादिमन्त्रेणाधारपृष्ठतः ।
शोधिते भूतले नाथ व्रीहिभिर्वा प्रसारिते ॥१०३॥
एवं हवींषि सिद्धानि पाणिभ्यामवरोप्य च ।
अस्त्राभिमन्त्रितेनैव बहिः प्रक्षाल्य वारिणा ॥१०४॥
तन्मन्त्रितेन शुद्धेन वस्त्रेणावर्तयेत्ततः ।
भस्मना मथितेनाद्भिर्वासुदेवादिवाचकैः ॥१०५॥
तर्जन्याद्यङ्गुलीभिश्च कुर्याद्दिक्षूर्ध्वपुण्ड्रकम् ।
समाच्छाद्य नियानैश्च वसनैः क्षालितैस्ततः ॥१०६॥
इत्युक्तं साधनं सम्यक् शुद्धान्नस्य विशेषतः ।
अन्येषां साधनं वक्ष्ये परमान्नपुरस्सरम् ॥१०७॥
तण्डुलस्य तु तुर्यांशं पायसे मुद्गसारकम् ।
तन्मानं घृतमुद्दिष्टं तच्चतुर्गुणितं पयः ॥१०८॥
नालिकेरोद्भवं चापि तत्समं कथितं पयः ।
षड्गुणं तण्डुलाच्च खण्डचूर्णसमन्वितम् ॥१०९॥
मार्यण्डुक्रमर्गेण समन्तं कदलीफले ।
इमद्युमितादिप्यस्य गोक्षीरस्य निषेचनम् ॥११०॥

" अम्भस्यपार " इति च मन्त्रेण सहृदा पुनः ।
जलेन पूरयेदूर्ध्वे तण्डुलान्प्रतिपात्रकान् ॥९८॥
तण्डुलाधिकमानस्य षड्मस्थमुदकं भवेत् ।
कर्मारम्भेण तास्स्थालाश्चुल्ल्यामारोपयेत्ततः ॥९९॥
चक्रमन्त्रेणापिधानैस्तास्तमच्छाद्य यथाक्रमम् ।
पाककाले समुद्घाट्य वीर्यमन्त्रेण तद्ध्वनिम् ॥१००॥
निरीक्ष्य नेत्रमन्त्रेण दर्व्यामूल समुद्धरन् ।
चतुर्धावर्तयेच्चैव चक्रेणाच्छादयेत्पुनः ॥१०१॥
पक्वे जठमरि साध्य द्वादशार्णं समुच्चरन् ।
विद्याविंतेन गव्येन हविषा चाभिवार्य च ॥१०२॥
शुचौ सत्कृतयतेत्यादिमन्त्रेणाधारपूर्वत ।
शोधिते भूतले नाथ व्रीहिभिर्वा प्रसार्य तु ॥१०३॥
एव हवींषि सिद्धानि पाणिभ्यामवरोप्य च ।
अस्त्राभिमन्त्रितेनैव बहि प्रक्षाल्य वारिणा ॥१०४॥
तन्मन्त्रितेन शुद्धेन वस्त्रेणावर्तयेत्तत ।
भस्मना मथितेनाग्निर्वासुदेवादिवाचकैः ॥१०५॥
तर्जन्याद्यङ्गुलीभिश्च कुर्याद्दिक्षूर्ध्वपुण्ड्रकम ।
समाच्छाद्य पिधानैश्च वसनैः क्षालितैस्तत ॥१०६॥
इत्युक्तं साधनं सम्यक् शुद्धान्नस्य विशेषत ।
अन्येषा साधन वक्ष्ये परमान्नपुरस्सरम ॥१०७॥
तण्डुलस्य तु तुर्यांशं पायसे मुद्गसारकम् ।
तन्मानं घृतमुद्दिष्ट तच्चतुर्गुणितं पय. ॥१०८॥
नाळिकेरोद्भव चापि तत्सम कथित पयः ।
चतुर्गुणं तण्डुलाच्च खण्डचूर्णसमन्वितम् ॥१०९॥
साधयेदुक्तमार्गेण समन्त्र कमलेक्षणे ।
हृमदधुनिवेदितस्यास्य गोक्षीरस्य निषेचनम् ॥११०॥

तदभावे नियोक्तव्यं नालिकेरोद्भवं पयः।
अव्जागोजेति तत्क्षेपः स्याद्धव्यप्रतिभोजने ॥१११॥
गुळान्नयाचने क्षीरमपहायेक्षवं रसम् ।
कथितं गुळखण्डं वा क्षीरमानानुसारतः ॥११२॥
क्षीरमक्षेपमन्त्रेण गुळादीनि नियोजयेत् ।
मुद्गान्ने तण्डुलं सम्यङ्मुद्गसारं नियोजयेत् ॥११३॥
शुद्धान्ने तु पुरा प्रोक्त विशेषेण घृताप्लुतम् ।
दध्योदनं दधिक्षेपं क्षीरार्थपरिसम्मितम् ॥११४॥
कदळीपनसाम्रादिगुळखण्डसमन्वितम् ।
खण्डचूर्णसमोपेतं कृसरान्ने तु मुद्गकम् ॥११५॥
आढकस्य हरिद्रान्ने निशापिष्टं फलं भवेत् ।
मुद्गसारसमोपेतं शुद्धखण्डादिसंयुतं ॥११६॥
मिश्रान्ने योजयेत्किञ्चित् क्षीराज्यघृतसंप्लुतम् ।
शान्त्यर्थे पयसा मिश्रं पुष्ट्यर्थे गुळमिश्रितम् ॥११७॥
वश्यार्थे मुद्गसोरोत्थमाकृष्टौ दधिमिश्रितम् ।
कृसरान्नं तु प्रीत्यर्थे मारणोच्चाटनेऽपि च ॥११८॥
स्तम्भने च हरिद्रान्नं मिश्रान्नं मोहनं भवेत् ।
साधारणं तु शुद्धान्नं यात्रासु मृगयादिके ॥११९॥
विशेषेण तु दध्यन्नं हेमराजतपात्रगम् ।
मरीचिशुण्ठिलिकुचतिन्त्रिणीरसमिश्रितम् ॥१२०॥
जीर्णेन जीरकेणैव संस्कुर्याद्व्यञ्जनवस्तुभिः ।
रनभेदसमुत्थानि पनमन्नितयोद्भवम् ॥१२१॥
चूतदेशसमुत्थानि नातिपक्वानि कान्ततः ।
बृहत्युर्वारुनार्तास्कूष्माण्डप्रभवानि च ॥१२२॥
कारवल्लीलतोत्थानि कार्कोटप्रभवानि च ।
पटोलद्वितयोत्थानि कोशातकयुक्तानि च ॥१२३॥

अलावुकर्करीनिम्बमदोरथ तिन्त्रिणीफलम् ।
क्षुद्रकन्दसमेतं च वल्लीकन्दद्वयं तथा ॥१२४॥
सूरणद्वयकन्दं च तथा पिण्डारकद्वयम्
पद्मोत्पलसमुत्थं च हविर्योग्यं विशेषतः ॥१२५॥
उच्छिष्टं निमिदुष्टं च शिवार्थदेशितं तथा ।
घृतं लालानलस्पृष्टममेध्यस्थलसम्भवम् ॥१२६॥
पादस्पृष्टमरालोत्थमाहृतं चाशुचिस्थले
भुक्तशेषं तथाऽस्पृश्यस्पृष्टं दशान्नदोषकम् ॥१२७॥
परीक्ष्य बहुधा मन्त्री वर्जयेच्छाककर्मणि ।
जीवन्तीं वास्तुकं शाकं कारवल्लीदलं तथा ॥१२८॥
तुम्बीदलं च पिण्डीं च चुच्चुमुद्गदलानि च ।
शाकिनीं शतपर्णीं तथैव श्वासमर्दितम् ॥१२९॥
आगम्य पाचयेच्छाकं विहितं ब्राह्मणस्य च ।
शाकमूलानि चान्यानि गृह्णीयादनिषेधने ॥१३०॥
छेदयित्वा लवित्रेण वीर्यमन्त्रं समुच्चरन् ।
निरीक्ष्य क्रिमिकीटादीन् प्रक्षाल्य बहुधा जलैः ॥१३१॥
प्रावन् स्थालीषु निक्षिप्य प्रत्येकं वाऽथ मिश्रितम् ।
सैन्धवैस्समरीचैश्च सर्षपैर्जीरकैरपि ॥१३२॥
क्षीरणिदलसम्मिश्रैः पयोभिर्नारिकेलजैः ।
तक्रैरपि सद्घृतैर्मधुभिर्घृतमिश्रितैः ॥१३३॥
मसूरमाषनिष्पावमुद्गमदसमन्वितम् ।
सयूषान्मुद्गभेदादानयूषान्लवणादाम ॥१३४॥
रसभेदैस्समवाप्य साधयेत्तदनन्तरम् ।
त्वचो व्यपाद्य मुद्गैर्लवैस्सारे क्षीरेण पाचिते ॥१३५॥
मरीचजीरलवणाद्यैर्युतैश्च मर्दितं ।
दध्यादिमिश्रं सम्पूर्य द्गुलात् सरस यथा ॥१३६॥

स्थालीशरावपूर्णेषु पाचितानि पुरैव तु ।
कदलीपनसादीनि नाळिकेरफलानि च ॥१३७॥
कूश्माण्डबृहतीपूगकारवल्लीफलानि च ।
क्षुद्रकन्दसमेतानि वल्लीपिण्डारकानि च ॥१३८॥
अम्बरीषादिपात्रेषु विततेषु समन्ततः ।
घृतलिप्तेषु तप्तेषु समारोप्य यथार्थं च ॥१३९॥
चूर्णीभूतैर्मरीचैश्च जीरकेण घृतेन च ।
प्रतापितानि स्निग्धानि दर्व्याऽऽलोड्य पुनः पुनः ॥१४०॥
स्थापनीयानि भाण्डेषु छादितान्यम्बरादिभिः ।
आम्रादीनि च शुष्काणि अशुष्काणि फलानि च ॥१४१॥
तिन्त्रिणीगुळमिश्राणि मरीचैर्जीरकैरपि ।
नाळिकेरोत्थपयसा सर्षपैः पोषितैरपि ॥१४२॥
स्थापयेदाम्रसारोत्थ लवणेन समन्वितम् ।
शृङ्गिबेरं च लिकुचं दळितं हरितं च वा ॥१४३॥
वासितं लवणोपेतं लिकुचोत्थरसेन तु ।
कदळीपनसाम्राणां केवलानि फलानि च ॥१४४॥
गोधूमशालिजैः पिष्टैर्गुळपाकेन लोळितैः ।
पाचितैर्मुद्गसारैश्च शर्कराभिर्विशेषजैः ॥१४५॥
जीरकैस्समरीचैश्च घृतेऽपूपानि पाचयेत् ।
सुवृत्तान्याम्रतुल्यानि धात्रीफलसमानि च ॥१४६॥
न्यग्रोधफलतुल्यानि लिकुचाद्याकृतीनि च ।
अन्तर्निक्षिप्तमुद्गानि रसवन्ति समन्ततः ॥१४७॥
गुळपिष्टेन बद्धानि नाळिकेराहृतानि च ।
नानाभेदसमुत्थानि घृतेऽपूपानि साधयेत् ॥१४८॥
शालिव्रीहिसमुत्थांश्च स्थालीः स्फुटितानि च ।
पृथूनि वर्धितानि गुळपाकान्वितानि च ॥१४९॥

चूर्णितैश्च मरीचैश्च जीरकैः खण्डितैरपि ।
नाळिकेरफलैश्शुष्कैः पृथुकानि च साधयेत् ॥१५०॥
भर्जितैश्शालिपिष्टैश्च मिश्रितैर्जीरकादिना ।
लोलितैर्गुळशाकेन पिण्डीभूतैः पृथक्पृथक् ॥१५१॥
सक्तु स्यात्साधित तद्वत्तिलै पिण्ड सुभर्जितै. ।
तिलपिण्डइति ख्याास्सदा देवस्य सम्मत ॥१५२॥
सुशृत च घनीभूत खण्डचूर्णसमन्वितम् ।
क्षीर च मधुसर्पिभ्यां सयुत सुघन दधि ॥१५३॥
तरुणैरनकलीभूतैर्यारुसहकारयो. ।
रूक्षसर्षपसम्मिश्र समरीच तथा दधि ॥१५४॥
पृथक्पात्रगतं शुद्धं गाळित माक्षिकं मधु ।
द्राक्षापनसरम्भाम्रसमुत्थैर्मर्दितैरसै. ॥१५५॥
लोळित गुळखण्डेन जीरिकादिसमन्वितम् ।
रसालमेतद्विज्ञेय दधिमिश्र तु पानकम् ॥१५६॥
केवलं दधिसम्मिश्र वारिणा तत्समेन तु ।
मथित समरीच च लवणैश्चाधिवासितम् ॥१५७॥
खण्डचूर्णसमोपेन पानक श्रमशान्तिकृत् ।
अन्नानामपि सम्कारे पुरा मन्त्रा प्रकीर्तिता ॥१५८॥
तदन्येषा तु सम्कारो द्वादशार्णेन वा हृदा ।
साङ्गेन मूलमन्त्रेण सर्वं ससाधयीत वा ॥१५९॥
विष्णुगायत्रिया वाथ पद्मोपनिषदाऽथ वा ।
समाच्य परमत्वाद्यमुपद्मान्वित क्रमात् ॥१६०॥
फलनादिषु सम्याच्य चोर्ध्वपुण्ड्राद्यलङ्कृतम् ।
महानसद्वारभूनगाम्यद्वारपश्चिमम् ॥१६१॥
गोमयेनानुलिप्तेन सुधानूर्णेन शोभिना ।
पञ्चमन्त्रसताम्रारिभागपुरस्सरम् ॥१६२॥

शङ्खतूर्यादिघोषेण तथा मङ्गलगीतिभिः ।
प्रदीपच्छत्रयुक्तैश्च हविःपात्रनतत्परैः ॥१६३॥
वेत्रपाणिभिरन्यैश्च नास्तिकोत्सारणोद्यतैः ।
स्नाताश्शुक्लाम्बरा दक्षाः कृतपादा वने जनाः ॥१६४॥
स्वाचान्ताः कुशहस्ताश्च सूदा वा चन्दनादिना ।
धृतोर्ध्वपुण्ड्रा नियता मनोवाक्कायकर्मभिः ॥१६५॥
सितकञ्चुकधर्तारस्स्थगिताननसासिकाः ।
बलमन्त्रेण भाण्डानि वहेयुः परिचारकाः ॥१६६॥
मूलालयप्रदेशस्थे मण्टपे विततेऽथ वा ।
प्रथमावरणे धाम्नो दक्षिणे मालिकावनौ ॥१६७॥
सुगुप्ते सुवितानाढ्ये दीपमालाद्यलङ्कृते ।
प्रदेशे वस्त्रसञ्छन्ने स्थाप्यानि फलकादिके ॥१६८॥
हविःप्रमाणतुल्याश्च हेमराजतताम्रजाः ।
स्थालिकाश्च यथालिप्ताः प्रक्षाल्यास्त्रेण वारिणा ॥१६९॥
पाणिना दक्षिणेनैव परामृश्याथ तेन च ।
तारेण तासु निक्षिप्याधाराज्यस्य समन्ततः ॥१७०॥
स्थालीभ्यस्समुपाहृत्य दर्व्या हेमादिकॢप्तया ।
तदूर्ध्वे निक्षिपेन्मौली पायसादीन्यनुक्रमात् ॥१७१॥
घृतेनाप्लाव्य मधुरव्यञ्जनानि समन्ततः ।
दधिक्षीरादिपूर्णानि चषकाण्यग्रतो न्यसेत् ॥१७२॥
सिद्धान्यपूपभेदानि पृथुकादीनि यान्यपि ।
पानकानि विचित्राणि पृथक्पात्रगतानि च ॥१७३॥
कर्पूरचन्दनक्षोदप्रसूनैश्चाधिवासितम् ।
शीतलं वस्त्रसञ्छन्नं पानीयं करकादिषु ॥१७४॥
एलालवङ्गतक्कोलजातीपूगफलान्वितम् ।

कर्पूरतैलसम्मिश्रं खण्डितं च क्षुरादिभिः ॥१७५॥
नागवल्लीदलोपेतं सचूर्णं चेन्द्रसंयुतम् ।
ताम्बूलं च प्रतिष्ठाप्य पात्रेष्वब्जाकृतीषु च ॥१७६॥
चन्दनादीनि गन्धानि तथा नानाविधास्स्रजः ।
स्थापयित्वा यथास्थानमाराधकमुखेन तु ॥१७७॥
विज्ञापयेयुर्देवस्य तत्तत्कर्माधिकारिणः ।
भोज्यासनाधिरूढस्य देवस्याराधकस्स्वयम् ॥१७८॥
अभ्यार्घ्य प्राग्वदभ्यर्च्य साध्यबीजावसानकैः ।
द्वारस्याभ्यन्तरगते देवस्य पुरतः स्थले ॥१७९॥
शोधिते चास्त्रतोयेन चन्दनाद्यैश्च मण्डिते ।
मण्डले तु परिस्तीर्य तण्डुलानि यथारुचि ॥१८०॥
क्षालितं वस्त्रखण्डं तु तदूर्ध्वे सम्प्रमार्य च ।
अन्नाधारं प्रतिष्ठाप्य तदूर्ध्वे लोहनिर्मितम् ॥१८१॥
ऊर्ध्वगो वसनार्थं तदूर्ध्वे स्रोतसप्लुते ।
विन्यसेत्परमान्नं विशालाण्येकैकशः क्रमात् ॥१८२॥
तर्पणं तु प्रतिष्ठाप्य हस्तप्रक्षाळनाम्भसा ।
कुर्यादृक्षकरे दैवे प्रागुपस्तरणार्हणम् ॥१८३॥
ततो देवादिमूर्तीनां हवींषि विनिवेशयेत् ।
प्रथमं पायसं पश्चात् गुळान्नं मुद्गमेदितम् ॥१८४॥
शुद्धान्नं तिलसम्मिश्रं निशान्नं दधिमिश्रितम् ।
मिश्रान्नं च क्रमाद्द्याद‍पूपानि तदन्तिमे ॥१८५॥
पृथुकानि च सक्तूनि तिलपिण्डान्वितानि च ।
कदळीपनसादीनि फलानि विविधानि च ॥१८६॥
रसभेदसमेतानि पानकानि च तर्पणम् ।
नाळिकेररसं चैव हस्तप्रक्षाळनं तत ॥१८७॥

उपस्पर्शं च ताम्बूलं दत्वा प्रागुक्तमाचरेत्।
राजभिर्हविषो नित्यं प्राचुर्ये कल्पिते सति ॥१८८॥

आधारेषु प्रतिष्ठाप्य वितते गर्भमन्दिरे।
निवेद्यानि यथायोग मन्यथा सङ्कटे भुवि ॥१८९॥

तदेकस्मिन् दृढाधारे वस्त्रच्छन्ने यथाक्रमम्।
निधाय विनिवेद्याथ तथा तमपनीय च ॥१९०॥

मोक्षिते चाऽस्त्रमन्त्रेण निक्षेप्यं हविरन्तरम्।
निवेदयेद्यथापूर्वं विशेषोऽत्र समीरितः ॥१९१॥

मन्त्रक्रियाविहीनं च गन्धदुष्टं विवर्णकम्।
अतिपक्वमपक्वं च विस्रावितजलं तथा ॥१९२॥

अदीक्षितैश्च पतितैरीक्षितं प्रतिलोमजैः।
अत्युष्णमतिशीतं च प्रमाणरहितं तथा ॥१९३॥

समुद्धृतं च निश्शेषं मुखवातादिदूषितम्।
व्यञ्जनादिविहीनं चाप्यपात्रस्थमगोपितम् ॥१९४॥

अन्तस्तण्डुलसंयुक्तं भिन्नभाण्डगतं तथा।
अनाधारं परस्पृष्टं श्वसितापहतं तथा ॥१९५॥

अङ्गारतुषसंयुक्तं केशपाषाणसंयुतम्।
क्रिमिलोष्टादिभिर्जुष्टं प्राण्यङ्गादिसमन्वितम् ॥१९६॥

अपूर्णपाकमाधाररहितं व्यञ्जनोज्झितम्।
गव्याज्यदधिनिर्मुक्तं कांक्षितं चेतरैर्जनैः ॥१९७॥

अपिधानविनिर्मुक्तं देवतान्तरसम्मितम्।
एवं दुष्टं हविर्बुध्वा प्रक्षिपेज्जलमध्यतः ॥१९८॥

मोहात्पक्तं हविर्विष्णोर्यदि दद्यादवर्चनम्।
निरर्थकं स्यात्कर्तॄणां विनाशं च भवेद्ध्रुवम् ॥१९९॥

तस्मात्तदैव मूलस्य सहस्रं जपमाचरेत् ।
ततस्तत्राश्रयाणां च स्थापितानां विधानतः ॥२००॥
विभवव्यूहमूर्तीनां मण्टपे गोपुरादिषु ।
स्थापितानां च मूर्तीनां प्रादुर्भावात्मनामपि ॥२०१॥
पूजितानां यथान्यायं सत्यादीनां खगात्मनाम् ।
कुमुदादिगणेशानां द्वारस्थानामपि सद्मनि ॥२०२॥
प्रतिष्ठितानां भक्तानां प्रागुक्तानां विधानतः ।
तत्तन्मन्त्रेण विधिवत् सिद्धानि च पृथक्पृथक् ॥२०३॥
हवींषि पायसादीनि क्रमेण विनिवेशयेत् ।
गारुडेनैव मन्त्रेण चरुयं साधयेद्धवि ॥२०४॥
अन्येषां प्रणवेनैव सिद्धमन्नं निवेदयेत् ।
अग्निकार्यहविस्साध्यं यथामूलालयाकृते ॥२०५॥
सर्वाण्यपूपभेदानि नाग्निकार्ये हितानि वै ।
अन्यानि पायसादीनि नित्ये नैमित्तिकादिषु ॥२०६॥
होतव्यानि विशेषेण फलानि विविधानि च ।
भूतानां बलिदानेषु पायसादीनि नित्यशः ॥२०७॥
अपूपानि न सहूनि पृथुकानि फलानि च ।
तिलपिण्डसमेतानि मिश्रितान्यथ वा पृथक् ॥२०८॥
दातव्यानि यथान्यायं तेषां तृप्तिकरं यतः ।
तेन क्रूरादिभिर्ब्रह्मन्नुत्सवादिषु कर्मसु ॥२०९॥
ततस्तत्रोक्तविधिना बलिद्रव्याण्युपाहरेत् ।
तत्रापि सर्वभूतानां सोदकं केवलोदनम् ॥२१०॥

तण्डुलं पयोदकेनैव दातव्यं मन्त्रवित्तमैः ।
इति सम्यक्समाख्यातं हविषा साधनादिकम् ॥२११॥
इत्येवं मुनिशार्दूला भवद्भिर्यद्यदर्थितम् ।
तत्सर्वं विस्तरेणैव यथावत्प्रकटीकृतम् ॥२१२॥
सर्वोत्तमा संहितैषा सात्वतार्थप्रकाशिका ।
नाख्येया दुष्टबुद्धीनामभक्तानां जनार्दने ॥२१३॥
गर्वात्सच्छास्त्रसद्वस्तुनिन्दकाना विशेषतः ।
शास्त्रापकर्तॄणामन्यदर्शने भावितात्मनाम् ॥२१४॥
देवसंसक्तबुद्धीनां स्वधर्मनिरतात्मनाम् ।
संसारभयभीरूणां प्रपन्नानां महात्मनाम् ॥२१५॥
समाख्येयमिदं शास्त्रं दीक्षां कृत्वा यथाविधि ।
शास्त्रार्थश्चानुवक्तव्यो मन्त्रार्थैश्च समन्वितः ॥२१६॥
एतच्छास्त्रोक्तविधिना योऽर्चयत्यच्युतं विभुम् ।
सोऽचिराल्लभते स्वेष्टान् सर्वार्थांश्च द्विजोत्तमः ॥२१७॥

इति श्रीपाञ्चरात्रे ईश्वरसंहितायां कुण्डस्रुक्स्रुव–
लक्षणहविःपाकविधानं नाम

पञ्चविंशोऽध्यायः ॥

—O—

ईश्वरसंहिता समाप्ता